This is a reproduction of a library book that was digitized by Google as part of an ongoing effort to preserve the information in books and make it universally accessible.

Google books

https://books.google.com

THE PANDIT.

A MONTHLY JOURNAL

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

VOLUME X.

BENARES:
PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS & CO.,

Digitized by Google

Digitized by Google

INDEX TO VOLUME X.

	Pages.
Ánandavrindávana-champú,	9, 33, 59, 83, 107, 131, 155, 178, 202, 228, 251, 275.
Bhúmiká or Preface to the translation of Locke's Essay,	259.
Jívanavṛittánta or Obituary Notice of Pandit Rájaráma Śástrí,	121.
Jñánasiddhántachandriká a translation of Bp. Berkeley's Principles of Human Knowledge,	22, 67, 92, 135, 163.
Kaśiká,	1, 25, 51, 75, 99, 123, 147, 171, 195, 219, 243, 267.
Letter to the Editor of the Pandit about the Rev. P. K. M. Banerjea's Dialogues on Hindu Philosophy,	23.
Prophecy in favour of the British Government,	146.
Sánkhyatattvapradípa an English translation of Sañkhyatattvapradípa,	263.
Sarvadarśanasañgraha translated into English,	41, 69, 95, 115, 137, 207, 236, 286.
Śulvasútra of Baudháyana with the commentary of Dvárakanáthayajvan, translated into English,	17, 44, 72, 139, 166, 186, 209.
Translation of Locke's Essay on the Human Understanding, Book III,	260, 283.

Supplement.

A Catalogue of MSS. in the Library of the Benares Sanskrit College.

Digitized by Google

Digitized by Google

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 109. Benares, June 1st, 1875. Vol. X.

काशिकायाः

॥ तृतीयाध्यायस्य चतुर्थः पादः ॥

लस्य ॥ ७७ ॥

लस्येत्ययमधिकारः । अकार उच्चारणार्थः । लकारमात्रं स्थानित्वेनाधिक्रियते । यदित ऊर्ध्वमनुक्रमिष्यामो लस्येत्येवं तद्वेदितव्यम् । किं चेदं लस्येति । दश लकारा अनुबन्धविशिष्टा विहिता अर्थविशेषे कालविशेषे च, तेषां विशेषकाननुबन्धानुत्सृज्य यत्सामान्यं तद्गृह्यते । षट्टित, श्चत्वारो ङितः । अक्षरसमाम्नायवदानुपूर्व्या कथ्यन्ते । लट् । लिट् । लुट् । लृट् । लोट् । लेट् । लङ् । लिङ् । लुङ् । लृङ् । इति । लकारमात्रस्य ग्रहणं कस्माच्च भवति लुनाति चूडाल इति । धात्वधिकारोऽनुवर्त्तते । कर्त्रादयश्च विशेषकाः ॥

तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ् ॥ ७८ ॥

लस्य तिबादय आदेशा भवन्ति । तिप्सिप्मिपां पकारः स्वरार्थः । इटष्टकार इटोदिति विशेषणार्थः । तिबादिभिरादेशैस्तुल्यत्वाच्च देशविध्यर्थः । महिङो ङकारस्तिङिति प्रत्याहारग्रहणार्थः । पचति । पचतः । पचन्ति । पचसि । पचथः । पचथ । पचामि । पचावः । पचामः । पचते । पचेते । पचन्ते । पचसे । पचेथे । पचध्वे । पचे । पचावहे । पचामहे । एवमन्येष्वपि लकारेषूदाहार्यम् ॥

टित आत्मनेपदानां टेरे ॥ ७९ ॥

टितो लकारस्य स्थाने यान्यात्मनेपदानि तेषां टेरेकारादेशो भवति । तथा चैवोदाहृतम् । इह कस्माच्च भवति पचमानो यजमानः । प्रकृतैस्तिबादिभिरात्मनेपदानि विशेष्यन्ते ॥

थासस्से ॥ ८० ॥

टित इत्येव । टितो लकारस्य यस्थासस्तस्य सेशब्द आदेशो भवति । पचसे । पेचिषे । पक्तासे । पक्ष्यसे ॥

लिटस्तझयोरेशिरेच् ॥ ८१ ॥

लिडादेशयोस्तझयोर्यथासंख्यमेश् इरेच् इत्येतावादेशौ भवतः । शकारः सर्वादेशार्थः । चकारः स्वरार्थः । पेचे । पेचाते । पेचिरे । लेभे । लेभाते । लेभिरे ॥

परस्मैपदानां णलतुसुस्थलथुसणल्वमाः ॥ ८२ ॥

लिट इत्येव । लिडादेशानां परस्मैपदसंज्ञकानां यथासंख्यं तिबादीनां णलादयो नवादेशा भवन्ति । लकारः स्वरार्थः । णकारो वृद्ध्यर्थः । पपाच । पेचतुः । पेचुः । पेचिथ । पपक्थ । पेचथुः । पेच । पपाच । पपच । पेचिव । पेचिम ॥

विदो लटो वा ॥ ८३ ॥

परस्मैपदानामित्येव । विद ज्ञाने । अस्माद्धातोः परेषां लडादेशानां परस्मैपदानां णलादयो नव विकल्पेनादेशा भवन्ति । वेद । विदतुः । विदुः । वेत्थ । विदथुः । विद । वेद । विद्व । विद्म । न च भवति । वेत्ति । वित्तः । विदन्ति । वेत्सि । वित्थः । वित्थ । वेद्मि । विद्वः । विद्मः ॥

ब्रुवः पञ्चानामादित आहो ब्रुवः ॥ ८४ ॥

परस्मैपदानामित्येव । लटो वेति च । ब्रुवः परस्य लटः परस्मैपदानां पञ्चानामादिभूतानां पञ्चैव णलादय आदेशा भवन्ति, तत्संनियोगेन च ब्रुव आहशब्द आदेशो भवति ।

Digitized by Google

आह । आहतुः । आहुः । आत्थ । आहथुः । न च भवति । ब्रवीति । ब्रूतः । ब्रुवन्ति । ब्रवीषि । ब्रूथः । पञ्चानामिति किम् । ब्रूथ । ब्रवीमि । ब्रूवः । ब्रूमः । आदित इति किम् । परेषां मा भूत् । ब्रुव इति पुनर्वचनं स्थान्यर्थं, परस्मैपदानामेव हि स्यात् ।

लोटो लङ्वत् ॥ ८५ ॥

अतिदेशो ऽयम् । लोटो लङ्वत्कार्यं भवति । तामादयस्सलोपश्च । पचताम् । पचतम् । पचत । पचाव । पचाम । अडाटौ कस्मान्न भवतः, तथा झेर्जुसादेशो लङः शाकटायनस्यैवेति । यान्तु । वान्तु । विदो लटो वेत्यतो वाग्रहणमनुवर्तते । सा च व्यवस्थितविभाषा भविष्यति ॥

एरुः ॥ ८६ ॥

लोट इत्येव । लोडादेशानामिकारस्य उकारादेशो भवति । पचतु । पचन्तु ॥ हिन्योरुत्वप्रतिषेधो वक्तव्यः ॥ * ॥ न वोच्चारणसामर्थ्यात् । अथ वा वेति वर्तते, सा च व्यवस्थितविभाषा ॥

सेर्ह्यपिच्च ॥ ८७ ॥

लोट इत्येव । लोडादेशस्य सेर्हि इत्ययमादेशो भवति, अपिच्च भवति । स्थानिवद्भावात्पित्त्वं प्राप्तं प्रतिषिध्यते । लुनीहि । पुनीहि । राध्नुहि । तक्ष्णुहि ॥

वा छन्दसि ॥ ८८ ॥

अपित्त्वं विकल्प्यते । आदेशश्छन्दसि विषये हिशब्दो वा ऽपिद्भवति । युयोध्यस्मज्जुहुराणमेनः । प्रीणाहि । प्रीणीहि * ॥

मेर्निः ॥ ८९ ॥

लोट इत्येव । लोडादेशस्य मेर्निरादेशो भवति । उत्वलोपयोरपवादः । पचानि । पठानि ॥

आमेतः ॥ ९० ॥

लोट इत्येव । लोट्संबन्धिन एकारस्य आमित्ययमादेशो भवति । पचताम् । पचेताम् । पचन्ताम् ॥

सवाभ्यां वामौ ॥ ९१ ॥

लोट इत्येव । सकारवकाराभ्यामुत्तरस्य लोट्संबन्धिन एकारस्य यथासंख्यं व अम् इत्येतावादेशौ भवतः । आमोपवादः । पचस्व । पचध्वम् ॥

आडुत्तमस्य पिच्च ॥ ९२ ॥

लोट इत्येव । लोट्संबन्धिन उत्तमपुरुषस्याडागमो भवति, स चोत्तमपुरुषः पिद्भवति । करवाणि । करवाव । करवाम । करवै । करवावहै । करवामहै ॥

एत ऐ ॥ ९३ ॥

लोडुत्तमस्येति वर्तते । लोडुत्तमसंबन्धिन एकारस्य ऐकारादेशो भवति । आमोपवादः । करवै । करवावहै । करवामहै । इह कस्मान्न भवति । पचावेदं, पचामेदम् । बहिरङ्गलक्षणत्वाद्गुणस्य ॥

लेटो ऽडाटौ ॥ ९४ ॥

लेटो ऽडाटावागमौ भवतः पर्यायेण । जोषिषत् । तारिषत् । मन्दिषत् । पताति दिद्युत् । उदधिं च्यावयाति ॥

आत ऐ ॥ ९५ ॥

लेट इत्येव । लेट्संबन्धिन आकारस्य ऐकारादेशो भवति । प्रथमपुरुषमध्यमपुरुषात्मनेपदद्विवचनयोः । मन्त्रयैते । मन्त्रयैथे । करवैते । करवैथे । आटः कस्मान्न भवति । विधानसामर्थ्यात् ॥

वैतो ऽन्यत्र ॥ ९६ ॥

लेट इत्येव । लेट्संबन्धिन एकारस्य वा ऐकारादेशो भवति । अन्यत्रेत्यनन्तरो विधिरपेक्ष्यते । आत ऐ इत्येतद्विषयं वर्जयित्वा एत ऐ भवति । सप्ताहानि शयै । अहमेव पशूनामीशै । मदया एव वो ग्रहा गृह्यान्तै । मद्वैवत्यान्येव वः पात्राण्युच्यान्तै । न च भवति । यत्र क्व च ते मनो दक्षं दधस उत्तरम् । अन्यत्रेति किम् । मन्त्रयैते । मन्त्रयैथे ॥

इतश्च लोपः परस्मैपदेषु ॥ ९७ ॥

लेट इत्येव । लेट्संबन्धिन इकारस्य परस्मैपदविषयस्य लोपो भवति । वानुवृत्तेः पक्षे श्रवणमपि भवति । जोषिषत् । तारिषत् । मन्दिषत् । न च भवति । पताति दिद्युत् । उदधिं च्यावयति । परस्मैपदग्रहणमिड्वहिमहिङां मा भूत् ॥

स उत्तमस्य ॥ ९८ ॥

लेट इत्येव वेति च । लेट्संबन्धिन उत्तमपुरुषस्य सकारस्य वा लोपो भवति । करवाव । करवाम । न च भवति । करवावः । करवामः । उत्तमग्रहणं पुरुषान्तरे मा भूत् ॥

नित्यं ङितः ॥ ९९ ॥

लेट इति निवृत्तम् । ङितो लकारस्य य उत्तमस्तस्य नित्यं सकारस्य लोपो भवति । अपचाव । अपचाम । नित्यग्रहणं विकल्पनिवृत्त्यर्थम् ॥

इतश्च ॥ १०० ॥

ङित इत्येव । ङिल्लकारसंबन्धिन इकारस्य नित्यं लोपो भवति । अपचत् । अपाचीत् । परस्मैपदेष्वित्येव । अपचावहि । अपचामहि ॥

* युयुधि । युयोधि । जुहुधि । इति पुस्तकान्तरे ऽधिकम् ।

Digitized by Google

तस्थस्थमिपां तान्तंतामः ॥ १०१ ॥

ङित इत्येव । ङिल्लकारसंबन्धिनां चतुर्णां यथासंख्यं तामादय आदेशा भवन्ति । अपचताम् । अपचतम् । अपचत । अपचम् । अपाक्ताम् । अपाक्तम् । अपाक्त । अपाक्षम् ॥

लिङस्सीयुट् ॥ १०२ ॥

लिङादेशानां सीयुडागमो भवति । टकारो देशविध्यर्थः । उकार उच्चारणार्थः । पचेत । पचेयाताम् । पचेरन् । पक्षीष्ट । पक्षीयास्ताम् । पक्षीरन् ॥

यासुट् परस्मैपदेषूदात्तो ङिच्च ॥ १०३ ॥

लिङ इत्येव । परस्मैपदविषयस्य लिङो यासुडागमो भवति, सीयुटोपवादः, स चोदात्तो भवति, ङिच्च । आगमानुदात्तत्वे प्राप्ते, ङित्त्वं तु लिङ एव विधीयते, तत्र तत्कार्याणां संभवाद्, नागमस्य । कुर्यात् । कुर्याताम् । कुर्युः । स्थानिवद्भावादेव लिङादेशस्य ङित्त्वे सिद्धे यासुटो ङिद्वचनं ज्ञापनार्थं लकाराश्रयङित्त्वमादेशानां न भवतीति । अचिनवम् । अकरवम् ॥

किदाशिषि ॥ १०४ ॥

आशिषि यो लिङ् तस्य यासुडागमो भवति, स चोदात्तः, किद्वद्भवति । प्रत्ययस्यैवेदं कित्त्वं नागमस्य, प्रयोजनाभावात् । ङित्त्वे प्राप्ते कित्त्वं विधीयते । गुणवृद्धिप्रतिषेधस्तुल्यः, संप्रसारणं जागर्तेर्गुणे च विशेषः । इष्यात् । इष्यास्ताम् । इष्यासुः । जागर्यात् । जागर्यास्ताम् । जागर्यासुः । आशिषीति किम् । वच्यात् । जागृयात् ॥

झस्य रन् ॥ १०५ ॥

लिङ इत्येव । झस्य लिङादेशस्य रन्नित्ययमादेशो भवति । झोन्तापवादः । पचेरन् । यजेरन् । कृषीरन् ॥

इटोऽत् ॥ १०६ ॥

लिङादेशस्य इटोऽदित्ययमादेशो भवति । पचेय । यजेय । कृषीय । हृषीय । तकारस्येत्संज्ञाप्रतिषेधः प्राप्नोति न विभक्तौ तुस्मा इति । नैवायमादेशावयवस्तकारः, किं तर्हि मुखसुखार्थं उच्चार्यते । आगमस्येटो ग्रहणं न भवति, अर्थवद्ग्रहणे नानर्थकस्येति ॥

सुट् तिथोः ॥ १०७ ॥

लिङ इत्येव । लिङ्संबन्धिनोस्तकारथकारयोः सुडागमो भवति । तकारथकारावागमिनौ । लिङ् तद्विशेषणम् । सीयुटस्तु लिङेवागमी । तेन भिन्नविषयत्वात्सुटा बाधनं न भवति । तकारे इकार उच्चारणार्थः । कृषीष्ट । कृषीयास्ताम् । कृषीरन् । कृषीष्ठाः । कृषीयास्थाम् ॥

झेर्जुस् ॥ १०८ ॥

लिङ इत्येव । लिङादेशस्य झेर्जुस् आदेशो भवति । झोन्तापवादः । पचेयुः । यजेयुः ॥

सिजभ्यस्तविदिभ्यश्च ॥ १०९ ॥

अलिङर्थ आरम्भः । सिचः परस्य अभ्यस्तसंज्ञकेभ्यो वेत्तेश्चोत्तरस्य जुस् आदेशो भवति । अभ्यस्तविदिग्रहणमसिजर्थम् । ङित इति चानुवर्त्तते । सिचस्तावत् । अकार्षुः । अहार्षुः । अभ्यस्तात् । अबिभयुः । अजिह्रयुः । अजागरुः । विदेः । अविदुः ॥

आतः ॥ ११० ॥

सिज्ग्रहणमनुवर्त्तते । सिच आकारान्ताच्च परस्य झेर्जुसादेशो भवति । कथमाभ्यामानन्तर्यं, सिज्लुकि कृते प्रत्ययलक्षणेन सिचोनन्तरः श्रुत्या चाकारान्तादिति । अदुः । अधुः । अस्थुः । तकारो मुखसुखार्थः । पूर्वेणैव सिद्धे नियमार्थं वचनम् । आत एव सिज्लुगन्ताच्चान्यस्मादिति । अभूवन् । प्रत्ययलक्षणेन जुस्प्राप्तः प्रतिषिध्यते । तुल्यजातीयापेक्षत्वाच्चियमस्य । श्रूयमाणे हि सिचि भवत्येव । अकार्षुः । अहार्षुः ॥

लङः शाकटायनस्यैव ॥ १११ ॥

आत इत्येव । आकारान्तादुत्तरस्य लङादेशस्य झेर्जुसादेशो भवति शाकटायनस्याचार्यस्य मतेन । अयुः । अवुः । अन्येषां मते । अयान् । ननु ङित इत्यनुवर्त्तते । अत्र लङेवाकारान्तादनन्तरो ङित्संभवति नान्यः, तत्किं लङ्ग्रहणेन । एवं तर्हि लङेव यो लङ् विहितस्तस्य यथा स्यात् । लङ्वद्भावेन यस्तस्य मा भूत् । लोटो लङ्वदिति । यान्तु । वान्तु । सिजभ्यस्तविदिभ्यश्चेत्ययमपि झेर्जुस् लोटो न भवति । बिभ्यतु । जाग्रतु । विदन्तु । जुस्भावमात्रं हि मुख्येन लङा विशेष्यते । एवकार उत्तरार्थः ॥

द्विषश्च ॥ ११२ ॥

लङः शाकटायनस्यैवेत्येव । द्विषः परस्य लङादेशस्य झेर्जुसादेशो भवति शाकटायनस्याचार्यस्यमतेन । अद्विषुः । अन्येषां मते । अद्विषन् ॥

तिङ्शित्सार्वधातुकम् ॥ ११३ ॥

तिङः शितश्च प्रत्ययाः सार्वधातुकसंज्ञा भवन्ति । नयति । स्वपिति । रोदिति । पचमानः । यजमानः । सार्वधातुकप्रदेशाः सार्वधातुके यगित्येवमादयः ॥

आर्द्धधातुकं शेषः ॥ ११४ ॥

तिङः शितश्च वर्जयित्वा ऽन्यः प्रत्ययः शेषो धातुसंशब्दनेन विहित आर्द्धधातुकसंज्ञो भवति । लविता । लवि-

तुम् । लवितव्यम् । धातोरित्येव । वृक्षत्वं वृक्षता ऽस्ति । लूभ्याम् । लूभिः । जुगुप्सते ॥

लिट् च ॥ ११५ ॥

लिडादेशस्तिङार्द्धधातुकसंज्ञो भवति । सार्वधातुकसंज्ञाया अपवादः । पेचिथ । शेकिथ । जग्ले । मम्ले । ननु चैकसंज्ञाधिकारादन्यत्र समावेशो भवति । सत्यम् । इह त्वेवकारो ऽनुवर्त्तते, स नियमं करिष्यति ॥

लिङाशिषि ॥ ११६ ॥

आशिषि विषये यो लिङ् स आर्द्धधातुकसंज्ञो भवति । सार्वधातुकसंज्ञाया अपवादः । समावेशश्चैवकारानुवृत्तेर्न भवति । लविषीष्ट । पविषीष्ट । आशिषीति किम् । लुनीयात् । पुनीयात् ॥

छन्दस्युभयथा ॥ ११७ ॥

छन्दसि विषये उभयथा भवति । सार्वधातुकमार्द्धधातुकं च । किं लिङेवानन्तरः संबध्यते । नैतदस्ति । सर्वमेव प्रकरणमपेक्ष्यैतदुच्यते । तिङ्शिदादि छन्दस्युभयथा भवति । वर्धन्तु त्वा सुष्टुतयः । आर्धधातुकत्वाणिलोपः । वर्धयन्त्विति प्राप्ते । शेषं च सार्वधातुकम् । स्वस्तये नावमिवारुहेम । लिङः सार्वधातुकत्वादस्तेर्भूभावो न भवति । लिट् सार्वधातुकम् । ससृवांसो विशृण्विरे । सोममिन्द्राय सुन्विरे । लिङ् उभयथा भवति । उपस्थेयाम शरणं बृहन्तम् । सार्वधातुकत्वाल्लिङः सलोपः । आर्द्धधातुकत्वादेत्वम् । व्यत्ययो बहुलमित्यस्यैवायं प्रपञ्चः ॥

इति श्रीजयादित्यविरचितायां काशिकायां वृत्तौ तृतीयस्याध्यायस्य चतुर्थःपादः ॥ समाप्तश्च तृतीयोध्यायः ॥

काशिकायाः

चतुर्थाध्यायस्य प्रथमः पादः ॥

ङ्याप्प्रातिपदिकात् ॥ १ ॥

अधिकारोयम् । यदित ऊर्ध्वमनुक्रमिष्याम आपञ्चमाध्यायपरिसमाप्तेर्ङ्याप्प्रातिपदिकादित्येवं तद्वेदितव्यम् । स्वादिषु कप्पर्यन्तेषु प्रकृतिरधिक्रियते । ङीब्ङीप्ङीनां सामान्येन ग्रहणं ङीति । टाब्डाप्चापामाबिति । प्रातिपदिकमुक्तमर्थवत्कृत्तद्धितसमासाश्चेति । तेषां समाहारनिर्देशो ङ्याप्प्रातिपदिकादिति । यद्यपि च प्रत्ययपरत्वेन पारिशेष्यादियमेव प्रकृतिर्लभ्यते, तथापि वृद्धावृद्धावर्णस्वरद्व्यज्लक्षणप्रत्ययविधौ तत्संप्रत्ययार्थं ङ्याप्प्रातिपदिकग्रहणं कर्त्तव्यम् । इतरथा हि समर्थविशेषणमेतत्स्यात् । अथ ङ्याब्ग्रहणं किं, न प्रातिपदिकग्रहणेन लिङ्गविशिष्टस्यापि ग्रहणं भवतीत्येव सिद्धम् । नैतदस्ति । स्वरूपविधिविषये परिभाषेयं प्रातिपदिकस्वरूपग्रहणे सति लिङ्गविशिष्टग्रहणं भवतीति । तथा च युवाखलतिपलितवलिनजरतीभिरिति ज्ञापकमस्यास्तादृशमेव । किं च तदन्तात्तद्धितविधानार्थं ङ्याब्ग्रहणम् । कालितरा । हरिणितरा । खट्वातरा । मालातरा । इति । विप्रतिषेधात्तद्धितबलीयस्त्वं स्यात् ॥

स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् ॥ २ ॥

ङ्याप्प्रातिपदिकादित्यधिकृतम् । ङ्याप्प्रातिपदिकात् स्वादयः प्रत्यया भवन्ति । उकारादयो ऽनुबन्धा यथायोगमुच्चारणविशेषणार्थाः । पकारः सुबिति प्रत्याहारार्थः । संख्याकर्मादयश्च स्वादीनामर्थाः शास्त्रान्तरेण विहितास्तेन सहास्यैकवाक्यता । ङ्यन्तात्तावत् । कुमारी । गौरी । शार्ङ्गरवी । ङीब्ङीष्ङीनां क्रमेणोदाहरणम् । कुमारी । कुमार्यौ । कुमार्यः । कुमारीम् । कुमार्यौ । कुमारीः । कुमार्या । कुमारीभ्याम् । कुमारीभिः । कुमार्यै । कुमारीभ्याम् । कुमारीभ्यः । कुमार्याः । कुमारीभ्याम् । कुमारीभ्यः । कुमार्याः । कुमार्योः । कुमारीणाम् । कुमार्याम् । कुमार्योः । कुमारीषु । एवं गौरी शार्ङ्गरवी चोदाहार्ये । आपः खल्वपि । खट्वा । बहुराजा । कारीषगन्ध्या । टाब्डाप्चापां क्रमेणोदाहरणम् खट्वा । खट्वे । खट्वाः । खट्वाम् । खट्वे । खट्वाः । खट्वया । खट्वाभ्याम् । खट्वाभिः । खट्वायै । खट्वाभ्याम् । खट्वाभ्यः । खट्वायाः । खट्वाभ्याम् । खट्वाभ्यः । खट्वायाः । खट्वयोः । खट्वानाम् । खट्वायाम् । खट्वयोः । खट्वासु । एवं बहुराजाकारीषगन्ध्ये चोदाहार्ये । एवं प्रातिपदिकात् । दृषद् । दृषदौ । दृषदः । दृषदम् । दृषदौ । दृषदः । दृषदा । दृषद्भ्याम् । दृषद्भिः । दृषदे । दृषद्भ्याम् । दृषद्भ्यः । दृषदः । दृषद्भ्याम् । दृषद्भ्यः । दृषदः । दृषदोः । दृषदाम् । दृषदि । दृषदोः । दृषत्सु ॥

स्त्रियाम् ॥ ३ ॥

अधिकारोयम् । यदित ऊर्ध्वमनुक्रमिष्यामः स्त्रियामित्येवं तद्वेदितव्यम् । ङ्याप्प्रातिपदिकादिति सर्वाधिकारेपि प्रातिपदिकमात्रमत्र प्रकरणे संबध्यते, ङ्यापोरनेनैव विधानात् । स्त्रियामित्युच्यते केयं स्त्री नाम । सामान्यविशेषाः स्त्रीत्वादयो गोत्वादयइव बहुप्रकारा व्यक्तयः । क्व चिदाश्रयविशेषाभावादुपदेशव्यङ्ग्या एव भवन्ति, यथा ब्राह्मणत्वादयः । स्त्रीत्वं च प्रत्ययार्थः प्रकृत्यर्थविशेषणं चेत्युभयथापि प्रयुज्यते । स्त्रियामभिधेयायां स्त्रियां वा यत्प्रातिपदिकं वर्त्ततइति । वक्ष्यति । अजाद्यतष्टाप् । अजा । देवदत्ता । स्त्रियामिति किम् । अजो देवदत्तः ॥

अजाद्यतष्टाप् ॥ ४ ॥

अजादिभ्यः प्रातिपदिकेभ्यो ऽकारान्ताच्च प्रातिपदिकात् स्त्रियां टाप् प्रत्ययो भवति । पकारः स्वरसामान्यग्रहणार्थः । टकारः सामान्यग्रहणाविघातार्थः । अजा । एडका । कोकिला । चटका । अश्वा । खट्वा । देवदत्ता । तपरकरणं तत्कालार्थम् । शुभंयाः कीलालपाः ब्राह्मणी । हल्ङ्याब्भ्य इति सुलोपः स्यात् । अजादिग्रहणं तु क्व चिज्जातिलक्षणे ङीषि प्राप्ते, क्व चित्तु पुंयोगलक्षणे, क्व चित्तु पुष्पफलोत्तरपदलक्षणे, क्व चित्तु वयोलक्षणे ङीपि, क्व चिट्टिल्लक्षणे । हलन्तानां त्वप्राप्त एव कस्मिंश्चिद्दाब् विधीयते । शूद्रा चामहत्पूर्वा जातिरिति पठ्यते । तस्यायमर्थः । शूद्रशब्दष्टापमुत्पादयति जातिश्चेद्भवति । शूद्रा । पुंयोगे ङीषैव भवितव्यम् । शूद्रस्य भार्या शूद्री । महत्पूर्वस्य प्रतिषेधः । महाशूद्री । महाशूद्रशब्दो ह्याभीरजातिवचनस्तत्र तदन्तविधिना टाप् प्राप्तः प्रतिषिध्यते । ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नेति कथं तदन्तविधिः । एतदेव ज्ञापकं भवत्यस्मिन् प्रकरणे तदन्तविधिरिति, तेनातिधीवरी । अतिपीवरी । अतिभवती । इति भवति । अजा, एडका, चटका, अश्वा, मूषिकेति जातिः । बाला, होढा, पाका, वत्सा, मन्दा, विलातेति वयः । पूर्वापहरणा । अपरापहारणा । टित्, निपातनाण्णत्वम् ॥ संभस्त्राजिनशणपिण्डेभ्यः फलात् ॥ संफला । भस्त्रफला । अजिनफला । शणफला । पिण्डफला ॥ त्रिफला द्विगौ ॥ बहुव्रीहौ त्रिफली संहतिः * ॥ सत्प्राक्काण्डप्रान्तशतैकेभ्यः पुष्पात् ॥ सत्पुष्पा । प्राक्पुष्पा । काण्डपुष्पा । प्रान्तपुष्पा । शतपुष्पा । एकपुष्पा । पाककर्णेतिङीषो ऽपवादः ॥ शूद्रा चामहत्पूर्वा जातिः ॥ क्रुञ्चा । उष्णिहा । देवविशा । हलन्ताः । ज्येष्ठा । कनिष्ठा । मध्यमा । पुंयोगः । कोकिला जातिः ॥ मूलान्नञः ॥ अमूला ॥

ऋन्नेभ्यो ङीप् ॥ ५ ॥

ऋकारान्तेभ्यो नकारान्तेभ्यश्च प्रातिपदिकेभ्यः स्त्रियां ङीप् प्रत्ययो भवति । ङकारः सामान्यग्रहणार्थः । पकारः सामान्यग्रहणाविघातार्थः । कर्त्री । हर्त्री । दण्डिनी । छत्त्रिणी ॥

उगितश्च ॥ ६ ॥

उग् इत्यत्र संभवति यथाकथंचित् तदुगिच्छब्दरूपं, तदन्तात् स्त्रियां ङीप् प्रत्ययो भवति । भवती । अतिभवती । पचन्ती । यजन्ती ॥ धातोरुगितः प्रतिषेधो वक्तव्यः ॥ * ॥ उखास्रत् । पर्णध्वत् ब्राह्मणी ॥ अञ्चतेश्चोपसंख्यानम् ॥ * ॥ प्राची । प्रतीची । उदीची ॥

वनो र च ॥ ७ ॥

वन्नन्तात्प्रातिपदिकात्स्त्रियां ङीप् प्रत्ययो भवति, रेफश्चान्तादेशः । धीवरी । पीवरी । शर्वरी । परलोकदृश्वरी । ऋन्नेभ्य इत्येव ङीपि सिद्धे तत्संनियोगेन रेफविधानार्थं वचनम् ॥ वनो न हशः ॥ * ॥ प्राप्तौ ङीब्राावुभावपि प्रतिषिध्येते । सहयुध्वा ब्राह्मणी ॥

पादो ऽन्यतरस्याम् ॥ ८ ॥

पाद इति कृतसमासान्तः पादशब्दो निर्दिश्यते । पादन्तात्प्रातिपदिकादन्यतरस्यां स्त्रियां ङीप् प्रत्ययो भवति । द्विपात् । द्विपदी । त्रिपात् । त्रिपदी । चतुष्पाद् । चतुष्पदी ॥

टाबृचि ॥ ९ ॥

पाद इत्येव । ऋचीत्यभिधेयनिर्देशः । ऋचि वाच्यायां पादन्तात्प्रातिपदिकात् स्त्रियां टाप् प्रत्ययो भवति । ङीपोऽपवादः । द्विपदा ऋक् । त्रिपदा ऋक् । चतुष्पदा ऋक् । ऋचीति किम् । द्विपदी देवदत्ता ॥

न षट्स्वस्रादिभ्यः ॥ १० ॥

षट्संज्ञकेभ्यः स्वस्रादिभ्यश्च प्रातिपदिकेभ्यः स्त्रीप्रत्ययो न भवति । यो यः प्राप्नोति स सर्वः प्रतिषिध्यते । पञ्च ब्राह्मण्यः । सप्त । नव । दश । स्वस्रादिभ्यः । स्वसा । दुहिता । ननान्दा । याता । माता । तिस्रः । चतस्रः ।

षट्संज्ञानामन्ते लुप्ते टाबुत्पत्तिः कस्मान्न स्यात् ।
प्रत्याहाराच्चापा सिद्धं दोषस्त्वक्त्वे तस्माच्चोभौ ॥

मनः ॥ ११ ॥

मन्नन्तात्प्रातिपदिकात् ङीप् प्रत्ययो न भवति । ऋन्नेभ्यो ङीबिति ङीप् प्राप्तो मन इति सूत्रेण प्रतिषिध्यते । दामा । दामानौ । दामानः । पामा । पामानौ । पामानः । अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति । सीमा । सीमानौ । सीमानः । अतिमहिमा । अतिमहिमानौ । अतिमहिमानः ॥

अनो बहुव्रीहेः ॥ १२ ॥

अन्नन्ताद् बहुव्रीहेः स्त्रियां ङीप् प्रत्ययो न भवति । अनुपधालोपी बहुव्रीहिरिहोदाहरणम् । उपधालोपिनो हि विकल्पं वक्ष्यति । सुपर्वा । सुपर्वाणौ । सुपर्वाणः । सुशर्मा । सुशर्माणौ । सुशर्माणः । बहुव्रीहेरिति किम् । अतिक्रान्ता राजानमतिराजी ॥

डाबुभाभ्यामन्यतरस्याम् ॥ १३ ॥

डाप् प्रत्ययो भवति उभाभ्यां मन्नन्तात्प्रातिपदिकादनन्ताच्च बहुव्रीहेरन्यतरस्याम् । पामा । पामे । पामाः । सीमा । सीमे । सीमाः । न च भवति । पामानः । सीमानः । बहुव्रीहौ ।

---

* त्रिफलेत्यारभ्य संहतिरित्यन्तः पाठः पुस्तकान्तरे न दृश्यते ।

Digitized by Google

बहुराजा । बहुराजे । बहुराजाः । बहुतक्षा । बहुतक्षे । बहुतक्षाः । न च भवति । बहुराजानः । बहुतक्षाणः । अन्यतरस्यां ग्रहणं किमर्थम् । बहुव्रीहौ वनो र चेत्यस्यापि विकल्पो यथा स्यात् । बहुधीवा । बहुधीवरी । बहुपीवा । बहुपीवरी ॥

अनुपसर्जनात् ॥ १४ ॥

अधिकारोयम् । उत्तरसूत्रेषूपसर्जने प्रतिषेधं करोति । यदित ऊर्ध्वमनुक्रमिष्यामो ऽनुपसर्जनादित्येवं तद्वेदितव्यम् । वक्ष्यति । टिड्ढाणञिति ङीप् । कुरुचरी । मद्रचरी । अनुपसर्जनादिति किम् । बहुकुरुचरा बहुमद्रचरा मथुरा । जातेरिति ङीष् । कुक्कुटी । शूकरी । अनुपसर्जनादिति किम् । बहुकुक्कुटा बहुशूकरा मथुरा । कथं पुनरुपसर्जनात्प्रत्ययप्रसङ्गः । तदन्तविधिना । ज्ञापितं चैतदस्त्यत्र प्रकरणे तदन्तविधिरिति । तथा च प्रधानेन तदन्तविधिर्भवति । कुम्भकारी । नगरकारी । न चाणीति कृद्ग्रहणं,तद्धितोप्यणास्ति ॥

टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरप्ख्युनाम् ॥ १५ ॥

अत इति सर्वत्रानुवर्त्तते । तत्सति संभवे विशेषणं भवति । टिदादिभ्यः प्रातिपदिकेभ्यः स्त्रियां ङीप् प्रत्ययो भवति । टापो ऽपवादः । टितस्तावत् । कुरुचरी । मद्रचरी । इह कस्मान्न भवति । पचमाना । यजमाना । अनुबन्धकरत्वाल्लटः । ल्युडादिषु कथं, टित्करणसामर्थ्यात् । इतरत्र तु टेरेत्वं फलम् । पठिता विद्येति आगमटित्त्वमनिमित्तं ट्युट्युलौ तुट् चेति लिङ्गात् । ढ । सौपर्णेयी । वैनतेयी । निरनुबन्धको ढशब्दः स्त्रियां नास्तीति निरनुबन्धकपरिभाषा न प्रवर्त्तते । अण् । कुम्भकारी । नगरकारी । औपगवी । णे ऽपि क्वचिदणकृतं कार्यं भवति । चौरी । तापसी । दाण्डा मौष्टेत्यत्र न भवति । अञ् । औत्सी । औदपानी । शार्ङ्गरवाद्यञ इति पुनरञो ग्रहणं जातिलक्षणं ङीषं बाधितुम् । द्वयसच् । ऊरुद्वयसी । जानुद्वयसी । दघ्नच् । ऊरुदघ्नी । जानुदघ्नी । मात्रच् । ऊरुमात्री । जानुमात्री । तयप् । पञ्चतयी । दशतयी । ठक् । आक्षिकी । शालाकिकी । ठञ् । लावणिकी । ठक्ठञोर्भेदेन ग्रहणं ठनादिनिवृत्त्यर्थम् । कञ् । यादृशी । तादृशी । क्वरप् । इत्वरी । नश्वरी । ख्युन् । आढ्यंकरणी । सुभगंकरणी ॥ नञ्स्नञीकक्ख्युंस्तरुणतलुनानामुपसंख्यानम् ॥ * ॥ स्त्रैणी । पौंस्नी । शाक्तीकी । याष्टीकी । तरुणी । तलुनी ॥

यञश्च ॥ १६ ॥

ङीबित्येव । यञन्तात्प्रातिपदिकात् स्त्रियां ङीप् प्रत्ययो भवति । गार्गी । वात्सी ॥ अपत्यग्रहणं कर्त्तव्यम् ॥ * ॥ इह मा भूत् । द्वीपादनुसमुद्रं यञ् । द्वैप्या । पृथग्योगकरणमुत्तरार्थम् ॥

प्राचां ष्फ तद्धितः ॥ १७ ॥

यञ इत्येव । प्राचामाचार्याणां मतेन यञन्तात् स्त्रियां ष्फः प्रत्ययो भवति, स च तद्धितसंज्ञः । षकारो ङीषर्थः । प्रत्ययद्वयेनेह स्त्रीत्वं व्यज्यते । तद्धितग्रहणं प्रातिपदिकसंज्ञार्थम् । गार्ग्यायणी । वात्स्यायनी । अन्येषाम् । गार्गी । वात्सी । सर्वत्र ग्रहणमुत्तरसूत्रादिहापकृष्यते, बाधकबाधनार्थम् । आवट्याच्चापं वक्ष्यति, तमपि बाधित्वा प्राचां ष्फ एव यथा स्यात् । आवट्यायनी ॥

सर्वत्र लोहितादिकतन्तेभ्यः ॥ १८ ॥

यञ इत्येव । पूर्वेण विकल्पे प्राप्ते नित्यार्थं वचनम् । सर्वत्र लोहितादिभ्यः कतपर्यन्तेभ्यो यञन्तेभ्यः स्त्रियां ष्फः प्रत्ययो भवति । कतशब्दः स्वतन्त्रं यत्प्रातिपदिकं तदवधित्वेन परिगृह्यते कपिशब्दात्परः कपिकतेति, न प्रातिपदिकावयवः कुरुकतेति । लौहित्यायनी । शांशित्यायनी । बाभ्रव्यायणी ।

कण्वात्तु शकलः पूर्वः कतादुत्तर इष्यते ।
पूर्वोत्तरौ तदन्तादी ष्फाणौ तत्र प्रयोजनम् ॥

प्रातिपदिकेष्वन्यथा पाठः स एवं व्यवस्थापयितव्य इति मन्यते । कतन्तेभ्य इति बहुव्रीहितत्पुरुषयोरेकशेष,स्तथा कण्वादिभ्यो गोत्रइति । तत्र तत्पुरुषवृत्त्या संगृहीतो मध्यपाती शकलशब्दो यञन्तः प्रत्ययद्वयमपि प्रतिपद्यते । शाकल्यायनी । शाकल्यस्येमे छात्राः शाकलाः ॥

कौरव्यमाण्डूकाभ्यां च ॥ १९ ॥

कौरव्य माण्डूक इत्येताभ्यां स्त्रियां ष्फः प्रत्ययो भवति । कुर्वादिभ्यो ण्ये कृते ढक्च मण्डूकादित्यणि च । यथाक्रमं टाब्ङीषोरपवादः । कौरव्यायणी । माण्डूकायनी । कथं कौरवी सेना, तस्येदंविवक्षायामणि कृते भविष्यति ॥ कौरव्यमाण्डूकयोरासुरेरुपसंख्यानम् ॥ * ॥ आसुरायणी । शैषिकेष्वर्थेषु इञश्चेत्यणि प्राप्ते छप्रत्यय इष्यते ॥ आसुरीयः कल्पः ॥

वयसि प्रथमे ॥ २० ॥

कालकृतशरीरावस्था यौवनादिर्वयः । प्रथमे वयसि यत्प्रातिपदिकं श्रुत्या वर्तते ततः स्त्रियां ङीप् प्रत्ययो भवति । कुमारी । किशोरी । बर्करी । प्रथमइति किम् । स्थविरा । वृद्धा । अत इत्येव । शिशुः ॥ वयस्यचरमइति वक्तव्यम् ॥ * ॥ वधूटी । चिरण्टी । द्वितीयवयोवचनावेतौ । प्राप्तयौवना स्त्र्यभिधीयते । कथं कन्या, कन्यायाः कनीन चेति ज्ञापकात् । उत्तानशया लोहितपादिकेति नैता वयःश्रुतयः ॥

द्विगोः ॥ २१ ॥

Digitized by Google

द्विगुसंज्ञकात्प्रातिपदिकात् स्त्रियां ङीप् प्रत्ययो भवति । पञ्चपूली । दशपूली । कथं त्रिफला । अजादिषु दृश्यते ॥

अपरिमाणबिस्ताचितकम्बल्येभ्यो न तद्धितलुकि ॥ २२ ॥

पूर्वेण ङीप् प्राप्तः प्रतिषिध्यते । अपरिमाणान्ताद् द्विगोर्बिस्ताचितकम्बल्यान्ताच्च तद्धितलुकि सति ङीप् प्रत्ययो न भवति । बिस्तादीनां परिमाणार्थं ग्रहणम् । सर्वतो मानं परिमाणम् । अपरिमाणान्तात्तावत् । पञ्चभिरश्वैः क्रीता पञ्चाश्वा । दशाश्वा । तेन क्रीतम् । अध्यर्द्धपूर्वद्विगोर्लुगसंज्ञायामिति लुक् । कालः संख्या च न परिमाणम् । द्विवर्षा । त्रिवर्षा । द्वाभ्यां शताभ्यां क्रीता द्विशता । त्रिशता । बिस्तादिभ्यः । द्विबिस्ता । त्रिबिस्ता । द्व्याचिता । त्र्याचिता । द्विकम्बल्या । त्रिकम्बल्या । अपरिमाणेति किम् । द्व्याढकी । त्र्याढकी । तद्धितलुकीति किम् । समाहारे पञ्चाश्वी । दशाश्वी ॥

काण्डान्तात्क्षेत्रे ॥ २३ ॥

काण्डशब्दान्ताद् द्विगोस्तद्धितलुकि सति क्षेत्रे वाच्ये ङीप् प्रत्ययो न भवति । द्वे काण्डे प्रमाणमस्याः क्षेत्रभक्तेः । प्रमाणे द्वयसज्जिति विहितस्य तद्धितस्य प्रमाणे लो द्विगोर्नित्यमिति लुकि कृते द्विकाण्डा क्षेत्रभक्तिः । त्रिकाण्डा क्षेत्रभक्तिः । काण्डशब्दस्यापरिमाणवाचित्वात्पूर्वेणैव प्रतिषेधे सिद्धे क्षेत्रे नियमार्थं वचनम् । इह मा भूत् । द्विकाण्डी रज्जुस्त्रिकाण्डी रज्जुरिति । प्रमाणविशेषः काण्डम् ॥

पुरुषात्प्रमाणे ऽन्यतरस्याम् ॥ २४ ॥

द्विगोस्तद्धितलुकीत्येव । प्रमाणे यः पुरुषशब्दस्तदन्ताद् द्विगोस्तद्धितलुकि सति अन्यतरस्यां न ङीप् प्रत्ययो भवति । द्वौ पुरुषौ प्रमाणमस्याः परिखायाः द्विपुरुषा, द्विपुरुषी । त्रिपुरुषा, त्रिपुरुषी । अपरिमाणान्तत्वान्नित्ये प्रतिषेधे प्राप्ते विकल्पार्थं वचनम् । प्रमाणइति किम् । द्वाभ्यां पुरुषाभ्यां क्रीता द्विपुरुषा । त्रिपुरुषा । तद्धितलुकीत्येव । समाहारे द्विपुरुषी, त्रिपुरुषी ॥

बहुव्रीहेरूधसो ङीष् ॥ २५ ॥

ऊधस्शब्दान्ताद्बहुव्रीहेः स्त्रियां ङीष् प्रत्ययो भवति । ऊधसोऽनङिति समासान्ते कृते अनो बहुव्रीहेरिति डाप्प्रतिषेधयोः प्राप्तयोरिदमुच्यते । घटोध्नी । कुण्डोध्नी । बहुव्रीहेरिति किम् । प्राप्ता ऊधः, प्राप्तोधाः । अन उपधालोपिन इत्यस्यापि ङीपोयमुत्तरत्रानुवृत्तेर्बाधक इष्यते । समासान्तश्च स्त्रियामेव, इह न भवति महोधाः पर्जन्य इति ॥

संख्याव्ययादेर्ङीप् ॥ २६ ॥

पूर्वेण ङीषि प्राप्ते ङीब्विधीयते । संख्यादेरव्ययादेश्च बहुव्रीहेरूधःशब्दान्ताद् ङीप् प्रत्ययो भवति । संख्यादेस्तावत् । द्व्यूध्नी । त्र्यूध्नी । अव्ययादेः । अत्यूध्नी । निरूध्नी । आदिग्रहणं किम् । द्विविधोध्नी त्रिविधोध्नीत्यत्रापि यथा स्यात् ॥

दामहायनान्ताच्च ॥ २७ ॥

ऊधस इति निवृत्तम् । संख्याग्रहणमनुवर्त्तते नाव्ययग्रहणम् । संख्यादेर्बहुव्रीहेर्दामशब्दान्ताद्धायनशब्दान्ताच्च स्त्रियां ङीप् प्रत्ययो भवति । दामान्तात् डाप्प्रतिषेधविकल्पेषु प्राप्तेषु नित्यार्थं वचनम् । द्विदाम्नी । त्रिदाम्नी । हायनान्तादपि प्राप्ते, द्विहायनी । त्रिहायणी । चतुर्हायणी ॥ हायनो वयसि स्मृतः ॥ * ॥ तेनेह न भवति, द्विहायना शाला । त्रिहायना । चतुर्हायना ॥ णत्वमपि त्रिचतुर्भ्यां हायनस्येति वयस्येव स्मर्यते ॥

अन उपधालोपिनो ऽन्यतरस्याम् ॥ २८ ॥

बहुव्रीहेरित्येव, अन्नन्तो यो बहुव्रीहिरुपधालोपी तस्मादन्यतरस्यां ङीप् प्रत्ययो भवति । ङीपा मुक्ते डाप्प्रतिषेधौ भवतः । किमर्थं तर्हीदमुच्यते, ननु सिद्धा एव डाप्प्रतिषेधङीपः । अनुपधालोपिनो ङीप्प्रतिषेधार्थं वचनम् । बहुराज्ञा । बहुराज्ञी । बहुराजे । बहुतक्षा । बहुतक्ष्णी । बहुतक्षे । अन इति किम् । बहुमत्स्या । उपधालोपिनः किम् । सुपर्वा । सुपर्वे । सुपर्वाः । सुपर्वाणौ । सुपर्वाणः । डाप्प्रतिषेधावेवात्र भवतः ॥

नित्यं संज्ञाछन्दसोः ॥ २९ ॥

अन्नन्ताद्बहुव्रीहेरुपधालोपिनः संज्ञायां विषये छन्दसि च नित्यं ङीप् प्रत्ययो भवति । विकल्पस्यापवादः । सुराज्ञी । अतिराज्ञी नाम ग्रामः । छन्दसि । गौः पञ्चदाम्नी । एकदाम्नी । द्विदाम्नी । एकमूर्ध्नी । समानमूर्ध्नी ॥

केवलमामकभागधेयपापापरसमानार्यकृतसुमङ्गलभेषजाच्च ॥ ३० ॥

संज्ञाछन्दसोरित्येव । केवलादिभ्यः प्रातिपदिकेभ्यः संज्ञायां छन्दसि विषये स्त्रियां ङीप् प्रत्ययो भवति । केवली । केवलेति भाषायाम् । मामकी । मामिकेति भाषायाम् । मित्रावरुणयोर्भागधेयी । भागधेयेति भाषायाम् । पापी त्वियम् । पापेति भाषायाम् । उताऽपरीभ्यो मघवा विजिग्ये । अपरेति भाषायाम् । समानी प्रभृणी । समानेति भाषायाम् * ॥

* आर्यकृती, आर्यकृतेति भाषायाम् । सुमङ्गली, सुमङ्गलेति भाषायाम् । भेषजी, भेषजेति भाषायाम् । इत्यधिकं पुस्तकान्तरे ।

Digitized by Google

रात्रेश्चाजसौ ॥ ३१ ॥

जस्विषयादन्यत्र संज्ञायां छन्दसि च रात्रिशब्दात् ङीप् प्रत्ययो भवति । या रात्री सृष्टा । रात्रीभिः । अजसाविति किम् । यास्ता रात्रयः ॥ अजसादिष्विति वक्तव्यम् ॥ * ॥ रात्रिं सहोषित्वा । कथं तिमिरपटलैरवगुण्ठिताश्च रात्र्यः, ङीषयं बह्वादिलक्षणस्तत्र हि पठ्यते कृदिकारादक्तिनः, सर्वतोऽक्तिन्नर्थादित्येकइति ॥

अन्तर्वत्पतिवतोर्नुक् ॥ ३२ ॥

प्रकृतिर्निपात्यते नुगागमस्तु विधीयते । अन्तर्वत्पतिवतोर्नुग्भवति ङीप् च प्रत्ययः, स तु नकारान्तत्वादेव सिद्धः । निपातनसामर्थ्याच्च विशेषे वृत्तिर्भवति । अन्तर्वत्पतिवदिति गर्भभर्तृसंयोगे, इह न भवति । अन्तरस्यां शालायां विद्यते । पतिमती पृथिवी । अन्तर्वदिति मतुन्निपात्यते, वत्वं सिद्धम् । पतिवदिति वत्वं निपात्यते, मतुप्सिद्धः । अन्तर्वत्नी गर्भिणी । पतिवत्नी जीवत्पतिः ॥

अन्तर्वत्पतिवतोस्तु मतुब्वत्वे निपातनात् ।
गर्भिण्यां जीवत्पत्यां च वा छन्दसि तु नुग्विधिः ॥

सान्तर्वत्नी देवानुपैत् । सान्तर्वती देवानुपैत् । पतिवत्नी तरुणवत्सा । पतिवती तरुणवत्सा ॥

पत्युर्नो यज्ञसंयोगे ॥ ३३ ॥

पतिशब्दस्य नकारादेशः स्त्रियां विधीयते । ङीप् प्रत्ययस्तु नकारान्तत्वादेव सिद्धः । यज्ञसंयोगे, यज्ञेन संयोगो यज्ञसंयोगः । तत्साधनत्वात्फलग्रहीतृत्वाद्वा यजमानस्य पत्नी । पत्नि वाचं यच्छ । यज्ञसंयोगइति किम् । ग्रामस्य पतिरियं ब्राह्मणी । कथं वृषलस्य पत्नी । उपमानाद्भविष्यति ॥

विभाषा सपूर्वस्य ॥ ३४ ॥

पत्युर्न इति वर्त्तते । पतिशब्दान्तस्य प्रातिपदिकस्य सपूर्वस्यानुपसर्जनस्य स्त्रियां विभाषा नकारादेशो भवति, ङीप् तु लभ्यतएव । वृद्धपतिः । वृद्धपत्नी । स्थूलपतिः । स्थूलपत्नी । अप्राप्तविभाषेयमयज्ञसंयोगत्वात् । सपूर्वस्येति किम् । पतिरियं ब्राह्मणी ग्रामस्य ॥

नित्यं सपत्न्यादिषु ॥ ३५ ॥

सपत्न्यादिषु नित्यं पत्युर्नकारादेशो भवति, ङीप् तु लभ्यतएव । पूर्वेण विकल्पे प्राप्ते वचनम् । नित्यग्रहणं विस्पष्टार्थम् । समानः पतिरस्याः सपत्नी । एकपत्नी । समानादिष्विति वक्तव्ये समानस्य सभावार्थं वचनम् । समान । एक । वीर । पिण्ड । भ्रातृ । पुत्र ॥ दासाच्छन्दसि ॥

पूतक्रतोरै च ॥ ३६ ॥

पूतक्रतुशब्दस्य स्त्रियामैकारश्चान्तादेशो भवति ङीप् प्रत्ययः । पूतक्रतोः स्त्री पूतक्रतायी । त्रय एते योगाः पुंयोगप्रकरणे द्रष्टव्याः । यया हि पूताः क्रतवः पूतक्रतुः सा भवति ॥

वृषाकप्यग्निकुसितकुसीदानामुदात्तः ॥ ३७ ॥

वृषाकप्यादीनामुदात्त ऐकारादेशो भवति स्त्रियां ङीप् च प्रत्ययः । वृषाकपिशब्दो मध्योदात्त उदात्तत्वं प्रयोजयति । अग्न्यादिषु पुनरन्तोदात्तेषु स्थानिवद्भावादेव सिद्धम् । वृषाकपेः स्त्री वृषाकपायी । अग्नायी । कुसितायी । कुसीदायी । पुंयोगइत्येव । वृषाकपिः स्त्री ॥

मनोरौ वा ॥ ३८ ॥

ऐ उदात्त इति वर्त्तते । मनुशब्दात् स्त्रियां ङीप् प्रत्ययो भवति । औकारश्चान्तादेश ऐकारश्चोदात्तः । वाग्रहणेन द्वावपि विकल्प्येते । तेन त्रैरूप्यं भवति । मनोः स्त्री मनायी । मनावी । मनुः । मनुशब्द आद्युदात्तः ॥

वर्णादनुदात्तात्तोपधात्तो नः ॥ ३९ ॥

वेति वर्त्तते । वर्णवाचिनः प्रातिपदिकादनुदात्तान्तात्तकारोपधाद्वा ङीप् प्रत्ययो भवति, तकारस्य नकारादेशो भवति । एता । एनी । श्येता । श्येनी । हरिता । हरिणी । सर्वएते आद्युदात्ताः । वर्णानां तणतिनितान्तानामिति वचनात् । वर्णादिति किम् । प्रहृता । प्रहृता । गतिस्वरेणाद्युदात्तः । अनुदात्तादिति किम् । श्वेता । घृतादित्वादन्तोदात्तः । तोपधादिति किम् । अन्यतो ङीषं वक्ष्यति । अत इत्येव, शितिर्ब्राह्मणी ॥ पिशङ्गादुपसंख्यानम् ॥ * ॥ पिशङ्गी ॥ असितपलितयोः प्रतिषेधः ॥ * ॥ असिता । पलिता ॥ छन्दसि क्नमित्येके ॥ * ॥ असिक्नी । पलिक्नी ॥ भाषायामपीष्यते ॥ गतो गणस्तूर्णमसिक्निकानाम् ॥

अन्यतो ङीष् ॥ ४० ॥

वेति निवृत्तं, वर्णादनुदात्तादिति वर्त्तते, तोपधापेक्षमन्यत्वम् । वर्णवाचिनः प्रातिपदिकादनुदात्तान्तात् स्त्रियां ङीष् प्रत्ययो भवति । स्वरे विशेषः । सारङ्गी । कल्माषी । शबली । वर्णादित्येव । खट्वा । अनुदात्तादित्येव । कृष्णा । कपिला ॥

षिद्गौरादिभ्यश्च ॥ ४१ ॥

ङीषनुवर्त्तते । षिद्भ्यः प्रातिपदिकेभ्यो गौरादिभ्यश्च स्त्रियां ङीष् प्रत्ययो भवति । शिल्पिनि ष्वुन् । नर्त्तकी । खनकी । रजकी । गौरादिभ्यः । गौरी । मत्सी । गौर । मत्स्य । मनुष्य । शृङ्ग । हय । गवय । मुकय । ऋष्य । पुट । द्रुण । द्रोण । हरिण । कण । पटर । उकण । आमलक । कुवल । बदर । बिम्ब । तर्कार । शर्कार । पुष्कर । शिखण्ड । सुषम ।

Digitized by Google

सलन्द । गडुज । आनन्द । सुपाट । सुगेठ । आढक । शष्कुल । सूर्म । सुब । सूर्य्य । पूष । मूष । घातक । सकलूक । मल्लक । मालक । मालत । साल्वक । वेतस । अतस । पृस । मह । मठ । छेद । श्वन् । तक्षन् । अनडुही । अनड्वाही । एषणः करणे । देह । काकादन । गवादन । तेजन । रजन । लवण । पान । मेध । गौतम । आप । स्थूण । भौरि । भौलिकि । भौलिङ्गि । औद्गाहमानि । आलिङ्गि । आपिच्छिक । आरट । टोट । नट । नाट । मूलाट । शातन । पातन । पावन । आस्तरण । अधिकरण । एत । अधिकार । आग्रहायणी । प्रत्यवरोहिणी । सेचन । सुमङ्गलात्संज्ञायाम् । सुन्दर । मण्डल । पट । पिण्ड । विटक । कुर्द । गूर्द । पाण्ड । लोफाण्ड । कन्दर । कन्दल । तरुण । तलुन । बृहत् । महत् । सौधर्म्म । रोहिणी, नक्षत्रे । रेवती, नक्षत्रे । विकल । निष्कल । पुष्कल । कटाच्छ्रोणिवचने * । पिप्पल्यादयश्च । पिप्पली । हरीतकी । कोशातकी । शमीकरीरी । पृथिवी । क्रोष्टी । मातामह । पितामह । मातामहपितामहयोर्मातरि षिच्चेति षित्त्वादेव सिद्धे ज्ञापनार्थं वचनम् । अनित्यः षिल्लक्षणो ङीषिति, तेन दंष्ट्रेत्युपपन्नं भवति ॥

जानपदकुण्डगोणस्थलभाजनागकालनीलकुशकामुककबराद्वृत्त्यमत्रावपनाकृत्रिमाश्राणास्थौल्यवर्णानाच्छादनायोविकारमैथुनेच्छाकेशवेशेषु ॥ ४२ ॥

जानपदादिभ्य एकादशभ्यः प्रातिपदिकेभ्य एकादशसु वृत्त्यादिष्वर्थेषु यथासंख्यं ङीष् प्रत्ययो भवति । जानपदी भवति वृत्तिश्चेत् । जानपदी अन्या, स्वरे विशेषः । उत्सादिपाठादञि कृते ङीपाद्युदात्तत्वं भवति । कुण्डी भवति, अमत्रं चेत् । कुण्डान्या । गोणी भवत्यावपनं चेत् । गोणान्या । स्थली भवति अकृत्रिमा चेत् । स्थलान्या । भाजी भवति श्राणा चेत्, पक्वेत्यर्थः । भाजा ऽन्या । नागी भवति स्थौल्यं चेत् । नागा ऽन्या । नागशब्दो गुणवचनः स्थौल्ये ङीषमुत्पादयति, अन्यत्र गुणएव टापम् । जातिवचनात्तु जातिलक्षणो ङीषेव भवति । नागी । काली भवति वर्णश्चेत् । काला ऽन्या । नीली भवति अनाच्छादनं चेत् । नीला ऽन्या । न च सर्वस्मिन्ननाच्छादन इष्यते, किं तर्हि नीलादोषधौ, प्राणिनि च । नीली ओषधिः । नीली गौः । नीली वडवा ॥ संज्ञायां वा ॥ नीली । नीला । कुशी भवत्ययोविकारश्चेत् । कुशान्या । कामुकी भवति मैथुनेच्छा चेत् । कामुकान्या । मैथुनेच्छावती भण्यते, नेच्छामात्रम् । कबरी भवति केशवेशश्चेत् । कबरान्या ॥

* पिङ्गल । भठ । वहन । कन्द । काकण ।
एते शब्दा अत्र गणे पुस्तकान्तरे ऽधिकाः ॥

शोणात्प्राचाम् ॥ ४३ ॥

शोणशब्दात्प्राचामाचार्याणां मतेन स्त्रियां ङीष् प्रत्ययो भवति । शोणी, शोणा वडवा ॥

वोतो गुणवचनात् ॥ ४४ ॥

गुणमुक्तवान् गुणवचनः । गुणवचनात्प्रातिपदिकादुकारान्तात् स्त्रियां वा ङीष् प्रत्ययो भवति । पटुः । पट्वी । मृदुः । मृद्वी । उत इति किम् । शुचिरियं ब्राह्मणी । गुणवचनादिति किम् । आखुः ॥ वसुशब्दाद्गुणवचनाद् ङीबाद्युदात्तार्थम् ॥ * ॥ वस्वी ॥ खरुसंयोगोपधात्प्रतिषेधो वक्तव्यः ॥ * ॥ खरुरियं ब्राह्मणी । पाण्डुरियं ब्राह्मणी ॥

सत्त्वे निविशतेऽपैति पृथग् जातिषु दृश्यते ।
आधेयश्चाक्रियाजश्च सो ऽसत्त्वप्रकृतिर्गुणः ॥

बह्वादिभ्यश्च ॥ ४५ ॥

बहु इत्येवमादिभ्यः प्रातिपदिकेभ्यः स्त्रियां वा ङीष् प्रत्ययो भवति । बहुः । बह्वी । बहु । पद्धति । अङ्कति । अञ्चति । अंहति । वहति । शकटि । शक्ति, शस्त्रे । शारि । वारि । गति । अहि । कपि । मुनि । यष्टि ॥ इतः प्राण्यङ्गात् ॥ कृदिकारादक्तिनः ॥ सर्व्वतोऽक्तिन्नर्थादित्येके ॥ चण्ड । अराल । कमल । कृपाण । विकट । विशाल । विशङ्कट । भरुज । ध्वज ॥ चन्द्रभागान्नद्याम् ॥ कल्याण । उदार । पुराण । अहन् । बहुशब्दो गुणवचन एव तस्येह पाठ उत्तरार्थः ॥

॥ अथानन्दवृन्दावनचम्पूकाव्यस्य ॥

॥ षष्ठस्तबकावशेषः ॥

व्रजेश्वर तव संपदा संपदास्माकी मानवं न बर्हिष्ठसौभाग्यं क्वापि भवत्सदृशमीक्षामहे ॥ ६६ ॥

भवत्सदृशं बर्हिष्ठसौभाग्यं मानवं न वयं कुत्रापि पश्यामः ॥ ६६ ॥

महेच्छ यस्य तवायमीदृशः सकलजनकाकुमारः कुमारः समजनि ॥ ६७ ॥

महेच्छ हे महाशय, “महेच्छस्तु महाशय” इत्यमरः । काकुमारः शोकादिकृतदुःखहन्ता ॥ ६७ ॥

समजनिकालमेवास्य जायमानान्यरिष्टान्यरिष्टान्तरारभ्य किमद्यप्रभृति न दृश्यन्ते ॥ ६८ ॥

जन्मसमकालमेव व्याप्य । अरिष्टान्तः सूतिकागृहमध्यत एवारभ्य, “अरिष्टं सूतिकागृह”मित्यमरः ॥ ६८ ॥

Digitized by Google

प्रथमं निशाचरी चरीकरीति स्म प्रलयमिव, ततः परमनोनिपातो मनोनिपातोपमः सर्वेषां, तदनु तृणावर्तवात्या वात्याहितं किं न चकार, सांप्रतमुच्चैरनयोरनयो निपातेन संवृत्तः ॥ ६६ ॥

चरीकरीति स्म· अतिशयेन कृतवती । अनोनिपातः शकटनिपातः । तृणावर्ताख्यवात्या वा किमत्याहितं न चकार, "अत्याहितं महाभीति"रित्यमरः । अनयोः प्रस्तुतत्वादर्जुनवृक्षयोः, निपातेन, उच्चैरनयो महाननयः ॥ ६९ ॥

तत् किमत्र निदानं, नास्य जन्मलग्नलग्नमस्ति किमपि दूषणं,सर्वे एव शुभमात्रग्रहग्रहाः, तथापि लोकोत्तरमेवादृष्टं दृष्टं च,येनैतज्जगत्पत्यंशकलितमपत्यं शकलितमहापदकस्मादेव देवदुर्लभं संपादितमस्ति ॥ ७० ॥

ग्रहाः सूर्याद्या नव । दृष्टं फलदर्शनेन साक्षात्कृतं च । येन· अदृष्टेन· अकस्मादेव· एतत् कृष्णाख्यमपत्यं संपादितमस्ति । जगत्पतेर्नारायणस्यांशेन कलितं कृतं, गर्गवाक्यप्रामाण्यादिति भावः । अत एव शकलिता खण्डिता महती· आपद्· विपत्तिर्येन तत् ॥ ७० ॥

तदस्माभिरिदमनुमितमस्यैव स्थलस्य दूषणमेतत्, तदिदमपहाय हायनमध्ये सर्वदा सुखदं सर्वर्तुगुणवृन्दावनं वृन्दावनं नाम वनं याम: ॥ ७१ ॥

तद्दिन एव यियासुत्वेऽपि हायनमध्ये इत्युक्तिस्तारल्यप्रकाशसंकोचेन । सर्वेषामृतूनां वसन्तादीनां गुणवृन्दम्· अवति स्वस्मिन् रक्षतीति तत् । यामो यास्यामः, वर्तमानसामीप्ये लट् ॥ ७१ ॥

यदतिबहुतृणं, बहुतृणं भवति यदासादितवतां त्रैलोक्यलक्ष्मीः ॥ ७२ ॥

यद् वृन्दावनम् । अतिबहूनि तृणानि यत्र तत्, गवां सुखदत्वार्थमित्यर्थः । न केवलमेतावदेव, किंतु यत्· आसादितवतां प्राप्तवतां जनानां त्रैलोक्यलक्ष्मीः· त्रैलोक्यसंपत्तिर्बहुतृणं तृणतुल्या भवति । ईषदसमाप्त्यर्थे "विभाषा सुपो बहु"जित्यादिना पुरस्तद्बहुच् प्रत्ययः, "लघुर्बहुतृणं नर" इतिवत् प्रकृतिवल्लिङ्गत्वम् ॥ ७२ ॥

लक्ष्मीश्च यत्र निरन्तरकृतनिवासेव सेवमाना वर्तते, यत्र गोवर्धनो गोवर्धनो नाम गिरिः ॥ ७३ ॥

गोवर्धनो गवां वृद्धिकरः ॥ ७३ ॥

यदि भवति मतिर्मतिमतां वर भवतो भव-तोषप्रदोऽस्माकं तदा तदासादनेन ॥ ७४ ॥

तदा, तदासादनेन तत्र गमनेन, अस्माकं तोषप्रदो भव ॥ ७४ ॥

तदा तदाकर्ण्य घोषाधीशो धीशोऽधितस्तानुवाच ॥ ७५ ॥

धीशोऽधितः, धीशोऽधः संजातो यस्य सः, शुद्धबुद्धिरित्यर्थः ॥ ७५ ॥

ममता मम तावदिह भवादृशां कृते, कृते भवद्भिरस्यैतादृशि दोषावलोके, लोकेन कथमत्र स्थातव्यम् ॥ ७६ ॥

मम तावद् भवादृशां कृते निमित्ते, इह बृहद्वने, ममता ममत्वम् ॥ ७६ ॥

तदधुना साधुना सामञ्जस्येन चल्यतामिति तेनानुमते, परिजनैः सह प्रथममनसां मनसां च दृढिमानमानयन्तः सर्वे एव मुमुदिरे ॥ ७७ ॥

अनसां शकटानां दार्ढ्यं बहुविधवस्त्वादिचालनार्थं,मनसां च· आयत्यामनुशोचाभावार्थम् ॥ ७७ ॥

अनन्तरम्, ऐरावतैरिव चतुर्दद्भिः, गृहीतमौनव्रतैरिव न-वदद्भिः,सुमेरोरवयवैरिव कनकशृङ्गैः,रामबलैरिव सुवृत्तहनुमन्मुखैः, संगीताचार्यैरिव प्रखरखुरलीलैः ॥ ७८ ॥

अनड्डुद्भिरतिरमणीयेषु शकटेषु स्वस्वपरिकरानारोप्य गाः पुरोगाः कर्तुं विचारयन्तो यदावतस्थिरे तदा प्राचुर्यतो हेतोर्धेन्वावलिः शकटावलिश्च क्रमतः प्रयातुं न घटत इत्यतस्ते धेन्वावलिशकटावली युगपदेव पङ्क्तिद्वयेन चलिते, ततो गम्यं गन्तव्यदेशं प्राप्ते अपि हैयं त्यक्तव्यं पदं बृहद्वनाख्यं न जहितो न त्यजत इत्यन्वयः । अनड्डुद्भिः कीदृशैः, नवदद्भिः, मौनिपक्षे न कथयद्भिः, अनडुत्पक्षे स्पष्टम् । तत्र दन्तानां चतुःसंख्यत्वनवसंख्यत्वे वयोन्यूनाधिकत्वव्यञ्जके । सुवृत्ताः सुचरित्रा हनुमदादयो यत्र तैः, पक्षे सुवृत्तानि सुवलितानि हनुयुक्तानि मुखानि येषां तैः । प्रखरां प्रगल्भां खुरलीं नृत्याभ्यासं लान्ति ददतीति तैः,"अभ्यासः खुरली योग्ये"ति त्रिकाण्डशेषः ॥ ७८ ॥

आदिच्छन्दोभिरिव समचतुष्पादैः, वलक्षैरपि नवलक्षैः, प्रचलायतवालधिलतैरपि· अवालधि वपुर्दधानैः, अनस्योतैरपि नस्योतैः, किङ्किणीजालमालालंकृतकन्धरैरनड्डुद्भिरतिरमणीयेषु ॥ ७९ ॥

आदिच्छन्दोभिःश्रीनारीमृगीसमानिकेन्द्रवज्रादिनामभिः । वलक्षैर्धवलैः,"वलक्षो धवलोऽर्जुन" इत्यमरः,नवलक्षसंख्याकैः । प्रचला आयता वालधिलता येषां तैः,"वालहस्तस्तु वालधि"रित्यमरः,न वाला जडा धीर्यत्र तत्, महाबुद्धियुक्तं वपुरि-

त्यर्थः, इङ्गितमात्रविज्ञत्वात् । अनसि शकटे॰ प्रोतैः॰ योजितैः, नसि नासिकायाम्॰ प्रोतैर्ग्रथितैः ॥ ७९ ॥

उपरि परितानितसितहरितपाटलपाण्डुरपीतारुणकिर्मीरचीरमण्डपेषु परितो वृत्तीकृतनानाविधपरार्घ्यपट्टवसनेषु कनककलशोपरि परिपतत्पताकानिकररसनाभिरिव दिनकरकिरणकलापं कलापरिण्डततया लेलिहानेषु परिहस्यमानामरविमानेषु विमानेषु ॥ ८० ॥

उपरि प्रदेशे परितानिता विन्याससविशेषविस्तारेण निर्मिताः प्रत्येकं सितादिचीरमण्डपा येषु तेषु । परितस्तेषां मण्डपानां चतुर्दिक्षु, वृत्तीकृतानि प्राचीरीकृतानि नानाविधानि श्वेतरक्तादिवर्णानि परार्घ्यानि बहुमूल्यानि पट्टवसनानि येषु तेषु । लेलिहानेष्विति, "लिह आस्वादने" यङन्तः । विमानेषु विशिष्टमानेषु ॥ ८० ॥

साधुजनेष्विव निर्दोषप्रासङ्गेषु॰ हरिभक्तेष्विव स्वक्षेषु॰ तडागेष्विव सुचक्रेषु॰ अलकापुरीपरिसरेष्विव सदासन्नलकूवरेषु॰ शकटेषु स्वस्वपरिकरानारोप्य केषुचन कनकराजतारकूटताम्रकांस्यादिनिर्मितानि विस्मितसकलभाजमानि भाजनानि च पुरो गाः पुरोगाः कर्तुं विचारयन्तश्चारयन्तश्च यदाघतस्थिरे वत स्थिरेणैव मनसा सर्वे ॥ ८१ ॥

प्रासङ्गः प्रकृष्टा॰आसक्तिः शकटावयवश्च, "प्रासङ्गोऽनो युगाद्युग" इत्यमरः । अक्षमिन्द्रियं च, चक्रं चक्रवाकश्च । सदा सन् वर्तमानो नलकूबरः कुबेरपुत्रो यत्र तेषु, पक्षे॰आसन्नम्॰ आसन्निभावक्तान्तं॰ तत्॰ लातीति॰आसन्नलः कूबरो येषां तेषु, "कूबरस्तु युगंधर" इत्यमरः । आरकूटः पित्तल इति प्रसिद्धः । पुरः प्रथमं, गा एव पुरोगाः॰ अग्रगामिनीः कर्तुं परामृशन्तः । ततस्ताश्चालयन्तश्च, रलयोरैक्यात् ॥ ८१ ॥

*प्राचुर्यतो न घटते क्रमतः प्रयातुं
धेन्वावलिश्च शकटावलिरप्यथेति ।
पङ्क्तिद्वयेन चलिते युगपत् तदा ते
गम्यं गते अपि पदं जहितो न हेयम् ॥ ८२ ॥

एवमनवच्छिन्नतया॰ आवृन्दावनसीम॰ आबृहद्वनमध्यमनुयमुनं चलन्ती सा धेनुपङ्क्तिरचलन्तीव कृतवितर्का वितर्कान्तरास्पदं बभूव ॥ ८३ ॥

अनुयमुनं यमुनायाः दैर्घ्येण, "अनुर्यत् समया", "यस्य चायाम" इति समासः । कृतवितर्केति, किंचिद्दूरस्थैर्जनैरित्यर्थः ॥ ८३ ॥

किमियं यमुनया सह रहःकथाभिलाषुकतया समागता सुरधुनीधारा ॥ ८४ ॥

सुरधुनी गङ्गा ॥ ८४ ॥

किमियं वृन्दावनरेणुजिघृक्षयाऽऽगता समुपसीदन्ती क्षीरनीरनिधेस्तरङ्गपरंपरा, किमियं क्षीरोदशायिनः शयनभावमपहाय वृन्दावनदिदृक्षयेव समुपसीदतो भोगीन्द्रस्य परमद्राघीयसी भोगकाण्डलता, किमियं भुवो मुक्तावली ॥ ८५ ॥

तत्र तदानीमिव रहः कथाकारणमलक्षयंस्तद्देशमात्रवर्तिनीरुद्गता धूलिधोरणीश्च पश्यन् मत्तमहोक्षपङ्क्तीनां धेनुपङ्क्तीनां चोच्चनीचत्वमन्तरान्तरा परामृशन्नन्यथोत्प्रेक्षते किमियमिति, क्षीरनीरनिधेर्भगवद्धामत्वेऽपि वृन्दावनस्य तत उत्कर्षो व्यञ्जितः । पुनस्तस्या अपि बृहद्वनमूलत एव निःसरणं न तु ततः परत इति पातालोत्थितत्वेनोत्प्रेक्षते किमियं क्षीरोदेति, भोगीन्द्रस्य शेषनागस्य, अत्रापि तस्य तदाधारत्वेऽपि पूर्ववदुत्कर्षः । पुनश्चातिश्वेतचाकचक्यं भुवः शोभां चालक्ष्याह मुक्तेति ॥ ८५ ॥

एतं विलसत्कनककलशाग्रजाग्रद्विचित्रतरपताकानिकरकरम्बितललितादृगोपुरघटाघटितपरमपरभागं दुर्गप्राचीरमिव, यमुनातटघटमानखेलालसाः शिशव इति करुणया कुलिशकरेणाकृतपक्षच्छिदा कनकगिरिकैलासगौरीगुरुप्रभृतिमहामहीधरराजनिकरा पङ्क्तीभूय चलन्ती कुमारश्रेणिरिव, शकटानि पथि जनैर्व्यदृश्यन्त ॥ ८६ ॥

धेनुपङ्क्तिं वर्णयित्वा शकटपङ्क्तिमपि वर्णयति॰ एवमिति, विलसतां चाकचक्यवतां कनककलशानामग्रे जाग्रद्भिश्चित्रतरैः पताकानिकरैः करम्बितानां ललितादृपुरद्वाराणां घटाभिर्घटितः कल्पितः परमः परभागः शोभा यत्र तत् । तर्हि कुतो जंगमत्वमित्यत आह यमुनातटेति, कनकगिरिः सुमेरुः । गौरीगुरुर्हिमालयः । कुमारश्रेणिः कीदृशी, यमुनातटे घटमानः खेलारसो यस्याः सा, अत एव पङ्क्तीभूय निर्विवादेन चलन्ती ।

ननु पक्षच्छेदकपरमशत्रुवज्रधरस्य विद्यमानत्वेऽपि कथमेवं प्रागल्भ्यं तत्राह, शिशव इति हेतोर्विस्रम्भेण खेलत्सु शिशुषु वज्रनिक्षेपेण वैरसाधनमतिजुगुप्सितमिति स्वयमेव परामृश्येत्यर्थः ॥ ८६ ॥

एवं चलत्सु तेषु तथैव नभसि श्रेणीभूतधूलिपटली निरालम्बं मार्त्तिकं दुर्गमिव समपद्यत ॥ ८७ ॥

मार्त्तिकं मृत्तिकाविकारम् ॥ ८७ ॥

Digitized by Google

अथवा,

गोरूपेण पुरा मुरारिकदनव्याहारहेतोरगा-
च्छ्रीकृष्णस्य पदाब्जसंगमसुखं व्याहर्तुकामा किमु ।
धूलीधोरणिभिर्धरेयमधुना धूताभिरूर्ध्वानिलै-
र्धातुर्धावति धाम धैर्यरहिता स्वं धाम धृत्वा पुनः ॥ ८८ ॥

तस्योर्ध्वोर्ध्वप्रचलनं न संभवतीत्यत आह· अथवेति । अगात्·धातुर्धाम, ब्रह्मलोकमित्यन्वयः । गोरूपेणेति, अतिखेदेन स्वरूपं समृद्धं विहाय दैन्यबोधनार्थमित्यर्थः । अधुना पुनः स्वं धाम निजरूपं धृत्वेति, अतिहर्षबोधनार्थमित्यर्थः । तत्रापि धावति, तत्र हेतुः धैर्यरहितेति । धोरणिभिः श्रेणिभिः । पूर्वं महादुःखभयपापजनिभारासहिष्णुतया खेदेन शनैः शनैर्गमनम्, अधुना श्रीकृष्णपदाब्जसंगमप्रहर्षमहाभारासहिष्णुतया द्रुतमेवास्या गमनमिति भावः ॥ ८८ ॥

एवमितरेतरमेहि याहि नयानय चालय निधापयेत्यादिप्रत्येकमयत एकीभूतेऽपि क्रमशः संभूय भूयस्त्वमासाद्य पश्चादुभयोरेव वक्तृवक्तव्ययोः श्रवणदुर्विभाव्यत्वमागते वचसि केवलं हस्तसंज्ञयैव व्यवहार आसीत् ॥ ८९ ॥

संभूय तत्रोपगतानां बहूनां तादृशवचोभिः सह मिलित्वा। भूयस्त्वं बहुतरत्वम् । हस्तसंज्ञया हस्तसंकेतेन, "संज्ञा स्याच्चेतना नामहस्ताद्यैश्चार्थसूचना", इत्यमरः ॥ ८९ ॥

किंच,

तूर्यारवैर्घोषजनप्रवादै-
रनःस्वनैर्धेनुगणप्रघोषैः ।
नष्टेऽन्यशब्दे नभसस्तदानीं
त एव शब्दा गुणतामुपेयुः ॥ ९० ॥

गुणतामिति, "शब्दगुणमाकाश"मित्यध्यात्मशास्त्रात् ॥ ९० ॥

अथैकमेव मणिमयखेलागिरिकुहरमधि विरोचमाने एकैकजगन्मङ्गलमङ्गलफलसफलोत्सङ्गे सुकृतसिद्धौषधिलतिके इव, एकमेव शकटरत्नमारूढे निजनिजकुमारालंक्रियमाणक्रोडतले श्रीयशोदारोहिण्यौ श्रीकृष्णगुणगानकलस्वरभास्वरं व्यतिभाते स्म ॥ ९१ ॥

मणिमयक्रीडागिरिरिव पश्चाद् वरस्थानीयं शकटगृहमधिकृत्य विरोचमाने विशिष्टकान्तियुक्ते । एकैकमेव जगतां मङ्गलस्यापि मङ्गलरूपं यत् फलं, तत्स्थानीयमपत्यद्वयमित्यर्थः, तेन सफलक्रोडे व्यतिभाते परस्परशोभां तन्वाते स्म ॥ ९१ ॥

इतस्ततः शस्त्रधारिणोऽपि केचन शकटगताः केऽपि पदातयः शतश एव पुरतः परितश्च पश्चाच्च चलितवन्तः, एवं चलति व्रजबले जवलेलिह्यमानगगनेव सा महावनराजधानीश्रीर्मूर्तिमतीव स्वयमयत एव गन्तव्यस्थलीमलंकर्तुमिव चलितवती, केवलं भूमात्रमेव तत्रावशिष्टमिव ॥ ९२ ॥

जवेन वेगेन लेलिह्यमानमिव गगनं यया सा ॥ ९२ ॥

अथाग्रगामिनो गन्तव्यावधिमासाद्य विवृत्यानुयायिनो निरीक्षमाणाः क्रमत उपचीयमानामेव वीक्षन्ते न तु मूलस्यावधिमिति तस्मिन्नहनि यमुनापारप्रयाणमघटमानमिति तत्रैव वसतिमिच्छन्तो विनापि घोषाधीशाज्ञया देशकालज्ञास्त एव तथा संनिवेशं कारयांचक्रुर्यथा सैव पुनश्चलिता राजधानीश्रीः स्वयमेव स्वसंनिवेशमकरोत्, तथाहि,

आतानिताः पटगृहाः परितो वितान-
श्रेण्यस्तथोर्ध्वमभितः पटभित्तयश्च ।
शृङ्गाटकक्रमत एव समानसूत्र-
सुश्रेणयो विपणयो वणिजां विरेजुः ॥ ९३ ॥

अनुयायिनः पश्चादागच्छतः कर्मभूतान् । वितानं चन्द्रातपाख्यमूर्ध्वगतम् । महाप्राचीरायमाणाः पटभित्तयश्च दिक्चतुष्टयगताः । परितः सर्वतो मध्यस्थास्तु पटगृहा इति । शृङ्गाटकानि चतुष्पथानि पुरीमध्यगतानि तत्क्रमेणैव प्राग्वत् समानेन सूत्रपातेन श्रेणियासां ता विपणयो हट्टवर्त्मानि ॥ ९३ ॥

किंच,

यत्रादौ प्रथमागता कतिपयी तस्थौ गवां संहति-
स्तत्रैव क्रमतः समेत्य शनकैर्वृद्धिं प्रयान्ती ततः ।
ज्योत्स्नाखण्डमिवायतः समभवत् पश्चादभूत् पायसः
कासारः क्रमतोऽभ्यपद्यत तदा क्षीरस्य वारां निधिः ॥ ९४ ॥

पायसो दुग्धमयः ॥ ९४ ॥

एवं कृतवसतिसंनिवेशेषु श्रीनन्दसन्नन्दोपनन्दादिधुरंधराणां प्रथमागतेषु परिजनेषु यथास्थानं तेष्वपि समासाद्य विश्रान्तेषु परितश्चापरेषु यथास्थलं स्थितेष्वाभीरेषु चिरेण मूलविच्छिन्नासीद्धेनुपङ्क्तिः शकटपङ्क्तिश्च ॥ ९५ ॥

श्रीनन्देति, अत्रोपनन्दतोऽपि सन्नन्दस्याभ्यर्हितत्वं, श्रीनन्देन शुद्धाव्यवहितसंनिधिकत्वात्, तथोक्तं गणोद्देशदीपिकायाम्,

Digitized by Google

"उपनन्दोऽभिनन्दश्च पितृव्यौ पूर्वजौ पितुः ।
पितृव्यौ तु कनीयांसौ स्यातां सनन्दनन्दनौ ॥

इति ॥ ९५ ॥

अथैवं शकटपटलादवतरत्सु सकलजनेष्ववतार्यमाणेषु तत्समयोपयोगिभाजनेषु मोचितेष्वप्यनडुत्सु तदाहारोपपादनपरेषु तदधिकारिषु यथायथं क्रयविक्रयपरेषु परिचारकादिषु रसवत्यादिस्थलपरिष्कारपरेषु तदधिकारिषु भगवानपि मयूखमाली यामचतुष्टयगम्यं[1] गगनपथमतिक्रम्य श्रान्त इव वरुणदिङ्नागरीगृहे वासं विधित्सन्निव समपद्यत ॥ ९६ ॥

मोचितेष्विति भूतकालप्रयोगोऽवतरणात् पूर्वमेव तेषां मोचनात्, चत्रोक्तिस्तु तदाहारेत्यस्यानुरोधेन ॥ ९६ ॥

ततश्च कुलायकुलाय समुन्मुखतया नभसि समुड्डीयमानेषु कलितकलरवेषु खगकुलेषु उच्चतरं तरुमनु कृतोपवेशेषु मयूरादिषु मण्डलीभूय सर्वतो दिगभिमुखं निषद्य रोमन्थमन्थरेषु मृगनिकुरम्बेषु कमलकुहरविहरणवशतया वन्दीभवत्सु मधुकरनिकरेषु तिमिरनीलपटावगुण्ठनेनाभिसारिकाभावमासादितवतीष्विव दिगङ्गनासु अभिलषितसमयासादनेनेव हसितविकसितवदनासु कुमुदिनीषु भवद्विरहविधुरतया करुणमरमितरेतरमनुशोचत्सु केषुचिदेकेनैव विसलताखण्डेन परस्परचञ्चुपुटमाबध्नत्सु रथाङ्गमिथुनेषु आतपापायमलिनतया छायास्वेव विजातीयत्वेन दरीदृश्यमानेषु दीर्घदीर्घतरजनचयच्छायानिचयेषु प्रतिपटभवनकुहरमधि ज्वाल्यमानेषु दीपेषु बहिरपि सहृदयहृदयप्रकाशेष्विव दृश्यमानेषु प्रतिचत्वरणसमुपविष्टेषु यामिकेषु कापि प्रदोषलक्ष्मीर्भगवन्तमुपचरितुमाजगामेव ॥ ९७ ॥

कुलायकुलाय वाससमूहाय "कुलयो नीडमस्त्रियाम्" इत्यमरः । रथाङ्गमिथुनेषु चक्रवाकदम्पतिषु । छायास्वेवेति, कथंचित्तत्रादिप्रकाशसंभावितास्वित्यर्थः । विजातीयत्वेनेति, स्थौल्यातिशयवद्भवादिच्छायातः । एवकारश्छायानामेव स्थौल्यदैर्घ्ययोर्बहुतरत्वेन हेतुना परस्परविजातीयत्वेनोपलब्धिः, व्यक्तीनां तु तयोरल्पत्वेन विशेषतो लक्षयितुमशक्यत्वात् तथात्वेनानुपलब्धिरिति ज्ञापनार्थः । यामिकेषु प्रहरिया इति ख्यातेषु वर्त्मरक्षकेषु ॥ ९७ ॥

[1] यामाष्टकगम्यमिति पा० ।

तत्र तदा,

आयातास्वखिलासु धेनुषु समं वत्सैर्यथेच्छं मुदा
विश्रान्तासु निराकुलं विरचिताहारासु तृप्तासु च ।
भूयान् दोहरवः पयोधिमथनध्वानाकृतिर्दोहनी-
गर्भभ्रान्तगभीरमुग्धमधुरः कृष्णस्य रम्योऽभवत् ॥ ९८ ॥

दोहिनीगर्भे भ्रान्तः, अत एव गभीरः । मुग्धः, मनोहरः । मधुरः, माधुर्येण मनोहरणात् ॥ ९८ ॥

नामग्राहं प्लुतरचनया गोदुहा हूयमाना
हुंवारावैः प्रतिरवकरी धाविता धेनुवृन्दात् ।
अभ्यायाता निकटमसकृत् पाणिना मृष्टगात्री
काचित् काचित् क्वचन रुचिरा नैचिकी दुह्यते स्म ॥ ९९ ॥

नामग्राहं हीही शबलि हीही धवलीत्येवं नाम गृहीत्वा, गोदुहा दोहकगोपेन, प्रतिरवकरीति ताच्छील्यटप्रत्ययान्तं, काचित् काचिदित्यनेन तद्दिनेऽतिश्रान्तवत्सगवीनां दोहनाभावः सूचितः ॥ ९९ ॥

एवं सुखविहितपानाहारविहारेषु व्रजनगरनरनारीनिकरेषु पर्यायजाग्रतां यामिकानां निजनिजजागरकौशलप्रकाशिकाभिरभितो मुहुरुदित्वरीभिर्गीर्भिरपशङ्कं यथासुखमभिनिद्राणेषु च यामैकशेषा रजनी यदि समजनि तदा शयनतलादुत्थितवतीभिरतिशुचितरवेषभूषाभिराभीरभीरुभिरपि प्रतिपटगृहालिन्दं दीपितदीपं कृतवास्तुबलिभिरभितो भगवद्बालकृष्णगुणगणगानकलरवकर्णरम्यं युगपद्विधीयमानस्य दधिमथनस्य मणिमयमञ्जुमञ्जीरवलयादिविविधभूषणशिञ्जितसहचरेण गर्गरीकुहरविहरमाणमसृणतरगभीरनिनदेन गानकलरवमधुरिमसरसतयातिशयसुललितेन जगदमङ्गलसमूलनिर्मूलीकरणकुशलेन दिगङ्गनागणकृतानुध्वननविरचितपरिपोषेण तत्क्षणममराङ्गनानामपि पतिशयनजुगुप्सया त्वरितमेव जाग्रतीनामेकान्तभावेन तमेव घोषनिर्घोषमाकर्णयन्तीनां श्रवणानन्दो जन्यते स्म ॥ १०० ॥

कृतो वास्तुबलिर्वास्तुपूजोपहारो याभिः । गर्गरीणां कुहरे विवर एव विहरमाणः, अत एव मसृणतरो गभीरश्च यो निनदस्तेन । अमराङ्गनानां तत्क्षणमेव जाग्रतीनां श्रवणानन्दो जन्यते स्म, इत्यन्वयः ॥ १०० ॥

* समनन्तरमुदयति भगवति किरणमालिनि किरणमालिदुहितुरपरपारगमनसमुद्योगयोग्येषु तेषु प्रथममेव

व्रजराजनिदेशेन तत्तदधिकारिणो धेनुवृन्दमेव पारमासादयितुमारेभिरे ॥ १०१ ॥

यथा,

हीहीकारध्वनिभिरसकृद्वल्लवैः प्रेर्यमाणं
हुंवारावैरनुमतिकराण्युत्तराणीव कुर्वत् ।
स्फायद्घोणं श्वसितपवनैरुन्नमत्पूर्वकायं
पार्श्वस्रोतस्तदपि* यमुनां धेनुवृन्दं ततार ॥ १०२ ॥

स्फायन्ती वृद्धिं यान्ती घोणा नासा यत्र तत् । पार्श्वयोर्द्वयोरपि स्रोतो यस्य तत्, स्रोतसा चाल्यमानमित्यर्थः ॥१०२॥

शङ्काभाववशाल्लघूनि वदनान्युल्लासयन्तः सुखं
स्तोकत्वादपि वर्ष्मणोऽतितरसा निर्लङ्घयन्तो जलम् ।
पुच्छानां सलिलाप्लुतौ गुरुतया नोल्लासनेऽतिक्षमाः
क्षेमं वत्सतराः प्रतेरुरभितः स्वस्वप्रसूपूर्वतः ॥१०३॥

वर्ष्मणो देहस्य स्तोकत्वात्-अल्पत्वात्, स्वस्वप्रसूपूर्वत इति, तेन तासां चिन्ताभावः शीघ्रतरणोत्साहश्चाभूदिति ज्ञेयम् ॥ १०३ ॥

किंच,

ग्रीवापीठेषु कृत्वोरसि मृदुचरणान् बाहुनैकेन बद्ध्वा
वत्सान् सद्यः प्रसूतान् प्रतरणपटवो बाहुनान्येन केचित् ।
स्वच्छन्दं संतरन्तः कलितकलघनस्वानमेषां प्रसूभिः
पश्चात् संगम्यमानास्तरणिदुहितरं गोदुहः संप्रतेरुः ॥१०४॥

कृत्वा स्थापयित्वा, तच्चरणान् स्वग्रामदक्षिणस्कन्धतो द्वौ द्वौ कृत्वा· उरसि· आनीतान्, एकेन वामेन बाहुना बद्ध्वा· अन्येन दक्षिणेन बाहुना संतरन्तः ॥ १०४ ॥

पूर्णाभोगे तरङ्गानसुमति ककुदे† जर्जरीभावमाप्तान्
ग्रीवाभङ्गाभिरामं प्रकुपितमनसस्ताडयन्तो विषाणैः ।
स्रोतोवेगेऽपि तुङ्गे त्वरितमृदुतरं पुंगवाः पुंगवाना-
मुन्मूर्धानोऽतिदीर्घश्वसितजवभराद्द्रुतमम्भः प्रतेरुः ॥१०५॥

पूर्णे आभोगः परिपूर्णता यत्र तस्मिन्, तरङ्गान्· अतिबलमदेन ऋजुतरपारप्रयाणे ककुद्दक्षिणभागे स्रोतोबन्धेनोच्छलितानित्यर्थः । तदाघातमनुभूय· एते किमस्माभिः सह युद्धार्थं संगता इति प्रकुपितमनसो विषाणैः स्वस्वदक्षिणशृङ्गैः, पुंगवानां वृषाणां मध्ये पुंगवाः श्रेष्ठाः । अतिदीर्घेति, त्वरया संतारेण ऋजुप्रयाणेन प्रकोपेन च हेतुनेत्यर्थः ॥ १०५ ॥

*—स्तदथ इति पा० ।

†—न सुशुभगककुदे इति पा० ।

अथ,

उत्तीर्णा घनसारधूलिपटली स्वच्छे ततः सैकते
श्रेणीभूय समन्ततः स्थितवती श्रान्तेव संतारतः ।
एकत्र स्थितिवाञ्छयेव मिलिता पूर्वं ततो विच्युता
कालिन्द्या सह जाह्नवीव रुरुचे सा नैचिकीनां ततिः ॥ १०६ ॥

घनसारः कर्पूरं सैकते वालुकामयदेशे ॥ १०६ ॥

अथ· अपारं गतास्वपि पारं गतासु निखिलासु नैचिकीषु पातालतलादुत्थिता इव नागनागरीखेलामणिगिरिद्रोणयः, सुरशिल्पिनो निजशिल्पकलाकौशलेन व्रजराजसमाजमानन्दयितुकामस्य गगनगङ्गाप्रवाहत इव यमुनामिलितानां निजविमानानां मूर्तय इव, द्युमणिदुहितुरन्तरतः समुत्तीर्णा इव बहुपद्यो विचित्रजलजन्तुविशेषवध्व इव तत्कालमितस्ततो बहुकेनिपाताः समुपसन्नास्तरणयः ॥ १०७ ॥

अपारं गणयितुमशक्यत्वमित्यर्थः । यद्वा· अपगता· अरङ्कता रङ्काभाववत्त्वं यासां तासु, श्रमापनोदनानन्तरमित्यर्थः । पातालतलादिति, कुत्राप्यनुपलभ्यमानत्वेनालक्षितानि वेगवत्त्वेन निकटोपस्थितत्वात् किमधस्त इहैवोत्थिता इति संभाविता इत्यर्थः । गगनमेव गङ्गा तस्याः प्रवाहत इति, किमिहैवाकाशात् पतिता इति । यमुनामिलितानामिति, निजनप्तृत्वेन तत्रैव संगमितानां विज्ञानानां शिल्पकलाकौशलानां मूर्तय इवेत्यनेन मणिस्वर्णादिखचितत्वं निर्माणवैचित्रीभराबधित्वं चोक्तम् । केनिपाताः· नौकादण्डाः, चहड इति ख्याताः ॥ १०७ ॥

तासु सर्वतः समीचीनां मृदुपवनपातदरचलितललितपताकां मध्यमध्यासितविचित्रभवनामेकामेव तरणिं निजनिजतनयमङ्कमारोप्य श्रीव्रजराजमहिषी श्रीवसुदेवरमणी च युगपदारुरुहतुः, उभयोरपि परिचारिकाश्च, तत्र च निजाङ्करुचिरुचिरमधितरणि तरणिदुहितुर्लघुतरतरङ्गभङ्गिमानमानमत्कन्धरमालोक्य जननीसंनिधानतो निधानतोपेण तरणिप्रान्तमागत्य गत्यनवस्थतया* भुजादण्डं प्रसार्य करकमलेनालोडयितुकामं श्रीकृष्णमालोक्य मातरावेव तरावेवमातङ्कं तं कंचन प्राप्नवत्यौ यदा निवारयितुं न शेकतुस्तदा तदाशङ्कयेव व्रजराजेऽपि तामेव तरणिमारुह्य तमात्मजमात्मजवसहचरं उडुपे निजाङ्कतलमानीय सावधान एव तस्थापि तरणिवाहिनोऽवाहयन्त तरणिम्,

*—नवस्थानतया इति पा० ।

Digitized by Google

एवमपरेऽपि यथेच्छमतिसुलभासु समानदृढिमादिगुणासु तरणिषु युगपदेव विमानसदृशीषु कृतारोहाः सपरिजनैरेव सुखनिविष्टाः समानकालमेव पारमीयुः ॥ १०८ ॥

अधितरणि मध्ययमुनायां चलन्त्यां नौकायाम् आ ईषत् नमन्ती कन्धरा यत्र तद्यथा स्यात् तथा आलोक्य, नौकोपरितनगृहमध्ये स्थित्वैवेति ज्ञेयम् । ततश्च निधानं निधिस्तद्विषयकेणैव तोषेण हेतुना, गृहाद्बहिर्भूय तरणेः प्रान्तमागत्येति, मध्यनौकायामेव तदेकपार्श्वमागत्येत्यर्थः । तत्र गत्यनवस्थतयेति, तत्र गतेरनवस्थत्वेन हेतुना । वामहस्तेन तरणिप्रान्तभित्तिमवलम्ब्य दक्षिणं भुजादण्डं तत्तले प्रसार्य इति ज्ञेयम् । एवं दुर्वारबाल्यचापलं कृष्णमालोक्य मातरौ श्रीयशोदारोहिण्यौ तरौ नौकायाम् । एवम् अनेन प्रकारेण तं प्रसिद्धं कंचन अपूर्वमातङ्कं शङ्कां प्राप्तवत्यौ ॥ १०८ ॥

तदनु प्रतीरमुत्तीर्णेषु तेषु ताभिरेव तरणिभिस्तरणिवाहिनो निखिलमेव शकटव्रजं च दारवनिस्तरङ्गश्रेणिनिश्रेणिनिकरेणारोहितं कृत्वा पारमासादयामासुः, व्रजराजः सकलानेव तान् नाविकान् पारितोषिकेण परितोष्य विसर्जयामास ॥ १०९ ॥

इत्यानन्दवृन्दावनबाल्यलीलालताविस्तारे यमलार्जुनभङ्गो नाम षष्ठस्तबकः ॥ ६ ॥ :: :: ॥

प्रतीरमुत्तीर्णेषु सत्सु, "प्रतीरं च तटं त्रिष्वि"त्यमरः । ताभिरेव नौकाभिः शकटसमूहं च पारं प्रापयामासुः, किं कृत्वा, दारवीणां दारुमयीणां निस्तरङ्गानामचलदण्डानां निश्रेणीनामधिरोहिणीनां श्रेणिनिकरेण पङ्क्तिसमूहेन प्रयोजककर्त्रा शटकव्रजमारोहितं कृत्वा, तासु तरणिष्वित्यर्थः । पारितोषिकेण वस्त्रालंकारादिना ॥ १०९ ॥

इत्यानन्दवृन्दावनचम्पूकाव्यटीकायां सुखवर्तिन्यां षष्ठस्तबकसंगमनम् ॥ ६ ॥

॥ अथानन्दवृन्दावनचम्पूकाव्यस्य ॥

॥ सप्तमस्तबकारम्भः ॥

आगोवर्धनमा कलिन्दतनयातीरादनोमण्डले-
रानन्दीश्वरमर्धचन्द्रवदभूद्वासः स तात्कालिकः ।
पश्चादप्रकटेव पूर्वभणिता या राजधानी तया
प्राकट्यं गतया निजैर्गुणगणैरन्यूनयाभूयत ॥ १ ॥

वत्सासुरबकाद्यानां वधः पुलिनजेमनम् ।
वत्सबालहृतिर्ब्रह्ममोहस्तोत्रे च सप्तमे ॥

आगोवर्धनेत्यादौ आङ् मर्यादायां, सा च दूरसीमावाचिनी ज्ञेया, व्रजस्याष्टक्रोशीपरिमितत्वात् । राजधानी नन्दीश्वरवर्तिनी । निजैर्गुणगणैः प्रथमस्तबके वर्णितैः ॥ १ ॥

नित्यत्वं सकलस्य यद्यपि हरेर्धाम्नः सुसिद्धं तथा-
प्येकस्मिन्नपरस्य संमिलनतो नानित्यता दृश्यते ।
तेजस्तेजसि वारि वारिणि यथा लीनं च नो हीयते
तद्वत् सा च महावनस्थितपुरीलक्ष्मीरिमामाविशत् ॥२॥

पुर्या लक्ष्मीः संपत्तिः । इमां गोवर्धनकालियह्रदयोरन्तरालवर्तिनीं शकटावर्ताख्यां राजधानीम् ॥ २ ॥

अत उभयोरेव पुरश्रियोरैकीभावे तदन्तरश्रिया श्रिया सर्वतो भावेन सेव्यमानतायां च सत्यां किं वर्णनीया तदानींतनी वृन्दावनस्य रामणीयकसंपत्तिः ॥ ३ ॥

उभयोर्बृहद्वनवृन्दावनस्थयोः । एकीभावे, मेलने सतीत्यर्थः । तदन्तरं तन्मध्यं श्रयतीति तदन्तरश्रीस्तया, श्रिया शोभया ॥ ३ ॥

तथापि,

नानाचित्रपतत्रि हारिहरिणन्यङ्क्वादिनानामृगं
नानाभूरुहकुञ्जगुल्मलतिकावापीसरःपल्वलम् ।
कालिन्दीपुलिनैः समुज्ज्वलमथो गोवर्धनेनाद्भुतं
वृन्दारण्यमभीक्ष्य ते मुमुदिरे गोपाश्च गोप्योऽपि च ॥ ४ ॥

हारि मनोहारि ॥ ४ ॥

अथ पूर्वोदितायां व्रजराजपुर्यां व्रजराजो विवेश, सनन्दादयोऽपि स्वस्वपुरेषु, तदितरेऽपि निजनिजपुरीषु, गोशालास्वपि गावो, विपणिवीथिष्वपि वणिजः, स्वस्वविपणिष्वपि ताम्बूलिकमालिकादयः ॥ ५ ॥

अथेति कतिपयवर्षानन्तरं, पूर्वोक्तायां नन्दीश्वरवर्तिन्यां, स्वस्वपुरेषु सैञ्चरीसाहारादिनामभिः ख्यातेषु, आविविशुः ॥ ५ ॥

सर्वे एवाप्रकटवत् प्रकटेऽपि तथा बभूवुरित्येवमापुलिन्दमात्मात्मभवनसुखसंनिविष्टेषु सकलजनेषु चिरकालवासमुस्थितवदविस्मृतपूर्वावासेषु वृन्दावनतृणसमास्वादप्रोद्यत्प्रमोदेषु गोधनेषु गूढतया सेवमानेषु नवनिधिषु दासीवत् परिचरन्तीष्वष्टसिद्धिषु च गूढतया स्वयं संव्रियमाणमहैश्वर्योऽपि निरर्गलदुर्निवारतया कदाचित् कदाचिदसंव्रियमाणनिजैश्वर्योऽपि भवति लीलाबालको भगवान् ॥ ६ ॥

Digitized by Google

लीलाबालक इति, स्वपितृभ्यां तत्सजातीयैश्च लीलामयबालकत्वेनैव सदैव प्रतीयमान इत्यर्थः ॥ ६ ॥

अथाच कियता कालेन वत्सपालनक्षमतामाविर्भावयामास ॥ ७ ॥

अथेतनीमेव नन्दीश्वरवासरीतिमत्रैव प्रसङ्गेन वर्णयित्वा, इदानीं वत्सपालनादिलीलां वर्णयितुमुपक्रमते, अथेत्यारम्भे, अत्रेति शकटावर्ताख्यराजधान्याम् ॥ ७ ॥

सत्स्वपि तत्कर्मसमुचितेषु दासकुमारेषु तथाविधलीलाकौतुकग्रहिलतया भगवतैव प्रेरितान्तःकरणो परमसुकुमारोऽपि परमदुर्ललितोऽपि वत्सपालनकर्मणि नियोजनीयोऽयमिति विचारयति व्रजराजे ॥ ८ ॥

भगवतेति तदंशोऽन्तर्याम्यपि भगवच्छब्देनोक्तः, साक्षात् तस्य तु पित्रोः संनिधौ सर्वलीलावेशमयत्वात् तत्कार्यायोग्यत्वात्। तथाविधलीलाकौतुके ग्रहिलतयेति तदीयांशस्यान्तर्यामिणस्तथा प्रेरणे हेतुरुक्तः। विचारयति, सुहृद्भिः कैश्चित् सह, तया भार्ययैव वा सह इति मन्त्रणां कुर्वति सतीति, अत्रापि कृष्णस्य तथाविधलीलाकौतुकग्रहिलतयेत्येव हेतुर्ज्ञेयः, तत्रैव स्वपुत्रप्रीतिमालक्ष्य तदनुकूलतथाविधप्रेमोदयात् ॥ ८ ॥

तदुपाकर्ण्य वात्सल्यपारदृश्वरीश्वरी व्रजनगरस्य रस्यमनवगच्छन्तीच्छन्ती च तदपाकर्तुं तदसहमाना स्तनंधयोऽयमधुना कथमकाण्डे क्लेशयितव्य इति निजगाद ॥ ९ ॥

वात्सल्यस्य पारं परां मर्यादां दृष्टवतीति, दृशेः क्वनिप्, वात्सल्यपारदृश्वरीति तदसहने हेतुः, ईश्वरीति तन्निवारणयोग्यतायाम्। तत् कर्म रस्यं स्वरसोचितम् अनवगच्छन्ती न अनुभवन्ती, अत एव तद् दूरीकर्तुमिच्छन्ती। अकाण्डे अनवसरे, स्तनंधयोऽयमित्यद्याप्यस्य स्तनपाने वैरस्यं न जातमित्यकाण्डत्वम् ॥ ९ ॥

तदा स एव लीलाबालको लीलावालकोऽमलो मातर्मातः परमेवं वक्तव्यं वत्सपालनकर्मणि ममातीव तोषोऽतोऽसोढव्यं ते वचनमिदं, मिदं ते नेमामुरीकरोमि ॥ १० ॥

लीलया अव समन्तादितस्ततश्चलिता अलकाश्चूर्णकुन्तला यस्य सः। अमलः सुन्दरः। हे मातः अतः परं मा एवं वक्तव्यम्, अतो हेतोरसोढव्यं सोढुमयोग्यम् इदं वचनम्।

ननु तवैव क्लेशमाशङ्क्य स्नेहेन ब्रवीमि, तत्राह ते तव इमां मिदं स्नेहं न उरीकरोमि न अङ्गीकरोमि। मिदमिति "ञिमिदा स्नेहने" भावक्विबन्तं पदम् ॥ १० ॥

तदा दिश जननि, जननिकरेण बालसहचरेण सह वत्सांश्चारयिष्ये, कौतुकेन को-तु-के- न रज्यन्ति, इति बाल्यनिर्बन्धेन यदा मातरमुवाच ॥ ११ ॥

जननिकरेण जनसमूहेन, कौ पृथिव्यां तु के जनाः कौतुकेन न रज्यन्ति, अपितु सर्व एव ॥ ११ ॥

तदा सापि शिथिलनिर्बन्धा यदि न किंचिदप्यपरमूचे तदा व्रजेश्वरोऽपि रोपितकौतुको हृदि सुदिनाहमालोक्य सह बलभद्रेण भद्रेण सहचरद्भिर्बालसहचरैश्च वत्सपालनाय स्वयमेव गवां गणमागत्य कतिपयानेव वत्सानयतः समुपपाद्य तनुतरां लोहितयष्टिकामेकां करे धारयित्वा वत्सैः सह चाल्यमानं तनयं स्वयमप्यनुचचाल ॥ १२ ॥

सुदिनाहं शोभनस्य दिनस्य अहोरात्रस्य संबन्धि यदहस्तत् ॥ १२ ॥

एवमनुयान्तं पितरमनुयान्तीं च मातरं विलोक्य निवर्तेतां भवन्तौ वयमप्यभियुक्ता माचायुक्ता शङ्काकरणीयेति वदति तनये मा दूरं गा इत एवाद्य चारयस्व वत्सान् मा विलम्बस्व कार्यः शीघ्रमेवागन्तव्यमिति च ब्रुवाणौ पितरावथ निवर्त्य सबलः सबालसहचरः सकौतुकमेव प्रथमेऽहनि कृताभ्यास इव वत्सांश्चारयामास ॥ १३ ॥

अभियुक्ता अभिज्ञाः ॥ १३ ॥

एवमहरहरहतविक्रमः क्रमसमेधमानसमेधमानसोल्लासतया तया वत्सचारणखेलया खेलयाकृष्टमनसः प्रस्मरानमराननवरतवरतनुसहितान् स-हि-तान् प्रमोदयन् मोदयन्नपि व्रजवासिनः सह सहचरैर्बलभद्रेण च भद्रेण चरित्रवैचित्र्येण जननीजनकयोरानन्दं मुहुस्तन्वानस्तन्वा-नवघनघटाश्यामलयामलया व्रजभुवं च श्यामलयन् यदि तस्यामेव लीलायां कुशलो बभूव तदा यावन्तो वत्सास्तावतामेव चारणाय पर्युत्सुक आसीत् ॥ १४ ॥

क्रमेण पूर्वदिनतोऽप्यपरस्मिन् दिने तस्मादप्यन्यस्मिन् दिने सम्यक् एधमानो वर्धमानः समेधस्य मेधासहितस्य मानसस्य चेतस उल्लासो यस्य तस्य भावस्तत्ता तया, तया लोकप्रसिद्धया। खे आकाशे लयम् आनन्दमूर्च्छाम् आकृष्टं मनो येषां तान्, अनवरतं निरन्तरं वरतनुसहितान् स्त्रीस-

*—भियुक्ता नाच शङ्का इति पा०।

हितात् । स श्रीकृष्णः, हि निश्चितं, प्रमोदमोदयोः कादाचित्कत्वसार्वदिकत्वाभ्यां भेदः, तन्वा शरीरेण मुहुरानन्दं तन्वानः· विस्तारयन् ॥ १४ ॥

तथा सति प्रतिदिवसमनुदित एव किरणमालिनि त्रिभुवनजनपावनजनन्या जनन्या जनन्यायकोविदया दयालुहृदयया स्वयमेव शयनोत्थापनमुखधावनपरिमार्जनाभ्यञ्जनोद्वर्तनस्नपनानुलेपनालंकरणकौशलानन्तरमाशयित्वा शाययित्वा च क्षणमनुगतोऽर्धपथपर्यन्तमित एव निवर्त्यतामिति प्रतिमुहुरतिवत्सलां मातरमेतामतिमृदुलमधुरतरेण वचसा निवर्त्य ॥ १५ ।

पावनजनन्या पावित्र्योत्पादिकया । आशयित्वा भोजयित्वा । अनुगतः कृतानुगमनः ॥ १५ ॥

सह बलेन सुबलेन सुदाम्ना सुदाम्ना सुवलितवक्षाः सहचरैरपरैश्च शाद्वलतलमासाद्य नवनवशष्पाङ्कुरनिकरसमास्वादासादितमोदेषु चरत्सु विविधकौमारखेलाकौतुकेन गमयन् समयम् ॥ १६ ॥

सुदाम्ना तन्नामकेन सख्या,सुदाम्ना शोभनमालया, शाद्वलो नवतृणहरिद्वर्णदेशः ॥ १६ ॥

पुनरपि समयमाकलय्य माध्यंदिनाशनार्थं निजपरिजनेनाप्ततमेन व्रजपुरपरमेश्वरीप्रेषितं सुकविकाव्यमिव सुरसं पुरुषार्थसार्थमिव नियतचातुर्विध्यं पुरुषार्थसाधनमिव· अशीतलप्रायं विश्वमिव प्रभूतमन्नमासाद्य सह सहचरनिकरेण कुतूहलिना हलिना च समं समन्ततो मण्डलीभूय सपरिहासकौशलं भुक्त्वा पुनरपि वत्सानुपदीनो दीनोद्धरणः काननविहरणरणत्किङ्किणीकः कोमलतलचरणकमलाभ्यां धरणीहृत्तापमुत्सारयामास ॥ १७ ॥

नियतं चातुर्विध्यं धर्मार्थकाममोक्षाणां चर्व्यचोष्यलेह्यपेयानां च यत्र तम् । तच्च· अशीतलम्· अनलसम्· अधिकारिणं प्रकर्षेण· अयते प्राप्नोतीति तत्, पक्षे स्पष्टम् । प्रभौ ब्रह्मणि· ऊतं, पक्षे प्रचुरम् । वत्सानाम्· अनुपदम्· अन्विच्छन्तीति वत्सानुपदिनः सुबलादयस्तेषाम्· इनः श्रेष्ठः। कोमले तले ययोस्ताभ्यां चरणकमलाभ्याम् ॥ १७ ॥

एवमनुदिनमेव यामार्धशेषे दिवस एव सकलवत्सनिकुरम्बमवधाय चालयन्नालयाभिमुखं यदागच्छति तदाध्वनि कृतनयना ध्वनिकृतश्रवणा च तनयवत्सलतयोत्कण्ठमाना पुरतोऽभिव्रजति व्रजतिलकवल्लभा सापि तज्जननी ॥ १८ ॥

दिवसे यामार्धशेषे सति यदा· आगच्छति तदा, अध्वनि कृते नयने यया सा, ध्वनौ वत्सबालादीनां कृते श्रवणे यया सा, व्रजस्य तिलकतुल्यः श्रीनन्दस्तस्य वल्लभा श्रीयशोदा ॥ १८ ॥

आयाते च भवनं सत्स्वपि दासदासीनिकरेषु स्वयमेव पूर्ववदवयवकिशलयपरिमार्जनादिना परिष्कार्यकार्यकुशला सा सायाशनमाशयित्वा प्रदोषं प्रदोषं समुत्तार्य परार्ध्यशयनमारोप्य शाययामास ॥ १६ ॥

आयाते तनये सति । सा यशोदा। प्रदोषं प्रकृष्टभुजं श्रीकृष्णम् । सायं· अशनं भोजनं यस्य तथाभूतमन्नाद्याशयित्वा भोजयित्वा । प्रदोषं समुत्तार्य प्रदोषानन्तरं, प्रदोषशयनानौचित्यात्, प्रेम्णश्चौचित्यग्राहिस्वभावत्वात् ॥ १९ ॥

॥ शेषमग्रे ॥

THE

ŚULVASÚTRA OF BAUDHÁYANA,

WITH THE COMMENTARY BY DVÁRAKÁNÁTHAYAJVAN

(Continued from page 298.)

नानाचतुरस्रे समस्यन्कनीयसः करण्या वर्षीयसो वृध्रमुल्लिखेद्वृध्रस्याक्ष्णयारज्जुः समस्तयोः पार्श्वमानी भवति । ५०

चतुरस्राच्चतुरस्रं निर्जिहीर्षन्यावन्निर्जिहीर्षेत्तस्य करण्या वर्षीयसो वृध्रमुल्लिखेद्वृध्रस्य पार्श्वमानीमक्ष्णयेतरत्पार्श्वमुपसंहरेत्सा यत्र निपतेत्तदपच्छिन्द्याच्छिन्नया निरस्तम् । ५१

The general meaning of the two preceding sútras is clear; they show how the knowledge of the geometrical proposition contained in S. 48 enables us 1. to form a square the area of which is equal to the area of two given squares and 2. to find a square the area of which is equal to the difference of the area of two given squares. But there is one difficult word "vridhra.' The MSS. (text and commentary) have वध° and वृद्ध° by turns, in some places the second corrected into the first; the same uncertainty as to the right reading is exhibited in the MS. of Ápastamba's Śulvasútras where both sútras recur in slightly different words. I give the explanations of the different commentaries before venturing on a translation.

शु°दी° नानाकारे समचतुरस्रे समस्यन् ह्रसीयसः करणीं तिर्यङ्मानीं कृत्वा वर्षीयसः संबन्धिनं सकलमुल्लिखेत् । वर्षीयसः करण्येव पार्श्वमानी । एवंकृतस्य दीर्घचतुरस्रस्याक्ष्णयारज्जुः समस्तयोः करणी भवति । तदुक्तम् ।

दीर्घचतुरस्रस्याक्ष्णयारज्जुरित्यादिना । अथ लघूपायः । बृहच्चतुरस्रकरणीमल्पचतुरस्रकरणीं च पृथग्वर्गयित्वा संयोज्य तस्य मूलमानीय तत्प्रमाणया रज्ज्वा समचतुरस्रे कृते उभे चतुरस्रक्षेत्रे समस्ते भवतः ।

निर्हारो निरसनम् । यथा त्रिविधाग्नौ क्रियमाणे द्विपुरुषेण चतुरस्रे कृते चतुःपुरुषो भवति । तत्रैकत्यागार्थं पुरुषमात्र्या तिर्यङ्मान्या वृध्रमुल्लिख्येतरस्योत्तरां पार्श्वमानीं दक्षिणप्राचीमितरत्पार्श्वं गमयेत् । सा च तत्र द्विपुरुषप्रमाणायां चत्वारिंशच्छतद्व्याङ्गुलायां पञ्चतिलोने ऽष्टशतद्व्याङ्गुले[1] निपतति । ततः पुरस्ताद् द्वात्रिंशदङ्गुलं पञ्च तिलांश्चापच्छिन्द्यात् । परिशिष्टया करण्या चतुरस्रे कृते पुरुषो निरस्तो भवति ।

शु॰मी॰ नानाप्रमाणके चतुरस्रे द्वे समस्यन् कनीयस अनयोर्मध्य अल्पप्रमाणकस्य चतुरस्रस्य करण्या रज्ज्वा वर्षीयस अधिकप्रमाणस्य चतुरस्रस्य वृद्धमधिकमंशमुल्लिखेत् । अल्पप्रमाणकस्य करणीं तिर्यङ्मानीं कृत्वा वर्षीयसः करणीं पार्श्वमानीं कृत्वा दीर्घचतुरस्रमुल्लिखेदित्यर्थः । वृद्धस्य एवंकृतस्य दीर्घचतुरस्रस्याक्ष्णयारज्जु॰ ।

चतुरस्राच्चतुरस्रं निर्जिहीर्षन्निति चतुरस्रात्पुरुषचतुष्टयमितक्षेत्रादिकाच्चतुरस्रमेकपुरुषप्रमाणादिकं निर्जिहीर्षन्नपोद्धुमिच्छन्यावन्निर्जिहीर्षेत्तस्य करण्यापजिहीर्षितस्य चतुरस्रस्य करण्या पार्श्वमान्या वर्षीयस अधिकस्य वृद्धमुल्लिखेत् । वृद्धस्य महाचतुरस्रस्य करणीं पार्श्वमानीं कृत्वा अपजिहीर्षितस्य चतुरस्रस्य करणीं तिर्यङ्मानीं कृत्वा वृद्धस्य पार्श्वमानीं कृतस्य दीर्घचतुरस्रस्य दक्षिणप्राचीकोणादारभ्य पश्चिमोत्तरकोणं प्रत्यक्ष्णयाकर्षेत् । सा एवंकृता पार्श्वमानी यत्र प्रदेशे निपतेत् समाप्ता भवति तदपच्छिन्द्यात् ।

Kapardisvámin, one of Ápastamba's commentators gives the following explanation:

वृध्रं दीर्घमुल्लिखेत् । यथाल्पीयसः करणी तिर्यङ्मानी वर्षीयसः करणी पार्श्वमानी तथा दीर्घचतुरस्रमुल्लिख्य ।

All the three commentators are aware of the right method for the samása and nirhára of squares, but they apparently were at a loss what to do with the word vṛidhra or vṛiddha. The explanation of the dípiká is quite obscure, Kapardisvámin has no right to explain vṛidhra by dírgha and dirgha by dírghacaturasra, the Śulvamímánsá manages to give a sort of explanation by reading vṛiddha and selecting an example which suits that reading; but the insufficiency of this explanation appears as soon as we take another example and deduct for instance a square the area of which is one purusha from a square of twelve purushas; for then the oblong to be cut off is not "vṛiddha" i.e. larger than the rest, but on the contrary much smaller.

Of the commentators known to me there is one left who gives the right explanation although without accounting for it, Karavindasvámin, who comments on Ápastamba. I subjoin his words:

नानाप्रमाणयोश्छिन्नप्रमाणयोश्चतुरस्रयोः समासकरणमुच्यते । कनीयस अल्पीयसश्चतुरस्रस्य करण्या करणीप्रमाणेन वर्षीयसो महतश्चतुरस्रस्य वृध्रं छिन्नमेकदेशमुल्लिखेत् । वृध्रस्य छिन्नस्याक्ष्णयारज्जुरुभे नानाप्रमाणे चतुरस्रे समस्यति एकीकरोति । तदुक्तं भवति । नानाप्रमाणे चतुरस्रे समस्येत् । अल्पीयसश्चतुरस्रस्य करण्या प्रमाणेन महतश्चतुरस्रस्यैकस्यां तिर्यङ्मान्यामपच्छिन्द्यात् । महतश्चतुरस्राद्दल्पचतुरस्रं निर्जिहीर्षन्निर्हर्तुमिच्छन्यावत्प्रमाणं चतुरस्रमपनेतुमिच्छति तस्याल्पस्य करण्या महतश्चतुरस्रस्यैकदेशं यथा छिन्नं भवति तथोल्लिखेत् । एवंकृते निरसितव्यक्षेत्रप्रमाणतुल्यतिर्यङ्मानीकं महत्क्षेत्रपार्श्वमानीप्रमाणपार्श्वमानीकं दीर्घचतुरस्रं भवति । तस्य क्षेत्रस्यैकां पार्श्वमानीमक्ष्णयेतरत्पार्श्वमुपसंहरेत् गमयेत् । सा पार्श्वमान्यक्ष्णयोपसंहृता यत्रेतरस्यां पार्श्वमान्यां प्रदेशे निपतति तत्र तां पार्श्वमानीमपच्छिन्द्यादपच्छिद्याधिकं त्यजेत् ।

Following the explanation given by Karavindasvámin I derive "vṛidhra" from the root vardh (Dhátup. 32. iii. vardha chhedanapúraṇayoḥ) from which a number of well-known words are derived (vardhaka, vardhaki etc.) and translate the two sútras as follows:

50. If you wish to combine two squares of different size into one, scratch up with the side of the smaller square a piece cut-off from the larger one (i.e. cut-off a piece from the larger square by scratching up the ground—or making a mark upon the ground—at a distance from one end of a side of the larger square, which is equal to the length of the side of the smaller square; by repeating this process on the opposite side of the larger square and joining the two marks on the ground by a line or cord, an oblong is cut off, of which the two longer sides are equal to the side of the large square and the two shorter sides to the side of the small square). The diagonal of this cut-off piece is the side of the combined squares (of the square which combines the two squares).

1. A. B. C. °द्व्याङ्गुलेने

51. If you wish to deduct one square from another square, cut off a piece from the larger square by making a mark on the ground with the side of the smaller square which you wish to deduct (the process is the same as that described in S. 50; an oblong is cut off, the sides of which are equal to the sides of the two given squares); draw one of the sides (the cord representing one of the longer sides of the oblong) across the oblong so that it touches the other side; where it touches (the other side), there cut off (the other side); by this line which has been cut off, the small square is deducted from the large one (i.e. the cut-off line is the side of a square the area of which is equal to the difference of the two squares).

An additional confirmation of the meaning I have given to the word "vṛidhra" is afforded by that form of the two rules in question which we find in Kátyáyana's Śulvapariśishṭa; there we read:

नानाप्रमाणसमासे ह्रसीयसः करण्या वर्षीयसोऽपच्छिन्द्यात्तस्याक्ष्णयारज्जुरुभे समस्यतीति समासः । चतुरस्राच्चतुरस्रं निर्जिहीर्षन्यावन्निर्जिहीर्षेत्तावदुभयतोऽपच्छिद्य शङ्कुं निखाय पार्श्वमानीं कृत्वा पार्श्वमानीसंमितयाक्ष्णया तत्रोपसंहरति स समासेऽपच्छेदः सा करण्येव निर्ह्रासः

Regarding the methods, which the Śulvasútras teach for chaturasrasamása and chaturasranirhára I will only remark that they are perfectly legitimate; they are, at the bottom, the same which Euclid employs.

समचतुरस्रं दीर्घचतुरस्रं चिकीर्षंस्तदक्ष्णयापच्छिद्य भागं द्वेधा विभज्य पार्श्वयोरुपदध्याद्यथायोगम् । ५२

If you wish to turn a square into an oblong, divide it by the diagonal; divide again one of the two halves into two parts and join these two parts to the two sides (those two sides of the other half which form the right angle) as it fits (i. e. when joining them join them with those sides which fit to the párśvau).

महादिवु यथा स्रक्तयो भवन्ति तथा समचतुरस्रं कृत्वा चतुरस्रं पूर्वापरमपच्छिद्य दक्षिणभागार्धं द्वेधा विभज्याक्ष्णया दक्षिणोत्तरमपच्छिद्य एकं चतुर्भागमुत्तरापरकोणेऽन्तर्दीर्घपार्श्वमुत्तराप्रत्यगग्रमुपदध्यात् । अपरं चतुरस्रार्धभागमुत्तरपूर्वकोणेऽन्तर्दीर्घपार्श्वमुत्तरपूर्वाग्रमुपदध्यात् । पार्श्वयोः पूर्वपश्चिमयोरुपसंदध्यात् । अन्यश्च प्रकारः । यावदिच्छं पार्श्वमान्यौ प्राच्यौ वर्धयित्वा उत्तरपूर्वां कर्णरज्जुमायच्छेत्सा दीर्घचतुरस्रमध्यस्थायां समचतुरस्रतिर्यङ्मान्यां यत्र निपतति तत उत्तरं हित्वा दक्षिणांशं तिर्यङ्मानीं कुर्यात् । तद्दीर्घचतुरस्रं भवति । दीर्घस्य दीर्घकरणेऽप्ययमेव प्रकारः । समचतुरस्रविषयः पूर्वसूत्रोक्तः ।

अपि चैतस्मिंश्चतुरस्रं समस्य तस्य करण्यापच्छिद्यांद्यदतिशिष्यते तदितरत्रोपदध्यात् । ५३[1]

I do not venture on a translation of this sútra, as it does not clearly appear to what geometrical operation it refers. Moreover there seems to be a lacuna in the commentary, which gives but the following words:

दीर्घचतुरस्रं कृत्वा यदतिशिष्यते अनन्तर्भूतं भवति यत् खेचं तदितरत्र दीर्घचतुरस्रस्य पूर्वपार्श्वे पश्चिमपार्श्वे चोपदध्यात् ।

It remains to remark that the geometrical rule contained in S. 52 is a very unsatisfactory one as it enables us to turn a square into one sort of oblong only viz. that one the longer side of which is equal to the diagonal of the square. The commentary on the other hand (anyaś cha prakaraḥ etc.) gives a rule by which a square may be turned into any oblong we like.

दीर्घचतुरस्रं समचतुरस्रं चिकीर्षंस्तिर्यङ्मानीं करणीं कृत्वा शेषं द्वेधा विभज्य विपर्यस्येतरत्रोपदध्यात् खण्डमावापेन तत्संपूरयेत्तस्य निर्हार उक्तः । ५४

If you wish to turn an oblong into a square, take the tiryaṅmání i. e. the shorter side of the oblong for the side of a square, divide the remainder (that part of the oblong which remains after the square has been cut off) into two parts and inverting (their places) join those two parts to two sides of the square. (We get thus a large square out of one corner of which a small square is cut out as it were.) Fill the empty place (in the corner) by adding a piece (a small square). It has been taught how to deduct it (the added piece).

By adding the small square in the corner we get a large square which is equal to the oblong plus the small square, therefore we must deduct the small square from the large square (see S. 51) and then we have as remainder a square which is equal to the oblong.

तिर्यङ्मानीप्रमाणेन पार्श्वमानीमपच्छिद्य समचतुरस्रं कृत्वा शेषं विभज्य पुरस्तादुत्तरतश्चोपदध्यात् । यथोत्तरपूर्वकोणेऽयं चतुरस्रागन्तुखण्डो भविष्यति । तस्य निर्हारः । चतुरस्राच्चतुरस्रमिति । तदीशानकोणखेचमित्यर्थः ।

चतुरस्रमेकतोऽणीमच्चिकीर्षन्नणिमतः करणीं तिर्यङ्मानीं कृत्वा शेषमक्ष्णया विभज्य विपर्यस्येतरत्रोपदध्यात् । ५५

If you wish to make a square smaller on one side,

[1]. C. °च्छिद्य यद° A. B. तस्य–°दध्यात् desunt.

Digitized by Google

take the side of the smaller (square; i. e. a side of the lessened length which you intend to give to one side of the square) for the tiryanmání (of an oblong; i. e. cut from the square an oblong the shorter side of which has the length you want to give to the side of the square). Divide the remainder (the oblong which remains after the first oblong has been cut off) by the diagonal and join (the two triangles which you get by dividing the remaining oblong) to the two long sides (of the first oblong) inverting them (their position).

अणिमत्पार्श्वस्य करणीं तिर्यङ्मानीकरणीं कृत्वा प्रमाणपार्श्वमानीकमणिमत्पार्श्वेतिर्यङ्मानीकं दीर्घचतुरस्रं कृत्वावशिष्टं क्षेत्रमक्ष्णया परिच्छिद्य एकं तत्रैव स्थापयित्वा परमादाय विपर्यस्य पार्श्वान्तर उपदध्यात् ।

चतुरस्रं प्रउगं चिकीर्षन्यावच्चिकीर्षेद् द्विस्तावतीं भूमिं समचतुरस्रां कृत्वा पूर्वस्याः करण्या मध्ये शङ्कुं निहन्यात्तस्मिन्पाशौ प्रतिमुच्य दक्षिणोत्तरयोः श्रोण्योर्निपातयेद्बहिःस्पन्द्यमपच्छिन्द्यात् । ५६

If you wish to turn a square into a triangle make a square the area of which is twice as large as the area of the triangle you wish to make, fix a pole in the middle of the eastern side, fasten at that pole two ties (two cords) and stretch the cords towards the southern and northern śroṇi of the square; cut off that part of the square which lies outside the cords (i. e. the two triangles lying to the north-east and the south-east of the two cords).

प्रउगं शकटमुखम् । द्विकरण्या समचतुरस्रं कृत्वा पूर्वस्यास्तिर्यङ्मान्या मध्ये शङ्कुं निहत्य तस्मिन्पाशौ प्रतिमुच्य चतुरस्रश्रोण्योर्निपातयेत् । स्पन्द्ययोर्बहिर्भूतमपच्छिन्द्यात् । निरस्येत् ।

Praüga, the fore part of a chariot pole, is the word used in the Śulvasútras to denote a triangle. Only in one passage of Ápastamba the word tryasra occurs.

चतुरस्रमुभयतःप्रउगं चिकीर्षन्यावच्चिकीर्षेद् द्विस्तावतीं भूमिं दीर्घचतुरस्रां कृत्वा पूर्वस्याः करण्या मध्ये शङ्कुं निहन्यात्तस्मिन्पाशौ प्रतिमुच्य दक्षिणोत्तरयोर्मध्यदेशयोर्निपातयेद्बहिःस्पन्द्यमपच्छिन्द्यादेतेनापरं प्रउगं व्याख्यातम् । ५७

He who wishes to turn a square into a double-praüga (i. e. a figure formed by two praügas joined with their bases) is to make an oblong of twice the intended area and to fix a pole in the middle of its eastern side; aving fastened at that pole two ties (cords) he is to stretch the cords towards the middle of the southern and northern side (of the oblong) and to cut off those parts (of the oblong) which lie outside the two cords; thereby the western praüga too is explained (i. e. the western half of the ubhayatah-praüga is found by fixing a pole in the middle of the oblong's western side and stretching from there two cords towards the middle of the southern and northern side).

द्विस्तावतीं प्रमाणतिर्यङ्मानीकां द्विप्रमाणपार्श्वमानीकां दीर्घचतुरस्रां कृत्वा पूर्वस्याः करण्या मध्ये शङ्कुं निहत्य तस्मिन्पाशौ प्रतिमुच्य दक्षिणोत्तरयोः पार्श्वमान्योर्मध्यदेशयोः स्पन्द्यां निपातयेत् । बहिःस्पन्द्यं निरस्येदेतेन प्रकारेणापरं प्रउगं व्याख्यातम् ।

चतुरस्रं मण्डलं चिकीर्षन्नक्ष्णयार्धं मध्यात्प्राचीमभ्यापातयेद्यदतिशिष्यते तस्य सह तृतीयेन मण्डलं परिलिखेत् । ५८

If you wish to turn a square into a circle, draw half of the cord stretched in the diagonal from the centre towards the práchí-line (i. e. stretch a cord from the centre of the square to one of the corners, for instance to the north-east corner and move then the loose end of the cord towards south until the cord covers the práchí, the line running from the centre of the eastern side of the square to the centre of the western side; a piece of the cord will then of course lie outside the square), describe the circle together with the third part of that piece of the cord which stands over (i. e. take for radius of the circle the whole piece of the cord which lies inside the square plus the third part of the piece which lies outside).

चतुरस्रस्याक्ष्णयार्धं चतुरस्रमध्यादारभ्य कोट्यां निपात्य चिह्नं कृत्वा चतुरस्रस्य पूर्वपार्श्वमध्ये प्राचीं निपात्य चिह्नं कृत्वा चिह्नयोरन्तरालं त्रेधा विभज्य एकभागसहितेन चतुरस्रार्धेन मण्डलं परिलिखेत् । सानित्या मण्डलं करोति ।

मण्डलं चतुरस्रं चिकीर्षन्विष्कम्भमष्टौ भागान्कृत्वा भागमेकोनत्रिंशधा विभज्याष्टाविंशतिभागानुद्धरेद्भागस्य च षष्ठमष्टमभागोनम् । ५९

If you wish to turn a circle into a square divide the diameter into eight parts and one of these eight parts into twenty-nine parts; of these twenty-nine part remove twenty-eight and moreover the sixth part (of the one left part) less the eigth part (of the sixth part).

The meaning is: $\frac{7}{8}+\frac{1}{8.29}-\frac{1}{8.29.6}+\frac{1}{8.29.6.8}$ of the diameter of a circle is the side of a square the area of which is equal to the area of the circle. This

Digitized by Google

rule for turning a circle into a square is the reverse of the preceding rule for turning a square into a circle; it is based on the remarkably accurate numerical expression for the relation of the diagonal of a square to the side, of a square which will be given in S. 61.

भागस्योद्धृतशिष्टस्य षष्ठं कीदृशं स्वीयाष्टमभागोनम्। कस्मादुद्धरेत्। उद्धृताष्टविंशतिभागात्। एतदुक्तं भवति। विष्कम्भमष्टधा कृत्वैकं भागं द्विनवतिशतत्रयाधिकसहस्रभागान्कृत्वा तेषामेकचत्वारिंशद्भागान्विष्कम्भभागसप्तके संयोज्य एकपञ्चाशच्छतत्रयाधिकसहस्रभागान्कृत्वा तेषामेकं भागं जह्यादित्यर्थः।

अपि वा पञ्चदशभागान्कृत्वा द्वावुद्धरेदेषानित्या चतुरस्रकरणी। ६०

Or else divide (the diameter) into fifteen parts and remove two, that is the gross side of the square

एषा परिशिष्टत्रयोदशभागप्रमाणा अनित्या स्थूला चतुरस्रकरणी। अनयोरनित्यत्वं ज्ञायते गणितविरोधात् परस्परविरोधाच्च। तथाहि। सप्तविधस्य सारत्निप्रादेशस्याग्नेः क्षेत्रं लक्षमष्टौ च सहस्राण्यङ्गुलयः। १०८००० । तस्य चतुरस्रीकृतस्य करणी त्रीणि शतान्यष्टाविंशतिश्चाङ्गुलयो ऽर्धद्वाविंशाश्च तिलाः। ३२८ अ° २१· ॥ ति°। तस्मिन्नुक्तेन मार्गेण मण्डलीकृते त्रीणि शतानि चतुःसप्ततिश्चाङ्गुलयो विष्कम्भो भवति। ३७४। तस्य परिणाहः सहस्रं पञ्चसप्ततिशतं चाङ्गुलयः। ११७५। यथाहुः। चतुरधिकं शतमष्टगुणं द्वाषष्टिस्तथा सहस्राणाम् अयुतद्वयविष्कम्भस्यासन्नो वृत्तपरिणाह इति। तस्य मण्डलस्य फलं लक्षं नवसहस्राण्यष्टौ शतानि षष्टिश्चाङ्गुलयो दृश्यन्ते। उक्तं च। समपरिणाहस्यार्धं विष्कम्भार्धहतमेव वृत्तफलम्। एवमग्निक्षेत्रे रथचक्रादौ मण्डलीकृते। परस्परविरोधः। अर्धद्वाविंशतितिलसहितस्याष्टाविंशतिशतत्रयाङ्गुलिकरणीकस्याग्नेर्मण्डलीकृतस्य विष्कम्भश्चतुःसप्ततिशतत्रयाङ्गुलयुक्तः। तस्यैव मण्डलस्योक्तेन मार्गेण चतुरस्रकरणे त्रीणि शतानि चतुर्विंशतिश्चाङ्गुलयो ऽर्धपञ्चमाश्च तिलाः करणी भवति। पूर्वोक्तायाः करण्याः सार्धाश्चतस्रो ऽङ्गुलयो हीयन्ते। तस्मात्सूक्ष्ममिच्छता चतुरस्रस्य मण्डलकरणे सूत्रोक्तादतिशयतृतीयसहिताद्विष्कम्भार्धादष्टादशशतांशस्त्याज्यः। एवंकृते रथचक्रचितौ विष्कम्भः षट्तिलोनैकसप्ततिशतत्रयाङ्गुलयो भवन्ति। ३७०·२८·। परिणाहश्च पञ्चषष्टिः शतं सहस्राङ्गुलयः। ११६५। अस्यं मण्डलस्य समपरिणाहस्येत्यादिना पूर्वोक्तेनानीतं फलं लक्षमष्टौ च सहस्राणि भवन्ति। १०८०००। मण्डलस्यापि चतुरस्रकरणे सूत्रोक्तविष्कम्भश्च स्यात्त्रिगुणात्त्रयस्त्रिंशच्छतांशं युञ्ज्यात्। द्विकरण्युक्ता। तस्या ज्ञानोपायमाह।

प्रमाणं तृतीयेन वर्धयेत्तच्च चतुर्थेनात्मचतुस्त्रिंशोनेन। ६१

Increase the measure by its third and this third by its own fourth less the thirty-fourth part of that fourth.

If we take 1 for the measure and increase it as directed we get the following expression: $1+\frac{1}{3}+\frac{1}{34}-\frac{1}{3.4.34}$ This is the numerical formula which the authors of the Śulvasútras had found for the relation of the diagonal of a square to the side of the square. Turning the expression into a decimal fraction, we get 1.4142156.... Then taking I for the measure of a square's side, we have of course the squareroot of two as the measure of the square's diagonal. The square-root of two is 1.414213......Comparing the two decimal fractions, we see that the value the Sútrakáras had found comes up remarkably close to the true value. According to the custom of the class of writings called sútras, the method by which the result was obtained is not stated. It would take too much space to discuss the question in this place; I shall show elsewhere that it is possible to trace the steps by which Baudháyana (or whoever may have the merit of the first investigation) arrived at fixing the value of the "saviśesha."

द्वादशाङ्गुलं चतुरङ्गुलेन वर्धयेत्। तत्तृतीयं स्वीयचतुर्थेन स्वचतुस्त्रिंशांशोनेन तिलोनेनैकाङ्गुलेन वर्धयेत्। एवं तिलोनसप्तदशाङ्गुला भवति।

सविशेषः। ६२

The name of this increased measure is saviśesha.

तस्य सविशेष इत्यपि संज्ञा।

---

[1]. This reading is conjectural. A. B. C. °गोनं अर्धकारादुद्धरेत्

[1]. A. after ११६५ on the margin: षष्ट्यधिकान्यष्टौ शतानि सहस्रं चाङ्गुलयो ऽतिरिच्यन्ते। तथा च अस्य ॥

[2]. Thus in C.—A. सूत्रो (क्त on the margin) विष्कम्भे स्यात्त्रि° B. the same without क्त.

[3]. A. adds on the margin some Ślokas, referring to the same subject, which are however so full of lacunæ that it would be useless to repeat them here.

[4]. A. B. have after °नोपायमाह the following: नेनात्मचतुस्त्रिंशो भागः संयोज्य इत्यर्थः। प्रमाणं तृतीयेन° and in A. the following lines are added on the margin (to be inserted before नेनात्म°) प्रमाणं तृतीयेन वर्धयेदिति। अस्य सूत्रस्यार्थत्रयम्। तत्राक्ष्णयारज्जुपक्षे आत्मशब्देन प्रमाणतृतीयभागस्य चतुर्थो भाग उच्यते। चतुरस्रस्य मण्डनकरणे आत्मशब्देन प्रमाणमेवोच्यते। मण्डलस्य चतुरस्रकरणे स्वतृतीयभागेन तच्चतुर्थभागेन च संयुक्तं प्रमाणमेवोच्यते। अस्मिन्पक्षे आत्मचतुस्त्रिंशः अनेनेति पदच्छेदः। अनेनेति स्वतृतीयांशेन अस्यैव तृतीयांशस्य चतुर्थांशेन च संयुक्तं प्रमाणमेतादृशेन मा°।

Digitized by Google

अथाग्न्याधेयिके विहारः । ६३

In the following the measurements required for the construction of the sacrificial fires will be treated.

अथेत्यधिकारे ।

गार्हपत्यादाहवनीयस्यायतनम् । ६४

The place for the áhavaníya-fire is to be found by starting from the gárhapatya-fire. (and measuring towards the east).

गार्हपत्यात् गार्हपत्यस्य पुरस्तात् ।

विज्ञायते । ६५

In this matter the following tradition holds good.

अन्तरालमधिकृत्य श्रुतिरवगम्यते ।

अष्टासु प्रक्रमेषु ब्राह्मणोऽग्निमादधीतैकादशसु राजन्यो द्वादशसु वैश्यः । ६६

The Bráhmaṇa has to construct the (áhavaníya) fire at the distance of eight prakramas (to the east from the gárhapatya), the Rájanya at the distance of eleven the Vaiśya at the distance of twelve.

अष्टासु प्रक्रमेष्वन्तरालभूतेष्वित्यर्थः । एवमुत्तरयोरपि कल्पयोः । द्वादशसु विक्रमेष्वग्निमादधीतेति सार्ववर्णिकः । चक्षुर्निमित आदधीतेति दण्डादिना माननिषेधः । इयदष्टौ प्रक्रमा इयदेकादश इयद्द्वादशेति चक्षुषा यावन्तं देशं परिच्छिन्दन्ति तस्यावधेः समीप आधेय इत्यर्थः ।

आयामतृतीयेन त्रीणि चतुरस्राण्यनूचीनानि कारयेदपरस्योत्तरस्यां श्रोण्यां गार्हपत्यस्तस्यैव दक्षिणेंऽसेऽन्वाहार्यपचनः पूर्वस्योत्तरेंऽस आहवनीय इति । ६७

With the third part of the length (of the distance between áhavaníya and gárhapatya) he is to make three squares following upon each other (touching each other); the place of the gárhapatya is in the north-west corner of the western square, the place of the anváháryapachaṇa (or dakshiṇa agni) in the south-east corner of the same square ; the place of the áhavaníya in the north-east corner of the eastern square.

पूर्वोक्तगार्हपत्याहवनीयमध्ययोरन्तरालायामतृतीयकरणीप्रमाणेन त्रीणि चतुरस्राण्यनूचीनानि प्राञ्चि पश्चिमस्य पुरस्ताद् द्वितीयं द्वितीयस्य पुरस्तात्तृतीयमिति कारयेत् । अपरस्य चतुरस्रस्योत्तरस्यां श्रोण्यां गार्हपत्यमध्यशङ्कुः । धिष्ण्यानां द्विप्रादेशो विष्कम्भ इति वक्ष्यति । तस्मिन्प्रादेशेन मण्डलं परिलिखेत् । पृथिवीसंस्तवान्मण्डलाकृतिर्गार्हपत्यः । तस्यैवापरस्य दक्षिणेंऽसेऽन्वाहार्यपचनमध्यशङ्कुः । मण्डलं चतुरस्रं चिकीर्षन्नित्यादिनानीतनवतिलसहितैकविंशत्यङ्गुलचतुरस्रद्विकरण्या चतुस्तिलसहितत्रिंशदङ्गुलया समचतुरस्रं कृत्वा मण्डलं कृत्वा दक्षिणविहारविष्कम्भश्चतुस्त्रिंशदङ्गुलयो दश तिलाश्च । दक्षिणविहारमध्यशङ्कोरुत्तरतो विष्कम्भचतुर्भागमात्रे शङ्कुं स्थापयित्वा तस्मिन्विष्कम्भार्धं प्रतिमुच्य मण्डलं परिलिख्य मण्डलमध्ये प्राक्प्रतीचीं स्पन्द्यां नियम्यानुस्पन्द्यं लेखामालिख्य उत्तरार्धं त्यजेत्सोऽन्वाहार्यपचनः । अन्तरिक्षसंस्तवाद्धनुराकृतिः । पूर्वस्योत्तरस्याः श्रोण्या उत्तरेणोत्करः । पूर्वस्य चतुरस्रस्योत्तरेंऽस आहवनीयमध्यशङ्कुः । तस्य नवतिलसहितैकत्रिंशत्यङ्गुलं चतुरस्रं कुर्यात् । द्युलोकसंस्तवाच्चतुरस्र आहवनीयः । आगारो वा । सभायामेव सभ्यं व्यपदिशेत् । आवसथ आवसथीयमिति । अपि वा पक्षः । आयामतृतीयेनेत्यादि सर्वं कल्पोक्तेन विकल्पते । दक्षिणाग्न्यायतनदेशविकल्पार्थमाह ।

॥ अथ ज्ञानसिद्धान्तचन्द्रिका ॥

बर्क्लीसंज्ञकमहापण्डितविरचितज्ञानसिद्धान्तमालायाः

अवतारिता ।

तत्र सप्तनवतितमादिपरिच्छेदाः ।

९७—आत्मग्राह्यप्रत्यक्षविषयकल्पनातिरिक्तं विज्ञानविज्ञायां भ्रमविकल्पादिप्रबलमूलान्तरं तूक्तोपोद्घातप्रकरणे विस्तरशः प्रपञ्चितमभेद्यभेदज्ञानं नाम मतमेव । सुस्पष्टतराः सकलजनपर्यवगता अपि विषयास्तादृशमतमनुसृत्य चिन्तिताश्चेदतिविचित्ररूपाः परमदुर्बोधाश्च प्रतीयन्ते । यथा दिक्कालगत्यादयोभावा विशेषधर्मपुरस्कारेण सर्वैर्बोद्धुं शक्यन्ते । ते पुनरुक्तसिद्धान्तधुरंधराणामध्यात्मशास्त्रविदां विमर्शस्य गोचरीभूतास्तु तथा निरवच्छिन्नरूपाः सूक्ष्मतराश्च संपद्यन्ते यथा साधारणप्रज्ञाशालिभिर्जनैर्ज्ञातुं नैव शक्यन्ते । केनचित् पुंसा स्वभृत्येऽमुकस्मिन् कालेऽमुकस्मिन् देशे समुपागन्तुमादिष्टे न स स्वाम्युक्तशब्दार्थावगमे संदिहानो भवति नाप्यादिष्टदिक्कालविशेषयोस्तादृशदेशान्तरप्राप्त्यनुकूलगतिविशेषस्य च ज्ञानमीषदपि दुष्करं मनुते । कालपदेन पुनर्दिवसाद्यवान्तरविशेषाभिव्यञ्जकज्ञानक्रियादिविशेषविनिर्मुक्ते वर्तनसामान्ये एव विवक्षिते तु तदवगन्तुं विबुधोत्तमोपि विमुह्येत् ।

९८—यदा यदा चाहं सकलजनानुभूतया सततं प्रवहन्त्या स्वात्मगतज्ञानपरंपरया वियुक्तं शुद्धकालज्ञानं विभावयितुं प्रयते तदा तदा सर्वथा तदसंलभ्यम् आत्मानं च निरवधिशङ्काकलापाकुलं विमूढं च पश्यामि । न कथमपि तज्ज्ञानं मे संभवति । अनन्तविभागयोग्यं किमप्यवस्थानमात्रमित्यादिविधं लौकिकं कालपदार्थव्याख्यानमाकर्णयन्तु मम स्वसद्भावविषयेऽपि तावद्द्विविधाः शङ्का उद्भवन्ति । यतो ह्येतन्मतानुरोधेनानन्तकालावयवानां ज्ञानबहिष्ठम् [जीवनकालस्याप्यसंख्यविभागवत्तयोत्तरोत्तरतदवयवान्तरेषु जीवनाभावान्] मनुष्याणां प्रतिक्षणं मृत्युशालित्वं वा आपद्येत । अस्ति

Digitized by Google

चैतदुभयमपि बाधितम् । एवं च कालस्यात्मगतज्ञानपरंपरातिरिक्तत्वादात्मनोऽवस्थितेर्मानं स्वगतज्ञानव्यापारसंख्ययैव संख्यातुं युक्तम् । [ज्ञानप्रवाहस्य सततं प्रवर्तमानतया] आत्मनोऽनिरन्तरं ज्ञानशालित्वं च पर्यवस्यति । यदि कोप्येतदश्रद्धाय स्वबुद्धावात्मानं ज्ञानाद्विवेक्तुं प्रयतेत तर्हि नूनं सोस्य दुष्करतरत्वमेवोपलभेत ।

९९—एवं यदा परिमाणं गतिर्वा तदितरेभ्यः सर्वेभ्यो गुणेभ्यः पृथक्कृत्य तदेकधर्मपुरस्कारेण चिन्तयितुमिष्यते तदा तत्स्वरूपमेव नोपलभ्यते प्रत्युत सुनिश्चितनियमातिपाताश्च प्रसज्यन्ते । ईदृक्पृथक्कारोक्तिसंभवस्तु परिमाणादयः प्रत्येकं स्वेतरयावज्ज्ञेयगुणेभ्यस्तत्सत्ता च तज्ज्ञानाद्विवेक्तुं शक्यन्त इत्याकारकभ्रमद्वयमूलक एव बोध्यः । परंतु यदि कोपि विचक्षणः [पदार्थान्] सावधानं निरूपयेत् तर्हि ज्ञेयगुणानाम् एकरूपे प्रत्यक्षज्ञानात्मकत्ववास्तविकत्वे परिमाणरूपयोरव्यभिचार्यात्ममात्रैकाधिकरण्यं ज्ञेयगुणमूलमूर्तीनामात्मान्तर एवावस्थानयोग्यताम् इन्द्रियविषयाणां च समुदितप्रत्यक्षात्मकत्वं ज्ञानातिरिक्तत्वासंभवं च स्वीकुर्यात् ।

१००—यद्यपि सुखिता जनास्तेषां सुखविषयाश्च सर्वैर्ज्ञातुं शक्येरंस्तथाप्यशेषसुखविशेषशून्यस्य सुखस्य निखिलसुखजनकव्यक्तिनिरपेक्षायाः सुखजनकतायाश्च ज्ञानं विरल एव संभाव्यं मन्येत । एवमन्यूनानतिरिक्तमृजुत्वधार्मिकत्वज्ञानमस्त्येव पुरुषा ऋजवो धार्मिकाश्च संभवन्ति । ऋजुत्वधार्मिकत्वादिशब्दास्तत्तत्पुरुषव्यापारादिविशेषविनिर्मोकेण साधारणभावानामेव वाचका इत्यादिसिद्धान्तस्तु नीतिशास्त्रं दुर्बोधं तदभ्यासं च न्यूनफलं संपादयति । [तत्र सदसतोर्यथार्थज्ञानासंभवात्] एवं चाभेदाभेदज्ञानसिद्धान्तो न तावत्स्वल्पं ज्ञानकाण्डं दूषयतीति द्रष्टव्यम् ।

१०१—अथ विचारशास्त्रस्य मुख्यविषयभूते यथाक्रममैन्द्रियकज्ञानतत्संबन्धयोः प्रतिपादके पदार्थविज्ञानगणिताभिधे शास्त्रे स्तः । तत्र पदार्थविज्ञाने चार्वाकाः स्वोत्कर्षं प्रदर्शयन्तो विकत्थन्ते । ज्ञानशक्तीनां वैकल्यं मनुष्याणां नैसर्गिकनीचत्वाल्पज्ञत्वे च द्योतयितुमुपन्यस्तास्तेषामशेषा हेतुवादास्तात्त्विकपदार्थज्ञाने लोकविश्रान्तं नराणामनिवार्यज्ञानावरणावृतत्वमभ्युपेत्य प्रवर्तन्ते । किंच सर्वे जनाः स्वैरिन्द्रियैर्वञ्च्यन्ते । तद्द्वारा विषयाणां बाह्याकृत्याद्याभासमात्रमुपलभ्यते । तुच्छतमस्यापि विषयस्य सारभूतोंऽशोऽभ्यन्तरगुणाः स्वभावाश्च मनुष्यबुद्ध्यगोचरा एव तिष्ठन्ति । कामं लघिष्ठोपि जलस्य रजसो वा कणः सर्वात्मना नैव ज्ञायते इत्यादिवचनजातैस्ते मर्त्यानां नितान्तं मन्दमतित्वद्योतयन्ति । परंतु पूर्वोक्तग्रन्थार्थपर्यालोचनया सर्वमिदं स्वाज्ञानप्रख्यापनं सर्वथा निर्मूलमेव प्रतिभाति । जनास्तु मिथ्यामतोपहतास्सन्त आत्मानं न विश्वसन्ति पर्याप्तं ज्ञातानपि विषयान् न तथा जानीम इति कथयन्ति ।

१०२—सांसारिकाखिलपदार्थविषयकाज्ञानकल्पनाप्रवृत्तेर्मुख्यं बीजं तु प्रत्येकं पदार्थः स्वस्मिन् रूपरसादिगुणानां कारणीभूतं किंचिद्वस्त्वन्तरमन्तर्भावयति । तन्निमित्तक एव च ज्ञेयगुणानां समुद्भव इति संप्रति प्रचलितं लोकसंमतं मतमेव । केचित्तूपलब्धगुणानां कारणमनुपलब्धगुणान्तराण्येवाहुः । अर्वाचीनास्तु तान् गुणान् रासायनिककारणापरपर्यायेषु गत्याकारगुरुत्वादिष्वनीन्द्रियपरमाणुगुणेषु व्याचक्रुः । वस्तुतस्तु न कस्याप्यात्मातिरिक्तस्य [क्रियाजनकत्वरूपं] निमित्तकारणत्वं संभवति । गत्यादीनां निष्क्रियताया एव निर्णीतत्वात् । अस्य विस्तारस्तु पञ्चविंशतितमे परिच्छेदे द्रष्टव्यः । अतएव गत्याकारादौ शब्दरूपादिनिमित्ततानिरूपणप्रयासो व्यर्थः । तत्र हि ज्ञानस्य ज्ञानान्तरकारणताया नाप्राप्तेः । तथासति बहवः सिद्धान्ताः साधुविमर्शाश्च विरुध्येरन् पदार्थविज्ञानशास्त्रविस्तरश्च निरर्थकः स्यात् ।

१०३—अस्त्येकः सुप्रसिद्धो गतिशास्त्रस्य परमसिद्धान्तः पदार्थाकर्षणं नाम । अस्ति च भूमावाकाशादुपलपतनमुदधेश्चन्द्रमसमभि विजृम्भणमित्यादीनि वृत्तान्युक्तनियमेन पर्याप्तमुपपाद्यन्त इति प्रायो वादः । तत्र सर्वमिदमाकर्षणशक्त्यैव संपाद्यत इति वचनं किं बोधयतीति तावज्जिज्ञासितव्यम् । अथोच्येतानेन [पदार्थानां] गतिप्रावण्यप्रकारो बोध्यते यदुक्तविधानि कार्याणि पिण्डानां परस्पराकर्षणेनैव निष्पाद्यन्ते नतु [पदार्थान्तरकृतेन] तेषामन्योन्याभिमुखं प्रेरणेनेति । नात्र विनिगमकं पश्यामः । आकर्षणशक्त्येव प्रेरणशक्त्याप्युक्तकार्याणां संभवात् । एवमयःखण्डानां मिथः संश्लेषोप्याकर्षणशक्तिसाध्य एव मन्यते । परंत्वेवमादिषु स्थलेषु केवलमुपलब्धं कार्यमेव संकीर्त्यते नतु तदुत्पत्तेःप्रकारस्य कारणस्य वा दिङ्मात्रमपि लक्ष्यते ।

केशवशास्त्री

To

THE EDITOR OF THE PANDIT.

SIR,

Most respectfully I beg a short space in your paper for a few lines upon the Reverend Professor K. M. Banerjea's Dialogues on Hindu Philosophy. Not to say anything against his doctrines, I here mean only to show the plainly existing harmony between the two passages, quoted in the third Dialogue, from the Śánkarabháshya on the Vedánta Sútras, which the writer of the Dialogues considers contradictory to each other. As he, in the Dialogue, arguing against the well-founded doctrine of the soul's prëexistence, says that even Śankarácharya cannot be said to hold this opinion; for he, says the writer, contradicts his own arguments about the prëexistence of soul which he maintains elsewhere.

The following are the quotations of the Śánkarabháshya translated into English by the writer of the Dialogues:—"What is the want of equity [on the 'part of God] He makes a distinction between souls, 'high, low, middling. Hence exhibiting partiality and 'prejudice, and other infirmities, he might be proved to

Digitized by Google

'be like ourselves and therefore no God. If it be said 'he continues' that the above distinctions are owing to 'the past works of the souls themselves, and that con-'sequently there can be nothing wrong in the existing 'inequalities; the solution will not stand: for works 'being motions, and the God the mover, there will 'still 'be the fault of [cause and effect resting on] re-'ciprocal support [as in a vicious circle]. '* If you 'say there has been a series of works without beginning, 'then, as in the present world, so also in past states 'the same fault must be found of reciprocal support, '[each cause producing and being produced by its own 'effect] and it will be after the manner of a troop of 'blind leading the blind."

The second passage which is thought to be contradictory to the preceding one is as follows :—"This, be-'loved, was one, without a second, at the beginning. 'Hence, as there could be no distinction before the crea-'tion, there could be no works, in dependence on which 'inequalities might be created. After the creation there 'may be works dependent on corporeal distinctions and 'corporeal distinctions dependent on works: this reci-'procal inter-action may then be made out. God may be 'dependent on works after the distinctions are made. 'But before those distinctions are made, there could be 'no works caused by varying instruments, and therefore 'we ought to find a uniform creation. If this objection 'be urged, continues Śankara, it does not vitiate one 'doctrine, because the world is without beginning. It 'would vitiate our theory if the world had beginning. 'But the world being without beginning, nothing can 'prevent works and unequal creations continuing in the 'states of cause and effect like the seed and its plant."

These are the passages of the Śankarabháshya contradicting each other in the opinion of the Revd. K. M. Banerjea. He observes that Śankara, in the passage first quoted, ridicules the eternal succession of works and worlds depending on each other, by comparing it with a troop of blind men led by the blind; whilst in the next place, he facing the question of inequalities on the part of God, takes refuge in the very supposition of an eternal succession of works and worlds.

But now it would be worth while to ask the writer of the Dialogues, on what grounds he freely translates the phrase [अनादित्वादिति चेत्] of the Śankara Bháshya, by. 'If you say there has been a series of works without beginning' as given in the first of the two quotations? For this interpretation is quite opposed to what can really be meant by the phrase. It will be clear to any one who reads the first quotation, that the eternity proposed in the phrase alluded to, has been urged in order to support the preceding tenet anticipated by Śankara on the side of his opponents, the Vaiśeshika and others, wherein God is held as a director and works as directed. We ought, therefore, to understand by that eternity of God's directorship and the directedness of works; so that, the tenet could not be easily refuted, as it maintains what is eternal and unchangeable. Whereas if we were to understand by the phrase the eternity of succession of works, as the Revd. K. M. Banerjea does, instead of the eternity of what the tenet proposes, the sense of the phrase would be quite irrelevant to it; as it refers to what is totally unknown to the tenet. No one, who is well acquainted with the writings of Śankara, could believe that he would use quite irrelevant passages in his argumentation. I wonder how the writer of the Dialogues came to interpret the phrase in so peculiar a manner, believing Śankara to be responsible for the irrelevancy, in spite of the unfavourable authority of Govindánanda, the commentator of the Śánkarabháshya.

From what has been said it is clear, that the writer having first misrepresented Śankara charges him with faults which are in reality his own. It is his own misinterpretation of phrase which misleads him to fancy that Śankara ridicules the idea of an eternal succession of works and worlds, by comparing it with a troop of blind leaders of the blind. But it has been proved by the preceding statements, that the tenet anticipated by Śankara on the side of his opponents, and which accordingly he is likely to ridicule and oppose, is that of the directorship of God and the directedness of works without beginning, and not that of the eternal succession of works, which it is quite impossible both to construe from the phrase and to show to have any relevancy to the matter in hand.

Such being the case, no one should imagine self-contradiction in behalf of Śankara, who, in the passage first quoted, refutes the theory of the eternal directorship and directedness of God and works respectively, on account of the reciprocal support, neither God, the director, nor work the directed ever being supposed independent of the other to work its own office, and consequently ridicules the theory by comparing it with a troop of blind leaders of blind; in the next passage, he establishes his own doctrine of the eternal succession of works, each of which is depending on the preceding for its own variety, just as the seed and its plant.

In conclusion I have only to express my surprise that the Reverend gentleman instead of suspecting his own misunderstanding as to the passages of the Bháshya, should be so confident as to suppose that so great and ever-esteemed an author as Śankaráchárya should have committed such a palpable and heedless self-contradiction liable to be detected by cursory readers.

I beg to remain
Sir,
Your most obedient servant,
KEŚAVA ŚÁSTRI.

The 2nd May, 1875.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

Digitized by Google

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 110. Benares, July 1st, 1875. Vol. X.

काशिकायाः

॥ चतुर्थाध्यायस्य प्रथमःपादः ॥

नित्यं छन्दसि ॥ ४६ ॥

बह्वादिभ्यश्छन्दसि विषये नित्यं स्त्रियां ङीष् प्रत्ययो भवति । बह्वीषु हित्वा प्रपिबन् । बह्वी नाम ओषधी भवति । नित्यग्रहणमुत्तरार्थम् ॥

भुवश्च ॥ ४७ ॥

छन्दसि विषये स्त्रियां भुवो नित्यं ङीष् प्रत्ययो भवति । विभ्वी च । प्रभ्वी च । सुभ्वी च * । इह कस्मान्न भवति स्वयंभूः । उत इति तपरकरणमनुवर्त्तते । ह्रस्वादेवेयं पञ्चमी । भुव इति सौत्रो निर्देशः ॥

पुंयोगादाख्यायाम् ॥ ४८ ॥

पुंसा योगः पुंयोगः । पुंयोगाद्धेतोर्यत्प्रातिपदिकं स्त्रियां वर्त्तते पुंस आख्याभूतं तस्माद् ङीष् प्रत्ययो भवति । गणकस्य स्त्री गणकी । महामात्री । प्रष्ठी । प्रचरी । पुंसि शब्दप्रवृत्तिनिमित्तस्य संभवात् पुंशब्दा एते, तद्योगात्स्त्रियां वर्त्तन्ते । पुंयोगादिति किम् । देवदत्ता । यज्ञदत्ता । आख्याग्रहणं किम् । परिसृष्टा । प्रजाता । पुंयोगादेते शब्दाः स्त्रियां वर्तन्ते, न तु पुमांसमाचक्षते ॥ गोपालिकादीनां प्रतिषेधः ॥ * ॥ गोपालकस्य स्त्री गोपालिका ॥ सूर्याद्देवतायां चाब्वक्तव्यः ॥ * ॥ सूर्यस्य स्त्री देवता सूर्या । देवतायामिति किम् । सूरी ॥

---

* शंभ्वीति पा० ।

इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक् ॥ ४९ ॥

इन्द्रादिभ्यः प्रातिपदिकेभ्यः स्त्रियां ङीष् प्रत्ययो भवति, आनुक्चागमः । येषामत्र पुंयोगएवेष्यते तेषामानुगागममात्रं विधीयते । प्रत्ययस्तु पूर्वेणैव सिद्धः । अन्येषां तूभयं विधीयते । इन्द्राणी । वरुणानी । भवानी । शर्वाणी । रुद्राणी । मृडानी ॥ हिमारण्ययोर्महत्त्वे ॥ * ॥ महद्धिमं हिमानी । महदरण्यमरण्यानी ॥ यवाद्दोषे ॥ * ॥ दुष्टो यवो यवानी ॥ यवनाल्लिप्याम् ॥ * ॥ यवनानी लिपिः ॥ * ॥ उपाध्यायमातुलाभ्यां वा ॥ * ॥ उपाध्यायी । उपाध्यायानी । मातुली । मातुलानी ॥ आचार्यादणत्वं च ॥ * ॥ आचार्यानी । आचार्या ॥ आर्यक्षत्रियाभ्यां वा ॥ * ॥ आर्याणी । आर्या । क्षत्रियाणी । क्षत्रिया । विना पुंयोगेन स्वार्थएवायं विधिः । पुंयोगे तु ङीषेव भवितव्यम् । आर्यी । क्षत्रियी ॥ मुद्गलाच्छन्दसि लिच्च ॥ * ॥ रथीरभून्मुद्गलानी गविष्टौ ॥

क्रीतात्करणपूर्वात् ॥ ५० ॥

करणं पूर्वमस्मिन्निति करणपूर्वं प्रातिपदिकम् । क्रीतशब्दान्तात्प्रातिपदिकात्करणपूर्वात्स्त्रियां ङीष् प्रत्ययो भवति । वस्त्रेण क्रीयते सा वस्त्रक्रीती । वसनक्रीती । करणपूर्वादिति किम् । सुक्रीता । दुष्क्रीता । इह कस्मान्न भवति ।

सा हि तस्य धनक्रीता प्राणेभ्योपि गरीयसी ।

इति । ङीबन्तेन समासः । अत इति चानुवर्त्तते । गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेरिति बहुलं तदुच्यते, कर्तृकरणे कृता बहुलमिति ॥

Digitized by Google

क्तादल्पाख्यायाम् ॥ ५१ ॥

करणपूर्वादित्येव । करणपूर्वात्प्रातिपदिकात् क्तान्तादल्पाख्यायां ङीष् प्रत्ययो भवति । अल्पाख्यायामिति समुदायोपाधिः । अभ्रविलिप्ती द्यौः । सूपविलिप्ती पात्री । अल्पमूपेत्यर्थः । अल्पाख्यायामिति किम् । चन्दनानुलिप्ता ब्राह्मणी ।

बहुव्रीहेश्चान्तोदात्तात् ॥ ५२ ॥

क्तादित्येव । बहुव्रीहिर्योऽन्तोदात्तस्तस्मात्स्त्रियां ङीष् प्रत्ययो भवति । स्वाङ्गपूर्वपदो बहुव्रीहिरिहोदाहरणम् । अस्वाङ्गपूर्वपदाद्विकल्पं वक्ष्यति । शङ्खभिन्नी । ऊरुभिन्नी । गलकोत्कृत्ती । केशलूनी । बहुव्रीहेरिति किम् । पादपतिता ॥ अन्तोदात्ताज्जातप्रतिषेधः ॥ * ॥ दन्तजाता । स्तनजाता ॥ पाणिगृहीत्यादीनामर्थविशेषे ॥ * ॥ पाणिगृहीती भार्या । यस्यास्तु कथं चित्पाणिर्गृह्यते पाणिगृहीता सा भवति ॥ अबहुनञ्सुकालसुखादिपूर्वादिति वक्तव्यम् ॥ * ॥ बहुकृता । नञ् । अकृता । सु । सुकृता । काल । मासजाता । संवत्सरजाता । सुखादिः । सुखजाता । दुःखजाता । जातिकालसुखादिभ्योऽनाच्छादनादित्येवमादिना बहुव्रीहेरन्तोदात्तत्वम् ॥

अस्वाङ्गपूर्वपदाद्वा ॥ ५३ ॥

अन्तोदात्तात् क्तान्तादित्यनुवर्त्तते । अस्वाङ्गपूर्वपदादन्तोदात्तात् क्तान्ताद्बहुव्रीहेः स्त्रियां वा ङीष् प्रत्ययो भवति । पूर्वेण नित्ये प्राप्ते विकल्प उच्यते । शार्ङ्गजग्धी । शार्ङ्गजग्धा । पलाण्डुभक्षिती । पलाण्डुभक्षिता । सुरापीती । सुरापीता । अस्वाङ्गपूर्वपदादिति किम् । शङ्खभिन्नी । ऊरुभिन्नी । अन्तोदात्तादित्येव । वस्त्रच्छन्ना वसनच्छन्ना ॥ बहुलं संज्ञाछन्दसोरिति वक्तव्यम् ॥ * ॥ प्रवृद्धविलूनी । प्रवृद्धविलूना । प्रवृद्धा चासौ विलूना चेति नायं बहुव्रीहिः ॥

स्वाङ्गाच्चोपसर्जनादसंयोगोपधात् ॥ ५४ ॥

बहुव्रीहेः क्तान्तादन्तोदात्तादिति सर्वं निवृत्तम् । वाग्रहणमनुवर्तते । स्वाङ्गं यदुपसर्जनमसंयोगोपधं तदन्तात्प्रातिपदिकात्स्त्रियां वा ङीष् प्रत्ययो भवति । चन्द्रमुखी । चन्द्रमुखा । अतिक्रान्ता केशान् अतिकेशी, अतिकेशा, माला । स्वाङ्गादिति किम् । बहुयवा । उपसर्जनादिति किम् । अशिखा । असंयोगोपधादिति किम् । सुगुल्फा । सुपार्श्वा ॥ अङ्गगात्रकण्ठेभ्य इति वक्तव्यम् ॥ * ॥ मृद्वङ्गी । मृद्वङ्गा । सुगात्री । सुगात्रा । स्निग्धकण्ठी । स्निग्धकण्ठा ॥

अद्रवं मूर्त्तिमत्स्वाङ्गं प्राणिस्थमविकारजम् ।
अतत्स्थं तत्र दृष्टं चेत्तेन चेत्तत्तथायुतम् ॥

नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाच्च ॥ ५५ ॥

स्वाङ्गाच्चोपसर्जनादित्येव । बह्वज्लक्षणे संयोगोपधलक्षणे च प्रतिषेधे प्राप्ते वचनम् । सहनञ्विद्यमानलक्षणस्तु प्रतिषेधो भवत्येव । नासिकाद्यन्तात्प्रातिपदिकात्स्त्रियां वा ङीष् प्रत्ययो भवति । तुङ्गनासिकी । तुङ्गनासिका । तिलोदरी । तिलोदरा । बिम्बोष्ठी । बिम्बोष्ठा । दीर्घजङ्घी । दीर्घजङ्घा । समदन्ती । समदन्ता । चारुकर्णी । चारुकर्णा । तीक्ष्णशृङ्गी । तीक्ष्णशृङ्गा ॥ पुच्छाच्चेति वक्तव्यम् ॥ * ॥ कल्याणपुच्छी । कल्याणपुच्छा ॥ कबरमणिविषशरेभ्यो नित्यम् ॥ * ॥ कबरपुच्छी । मणिपुच्छी । विषपुच्छी । शरपुच्छी ॥ उपमानात्पक्षाच्च पुच्छाच्च ॥ * ॥ उलूकपक्षी सेना । उलूकपुच्छी शाला ॥

न क्रोडादिबह्वचः ॥ ५६ ॥

स्वाङ्गादिति ङीष् प्राप्तः प्रतिषिध्यते । क्रोडाद्यन्ताद् बह्वजन्ताच्च प्रातिपदिकात्स्त्रियां ङीष् प्रत्ययो न भवति । कल्याणक्रोडा । कल्याणखुरा । कल्याणोखा * । कल्याणबाला । कल्याणशफा । कल्याणगुदा । कल्याणघोणा । कल्याणनखा । † कल्याणमुखा । क्रोडादिराकृतिगणः । सुभगा । सुगला । बह्वचः खल्वपि । पृथुजघना । महाललाटा ॥

सहनञ्विद्यमानपूर्वाच्च ॥ ५७ ॥

स्वाङ्गाच्चोपसर्जनादिति नासिकोदरौष्ठजङ्घेति च प्राप्तो ङीष्प्रतिषिध्यते । सह नञ् विद्यमान इत्येवंपूर्वात्प्रातिपदिकात्स्त्रियां ङीष् प्रत्ययो न भवति । सकेशा । अकेशा । विद्यमानकेशा । सनासिका । अनासिका । विद्यमाननासिका ॥

नखमुखात्संज्ञायाम् ॥ ५८ ॥

नखमुखान्तात्प्रातिपदिकात्संज्ञायां स्त्रियां विषये ङीष् प्रत्ययो न भवति । शूर्पणखा । वज्रणखा । गौरमुखा । कालमुखा । संज्ञायामिति किम् । ताम्रनखी कन्या । चन्द्रमुखी ॥

दीर्घजिह्वी च च्छन्दसि ॥ ५९ ॥

दीर्घजिह्वी इति छन्दसि विषये निपात्यते । संयोगोपधत्वादप्राप्तो ङीष् विधीयते । दीर्घजिह्वी वै देवानां हव्यमलेट् । चकारः संज्ञानुकर्षणार्थः । दीर्घजिह्वीति निपातनं नित्यार्थम् ॥

दिक्पूर्वपदान् ङीप् ॥ ६० ॥

स्वाङ्गाच्चोपसर्जनादित्येवमादिविधिप्रतिषेधविषयः सर्वोऽप्यपेक्ष्यते । यत्र ङीष् विहितस्तत्र तदपवादः । दिक्पूर्वपदात्प्रातिपदिकाद् ङीप् प्रत्ययो भवति । स्वरे विशेषः । प्राङ्मुखी । प्राङ्मुखा । प्राङ्नासिकी । प्राङ्नासिका । इह न भवति । प्राग्गुल्फा, प्राक्क्रोडा, प्राग्जघनेति ॥

---

* कल्याणोखेति बहुषु पुस्तकेषु नास्ति ।

† एकस्मिन्पुस्तके कल्याणगुल्फेत्यपि दृश्यते, तच्चिन्त्यम् । संयोगोपधत्वात् ।

Digitized by Google

वाहः ॥ ६१ ॥

ङीषेव स्वर्यते न ङीप्। वहेरयं ण्विप्रत्ययान्तस्य निर्देशः। सामर्थ्यात्तदन्तविज्ञानम्। वाहन्तात्प्रातिपदिकात्स्त्रियां ङीष् प्रत्ययो भवति। दित्यौही। प्रष्ठौही ॥

सख्यशिश्वीति भाषायाम् ॥ ६२ ॥

सखी अशिश्वी इत्येतौ शब्दौ ङीषन्तौ भाषायां निपात्येते। सखीयं मे ब्राह्मणी। नास्याः शिशुरस्तीति अशिश्वी। भाषायामिति किम्। सखा सप्तपदी भव। अशिशुमिव मामयं शिशुरभिमन्यते ॥

जातेरस्त्रीविषयादयोपधात् ॥ ६३ ॥

जातिवाचि यत्प्रातिपदिकं न च स्त्रियामेव नियतमस्त्रीविषयमयकारोपधं च तस्मात्स्त्रियां ङीष् प्रत्ययो भवति ॥

आकृतिग्रहणा जातिर्लिङ्गानां च न सर्वभाक्।
सकृदाख्यातनिर्ग्राह्या गोत्रं च चरणैः सह ॥

कुक्कुटी। सूकरी। ब्राह्मणी। वृषली। नाडायनी। चारायणी। कठी। बह्वृची। जातेरिति किम्। मुण्डा। अस्त्रीविषयादिति किम्। मक्षिका। अयकारोपधादिति किम्। क्षत्रिया ॥ योपधप्रतिषेधे हयगवयमुकयमत्स्यमनुष्याणामप्रतिषेधः ॥ * ॥ हयी। गवयी। मुकयी। मत्सी। मनुषी ॥

पाककर्णपर्णपुष्पफलमूलवालोत्तरपदाच्च ॥ ६४ ॥

पाकाद्युत्तरपदाज्जातिवाचिनः प्रातिपदिकात्स्त्रियां ङीष् प्रत्ययो भवति। स्त्रीविषयत्वादेतेषां पूर्वेणाप्राप्तः प्रत्ययो विधीयते। ओदनपाकी। शङ्कुकर्णी। शालपर्णी। शङ्खपुष्पी। दासीफली। दर्भमूली। गोवाली। पुष्पफलमूलोत्तरपदात्तु यतो नेष्यते तदजादिषु पठ्यते। सत्प्राक्काण्डप्रान्तशतैकेभ्यः पुष्पात्। संभस्त्राजिनशणपिण्डेभ्यः फलात्। मूलान्नञः, इति ॥

इतो मनुष्यजातेः ॥ ६५ ॥

इकारान्तात्प्रातिपदिकान्मनुष्यजातिवाचिनः स्त्रियां ङीष् प्रत्ययो भवति। अवन्ती। कुन्ती। दाक्षी। प्लाक्षी। इत इति किम्। विट्। दरत्। मनुष्यग्रहणं किम्। तित्तिरिः। जातेरिति वर्तमाने पुनर्जातिग्रहणं योपधादपि यथा स्यात्। औदमेयी ॥ इञ उपसंख्यानमजात्यर्थम् ॥ * ॥ सौतङ्गमी। मौनचित्ती। सुतङ्गमादिभ्यश्चातुरर्थिक इञ् न जातिः ॥

ऊङुतः ॥ ६६ ॥

मनुष्यजातेरिति वर्तते। उकारान्तान्मनुष्यजातिवाचिनः प्रातिपदिकात्स्त्रियामूङ् प्रत्ययो भवति। कुरूः। ब्रह्मबन्धूः। वीरबन्धूः। ङकारो नोङ्धात्वोरिति विशेषणार्थः। दीर्घोच्चारणं कपो बाधनार्थम्। अयोपधादित्येतदत्रापेष्यते। अध्वर्युर्ब्राह्मणी ॥ अप्राणिजातेश्चारज्ज्वादीनामिति वक्तव्यम् ॥ * ॥ अलाबूः। कर्कन्धूः। अप्राणिग्रहणं किम्। कृकवाकुः। अरज्ज्वादीनामिति किम्। रज्जुः। हनुः ॥

बाह्वन्तात्संज्ञायाम् ॥ ६७ ॥

बाहुशब्दान्तात्प्रातिपदिकात्संज्ञायां विषये स्त्रियामूङ् प्रत्ययो भवति। भद्रबाहूः। जालबाहूः। संज्ञायामिति किम्। वृत्तौ बाहू अस्याः वृत्तबाहुः ॥

पङ्गोश्च ॥ ६८ ॥

पङ्गुशब्दात्स्त्रियामूङ् प्रत्ययो भवति। पङ्गूः ॥ श्वशुरस्योकाराकारलोपश्च वक्तव्यः ॥ * ॥ श्वश्रूः ॥

ऊरूत्तरपदादौपम्ये ॥ ६९ ॥

ऊरूत्तरपदात्प्रातिपदिकादौपम्ये गम्यमाने स्त्रियामूङ् प्रत्ययो भवति। कदलीस्तम्भोरूः। नागनासोरूः। करभोरूः। औपम्य इति किम्। वृत्तोरुः स्त्री ॥

संहितशफलक्षणवामादेश्च ॥ ७० ॥

संहित शफ लक्षण वाम इत्येवमादेः प्रातिपदिकादूरूत्तरपदात्स्त्रियामूङ् प्रत्ययो भवति। अनौपम्यार्थ आरम्भः। संहितोरूः। शफोरूः। लक्षणोरूः। वामोरूः ॥ सहितसहाभ्यां चेति वक्तव्यम् ॥ * ॥ सहितोरूः। सहोरूः ॥

कद्रुकमण्डल्वोश्छन्दसि ॥ ७१ ॥

कद्रुशब्दात्कमण्डलुशब्दाच्च छन्दसि विषये स्त्रियामूङ् प्रत्ययो भवति। कद्रूश्च वै सुपर्णी च। मा स्म कमण्डलूं शूद्राय दद्यात्। छन्दसीति किम्। कद्रुः। कमण्डलुः ॥ गुग्गुलुमधुजतुपतयालूनामिति वक्तव्यम् ॥ * ॥ गुग्गुलूः। मधूः। जतूः। पतयालूः ॥

संज्ञायाम् ॥ ७२ ॥

कद्रुकमण्डलुशब्दाभ्यां संज्ञायां विषये स्त्रियामूङ् प्रत्ययो भवति। अच्छन्दोर्थं वचनम्। कद्रूः। कमण्डलूः। संज्ञायामिति किम्। कद्रुः। कमण्डलुः ॥

शार्ङ्गरवाद्यञो ङीन् ॥ ७३ ॥

शार्ङ्गरवादिभ्यो ऽञन्तेभ्यश्च प्रातिपदिकेभ्यः स्त्रियां ङीन् प्रत्ययो भवति। शार्ङ्गरवी। कापटवी। अञन्तेभ्यः। बैदी। और्वी। जातिग्रहणं चेत्यनुवर्तते। तेन जातिलक्षणो ङीष्नेन बाध्यते, न पुंयोगलक्षणः। बिदस्य स्त्री बैदी। शार्ङ्गरव। कापटव। गौगुलव। ब्राह्मण। गौतम। एते ऽणन्ताः। कामण्डलेय। ब्राह्मकृतेय। आनिचेय। आनिधेय। आशोकेय। एते ढगन्ताः। वात्स्यायन। मौञ्जायन। एतौ फगन्तौ जातिः। कैकसेयो ढगन्तः। काव्यशैव्यौ यञन्तौ। एहि,

Digitized by Google

पर्यंहि । क्रुदिकारान्तौ । आश्मरथ्यो यञन्तः । औदपानः । उदपानशब्दः शुण्डिकाद्यणन्तः प्रयोजयति । अराल । चण्डाल । वतण्ड । जातिः ॥ भोगवद्गौरिमतोः संज्ञायाम् ॥ घादिषु नित्यं ह्रस्वार्थम् ॥ नृनरयोर्वृद्धिश्च ॥ अत्र यथायोगं ङीषादिषु प्राप्तेषु ङीन्विधीयते ॥

यङश्चाप् ॥ ७४ ॥

यङन्तात्प्रातिपदिकात्स्त्रियां चाप् प्रत्ययो भवति । ष्यङः ष्यङश्च सामान्यग्रहणमेतत् । आम्बष्ठ्या । सौवीर्या । कौसल्या । ष्यङ् । कारीषगन्ध्या । वाराह्या । बालाक्या ॥ षाच्च यञः ॥ * ॥ षात्परो यो यञ् तदन्ताच्चाप् वक्तव्यः । शार्कराक्ष्या । पौतिमाष्या । गौकक्ष्या । उत्तरसूत्रे चकारोनुक्तसमुच्चयार्थः, तेन वा भविष्यति ॥

आवट्याच्च ॥ ७५ ॥

अवटशब्दो गर्गादिः । तस्माद्यञि कृते ङीपि प्राप्ते वचनमेतत् । आवट्याच्च स्त्रियां चाप् प्रत्ययो भवति । आवट्या । प्राचां ष्फ एव, सर्वत्र ग्रहणात् । आवट्यायनी ॥

तद्धिताः ॥ ७६ ॥

अधिकारोऽयम् । आपञ्चमाध्यायपरिसमाप्तेर्यानित ऊर्ध्वमनुक्रमिष्यामस्तद्धितसंज्ञास्ते वेदितव्याः । वक्ष्यति । यूनस्तिः, युवतिः । बहुवचनमनुक्ततद्धितपरिग्रहार्थम् ॥ पृथिव्या ञाञौ । अयादिपश्चाड्डिमजित्येवमादि लब्धं भवति । तद्धितप्रदेशाः कृत्तद्धितसमासाश्चेत्येवमादयः ॥

यूनस्तिः ॥ ७७ ॥

युवन्शब्दात्प्रातिपदिकात्स्त्रियां तिः प्रत्ययो भवति । स च तद्धितसंज्ञो भवति । ङीपोऽपवादः । युवतिः ॥

अणिञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ् गोत्रे ॥ ७८ ॥

गोत्रे यावणिञौ विहितावनार्षौ तदन्तयोः प्रातिपदिकयोर्गुरूपोत्तमयोः स्त्रियां ष्यङादेशो भवति । निर्दिश्यमानस्यादेशा भवन्तीत्यणिञोरेव विज्ञायते, न तु समुदायस्य । ङकारः सामान्यग्रहणार्थः । षकारस्तदविघातार्थः । यङश्चाबिति । उत्तमशब्दः स्वभावात् त्रिप्रभृतीनामन्त्यमक्षरमाह । उत्तमस्य समीपमुपोत्तमं, गुरुः उपोत्तमं यस्य तद्गुरूपोत्तमं प्रातिपदिकम् । करीषस्येव गन्धोऽस्य करीषगन्धिः । कुमुदगन्धिः । तस्यापत्यमित्यण् । तस्य ष्यङादेशः । कारीषगन्ध्या । कौमुदगन्ध्या । वराहस्यापत्यम् । अत इञ् । वाराहिः । तस्य ष्यङादेशः । वाराह्या । बालाक्या । अणिञोरिति किम् । ऋतभागस्यापत्यं, बिदादित्वादञ् । आर्तभागी । गुरूपोत्तमादिकं सर्वमस्तीति न त्वणिञौ । टिड्ढाणञिति ङीबेव भवति । अनार्षयोरिति किम् । वासिष्ठी । वैश्वामित्री । गुरूपोत्तमयोरिति किम् । औपगवी । कापटवी । गोत्रइति किम् । तत्र जाता आहिच्छत्री कान्यकुब्जी ॥

गोत्रावयवात् ॥ ७९ ॥

अणिञोरित्येव । गोत्रावयवा गोत्राभिमताः कुलाख्याः पुणिकभुणिकमुखरप्रभृतय,स्ततो गोत्रे विहितयोरणिञोः स्त्रियां ष्यङादेशो भवति । अगुरूपोत्तमार्थ आरम्भः । पौणिक्या । भौणिक्या । मौखर्या । येषां त्वनन्तरापत्येपीष्यते दैवदत्त्या याज्ञदात्त्येति, ते क्रौड्यादिषु द्रष्टव्याः ॥

क्रौड्यादिभ्यश्च ॥ ८० ॥

क्रौडि इत्येवमादिभ्यश्च स्त्रियां ष्यङ् प्रत्ययो भवति । अगुरूपोत्तमार्थ आरम्भः । अनणिञर्थश्च । क्रौड्या । लाड्या । क्रौडि । लाडि । व्याडि । आपिशलि । आपक्षिति । चौपयत । चैटयत । शैकयत । बैल्वयत * । सौधातकि ॥ सूत, युवत्याम् ॥ भोज, क्षत्रिये ॥ भौरिकि । भौलिकि । शाल्मलि । शालास्थलि । कापिष्ठलि । गौलक्ष्य † ॥

दैवयज्ञिशौचिवृक्षिसात्यमुग्रिकाण्ठेविद्धिभ्यो ऽन्यतरस्याम् ॥ ८१ ॥

दैवयज्ञि शौचिवृक्षि सात्यमुग्रि काण्ठेविद्धि इत्येतेषामन्यतरस्यां ष्यङ् प्रत्ययो भवति । इञन्ता एते, गोत्रग्रहणं च नानुवर्त्तते । तेनोभयत्र विभाषेयम् । गोत्रे पूर्वेण ष्यङादेशः प्राप्तो विकल्प्यते, ऽगोत्रे त्वनन्तरे ऽपत्ये पक्षे विधीयते । तेन मुक्ते इतो मनुष्यजातेरिति ङीषेव भवति । दैवयज्ञ्या । दैवयज्ञी । शौचिवृक्ष्या । शौचिवृक्षी । सात्यमुग्र्या । सात्यमुग्री । काण्ठेविद्ध्या । काण्ठेविद्धी ॥

समर्थानां प्रथमाद्वा ॥ ८२ ॥

त्रयमप्यधिक्रियते समर्थानामिति च प्रथमादिति च वेति च, स्वार्थिकप्रत्ययावधिश्चायमधिकारः । प्राग्दिशो विभक्तिरिति यावत् । स्वार्थिकेषु ह्यस्योपयोगो नास्ति विकल्पोपि तत्रानवस्थितः । के चिन्नित्यमेव भवन्ति । लक्षणवाक्यानि तस्यापत्यं, तेन रक्तं रागात्, तत्र भव, इत्येवमादीनि भविष्यन्ति । तेषु सामर्थ्ये सति प्रथमनिर्दिष्टादेव विकल्पेन प्रत्ययो भवतीति वेदितव्यम् । समर्थानामिति निर्धारणे षष्ठी । समर्थानां मध्ये प्रथमं प्रत्ययप्रकृतित्वेन निर्धार्यते । तस्येति सामान्यविशेषलक्षणार्थं तदीयं प्राथम्यं विशेषणं विज्ञायते । उपगोरपत्यम्, औपगवः । समर्थानामिति किम् । कम्बल उपगो,रपत्यं देवदत्तस्य । प्रथमादिति किम् । षष्ठ्यन्ताद्यथा स्यात्प्रथमान्तान्मा भूत् । वेति किम् । वाक्यमपि यथा स्यात् ।

* वैकल्पयत । पा० २
† गौकक्ष्य । पा० २

उपगोरपत्यमिति । यद्येवं समासवृत्तिस्तद्धितवृत्त्या बाध्येत उपगवपत्यमिति । नैष दोषः । पूर्वसूत्रादन्यतरस्यांग्रहणमनुवर्त्तते । तेनैतदपि भविष्यति ॥

प्राग्दीव्यतोऽण् ॥ ८३ ॥

तेन दीव्यतीति वक्ष्यति । तदेकदेशो दीव्यच्छब्दोऽवधित्वेन गृह्यते, प्राग्दीव्यत्संशब्दनाद् यानित ऊर्ध्वमनुक्रमिष्यामो ऽण्प्रत्ययस्तत्र भवतीति वेदितव्यम् । अधिकारः परिभाषा विधिर्वेति त्रिष्वपि दर्शनेष्वपवादविषयं परिहृत्याण् प्रवर्त्तते । वक्ष्यति । तस्यापत्यम् । औपगवः । कापटवः ॥

अश्वपत्यादिभ्यश्च ॥ ८४ ॥

अश्वपत्यादिभ्यः प्रातिपदिकेभ्यः प्राग्दीव्यतीयेष्वर्थेष्वण् प्रत्ययो भवति । पत्युत्तरपदाद् ण्यं वक्ष्यति तस्यापवादः । आश्वपतम् । शातपतम् । अश्वपति । शतपति । धनपति । गणपति । राष्ट्रपति । कुलपति । गृहपति । धान्यपति । पशुपति । धर्मपति । सभापति । प्राणपति । क्षेत्रपति * ॥

दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः ॥ ८५ ॥

प्राग्दीव्यत इत्येव । दिति अदिति आदित्य इत्येतेभ्यः पत्युत्तरपदाच्च प्रातिपदिकात्प्राग्दीव्यतीयेष्वर्थेषु ण्यः प्रत्ययो भवति । दैत्यः । आदित्यः । आदित्यम् । पत्युत्तरपदात् । प्राजापत्यम् । सैनापत्यम् ॥ यमाच्चेति वक्तव्यम् ॥ * ॥ याम्यम् ॥ वाङ्मतिपितृमतां छन्दस्युपसंख्यानम् ॥ * ॥ वाच्यम् । मात्यम् । पैतृमत्यम् ॥ पृथिव्या ञाञौ ॥ * ॥ पार्थिवा । पार्थिवी ॥ देवाद्यञञौ ॥ * ॥ दैव्यम् । दैवम् ॥ बहिषष्टिलोपश्च ॥ * ॥ बाह्यः ॥ ईकक्च ॥ * ॥ बाहीकः ॥ ईकञ् छन्दसि ॥ * ॥ बाहीकः । स्वरे विशेषः । टिलोपवचनमव्ययानां भमात्रे टिलोपस्यानित्यत्वज्ञापनार्थम् । आरातीयः ॥ स्थाम्नोऽकारः ॥ * ॥ अश्वत्थामः ॥ लोम्नोऽपत्येषु बहुषु ॥ * ॥ उडुलोमाः । शरलोमाः । बहुष्विति किम् । औडुलोमिः । शारलोमिः ॥ सर्वत्र गोरजादिप्रत्ययप्रसङ्गे यत् ॥ * ॥ गव्यम् । अजादिप्रत्ययप्रसङ्ग इति किम् । गोभ्यो हेतुभ्य आगतं गोरूप्यम् । गोमयम् ॥ ण्यादयोऽर्थविशेषलक्षणादपवादात्पूर्वविप्रतिषेधेन ॥ * ॥ दितेरपत्यं, दैत्यः । वनस्पतीनां समूहो वानस्पत्यम् । कथं दैतेयः । दितिशब्दात्कृदिकारादक्तिनः, सर्वतोऽक्तिन्नर्थादित्येकइति ङीषं कृत्वा स्त्रीभ्यो ढक् क्रियते । लिङ्गविशिष्टपरिभाषा चानित्या † ॥

उत्सादिभ्योऽञ् ॥ ८६ ॥

प्राग्दीव्यत इत्येव । उत्सादिभ्यः प्राग्दीव्यतीयेष्वर्थेष्वञ् प्रत्ययो भवति । अणस्तदपवादानां च बाधकः । औत्सः । औदपानः । उत्स । उदपान । विकर । विनोद । महानद । महानस । महाप्राण । तरुण । तलुन ॥ वष्कयाऽसे ॥ धेनु । पृथिवी । पङ्क्ति । जगती । त्रिष्टुप् । अनुष्टुप् । जनपद । भरत । उशीनर । ग्रीष्म । पीलु । कुल ॥ उदस्थान, देशे ॥ पृष, दंशे ॥ भल्लकीय । रथन्तर । मध्यन्दिन । बृहत् । महत् ॥ सत्वन्तु ॥ सच्छब्दो मतुबन्त आगतनुम्को गृह्यते सत्त्वन्त्विति । कुरु । पञ्चाल । इन्द्रावसान । उष्णिक् । ककुप् । सुवर्ण * । देव ॥ ग्रीष्मादच्छन्दसीति वक्तव्यम् ॥ * ॥ इह मा भूत् । ग्रैष्मी त्रिष्टुप् । छन्दश्चेह वृत्तं गृह्यते न वेदः ॥

स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात् ॥ ८७ ॥

धान्यानां भवने इति वक्ष्यति । तस्य प्रागित्यनेनैव संबन्धः । प्राग्भवनसंशब्दनाद्येऽर्थास्तेषु स्त्रीशब्दात्पुंस्शब्दाच्च यथाक्रमं नञ्स्नञौ प्रत्ययौ भवतः । स्त्रीषु भवं, स्त्रैणम् । पौंस्नम् । स्त्रीणां समूहः, स्त्रैणम् । पौंस्नम् । स्त्रीभ्य आगतं, स्त्रैणम् । पौंस्नम् । स्त्रीभ्यो हितं, स्त्रैणम् । पौंस्नम् । स्त्रियाः पुंवदिति ज्ञापकाद्वृत्त्यर्थे न भवति । योगापेक्षं च ज्ञापकमिति स्त्रीवदित्यपि सिद्धम् ॥

द्विगोर्लुगनपत्ये ॥ ८८ ॥

प्राग्दीव्यत इति वर्त्तते, न भवनादिति, द्विगोरिति षष्ठी । द्विगोर्यः संबन्धी निमित्तत्वेन, तद्धितः प्राग्दीव्यतीयोऽपत्यप्रत्ययं वर्जयित्वा तस्य लुग्भवति । पञ्चसु कपालेषु संस्कृतः पञ्चकपालः । दशकपालः । द्वौ वेदावधीते, द्विवेदः । त्रिवेदः । अनपत्य इति किम् । द्वैदेवदत्तिः । त्रैदेवदत्तिः । प्राग्दीव्यत इत्येव । द्वैपारायणिकः । द्विगुनिमित्तविज्ञानादिह न भवति, पञ्चकपालस्येदं पाञ्चकपालम् । अथ वा द्विगोरेवायं लुग्विधीयते, द्विगोरिति स्थानषष्ठी । ननु च प्रत्ययादर्शनस्यैषा संज्ञा । सत्यमेतत् । उपचारेण लक्षणया द्विगुनिमित्तभूतः प्रत्यय एव द्विगुस्तस्य लुग्भवति । द्विगुनिमित्तकोऽपि तर्हि गुणकल्पनया कस्मान्न द्विगुरुच्यते पाञ्चकपालमिति, न तस्य द्विगुत्वं निमित्तम् । इतरस्तु द्विगुर्निमित्तमित्यस्ति विशेषः । यद्येवमिह कथं पञ्चकपाल्यां संस्कृतः पञ्चकपाल इति, नैवात्र तद्धित उत्पद्यते । वाक्यमेव भवति । त्रैशब्द्यं हि साध्यं पञ्चसु कपालेषु संस्कृतः, पञ्चकपाल्यां संस्कृतः, पञ्चकपाल इति तत्र द्वयोः शब्दयोः समानार्थयोरेकेन विग्रहः । अपरस्मादुत्पत्तिर्भविष्यति । अथेह कस्मान्न भवति । पञ्चभ्यो गर्गेभ्य आगतं, पञ्चगर्गरूप्यम्, पञ्चगर्गमयमिति । वेत्यनुवर्त्तते । सा च व्यवस्थितविभाषा विज्ञायते ॥

* स्थानपति । यज्ञपति । धन्वपति । अधिपति । बन्धुपति । एतेऽत्र गणे पुस्तकान्तरे ऽधिकाः ।

† विधानसामर्थ्यादेव टिलोपाभाव इत्यधिकं पुस्तकान्तरे ।

* सुपर्ण । पा०२

गोत्रेऽलुगचि ॥ ८९ ॥

प्राग्दीव्यत इत्येव । यस्कादिभ्यो गोत्रइत्यादिना येषां गोत्रप्रत्ययानां लुगुक्तस्तेषामजादौ प्राग्दीव्यतीये विषयभूते प्रतिषिध्यते । गर्गाणां छात्रा गार्गीयाः । वात्सीयाः । आत्रेयीयाः । खारपायणीयाः । गोत्रइति किम् । कौबलम् । बादरम् । अचीति किम् । गर्गेभ्य आगतम् । गर्गरूप्यम् । गर्गमयम् । प्राग्दीव्यत इत्येव । गर्गेभ्यो हितम् । गर्गीयम् । गोत्रस्य बहुषु लोपिनो बहुवचनान्तस्य प्रवृत्तौ द्व्येकयोरलुक् । बिदानामपत्यं युवा युवानौ । बैदः । बैदौ । बैदशब्दादत इञि कृते तस्य च इञः ण्यक्षत्रियार्षञित इति लुकि रूपम् । एकवचनद्विवचनान्तस्य प्रवृत्तौ बहुषु लोपो यूनि बैदस्य बैदयोर्वा ऽपत्यं बहवो माणवका, बिदाः । नक्षत्राज्बहुषूत्पन्नः ॥

यूनि लुक् ॥ ९० ॥

प्राग्दीव्यत इति वर्त्तते । अचीति च । प्राग्दीव्यतीये ऽजादौ प्रत्यये विवक्षिते बुद्धिस्थे ऽनुत्पन्नएव युवप्रत्ययस्य लुग्भवति । तस्मिन्निवृत्ते सति यो यतः प्राप्नोति स ततो भवति । फाण्टाहृतस्यापत्यं फाण्टाहृतिः । तस्यापत्यं युवा, फाण्टाहृतिमिमताभ्यां णफिञौ, फाण्टाहृतः, तस्य छात्रा इति विवक्षितेर्थे बुद्धिस्थे युवप्रत्ययस्य लुग्भवति, तस्मिन्निवृत्ते इञन्तं प्रकृतिरूपं संपन्नं तस्मादिञश्चेत्यण् भवति । फाण्टाहृताः । भागवित्तस्यापत्यं, भागवित्तिः । तस्यापत्यं युवा । वृद्धाट्ठक्सौवीरेषु बहुलमिति ठक् । भागवित्तिकः । तस्य छात्राः, पूर्ववद् युवप्रत्यये निवृत्ते इञश्चेत्यण्, भागवित्ताः । तिकस्यापत्यं, तिकादिभ्यः फिञ् । तैकायनिः । तस्यापत्यं युवा । फेश्छ चेति छः, तैकायनीयस्तस्य छात्रा, युवप्रत्यये निवृत्ते वृद्धाच्छः, तैकायनीयाः । कपिञ्जलादस्यापत्यं कापिञ्जलादिस्तस्यापत्यं युवा । कुर्वादिभ्यो ण्यः । कापिञ्जलाद्यः । तस्य छात्रा, ण्ये निवृत्ते इञश्चेत्यण् । कापिञ्जलादाः । ग्लुचुकस्यापत्यं, प्राचामवृद्धात्फिन्बहुलमिति ग्लुचुकायनि, स्तस्यापत्यं युवा, प्राग्दीव्यतो ऽण्, ग्लौचुकायन, स्तस्य छात्रा, युवप्रत्यये निवृत्ते स एवाण्, ग्लौचुकायनाः । अचीत्येव, फाण्टाहृतरूप्यम् । फाण्टाहृतमयम् । प्राग्दीव्यत इत्येव । भागवित्तिकाय हितं, भागवित्तीयम् ॥

फक्फिञोरन्यतरस्याम् ॥ ९१ ॥

यूनीत्येव । पूर्वसूत्रेण नित्ये लुकि प्राप्ते विकल्प उच्यते । फक्फिञोर्युवप्रत्यययोः प्राग्दीव्यतीये ऽजादौ प्रत्यये विवक्षिते ऽन्यतरस्यां लुग्भवति । गर्गादिभ्यो यञि कृते यञिञोश्चेति फक्, गार्ग्यायणः । तस्य छात्राः, गार्गीयाः । गार्ग्यायणीयाः । वात्सीयाः । वात्स्यायनीयाः । फिञः खल्वपि, यस्कस्यापत्यं, शिवादिभ्यो ऽण् । यास्क, स्तस्यापत्यं युवा । अणो द्व्यच इति फिञ् । यास्कायनि, स्तस्य छात्राः । यास्कीयाः । यास्कायनीयाः ॥

तस्यापत्यम् ॥ ९२ ॥

समर्थनिर्देशोयं, पूर्वैरुत्तरैश्च प्रत्ययैरभिसंबध्यते । तस्येति षष्ठीसमर्थादपत्यमित्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति, प्रकृत्यर्थविशिष्टश्चाप्यर्थो ऽपत्यमात्रश्चेह गृह्यते । लिङ्गवचनादिकमन्यत्सर्वमविवक्षितम् । उपगोरपत्यमौपगवः । आश्वपतः । दैत्यः । औत्सः । स्त्रैणः । पौंस्नः ॥

तस्येदमित्यपत्येपि बाधनार्थं कृतं भवेत् ।
उत्सर्गः शेष एवासौ वृद्धान्यस्य प्रयोजनम् ॥

भानोरपत्यं भानवः । श्यामगवः ॥

एको गोत्रे ॥ ९३ ॥

अपत्यं पौत्रप्रभृति गोत्रं, तस्मिन् विवक्षिते भेदेन प्रत्यपत्यं प्रत्ययोत्पत्तिप्रसङ्गे नियमः क्रियते । गोत्रे एक एव प्रत्ययो भवति, सर्वे ऽपत्येन युज्यन्ते । अपतनादपत्यं, योपि व्यवहितेन जनितः सोऽपि प्रथमप्रकृतेरपत्यं भवत्येव । गर्गस्यापत्यं, गार्गिः । गार्गेरपत्यं, गार्ग्यः । तत्पुत्रोपि गार्ग्यः । सर्वस्मिन् व्यवहितजनितेपि गोत्रापत्ये गर्गशब्दाद् यञेव भवतीति प्रत्ययो नियम्यते । अथ वा गोत्रापत्ये विवक्षिते एक एव शब्दः प्रथमा प्रकृतिः प्रत्ययमुत्पादयति प्रकृतिर्नियम्यते । गार्ग्यः । नाडायनः ॥

गोत्राद्यून्यस्त्रियाम् ॥ ९४ ॥

अयमपि नियमः । यून्यपत्ये विवक्षिते गोत्रादेव प्रत्ययो भवति, न परमप्रकृत्यनन्तरयुवभ्यः । गार्ग्यस्यापत्यं युवा, गार्ग्यायणः । वात्स्यायनः । दाक्षायणः । प्लाक्षायणः । औपगविः । नाडायनिः । अस्त्रियामिति किम् । दाक्षी । प्लाक्षी । किं पुनरत्र प्रतिषिध्यते । यदि नियमः, स्त्रियामनियमः प्राप्नोति । अथ युवप्रत्ययः, स्त्रियां गोत्रप्रत्ययेनाभिधानं न प्राप्नोति, गोत्रसंज्ञायाः युवसंज्ञया बाधितत्वात् । तस्माद्योगविभागः कर्तव्यः । गोत्राद्यूनि प्रत्ययो भवति । ततो ऽस्त्रियाम् । यूनि यदुक्तं तत्स्त्रियां न भवति । युवसंज्ञैव प्रतिषिध्यते, तेन स्त्री गोत्रप्रत्ययेनाभिधास्यते ॥

अत इञ् ॥ ९५ ॥

तस्यापत्यमित्येव । अकारान्तात्प्रातिपदिकादिञ् प्रत्ययो भवति । अणोपवादः । दक्षस्यापत्यं, दाक्षिः । तपरकरणं किम् । शुभंयाः । कीलालपाः । इत्यतो मा भूत् । कथं प्रदीयतां दाशरथाय मैथिली । शेषविवक्षया भविष्यति ॥

Digitized by Google

बाह्वादिभ्यश्च ॥ ९६ ॥

बाहु इत्येवमादिभ्यः शब्देभ्यो ऽपत्ये इञ् प्रत्ययो भवति । बाहविः । औपबाहविः । अनकारार्थ आरम्भः । क्वचिद्बाधकबाधनार्थः । बाहु । उपबाहु । विवाकु । शिवाकु । वटाकु । उपबिन्दु । वृक । चूडाला । मूषिका । बलाका । भगला । छगला । ध्रुवका । धुवका । सुमित्रा । दुर्मित्रा । पुष्करसत् । अनुहरत् । देवशर्मन् । अग्निशर्मन् । कुनामन् । सुनामन् । पञ्चन् । सप्तन् । अष्टन् ॥ अमितौजसः सलोपश्च ॥ उदञ्चु । शिरस् । शराविन् । क्षेमवृद्धिन् । शृङ्खलतोदिन् । खरनादिन् । नगरमर्दिन् । प्राकारमर्दिन् । लोमन् । अजीगर्त्त । कृष्ण । सलक । युधिष्ठिर । अर्जुन । साम्ब । गद । प्रद्युम्न । राम ॥ उदङ्कः संज्ञायाम् ॥ संभूयोम्भसोः सलोपश्च * ॥ बाह्वादिप्रभृतिषु येषां दर्शनं गोत्रभावे लौकिके ततोऽन्यत्र तेषां प्रतिषेधः ॥ * ॥ बाहुर्नाम कश्चित्तस्यापत्यं, बाहवः ॥ संबन्धिशब्दानां च तत्सदृशात्प्रतिषेधः ॥ * ॥ संज्ञा । श्वशुरस्यापत्यं श्वाशुरिः † । चकारोऽनुक्तसमुच्चयार्थः, आकृतिगणतामस्य बोधयति । जाम्बिः । ऐन्द्रशर्मिः । आजधेनविः । आजबन्धविः । औडुलोमिः ॥

सुधातुरकङ् च ॥ ९७ ॥

सुधातृशब्दादपत्ये इञ् प्रत्ययो भवति, तत्संनियोगेन च तस्याकङादेशो भवति । सुधातुरपत्यं,सौधातकिः ॥ व्यासवरुडनिषादचण्डालबिम्बानामिति वक्तव्यम् ॥ * ॥ वैयासकिः । वारुडकिः । नैषादकिः । चाण्डालकिः । बैम्बकिः ॥

गोत्रे कुञ्जादिभ्यश्च्फञ् ॥ ९८ ॥

तस्यापत्यमित्येव । गोत्रसंज्ञके ऽपत्ये वाच्ये कुञ्जादिभ्यश्च्फञ् प्रत्ययो भवति । इञो ऽपवादः । चकारो विशेषणार्थः, व्रातच्फञोरस्त्रियामिति । ञकारो वृद्ध्यर्थः । कौञ्जायन्यः । कौञ्जायन्यौ । कौञ्जायनाः । ब्राध्नायन्यः । ब्राध्नायन्यौ । ब्राध्नायनाः । गोत्रइति किम् । कुञ्जस्यापत्यमनन्तरं कौञ्जिः । एकवचनद्विवचनयोः सतिशिष्टत्वाद् ञित्स्वर एव भवितव्यम् । बहुवचने तु कौञ्जायना इति. परमपि ञित्स्वरं त्यक्त्वा चित्स्वर एवेष्यते । गोत्राधिकारश्च शिवादिभ्योऽणिति यावत् । कुञ्ज । ब्रध्न । शङ्ख । भस्मन् । गण । लोमन् । शठ । शाक । शाकट । शुण्डा । शुभ । विपाश । स्कन्द । स्कम्भ ‡ ॥

नडादिभ्यः फक् ॥ ९९ ॥

* निवाकु । अवाकु । बिन्दु । चूडा । वृकला । भद्रशर्मन् । सुशर्मन् । सुधावन् । माष । एते शब्दा अधिकाः पुस्तकान्तरे ।

† राजश्वशुरादिति यत् भवतीत्यधिकं पुस्तकान्तरे ।

‡ शुम्भा । शिव शुभंया । एते शब्दाः पुस्तकान्तरे ऽधिकाः ।

नड इत्येवमादिभ्यः प्रातिपदिकेभ्यो गोत्रापत्ये फक् प्रत्ययो भवति । नाडायनः । चारायणः । गोत्रइत्येव । नाडिः । शलङ्कु शलङ्कं चेत्यत्र पठ्यते । शालङ्कायनः । पैलादिषु च शालङ्किशब्दः पठ्यते । शालङ्किः पिता । शालङ्किः पुत्रः । तत्कथं गोत्रविशेषे कौशिके फकं स्मरन्ति । इञेवान्यत्र शालङ्किरिति । अथ वा पैलादिपाठ एव ज्ञापक इञोभावस्य । नड । चर । बक । मुञ्ज । इतिक । इतिश । उपक । लमक । शलङ्कु शलङ्कं च । सप्तल । वाजप्य । तिक । अग्निशर्मन् वृषगणे । प्राण । नर । सायक । दास । मित्र । द्वीप । पिङ्गर । पिङ्गल । किङ्कर । किङ्कल । कातर । कातल । काश्य । काश्यप । काव्य । अज । अमुष्य ॥ कृष्णरणौ ब्राह्मणवासिष्ठयोः ॥ अमित्र । लिगु । चित्र । कुमार । क्रोष्टुक्रोष्टञ्च । लोह । दुर्ग । स्तम्भ । शिंशपा । अग्र । तृण । शकट । सुमनस् । सुमत । मिमत । ऋक् । जत् । युगन्धर । हंसक । दण्डिन् । हस्तिन् । पञ्चाल । चमसिन् । सुकृत्य । स्थिरक ब्राह्मण । चटक । बदर । अश्वक । खरप । कामुक । ब्रह्मदत्त । उदुम्बर । शोण । अलोह । दण्ड * ।

हरितादिभ्योऽञः ॥ १०० ॥

हरितादिर्बिदाद्यन्तर्गणः । हरितादिभ्यो ऽञन्तेभ्योऽपत्ये फञ् प्रत्ययो भवति । इञोपवादः । हरितस्यापत्यं हारितायनः । कैदासायनः । ननु च गोत्रइति वर्त्तते । न च गोत्रादपरो गोत्रप्रत्ययो भवत्ये,कोगोत्रइति वचनात् । सत्यमेतत् । इह तु गोत्राधिकारेपि सामर्थ्याद्यूनि प्रत्ययो विज्ञायते । गोत्राधिकारस्तूत्तरार्थः ॥

यञिञोश्च ॥ १०१ ॥

यञन्तादिञन्ताच्च प्रातिपदिकादपत्ये फक् प्रत्ययो भवति । गार्ग्यायणः । वात्स्यायनः । इञन्तात् । दाक्षायणः । प्लाक्षायणः । द्वीपादनुसमुद्रं यञ् । सुतङ्गमादिभ्य इञित्यतो न भवति । गोत्रग्रहणेन यञिञौ विशेष्येते । तदन्तात्तु यून्येवायं प्रत्ययः । गोत्राद्यूनि प्रत्ययो भवति वचनात् ॥

शरद्वच्छुनकदर्भाद्भृगुवत्साग्रायणेषु ॥ १०२ ॥

गोत्रइत्येव । शरद्वत् शुनक दर्भ इत्येतेभ्यो गोत्रापत्ये फक् प्रत्ययो भवति यथासंख्यं भृगुवत्साग्रायणेष्वर्थेष्वपत्यविशेषेषु । शारद्वतायनो भवति भार्गवश्चेत् । शारद्वतो ऽन्यः । शौनकायनो भवति वात्स्यश्चेत् । शौनको ऽन्यः । दार्भायणो भवति आग्रायणश्चेत् । दार्भिरन्यः । शरद्वच्छुनकशब्दौ बिदादौ । ताभ्यामञो ऽपवादः फक् ॥

* एक । वानव्य । श्रावक । नाव्य । अन्वजत् । अन्तजन । इत्वरा । अंशक । अश्वला । अध्वराद्यण्डय । एते शब्दा अत्र पुस्तकान्तरे ऽधिकाः

Digitized by Google

द्रोणपर्वतजीवन्तादन्यतरस्याम् ॥ १०३ ॥

गोत्रइत्येव । द्रोणादिभ्यः प्रातिपदिकेभ्यो गोत्रापत्ये ऽन्यतरस्यां फक् प्रत्ययो भवति । इञोपवादः । द्रोणायनः । द्रौणिः । पार्वतायनः । पार्वतिः । जैवन्तायनः । जैवन्तिः । कथमनन्तरो ऽश्वत्थामा द्रोणायन इत्युच्यते । नैवात्र महाभारतद्रोणो गृह्यते । किं तर्ह्यनादिः । तत एवं गोत्रे प्रत्ययविधानम् । इदानीं श्रुतिसामान्यादध्यारोपेण तथाभिधानं भवति ॥

अनृष्यानन्तर्ये बिदादिभ्यो ऽञ् ॥ १०४ ॥

गोत्रइत्येव । बिदादिभ्यो गोत्रापत्ये ऽञ्प्रत्ययो भवति । बैदः । और्वः । ये पुनरत्रानृषिशब्दाः पुत्रादयस्तेभ्यो ऽनन्तरापत्यएव भवति । पौत्रः । दौहित्रः । अनृष्यानन्तर्यइत्यस्यायमर्थः, अनृषिभ्यो ऽनन्तरे भवतीति । यद्ययमर्थ ऋष्यपत्ये नैरन्तर्यप्रतिषेधो न कृतः स्यात् तत्रेदं न सिद्ध्यति । इन्द्रभूः सप्तमः काश्यपानाम् । अनन्तरापत्यरूपेणैव ऋष्यणाभिधानं भविष्यति । अवश्यं चैतदेवं विज्ञेयम् । ऋष्यपत्ये नैरन्तर्यविषये प्रतिषेधे विज्ञायमाने कौशिको विश्वामित्र इति दुष्यति । गोत्रइत्येव । बैदिः । ननु च ऋष्यणा भवितव्यम् । बाह्वादिराकृतिगण,स्तेनेञेव भवति । बिद । उर्व । कश्यप । कुशिक । भरद्वाज । उपमन्यु । किलालप । किदर्भ । विश्वानर । ऋष्टिषेण । ऋतभाग । हर्यश्व । प्रियक । आपस्तम्ब । कूचवार । शरद्वत् । शुनक । धेनु । गोपवन । शिग्रु । बिन्दु । भाजन । अश्वावतान । श्यामाक । श्यमाक । श्यापर्ण । हरित । किन्दास । वह्यस्क । अर्कलूष । वध्योष । विष्णुवृद्ध । प्रतिबोध । रथन्तर । रथीतर । गविष्ठिर । निषाद । मठर । मृद । पुनर्भू । पुत्र । दुहितृ । ननान्दृ ॥ परस्त्री परशुं च * ॥

गर्गादिभ्यो यञ् ॥ १०५ ॥

गोत्रइत्येव । गर्गादिभ्यो गोत्रापत्ये यञ् प्रत्ययो भवति । गार्ग्यः । वात्स्यः । मनुशब्दोऽत्र पठ्यते । तत्र कथं मानवी प्रजा । गोत्रइत्युच्यते, अपत्यसामान्ये भविष्यति । कथमनन्तरो रामो जामदग्न्यः, व्यासः पाराशर्य इति । गोत्ररूपाध्यारोपेण भविष्यति । अनन्तरापत्यविवक्षायां तु ऋष्यणैव भवितव्यं जामदग्न्यः, पाराशर इति । गर्ग । वत्स ॥ वाजाऽसे † ॥ संकृति । अज । व्याघ्रपात् । विदभृत् । प्राचीनयोग । अगस्ति । पुलस्ति । रेभ । अग्निवेश । शङ्ख । शठ । धूम । अवट । चमस । धनंजय । मनस । वृक्ष । विश्वावसु । जनमान । लोहित । संशित । बभ्रु । मण्डु । मक्षु । अलिगु । शङ्कु । लिगु । गुलु । मन्तु । जिगीषु । मनु । तन्तु । मनायी । भूत । कथक । कष । तण्ड । वतण्ड । कपि । कत । कुरुकत । अनडुह् । कण्व । शकल । गोकक्ष । अगस्त्य । कुण्डिन । यज्ञवल्क । उभय । जात । विरोहित । वृषगण । रहूगण । शण्डिल । वण । कचुलुक । मुद्गल । मुसल । पराशर । जतूकर्ण । मन्त्रित । संहित । अश्मरथ । शर्कराक्ष । पूतिमाष । स्थूरा । अररक । पिङ्गल । कृष्ण । गोलुन्द । उलूक । तितिक्ष । भिषज् । भडित । भण्डित । दल्भ । चिकित । देवहू । इन्द्रहू । एकलू । पिप्पलू । बृहदग्नि । जमदग्नि । सुलोभिन् । उकत्थ । कुटीगु * ॥

मधुबभ्र्वोर्ब्राह्मणकौशिकयोः ॥ १०६ ॥

मधुशब्दाद्बभ्रुशब्दाच्च गोत्रापत्ये यञ् प्रत्ययो भवति यथासंख्यं ब्राह्मणे कौशिके वाच्ये । माधव्यो भवति ब्राह्मणश्चेत् । माधव एवान्यः । बाभ्रव्यो भवति कौशिकश्चेत् । बाभ्रव एवान्यः । बभ्रुशब्दो गर्गादिषु पठ्यते, ततः सिद्धे यञि कौशिके नियमार्थं वचनम् । गर्गादिषु पाठोप्यन्तर्गणकार्यार्थः । सर्वत्र लोहितादिकतन्तेभ्य इति । बाभ्रव्यायणी ॥

कपिबोधादाङ्गिरसे ॥ १०७ ॥

कपिबोधशब्दाभ्यामाङ्गिरसे ऽपत्यविशेषे गोत्रे यञ् प्रत्ययो भवति । काप्यः । बौध्यः । आङ्गिरसइति किम् । कापेयः । बौधिः । कपिशब्दो गर्गादिषु पठ्यते । तस्य नियमार्थं वचनम् । आङ्गिरसे यथा स्यात् । लोहितादिकार्यार्थं गणे पाठः । काप्यायनी ॥

वतण्डाच्च ॥ १०८ ॥

आङ्गिरसइत्येव । वतण्डशब्दादाङ्गिरसे ऽपत्यविशेषे गोत्रे यञ् प्रत्ययो भवति । वातण्ड्यः । आङ्गिरसइति किम् । वातण्डः । किमर्थमिदं यावता गर्गादिष्वयं पठ्यते । शिवादिष्वप्ययं पठ्यते । तत्राङ्गिरसे शिवाद्यणोपवादार्थं पुनर्वचनम् । अनाङ्गिरसे तूभयत्र पाठसामर्थ्यात्प्रत्ययद्वयमपि भवति । वातण्ड्यः । वातण्डः ॥

लुक् स्त्रियाम् ॥ १०९ ॥

आङ्गिरस इत्येव । वतण्डशब्दादाङ्गिरस्यां स्त्रियां यञ्प्रत्ययस्य लुग्भवति । लुकि कृते शार्ङ्गरवादिपाठान्ङीन् भवति । वतण्डी । आङ्गिरसइति किम् । वातण्ड्यायनी । शिवाद्यणि तु वातण्डी ।

---

* किलात । संबक । शाबली । श्यायक । अलस । एते ऽत्राधिकाः पुस्तकान्तरे ।

† असमासे । असे इति किम् । सौवाजिः । इत्यधिकं पुस्तकान्तरे ।

* पथ । कन्थु । श्रुव । सूनु । कर्कटक । रुक्ष । तरुक्ष । तलुक्ष । प्रचुल । विलम्ब । विष्णुज । एते ऽत्राधिकाः पुस्तकान्तरे ।

अश्वादिभ्यः फञ् ॥ ११० ॥

आङ्गिरस इति निवृत्तम् । अश्वादिभ्यो गोत्रापत्ये फञ् प्रत्ययो भवति । आश्वायनः । आश्मायनः । ये त्वत्र प्रत्ययान्ताः पठ्यन्ते तेभ्यः सामर्थ्याद्यूनि प्रत्ययो विज्ञायते । अश्व । अश्मन् । शङ्ख । विदापुट । रोहिण । खर्ज्जूर । खर्ज्जूल । पिञ्जूर । भडिल । भण्डिल । भडित । भण्डित । भण्डिक । प्रहृत । रामोद । क्षत्र । ग्रीवा । काश । गोलाङ्क्य । अर्क । स्वन । ध्वन । पाद । चक्र । कुल । पवित्र । गोमिन् । श्याम । धूम । धूम्र । वाग्मिन् । विश्वानर । कुट । वेश । आत्रेय । नक्ष । तड । नड । ग्रीष्म । अर्ह । विशम्य । विशाला । गिरि । चपल । चुनम । दासक । वैल्य । धर्म । आनडुह्य । पुंसिजात । अर्जुन । शूद्रक । सुमनस् । दुर्मनस् । क्षान्त । प्राच्य । कित । काण । चुम्प । श्रविष्ठा । वीक्ष्य । पविन्दा । नम आत्रेयभारद्वाजे । कुत्स । आतव । कितव । शिव । खदिर ॥ भरद्वाज आत्रेये * ॥

भर्गात्त्रैगर्त्ते ॥ १११ ॥

भर्गशब्दादपत्ये विशेषे त्रैगर्ते गोत्रे फञ् प्रत्ययो भवति । भार्गायणो भवति त्रैगर्त्तश्चेत् । भार्गिरन्यः ॥

॥ अथानन्दवृन्दावनचम्पूकाव्यस्य ॥

॥ सप्तमस्तबकावशेषः ॥

इत्येवं गतेषु कतिपयेषु दिवसेषु कस्मिंश्चिदहनि वत्सांश्चारयता वत्सगणानामन्तरे च विहितसात्वतवेशो महाशाक्त इव परमतजिघृक्षया विस्तारितास्तिकाकारश्चार्वाक इव सर्वस्वजिहीर्षया समुपसादितमित्रभावश्चोर इव मृदुलतरतृणाच्छादितमुखो वारीगर्त इव कोऽपि कंसानुचरो वत्साकारः सह वत्सगणैरेव चरन् ॥ २० ॥

वत्सान् चारयता तेन कृष्णेन वत्साकारः कोऽपि कंसानुचरो यमसदनं गमयांबभूवे इत्यन्वयः । विहितसात्वतवेश इति, महाचतुरसभायां तु तथात्वस्याकिंचित्करत्वं,प्रत्युत तस्यैव लज्जावज्रादण्डादिप्राप्तिरिति भावः । विस्तारित आस्तिकाकारो वेदप्रामाण्यग्राहित्वलक्षणो येन स्वस्य नास्तिकत्वं प्रच्छाद्य सः, चार्वाको बौद्धः, तथापि विद्याचातुर्यवतो महापण्डितस्य नास्तिकेन दुर्ज्ञेयमतत्वमजेयत्वं च, प्रत्युत अचिरादेव निजस्वरूपाविष्कारो दण्डश्च लभ्यत इति भावः । मित्रभावश्चोर इति, तथापि महाधार्मिकं सदैव धर्मो रक्षति, चोरस्य तु नाश एवेति भावः । यद्वा महत्तमस्य स्वभावेनैव तत्राकस्मादेव चोरोऽयमिति बुद्धिः स्फुरति, ततश्च तस्य नाश एवेति भावः । वारीगर्त इति, मत्ततामये हस्तिन्येव तत्फलोदयो न तु मनुष्यमात्रे कस्मिंश्चिदपीति, तेन यद्यसौ चिरादपि तथावर्तिष्यत तथापि कृष्णसखानां किंचिद्भयं नाभविष्यत्, प्रत्युत तस्यैव सदा कृष्णभयादचेतनप्रायत्वमेवास्यास्यदिति भावः ॥ २० ॥

न केनापि प्रकारेण लक्ष्यमाणः केनचिदपि तेन सकृदेवावलोक्य विपक्षोऽयमिति जानता निखिलसर्वज्ञचक्रचूडामणिना पूर्वजं प्रति-आर्य किमयं व्रजचरो वत्स उतवा कृत्रिमः कोऽपीति वदता तदनिर्णीयमान एव पश्यत्सु सकलेष्वेव सहचरेषु मृदुतरकमलकुड्मलकोमलेन वामकरतलेन पश्चात्तनं चरणयुगलमाकृष्य धृत्वा समुन्नीय मुहुरलातचक्रवदाघूर्णयता कपित्थतरुकाण्डमधिनिष्पिंषता प्रयाणाभिमुखेषु प्राणेषु धृतनिजाकृताकारो यमसदनं गमयांबभूवे ॥ २१ ॥

तेन श्रीकृष्णेन । तैः सखिभिरनिर्णीयमान एव । निष्पिंषता वेगक्षेपेण संचूर्णयता । यमसदनमिति, तदानींतनलीलापरिकरलोकप्रतीत्यभिप्रायेणोक्तं, वस्तुतस्तु यमोपलक्षितस्याष्टाङ्गयोगस्य सदनरूपं ब्रह्मस्वरूपमित्यर्थः ॥ २१ ॥

बभूवेदमेव सुरसभारसभावकारि कारिहननं हरविरञ्चिमुखमुखरितं च, वस्तुतो दुर्घटघटनपटीयसो दुष्करकर्मठस्य नैतदद्भुतम् ॥ २२ ॥

इदमेव कारिहननम्· ईषच्छत्रुहननं, सुरसभाया देवसमूहस्य रसेन भावकारि प्रीतिकरणशीलं बभूव । अग्र बकादि-महासुरहननम्,अयेतनं तु किं वक्तव्यमिति भावः,"ईषदर्थे चे"-ति कोः कादेशः । कर्मठो निपुणः ॥ २२ ॥

तदनु दनुजदमनो मनोरमहेलालसो लालसो निजसहचरनिकरेषु गगनाङ्गनचरमभागभागशीतकरकरमालिन्यमलिनतामरसमयं समयं वीक्ष्य दिनान्तरवत् सानुचरो वत्सानुचरो भवन् भवनमाजगाम ॥ २३ ॥

हेलालसः खेलारसः । लालसः अतिशयकान्तियुक्तः । समयं वीक्ष्य । कीदृशं, गगनमेवाङ्गनं तस्य चरमभागं पश्चाद्भागं भजते प्राप्नोति,अशीतकरः उष्णकिरणः सूर्यः तस्य कराणां किरणानां मालिन्येन हेतुना मलिनानि तामरसानि पद्मानि तन्मयं, वत्सानामनुचरतीति तथाभूतो भवन् सन् ॥ २३ ॥

---

* जन । वष्ट । खड । खेड । जड । ओजस् । पुस्तकान्तरे ऽधिका मते शब्दाः ।

Digitized by Google

भवनमागम्य गम्यमानेतरचरितस्य तस्य ललितवपुष्कलं पुष्कलं वत्सवत् सर्वावयवस्य दानवस्य मारणं रणं विनैव कृतवतो लीलाविलसितं सर्वमेव सर्वे निजनिजजननीजननीयमाना अपि शिशवः प्रथममेव व्रजपुरपरमेश्वर्य कथयांबभूवुः ॥ २४ ॥

गम्यमानादितरदगम्यं चरितं यस्य तस्य कृष्णस्य लीलाविलसितम् । कीदृशं, ललितम्· आनन्दानुभवेन शोभितं वपुर्वक्तृद्रष्टृश्रोतॄणां करोतीति तत्, रलयोरैक्यात् । पुष्कलं श्रेष्ठम् । वत्सतुल्यसर्वाङ्गस्य । निजनिजजननीजनैर्व्रजेश्वर्या सह ग्रामान्तपथपर्यन्तमागतैर्निजनिजगृहवर्त्म प्रति नीयमाना अपि, बलात् ततो निवर्त्येत्यर्थः ।

महाबलस्य दैत्यस्य गोवत्सत्वं कुतो भयात् ।
तद्वधे वा शिशोः शक्तिः क्वेति मेने मृषैव सा ॥ २४ ॥

भगवानपि जनकजननीराजितो जननीराजितो दिनान्तरवत् कृतसायन्तनस्नानानुलेपो जनकेन सह कृतसायाशनः सुखसुप्तो रजनीमनैषीत् ॥ २५ ॥

जनकजननीभ्यां सह राजितो दीप्तः । जनैश्च सर्वैरेव निर्मञ्छितः, प्रेम्णेत्यर्थः ॥ २५ ॥

परेद्यवि द्यवि चानुदित एव यमुनाजनके जनकेलिकलाकुशलः कृताहारो हारोल्लसद्वक्षाः स एष मिलितेषु सहचरेषु सबलेन बलेन सह पूर्ववत् सकलवत्सकलनया नयाविरोधेन वनान्तरमासाद्य शाद्वलतलमालोकयन् क्वचन जलाशयोपकण्ठे ललितानि नवनवाङ्कुरितानि शष्पाणि पानीयसंनिकर्षसुमेदुराणि समालोक्य वत्सकुलं तत्रैव निवेशयामास ॥ २६ ॥

परेद्यवि परदिने, “परेद्यव्यद्यपूर्वेद्यु”रित्यादिना सिद्धम् । द्यवि· आकाशे । यमुनाजनके सूर्ये । सकलवत्सानां सर्वसहचरवत्सानां कलनया संमेलनेन ॥ २६ ॥

समनन्तरमनन्तरसः स वत्सपालः पालयिता रराज सकललोकपालानामनतिदूरे पूतनासहोदरोऽदरोत्तुङ्गबकशरीरः कंसमतो महावीरः कोऽपि दनुतनयो नुतनयोऽखिलदानवगणेन गणेन इव भगवन्तमनुसंदधानो दैवगत्यावगत्यायमेव स इति धरणितलमुन्नमयन्निव धरणितलनिहितोत्तरचञ्चुर्दिवमवनमयन्निव द्युतलविनिवेशितोर्ध्वचञ्चुश्च युगपदेव देवदनुजमनुजादिसकलजीवजीवनाकर्षणाय विततायतमहासंदंशं विवृत्य स्थित इव कालपुरुषः सकलैरेव भयभरनिर्भरभज्यमानमानसैरातङ्कपङ्क्तिलैरिव सहचरैरालुलोके ॥ २७ ॥

पालयिता सकललोकपालानामित्यनेन तादृशखेलावेशमयस्यापि तस्य मनसि दुष्टागमसमयलब्धस्वसेवावसरा· ऐश्वरी शक्तिर्दुष्टसंहाराय सहसैव पर्यस्फुरदिति द्योतितम् । अदरमनल्पम् । नुतः स्तुतो नयो नीतिर्यस्य सः । गणयन्तीति गणा गणकास्तेषामिनः, दैवज्ञश्रेष्ठ इव, गणयित्वावगत्येत्यर्थः । धरणितले निहितो वेधप्रकारेणार्पित उत्तरचञ्चुरधरचञ्चुर्येन सः । किमर्थमिव, धरणितलमुत्पाट्य नमयन्निव, ऊर्ध्वं नेतुमिव, एवं दिवं स्वर्गमधो नेतुमिव । पुनश्च महाघातुकस्वभावमालक्ष्यान्यथोत्प्रेक्षते युगपदेवेति । संदंशं सण्डासीति ख्यातम् ॥ २७ ॥

आलोक्य च,

सखे नायं पक्षी, अपितु सकलानेव नो गिलितुमिव कृतारम्भेण गुरुतरदम्भेन केनापि बकाकृतिना दानवेनैव भवितव्यं, तदितः पलायनमेवास्माकं पथ्यम् अथवा कैलासशिखरिशिखरद्राघीयसः शरीरादपि दीर्घदीर्घतराच्चञ्चुपुटादस्य कथं पलायनमपि ॥ २८ ॥

सखे हे श्रीकृष्ण, कैलासशिखरिणः शिखरादपि द्राघीयोऽतिदीर्घं यच्छरीरं तस्मादपि दीर्घदीर्घतरादस्य चञ्चुपुटात् कथं पलायनमपि शक्यमित्यर्थः ॥ २८ ॥

इति तेषु मीमांसमानेषु प्राणसमानेषु प्राणरक्षार्थं नाशङ्कनीयमिति दरहसितसुधापेशलसलालित्यमाभाषमाणमकुतोभयमभयदमखिललोकस्य सहेलमभिमुखमुपसर्पन्तं तमखिलभुवनैकबन्धुमनुपधिनिरवधिकरुणैकसिन्धुमव्ययमव्याहतमहाप्रभावमतिसाहसः स पामरोऽमरोपहतिकरः करालतरतुण्डः सहसोपपत्य पश्यत्सु सकलेषु दिवि दिविषत्सु गिलति स्म ॥ २९ ॥

मीमांसमानेषु विचारयत्सु सत्सु वयस्येषु तं श्रीकृष्णं गिलति स्मेत्यन्वयः । दर ईषत्· हसितसुधया पेशलं सुन्दरं सलालित्यं च यथा स्यात् तथा, अमराणां देवानामुपहतिमुपघातं करोतीति सः ॥ २९ ॥

तदनु तदनुपायमपायमिवात्मनां मन्यमानाः सर्व एव सहचराः सह- च- रामेण हाहेति निगदन्तो गदं तोदमतिमहान्तमापद्यमाना दिवि च दिविचरा अहो कष्टमहो कष्टमिति व्यथमाना मानापहारेण यदा मुह्यन्ति स्म ॥ ३० ॥

Digitized by Google

तदनु तदनन्तरं, तत्· बकासुरेण कृष्णस्य निगिलनमात्मनाम्·अनुपायम्·उपायशून्यम्·अपायं विपदं मन्यमानाः । गदं व्याधिं "रोगव्याधिगदामयाः" इत्यमरः । कीदृशं, तीव्रं व्यथाकरम् । मानापहारेण चेतनापहारेण "मन ज्ञाने" घञन्तः ॥ ३० ॥

तदैव ज्वलदनलमिव काकुदं काकुदं दहन्तं क्रमेलक इव प्रमादेन गिलितं नवसहकारपल्लवमिव प्रबलतरगलदण्डाकुञ्चनप्रसारणविकलः पक्षपक्षतिविधूननकातरस्तरसा निर्यद्भिः प्राणैरिव बहिर्निःसार्यमाणं तमतिवेगेनैव विवृतगलचञ्चुपुटस्तत्क्षणेनैव ववाम ॥ ३१ ॥

तदैव तं श्रीकृष्णं, काकुदं शोकभीत्यादिमयविकारप्रदंकुतः, ज्वलन्तमनलमिव काकुदं तालु दहन्तं तत्क्षणेनैव व, वामेत्यन्वयः, "तालु तु काकुद"मित्यमरः । क्रमेलक उष्ट्रः । सहकार आम्रः । प्रबलतरं यथा स्यात् तथा गलदण्डस्याकुञ्चनं रोधपीडानुभवेन संकुचितीकरणं, प्रसारणम्·उद्गमनार्थं विस्तृतीकरणं ताभ्यां व्याकुलः । पक्षती पक्षौ तयोर्विधूननमिति वैयर्थ्यलक्षणम् । निर्यद्भिर्निर्गच्छद्भिः ॥ ३१ ॥

तेनोद्गीर्ण एव, विधुंतुदवदनतो निष्क्रान्तश्चन्द्र इव, घनतरघनघटाकोटरतो बहिर्गतः किरणमालीव, गिरिवरगुहाकुहरतो विनिष्क्रान्तः कण्ठीरवशावक इव, दन्तुरतमतमःसमूहसमूढसंसारकूपतो निर्मुक्तः स्वभक्तजन इव, तद्गलगलितक्लेदलवाक्लिन्नवसनभूषणतया शोभातिशयमेव बिभ्राणो, न भेतव्यमिति मधुरतरसप्रणयकलस्वरमखिलसखिजनान् मूर्च्छातो विरमय्य ॥ ३२ ॥

चन्द्र इवेति वयस्यान् प्रति व्यथाशोकविस्मारणार्थं स्वमाधुर्यज्ञापनया किरणमालीवेति·असुरान् प्रति त्रासनार्थं दुःसहोग्रस्वप्रतापव्यञ्जनया । गिरिवरेति कण्ठीरवेत्याभ्यां देवान् प्रति शङ्कानिरासार्थं स्वव्यथाभावसूचनया, प्रत्युत क्रीडासुखास्पदत्वबोधनया च । स्वभक्तजन इवेति वैकुण्ठगतसाधनसिद्धपार्षदान् प्रति तत्तत्पूर्वानुभवस्मरणार्थं, तथाकारमात्रदृष्ट्यापि कौतुकभरेण सादृश्यसंभावनयोत्प्रेक्षेति । क्लेदलवैराक्लिन्नानि वसनभूषणानि यस्य तथाभूत इति ग्रस्तमुक्ते चन्द्रे पाटलवर्णलेशो राहुचिह्नशेषः शोभैव,मेघमुक्ते किरणमालिनि मेघखण्डलेशसंपर्को दुःसहतेजस्त्वप्रतिपादक एव दुर्दिनोत्थिते सूर्ये लोके तथानुभवात्,गिरिगुहाकुहरविनिष्क्रान्ते कण्ठीरवेऽपि तदीयगैरिकादिचिह्नलेशः खेलाकौतुकद्योतक एव, संसारनिर्मुक्ते भक्तजनेऽपि सिद्धिदशाप्रथमक्षणे बाधितानुवृत्तिन्यायेन स्वप्नभङ्गे सति स्वप्नार्थानुसंधानशेष इव विषयसुखानुभवशेषो विस्मयावह एवेति, चतुर्ष्वपि साधर्म्यकल्पनं द्योतितमिति ॥ ३२ ॥

पुनराक्रोशेन चञ्चुपुटविघट्टनया निष्कोषयितुमापततः पततस्तस्य वामकरकमलकुड्मलेनोर्ध्वचञ्चुदलं दक्षिणकरकमलकोशेनाधरचञ्चुदलमवधृत्य सहचरबालकानां दुःखशोकाभ्यां सह संतापभरनमदमरनिकरान्तःकरणानां भयेन सह प्रबलतरदनुजदैतेयपरिषदां हर्षोत्कर्षेण सह सहसैव हसन्मुखकमलो हेलयैव वीरणतृणस्येव विदारणं विधाय निरर्गलगलदसृग्धाराधौतधरणितलमभितोऽभितश्छिद्यमाननाडीनालमविरलमेदःस्रुतिवपुषः शकलद्वयं गिरिशिखरद्वयद्वयसं पातयामास ॥ ३३ ॥

विघट्टनया चालनेन । निष्कोषयितुं ठोत्कारेणार्दयितुम् । आपततः आगच्छतः । पततः पक्षिणः, "पतत्पत्त्ररथाण्डजाः" इत्यमरः । निरर्गलं निर्निवारं गलन्त्या· असृग्धारया धौतं धरणितलं यत्र तथाभूतं यथा स्यात् तथा, अविरला मेदसां स्रुतिः स्रवो यत्र तद्यथा स्यात्, शकलद्वयं खण्डद्वयं, गिरिशिखरद्वयप्रमाणं, प्रमाणार्थे द्वयसच् प्रत्ययः ॥ ३३ ॥

पततोश्च तयोः शकलयोः पतति स्म मदमुदितविबुधघनघटावृष्यमाणनन्दनवनकुसुमसंहतिरपि दिवो हर्षभरजनितनयनसकज्जलजलबिन्दुभिरिव देवद्रुमविलासिभिरलिभिः समं समन्ततश्च गन्धर्वकिंनरयुवतयो बत योजितहर्षं ननृतुरभितोऽभितश्च दुन्दुभयोऽभयोदीरिता नेदुरिति सुमहदाश्चर्यं तदिति मन्वाना मन्वानायिता मुनयोऽपि तुष्टुवुः ॥ ३४ ॥

तयोः पततोः सतोः पतति स्म·अपतत्, नयनसकज्जलेति दिवो नायिकात्वमारोपितं, बत विस्मये, योजितहर्षं यथा स्यात् तथा, अभयम्·असुरादिभ्यो निःशङ्कत्वं नेन·उदीरिता । मनुना वैवस्वतेन·आनायिताः, स्वजनद्वारा तत्र प्रापिता इत्यर्थः ॥ ३४ ॥

इह च सहचराः प्रमदभरभज्यमानहृदया हृदयाधिनाथं तमेकैकशो बकरिपुं करिपुंगवगामिनमालिङ्ग्य लब्धजीविता इव विलोक्य दिवसावसानमशेषमपि दिनान्तरवत् समवहार्य वत्सकदम्बकं कदम्बकन्दुकलालितककरकमलेन तेन प्रियसखेन सकलसौभगवता भगवता समं भवनमागत्य गत्यवसादासादितमान्थर्यमाधुर्यधुर्यमुत्क-

Digitized by Google

गठाकगठायीक्रियमाणमिव तदेव बकहननं व्रजपुरपरमेश्वर्यै कथयांबभूवु: ॥ ३५ ॥

गत्यवसादेन· अत्यौत्सुक्यादतिशीघ्रगमनश्रमेण हेतुना आसादितं मान्थर्यम्, अतिश्वासभूम्नां· एकप्रयत्नेनोच्चारणासामर्थ्ये, तेन यन्माधुर्यं तस्य धुर्यं यथा स्यात् तथा, कथयांचक्रु:, "धुर्वहे धुर्यधौरेयधुरीणा" इत्यमर: । बकस्य बकासुरस्य हननं हननवृत्तान्तं, कीदृशम्, उत्कण्ठया कण्ठायीक्रियमाणमिवेति समासो यमकानुरोधेन कृत: ॥ ३५ ॥

मात: परं मात: परं कौतुकं कौ-तु-कं न विस्मापयति तत्, यदद्य सख्या स ख्यापितभुजपराक्रम: पराक्रम: कृत: ॥ ३६ ॥

हे मात:, अत: परं कौतुकं मान संभवेदित्यर्थ: । तत् कौतुकं कौ पृथिव्यां तु कम्,अपितु सर्वमेव जनम् । सख्या श्रीकृष्णेन । स:. अस्मदृश्यत्वेन प्रसिद्ध: परस्य शत्रोराक्रम: सम्यिकर्तृकस्तस्य पराभव इत्यर्थ: । कीदृश:, ख्यापितो भुजस्य पराक्रमो यस्मात् स: ॥ ३६ ॥

तथाहि निजमदपर्वतायमानं पर्वतायमानं सर्वानेव नो गिलितुमुद्यतं मुद्यतं ज्वलन्तमिव पावकं बकं तीक्ष्णचञ्चुचञ्चूर्यमाणं करसरोजाभ्यामाभ्यामाहितहेलं हेलं सुकृतिनि तव कुसुमसुकुमार: कुमार: सपदि वीरणतृणमिव पाटयामास ॥ ३७ ॥

निजमदेन यत् पर्व·उत्सवस्तेन तायमानं विस्तार्यमाणं गिलितुमुद्यतं कृतोद्यमं, मुद्ग: आनन्देभ्यो यतम्·उपरतम्, आसन्नमृत्युत्वात्,चञ्चूर्यमाणं कुटिलगामिनम्,"उत्परस्यात:," "चरफलोश्चे"त्युत्वनुगागमौ । करसरोजाभ्यामाभ्यामिति, क, आहस्तौ स्वतर्जन्या स्पृष्ट्वा दर्शयन्ति । आहितहेलं यथा स्यादित्यायासाभावसूचनम् । हे· अलमतिशयसुकृतिनि, तवैव सुकृतवशादेव तादृशबलवद्दुष्टवधे· अस्य भुजयोर्बलमुदयते,अन्यदा तु क्रीडाबाहुयुद्धे अस्माभिरपि कतिवारं पराजितस्यास्य कुतस्तथा स्वतो बलसंभावनेति भाव: । सुकृतिनीत्यस्य संबोधनपदस्यैतन्मातृभिरेवंविधविपत्तौ व्रजेश्वर्यां बहुधा प्रयुक्तस्य बालस्वभावाद्यथाश्रुतधारणया· अनुकथनरीत्या· एभिरपि प्रयोग: कृत इति ज्ञेयम् ॥ ३७ ॥

इति वत्सपालकबालककलवचनमाश्रुत्य श्रुत्यतिकौतुकप्रदमपि भयदमुभयदशायामेव च विस्मयस्मयजनकमथ पुरपुरन्ध्रीभि: सह सहसा व्रजेश्वरी किमपि कथयितुमारेभे ॥ ३८ ॥

कुशलिन: पुत्रस्याद्भुतं चरित्रमिति श्रुत्यो:रतिकौतुकप्रदम् । गिलितुकामस्य महाबकस्य वध: पुत्रकर्तृक इति भयदम् । युगपदेव·उभयदशायां कौतुकदशायां भयदशायां च । विस्मयेन स्मयो मन्दहास्यं तस्य जनकं, तथाविधचरित्रत्वेऽपि पुत्रस्य कुशलित्वदर्शनमिति कौतुकदशायां विस्मय:,"विस्मयोऽद्भुतमाश्चर्य"मित्यमर: । तादृशबकस्य कोमलाङ्गशिशुनापि विदारणमिति भयदशायां च विस्मय इति ॥ ३८ ॥

हंहो,

यदर्थमजहामहं बत महावनावस्थितिं
तदेतदतिभीतिदं दितिजकृत्यमुन्मीलति ।
अयं परमचञ्चल: परमसाहसोऽसाध्वस:
क्व यामि करवाणि किं हतविधेर्न वेद्मीहितम् ॥ ३९ ॥

अजहां त्यक्तवत्यस्मि, अयं मत्पुत्र: ॥ ३९ ॥

इति बहुमनुचिन्त्य दिनान्तरवद्बालकान् विसृज्य तनयस्य समयोचिताभ्यञ्जनोद्वर्तनादि कारयित्वा प्रणयव्यवसाया सायाशनमाशयित्वा तात गृह एव भवता स्थीयतां, नात: परं वनान्तरे गन्तव्यं,वत्स वत्सरक्षणास्ते विरमतु वत्सरक्षणे बहव: सन्ति, किंतवामुनायासेन, इति जननी जननीतिकरवचनमाकर्ण्य, मातर्मा तव भयं किमपि, सर्वेऽमी मृषैव वदन्ति, तदलं चिन्तयेति निद्रामभिनयति सति लीलाबालके भगवति, जननी च तमतिपरार्ध्यशयनतले सलालनमसूषुपत् ॥ ४० ॥

प्रणये व्यवसायो यस्या: सा । सायाशनं सायंकाले अशनं भोजनं यस्य तत् पानकशष्कुलीलड्डुकादि । जननीतिकर इति वचनविशेषणम् । अतिपरार्धे परार्धमूल्यमप्यतिक्रान्ते शय्यातले । असूषुपत् स्वापयामास ॥ ४० ॥

एवं लीलालस्य लस्यमानचरितस्य नित्यसलीलताकल्पलताकल्पभूतमेतच्छैशवादि विवादि विरुध्यते यद्यपि, मूर्तानन्दत्वेन नित्यकिशोरतयाऽविकारित्वात्, तथापि तथापिहितपरमैश्वर्यस्य हितपरमैश्वर्यस्यदललितं तस्य तल्लीलायितं येन स्वस्व·ासनावासनानाविधभक्तानुग्रहपरवशतया सच्चिदानन्द·ने नित्यकैशोर एव सकलभाववपुषि वपुषि तथा तथा प्र·ाश:, न तु सावस्था कालिकी, किंत्वचिन्त्यवैभवत्. वे भवत्वेतदेव सकलं बाल्याद्यपि निस्तर्कनि-त्यमेव ॥ ४१ ॥

Digitized by Google

एवं शैशवकौमारमुपसेदुषः श्रीकृष्णस्याकस्मादाविर्भूतं वेणुगानाभ्यासवनमालादिप्रसाधनैर्माधुर्यस्यातिवैलक्षण्यं वर्णयिष्यन् प्रसङ्गान्नित्यकैशोरेऽपि तस्मिन् बाल्यपौगण्डलीलयोराविर्भावतिरोभाववत्योरपि नित्यस्थितिपरिपाटीप्रकारमुपदिशयति एवमिति । एवं लीलां लाति गृह्णाति तस्य, इत्यनेनावर्णितान्यपि लीलान्तराणि सूचितानि । नित्यसलीलता नित्यलीलावत्त्वं सैव कल्पलता कल्पवल्ली, तत्तदनुरक्तत्रिविधभक्तवाञ्छनपूरणात्, तत्कल्पभूतं शैशवादि, तत्तन्नित्यलीलामयमेवेत्यर्थः, आदिशब्दात् पौगण्डं च । यदपि यद्यपि । विरुध्यत इति, बाल्यकैशोरयोः परस्परविरुद्धस्वभावत्वात् ।

ननु जानुचंक्रमणादिनिकुञ्जविहाराद्योर्बाल्यकैशोरलीलयोर्युगपदेव श्रीकृष्णे धर्मिणि विरोधः, कालभेदव्यवस्थया तु कुतस्तयोर्विरोधस्तत्राह नित्यकिशोरतयेति ।

ननु यद्येवं जन्मारभ्य प्राकृतबालकस्येवास्य कथं तथा तथा विकारित्वप्रतीतिस्तत्राह· अपिहितम्· आच्छादितं परमैश्वर्यं स्वयं भगवत्त्वेन महाषडैश्वर्यं यस्य, तदिच्छावशाल्लीलाशक्त्यैवेत्यर्थः । तस्य श्रीकृष्णस्य । तेन नित्यभूतं षडैश्वर्यमिव नित्यकिशोरत्वस्वरूपमपि तदानीं तयैव बाल्यलीलारसपुष्ट्यर्थमाच्छादितं तिष्ठतीत्यर्थः ।

ननु कथमेवमुच्यते, पूतनादिवधविश्वरूपदर्शनबन्धनदामद्व्यङ्गुलन्यूनत्वापादकविचित्रैश्वर्यसंवलितत्वेनैव तत्तद्बाल्यलीलाया अपि दृष्टत्वादत आह हितं विस्मयानिष्टाशङ्कादिभिर्वात्सल्यरसस्य पोषकं न तु तद्विघातकं यत् परमैश्वर्यं तस्य स्यदेन वेगेन ललितं प्राप्तशोभम् । तत् प्रसिद्धं, तस्य तथा लीलायितं, येन नित्यकैशोरे एव वपुषि तथा तथा बाल्यादिप्रकाशः । कीदृशे सकलान् वात्सल्यसख्यमधुरादीन् सर्वानेव भावान् पुष्णातीति तस्मिन् । तेन बाल्यादिवपुषस्तादृशत्वाभावात् तत्प्रकाशत्वमेव । यथोक्तं भक्तिरसामृतसिन्धौ, ।

"वयसो विविधत्वेऽपि सर्वभक्तिरसाश्रयः ।
धर्मी किशोर एवात्र नित्यनानाविलासवान्" ॥

इति । प्रकाशे को हेतुस्तत्राह, स्वस्ववासनासु वात्सल्यादिभावमात्रमयीषु वासो नैश्चल्यं येषां तथाभूता ये नानाविधभक्तास्तेषामनुग्रहाधीनतया, तेन· अनादिसिद्धवेदागमादिप्रसिद्धतत्तदुपासनापरंपराप्रवाहादेव तत्तल्लीलाया नित्यत्वं सूचितम् । अत एव नित्यस्थितस्यैव बाल्यादेः प्रकाश एव न तु सा कालिकी कालकृता ।

ननु स्वस्वोचितकाल एव तस्यास्तस्या अवस्थाया जन्यत्वेनैव प्रतीतेः कथं कालिकत्वखण्डनं, प्रतीतिरवास्तवीति चेत्, प्रतीतिमयान्येव सर्वाणि तानि तानि लीलायितानीति तेषामप्यवास्तवत्वप्रसक्तिरित्याशङ्क्याह किंत्विति, न चिन्त्यं चिन्तयितुं शक्यं वैभवं यस्य तस्य भावस्तत्त्वे सति, तस्याचिन्त्यशक्तिमत्त्वस्वीकारे सतीत्यर्थः । वै निश्चितम् । निस्तर्केति,

"अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत् ।
प्रकृतिभ्यः परं यत् तु तदचिन्त्यस्य लक्षणम्" ॥

इति तत्र तर्कयोजनस्य निषिद्धत्वादिति ॥ ४१ ॥

एवं निर्व्यलीकं मुरलीकलमुररीकुर्वन् कलगानगानवद्यत्वेन वैणविकत्वेन व्रजपुरपुरन्ध्रीणां विस्मयमाततान ॥ ४२ ॥

निर्व्यलीकं प्रियं, "व्यलीकमप्रियाकार्यवैलक्ष्येष्वपि दृश्यते" इति विश्वः । कलं गानगं मधुरास्फुटगानप्रापकम्· अनवद्यत्वं प्रशंसार्हत्वं तेन वैणविकत्वेन वेणुवादनशीलत्वेन ॥ ४२ ॥

आगत्य च तास्तस्य संनिधिम्,

हे कृष्ण मातृकुचचूचुकचूषणेऽपि
नालं यदेतदधरोष्ठपुटं तवासीत् ।
तेनाद्य ते कतिपयेषु दिनेष्वकस्मात्
कस्माद्गुरोरधिगतः कलवेणुपाठः ॥
निर्मञ्छनं तव नयामि मुखस्य तात
वेणुं पुनर्ललन वादय वादयेति ।
ऊचुर्यदा स जननीजनकोपकण्ठे
तं वादयन्नथ तदा सरसीकरोति ॥ ४३ ॥

हे ललन, हे ललनीयेत्यर्थः । तं वेणुं सरसीकरोति ॥ ४३ ॥

तमालवर्णं तमालवर्णं वाङ्मनसावसानं वसानं च वसनं केशरपरागभरपिञ्जरनमालिनमिव वनमालिनमिव वनकुञ्जरशावकं बकवैरिणमालोकयितुमहरहरेव नभसि भसितधारिणा देवेन सह सह कमलजनिना च सुरनगरनागराः समुपसीदन्ति ॥ ४४ ॥

तं श्रीकृष्णम्, आलवर्णं हरितालवर्णं, वसनं वसानं परिदधतं, "तालमालं च हरितालके" इत्यमरः । पुनः कीदृशं, वाङ्मनसयोर्वर्णनचिन्तनाभ्यामवसानं सीमा यस्मिंस्तं, वनमालिनं "पत्रपुष्पमयी माला वनमाला पदावधि" रिति लक्षितलक्षणमालामुक्तम् । वनकुञ्जरशावकमिवेति, इवेत्यस्य प्राग्भावो यमकानुरोधेन, "इवेन सह नित्यसमासवचन"मित्यस्य प्रायिकत्वात् । अहरहः प्रतिदिनमेव । भसितं भस्म तद्धारिणा शंभुना । कमलजनिना ब्रह्मणा । गमने अनयोरप्राधान्यं पुरातनपुरुषत्वेन

Digitized by Google

गाम्भीर्याद्दर्शनौत्सुक्यस्यास्याविष्कारात् । सुरनगरस्य नागरा इन्द्रादयः ॥ ४४ ॥

एवं स्थिते कस्मिन्नप्यहनि अनुदित एवाहस्करे पुष्करेक्षणो जननीमुवाच, मातरद्य निरवद्यविपिनभोजने भो-जनेश्वरि विहितलालसोऽस्मि ॥ ४५ ॥

जनेश्वरीति, अन्यलोककृतस्तुतिसंबोधनपदानुवादेन स्वाभीप्सिते तत्र संमतिप्रार्थना द्योत्यते ॥ ४५ ॥

तदद्याच नाशनीयं, नाशनीयं, च न मे वचनमिदं शुभवत्या भवत्या ॥ ४६ ॥

अत्र गृहे न अशनीयं न भोक्तव्यं, प्रत्याख्यास्यमानां मातरमाशङ्क्याह इदं वचनं मम भवत्या न नाशनीयं, नह्येवं नह्येवम् इति प्रत्युत्तरं न दातव्यमित्यर्थः, शुभवत्येति अत्र शुभकार्ये बाधा नचानुचितेति भावः ॥ ४६ ॥

इति तनयोदितमनयोदितमवगम्य व्रजराजवधूर्जवधूयमानवदनं नननेति यदा जगाद ॥ ४७ ॥

तनयस्य उदितं वाक्यम्, अनयस्य उदितम् उदयो यत्र तथाभूतं जवेन वेगेन धूयमानं वदनं यथा भवत्येवम् ॥ ४७ ॥

तदा पुनरपि सनिर्बन्धलीलाबालकोऽलकोल्लसद्भालो भालोकविघटिततमा विघटिततमामात्मनो लालसामालोक्य तद्धटनसदृशपथेन शपथेन मुहुरनुनाय्य तदनुमोदनं कारयामास ॥ ४८ ॥

भाभिरङ्गकान्तिभिरालोकेन दृष्ट्या च विघटितं दूरीकृतं तमो ध्वान्तमज्ञानं च अन्यदीयं येन तथाभूतोऽपि, निजतनुत्वामताशङ्कोदितवैयग्र्याया मातुरग्रे तथाभूतत्वेन ऐश्वर्यप्रकाशस्याप्यकिंचित्करत्वमिति भावः । आलोक्य अवगम्य । शपथेन कीदृशेन, तद्धटनस्य स्वाभीष्टप्राप्तेः सदृशः पन्था यस्तेन, मातर्ममैव शपथो यद्येतत् त्वं नानुमन्यसे, तथा तवैव शपथो यद्यहं गृहे प्रातर्भुञ्ज, इत्येवंलक्षणेन । मुहुरनुनाय्य पुनः पुनः प्रार्थ्य तस्या अनुमोदनं कारयामास, वत्स हठिल यथाभिरोचते तुभ्यमिति वाचयामासेत्यर्थः । एतच्च तद्वैयग्र्यशमनार्थं तदानीं तद्गृहपक्वान्नादिकं भुक्त्वैवेति ज्ञेयम् ॥ ४८ ॥

तदनुदेवेन बलपूरितशङ्खध्वनिनाध्वनि नाहितविलम्बं निजनिजान्मनागारादागारादागतेषु सहचरेषु ॥ ४९ ॥

तं श्रीकृष्णम् अनुलक्षीकृत्य दिव्यति क्रीडतीति तेन बलेन, उच्चैः कृत्वा पूरितः शङ्खध्वनिर्येन तेन, अध्वनि गोचारणार्थवनप्रयाणवर्त्मनि, न आहितो विलम्बो यत्र तथाभूतं यथा स्यात् तथा, मनाक् सकृदेव, आरात् समीपम् । आगतेषु निजनिजात् आगारात् गृहात्, "विद्यादगारमागार"मिति द्विरूपकोशः । सकृदर्थे मनागित्यमरटीकायां वड्जेना ॥ ४९ ॥

देहि नो जननि जननिकाममदनीयमदनीयमिति नाथति नाथतिलके त्रिभुवनस्य ॥ ५० ॥

नोऽस्मभ्यं जनानां निकामं मदनीयं हर्षो यत्र तत् "मदी हर्षे" भावेऽनीयर्, अदनीयं भक्षणयोग्यं वस्तु नाथति याचमाने सति ॥ ५० ॥

वनस्य योग्यानि भोज्यानि ज्यानिविहीनानि दधिमहोदधिमहोद्भटपङ्कपिण्डानीव दधीनि, पीयूषकिरणपललानीव ललितानि नवनीतानि, क्षीरनीरधिहिमखण्डा इव मांसलाः पयःसरा, नयनामोदघटकाः पर्पटका वटकाश्च, सुरससुरभिबहुमूल्याः शष्कुल्यादयश्च, स्त्यानतुहिनशकलानीव आमिक्षाखण्डानि, देवानामपि नयनामोदकानि मोदकानि, पूर्णिमाचन्द्रमण्डला इव सुरूपाः पूपाः, अगलकरका इव सितोपलाशकलनिकराः ॥ ५१ ॥

ज्यानिर्जरा तया विहीनानि, नवोद्भवानीत्यर्थः । पीयूषकिरणस्य चन्द्रस्य पललानि मांसानि शैत्यस्वादुत्वशुभ्रताभिः । मांसलाः पुष्टाः । पर्पटकाः पापड इति ख्याताः । शष्कुली गूंझा इति ख्याता । स्त्यानानि पुञ्जितानि हिमखण्डानीव । "आमिक्षा सा शृतोष्णे या क्षीरे स्याद् दधियोगतः" इत्यमरः । चन्द्रमण्डला इवेति सिताघटितत्वेन शुभ्रतयापि । करका वर्षोपलाः । सितोपला मिश्री इति ख्याताः ॥ ५१ ॥

अतिसुरभिमेध्यमोदनानि दध्योदनानि, जनितसुधामाधुर्यवेपथुका घनसारसुरभिपयःसितापृथुकाः, आवर्तितकौमुदीसारसंपन्नानि परमान्नानि, सुरसुरभीणि संधानफलानि ॥ ५२ ॥

मेध्यानि पवित्राणि, मोदनानि हर्षकाणि, वेपथुः कम्पः, घनसारः कर्पूरः, आवर्तितताना पाकेन घनीकृतानां कौमुदीनामिव सारेण संपन्नानि, संधानफलानि तैलादिसंधिताम्रजम्बीरादीनि ॥ ५२ ॥

सकलान्येव मातृवात्सल्यानीव अपरिमितानि उपादेयानि पेयानि मनसाप्यनूह्यानि लेह्यानि नयनसुखानुपूर्व्याणि चर्व्याणि केनापि कथंचिदप्यदूष्याणि चूष्याणि, एवं चतुर्विधान्यपि विविधानि ॥ ५३ ॥

उप आधिक्येन आदेयानि ग्रहीतुं योग्यानि अनूह्यानि तर्कयितुमप्यशक्यानि, अपूर्वस्वादानुभवादित्यर्थः । विविधानि तत्तत्प्रभेदेन ॥ ५३ ॥

Digitized by Google

मातृरचितान्यपि न मातृपरिचितानि, अनेकवाह्यान्यपि न वाह्यानि, हितान्यपि नहि-तानि क्वापि सुलभानि तानि विलोकयतायतानन्देन तेन सहचराः समूचिरे रे सखायः कानने भोजनार्थमेतानि समादद्ध्वं माऽध्वंसेन, इति सप्रणयमुक्ता मुक्ताभिमानतया नतया मनोवृत्त्या सर्व एव ते वर्तमानि सकलान्येव ग्रहीतुकामाः ॥ ५४ ॥

न मातृभिः परिमाणकर्तृभिः परिचितानि, परिचय एव नास्ति कुतस्तद्गणनेति भावः। न वाह्यानि, न हेयानीत्यर्थः। नहि नैवेत्यर्थः, न विलोकयता पश्यता। आयत आनन्दो यस्य तेन कृष्णेन। समादद्ध्वं यूयं गृह्णीत। माऽध्वंसेन-अहंकारत्यागेनेत्यर्थः ॥ ५४ ॥

कामार्वुदार्वुदाधानकारिसौहृप्येण तेन पुनरूचिरे, अचिरेण भो अध्यात्मविदां मनांसीव नीरसतया कठिनप्रायाण्येव गृह्णीत, यानि वत्सानुपदं धावत्सु भवत्सु न गलन्तीति, तथैव तेषु स्वस्वसमुचितमेव विभज्य गृह्यमाणानि तानि प्रभूतान्यपि स्तोकप्रमाणान्येव बभूवुरपरिमितत्वात् तेषां, तदवलोक्य भगवज्जननी पुनरन्यान्यपि तानि तानि हसन्ती समुपसादयामास ॥ ५५ ॥

कामार्वुदस्यापि· अर्वुदो व्रणभेदस्तस्य· आधानकारि सौहृप्यं यस्य तेन, "अर्वुदो मांसकीले स्याद्दशकोटिषु चार्वुद"मिति विश्वः। अध्यात्मविदामपि तादृशान्यपि मनांसि एतल्लीलामाधुर्यबलादाकृष्य गृह्णीतेति सरस्वत्या भङ्गी च ज्ञेया ॥ ५५ ॥

तदनु तान्यपि समुचितं विभज्य निजनिजचिरतरविहङ्गिकासङ्गिशिक्येषु समुचितभाजनस्थानि विधाय चलनसुसज्जेषु तेषु स्वयमपि भगवज्जननी विरचितसमुचितवेशभूषं भगवन्तं वेणुवनमालादिभिः पुनरपि विशिष्य भूषयित्वा स्नेहस्नुतपयोधरपयःकणनिकराक्लिन्नकञ्चुकायपरिसरा कियद्दूरमनुव्रजन्ती सह पुरन्ध्रीभिरग्रे चालितानामपरिमितानां कृष्णवत्सानां तथा तदनुचरगणस्यापि प्रतिजनमनेकेषां वत्सानां परस्तादग्रे चलतः केनापि हेतुना गृहस्थितिकुतूहलिनि हलिनि केवलस्य स्वतनयस्य पश्चाच्चलतां तेषामनुचराणां च रामणीयकमतिलोकोत्तरमाकलयांचकार ॥ ५६ ॥

विहङ्गिका वाहुका इति ख्याता। प्रतिजनम्· एकैकस्य जनस्येत्यर्थः। वत्सानां परस्तात् पश्चात्। अग्रे प्रथमम् केनापि हेतुनेति, शङ्क मापूर्य गन्तुमुद्यतेऽपि तस्मिंतद्दैव मिलितदैवज्ञजनप्रोक्ततद्दिवसीयनक्षत्रग्रहादिशान्तिकमङ्गलाभिषेकार्थं जनन्यैव ततो निवारिते सतीति ज्ञेयम्। कुतूहलिनोनितस्य बहु .स्वर्णादिदानप्रियत्वात् ॥ ५६ ॥

यथा,

वेणुं वामे करकिशलये दक्षिणे चारुयष्टिं
कक्षे वेत्रं दलविरचितं शृङ्गमत्यद्भुतं च।
वर्होत्तंसं चिकुरनिकरे वल्गुकण्ठोपकण्ठे
गुञ्जाहारं कुवलययुगं कर्णयोश्चारु बिभ्रत् ॥ ५७ ॥

कुवलययुगमिति, कुण्डलस्य पीतिम्ना, अस्य च नीलिम्ना, शोभाधिक्यात् ॥ ५७ ॥

किंच,

सद्रत्नालंकरणनिकरेष्वादधानोऽवहेलां
वन्याकल्पे विरचितरुचिर्वत्सपालानुकृत्या।
धावन्नग्रे व्रजशिशुगणस्योल्लसद्वैजयन्ती-
मालः श्रीरञ्जितलसदुरोभित्तिराभाति कृष्णः ॥ ५८ ॥

श्रीः कनकरेखाकारा ॥ ५८ ॥

अंसे चारुविहङ्गिकाग्रविलसच्छिक्यस्थभाण्डोदना
कक्षे वेणुविषाणपत्त्रमुरलीशृङ्गाणि यष्टिः करे।
गुञ्जोत्तंसमयूरपिच्छरचना मौलौ गले गोञ्जिको
हारः श्रोणितटे घटीति मधुरो वेशः शिशूनां बभौ ॥५९॥

अंसे वामस्कन्धे चार्वी विहङ्गिका, कीदृशी, अग्रे विलसतोर्विराजमानयोः शिक्ययोस्तिष्ठत्सु भाण्डेषु· ओदनानि यस्याम्, ओदनेति सर्वभक्ष्यवस्तूनामुपलक्षणम् ॥ ५९ ॥

केयूरे वलयानि किङ्किणिघटा हारावली कुण्डले
मञ्जीरौ मणितुन्दबन्धलतिका यद्यप्यमीषां बभुः।
नासीत् तत्र तथापि मातृरचिताकल्पेषु तेषां ग्रहः
कामं वत्सकरक्षणोचितवनाकल्पे यथा लालसः ॥ ६० ॥

केयूरे· अङ्गदे ॥ ६० ॥

एवमतिकौतुकाकृष्टमनाः साचि सा चिरतरमालोकयन्ती खेलाकुतूहलेन दूरतरं गतेषु तेषु शनैर्भवनमुपजगाम व्रजराजमहिषी ॥ ६१ ॥

तेषु कृष्णादिषु ॥ ६१ ॥

एवं वत्सानग्रे चालयित्वा चलति भगवति तदनु पमकुतूहलविलोकनाय परमस्थविरतमस्य सकललोकपितामहस्यापि-ता-महस्यापि कतमा वृत्तयो बभूवुः। पर

मात्मारामस्यापि नीलकण्ठस्य नीलकण्ठस्येव इव मुदिरविलोकनमुदि-रविलोकन इव कमलाकरस्य समुत्कण्ठाभरस्तथैव समपद्यत, यथा नभसि निर्निमेषतया चित्रलिखिताविव तावासातां किं पुन: कुतुकलम्पटा: शतमखमुखा: ॥ ६२ ॥

सकलानां लोकानां पितामहस्य ब्रह्मणोऽपि, ता: प्रसिद्धा:, महस्य· उत्सवस्य, अपि निश्चितं कतमा वृत्तयो बभूवु: । नीलकण्ठस्य रुद्रस्य समुत्कण्ठाभर: समपद्यत कीदृश:, मुदिरस्य मेघस्य विलोकनमुदि दर्शनानन्दे सति नीलकण्ठस्य मयूरस्य स्यद इव नृत्यातिवेग इव । इवीति, तेन विना तस्य स्वरूपस्याप्यनुपलम्भ इति विवक्षया ॥ ६२ ॥

एवं सति भगवति पुरोगामिनि तत्संस्पर्शपणपणितमतयोऽहंपूर्विकया कयापि धावन्तोऽनुचरा: परस्परं मयैवायतोऽयं स्पृष्ट इति विवदमाना: परस्परजिगीषया श्रीकृष्णमेव साक्षित्वेन यदावृणवत, तदा हसितसुधास्नपितदशनवसनं दशनमयूखमञ्जरीभिरभितो धवलयन् लक्षयन्नथ सकलसहचरमुखं, किं व: पौर्वापर्यं पर्यनुयोज्यं, युगपदेव पदे वर्तमाना मां प्रापुर्भवन्त इति निजगाद ॥ ६३ ॥

हसितसुधया स्नपिते स्नानं कारिते दशनवसने· ओष्ठाधरौ यथा तथा निजगाद । धवलयन् धवलीकुर्वन् । लक्षयन् पश्यन् । पदे स्थाने ॥ ६३ ॥

तदनु दनुजदमने दमनेयमनसां मनसां दुर्लभे वत्सानुपदं चलति तिमिरकदम्ब इव कौमुदीकदम्बानुवर्तिनि परस्परं तेषामजनि खेलापरिमल: ॥ ६४ ॥

दनुजदमने चलति सति खेलापरिमलस्तेषामजनि कीदृशे, दमेन· इन्द्रियनिग्रहेण नेयानि वश्यानि मनांसि येषां तेषां । महामुनीनामपीत्यर्थ:, “वश्यस्तु नेय”इत्यमर: । मनसां दुर्लभे चञ्चलतिमिराङ्कुरे· इव ॥ ६४ ॥

केचित् कस्य हरन्ति शिक्यमपरे मुष्णन्ति तेषां करादन्ये तत् प्रतिपादयन्ति च तत: संकृष्य तत्स्वामिने ।
अप्यन्ये परिवर्तयन्ति चकितं भक्ष्येण भक्ष्यं निजे
दृष्टे तेन पुनर्ददत्यपि लसद्धासं विलासालसा: ॥ ६५ ॥

कस्य कस्यचिदित्यर्थ: तत:·मुष्णाद्भ्य:, संकृष्य सम्यगाच्छिद्येत्यर्थ: । तेन भक्ष्यस्वामिना दृष्टे सति ॥ ६५ ॥

किंच,

कश्चित् कस्य च यष्टिकामपहरत्यन्यस्य वेणुं पर:
शृङ्गं कस्य च कोऽपि कस्य च परो गुञ्जास्रजं कण्ठत: ।
तस्मात् कोऽपि ततश्च कश्चन तत: कोऽपीति चौर्योत्सवे
दृष्टे तत्क्षणत: स एव लभते तद्यस्य यत् स्यान्निजम् ॥ ६६ ॥

इति·एवं प्रकारेण चौर्योत्सवे । दृष्टे·इति, यष्टिकाद्यन्यतमे परकीयबुद्ध्या, प्रथमं यस्य यद् यष्टिकादि निजं स्वीयं स्यात्; तत् स एव तत्स्वामी·एव लभते ॥ ६६ ॥

* एवं खेलन्त: कियद्दूरं गत्वा नवतृणाङ्कुरनिकरसमास्वादादतितृप्तिमासाद्य च्छायं विश्रान्तेषु वत्सनिकरेषु क्वचन रुचिरतरतरुतले निजनिजविहङ्गिकादिसकलसामग्रीर्निधाय श्रीकृष्णं परितोषयन्तो हासयन्तश्च पुन: खेलान्तरं विरचयांचक्रु: ॥

केचिन्नृत्यन्त्समारा-
न्मदकलशिखिनं वीक्ष्य नृत्यन्ति तद्वत्
केचिद्वाप्यादिकच्छे
बकमनु स इवाकुञ्चिताङ्गं वसन्ति ।
एके भेकेन सार्धं
पयसि परिपतन्त्यूर्ध्वमुत्प्लुत्य दूरं
छायां धावन्ति केचि-
न्नभसि तत इतो धावतामण्डजानाम् ॥ ६७ ॥

वापी दीर्घिका ॥ ६७ ॥

केचिच्छाखामृगाणां
वदनमनु मुखस्यातिवैकृत्यपूर्वं
तानुच्चैर्भीषयन्ते
विदधति च तदाकर्षणं धूतपुच्छा: ।
आरोहन्ति द्रुमाग्रं
क्षणमपि सह तैस्तै: समं च प्लवन्ते
केचिद्गायन्ति नृत्य-
न्त्यपि लघु कतमे केपि तांस्तान् हसन्ति ॥ ६८ ॥

मुखस्यातिवैकृत्यम्·अतिविकृताकारत्वं तत्पूर्वकं यथा स्यात् तथा धूताश्चालितास्तेषां पुच्छा यैस्ते ॥ ६८ ॥

राजा कश्चिद्भवति कतमस्तस्य मन्त्री तथान्यो
दण्डस्वामी कतिचिदपरे हन्त सामन्तवर्गा: ।
कश्चिच्चौरस्तमथ कतमोऽभ्यासमानीय राज्ञ:
क्रुद्धो विज्ञापयति स च तच्छासनाज्ञां विधत्ते ॥ ६९ ॥

शासने शास्तिविषये आज्ञाम् ॥ ६९ ॥

Digitized by Google

कोचिन्मेषायमाणावतिशयतरसैा सोपसर्पापसर्पैा
मूर्ध्ना मूर्ध्नानतेन प्रमदकुतुकिनो युध्यमानावभाताम् ।
केचिद्व्याघ्रायमाणाः पटुकटुरटनेनापरान् भीषयन्ते
पश्चादागत्य केषांचिदपि पिदधते केऽपि नेत्रे कराभ्याम्॥७०॥

पिदधते· आच्छादयन्ति ॥ ७० ॥

॥ शेषमये ॥

SARVA-DARS'ANA-SAṄGRAHA

CHAPTER III.

THE ARHATA SYSTEM.

(Continued from Vol. IX, page 292.)

Moksha. Since at the moment of its attainment there is an entire absence of all future actions, as all the causes of bondage (false perception etc.) are stopped;* and since all past actions are abolished in the presence of the causes of *nirjará*, there arises the absolute release from all actions,—this is *moksha*; as it has been said, '*Moksha* is the absolute release from all actions, by the decay (*nirjará*) of the causes of bondage and of existence.'

Then the soul rises upward to the end of the world. As a potter's wheel, whirled by the stick and hands moves on even after these have stopped, until the impulse is exhausted,—so the previous repeated contemplations of the soul for the attainment of *moksha* exert their influence even after they have ceased, and bear the soul onward to the end of the world; or as the gourd, encased with clay, sinks in the water, but rises to the surface when freed from its encumbrance,—so the soul, delivered from works, rises upward by its isolation † from the bursting of its bonds like the elastic seed of the castor-oil plant, or by its own native tendency like the flame.

'Bondage' is the condition of being unseparated, with a mutual interpenetration of parts [between the soul and the body;] *sanga* is merely mutual contact. This has been declared as follows:—

"[Liberation] is unhindered, from the fulfilment of former actions, from the absence of *sanga*, from the cutting of all bonds, and from the natural development of the soul's own powers of motion,—like the potter's wheel, the gourd with its clay removed, the seed of the castor-oil plant, or the flame of fire".

Hence they recite a śloka.

However often they go away, the planets return, the sun, moon and the rest;

But never to this day have returned any who have gone to Álokákáśa.

Others hold *moksha* to be the abiding in the highest regions, the soul being absorbed in bliss, with its knowledge unhindered and itself untainted by any pain or impression thereof.

Others hold nine *tattwas*, adding 'merit' and 'demerit to the foregoing seven,—these two being the causes of pleasure and pain. This has been declared in the *Siddhánta*, "*Jíva, ajíva, punya, pápa, ásrava, samvara, nirjaranam, bandha*, and *moksha*, are the nine tattwas." As our object is only a summary, we desist here.

Here the Jainas everywhere introduce their favourite logic, called the *sapta-bhanga-naya* * or the system of the seven paralogisms, 'may be, it is,'—'may be, it is not,'—'may be, it is and it is not,'—'may be, it is not predicable,'—'may be, it is, and yet not predicable,'—'may be, it is not, and not predicable,'—'may be, it is and it is not, and not predicable.' All this Anantavírya has thus laid down.

* I read *nirodhe* for *nirodhaḥ* in p. 40, l. 6; cf. p. 37, l. 13. The causes of bondage produce the assumption of bodies in which future actions are to be performed.

† Literally 'absence of *sanga*'.

* In p. 41. l. 7. read सप्तभङ्गनयाख्यं.

॥ सर्वदर्शनसङ्ग्रहः ॥

मिथ्यादर्शनादीनां बन्धहेतूनां निरोधः अभिनवकर्म्माभावात् निर्जराहेतुसन्निधानेनार्ज्जितस्य कर्म्मणो निरसनादात्यन्तिककर्म्ममोक्षणं मोक्षः बन्धहेतुभवहेतुनिर्जराभ्यां कृत्स्नकर्म्मविप्रमोक्षणं मोक्ष इति तदनन्तरमूर्द्धं गच्छत्यालोकान्तात् यथा हस्तदण्डादिभ्रमिप्रेरितं कुलालचक्रमुपरतेऽपि तस्मिन् तद्बलादेवासंस्कारक्षयं भ्रमति तथा भवस्थेनात्मना अपवर्गप्राप्तये बहुशो यत् कृतं प्रणिधानं मुक्तस्य तदभावेऽपि पूर्व्वसंस्कारादालोकान्तं गमनमुपपद्यते यथा वा मृत्तिकालेपकृतमलाबुद्रव्यं जलेऽधः पतति पुनरपेतमृत्तिकाबन्धमूर्द्धं गच्छति तथा कर्म्मरहित आत्मा असङ्गत्वादूर्द्धं गच्छति बन्धच्छेदादेरण्डबीजवच्चोर्द्धगतिस्वभावाच्चाग्निशिखावत् । अन्योन्यं प्रदेशानुप्रवेशे सत्यविभागेनावस्थानं बन्धः परस्परप्राप्तिमात्रं सङ्गः । तदुक्तं पूर्व्वप्रयोगादसङ्गत्वाद्बन्धच्छेदात्तथा गतिपरिणामाच्चाविरुद्धं कुलालचक्रवद्व्यपगतलेपालाबुवदेरण्डबीजवदग्निशिखावच्चेति । अतएव पठन्ति गत्वा गत्वा निवर्त्तन्ते चन्द्रसूर्य्यादयो ग्रहाः । अद्यापि न निवर्तन्ते त्वालोकाकाशमागता इति ॥ अन्ये तु गतसमस्तक्लेशतद्वासनस्यानावरणज्ञानस्य सुखैकतानस्यात्मन उपरिदेशावस्थानं मुक्तिरित्यास्थिषत । एवमुक्तानि सुखदुःखसाधनाभ्यां पुण्यपापाभ्यां सहितानि नव पदार्थान् केचनाङ्गीचक्रुः । तदुक्तं सिद्धान्ते जीवाजीवैा पुण्यपापयुतावास्रवः संवरो निर्जरणं बन्धो मोक्षश्च नव तत्त्वानीति सङ्ग्रहे प्रवृत्ता व-

1. "When you wish to establish a thing, the proper course is to say 'may be, it is; ' when you wish to deny it, 'may be, it is not.'

2. When you desire to establish each in turn, let your procedure likewise embrace both; when you wish to establish both at once, let it be declared 'indescribable' from the impossibility to describe it.

3. The fifth process is enjoined, when you wish to establish the first as well as its indescribableness; when the second as well as its indescribableness, the occasion for the sixth process arises.

4. The seventh is required, when all three characters are to be employed simultaneously.

Syát 'may be' is here an indeclinable particle in the form of a part of a verb; used to convey the idea of indeterminateness; as it has been said.

"It denotes indeterminateness in sentences, it has a qualifying effect on the implied meaning; this particle *syát* from its connecting the sense is in the form of a verb."

If, again, the word *syát* denoted determinateness, then it would be needless in the phrase, 'may be, it is'; but since it really denotes indeterminateness,' 'may be, it is' means 'it is somehow'; *syát* 'may be' conveys the meaning of 'somehow', *kathamchit*; and so it is not really useless. As one has said,

"The doctrine of the *syád-váda* arises from our everywhere rejecting the idea of the absolute *; it depends on the *sapta-bhanga-naya* and it lays down the distinction between what is to be avoided and to be accepted.'

* I cannot understand the words at the end of the first line *kim vṛita-tadvidheh*, and therefore leave them untranslated.

यमुपरताः स्मः । अत्र सर्व्वत्र सप्तभङ्गीनयाख्यं न्यायमवतारयन्ति जैनाः स्यादस्ति स्यान्नास्ति स्यादस्ति च नास्ति च स्यादवक्तव्यः स्यादस्ति चावक्तव्यः स्यान्नास्ति चावक्तव्यः स्यादस्ति च नास्ति चावक्तव्य इति । तत्सर्व्वमनन्तवीर्य्यः प्रत्यपीपदत् तद्विधानविवक्षायां स्यादस्तीति गतिर्भवेत् । स्यान्नास्तीति प्रयोगः स्यात्तन्निषेधे विवक्षिते ॥ क्रमेणोभयवाञ्छायां प्रयोगः समुदायभाक् । युगपत्तद्विवक्षायां स्यादवाच्यमशक्तितः ॥ आद्यावाच्यविवक्षायां पञ्चमो भङ्ग इष्यते । अन्त्यावाच्यविवक्षायां षष्ठभङ्गसमुद्भवः ॥ समुच्चयेन युक्तश्च सप्तमो भङ्ग उच्यत इति । स्याच्छब्दः खल्वयं निपातः तिङन्तप्रतिरूपकोऽनेकान्तद्योतकः । यथोक्तम् वाक्येष्वनेकान्तद्योतिगम्यं प्रति विशेषणम् । स्यान्निपातोऽर्थयोगित्वात्तिङन्तप्रतिरूपक इति ॥ यदि पुनरेकान्तद्योतकः स्याच्छब्दोऽयं स्यात्तदा स्यादस्तीति वाक्ये स्यात्पदमनर्थकं स्यात् अनेकान्तद्योतकत्वे तु स्यादस्ति कथञ्चिदस्तीति स्यात्पदात् कथ-

If a thing absolutely exists, it exists altogether, always, everywhere, and for everybody, and no one at any time or place would ever make an effort to obtain or avoid it, as it would be absurd to treat what is already present as an object to be obtained or avoided. But if it be relative (or indefinite), the wise will concede that at certain times and in certain places any one may seek or avoid it. Moreover, suppose that the question to be asked is this,—'Is *being* or *non-being* the real nature of the thing?' The real nature of the thing cannot be *being*, for then you could not properly use the phrase 'It is a pot' (*ghaṭo'sti*), as the two words 'is and' pot' would be tautological; nor ought you to say 'it is not a pot,' as the words thus used would imply a direct contradiction; and the same argument is to be used in other questions.* As it has been declared:

It must not be said 'it is a pot,' since the word 'pot' implies 'is';

Nor may you say' it is not a pot,' for existence and non-existence are mutually exclusive, &c.

The whole is thus to be summed up. Four classes of our opponents severally hold the doctrine of existence,—non-existence,—existence and non-existence successively,—and the doctrine that everything is inexplicable (*anirvachaníyatá*†), three other classes hold one or other of the three first theories, combined with the fourth.‡ Now when they meet us with the scornful questions, 'Does the thing exist?' &c. we have an answer always possible, 'It exists in a certain way,' &c. and our

* Thus Govindánanda applies it (*Ved. Sút.* ii. 2. 33,) to 'may be it is one,' 'may be it is many,' &c.

† 'Ακαταληψία. This is Śriharsha's tenet in the *Khaṇḍana-khaṇḍa-khádya*.

‡ In p. 42 l. 17 for °मतेनामिश्रितानि read °मतेन मिश्रितानि.

ञ्चिदिति अयमर्थो लभ्यत इति नानर्थक्यम् । तदाह स्याद्वादः सर्व्वथैकान्तत्यागात् किंवृततद्विधेः । सप्तभङ्गिनयापेक्षो हेयादेयविशेषकृदिति ॥ यदि वस्त्वस्त्येकान्ततः सर्व्वथा सर्व्वदा सर्व्वत्र सर्व्वात्मनास्तीति न उपादित्साजिहासाभ्यां क्वचित् कदा केनचित् प्रवर्त्येत निवर्त्येत वा प्राप्तप्रापणीयत्वहेयहानानुपपत्तेश्च । अनेकान्तपक्षे तु कथञ्चित् क्वचित् केनचित् सत्त्वेन हानोपादाने प्रेक्षावतामुपपद्येते । किञ्च वस्तुनः सत्त्वं स्वभावः असत्त्वं वेत्यादि प्रष्टव्यं न तावदस्तित्वं वस्तुनः स्वभाव इति समस्ति घटोऽस्तीत्यनयोः पर्य्यायतया युगपत्प्रयोगायोगात् नास्तीति प्रयोगविरोधाच्च एवमन्यत्रापि योज्यं यथोक्तम् । घटोऽस्तीति न वक्तव्यं सन्नेव हि यतो घटः । नास्तीत्यपि न वक्तव्यं विरोधात् सदसत्त्वयोरित्यादि तस्मादित्थं वक्तव्यं सदसत्सदसदनिर्व्वचनीय-

Digitized by Google

opponents are all abashed to silence, and victory accrues to the holder of the *Syád-váda*, which ascertains the entire meaning of all things. Thus said the teacher in the *Syádváda-manjarí*:

"A thing of an entirely indeterminate nature is the object only of the omniscient; a thing partly determined is held to be the true object of scientific investigation.* When our reasonings based on one point proceed in the revealed way, it is called the revealed *Syád-váda*, which ascertains the entire meaning of all things.'

"All other systems are full of jealousy from their mutual propositions and counterpropositions; it is only the doctrine of the Arhat which with no partiality equally favours all sects."

The Jaina doctrine has thus been summed up by Jinadatta-súri:

"The hindrances belonging to vigour, enjoyment, sensual pleasure, giving and receiving,—sleep, fear, ignorance, aversion, laughter, liking, disliking, love, hatred, want of indifference, desire, sorrow, deceit,—these are the eighteen 'faults' (*dosha*) according to our system.† The divine Jina is our Guru, who declares the true knowledge of the *tattwas*. The path ‡ of emancipation consists of knowledge, intuition, and conduct. There are two means of proof (*pramáṇa*) in the *Syád-váda* doctrine,—sense-perception and inference. All consists of the eternal and the non-eternal; there are nine or seven *tattwas*. The *jíva*, the *ajíva*, merit and demerit, *ásrava*, *samvara*, *bandha*, *nirjará*, *mukti*,—we will now explain each. *Jíva* is defined as intelligence; *ajíva* is all other than it; merit means bodies which arise from good actions, demerit the opposite; *ásrava* is the bondage of actions,* *nirjará* is the unloosing thereof; *moksha* arises from the destruction of the eight forms of *karman* or 'action.' But by some teachers 'merit' is included in *samvara*,† and 'demerit' in *ásrava*.

"Of the soul which has attained the four infinite things‘ and is hidden from the world, and whose eight actions are abolished, absolute liberation is declared by Jina. The Śwetámbaras are the destroyers of all defilement, ‡ they live by alms, § they pluck out their hair, they practise patience, they avoid all association, and are called the Jaina *Sádhus*. The Digambaras pluck out their hair, they carry peacock's tails in their hands, they drink from their hands, and they eat upright in the giver's house,—these are the second class of the Jaina Ṛishis.

"A woman attains not the highest knowledge, she enters not Mukti,—so say the Digambaras; but there is a great division on this point between them and the Śwetámbaras."¶ E. R. C.

* In p. 43. l. 2 for न यस्य read नयस्य.

† This list is badly printed in the Calcutta edition. It is really identical with that given in Hemachandra's *Abhidhána-chintámaṇi*, 72, 73; but we must correct the readings to *antaráyás*, *rágadweshâv aviratiḥ smaraḥ*, and *háso* for *himsá*. The order of the 18 *doshas* in the Calcutta edition, is given by Hemachandra as 4, 5, 1, 2, 3, 10, 1112, 7 9 17, 16, 18, 8, 6, 15, 13, 14.

‡ In p. 43. l.13 for वर्तिनि read वर्तिनिः

* This seems corrupt,—a line is probably lost.

† Does this mean the knowledge of the world, the soul, the liberated and liberation? These are called *ananta*, see Weber's *Bhagavatí*, p 250, 261-6.

‡ In last line for संस्रवे read संवरे.

§ In p. 44. l. 3 for भैक्षमुजो read भैक्षभुजो

¶ *Sarajoharaṇáh* is explained by the *rajoharaṇadhárin* (=*vratin*) of Haláyudha, ii. 189.

‡ Cf. Wilson, *Essays*, i. 340. For *strím* read *strí*.

वादभेदेन प्रतिवादिनश्चतुर्विधाः पुनरप्यनिर्व्वचनीयमतेनाश्रितानि सदसदादिमतानीति त्रिविधाः तान् प्रति किं वस्त्वस्तीत्यादिपर्य्यनुयोगे कथञ्चिदस्तीत्यादिप्रतिवचनसम्भवेन ते वादिनः सर्व्वे निर्व्विवाः सन्तः तूष्णीमासत इति सम्पूर्णार्थविनिश्चायिनः स्याद्वादमङ्गीकुर्व्वतस्तत्र तत्र विजय इति सर्व्वमुपपन्नम् । यदवोचदाचार्य्यः स्याद्वादमञ्जर्य्याम् अनेकान्तात्मकं वस्तु गोचरं सर्व्वसंविदाम् । एकदेशविशिष्टोऽर्थो नयस्य विषयो मतः ॥ न्यायानामेकनिष्ठानां प्रवृत्तौ श्रुतिवर्त्मनि । सम्पूर्णार्थविनिश्चायि स्याद्वस्तु श्रुतमुच्यत इति ॥ अन्योन्यपक्षप्रतिपक्षभावाद्यथापरे मत्सरिणः प्रवादाः । नयानशेषानविशेषमिच्छन्नपक्षपाती समयस्तथार्हत इति ॥ जिनदत्तसूरिणा जैनं मतमित्थमुक्तम् । बलभोगोपभोगानामुभयोर्दानलाभयोः । अन्तरायस्तथा निद्रा भीरज्ञानं जुगुप्सितम् ॥ हिंसा रत्यरतो रागद्वेषौ रतिरतिस्मरः । शोको मिथ्यात्वमेतेऽष्टादश दोषा नयस्य सः । जिनो देवो गुरुः सम्यक्तत्त्वज्ञानोपदेशकः ॥ ज्ञानदर्शनचारित्राण्यपवर्गस्य वर्त्तिनी । स्याद्वादस्य प्रमाणे द्वे प्रत्यक्षमनुमापि च ॥ नित्यानित्यात्मकं सर्व्वंनवतत्त्वानि सप्त वा । जीवाजीवौ पुण्यपापे चास्रवः संवरोऽपि च ॥ बन्धो निर्जरणं मुक्तिरेषां व्याख्याधुनोच्यते । चेतनालक्षणो जीवः स्यादजीवस्तदन्यकः ॥ सत्कर्म्मपुद्गलाः पुण्यं पापं तस्य विपर्य्ययः । आस्रवः कर्म्मणां बन्धो निर्जरस्तद्वियोजनम् ॥ अष्टकर्म्मक्षयान्मोक्षोऽथान्तर्भावश्च केश्चन । पुण्यस्य संस्रवे पापस्यास्रवे क्रियते पुनः । लब्धानन्तचतुष्कस्य लोकागढस्य चात्मनः । क्षीणाष्टकर्म्मणो मुक्तिर्निर्व्यावृत्तिर्जिनोदिता ॥ सरजोहरणा भैक्ष्यभुजो लुञ्चितमूर्द्धजाः । श्वेताम्बराः क्षमाशीलाः निःसङ्गा जैनसाधवः ॥ लुञ्चिताः पिच्छिकाहस्ताः पाणिपात्रा दिगम्बराः । ऊर्ध्वाशिनो गृहे दातुर्द्वितीयाः स्युर्जिनर्षयः ॥ भुङ्क्ते न केवलं यः स्त्रीं मोक्षमेति दिगम्बरः । प्राहुरेषामयं भेदो महान् श्वेताम्बरैः सहेति ॥ इति सर्व्वदर्शनसङ्ग्रहे आर्हतदर्शनम् ॥

Digitized by Google

THE

ŚULVASÚTRA OF BAUDHÁYANA,

WITH THE COMMENTARY BY DVÁRAKÁNÁTHAYAJVAN

(Continued from page 22.)

अपि वा गार्हपत्याहवनीययोरन्तरालं पञ्चधा षोढा वा संभुज्य षष्ठं सप्तमं वा भागमागन्तुकमुपसमस्य समं त्रेधं विभज्य पूर्वस्मादन्त्याद् द्वयोर्भागयोर्लक्षणं करोति गार्हपत्याहवनीययोरन्तौ नियम्य लक्षणेन दक्षिणापायम्य लक्षणे शङ्कुं निहन्ति तद्दक्षिणाग्नेरायतनं भवति । ६८

Or else divide the space between áhavaníya and gárhapatya either into five or into six parts, add a sixth or seventh part (according to the division you have preferred) and divide the whole into three parts; then measuring from the pole standing at the east end (śaṅkoh has apparently to be supplied; antât would be preferable to antyât; but all MSS. have the latter reading) make a sign at the second part (the sign is of course to be made on a cord), fasten the two ends of the cord at the (poles marking the centre of the) gárhapatya and the áhavaníya, stretch the cord towards south taking it at the mark and fix a pole on the spot which the mark touches; this is the place of the dakshiṇágni.

संभुज्य संवेष्ट्यागन्तुकमधिकं प्रक्षिप्य समं सर्वं द्वयोर्भागयोरिति । तयोर्गार्हपत्याहवनीयमध्यशङ्कोर्दक्षिणाग्नेरायतनं मध्यं भवति । विपर्यस्योत्करः ।

अपि वा प्रमाणं पञ्चमेन वर्धयेत्तत्सर्वं पञ्चधा संभुज्यापरस्मादन्त्याद् द्वयोर्भागयोर्लक्षणं करोति पृष्ठ्यान्तयोः पाशौ प्रतिमुच्य लक्षणेन दक्षिणापायम्य लक्षणे शङ्कुं निहन्ति तद्दक्षिणाग्नेरायतनं भवति । ६९

Or else increase the measure by its fifth, divide the whole into five parts and make a mark at the end of two parts, measuring from the western end; fasten the ties at the ends of the prishṭhyá-line and stretch the cord towards the south taking it by the mark; fix a pole at the place touched by the mark. This is the place of the dakshiṇa agni.

लक्षणे शङ्कुं निहन्ति । पूर्वस्मादन्त्याद् भागद्वये ऽतीते ।

विपर्यस्यैतेनोत्करो व्याख्यातः । ७०

Thereby the utkara is explained; only the cord has to be stretched towards the opposite side (the north)

पूर्वोत्तरकल्पयोः साधारणमिदम् । दक्षिणतो विषुवत्यन्वाहार्यपचनस्येति कल्पोक्तो ऽप्यनुसंधेयः । तथा सति उत्तरतो मध्य उत्करः ।

¹. A. B. °गंतुमुप°

अपरेणाहवनीयं यजमानमात्री भवतीति दार्शपौर्णमासिक्याया वेदेर्विज्ञायते । ७१

"It is to the west of the áhavaníya, of the measure of the sacrificer" this is the tradition for the vedi of the darsapúrnamása-sacrifice.

The práchí of this vedi is 96 aṅgulis long.

यजमानमात्री षण्णवत्यङ्गुला । तस्या मानमाह ।

तस्यास्त्रिभागोनं पश्चात्तिरश्ची तस्या एवार्धं पुरस्तात्तिरश्च्येवं दीर्घचतुरस्रमेकतो ऽणिमद्विहृत्य स्रक्तिषु शङ्कून्निहन्यात् । ७२

The western side (of this vedi) is of that length less a third part (96—32=64), the eastern side of half the length (48 aṅg.); thus having made an oblong which is shorter on one side (see S. 55.) poles are to be fixed on its four corners.

त्रिभागोनं चतुःषष्ट्यङ्गुलानि । तस्या एवार्धमष्टाचत्वारिंशदङ्गुलानि ।

अष्टषष्टिशते सूत्रे चतुर्विंशे निरञ्छनम् ।
द्वात्रिंशे चतुःसप्तत्यां संख्येयान्यङ्गुलानि तु ॥
षण्णवत्यङ्गुला पृष्ठ्या प्रथमेनांसयोर्मितिः[1] ।
श्रोण्योर्द्वितीयेन मानमेवमेकतः[2] - - - - ॥
तस्या नमनमाह ।

यावती पार्श्वमानी द्विरभ्यस्ता तावतीं रज्जुमुभयतः पाशां कृत्वा मध्ये लक्षणं करोति दक्षिणयोः पाशौ प्रतिमुच्य लक्षणेन दक्षिणापायम्य लक्षणे शङ्कुं निहन्यात्तस्मिन्पाशौ प्रतिमुच्य लक्षणेन दक्षिणं पार्श्वं परिलिखेत् । ७३

Take a cord the length of which is double the length of one of the long sides of the vedi (northern and southern sides), make ties at both its ends and a mark at its middle, fasten the ties at the two southern poles (the poles standing on the southeast and southwest corners of the vedi), stretch the cord towards the south, having taken it by the mark and fix a pole on the mark. Then fastening both ties at this pole, draw the cord with the mark round the southern side of the vedi.

The cord being fastened with both ties at the pole and being thus doubled up is stretched to the southeast corner of the vedi and then moved towards west, until it touches the southwest corner. Of course the

¹ C. °योर्नतिः

² Corrupt passage. A. °मेक्रतः स्वक्रपर्णाः. B. °मेकतः स्वपर्णाः. C °मेक्रा तः स्वर्णाः.

middle of the cord, marked by the lakshaṇa, describes in this way a part of a circle. This forms then the southern side of the vedi taking the place of the straight line which joins the dakshiṇa aṅsa and the dakshiṇa śroṇí.

यावती दक्षिणपार्श्वमानी परिलिखेत् । दक्षिणायाः श्रोणेर्दक्षिणमंसमालिखेत् ।

एतेनोत्तरं पार्श्वं व्याख्यातम् । ७४

Thereby the northern side is explained.

यावती पार्श्वमानीत्यादिना ।

पूर्वं पार्श्वं तया द्विरभ्यस्तया परिलिखेदेवमपरम् । ७५

In the same way the east and west-side are to be circumscribed with a cord of the double length.

तिर्यङ्मान्योरपि द्विगुणीकृत्य मध्ये लक्षणं कृत्वा श्रोण्यंसयोश्चान्तौ नियम्य पश्चात्पुरस्ताच्चापच्छिन्द्यादिति द्रष्टव्यम् । अपरिमिता वा यथासन्नानि हवींषि संभवेदेवं तिरश्ची प्राञ्चौ वेद्यंसावुन्नयति प्रतीची श्रोणी पुरस्तादंहीयसी पश्चात्प्रथीयसी मध्ये संनततरा भवतीति कर्मान्ते पक्षान्तरमप्यस्ति तदप्यनुसंधेयम् । अपरिमिता षण्णवत्यङ्गुलादधिका । यथासन्नानि हवींषि संभवेत् । प्रकृतिषु संगृह्णीयात् । प्राञ्चौ वेद्यंसावुन्नयति । आहवनीयस्य परिग्रहणाय । प्रतीची श्रोणी । गार्हपत्यस्य परिग्रहणाय । पुरस्तात् श्रोणीप्रमाणात् संकुचिता । पश्चादंसप्रमाणाद्वितता । मध्ये ऽतिकृशा । दक्षिणोत्तरायतं गार्हपत्यागारम् । आहवनीयागारं पूर्वापरायतम् तत्र वेदिकरणात् । आहवनीयस्य पुरस्तात्त्रिप्रक्रममवशिष्य सभ्यागारम् । एवमावसथीयस्य गृहम् । यावति कृष्णमृग उपविशेत् तावदपरार्धोर्ध्वंगते[1] विहार इति कर्मान्त उक्तम् ।

दशपदा पश्चात्तिरश्ची द्वादशपदा प्राच्यष्टापदा पुरस्तात्तिरश्चीति पाशुबन्धिकाया वेदेर्विज्ञायते मानयोगस्तस्या व्याख्यातः । ७६

"The western side is ten padas long, the práchí twelve padas, the eastern side eight padas" that is the tradition for the vedi of the paśubandha-sacrifice; it has been explained how the joining of the measures takes place.

अथापरं प्रमाणादध्यर्धामित्यादिना ।

रथसंमितेत्येकेषाम् । ७७

According to the opinion of others this vedi is to be measured with the measures of a chariot (aksha, íshá and yuga; see S. 10-12.)

[1] The reading is doubtful. A. B. °पराध्वंयोर्ध्वंगते, C. °परार्धायोर्ध्वंगते.

मतमिति शेषः । रथाक्षमात्री पश्चात्तिर्यक् । ईषया प्राची । त्रिपथयुगेन पुरस्तादित्यादि द्रष्टव्यम् । त्रिपथयुगं षडशीत्यङ्गुलम् । चतुर्निमिता वा ।

विराट्संपन्नेत्येकेषाम् । ७८

According to another opinion its sides are to have the length of ten padas each.

मतम् । सर्वतो दशपदा वा ।

शु° मी° दशाक्षरा विराडिति व्यवहाराद् विराट्शब्दो दशसंख्यापरस्ततश्च सर्वतो दशपदेत्यर्थः ।

शम्यामात्री चतुःस्रक्तिर्भवतीत्युत्तरवेदेर्विज्ञायते । ७९

"It has the measure of a śamyá and is four-cornered" this is the tradition for the uttaravedi.

अन्ततो हि देवानामाधीयत इति श्रुतेः । पूर्वान्ते यूपावटस्यार्धप्रक्रममवशिष्योत्तरवेदिः । षट्त्रिंशदङ्गुला शम्या । उत्तरयुगप्रमाणेनोत्तरनाभिस्त्रयोदशाङ्गुलेन ।

समचतुरस्राविशेषात् । ८०

It is a square as no particular rule is given.

सार्वत्रिको ऽयं विधिः । यत्र विशेषश्रुतिर्विधिर्नास्ति तत्र सर्वत्र समचतुरस्रकरणम् ।

त्रितृतीया वेदिर्भवतीति पैतृक्यावेदेर्विज्ञायते । ८१

"The vedi is to be formed with the third part," that is the tradition for the vedi of the pitṛiyajna.

The meaning is: The vedi of the pitṛiyajna is to be formed with the third part of the side of the mahávedi (the dimensions of which will be given in S. 90) so that its area will be equal to the ninth part of the mahávedi.

त्रितृतीया भागाद्यरूपेण (?) विभज्य महावेदेर्नवमभागेनेत्यर्थः । तस्य ग्रहणोपायमाह ।

शु° मी° सौमिक्रीमहावेदित्रितृतीया । त्रिधा विभक्तस्य स्वक्षेत्रस्यैकभागतृतीयांशरूपा । महापितृयज्ञप्रमाणमित्यर्थः ।

महावेदेस्तृतीयेन समचतुरस्रकृतायास्तृतीयकरणी[1] भवतीति[2] नवमस्तु भूमेर्भागो भवति[3] । ८२

Before venturing on a translation of this difficult sútra I give the explanations of the commentaries.

अष्टाविंशत्यूनं पदसहस्रं महावेदिः । तस्याः समचतुरस्रकृतायाः करणी एकत्रिंशत्पदमङ्गुलद्वयं षड्विंशतिति-

[1] The Śulvámím. reads: °कृतायाः करणी तृतीय°

[2] M. भवति

[3] M. C. भवतीति

लाश्च । तस्यास्तृतीयेन समचतुरस्रकृतायाः—[1] करणी दश पदानि पञ्चाङ्गुलमेकत्रिंशत्तिलास्तृतीयकरणी भवति महावेद्या भूमेर्नवमभागो भवति । समचतुरस्रकृताया महावेद्याः करण्यास्तृतीयेन समचतुरस्रकृताया भूमेः करणीत्यन्वयः । अथ ज्ञानप्रकारः । अष्टाविंशत्यूनपदसहस्रं पञ्चदशाङ्गुलस्य पदस्य वर्गेण पञ्चविंशत्यधिकशतद्वयेन हत्वा लब्धं चतुस्त्रिंशत्प्रमाणस्याङ्गुलस्य वर्गेण षट्पञ्चाशदङ्गुलाधिकसहस्रेण हत्वा तस्य जातं २५२८१७२०० । तस्य मूलमानीय लब्धं चतुस्त्रिंशता विभजेत् । लब्धाङ्गुलानि ४६० तिलाश्च २६ भवन्ति । तत्र तिलांस्त्यक्त्वापयित्वा पञ्चदशभिरङ्गुलीभिर्विभजेत् । तान्येकत्रिंशत्पदान्यङ्गुलद्वयं षड्विंशतितिलाश्च भवन्ति । पुनस्त्रिभिर्विभक्ते[2] तृतीयकरणी भवति । एवं कृत अष्टोत्तरशतं नवमो भागो भवति ।

शु॰ मी॰ अष्टविंशतत्यूनसहस्रपदक्षेत्राया महावेदेस्समचतुरस्रकृतायाः करण्याष्षड्विंशतितिलाधिकद्व्यङ्गुलोत्तरैकत्रिंशत्पदप्रमाणायास्तृतीयेन भागेन समचतुरस्रीकृताया भूमेः करणी तृतीयकरणीति । तया मीयमाने महावेदिभूमेर्भाग अष्टोत्तरशतपदक्षेत्रात्मकस्सिध्यतीत्यर्थः ।

According to these commentaries the translation of the sútra would be as follows:—The side ("karaṇí" to be supplied according to the Śulvadípiká; the Śulvamímánsá has it in the text of the sútra) of that area ("bhúmeḥ" to be supplied) which is made a square with the third part of the mahávedi (which has been turned itself into a square previously) is the tritíyakaraṇí; the ninth part (of the mahávedi) is produced (by making a square with this tritíyakaraṇí).

This explanation is certainly wrong. In the first place the word "karaṇí", which the Śulvadípiká supplies could not be missed in the text of the sútra and it seems that it has been inserted into that recension of the sútras, which is represented by the Śulvamímánsá, from this very reason. In the second place the commentators give here to the word "tritíyakaraṇí" a meaning, which cannot possibly be attributed to it. They interpret it as "the line which is the third part (of the side of the mahávedi)", but that line is called the navamakaraṇí, as its square is equal to the ninth part of the area of the mahávedi; tritíyakaraṇí can only mean the line which produces (or the square of which is) the third part (of some area).

(The calculation resorted to by the Śulvadípiká, which turns the 972 square-padas of the mahávedi into square-aṅgulis and these square-aṅgulis into square-tilas, extracts the square root of the result, turns the tilas, the number of which is indicated by the squareroot, into padas by dividing the squareroot by 34 and 15, and finally divides the result by 3, is of course more than the author of the Sútras would have been able to do; he would simply have divided the side of the square, equal to the mahávedi, into three parts).

To arrive at the right understanding of the sútra we must consider, by what method the task of constructing the paitrikyá vedi could be accomplished in the shortest way. The thing was to construct a square the area of which would be equal to the ninth part of the mahávedi, that is: equal to 108 square-padas, the area of the mahávedi amounting to 972 square-padas. If 108 would have yielded an integral square-root, the matter would have been easy enough; but this not being the case another method had to be devized. At first sight it seems to be the easiest way to make a square of the area of 972 square padas and to take the third part of this square's side. (as we have seen above, the commentators proceed in this manner). But to make a square of 972 padas was a rather complicated thing. We can imagine several ways in which the Sútrakára might have attained this end. He might have constructed a square, of which the side was 31 padas long and the area consequently 961 square-padas; to this square another square of 11 square-padas was then added by chaturasra-samása. Or he might have constructed an oblong of 36 padas by 27 padas ($36 \times 27 = 972$) and turned this oblong into a square. But all these operations required much work and time and a shorter process could not but be highly welcome Now the third part of 972 is 324 and the square-root of 324 is exactly 18; in other words the side of a square of 324 square-padas is eighteen padas. Accordingly, instead of trying to find the navamakaraṇí of 972, he tried to find the tritíyakaraṇí of 324 and this latter operation is an exceedingly simple and short one. Draw a straight line a b on the ground (about 12 padas long) and make a mark at the distance of six padas from a. Construct a square a c d f on a c. Stretch a cord, fastened at a, from a to f and draw it then from af into the position ag; then the line or the cord dg is the required tritíyakaraṇí (the square of $ac = 6$ is 36; the square of a f is $2 \times 36 = 72$; therefore the square of dg is equal to $72 + 36 = 108$, for dg is the diagonal of an oblong, of which ac and af are the sides).

[1] A lacuna marked in B. only. It seems that we have to supply: भूमे:

[2] The MSS. read पुनर्नवभिर्विभक्ते, but the contet requires त्रिभिः



$ac = \sqrt{36}$

$af = \sqrt{72}$

$dg = \sqrt{108}$

After these considerations it is clear how the sútra is to be translated :

The tritíyakaraṇí of that area which is made a square with the third part of the mahávedi (i. e. of a square of 324 padas) is it (vid. the side of the paitṛikyá vedi) ; the result is the ninth part of the area (of the mahá-vedi).

यजमानमात्री चतु:स्रक्तिर्भवतीत्येकेषाम् । ८३

"It has the measure of the sacrificer and is four-cornered" this is the opinion of others.

मतम् । षण्णवत्यङ्गुला ।

शु॰ मी॰ सर्वत: षण्णवत्यङ्गुलेत्यर्थ: ।

दिक्षु स्रक्तयो भवन्ति । ८४

The four corners are turned towards the four directions

महादिक्षु स्रक्तय: । दक्षिणाप्राक्पृष्ठ्या । अत्र लघूपायमाह कात्यायन: । पैतृक्यां द्विपुरुषचतुरस्रं कृत्वा करणीमध्येषु शङ्कव: समाधिरिति । तत्र प्रकार: । अन्वाहार्यपचनमग्रेण संचरमवशिष्य पुरुषद्विकरण्या दशतिलोनया सप्ततिशताङ्गुलया त्रितृतीयद्विकरण्या अर्धाधिकविंशतिशतद्वयाङ्गुलया वा समचतुरस्रं कृत्वा करणीनां मध्ये शङ्कून्निहत्य प्रमाणाद्द्विगुणयो रज्ज्वो: पाशान्पूर्वापरयो: प्रतिमुच्य तयोर्मध्यं दक्षिणोत्तरयोर्नियम्य बहि:स्पन्द्यमपच्छिन्द्यात् । हविरासादनसौकर्यार्थं पञ्चारत्निर्वा यजमानमात्री ।

वेदितृतीये यजेतेति सौत्रामणिकीं वेदिमभ्युपदिशन्ति । ८५

"He is to sacrifice on the third part of the vedi" thus they teach concerning the vedi of the sautrámaṇí-sacrifice.

त्रीणि चतुर्विंशाधिकानि पदशतानि वेदितृतीयम् ।

महावेदेस्तृतीयेन समचतुरस्रकृताया अष्टादशपदा पार्श्वमानी भवति । ८६

The side of that area which is formed into a square with the third part of the mahávedi is eighteen padas long.

महावेदेस्तृतीयेन चतुर्विंशत्यधिकशतत्रयपदेन समचतुरस्रकृताया भूमेरष्टादशपदा करणी भवति । सापि वेदितृतीयसमचतुरस्रकरणी । चतुर्विंशत्यधिकशतत्रयस्य मूलमष्टादश पदानीत्यर्थ: । सौत्रामण्या: पशुबन्धप्रकृतित्वाद्विराट्संपन्ना वा कार्या । तत्र सप्तविंशत्यङ्गुलं प्रवृद्धं पदम् । तेन दशपदा ।

तस्यै दीर्घकरण्यामेकतोऽणिमत्करण्यां च याथाकामीति । ८७

There is liberty regarding the side (lit. the cord) producing an oblong and the side making that oblong smaller on one side.

(I adopt the reading "tasyai" which is found in M. and in the Śulvamímánsá, where it is explained: Shashṭhyarthe chaturthí tasyás sautrámaṇívedyáh ; A. B. C. read "tasyaiva" in the text of the sútra and "tasyáh" without any further explanation in the commentary. I do not follow the dípiká in its opinion about "cha".)

The meaning of the sútra is : instead of giving to the sautrámaṇí-vedi the form of a square we may give to it the form of an "oblong which is shorter on one side" and the area of which is equal to the third part of the mahávedi. As we see from the commentary and from the corresponding passages in Ápastamba this could be done in two ways. Either the tṛitíyakaraṇí of a pada (or prakrama) was found and then by using this pada-tṛitíyakaraṇí instead of the pada, the sautramaṇíki vedi was constructed exactly in the same manner as the mahávedi ; or the measures prescribed for the mahávedi (which will be given in S. 90 ; 36 padas for the práchí, 30 padas for the western side, 24 padas for the eastern side) were divided by three (12 p. 10 p. 8 p.) ; but then, the third part of a line being the navamakaraṇí, the padatṛikaraṇí had to be employed instead of the pada.

तस्या दीर्घकरण्यामथवैकतोऽणिमत्करण्यां दीर्घकरण्यामित्यर्थ: । चकार: पूर्वेण समचतुरस्रधर्मेण समुच्चयार्थ: । एकतोऽणिमद्दीर्घचतुरस्रं वा कुर्यादित्यर्थ: । पदप्रक्रमप्रमाणानामन्यतमत्रिकरण्याष्टिकद्दशिके तिर्यङ्मान्यो द्वादशिका पृष्ठ्या । अन्यतमतृतीयकरण्या वा त्रिंशत्पदानीत्यादि । सौमिकवेदिवन्मानम् । तत्र दशाङ्गुलस्य पदस्य तृतीयकरणी पञ्चाङ्गुलय: सार्धसप्तत्रिंशाश्च तिला: । तत्त्रिगुणा त्रिकरणी । द्वादशाङ्गुलस्य षडङ्गुलयो द्वात्रिंशत्तिलाश्च । तत्त्रिगुणा त्रिकरणी । पञ्चदशाङ्गुलस्य पदस्य

[1] A. B. C. तत्र महा॰

चयोर्विंशतितिलसहिता अष्टाङ्गुला तृतीयकरणी[1] । तत्त्रिगुणा त्रिकरणी । एवं प्रक्रमाणामपि द्रष्टव्यम् । सोमिकात्प्रक्रमात्तृतीयो ऽंश: प्रक्रम: स्यात्तेन वेदिं विमिमीत इति काठकाग्नीनामुक्तम् । तस्यार्थ: । सोमिकात्प्रक्रमपरिमितक्षेत्रात्तृतीयो ऽंशो यस्तस्य करणी प्रक्रमस्य तृतीयकरणीत्यर्थ: ।

प्राग्वंश: षोडशप्रक्रमायामो द्वादशव्यास अपि वा द्वादशप्रक्रमायामो[2] दशव्यास[3]: । ८८

The pragvanśa has the length of sixteen prakramas and the breadth of twelve, or else the length of twelve prakramas and the breadth of ten.

साग्निके षोडश । अन्यत्र द्वादशेति व्यवस्थया विकल्पमिच्छन्ति केचित् ।

तस्य मध्ये द्वादशिको विहार: । ८९

In the middle of the prágvanśa is the vihára (the space between the sacrificial fires), twelve prakramas long.

षोडशप्रक्रमपक्षे द्वादशप्रक्रमप्रमाणक: । प्रक्रमद्वयेन गार्हपत्यादीन्यायतनानि कुर्यादित्यर्थ: । आग्न्याधेयिकान्यपि प्रक्रमद्वयेनेति केचित् । पश्चात्पुरस्ताच्च संचरार्थं प्रक्रमद्वयम् । मध्ये ऽष्टौ प्रक्रमा: । अपरेणाहवनीयं यजमानमात्री वेदि: । वेदे: पश्चात्परिशिष्टो विशय: ।

त्रिंशत्पदानि प्रक्रमा वा पश्चात्तिरश्ची भवति षट्त्रिंशत्प्राची चतुर्विंशति: पुरस्तात्तिरश्चीति महावेदेर्विज्ञायते मानयोगस्तस्या व्याख्यात: । ९०

"The western side is thirty padas or prakramas long, the práchí thirty-six, the eastern side twenty-four" this is the tradition for the mahávedi (the vedi used at the somasacrifices); it has been explained how it is to be measured out.

प्रमाणादध्यर्धा रज्जुमित्यादिना । एतदुक्तं भवति । षट्त्रिंशिकायामष्टादशोपसमस्यापरस्मादन्ताद् द्वादशसु लक्षणं पञ्चदशसु लक्षणम् । पृष्ठ्यान्तयोरन्तौ नियम्य पञ्चदशिकेन श्रोणी द्वादशिकेनांसाविति ।

आहवनीयात्षट् प्रक्रमान्महावेदि: । ९१

The mahávedi is six prakramas from (to the east from) the áhavaníya.

आहवनीयमध्यादारभ्य षट्प्रक्रमसंचरं त्यक्त्वा महावेदेरारम्भ: । प्रक्रमशब्द: पदस्याप्युपलक्षणम् ।

तत एकस्मिन्त्सद: । ९२

One prakrama (to the east) from there (from the beginning of the mahávedi) is (the beginning of the sadas)

तत्रैवारम्भ: ।

तद्दशकम् । ९३

The measure of the sadas (from the west to the east) is ten prakramas.

पूर्वापरेण ।

शु° मी° तत्सद: पूर्वापरेण दशपदप्रमाणं दशप्रक्रमप्रमाणं वा ।

उदक्सप्तविंशत्यरत्नय: । ९४

Its measure from the south to the north is twenty-seven aratnis.

प्रक्रमपक्षे दक्षिणोत्तरेण सप्तविंशत्यरत्नय: ।

अष्टादशेत्येकेषाम् । ९५

Eighteen aratnis according to another opinion.

उदगित्येव । पदमानपक्षे ऽष्टादशारत्नय: । पृष्ठ्याया दक्षिणतो ऽर्धमुत्तरतो ऽर्धम् । अपि वा द्वौ भागावुदक्स्पन्द्यायै स्यातामेको दक्षिणत इति पक्षो ऽपि । प्रक्रमपक्षे वेद्यवयत्वात्सदसो बहिर्भावायोगात् ।

ततश्चतुर्षु हविर्धानं तद्दशकं द्वादशकं वा समचतुरस्रं मानयोगस्तयोर्व्याख्यात: । ९६

Four prakramas (to the east) from there is the havirdhána, a square of ten or twelve prakramas; the measurement of those squares has been explained.

प्रमाणादध्यर्धामित्यादिना । सदस उदीची पृष्ठ्या ।

यूपावटीयाच्छङ्कोरर्धप्रक्रममवशिष्योत्तरवेदिं विमिमीते । ९७

Leaving half a prakrama to the west of the pole of the yupávaṭa he measures out the uttaravedi.

तस्या: प्रमाणमाह ।

शु°मी° एकतो ऽणिमद्दीर्घचतुरस्रात्मकाया वेदे: प्राक्तियेङ्मान्यामर्धे शङ्कुं निहन्यात् । स शङ्कुर्यूपावटीय इत्युच्यते । तस्य पश्चिमप्रदेशे ऽर्धप्रक्रममवशिष्य तत: पश्चिमप्रदेश उत्तरवेदिं विमिमीते ।

दशपदोत्तरवेदिर्भवतीति सोमे विज्ञायते मानयोगस्तस्या व्याख्यात: । ९८

---

[1] तृतीयकरणी wanting in the MSS.

[2] M. °दशक°

[3] A. B. C. अपि-व्यास: desunt.

"The uttaravedi has the measure of ten padas" this is the rule for the somasacrifices; its measurement has been explained.

सर्वतो दशपदा क्षेत्रतः शतपदा क्षेत्रतो दशपदा वा । अत्र कात्यायनः । पदं तिर्यक् त्रिपदा पार्श्वमानी तस्याक्ष्णयारज्जुर्दशकरणी । दशपदोत्तरवेदिर्भवतीत्यत्रापि त्रितृतीया वेदिर्भवतीत्यत्रोक्तन्यायेन चतुर्दशतिलाभियुतमङ्गुलित्रयं पदत्रयं च[1] । करणीति केचित् । तां युगेन यजमानस्य वा पादैर्विमायेति वचनात् । युगमिति बाहुप्रमाण[2]माहुः । कल्पोक्तचतुष्पदमानमपि लभ्यते । तस्मिन्पक्ष एकतो ऽणिमद्दीर्घचतुरस्रमुत्तरवेदिः । उत्तरस्मादंसात्त्रीन्प्रतीचः प्रक्रमान्प्रक्रम्योदञ्चं चतुर्थं प्रक्रम्य तच्चात्वालस्य मध्यं कुर्यात् ।

चात्वालः शम्यामात्रो ऽपरिमितो वा । ९९

The chátvála has the measure of a śamyá or it is of undefined measure.

उत्तरांसप्रभृतिभागतृतीये ऽतीत उदक्प्रक्रमे ऽतीत उत्करः । मध्यमादौत्तरवेदिकाच्छङ्कोरनुस्पन्द्यं षट् पदानि प्रक्रम्य दक्षिणा सप्तममित्यत्रोपरवदेशस्योत्तरकाल इत्यादि योजयितव्यम् ।

अथोपरवाः प्रादेशमुखाः प्रादेशान्तरालाः । १००

The uparavas have the length of a prádeśa each and the distance between two of them is a prádeśa.

पृष्ठ्याया दक्षिणतः प्रक्रमं विहाय दक्षिणहविर्धानस्याक्षस्य पुरस्तादनसो ऽधस्तादुपरवा भवन्ति । एषां समीपे ग्रावाणो एवं कुर्वन्तीत्युपरवाः ।

अरत्निमात्रं समचतुरस्रं विहृत्य स्रक्तिषु शङ्कून्निहन्यादर्धप्रादेशेनार्धप्रादेशेनैकैकं मण्डलं परिलिखेत् । १०१

(The uparavas are made in the following way) Make a square the sides of which are one aratni long, fix poles on its corners and describe circles (round these poles) taking half a prádeśa for radius.

प्रादेशमुखाः प्रादेशान्तराला भवन्तीति अत्यर्थः सिध्यति । उत्तरवेद्याः चतुष्पदादिप्रमाणविकल्पेष्वपि सर्वत्रोपरवदेशस्यैकरूप्यमापाद्यम् । पुरस्ताद्द्वितृतीयदेशात्स्तम्बयजुर्हरतीति स्तम्बयजुर्हरणदेशनियमादुपरवाणां कालात्स्तम्बयजुर्हरतीति वचनाच्च । अग्नावपि चतुरः प्रतीचः प्रक्रमान्प्रक्रामति दक्षिणा पञ्चममिति । पञ्चमान्त उपरवाणामुत्तरो ऽंसो ज्ञातव्यः । ज्योतिष्टोमे षट्प्रतीच इति वचनादग्नौ चतुरः प्रक्रमान्प्रतीच इति वचनात्सूत्रकारेण परित्यक्ताभ्यां सहोत्तरवेदिप्रमाणमग्नेः पूर्वापरा परित्यज्य पूर्वक्षेत्रं षट्त्रिंशधा विभज्य प्रक्रमवृद्धिः । प्राग्वंशमाने ऽप्याहवनीयार्थप्रक्रमद्वयं प्राग्वंशपूर्वापरा परित्यज्य पूर्वं षोडशधा विभज्य प्रक्रमवृद्धिः । दक्षिणोत्तरायतेष्वग्निषु सर्वं चतुर्विंशतिधा विभज्यैको भागः प्रक्रमः ।

सदसः पूर्वार्धाद् द्विप्रक्रममवशिष्य धिष्ण्यानां द्विप्रादेशो विष्कम्भस्तथान्तरालाः । १०२

At the distance of two prakramas from the eastern half of the sadas are the dhishṇyas, the diameter of which is two prádeśas; the spaces between them have the same lepgth.

पूर्वार्धात्प्रक्रमद्वये गते धिष्ण्यानां पूर्वावधिः । तेषां प्रादेशतो भ्रमः । पृष्ठ्यायां होत्रीयं तं दक्षिणेन प्रशास्त्रीयमुत्तरेण होत्रीयमितरानुदीच आयातयति ब्राह्मणाच्छंसिनः पोतुर्नेष्टुरच्छावाकस्येति ।

आग्नीध्रीयागारस्य पार्श्वमानी पञ्चारत्निः । १०३

The side of the ágnídhríya ágára (the covered place for the ágnídhra-fire) is five aratnis long.

महावेद्या उत्तरादंसादारभ्य उत्तरपार्श्वस्यार्धे गत आग्नीध्रीयागारं पञ्चारत्निसमचतुरस्रम् । तस्य दक्षिणा द्वारं कुर्वन्ति ।

शु°मी° महावेद्या उत्तरांसादारभ्य प्रतीच अष्टादश प्रक्रमान्मित्वा तत्राग्नीध्रस्यागारं सर्वतो पञ्चारत्निप्रमाणकम् । यथान्तर्वेद्यर्धं बहिर्वेद्यर्धं भवति तथा कुर्यात् ।

एतेन मार्जालीयो व्याख्यातः । १०४

Thereby the márjáliya is explained (i. e. its size is the same as that of the ágnídhríyágára and its place is fixed by a corresponding measurement on the south side of the mahávedi).

दक्षिणादंसादारभ्य दक्षिणपार्श्वमध्ये मार्जालीयमध्यम् । मार्जालीयागारो ऽपि पञ्चारत्निः समचतुरस्रः ।

तस्योदीचीं द्वारं कुर्वन्ति । १०५

The door of the márjálíyá is made on the northern side (that of the ágnídhríyágára is on the southern side).

तयोरागारमध्ययोर्मध्ये द्विप्रादेशावाग्नीध्रमार्जालीयौ ।

रथाक्षान्तराला यूपावटा भवन्तीत्येकादशिन्यां विज्ञायते । १०६

[1] च? A. B. C. तु.

[2] A. B. युगमपिवा प्रमा°

Digitized by Google

"The pits for the yúpas are an aksha (104 aṅg.) distant from each other," this is the tradition for the congregation of eleven (yúpas; i. e. for the case of eleven yúpas being prescribed).

तत्र प्रकारमाह ।

तस्या दशानां च रथाक्षाणामेकादशानां च पादानामष्टाङ्गुलस्य च चतुर्विंशं भागमाददीत स प्रक्रमः स्यात्तेन वेदिं विमिमीते । १०७

For this ekádaśiní take the twenty-fourth part of ten akshas, eleven padas and eight aṅgulis ; this is the prakrama ; with this prakrama the vedi has to be measured out.

The east side of the vedi had to be as long as the row formed by the eleven yúpas. Each yúpa was standing at the distance of one aksha from its neighbours, the diameter of each yúpávaṭa was one pada and the distance of the two yúpas standing to the right and to the left side of the middle yúpa was one aksha plus four aṅgulis. Twenty-four prakramas being prescribed as the length of the east-side of the vedi, the twenty-fourth part of 10 akshas + 11 padas + 8 aṅgulis had to be used instead of the common prakrama, whenever eleven yúpas were employed. This increased prakrama had the length of 50 aṅg. 18 til.

दशानां च रथाक्षाणां चत्वारिंशदधिकसहस्राङ्गुलानाम् । एकादशानां च पदानाम् । यूपावटविष्कम्भाणां पञ्चषष्ट्यधिकशताङ्गुलानाम् । अष्टाङ्गुलस्य च । कल्प एकादशिनीविंधावग्निष्ठस्य दक्षिणोत्तरेण यूपौ चतुरङ्गुलेन विप्रकृष्टौ भवत इत्युक्तम् । तस्मादष्टाङ्गुलस्य च । एतेषां त्रयाणां चतुर्विंशभागमष्टादशतिलसहितं पञ्चाशदङ्गुलमाददीत । गृह्णीयात् । स प्रक्रमः स्यात् । एकादशिनीवत्या महावेदेः । तेन वेदिं विमिमीते । त्रिंशत्पदानीत्यादि ।

अथाश्वमेधे विंशत्याश्च रथाक्षाणामेकविंशत्याश्च पदानामष्टाङ्गुलस्य च चतुर्विंशं भागमाददीत स प्रक्रमः स्यात्तेन वेदिं विमिमीते । १०८ ।

At the aśvamedha take the twenty-fourth part of twenty akshas, twenty-one padas and eight aṅgulis ; this is the prakrama ; therewith the vedi is to be measured out. (Twenty-one yúpas being required for the aśvamedha.)

पूर्वेण व्याख्यातम् । एकविंशतिर्यूपा भवन्तीति वचनात् । तस्य चैकादशिनीप्रकृतित्वादेवमुक्तम् । अत्र तिलचतुष्टयाधिकशताङ्गुलयः प्रक्रमः । तेन त्रिंशत्पदानीत्यादि । दक्षिणोत्तरैकादशिन्यामुक्तः ।

¹ A. B. C. °दक्षिणवि°

अथ प्राच्यैकादशिन्यां यूपार्थं वेदेः पूर्वार्धात्पदार्धव्यासमपच्छिद्य तत्पुरस्तात्प्राञ्चं दध्यात् ॥ १०९

In case of the eleven yúpas being placed in a line running from the east towards the west, the breadth of half a pada is, for sake of the yúpas, to be cut off from the eastern half of the vedi and to be placed to the east of it, directed towards the east.

महावेदेः पूर्वभागे यूपार्थं स्थापितं पञ्चशतद्वयाधिकसहस्राङ्गुलायतं पदार्धव्यासमपच्छिद्य तत्पुरस्तात्प्राञ्चं दध्यात् । यावद्यूपं वेदिमुद्धन्तीति वचनात् । तत्रापि वेदिसंस्काराः क्रियन्ते । प्राची यूपपङ्क्तिः ।

शु° मी° प्राच्यैकादशीपक्षे वेदेः पूर्वार्धे सार्धसप्ताङ्गुलव्यासमपच्छिद्य वेदेः पुरस्तात्पृष्ठ्यान्यायेन दध्यात् । निदध्यात् । तत्र च सर्वत्र वेदिसंस्कारा उद्धननादयः कर्तव्याः । यावद्यूपं वेदिमुद्धन्तीति वचनात् ।

नात्राष्टाङ्गुलं विद्यते । ११०

In this case the eight aṅgulis are not added. (See S. 107).

अष्टाङ्गुलं न विद्यते । अथेमावुपस्तावानौ चतुरङ्गुलमात्रेण विप्रकृष्टौ स्यातामिति ।

शु° मी° न प्राच्यैकादशिन्यामष्टाङ्गुलस्याधिकस्य संयोजनं विद्यते तद्विनापि वेद्यंसयोस्संभवात् । दक्षिणोत्तरैकादशिन्यां त्वधिकाष्टाङ्गुलसंयोजनं विना वेद्यंसयोरसंभवात्तदावश्यकम् ।

न व्यतिषङ्गः । १११

And there is no vyatishaṅga (comp. Taittiríyasanhitá VI. 6. 4).

शु° मी° व्यतिषङ्गश्च न विद्यते । पशूनां व्यतिषङ्गः सारस्वतीमुत्तरामित्यादिकः प्राच्यैकादशिन्यां नास्ति किं त्वाग्नेयप्रभृतीन्पशूनग्निष्ठप्रभृतियूपेषु क्रमेण नियोजयेत् ।

यूपावटाः पदविष्कम्भाः । ११२

The pits for the yúpas have a diameter of one pada.

अर्धपदेन परिलेखनम् ।

त्रिपदपरिणाहानि यूपोपराणीति । ११३

The periphery of the base of the yúpas is three padas.

उपराणि मूलानि ।

Here ends the first adhyáya. The M.SS. of the commentary, which seem to be defective in this place have only the words : prathama adhyáyah ; M. reads iti baudháyaníyaśulvasútre prathamah. G. Th.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

Digitized by Google

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥

अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 111. Benares, August 2nd, 1875. Vol. X.

काशिकायाः

॥ चतुर्थाध्यायस्य प्रथमः पादः ॥

शिवादिभ्योऽण् ॥ ११२ ॥

गोत्र इति निवृत्तम् । अतः प्रभृति सामान्येन प्रत्यया विधीयन्ते । शिवादिभ्योऽपत्ये ऽण् प्रत्ययो भवति । यथायथ मत्रादीनामपवादः । शैवः । प्रौष्ठः । तक्षन् शब्दो ऽत्र पठ्यते कारिलक्षणमुदीचामिञं बाधितुम् । गयत्प्रत्ययस्य तु बाधो नेष्यते । ताक्ष्णः । ताक्ष्ण्यः । गङ्गाशब्दः पठ्यते तिकादिफिञा शुभ्रादिठका च समावेशार्थम् । तेन त्रैरूप्यं भवति । गाङ्गः । गाङ्गायनिः । गाङ्गेयः । विपाशशब्दः पठ्यते कुञ्जादिलक्षणेन च्फञा समावेशार्थम् । वैपाशः । वैपाशायन्यः । शिव । प्रौष्ठ । प्रौष्ठिक । चण्ड । जम्भ * । मुनि । सन्धि । भूरि । कुठार । अनभिम्लान † । ककुत्स्थ । कहोड । लेख । रोध । खञ्जन । कोहड । पिष्ट । हेहय । खञ्जार । खञ्जाल । सुरोहिका । पर्ण । कहूष । परिल । वतण्ड । तृण । कर्ण । क्षीरह्रद । जलह्रद । परिषिक । जटिलिक । गोफिलिक । बधिरिका । मञ्जीरक । वृष्णिक । रेख । आलेखन । विश्रवण । रवण । वर्त्तनाक्ष । पिटक । पिटाक । तृक्षाक । नभाक । ऊर्णनाभ । जरत्कारु । उत्क्षिपा । रोहितिक । आर्यश्वेत । सुपिष्ट । खर्ज्जूरकर्ण । मसूरकर्ण । तूणकर्ण । मयूरकर्ण । खडरक । तक्षन् । ऋष्टिषेण । गङ्गा । विपाशा । यस्क । लह्य । द्रुघ । अयःस्थूण । भलन्दन । विरूपाक्ष । भूमि । इला । सपत्नी ॥ द्व्यचो नद्याः ॥ त्रिवेणी त्रिवणं च * ॥ †

ऋष्ट्याभ्यो नदीमानुषीभ्यस्तन्नामिकाभ्यः ॥ ११३ ॥

वृद्धिर्यस्याचामादिस्तद्वृद्धम् । अवृद्धाभ्य इति शब्दधर्मः । नदीमानुषीभ्य इत्यर्थधर्मः, स्तेनाभेदात्प्रकृतयो निर्दिश्यन्ते । तन्नामिकाभ्य इति सर्वनाम्ना प्रत्ययप्रकृतेः प्रत्यवमर्शः । अवृद्धानि यानि नदीनां मानुषीणां च नामधेयानि तेभ्यो ऽपत्ये ऽण्प्रत्ययो भवति । ठको ऽपवादः । यमुनाया अपत्यं यामुनः । इरावत्या अपत्यम्, ऐरावतः । वैतस्तः । नार्मदः । मानुषीभ्यः खल्वपि । शिक्षिताया अपत्यं, शैक्षितः । चिन्तिताया अपत्यं, चैन्तितः । अवृद्धाभ्यः किम् । चान्द्रभागाया अपत्यं, चान्द्रभागेयः । वासवदत्तेयः । नदीमानुषीभ्य इति किम् । सौपर्णेयः । वैनतेयः । तन्नामिकाभ्य इति किम् । शोभनायाः, शौभनेयः ॥

ऋष्यन्धकवृष्णिकुरुभ्यश्च ॥ ११४ ॥

ऋषयः प्रसिद्धा वसिष्ठादयः । अन्धका वृष्णयः कुरव इति वंशाख्या । ऋष्यादिकुर्वन्तेभ्यः प्रातिपदिकेभ्यो ऽपत्ये ऽण्प्रत्ययो भवती,ञो ऽपवादः । अत्र्यादिभ्यस्तु परत्वाड्ढगादिभिरेव भवितव्यम् । ऋषिभ्यस्तावत् । वासिष्ठः । वैश्वामित्रः । अन्धकेभ्यः । श्वाफल्कः । रान्धसः । वृष्णिभ्यः । वासुदेवः । आनिरुद्धः । कुरुभ्यः । नाकुलः । साहदेवः । कथं पुनर्नित्यानां

---

* भण्डेति पा० २ ।

† अनभिम्लानेति पा० २ ।

* त्रिवेणीरेवाप्रभृतेस्तन्नामिकाण्णपवादस्य द्व्यच इति ढको ऽपवाद इत्यधिकं पुस्तकान्तरे ।

† कद्रुय । कबोध । परल । ग्रीवाक्ष । गोभिलिक । राजन्न । तडाक । वडाक । एते शब्दाः पुस्तकान्तरे ऽधिकाः ।

Digitized by Google

शब्दानामन्धकादिवंशसमाश्रयणेनान्वाख्यानं युज्यते । के चिदाहुः । कथमपि काकतालीयन्यायेन कुर्वादिवंशेष्वसंकरेणैव नकुलसहदेवादयः शब्दास्सुबहवः संकलितास्तानुपादाय पाणिनिना स्मृतिरूपनिबद्धेति । अथ वा ऽन्धकवृष्णिकुरुवंशा अपि नित्या एव, तेषु ये शब्दाः प्रयुज्यन्ते नकुलसहदेवादय,स्तत्रेदं प्रत्ययविधानमित्यदोषः ॥

मातुरुत्संख्यासंभद्रपूर्वायाः ॥ ११५ ॥

मातृशब्दात्संख्यापूर्वात्संपूर्वाद्भद्रपूर्वाच्चापत्ये ऽण् प्रत्ययो भवति,उकारश्चान्तादेशः । द्वयोर्मात्रोरपत्यं,द्वैमातुरः । षाण्मातुरः । सांमातुरः । भाद्रमातुरः । उकारादेशार्थं वचनं, प्रत्ययः पुनरुत्सर्गेणैव सिद्धः । स्त्रीलिङ्गनिर्देशो ऽर्थापेक्षः, तेन धान्यमातुर्ग्रहणं न भवति । संख्यासंभद्रपूर्वाया इति किम् । सौमात्रः । शुभ्रादिषु पाठात्तु वैमात्रेयः ॥

कन्यायाः कनीन च ॥ ११६ ॥

कन्याशब्दादपत्ये ऽणप्रत्ययो भवति ढकोपवादः । तत्सन्नियोगेन कनीनशब्द आदेशो भवति । कन्याया अपत्यं, कानीनः कर्णः । कानीनो व्यासः ॥

विकर्णशुङ्गच्छगलाद्वत्सभरद्वाजात्रिषु ॥ ११७ ॥

विकर्णशुङ्गच्छगलशब्देभ्यो यथासंख्यं वत्सभरद्वाजात्रिष्वपत्यविशेषेष्वणप्रत्ययो भवति । वैकर्णो भवति वात्स्यश्चेत् । वैकर्णिरन्यः । शौङ्गो भवति भारद्वाजश्चेत् । शौङ्गिरन्यः । छागलो भवत्यात्रेयश्चेत् । छागलिरन्यः । शुङ्गाशब्दं स्त्रीलिङ्गमन्ये पठन्ति ते ढकं प्रत्युदाहरन्ति शौङ्गेय इति । द्वयमपि चैतत्प्रमाणमुभयथा सूत्रप्रणयनात् ॥

पीलाया वा ॥ ११८ ॥

तद्धामिकाणो बाधके द्व्यच इति ढकि प्राप्ते ऽणप्रत्ययः पक्षे विधीयते । पीलाया अपत्ये वाणप्रत्ययोभवति । पीलाया अपत्यं, पैलः । पैलेयः ॥

ढक्च मण्डूकात् ॥ ११९ ॥

मण्डूकशब्दादपत्ये ढक् प्रत्ययो भवति । चकारादण् च वा । तेन त्रैरूप्यं भवति । माण्डूकेयः । माण्डूकः । माण्डूकिः ॥

स्त्रीभ्यो ढक् ॥ १२० ॥

स्त्रीग्रहणेन टाबादिप्रत्ययान्ताः शब्दा गृह्यन्ते । स्त्रीभ्यो ऽपत्ये ढक् प्रत्ययो भवति । सौपर्णेयः । वैनतेयः । स्त्रीप्रत्ययविज्ञापनादसत्यर्थग्रहणे इह न भवति । इडविडो ऽपत्यं, दरदो ऽपत्यम्, ऐडविडः, दारद इति ॥ वडवाया वृषे वाच्ये ॥ * ॥ वाडवेयो वृषः स्मृतः । अपत्ये प्राप्तस्ततो ऽपकृष्य विधीयते, तेनापत्ये वाडव इति भवति ॥ अण् क्रुञ्चाकोकिलात्स्मृतः ॥ * ॥ क्रुञ्चाया अपत्यं, क्रौञ्चः । कौकिलः ॥

द्व्यचः ॥ १२१ ॥

स्त्रीभ्य इत्येव । द्व्यचः स्त्रीप्रत्ययान्तादपत्ये ढक् प्रत्ययो भवति । तद्धामिकाणोपवादः । दत्ताया अपत्यं, दात्तेयः । गौपेयः । द्व्यच इति किम् । यामुनः ॥

इतश्चानिञः ॥ १२२ ॥

स्त्रीग्रहणं निवृत्तम् । चकारो द्व्यच इत्यस्यानुकर्षणार्थः । इकारान्तात्प्रातिपदिकादनिञन्तादपत्ये ढक् प्रत्ययो भवति । आत्रेयः । नैधेयः । इत इति किम् । दाक्षिः । प्लाक्षिः । अनिञ इति किम् । दाक्षायणः । प्लाक्षायणः । द्व्यच इत्येव । मरीचेरपत्यं, मारीचः ॥

शुभ्रादिभ्यश्च ॥ १२३ ॥

शुभ्र इत्येवमादिभ्यः प्रातिपदिकेभ्यो ढक् प्रत्ययो भवति । यथायोगमिञादीनामपवादः । शौभ्रेयः । वैष्टपुरेयः । चकारोनुक्तसमुच्चयार्थं आकृतिगणतामस्य बोधयति । गाङ्गेयः पाण्डवेय इत्येवमादि सिद्धं भवति । शुभ्र । विष्टपुर । ब्रह्मकृत । शतद्वार । शतावर । शलाका । शालाचल । शलाकाभ्रू । लेखाभ्रू । विमातृ । विधवा । कृकसा । रोहिणी । रुक्मिणी । दिशा । शालूक । अजवस्ति । शकन्धि ॥ लक्षणश्यामयोर्वसिष्ठे ॥ गोधा । कृकलास । अणीव । प्रवाहण । भरत । भारम * । मृकण्डु । मघष्टु । मकष्टु । कर्पूर । इतर । अन्यतर । आलीढ । सुदत्त । सुचक्षस् । सुनामन् । कद्रु । तुद । अकशाप । कुमारिका । किशोरिका । कुवेणिका । जिह्माशिन । परिधि । वायुदत्त । ककल । खट्वर । अम्बिका । अशोका । शुद्धपिङ्गला । खडोन्मत्ता । अनुदृष्टि । जरतिन् । बलिवर्दिन् । वियज्ञ । बीज । श्वन् । अश्मन् । अश्व । अजिर ॥ †

विकर्णकुषीतकात्काश्यपे ॥ १२४ ॥

विकर्णशब्दात्कुषीतकशब्दाच्च काश्यपे ऽपत्यविशेषे ढक् प्रत्ययो भवति । वैकर्णेयः । कौषीतकेयः । काश्यपइति किम् । वैकर्णिः । कौषीतकिः ॥

भ्रुवो वुक्च ॥ १२५ ॥

भ्रूशब्दादपत्ये ढक् प्रत्ययो भवति, तत्सन्नियोगेन च वुगागमः । भ्रौवेयः ॥

कल्याण्यादीनामिनङ् ॥ १२६ ॥

---

* भारतेति पा० २ ॥

† स्थूल । मकण्डू । मकथु । यमष्टु । कष्टु । मकण्ड । मकण्ड । गुद । रुद । कुवेरिका । शकल । शबल । उग्र । अजिन । एते शब्दा अधिकाः पुस्तकान्तरे ।

कल्याण्यादीनामिनङ् इत्येवमादीनां शब्दानामपत्ये ढक् प्रत्ययो भवति, तत्सन्नियोगेन च इनङादेशः । स्त्रीप्रत्ययान्तानामादेशार्थं ग्रहणं, प्रत्ययस्य सिद्धत्वा,दन्येषामुभयार्थम् । काल्याणिनेयः । सौभागिनेयः । दौर्भागिनेयः । हृद्भगसिन्ध्वन्तइत्युभयपदवृद्धिः । कल्याणी । सुभगा । दुर्भगा । बन्धकी । अनुदृष्टि । अनुसृष्टि । जरती । बलीवर्दी । ज्येष्ठा । कनिष्ठा । मध्यमा । परस्त्री ॥

कुलटाया वा ॥ १२७ ॥

कुलान्यटतीति, कुलटा । पररूपं निपातनात् । कुलटाया अपत्ये ढक् प्रत्ययो भवति,तत्सन्नियोगेन च वा इनङादेशो भवति । आदेशार्थं वचनं, प्रत्ययः पूर्वेणैव सिद्धः । कौलटिनेयः । कौलटेयः । या तु कुलान्यटन्ती शीलं भिनत्ति, ततः क्षुद्राभ्यो वेति परत्वाड् ढ्रका भवितव्यम् । कौलटेरः ॥

चटकाया ऐरक् ॥ १२८ ॥

चटकाया अपत्ये ऐरक् प्रत्ययो भवति । चाटकैरः ॥ चटकाच्चेति वक्तव्यम् ॥ * ॥ चटकस्यापत्यं, चाटकैरः ॥ स्त्रियामपत्ये लुग्वक्तव्यः ॥ * ॥ चटकाया अपत्यं स्त्री, चटका * ॥

गोधाया ढ्रक् ॥ १२९ ॥

गोधाया अपत्ये ढ्रक् प्रत्ययो भवति । गौधेरः । शुभ्रादिष्वयं पठ्यते । तेन गौधेयोपि भवति ॥

आरगुदीचाम् ॥ १३० ॥

गोधाया अपत्ये उदीचामाचार्याणां मतेन आरक् प्रत्ययो भवति । गौधारः । आचार्यग्रहणं पूजार्थं, वचनसामर्थ्यादेव पूर्वेण समावेशो भविष्यति । आरग्वचनमनर्थकं,रका सिद्धत्वात् । ज्ञापकं त्वयमन्येभ्यो ऽपि भवतीति । जाडारः । पाण्डारः ॥

क्षुद्राभ्यो वा ॥ १३१ ॥

ढ्रगनुवर्तते,न आरक् । क्षुद्रा अङ्गहीनाः शीलहीनाश्च † । अर्थधर्मेण तदभिधायिन्यः स्त्रीलिङ्गाः प्रकृतयो निर्दिश्यन्ते । क्षुद्राभ्यो वापत्ये ढ्रक् प्रत्ययो भवति । ढकोपवादः । काणेरः । काणेयः । दासेरः । दासेयः ॥

पितृष्वसुश्छण् ॥ १३२ ॥

पितृष्वसृशब्दादपत्ये छण्प्रत्ययो भवति । अणोपवादः । पैतृष्वस्रीयः ॥

ढकि लोपः ॥ १३३ ॥

पितृष्वसुरपत्यप्रत्यये ढकि परतो लोपो भवति । पैतृष्वसेयः । कथं पुनरिह ढक् प्रत्ययः । एतदेव ज्ञापकं ढको भावस्य ॥

* चटकेत्यस्याग्रे क्षुद्रादित्वाड्ढ्राबित्यधिकं पुस्तकान्तरे ।

† शीलहीनाश्चेति पा० २ ।

मातृष्वसुश्च ॥ १३४ ॥

पितृष्वसुरित्येतदपेक्षते, पितृष्वसुर्यदुक्तं तन्मातृष्वसुरपि भवति । छण्प्रत्ययो ढकि लोपश्च । मातृष्वस्रीयः । मातृष्वसेयः ॥

चतुष्पाद्भ्यो ढञ् ॥ १३५ ॥

चतुष्पादभिधायिनीभ्यः प्रकृतिभ्यो ऽपत्ये ढञ्प्रत्ययो भवति । अणादीनामपवादः । कामण्डलेयः । शैतिबाहेयः । जाम्बेयः ॥

गृष्ट्यादिभ्यश्च ॥ १३६ ॥

गृष्ट्यादिभ्यः शब्देभ्यो ऽपत्ये ढञ्प्रत्ययो भवति । अणादीनामपवादः । गार्ष्टेयः । हार्ष्टेयः । गृष्टिशब्दो यश्चतुष्पाद्वचनस्ततः पूर्वेणैव सिद्धः, अचतुष्पादर्थं वचनम् । गृष्टि । हृष्टि । हलि । बलि । विश्रि । कुद्रि । अजवस्ति । मित्रयु * ॥

राजश्वशुराद्यत् ॥ १३७ ॥

राजन्श्वशुरशब्दाभ्यामपत्ये यत्प्रत्ययो भवति । यथाक्रममणिञोरपवादः । राजन्यः । श्वशुर्यः ॥ राज्ञो ऽपत्ये जातिग्रहणम् ॥ * ॥ राजन्यो भवति,क्षत्रियश्चेत् । राजनोऽन्यः ॥

क्षत्राद्घः ॥ १३८ ॥

क्षत्रशब्दादपत्ये घः प्रत्ययो भवति । क्षत्रियः । अयमपि जातिशब्द एव । क्षात्रिरन्यः ॥

कुलात्खः ॥ १३९ ॥

उत्तरसूत्रे पूर्वप्रतिषेधादिह तदन्तः केवलश्च दृश्यते । कुलशब्दान्तात्प्रातिपदिकात्केवलाच्चापत्ये खः प्रत्ययो भवति । आढ्यकुलीनः । श्रोत्रियकुलीनः । कुलीनः ॥

अपूर्वपदादन्यतरस्यां यड्ढकञौ ॥ १४० ॥

कुलादित्येव । अविद्यमानं पूर्वपदं यस्य तदपूर्वपदं, समाससंबन्धिनः पूर्वपदस्याभावेन कुलशब्दो विशेष्यते । अपूर्वपदात्कुलशब्दादन्यतरस्यां यत् ढकञ् इत्येतौ प्रत्ययौ भवतः । ताभ्यां मुक्ते खोपि भवति । कुल्यः । कौलेयकः । कुलीनः । पदग्रहणं किम् । बहुच्पूर्वादपि यथा स्यात् । बहुकुल्यः । बाहुकुलेयकः । बहुकुलीनः ॥

महाकुलादञ्खञौ ॥ १४१ ॥

अन्यतरस्यामित्यनुवर्त्तते । पक्षे खः † । माहाकुलः । माहाकुलीनः । महाकुलीनः ॥

दुष्कुलाड्ढक् ॥ १४२ ॥

दुष्कुलशब्दादपत्ये ढक् प्रत्ययो भवति । अन्यतरस्यामित्यनुवृत्तेः खश्च । दौष्कुलेयः । दुष्कुलीनः ॥

* फलि । अलि । दृष्टि । एते त्रयोऽधिकाः पुस्तकान्तरे ।

† महाकुलशब्दादञ्खञौ प्रत्ययौ भवतः । अन्यतरस्यांग्रहणानुवृत्तेः खश्चेति पा० २ ।

स्वसुश्छः ॥ १४३ ॥

स्वसृशब्दादपत्ये छः प्रत्ययो भवति। अणोऽपवादः । स्वसुरपत्यं, स्वस्रीयः ॥

भ्रातुर्व्यच्च ॥ १४४ ॥

भ्रातृशब्दादपत्ये व्यत् प्रत्ययो भवति । चकाराच्छश्च । अणोऽपवादः । भ्रातृव्यः । भ्रात्रीयः । तकारः स्वरार्थः ॥

व्यन्सपत्ने ॥ १४५ ॥

सपत्नशब्दः शत्रुपर्यायः शब्दान्तरमव्युत्पन्नमेव । सपत्नीशब्दादपरे ऽकारमिवार्थे निपातयन्ति । सपत्नीव सपत्नः । भ्रातृशब्दाद् व्यन्प्रत्ययो भवति समुदायेन चेदमित्रः सपत्न उच्यते । अपत्यार्थोऽत्र नास्त्येव । पाप्मना भ्रातृव्येण । भ्रातृव्यः कण्टकः ॥

रेवत्यादिभ्यष्ठक् ॥ १४६ ॥

रेवतीत्येवमादिभ्यो ऽपत्ये ठक् प्रत्ययो भवति । यथायोगं ढगादीनामपवादः । रैवतिकः । आश्वपालिकः । रेवती । अश्वपाली । मणिपाली । द्वारपाली । वृकवञ्चिन् । वृकग्राह । कर्णग्राह । दण्डग्राह । कुक्कुदाक्ष * ॥

गोत्रस्त्रियाः कुत्सने ण च ॥ १४७ ॥

अपत्यं पौत्रप्रभृति गोत्रं गृह्यते । गोत्रं या स्त्री तदभिधायिनः शब्दादपत्ये णप्रत्ययो भवति चकाराट्ठक्च, कुत्सने गम्यमाने। पितुरसंविज्ञाने मात्रा व्यपदेशोऽपत्यस्य कुत्सा । गार्ग्या अपत्यं, गार्गो जाल्मः । गार्गिकः । ग्लुचुकायन्या अपत्यं, ग्लौचुकायनः । ग्लौचुकायनिकः । गोत्राद्यूनीति यूनि प्रत्ययो भवति । गोत्रमिति किम् । कारिकेयो जाल्मः । स्त्रिया इति किम् । औपगविर्जाल्मः । कुत्सनइति किम् । गार्गेयो माणवकः ॥

वृद्धाट्ठक्सौवीरेषु बहुलम् ॥ १४८ ॥

कुत्सनइत्येव । सौवीरेष्विति प्रकृतिविशेषणम् । वृद्धात्सौवीरगोत्रादपत्ये बहुलं ठक् प्रत्ययो भवति कुत्सने गम्यमाने। भागवित्तेर्भागवित्तिकः। तार्णबिन्दवस्य तार्णबिन्दविकः। पक्षे यथाप्राप्तं फक् । भागवित्तायनः । पक्षे तार्णबिन्दविः । आकशापः शुभ्रादिः । आकशापेयः । तस्यापत्यमाकशापेयिकः। पक्षे आकशापेयिः ।

> भागपूर्वपदो वित्तिर्द्वितीयस्तार्णबिन्दवः ।
> तृतीयस्त्वाकशापेयो गोत्राट्ठग्बहुलं ततः ॥

वृद्धग्रहणं स्त्रीनिवृत्त्यर्थम् । सौवीरेष्विति किम् । औपगविर्जाल्मः । कुत्सनइत्येव । भागवित्तायनो माणवकः । बहुलग्रहणमुपाधिवैचित्र्यार्थम् । गोत्रस्त्रिया इत्यारभ्य चत्वारो योगास्तेषु प्रथमः कुत्सनएव । अन्त्यः सौवीरगोत्रएव । मध्यमो द्वयोरपि । तदेतद्बहुलग्रहणाल्लभ्यते ॥

फेश्छ च ॥ १४९ ॥

कुत्सनइत्येव, सौवीरेष्विति च । फेरिति फिञो ग्रहणं न फिनः, वृद्धाधिकारात् । फिञन्तात्प्रातिपदिकात्सौवीरगोत्रादपत्ये छः प्रत्ययो भवति चकाराट्ठक् कुत्सने गम्यमाने । यमुन्दस्यापत्यं तिकादिभ्यः फिञ्, तस्यापत्यं, यामुन्दायनीयः । यामुन्दायनिकः । कुत्सनइत्येव । यामुन्दायनिः । फिञन्तादौत्सर्गिकस्याणः आगतस्य ण्यक्षत्रियार्षञित इति लुक् । सौवीरेष्वित्येव । तैकायनिः ।

> यमुन्दश्च सुयामा च वार्ष्यायणिः फिञः स्मृताः ।
> सौवीरेषु च कुत्सायां द्वौ योगौ शब्दवित् स्मरेत् ॥

फाण्टाहृतिमिमताभ्यां णफिञौ ॥ १५० ॥

सौवीरेष्वित्येव । कुत्सनइति निवृत्तम् । फाण्टाहृतिमिमतशब्दाभ्यां सौवीरविषयाभ्यामपत्ये णफिञौ प्रत्ययौ भवतः । फकोऽपवादः । अल्पाच्तरस्यापूर्वनिपातो लक्षणव्यभिचारचिह्नं, तेन यथासंख्यमिह न भवतीति । फाण्टाहृतः । फाण्टाहृतायनिः । मैमतः । मैमतायनिः । सौवीरेष्वित्येव । फाण्टाहृतायनः । मैमतायनः । फाण्टाहृतेर्यञिञोश्चेति फक् । मिमतशब्दोऽपि नडादिषु पठ्यते ॥

कुर्वादिभ्यो ण्यः ॥ १५१ ॥

सौवीरेषु बहुलमिति च निवृत्तम् । कुरु इत्येवमादिभ्यः शब्देभ्यो ऽपत्ये ण्यः प्रत्ययो भवति । कौरव्यः । गार्ग्यः । कुरुनादिभ्यो ण्य इति कुरुशब्दादपरो ण्यप्रत्ययो भविष्यति । स तु क्षत्रियात्तद्राजसंज्ञकस्तस्य बहुषु लुका भवितव्यमयं तु श्रूयतएव । कौरव्याः । कौरव्यशब्दस्य क्षत्रियवचनस्य तिकादिषु पाठात्फिञपि भवति । कौरव्यायणिः । रथकारशब्दोऽत्र पठ्यते, स जातिवचनः। स्त्रैवर्णिकेभ्यः किं चिन्न्यूना रथकारजातिः । कारिणस्तु रथकारशब्दादुत्तरसूत्रेणैव ण्यः सिद्धः । केशिनीशब्दः पठ्यते,तस्य कैशिन्यः । पुंवद्भावो न भवति, स्त्रीप्रत्ययनिर्देशसामर्थ्यात् । वेनाच्छन्दसीति पठ्यते, कथं भाषायां वैन्यो राजेति । छान्दस एवायं प्रमादात्कविभिः प्रयुक्तः । वामरथशब्दः पठ्यते, तस्य कण्वादिवत्कार्यमिष्यते स्वरं वर्जयित्वा लुगादिकमतिदिश्यते । बहुषु वामरथाः । स्त्री वामरथी । वामरथ्यायनी । युवा वामरथ्यायनः । वामरथ्यस्य छात्रा वामरथाः । वामरथानि संघाङ्कलक्षणानि । स्वरस्तु ण्यप्रत्ययस्यैव भवति नातिदेशिकमाद्युदात्तत्वम् । कुरु । गर्ग । मङ्गुष । अजमारक । रथकार । वावदूक ॥ सम्राजः क्षत्रिये ॥

* वृकबन्धु । चामरग्राह । ककुदाक्ष । एते शब्दाः पुस्तकान्तरे ऽधिकाः ।

Digitized by Google

कवि । मति । वाक् । पितृमत् । इन्द्रजालि । दामोष्णीषि । गणकारि । कैशोरि । कापिञ्जलादि । कुट । शलाका । मुर । एरक । अभ्र । दर्भ । केशिनी ॥ वेनाच्छन्दसि ॥ शूर्पणाय । श्यावनाय । श्यावरथ । श्यावपुत्र । सत्यंकार । वडभीकार । शङ्कु । शाक । पथिकारिन् । मूढ । शकन्धु । कर्त्तृ । हर्त्तृ । शाकिन् । इनपिण्डी* ॥ वामरथस्य कण्वादिवत्स्वरवर्जम् ॥

सेनान्तलक्षणकारिभ्यश्च ॥ १५२ ॥

सेनान्तात्प्रातिपदिकाल्लक्षणशब्दात्कारिवचनेभ्यश्चापत्ये ण्यः प्रत्ययो भवति । कारिशब्दः कारूणां तन्तुवायादीनां वाचकः । कारिषेण्यः । हारिषेण्यः । लाक्षण्यः । कारिभ्यः । तान्तुवाय्यः । कौम्भकार्यः । नापित्यः ॥

उदीचामिञ् ॥ १५३ ॥

ण्ये प्राप्ते इञ्पक्षे विधीयते । सेनान्तलक्षणकारिभ्यो ऽपत्ये इञ् प्रत्ययो भवति उदीचां मतेन । कारिषेणिः । हारिषेणिः । लाक्षणिः । तान्तुवायिः † । कौम्भकारिः । वचनसामर्थ्यादेव प्रत्ययसमावेशे लब्धे आचार्यग्रहणं वैचित्र्यार्थम् । तक्षन्शब्दः शिवादिस्तेनाणार्यमिञ् बाध्यते न तु ण्यः । तक्ष्णोऽपत्यं, ताक्ष्णः । ताक्ष्ण्यः ॥

तिकादिभ्यः फिञ् ॥ १५४ ॥

तिक इत्येवमादिभ्यः शब्देभ्यो ऽपत्ये फिञ् प्रत्ययो भवति । तैकायनिः । कैतवायनिः । वृषशब्दोऽत्र पठ्यते तस्य प्रत्ययसंनियोगेन यकारान्तत्वमिष्यते । वार्ष्यायणिः । कौरव्यशब्दः पठ्यते स च क्षत्रियवचनः । औरसशब्देन क्षत्रियप्रत्ययान्तेन साहचर्यात् । यस्तु कुर्वादिभ्यो ण्यस्तदन्तादिञेव भवितव्यम् । तथा च ण्यक्षत्रियार्षञित इत्यत्रोदाहृतं कौरव्यः पिता कौरव्यः पुत्र इति । तिक । कितव । संज्ञा । बाल । शिखा । उरस् । शाठ्य । सैन्धव । यमुन्द । रूप्य । ग्राम्य । नील । अमित्र । गौकक्ष्य । कुरु । देवरथ । तैतिल । औरस । कौरव्य । भौरिकि । भौलिकि । चौपयत । चैटयत । शैकयत । क्षैतयत । ध्वाजवत । चन्द्रमस् । शुभ । गङ्गा । वरेण्य । सुयामन् । आरद्ध । वह्यका । खल्य । वृष । लोमक । उदन्य । यज्ञ ‡ ॥

कौसल्यकार्मार्याभ्यां च ॥ १५५ ॥

कौसल्यकार्मार्यशब्दाभ्यामपत्ये फिञ् प्रत्ययो भवति । इञोऽपवादः । कौसल्यायनिः । कार्मार्यायणिः ॥ परमप्रकृतेरेवायं प्रत्यय इष्यते ॥ कोसलस्यापत्यं कर्मारस्यापत्यमिति । प्रत्ययसंनियोगेन तु प्रकृतिरूपं निपात्यते । तथा च स्मृत्यन्तरम् ॥ दगुकोसलकर्माच्छागवृषाणां युड्वादिष्टस्येति ॥ दागव्यायनिः । कौसल्यायनिः । कार्मार्यायणिः । छाग्यायनिः । वार्ष्यायणिः ॥

अणो द्व्यचः ॥ १५६ ॥

अणन्ताद् द्व्यचः प्रातिपदिकादपत्ये फिञ् प्रत्ययो भवति । इञोऽपवादः । कार्त्त्रायणिः । हार्त्त्रायणिः * । अण इति किम् । दाक्षायणः । द्व्यच इति किम् । औपगविः ॥ त्यदादीनां वा फिञ् वक्तव्यः ॥ * ॥ त्यादायनिः । त्यादः । यादायनिः । यादः । तादायनिः । तादः । अणत्र प्रः ॥

उदीचां वृद्धादगोत्रात् ॥ १५७ ॥

वृद्धं यच्छब्दरूपमगोत्रं तस्मादपत्ये फिञ् प्रत्ययो भवति उदीचामाचार्याणां मतेन । आम्रगुप्तायनिः । ग्रामरक्षायणिः । कारिशब्दादपि वृद्धादगोत्रात्परत्वादनेनैव भवितव्यम् । नापितायनिः । उदीचामिति किम् । आम्रगुप्तिः । वृद्धादिति किम् । याज्ञदत्तिः । अगोत्रादिति किम् । औपगविः ॥

वाकिनादीनां कुक्च ॥ १५८ ॥

वाकिन इत्येवमादिभ्यः शब्देभ्यो ऽपत्ये फिञ् प्रत्ययो भवति तत्संनियोगेन चैषां कुगागमः । यदिह वृद्धमगोत्रं शब्दरूपं तस्यागमार्थमेव ग्रहणमन्येषामुभयार्थम् । वाकिनकायनिः । गारेधकायनिः । इञोऽयमपवादो योगः । उदीचामित्यधिकारात्पक्षे तेऽपि भवन्ति । वाकिनिः । गारेधिः । वाकिन । गारेध । कार्कट्य । काक । लङ्का ॥ चर्मिवर्मिणोर्नलोपश्च ॥

पुत्रान्तादन्यतरस्याम् ॥ १५९ ॥

उदीचां वृद्धादिति वर्त्तते । पुत्रान्तमगोत्रमिति पूर्वेणैव प्रत्ययः सिद्धस्तस्मिन्ननेन कुगागमोऽन्यतरस्यां विधीयते । पुत्रान्तात्प्रातिपदिकाद्यः फिञ्प्रत्ययस्तस्मिन् परभूते ऽन्यतरस्यां कुगागमो भवति पुत्रान्तस्य । तेन त्रैरूप्यं संपद्यते । गार्गीपुत्रकायणिः । गार्गीपुत्रायणिः । गार्गीपुत्रिः । वात्सीपुत्रकायणिः । वात्सीपुत्रायणिः । वात्सीपुत्रिः ॥

प्राचामवृद्धात्फिन्बहुलम् ॥ १६० ॥

अवृद्धाच्छब्दरूपादपत्ये फिन् प्रत्ययो भवति बहुलं प्राचां मतेन । ग्लुचुकायनिः । अहिचुम्बकायनिः । प्राचामिति किम् । ग्लौचुकिः । अवृद्धादिति किम् । राजदन्तिः । उदीचां प्राचामन्यतरस्यां बहुलमिति सर्वत्र विकल्पार्थास्तेषामेकेनैव सिद्ध्यति तत्राचार्यग्रहणं पूजार्थम् । बहुलग्रहणं वैचित्र्यार्थम् । क्वचिन्न भवत्येव । दाक्षिः । प्लाक्षिः ॥

---

* विस्फोटक । काक । स्फाटक । शाकिन् । घार्तकि । धेनुजि । कुछिकार । एते ऽधिकाः पुस्तकान्तरे ।

† तौचवायिरित्यधिकं पुस्तकान्तरे ।

‡ ऋष्य । भीत । जाजल । रस । लावक । ध्वजवद । वसु । बन्धु । आयन्धका । सुप्रामन् । एते ऽधिकाः शब्दाः पुस्तकान्तरे ।

* यास्क इति शिवादिभ्योऽण् । यास्कस्यापत्यं यास्कायनिः । इत्यधिकं पुस्तकान्तरे ।

मनोर्जातावञ्यतौ षुक् ॥ १६१ ॥

मनुशब्दादञ् यत् इत्येतौ प्रत्ययौ भवतस्तत्सन्नियोगेन षुगागमः समुदायेन चेज्जातिर्गम्यते। मानुषः। मनुष्यः। जातिशब्दावेतौ। अपत्यार्थोऽत्र नास्त्येव। तथा च मानुषा इति बहुषु न लुग्भवति। अपत्यविवक्षायां त्वणेव भवितव्यम्। मानवी प्रजा।

अपत्ये कुत्सिते मूढे मनोरौत्सर्गिकः स्मृतः।
नकारस्य च मूर्धन्यस्तेन सिध्यति माणवः॥

अपत्यं पौत्रप्रभृति गोत्रम् ॥ १६२ ॥

पौत्रप्रभृति यदपत्यं तद्गोत्रसंज्ञं भवति। संबन्धिवचनत्वादपत्यशब्दस्य यदपत्यं तदपेक्षया पौत्रप्रभृतेर्गोत्रसंज्ञा विधीयते। गर्गस्यापत्यं पौत्रप्रभृति गार्ग्यः। वात्स्यः। अपत्यमिति व्यपदेशोऽयं संज्ञिनः पौत्रप्रभृतेः। पौत्रप्रभृतीति किम्। अनन्तरस्य मा भूत्। कौञ्जिः। गार्गिः। गोत्रप्रदेशा एको गोत्र इत्येवमादयः॥

जीवति तु वंश्ये युवा ॥ १६३ ॥

अभिजनप्रबन्धो वंशः। तत्र भवो वंश्यः पित्रादिस्तस्मिन् जीवति सति पौत्रप्रभृत्यपत्यं युवसंज्ञं भवति। पौत्रप्रभृतीति च न सामानाधिकरण्येनापत्यं विशेषयति, किं तर्हि षष्ठ्या विपरिणम्यते पौत्रप्रभृतेर्यदपत्यमिति। तेन चतुर्थादारभ्य युवसंज्ञा विधीयते। गार्ग्यायणः। वात्स्यायनः। तुशब्दोऽवधारणार्थो युवैव न गोत्रमिति॥

भ्रातरि च ज्यायसि ॥ १६४ ॥

भ्रातरि ज्यायसि जीवति कनीयान् भ्राता युवसंज्ञो भवति पौत्रप्रभृतेरपत्यम्। गार्ग्यस्य द्वौ पुत्रौ तयोः कनीयान् मृते पित्रादौ वंश्ये भ्रातरि ज्यायसि जीवति युवसंज्ञो भवति। अवंश्यार्थोऽयमारम्भः। पूर्वजाः पित्रादयो वंश्या इत्युच्यन्ते। भ्राता तु न वंश्यः। अकारणत्वात्। गार्ग्ये जीवति गार्ग्यायणोऽस्य कनीयान्भ्राता। वात्स्यायनः। दाक्षायणः। प्लाक्षायणः॥

वान्यस्मिन् सपिण्डे स्थविरतरे जीवति ॥ १६५ ॥

सप्तमपुरुषावधयः सपिण्डाः स्मर्यन्ते। येषाम्
उभयत्र दशाहानि कुलस्यान्नं न भुज्यते।*

इत्येवमादिकायां क्रियायामनधिकारः। भ्रातुरन्यस्मिन्सपिण्डे स्थविरतरे जीवति पौत्रप्रभृतेरपत्यं जीवदेव युवसंज्ञं वा भवति। प्रकृतं जीवतिग्रहणं सपिण्डस्य विशेषणमिदं तु संज्ञिनः। तरनिर्देश उभयोत्कर्षार्थः। स्थानेन वयसा चोत्कृष्टे सपिण्डे यथा स्यात्। पितृव्ये पितामहे भ्रातरि वयसाधिके जीवति। गर्गस्यापत्यं गार्ग्यायणः। गार्ग्यो वा। वात्स्यायनः। वात्स्यो वा। दाक्षायणः। दाक्षिर्वा। स्थविरेति किम्। स्थानवयोन्यूने गार्ग्य एव भवति। जीवतीति किम्। मृते मृतो वा गार्ग्य एव भवति॥

वृद्धस्य च पूजायाम् ॥ १६६ ॥

अपत्यमन्तर्हितं वृद्धमिति शास्त्रान्तरे परिभाषणाद्गोत्रं वृद्धमित्युच्यते। वृद्धस्य युवसंज्ञा वा भवति पूजायां गम्यमानायाम्। संज्ञासामर्थ्याद्गोत्रं युवप्रत्ययेन पुनरुच्यते। वृद्धस्येति षष्ठीनिर्देशो वैचित्र्या सूत्रस्य कृतिरिति। तत्र भवान् गार्ग्यायणः। गार्ग्यो वा। तत्र भवान् वात्स्यायनः। वात्स्यो वा। तत्र भवान् दाक्षायणः। दाक्षिर्वा। पूजायामिति किम्। गार्ग्यः। वात्स्यः॥

यूनश्च कुत्सायाम् ॥ १६७ ॥

कुत्सायां गम्यमानायां यूनो वा युवसंज्ञा भवति। निवृत्तिप्रधानो विकल्पो, युवसंज्ञायां प्रतिषिद्धायां पक्षे गोत्रसंज्ञैव भवति, प्रतिपक्षाभावात्। गार्ग्यो जाल्मः। गार्ग्यायणो वा। वात्स्यो जाल्मः। वात्स्यायनो वा। दाक्षिर्जाल्मः। दाक्षायणो वा। कुत्सायामिति किम्। गार्ग्यायणः॥

जनपदशब्दात्क्षत्रियादञ् ॥ १६८ ॥

जनपदशब्दो यः क्षत्रियवाची तस्मादपत्येऽञ् प्रत्ययो भवति। पाञ्चालः। ऐक्ष्वाकः। वैदेहः। जनपदशब्दादिति किम्। द्रुह्योरपत्यं, द्रौह्यवः। पौरवः। क्षत्रियादिति किम्। ब्राह्मणस्य पञ्चालस्यापत्यं, पाञ्चालिः। वैदेहिः॥ क्षत्रियसमानशब्दाज्जनपदशब्दात्तस्य राजन्यपत्यवत्॥*॥ पञ्चालानां राजा पाञ्चालः। वैदेहः। मागधः। अवृद्धादपीति प्राप्तस्य वुञोऽपवादः॥

साल्वेयगान्धारिभ्यां च ॥ १६९ ॥

साल्वेयगान्धारिशब्दाभ्यामपत्येऽञ् प्रत्ययो भवति। जनपदशब्दावेतौ क्षत्रियाभिधायिनौ ताभ्यामञपवादे वृद्धादिति ञ्यङि प्राप्ते पुनरञ्विधीयते। साल्वेयः। गान्धारः। तस्य राजनीत्येव। साल्वेयो राजा। गान्धारो राजा॥

द्व्यञ्मगधकलिङ्गसूरमसादण् ॥ १७० ॥

जनपदशब्दात्क्षत्रियाभिधायिनो द्व्यचो मगध कलिङ्ग सूरमस इत्येतेभ्यश्चापत्येऽण् प्रत्ययो भवति। अञोऽपवादः। आङ्गः। वाङ्गः। सौरमसः। पौण्ड्रः। मागधः। कालिङ्गः। सौह्मः। तस्य राजनीत्येव। आङ्गो राजा॥

वृद्धेत्कोसलाजादाञ्ञ्यङ् ॥ १७१ ॥

* दानं प्रतिग्रहो होमः स्वाध्यायश्च निवर्तते इति पद्यार्धमधिकं कुत्र चित्।

जनपदशब्दात्क्षत्रियादित्येव । वृद्धाच्च प्रातिपदिकादिकारान्ताच्च कोसलाजादशब्दाभ्यां चापत्ये ञ्यङ् प्रत्ययो भवति । अञोऽपवादः । वृद्धात्तावत् । आम्बष्ठ्यः । सौवीर्यः । इकारान्तात् । आवन्त्यः । कौन्त्यः । कोसलाजादयोरवृद्धार्थं वचनम् । कौसल्यः । आजाद्यः । तपरकरणं किम् । कुमारी नाम जनपदसमानशब्दः क्षत्रियस्तस्यापत्यं कौमारः ॥ पाण्डोर्जनपदशब्दात् क्षत्रियाड्ड्यण् वक्तव्यः ॥ * ॥ पाण्ड्यः । अन्यस्मात्पाण्डव एव । तस्य राजनीत्येव । आम्बष्ठ्यो राजा । आवन्त्यः । कौन्त्यः । कौसल्यः । आजाद्यः ॥

कुरुनादिभ्यो ण्यः ॥ १७२ ॥

जनपदशब्दात्क्षत्रियादित्येव । कुरुशब्दान्नादिभ्यश्च प्रातिपदिकेभ्यो ण्यः प्रत्ययो भवति । अणञोरपवादः । कौरव्यः । नकारादिभ्यः । नैषध्यः । नैपथ्यः । तस्य राजनीत्येव । कौरव्यो राजा ॥

साल्वावयवप्रत्यग्रथकलकूटाश्मकादिञ् ॥ १७३ ॥

जनपदशब्दात् क्षत्रियादित्येव । साल्वा नाम क्षत्रिया तन्नामिका तस्या अपत्यं, द्व्यच इति ठक् । साल्वेयः ॥ अथ पीष्यते ॥ साल्वः । तस्य निवासः साल्वो जनपदः । तदव यवा उदुम्बरादयस्तेभ्यः क्षत्रियवृत्तिभ्य इदं प्रत्ययविधानम् । साल्वावयवेभ्यः प्रत्यग्रथकलकूटाश्मकशब्देभ्यश्चापत्ये इञ् प्रत्ययो भवति । अञोऽपवादः । औदुम्बरिः । तैलखलिः । माद्रकारिः । यौगन्धरिः । भौलिङ्गिः । शारदण्डिः । प्रात्यग्रथिः । कालकूटिः । आश्मकिः । तस्य राजनीत्येव । औदुम्बरो राजा ।

> उदुम्बरास्तिलखला मद्रकारा युगन्धराः ।
> भुलिङ्गाः शरदण्डाश्च साल्वावयवसंज्ञिताः ॥

ते तद्राजाः ॥ १७४ ॥

जनपदशब्दात् क्षत्रियादञित्येवमादयः प्रत्ययाः सर्वनाम्ना प्रत्यवमृश्यन्ते, न तु पूर्वे, गोत्रयुवसंज्ञाकाण्डेन व्यवहितत्वात् । ते ऽञादयस्तद्राजसंज्ञा भवन्ति । तथा चोदाहृतम् । तद्राजप्रदेशास्तद्राजस्य बहुषु तेनैवास्त्रियामित्येवमादयः ॥

कम्बोजाल्लुक् ॥ १७५ ॥

जनपदशब्दात् क्षत्रियादित्यनेन विहितस्याञो लुगुच्यते । कम्बोजात्प्रत्ययस्य लुग् भवति । कम्बोजः ॥ कम्बोजादिभ्यो लुग्वचनं चोलाद्यर्थम् ॥ * ॥ कम्बोजः । चोलः । केरलः । शकः । यवनः । तस्य राजनीत्येव । कम्बोजो राजा ॥

स्त्रियामवन्तिकुन्तिकुरुभ्यश्च * ॥ १७६ ॥

* अतिप्राचीनपुस्तकद्वये चशब्दरहितं सूत्रं दृश्यते ।

अवन्तिकुन्तिकुरुशब्देभ्य उत्पन्नस्य तद्राजस्य स्त्रियामभिधेयायां लुग्भवति । अवन्तिकुन्तिभ्यां ञ्यङः कुरोर्ण्यस्य । अवन्ती । कुन्ती । कुरूः । स्त्रियामिति किम् । आवन्त्यः । कौन्त्यः । कौरव्यः ॥

अतश्च ॥ १७७ ॥

स्त्रियामित्येव । अकारप्रत्ययस्य तद्राजस्य स्त्रियामभिधेयायां लुग्भवति । तकारो विस्पष्टार्थः । शूरसेनी । मद्री । दरत् । अवन्त्यादिभ्यो लुग्वचनात् तदन्तविधिरत्र नास्ति । तेनेह न भवति । आम्बष्ठ्या । सौवीर्या ॥

न प्राच्यभर्गादियौधेयादिभ्यः ॥ १७८ ॥

प्राच्येभ्यो भर्गादिभ्यो यौधेयादिभ्यश्चोत्पन्नस्य लुग्न भवति । अतश्चेत्यनेन स्त्रियां लुक् प्राप्तः प्रतिषिध्यते । प्राच्येभ्यः क्षत्रियेभ्यस्तावत् । पाञ्चाली । वैदेही । आङ्गी । वाङ्गी । मागधी । भर्गादिभ्यः । भार्गी । कारूषी । कैकेयी । यौधेयादिभ्यः । यौधेयी । शौभ्रेयी । शौक्रेयी । कस्य पुनरकारस्य प्रत्ययस्य यौधेयादिभ्यो लुक् प्राप्तः प्रतिषिध्यते । पाञ्चमिकस्याञः पर्श्वादियौधेयादिभ्यामणञावित्येतस्य । कथं पुनस्तस्य भिन्नप्रकरणस्थस्यानेन लुक् प्राप्नोति । एतदेव विज्ञापयति पाञ्चमिकस्यापि तद्राजस्यातश्चेत्यनेन लुग्भवतीति । किमेतस्य ज्ञापनेन प्रयोजनं पर्श्वाद्यणः स्त्रियां लुक् सिद्धो भवति । पर्शूः । रक्षाः । असुरी । तथा चोक्तं “यौधेयादिप्रतिषेधो ज्ञापकः पर्श्वाद्यणो लुगिति” । भर्ग । करूष । केकय । कश्मीर । साल्व । सुस्थाल । उरश * । कौरव्य । भर्गादिः । यौधेय । शौभ्रेय । शौक्रेय । ग्रावाणेय । वार्त्तेय । धार्त्तेय । त्रिगर्त्त । भरत । उशीनर । यौधेयादिः ॥

॥ इति काशिकायां वृत्तौ चतुर्थाध्यायस्य प्रथमः पादः ॥

काशिकायाः

चतुर्थाध्यायस्य द्वितीयः पादः ॥

तेन रक्तं रागात् ॥ १ ॥

शुक्लस्य वर्णान्तरापादनमिह रञ्जेरर्थः । रज्यते ऽनेनेति रागः । तेनेति तृतीयासमर्थाद्रागविशेषवाचिनः शब्दाद्रक्तमित्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति । कषायेण रक्तं वस्त्रं काषायम् । माञ्जिष्ठम् । कौसुम्भम् । रागादिति किम् । देवदत्तेन रक्तं वस्त्रम् । कथं काषायौ गर्दभस्य कर्णौ हारिद्रौ कुक्कुटस्य पादाविति । उपमानाद्भविष्यति, काषायाविव काषायौ । हारिद्राविव हारिद्रौ । इपत्रैयाघ्रादञित्यावत्तृतीयासमर्थविभक्तिरनुवर्त्तते ॥

* उरश । पा०२

Digitized by Google

लाक्षारोचनाशकलकर्दमाट्ठक् ॥ २ ॥

लाक्षादिभ्यो रागवचनेभ्यस्तृतीयासमर्थेभ्यो रक्तमित्येतस्मिन्नर्थे ठक् प्रत्ययो भवति । अणोऽपवादः । लाक्षया रक्तं वस्त्रं, लाक्षिकम् । रौचनिकम् । शाकलिकम् । कार्दमिकम् ॥ शकलकर्दमाभ्यामणपीष्यते ॥ शाकलम् । कार्दमम् ॥ नील्या अन् वक्तव्यः ॥ * ॥ नील्या रक्तं नीलं वस्त्रम् ॥ पीतात् कन् वक्तव्यः ॥ * ॥ पीतेन रक्तं पीतकम् ॥ हरिद्रामहारजनाभ्यामञ्वक्तव्यः ॥ * ॥ हारिद्रम् । माहारजनम् ॥

नक्षत्रेण युक्तः कालः ॥ ३ ॥

तृतीया समर्थविभक्तिरनुवर्त्तते । तेनेति तृतीयासमर्थाद् नक्षत्रविशेषवाचिनः शब्दाद् युक्त इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति । योऽसौ युक्तः, कालश्चेत्स भवति । कथं पुनर्नक्षत्रेण पुष्यादिना कालो युज्यते । पुष्यादिसमीपस्थे चन्द्रमसि वर्त्तमानाः पुष्यादिशब्दाः प्रत्ययमुत्पादयन्ति । पुष्येण युक्तः कालः । पुष्यसमीपस्थेन चन्द्रमसा युक्त इत्यर्थः । पौषी रात्रिः । पौषमहः । माघी रात्रिः । माघमहः । नक्षत्रेणेति किम् । चन्द्रमसा युक्ता रात्रिः । काल इति किम् । पुष्येण युक्तश्चन्द्रमाः ।

लुबविशेषे ॥ ४ ॥

पूर्वेण विहितस्य प्रत्ययस्य लुब् भवति अविशेषे । न चेन्नक्षत्रयुक्तस्य कालस्य रात्र्यादिविशेषोऽभिधीयते । यावान् कालो नक्षत्रेण युज्यतेऽहोरात्रस्तस्याविशेषे लुब् भवति । अद्य पुष्यः । अद्य कृत्तिकाः । अविशेष इति किम् । पौषी रात्रिः । पौषमहः ॥

संज्ञायां श्रवणाश्वत्थाभ्याम् ॥ ५ ॥

अविशेषे लुब्विहितः पूर्वेण, विशेषार्थोऽयमारम्भः । श्रवणशब्दादश्वत्थशब्दाच्चोत्पन्नस्य प्रत्ययस्य लुब् भवति संज्ञायां विषये । श्रवणा रात्रिः । अश्वत्थो मुहूर्त्तः । लुपि युक्तवद्भावः कस्मान्न भवति । निपातनाद् विभाषा फाल्गुनीश्रवणाकार्त्तिकीति । संज्ञायामिति किम् । श्रावणी आश्वत्थी रात्रिः ॥

द्वन्द्वाच्छः ॥ ६ ॥

नक्षत्रद्वन्द्वात्तृतीयासमर्थाद्युक्ते काले छः प्रत्ययो भवति विशेषे चाविशेषे च । राधानुराधीया रात्रिः । तिष्यपुनर्वसवीयमहः । अविशेषे । अद्य राधानुराधीयम् । अद्य तिष्यपुनर्वसवीयम् । लुपं परत्वाद् बाधते ॥

दृष्टं साम ॥ ७ ॥

तेनेति तृतीयासमर्थाद्दृष्टं सामेत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति, यद् दृष्टं साम चेत्तद्भवति । क्रुञ्चेन दृष्टं, क्रौञ्चं साम । वासिष्ठम् । वैश्वामित्रम् ॥

कलेर्ढक् ॥ ८ ॥

कलिशब्दात्तृतीयासमर्थाद् दृष्टं सामेत्येतस्मिन्नर्थे ढक् प्रत्ययो भवति । अणोऽपवादः । कलिना दृष्टं साम, कालेयम् ॥ सर्वत्राग्निकलिभ्यां ढग्वक्तव्यः ॥ * ॥ अग्निना दृष्टमाग्नेयम् । एवमग्नौ भवमग्नेरागतमग्नेः स्वमिति सर्वत्र ढगेव भवति । आग्नेयम् । तथा कालेयमपि प्रतिपत्तव्यम् ॥ दृष्टे सामनि अण् वा डिद्भवतीति वक्तव्यम् ॥ * ॥ उशनसा दृष्टं साम, औशनसम् । औशनम् ॥ जाते चार्थे योऽन्येन बाधित पुनरण्विधीयते स वा डिद्भवतीति वक्तव्यम् ॥ * ॥ प्राग्दीव्यतोऽण् प्राप्तः कालठञा बाधितः सन्धिवेलाद्यृतुनक्षत्रेभ्य इति पुनर्विधीयते स वा डिद्भवतीति वक्तव्यम् । शतभिषजि जातः शतभिषः । शातभिषजः ॥ तीयादीकक् स्वार्थे वा वक्तव्यः ॥ * ॥ द्वैतीयीकम् । तार्तीयीकम् । द्वितीयकम् । तृतीयकम् ॥ न विद्यायाः ॥ * ॥ द्वितीया तृतीया विद्या ॥ गोत्रादङ्कवदिष्यते ॥ * ॥ दृष्टं सामेत्यस्मिन्नर्थे । औपगवेन दृष्टं साम औपगवकम् । कापटवकम् । गोत्रचरणाद्वुञ् भवति ।

दृष्टे सामनि जाते च द्विरण्डिद्वा विधीयते ।
तीयादीकक् न विद्याया गोत्रादङ्कवदिष्यते ॥

वामदेवाड् ड्यड्ड्यौ ॥ ९ ॥

वामदेवशब्दात्तृतीयासमर्थाद्दृष्टं सामेत्यस्मिन्नर्थे ड्यत् ड्य इत्येतौ प्रत्ययौ भवतः । अणोऽपवादः । वामदेवेन दृष्टं साम, वामदेव्यं साम । तित्करणं स्वरार्थम् । डित्करणं किमर्थम् । ययतोश्चातदर्थ इति नञ उत्तरस्यान्तोदात्तत्वे विधीयमानेऽनयोर्ग्रहणं मा भूत् । अननुबन्धकग्रहणपरिभाषया एकानुबन्धकग्रहणपरिभाषया चानयोर्निवृत्तिः क्रियते । अवामदेव्यम् ।

सिद्धे यस्येति लोपेन किमर्थं ययतौ डितौ ।
ग्रहणं माऽतदर्थे भूद्वामदेव्यस्य नञ्स्वरे ॥

परिवृतो रथः ॥ १० ॥

तेनेति तृतीयासमर्थात्परिवृत इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति, योऽसौ परिवृतो रथश्चेत्स भवति । वस्त्रेण परिवृतो रथः, वास्त्रो रथः । काम्बलः । चार्मणः । रथ इति किम् । वस्त्रेण परिवृतः कायः । समन्ताद्वेष्टितः परिवृत उच्यते । यस्य न कश्चिदवयवो वस्त्रादिभिरवेष्टितः । तेनेह न भवति । छात्रैः परिवृतो रथः ॥

पाण्डुकम्बलादिनिः ॥ ११ ॥

पाण्डुकम्बलशब्दात्तृतीयासमर्थात्परिवृतो रथ इत्येतस्मिन्नर्थे इनिः प्रत्ययो भवति । अणोऽपवादः । पाण्डुकम्बली । पाण्डुकम्बलिनौ । पाण्डुकम्बलिनः । पाण्डुकम्बलशब्दो राजा-

Digitized by Google

स्तरणस्य वर्णकम्बलस्य वाचकः । मत्वर्थीयेनैव सिद्धे वचनमणो निवृत्त्यर्थम् ॥

द्वैपवैयाघ्रादञ् ॥ १२ ॥

द्वीपिव्याघ्रयोर्विकारभूते चर्मणी द्वैपवैयाघ्रे, ताभ्यां तृतीयासमर्थाभ्यां परिवृतो रथ इत्येतस्मिन्नर्थे ऽञ् प्रत्ययो भवति । अणोपवादः । स्वरे विशेषः । द्वैपेन परिवृतो रथो द्वैपः । वैयाघ्रः ॥

कौमारापूर्ववचने ॥ १३ ॥

कौमार इत्येतदण्प्रत्ययान्तं निपात्यते ऽपूर्ववचने । पाणिग्रहणस्यापूर्ववचनम् । उभयतः स्त्रिया अपूर्वत्वे निपातनमेतत् । अपूर्वपतिं कुमारीं पतिरुपपन्नः कौमारः पतिः । कुमारीशब्दाद् द्वितीयासमर्थादुपयन्तरि प्रत्ययः । अपूर्वपतिः कुमारी पतिमुपपन्ना कौमारी भार्या । प्रथमान्तादेव स्वार्थे प्रत्ययो ऽपूर्वत्वे द्योत्ये ।

कौमारापूर्ववचने कुमार्या अणिवधीयते ।
अपूर्वत्वं यदा तस्याः कुमार्या भवतीति वा ॥

कुमार्या भवः कौमारः पतिः, तस्य स्त्री कौमारी भार्येति सिद्धम् ॥

तत्रोद्धृतममत्रेभ्यः ॥ १४ ॥

तत्रेति सप्तमीसमर्थादमत्रवाचिनः शब्दादुद्धृतमित्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति । भुक्तोच्छिष्टमुद्धृतमुच्यते, यस्योद्धरणमिति प्रसिद्धिः । अमत्रं भाजनं पात्रमुच्यते । शरावेषूद्धृतः शाराव ओदनः । माल्लिकः । कार्परः । अमत्रेभ्य इति किम् । पाणावुद्धृत ओदनः । तत्रेति सप्तमी समर्थविभक्तिः चीराड्ढञिति यावदनुवर्त्तते ॥

स्थण्डिलाच्छयितरि व्रते ॥ १५ ॥

स्थण्डिलशब्दात्सप्तमीसमर्थात् शयितर्यभिधेये यथाविहितं प्रत्ययो भवति, समुदायेन चेद्व्रतं गम्यते । व्रतमिति शास्त्रतो नियम उच्यते । स्थण्डिले शयितुं व्रतमस्य स्थाण्डिलो भिक्षुः । स्थाण्डिलो ब्रह्मचारी । व्रतइति किम् । स्थण्डिले शेते ब्रह्मदत्तः ॥

संस्कृतं भक्षाः ॥ १६ ॥

तत्रेति सप्तमीसमर्थात्संस्कृतमित्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति यत्संस्कृतं भक्षाश्चेत्ते भवन्ति । खरविशदमभ्यवहारार्थं भक्षमित्युच्यते । सत उत्कर्षाधानं संस्कारः । भ्राष्ट्रे संस्कृता भक्षा भ्राष्ट्रा अपूपाः । कालशाः । कौम्भाः । भक्षा इति किम् । पुष्पपुटे संस्कृतो मालागुणः ॥

शूलोखाद्यत् ॥ १७ ॥

शूलशब्दादुखाशब्दाच्च सप्तमीसमर्थात्संस्कृतं भक्षा इत्येतस्मिन्नर्थे यत् प्रत्ययो भवति । अणोपवादः । शूले संस्कृतं शूल्यं मांसम् । उख्यम् ॥

दध्नष्ठक् ॥ १८ ॥

दधिशब्दात्सप्तमीसमर्थात्संस्कृतं भक्षा इत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति । दध्नि संस्कृतं, दाधिकम् । ननु च संस्कृतार्थे प्राग्वहतेष्ठकं वक्ष्यति तेनैव सिद्धम् । न सिद्ध्यति । दध्ना हि तत्संस्कृतं यस्य दधिकृतमेवोत्कर्षाधानम्, इह तु दधि केवलमाधारभूतं द्रव्यान्तरेण लवणादिना संस्कारः क्रियते ॥

उदश्वितो ऽन्यतरस्याम् ॥ १९ ॥

उदश्विच्छब्दात्सप्तमीसमर्थात्संस्कृतं भक्षा इत्येतस्मिन्नर्थे ऽन्यतरस्यां ठक् प्रत्ययो भवति । पक्षे यथाप्राप्तमण् भवति । औदश्वितम् । औदश्वित्कम् ॥

क्षीराड्ढञ् ॥ २० ॥

क्षीरशब्दात्सप्तमीसमर्थात्संस्कृतं भक्षा इत्येतस्मिन्नर्थे ढञ् प्रत्ययो भवति । अणोपवादः । क्षीरे संस्कृता, क्षैरेयी यवागूः ॥

॥ अथानन्दवृन्दावनचम्पूकाव्यस्य ॥

॥ सप्तमस्तबकावशेषः ॥

रंहःसंघेन सैंहाः शिशव इव महासिंहशावोत्तमेन
प्रत्यग्रोदग्रजाग्रन्मदकरिकलभेनेव मत्तद्विपार्भाः ।
मूर्तानन्देन मूर्ता इव रभसरसा ग्राम्यबालेन सर्वे
ग्राम्या बाला इवामी वनभुवि कुतुकात् तेन सार्धं विजह्रुः ॥७१॥

प्रत्यग्रेण· अभिनवेन, उदग्रमुन्नतं यथा स्यात् तथा जाग्रता मत्तकरिशावकेन रभसरसा हर्षरसमयाः ॥ ७१ ॥

अथ सर्वे एव परस्परं मन्त्रयन्तः ।

कृष्णस्तरस्वी किमहो वयं वा
जानीत भो भ्रातर इत्युदीर्य ।
धावन्त एते त्वरयापि यान्तं
श्रीकृष्णमारादतिचक्रमुस्तम् ॥ ७२ ॥

तरस्वी वेगवत्तरः ॥ ७२ ॥

एवं श्रीकृष्णस्याग्रतोऽग्रतो जागरूकस्य धावमानाः कियति दूरे बकीबकयोरासादितमृत्युगर्भयोः सगर्भयोः समवर्तिसदनवर्तितया जनितयोः क्रोधशोकयोः कयोश्चिदतिशयावेगेन वेगेन वैरशुद्धिकामं कामं क्रूरमतिम-

तिपामरमरमेव तमध्वानमध्वानमाक्रम्य वर्तमानमानतमधिधरमधरमधिगगनोर्ध्वमूर्ध्वमूर्धतयोष्ठमाधाय ग्रसितुमिव चरं चरन्तमाविरिञ्चममरचयं रचयन्तं मूर्तमघमघनामानमसुरं निरीक्ष्य वर्णयामासुः ॥ ७३ ॥

कृष्णस्य कीदृशस्य, अजायाः प्रकृतेरजस्य ब्रह्मणो वा अग्रतोऽग्रे जागरूकस्य। अग्रे धावमाना अघनामानमसुरं वीक्ष्य वर्णयामासुः। बकी पूतना बकश्च तयोः सगर्भयोः सोदरयोः, समवर्तिपदवर्तिता यमगृहवासः, "समवर्ती परेतराट्"इत्यमरः, तया जनितयोः क्रोधशोकयोरतिशय आवेगस्तेन हेतुना। वेगेन शीघ्रं, वैरशुद्धिः प्रतीकारस्तां कामयत इति तं, क्रूरमतिं घातुकधियम्, अरमेव क्षिप्रमेव, तं प्रसिद्धमध्वानं पन्थानम्, अध्वानं निःशब्दं यथा भवत्येवमाक्रम्य। केन प्रकारेण, अधिधरं धरा पृथ्वी तस्याम्, आनतं सम्यङ्नतम्, अधरम्, आधाय, अर्पयित्वा। तथा, अधिगगनोर्ध्वं गगनादप्यूर्ध्वप्रदेशे, ऊर्ध्वमूर्धतया, ऊर्ध्वमस्तकत्वेन, ओष्ठम्, आधाय। चरं चराचरं, "चरमिङ्गं चराचर"मित्यमरः, ग्रसितुमिव वर्तमानम्। आविरिञ्चं विरिञ्चपर्यन्तम्, अमरचयं चरन्तं त्रासयुक्तं रचयन्तं कुर्वन्तम् ॥ ७३ ॥

अहो विचित्रेयं गिरिदरी दृश्यते, पश्यत पश्यत, श्यत श्यत च विभ्रमं, विभ्रमं चास्या वीक्ष्य कौ-तु-के कौतुकेन नोपरुध्यन्ते, येयं महाव्यालस्य व्यालस्यविवृततुण्डशोभामालम्बते ॥ ७४ ॥

विशिष्टं भ्रमं श्यत श्यत दूरीकुरुत, "शो तनूकरणे" दिवादिः। अस्या गिरिदर्या विभ्रमं शोभाम्। या, इयं महाव्यालस्य महासर्पस्य विशिष्टेन, आलस्येन हेतुना विवृतं यत् तुण्डं तस्य शोभाम् ॥ ७४ ॥

यथा तस्य दंष्ट्रावली तथास्या उभयतो भयतोषकराणि शृङ्गाणि, यथा च तस्य भयराजिह्वा जिह्वाद्वयी तथास्या मरुदान्दोलिता योजनवल्लीवल्लीद्वयी बहिः स्फुरति, यथा च तस्य विषमविषमहाग्निकणास्तथास्या विविधधातुकणा बहिर्निःसरन्ति ॥ ७५ ॥

भयतोषकराणि वैकट्यादुच्चम्, अद्भुतत्वात् तोषं च कुर्वन्ति। भयानां राजिं श्रेणिं ह्वयत इति सा। योजनवल्लीवल्ली मञ्जिष्ठालता, "योजनवल्ल्यपि मञ्जिष्ठे" त्यमरः ॥ ७५ ॥

तस्य महाकाकुदकाकुदवदस्या उपरितनकुरुविन्दशिलाविलासः, तस्याधमधमनिवदस्याः कुहरहरणोन्मुखी नानालताविततिः ॥ ७६ ॥

महाकाकुदम्, अतिभयशोकविकारप्रदं यत् काकुदं तालु तद्वत्, "तालु तु काकुद"मित्यमरः। अधमधमनिवत् कुत्सितनाडीवत्, कुहरं विवरं प्रति हरणोन्मुखी, आकर्षणोन्मुखी ॥ ७६ ॥

उपरि चोभयतो लोभयतो लोचने लोचने इव तस्यास्याः कमलरागमणीन्द्रौ, देदीप्यन्तेऽप्यन्ते तस्य श्वासा इव विधुतोपवनाः पवनाः, तस्य विषानलधूमधूमलाः कान्तय इवास्या मारकतमणिदीधितयः, तन्नूनमियं व्यालतुण्डाकृतिर्गिरिकन्दरा कन्दरातुरं करोतु ॥ ७७ ॥

तस्य सर्पस्य लोचने रोचने रुचियुक्ते, लोचने नेत्रे इव। कीदृशस्य, लोभयतो लोभं यतः प्राप्नुवतः। तस्य श्वासा इव, अन्तेऽपि, अस्याः पवना देदीप्यन्ते, अतिशयेन प्रकाशन्ते। विशेषेण धुतानि खण्डितानि, उपवनानि यैरिति खरतरत्वम्। * कं दरातुरं भयातुरं करोतु, अपितु न कमपीत्यर्थः, "दरोऽस्त्रियां भये श्वभ्रे" इत्यमरः ॥ ७७ ॥

तत् सांप्रतं सांप्रतं ह्येवात्र प्रवेश इति निश्चित्य पुनः संदिग्धया दिग्धया च साध्वसेन धिया पुनरन्योन्यमरे भ्रातरः सत्यमेव यदि बलवदुपसर्पः सर्पः स्यादयं तदा प्रियसहचरो नः सकलवैरिलावको वकोपममेनं मारयिष्यति तारयिष्यति तावदस्मानपि न-पिधापनीयोऽयमर्थः करेण केनापीति कलितकरतालतालललितं भगवति कृतविश्वस्तताश्वस्तताबलेन यावदनेन चारुचारेण न निषिध्यते तावदेव देवतनयप्रतीकाशास्ते तदाननविवरं प्रविविशुः ॥ ७८ ॥

अत्र सांप्रतमिदानीं प्रवेशः सांप्रतमेव योग्य एवेत्यर्थः, "सांप्रतं चाधुनार्थे स्याद्युक्तार्थेऽपि च सांप्रत"मिति विश्वः। न पिधापनीयो न, आच्छादयितुं शक्यः, सर्वैरेव शश्वदेव प्रकटमेवोपलभ्यमानत्वादिति भावः। इति हेतोः कलितः करे सर्पापसर्पणार्थमिव तालो यैस्तेषां भावस्तत्ता तया ललितं यथा स्यात् तथा विश्वस्तता विश्वासस्तया, आश्वस्तता, आश्वासस्तद्बलेन। अनेन श्रीकृष्णेन ॥ ७८ ॥

तदनु तदनुपदमेव मा विशत मा विशत भो व्यालोऽयं व्यालोऽयमिति सार्तस्वरं स्वरन्तरचारिमधुरघोषो घोषराजतनयो नयोद्धुरं यावदुवाच तावदेव ते तदाननप्रवेशमात्रेणैव विषज्वालया लयीकृतसकलेन्द्रियाः कृष्णा एवासन् कैः श्रोतव्यं तद्वचनम् ॥ ७९ ॥

स्वः स्वर्गस्य, अन्तरचारी मध्यगामी मधुरघोषो यस्य सः ॥ ७९ ॥

* मूले संधिर्यमकानुरोधात् प्राप्वत्।

इत्यवसरे स रेरीयमाणनयनाम्बुरिव करतभ्युतान् निधीनिव ताननुशोचन्नतिकरुणोऽतिकरुणो युगपदेषां जीवनमस्य च मरणं कथं स्यादिति चिन्तितकार्यद्वयोऽद्वयो मतोभययोगे योगेश्वरस्तदनुपदमेव तदाननं विवेश ॥ ८० ॥

रेरीयमाण इति, "रीङ् स्रवणे" यङन्तः । अतिकरुणोऽत्या- अतिकृपोद्गमेन हेतुना करुणः शोकवान् । अद्वय एकाकी । मतयोः संमतयोरुभयोः सखिजीवनदुष्टमरणयोर्योगे विषये योगेश्वरः परमसमर्थः ।

यद्वा सखीनां रक्षणेन दुष्टस्य च मोक्षदानेन यदभयं तस्य योगे मतः संमतः ॥ ८० ॥

तदा तदाननं विशति भगवति ।

हाहाकारो दिवि दिविषदामुच्चचारानुतापै-
र्हीहीकारोऽसुरपरिषदां सप्रकर्षः प्रहर्षैः ।
योगे योगेश्वरपरिवृढस्तद्वयस्यातिहेलो
व्यत्यासेन स्वयमुपदधे मानसं मानसंधः ॥ ८१ ॥

तद्वयस्य हाहाकारहीहीकारयोर्व्यत्यासेन विपर्यासेन योगे विषये मानसं चित्तमुपदधे, अधुना असुराणां हाहाकारो भवतु दिविषदां तु हीहीकार इत्येवम् । यतो मानसंधः- मानं संमानं विजयरूपप्रशंसामेव सम्यग्धत्ते न तु पराजयरूपमवमानमिति सः ।

यद्वा माने संधा मर्यादा यस्य सः, "संधा प्रतिज्ञा मर्यादे"त्यमरः ॥ ८१ ॥

स च महाव्यालो महाव्यालोलमना भगवत्प्रवेशापेक्षया अपाय चात्मनो न तावत् संवचार वदनम् ॥ ८२ ॥

न संववार न संवृतवान् ॥ ८२ ॥

प्रविष्टे तु भगवति कृतार्थमात्मानं मन्यमानो मानोद्धतधीरधीरतयेव शाम्बरीवरीयान् वदनं संवरीतुमना मनागपि न शशाक ॥ ८३ ॥

मानोद्धतधीर्गर्वोद्धतबुद्धिः । शाम्बरी माया ॥ ८३ ॥

भगवति कृतो हि भावोऽभावोपयोगी न भवतीति तथैव व्यात्ताननो न नोदयितुमशकदात्मनो व्यात्ताननताम् ॥ ८४ ॥

अभावोपयोगी नाशवान् न भवतीति दृष्टान्तीभूत उत्प्रेक्ष्यत इति भावः । न नोदयितुं न दूरीकर्तुम् ॥ ८४ ॥

अन्तर्गलं कीलायमाने कीलायमानेन तेजसा दहति हतिसरसं समेधमाने निखिलकलासोभमवति भगवति सकरुणारुणापाङ्गतरङ्गरिङ्गत्सुधासुधारया सहचरान् जीवयति यतिहृदयेऽपि घृणीयमाने तदन्तरेऽपि समेधमाने स महामहिमा परिपच्यमानकर्कटीफलवदुत्पपाट ॥ ८५ ॥

अन्तर्गलं गलमध्ये कीलायमाने कीलतुल्ये भगवति हतिसरसं यथा स्यात् तथा वर्धमाने सति, कीलायमानेन वह्निज्वालासदृशेन "वह्नेर्द्वयोर्ज्वालकीला"वित्यमरः । सकरुणस्यारुणापाङ्गस्यानुरागिणेत्रान्तस्य तरङ्गाद् रिङ्गन्त्याः प्रसरन्त्याः सुधायाः सुन्दरधारया यतिनां संन्यासिनां हृदयेऽपि घृणीयमाने घृणां कुर्वति, जुगुप्सयेव तत्र प्रवेष्टुं संकुचतीत्यर्थः । तस्याघासुरस्यान्तरेऽपि सम्यग्वर्धमाने, दुर्वितर्क्यचरितत्वादिति भावः । अतः सःअघासुरः, स्तव्य इति भावः ॥ ८५ ॥

पाटिते च तस्य तस्मिन् देहे विबुधद्रुहि द्रुहिणतुहिनकिरणशेखरशतमखमुखमुखरितजगत्पावनम्लवनमालिनि वनमालिनि प्रवेष्टुकामं तन्महो महोज्ज्वलं सूर्याचन्द्रयोरन्यतरदिव तरदिव गगनसरोवरं निरवलम्बनमेव तावदासीत् ॥ ८६ ॥

द्रुहिणो ब्रह्मा, तुहिनकिरणशेखरो महेशः, शतमख इन्द्रः, तस्याघासुरस्य महः जीवरूपं तेजः, तस्यादृश्यत्वेऽपि तन्मात्रे संदिहानानां कुतर्कभृतां विज्ञमानिनां मुखमोटनार्थं भगवदिच्छयेव दृश्यत्वं, गगनमेव सरोवरं तत् तरदिव पारं गच्छेदिव ॥ ८६ ॥

यावत् तदवस्थावस्थानचटुलस्य दीर्घाभोगस्य भोगस्य कुहरतो हरतो गिरिदरीशोभामुदयगिरिमहुराद्गभस्तिमालीव वनमाली समुज्जिहीते ही तेऽपि शिशवो लब्धजीविता जीविताधिनाथात् प्रागेव बहिर्भूताः ॥ ८७ ॥

तदवस्था मरणदशा तस्या अवस्थानेन हेतुना चटुलस्य चंचलस्य, दीर्घ आभोगः परिपूर्णता यस्य तस्य भोगस्य फणस्य, ही विस्मये ॥ ८७ ॥

तदनु बहिर्भूते भूतेशादिनुतचरणे भगवति सुरासुरादिभिर्दरीदृश्यमानमेव तन्महो नवजलदमेदुरे तस्मिन्नेव लयमाससाद, किमहो वर्णनीयं तस्य महानुभावस्य चरितं यदसौ प्रथममात्मनि भगवन्तं निवेश्य पुनर्भगवत्येव स्वयं निविविशे, इति ॥ ८८ ॥

नुतचरणे स्तुतपदे ॥ ८८ ॥

ततश्च ।

भेरीभांकाररावैः पटुपटहघनाघातसंघातघोरै-
रुद्दण्डैर्डिण्डिमानां ध्वनिभिरविरलैर्दुन्दुभीनां प्रणादैः ।

गानैर्गन्धर्वविद्याधरतुरगमुखप्रेयसीनां मुनीनां
स्तोत्रैः शब्दान्तरेषु क्षणमिव बधिराः स्वर्गिणस्ते बभूवुः॥८९॥

तुरगमुखप्रेयस्यः किंनर्यः, शब्दान्तरेषु॰ अन्यशब्दविषये, क्षणं व्याप्य बधिरा इव ॥ ८९ ॥

उर्वश्याद्या ननृतुरभितः सिद्धवध्वो बभूवु-
र्मोदेङ्गिन्यो जगुरतिकलं सुभ्रुवः किंनराणाम् ।
देव्यो देवद्रुमसुमनसां वर्षमुच्चैर्वितेनु-
र्मत्तेवासीदमरनगरी सा गरीयःप्रमोदैः ॥

किं बहुना ।

भ्राम्यच्चूडाग्रचन्द्रस्खलदमृतरसेनाप्लुतैर्मुण्डमाला-
मुण्डैर्लब्ध्वा शरीरं नटनपटु नरीनृत्यमानैः परीतः ।
चण्डैरट्टाट्टहासैर्डमरुडिमिडिमित्कारसंस्कारसारैः
कुर्वन्ब्रह्माण्डभाण्डस्फुटितमुदतनोत्ताण्डवं चण्डिकेशः॥९०

अतिप्रचण्डनृत्यावेशे जाते सति भ्राम्यतश्चूडाग्रवर्तिनश्चन्द्रात् स्खलता॰ अमृतरसेन॰ आप्लुतैरत एव मुण्डमालास्थमुण्डैः शरीरं लब्ध्वा नटनपटु यथा स्यात् तथा॰ अतिशयेन नृत्यद्भिः परीतो युक्तः ॥ ९० ॥

अथ मृत्युमुखादागता इव ते बाला बालातपोज्जृम्भमाणकमलनयनं नयनन्दितभुवनं व्रजराजकुमारं सुखवैवश्येनैकैकश्येन परिरभ्य सखे सखेलं विषमविषमहानलज्वालावलीढानस्मान् कथमजीवयद्भवानिति भगवन्तमूचुः, स च सचमत्कारं तानगददगददक्षोऽस्मि विषस्य, येनागदेन नागदेन गन्धमात्रादेव गतासवोऽवगतासवोत्सवा इव समुल्लसितजीवना भवन्तीति ॥ ९१ ॥

विषस्य॰ अगदे॰ औषधे दक्षोऽस्मि, येन॰ अगदेन नागदेन नागं सर्पं द्यति खण्डयतीति तेन गतासवो गतप्राणा अपि जना अवगतः॰ अनुभूतः॰ आसवोत्सवो मधुपानोत्सवो यैस्तथाभूता इव ॥ ९१ ॥

तदुदितमुदितमुदाकर्ण्य परस्परमपि परमपिहितसौहृदा हृदा निर्भरमालिङ्ग्य भो भो भ्रातरस्तदेव देवज्ञा इव वयमवोचाम बकमिवामुमयं निहनिष्यतीति जगदुः ॥ ९२ ॥

तदुदितं तस्मिन् कृष्णे॰ उदितं कृतोदयम्॰ उदितं वाक्यं, न पिहितं न॰आच्छन्नं सौहृदं येषां ते ॥ ९२ ॥

जगदुत्तरचरितेन तेन भगवता दिष्ट्या दिष्टातिशयवन्तस्ते तत इतो विभ्रमरान् भ्रमरानिव वत्सान् यूथीकृत्य व्रजपुरपुरंदरमहिषीदत्तान्नपानादिविहङ्गिका विहङ्गिकानिकरैरथरक्ष्यमाणाः समानीय च भगवन्तमनुसस्रुः ॥ ९३ ॥

जगदुत्तरं लोकोत्तरं चरितं यस्य तेन भगवता दिष्ट्या आज्ञप्ताः, दिष्टं भाग्यं तदतिशयवन्तः, भ्रमरान् मृगभेदानिव विभ्रमरान् विशिष्टकूर्दनादिगतिशीलान्, तेषामप्यघोदरप्रवेशमहाविपन्मोचनादेव हर्षोद्रेकादिति भावः । विहङ्गिकाः पक्षिस्त्रियः ॥ ९३ ॥

तदनन्तरमनन्तरहसा करुणाचारुणा चामीकरवसनेन सवत्सवत्सपेन निर्जनं भोजनभोचितं स्थलमनुसंदधता दधता च वयस्यान् प्रति प्रणयं कियता दूरेण सरसः सरसः पुलिनपरिसरो ददृशे ॥ ९४ ॥

अनन्तरहसा॰ असंख्यरहस्येन । यद्वा, अनन्तस्य संकर्षणस्याप्यतिगुह्येन, अज्ञाये बलदेवेनाप्यज्ञास्यमानत्वात्, "रहोऽतिगुह्ये सुरते वसन्ते" इति विश्वः । चामीकरं कनकम् । भोजनस्य भा शोभा तदुचितम् । सरसस्तडागस्य पुलिनपरिसरः । कीदृशः, सरसः ॥ ९४ ॥

दृष्ट्वा च भो भोः सवयसो वयसोऽपि नात्र संचारो वर्तते, नयनप्रमोदजननी जननीक्रोडवदतिविश्वसनीयेयं पुलिनपदवी, पदवीथी क्वापि न दृश्यतेऽत्र लोकस्य, तदिहैव भोक्तव्यं, तदिममभ्यासमभ्यासन्नं चरन्तु वत्सगणाः, वयमपि भुञ्जामहे ॥ ९५ ॥

वयसोऽपि पक्षिणोऽपि । तस्मादिमं प्रदेशम्॰ अभ्यासन्नं सर्वतोभावेन निकटं चरन्तु । कीदृशम्, अभ्यासम्॰ अभीर्निर्भय एव॰ आस उपवेशो गतिर्वा यत्र तम् ॥ ९५ ॥

इति निगदति जगदतिजरीजृम्भ्यमाणविचित्रचरित्रे भो वयस्य वयमप्यशनायया नाययामह इव कष्टेनैव कालं, नहि समया समयान्तरं भोजनमपेक्षणीयं, तदेव मे वचनमिति सरसमेकैकश्येन वदति सहचरचये ॥ ९६ ॥

अशनायया बुभुक्षया, "अशनाया बुभुक्षा क्षु"दित्यमरः । नाययामह इति, कालोऽस्मान् नयति तं वयं नाययामह इति णिच् प्रत्ययः । समया समयान्तरं समयान्तरस्य निकटे॰ इत्यर्थः । समयाशब्दयोगे॰"अभितः परितः॰" इत्यादिना द्वितीया ॥ ९६ ॥

रचयेयमत्र भोजनस्थलमिति मितिरहितमहिम्ना तेन घनतरतरुतरुणच्छायाच्छायामे घनसारसारधूलीधवलेऽवलेपरहिते हिते पुलिने विकचकमलकमलशीकरनिकरनिर्भरपवमानमाननीये सौगन्धिकगन्धिकमनीये मध्य-

मध्यवस्थितौ कृतायां तेऽपि परितोऽवतस्थिरे स्थिरेणैव मनसा ॥ ९७ ॥

मितिरहितमहिम्ना अपरिमितमहिम्ना तेन श्रीकृष्णेन अत्र भोजनस्थलं रचयेयम् इत्युक्त्वा तत्र पुलिने मध्यमधिरुह्य अवस्थितौ कृतायां सत्यां तेऽपि सहचराः परितोऽवतस्थिरे इत्यन्वयः । कीदृशे पुलिने, घनतराणां तरुतरुणानां भोजनापेक्षणीयवितानकार्यकारिणां छायाभिरच्छो निर्मल आयामो यस्य तस्मिन्, इत्यातपराहित्येन सुखदत्वं, "दण्डकावनशिखण्डिद्रुवान" इत्यादिवत् तरुणशब्दस्य परनिपातः । घनसारेति सुखस्पर्शेन सौगन्ध्येन च । अङ्कलेपरहित इति पावित्र्येण । हिते इत्यशङ्कास्पदत्वेन । विकचानि प्रफुल्लानि कमलानि पद्मानि यत्र तथाभूतस्य कमलस्य जलस्य शीकरनिकराणां निर्भरो यत्र तेन पवमानेन पवनेन भोजनापेक्षणीयशिशिरव्यजनकार्यकारिणा माननीये, "सलिलं कमलं जल"मित्यमरः । सौगन्धिकस्येव गन्धोऽस्येति सौगन्धिकगन्धि च तत् कमनीयं चेति तस्मिन्निति भोजनापेक्ष्यधूपादिसौरभ्यवत्त्वेन अत्र यमकानुरोधेन विधेयांशाविमर्शः सोढव्यः ॥ ९७ ॥

सहस्रपत्त्रसहस्रपत्त्रीव सा मण्डली व्यराजत राजतपयसा धौत इव तत्र पुलिनोदरे ॥ ९८ ॥

सहस्रपत्त्रस्य कमलस्य, सहस्रपत्त्री सहस्राणां पत्त्राणां समाहारः सहस्रपत्त्री, सेव । राजतेन रजतविकारेण जलेन धौते प्रक्षालिते इव ॥ ९८ ॥

किंजल्कावृतविलक्षणबीजकोष इव कनकरुचिरुचिराम्बरो भगवान् सुपरिच्छदच्छदपङ्क्तय इव शिशवः ॥ ९९ ॥

बीजकोषः कर्णिका, विलक्षण इति, श्यामवर्णत्वात् ॥ ९९ ॥

तत्र च सद्भावलया वलयाकारास्त्रिचतुरास्त्रिचतुराभाः पङ्क्तयः ॥ १०० ॥

सद्भावेन लयः संश्लिष्टसंनिवेशो यासां ताः, तिस्रो वा चतस्रो वा त्रिचतुराः पङ्क्तयः । कीदृश्यः, त्रिचतुरा आभाः कान्तयो यासां ताः । प्रथमा पङ्क्तिः पीता द्वितीया रक्ता तृतीया श्यामा इत्येवं तिस्र आभाः । तथा चतुर्थी श्येनी हारिती वेति ॥ १०० ॥

तासां च प्रणयभुव्यवहितानां व्यवहितानां च परस्परं प्रतिजनमभिमुखमुखकमलतया वर्तमानः प्रत्येकं ममैवायमभिमुखमुख इत्यभिमानमानयन् सर्वतोऽक्षिशिरोमुखमिति प्राचां वाचां सान्वयमभिनयन् भोभो भोभोज्ज्वलनिष्का निष्कासयत भक्ष्यसामग्रीमग्र्यामिति श्रीकृष्णो यदा निजगाद ॥ १०१ ॥

व्यवहितानां व्यवधानेन स्थितानामपि तासां, चकारोऽप्यर्थे, प्रणयस्य भुवि सत्तायां प्राप्तौ वा अव्यवहितानां क्षावधानानां, प्रतिजनम् एकैकस्य जनस्य,

"सर्वतः पाणिपादं तत् सर्वतोऽक्षिशिरोमुखम् ।
सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति" ॥

इति वाचामिव अन्वयमभिनयन् अभिनयेन दर्शयन्, इवार्थे वाकारः, भोभो इत्यतिहर्षेण द्वित्वं, भां शोभाम् उर्भन्ति पूरयन्तीति भोभाः, अत एव उज्ज्वला निष्काः पदकानि येषां ते, अग्र्याम् उत्तमाम् ॥ १०१ ॥

तदैव शिक्यतो निष्कास्य केचित् सुपरिच्छदेषु च्छदेषु केचित् कुसुमेषु कुसुमेषु केचिद्विमलताखण्डेषु लताखण्डेषु केचन सुरश्मिषु रश्मिषु केचन अचलेषूपलेषूत्तमेषु केचिदतिस्तवकेषु स्तवकेषु केचित् सत्त्वत्करसंस्पर्शनफलेषु फलेषु केचिदचञ्चलेष्वञ्चलेष्वमलवसनानां केचित् सुरेखानिकरेषु करेषु केचिदुरुषूरुषूपनिधाय निजनिजभोज्यादग्र्यमग्र्यमतिशयसारं श्रीकृष्णाय पत्रपुटकेषु निधायोपकल्पयामासुः ॥ १०२ ॥

छदेषु पत्त्रेषु । कुसुमेषु कौ पृथिव्यां शोभना मा शोभा येषां तेषु । विमलतया नैर्मल्येन अखण्डेषु पूर्णेषु । सुरश्मिषु सुकान्तिषु रश्मिषु रज्जुषु । उपलेषु प्रस्तरेषु । अतिस्तवकेषु अतिस्तुतिमत्सु स्तवकेषु कुड्मलेषु । सुलक्षणो रेखानिकरो येषु तेषु । उरुषु बृहत्सु । उपनिधाय,भक्षणसामग्रीमिति पूर्वेणानुषङ्गः । अग्र्यम् अग्रभवं भागम् ॥ १०२ ॥

स च भगवान् मधुरमधुरवचनपेशपेशलमधुरिमसुधासुधाराधौतदशनवसनतयातिचारुतायामिह सन् हसन् हासयन् स यन् परमकौतुकम् ॥ १०३ ॥

स च भगवान् बुभुजे । कीदृशः, मधुरमधुरो वचनपेशः "पिश अवयवे" वाक्यावयव इत्यर्थः, स एव पेशलमधुरिमा शोभनमाधुर्या सुधाधारा अमृतस्य धारा तया धौते प्रक्षालिते दशनवसने ओष्ठाधरौ यस्य तस्य भावस्तत्ता तया हेतुना इह भोजनावसरे अतिचारुताया मतिसौन्दर्ये सन् वर्तमानो, हसन् सखीनां नर्मोक्त्या, हासयन् स्वकृतनर्मभिः, सखीनित्यर्थः । स श्रीकृष्णः । यन् गच्छन् प्राप्नुवन्नित्यर्थः ॥ १०३ ॥

दरोदरोपनीविनिहितमुरलीकोऽलीकोऽक्षितलवणो कक्षतलेऽक्षतलेलिप्यमानमधुरिमणि विन्यस्तवेत्रविषाणः करतले परमाभिरामे वामेऽवात्तदध्योदनकवलोऽवलोलेषु तदङ्गुलिदलेषु कृतसंधानफलविशेषोपलभ्यमानसौन्दर्यलक्ष्मीको दिवि दिविषद्वृन्दवृन्दारकैः ॥ १०४ ।

दरोदरं कृशोदरम्· उपनीवि नीविनिकटं च तयोर्निहिता मुरली येन सः । तथा कक्षतले विन्यस्ते वेत्रविषाणे येन सः । कीदृशे, अलीकोज्झितं सत्यमेव लवणं सामुद्रकोक्तं यत्र तस्मिन् । अक्षतं यथा भवत्येवं लेलिह्यमानः·अतिशयेन लिह्यमानः· मधुरिमा यत्र तस्मिन् । तथा करतले· अग्रतो गृहीतो दध्योदनकवलो येन सः । वामे इति कक्षतलकरतलयोर्विशेषणम् । अवेत्यस्य· अकारलोपे नञा· अवलेाेषु,अवत्वलोष्वित्यर्थः। संधानफलं तैलसंधितकरञ्ज करीरादि । वृन्दारकैः श्रेष्ठैः ॥ १०४ ॥

कमलजशितिकण्ठपुरंदरादिभिरमरनगरनागरीभिरपि सकौतुकमालोक्यमानोऽलोक्यमानो निजनिजभक्ष्यमाधुर्यधुर्यताप्रख्यापनपननंचतुरैर्हसद्भिः सद्भिः शिशुभिर्हास्यमानो भुञ्जानैः सह सहचरैः स्मितलेशपेशलवदनकमलो बुभुजे भुजेन चलता दक्षिणेन कथान्तरमप्यन्तरान्तरा कथयन् सहचराणामतीव हृदयावगाही बभूव च ॥ १०५ ॥

न लोक्यं लौकिकं मानं प्रमाणं यस्य सः । निजनिजभक्ष्यस्य वस्तुनो माधुर्यधुर्यताया माधुर्याधिक्यस्य प्रख्यापने यत्† पननं पनः· तत्र चतुरैः । चलता भुजेनेति कथाभिनयप्रदर्शनार्थमित्यर्थः ॥ १०५ ॥

इत्येवं यद्यत्रसरोऽजनि सरोजनिजनिर्हि तदा हितदाक्षिण्यपरोऽपि तमघासुरवधविभवमालोक्य जातविस्मयः स्मयमानः स्मयमानपरः परःसहस्रीभूतानां परमेश्वराणां परमेश्वरस्य पुनरैश्वर्यपरीक्षणक्षणनिमित्तमुद्यममाततान ॥ १०६ ॥

यद्यत्रसरोऽजनि जातस्तदा सरोजनि कमलं तत्र जनिर्यस्य स ब्रह्मा हितमेव यद्दाक्षिण्यं सरलतया साधुत्वं तत्परोऽपि स्मयमानपरः स्मयेन मदेन ब्रह्माहं निजमैश्वर्यं विविधसृष्ट्यावेशेऽपि जानाम्येवेत्यभिमानपरः, स्मयमानः· अयं तु प्राकृतबालकचेष्टावेशान्निजमहैश्वर्यं विस्मृतवानित्येत्यभिप्रेत्य ईषद्धसन्, तथाऽघासुरादिवधज्ञापितमैश्वर्यमहो हन्त वर्तत एवेति जातविस्मयः, ततश्च परःसहस्रीभूतानां सहस्रात् परसंख्यावतां "परः शताद्यास्ते येषां परा संख्या शताधिका" इत्यमरः। परमेश्वरस्य श्रीकृष्णस्य· ऐश्वर्यस्य परीक्षणमेव क्षण उत्सवस्तन्निमित्तम्, एवं चालक्षितमेव भगवन्मायया प्रथममेव ब्रह्मणो महामोहो जात इति भावः ॥ १०६ ॥

तन्नु तस्य कतिपयः पयःप्रसर इति पयोधिपयोऽधि तदवधिमधिजिगमिषोर्यष्टिनिक्षेप इव कियत्प्रमाणं गगनतलमिति मितिमिच्छतो मानरज्जुनिपात इव जातमोहस्य हस्यमानमभूत् ॥ १०७ ॥

तस्य ब्रह्मणस्तच्च· उद्यमप्रकटनं हस्यमानमभूदित्यन्वयः । कस्येव, पयोधेः समुद्रस्य पयो जलम्· अधि· अधिलक्ष्य तस्य समुद्रस्य· अवधिं तलसीमानम्· अधिजिगमिषोर्जिज्ञासोर्यष्टिः सप्रवितस्तिकलकुटं तस्या निक्षेप इव, इति भगवदैश्वर्यस्य महाद्भुतगाहत्वमुक्तम् । गगनस्याप्यपरिच्छेद्यमाह कियदिति ॥ १०७ ॥

यदिदं मायाबलेन भगवतो वत्सकुलापहरणं तन्नु कूपाकूपारयोरिव जलाशयत्वे खद्योतखद्योतकरमहसोरिव महस्वित्वे तमिस्रायास्तमसस्तमसश्चेव महावारकत्वे स च पितामहो महोन्मत्त इवात्मभगवतोर्मायाविसामान्यविशेषभावं न विदांचकार, अपहृते च वत्सकुले वत्सपाश्चामी भगवता सह सरसमदन्तो दन्तोज्ज्वलकिरणधौताधरतया हसन्तः सन्तः सन्ततमतिमधुरकथोपकथोपयोगेन विस्मृतवत्सा देवासादिततत्स्मरणेन तत्संचारस्थलमवेत्य वत्सगणानवलोकेन लोकेननाथं तमूचिरे चिरेण ॥ १०८ ॥

किं तदुद्यमप्रकटनमित्यपेक्षायामाह यदिदमिति । तच्च तत्रपि न विदांचकार न परामर्श । तदेव किमित्यपेक्षायामाह· आत्मनो भगवतश्च यन्मायावित्वं तत्र सामान्यविशेषभावमिति । कयोरिव, कूपोऽपि जलाशयः· अकूपारः समुद्रोऽपि जलाशय इति जलस्थानीयमायायाः परिमाणस्याल्पत्वबृहत्त्वाभ्यामुपमा । खद्योतो ज्योतिःकीटः, खे आकाशे द्योतकराणि दीप्तिकारीणि महांसि यस्य स खद्योतकरमहाः सूर्यः, तावुभावेव महस्विनाविति ज्ञातपरिमाणयोः । तमिस्रायाः कुहूरजन्यास्तमसोऽन्धकारस्य तमसो राहोश्च महस्तेजस्तस्य वारकत्व इति मायाया आवरणरूपधर्मस्य ज्ञापनार्थम् । अयं भावः, कूपखद्योतराहूणां समुद्रसूर्यकुहूरात्रिभ्योऽन्यत्रैव स्थितिः स्वप्रभावज्ञापिका, तत्र तत्रैव स्पर्धया प्रवेशस्तु स्वस्वसत्ताया अपि विनाशकर इति । अत्र तमस इति क्रमभङ्गो यमकानुरोधादङ्गीकृतः । लोकानामिनाः प्रभवो महेशादयस्तेषामपि नाथम्, "इनः सूर्ये प्रभौ" इत्यमरः ॥ १०८ ॥

कृष्ण सखे सखेदाः स्मः, नैकोऽपि दृश्यते वत्सः, मन्ये, नवतृणाङ्कुरलालसालसाभावाददूरं गताः, तदधुना तदनुसंधानाय संधानायकैर्भवितव्यमस्माभिरिति

*–पयान–इति पा० ।

† पननं पनः इति पा० ।

तदुदितादुदिताभियोगो भगवानपि स्मितलेशले शशितिरस्कारिणि वदने कवलमादधान एव मादधानो निजगाद ॥ १०६ ॥

तृणाङ्कुरलालसया हेतुना॰ अलमाभावात्॰ अनालस्यात्। तत् तस्मात् तेषां वत्सानामनुसंधानार्थं संधां सीमानं प्रतिआनायकैरानयनकर्तृभिरस्माभिर्भवितव्यं, "संधा प्रतिज्ञा मर्यादे"त्यमरः। वदने कीदृशे, स्मितलेशं लाति गृह्णातीति तस्मिन्। शशिनश्चन्द्रस्यापि तिरस्कारकारिणि वदने कवलम्॰ आदधान एव॰ अर्पयन्नेव,मादधानः॰ मादं हर्षं दधातीति धानो नन्द्यादिः ॥ १०९ ॥

भो भो भवद्भिरिहैव भूयतामयमहमनुसंदधामीति करकृतकवलोऽधिकबलोऽधिकचलमाहितवेत्रविषाणो जठरपटपटद्वेणुरथ वत्सगणानुसंधानमनुबबन्ध ॥ ११० ॥

अधिकं बलं यस्य सः। जठरपटे पटन् गच्छन् वेणुर्यस्य सः। "अट पट गतौ" ॥ ११० ॥

सारतरचमत्कारकारमहोभारभरितवनोद्देशो देशोचितवेशो मुहुरितस्ततो विचरन् खरखुरखुरलीलक्ष्मलक्ष्मीमवनावनालोच्य प्रत्यग्रजायदुदग्रतां च तृणानामवकलयन् नानेन पथा समचरन् वत्सा इति तत्रैवावर्तमानोऽमानोन्नतधीरधीरमना मनागविस्मितोऽनन्तरमनन्तरमणीयमायेन तेन तेनैव वत्सपगणे चापहृते द्रुयमेव परितो विचारयन् वत्सान् सहचरानपि नेक्षमाणस्तदा संदेहोपरमे परमेष्ठिनेव विहितमिदमिति निश्चित्य सद्य एव ॥ १११ ॥

खराणां खुराणां खुरली संचारपौनःपुन्यम्, "अभ्यासः खुरली योग्ये"ति त्रिकाण्डशेषः. तस्या लक्ष्मलक्ष्मीं चिह्नशोभाम्, अवनौ भूतले। प्रत्यग्राम्॰ अभिनवां जायतीम्॰ उदग्रताम्। अमानाः॰ अपरिमिताः॰उन्नता धीर्यस्य सोऽप्यधीरमनाः, वत्सादिविषयकस्य प्रेम्णः सहसा सर्वाह्लादकत्वशक्तेरिति भावः। अनन्तरं तेनैव ब्रह्मणैव वत्सपगणे च॰ अपहृते सति।

ननु भगवत्सखानां तेषां महावैकुण्ठवासिपार्षदैरपि परवन्द्यतमानां क्षुद्रस्य ब्रह्मण एव मायया कथं मोहितत्वसंभवस्तत्राह, अनन्तस्य श्रीकृष्णस्यैव रमणीया माया यत्र तेन ब्रह्मणा, ब्रह्ममायाया अपि भगवन्मायाशक्त्यानुमोदित्वाद्भगवन्मायात्वमित्यर्थः। यथोक्तं, "कृष्णमायाहता राजन् क्षणार्धं मेनिरेऽर्भकाः" इति। तथा स्वयैव माययाजोऽपि स्वयमेव विमोहित इति ब्रह्ममाययैव ब्रह्मणो मोहितत्वात्कर्ममायायाश्च स्वाश्रयाव्यामोहकस्वभावत्वात् तस्या भगवन्मायात्वमेव ॥ १११ ॥

ये यादृग्गुणवर्णरूपवयसो यादृक्स्वरा यादृश-
प्रज्ञा यादृशभावनामकृतयस्तत्तद्विधास्तेऽखिलाः।
वत्सा वत्सपबालकाश्च मुरली शिक्यं विषाणो दलं
भूषा दाम विहङ्गिका लकुटिका सर्वं स एवाभवत् ॥ ११२ ॥

सर्वं स एव श्रीकृष्ण एव। अत्र तेषामेव यदुनानयनं तद्ब्रह्माणमेव स्वीयवैभवावर्ते निपात्य व्याकुलीकर्तुं, तथा स्वं पुत्रीयन्तीस्तत्तन्मातॄः पूर्णाभिलाषाः कर्तुं, तथा महावैकुण्ठनाथादिषु कैमुत्यापादनाय श्रीबलदेवमपि विस्मापयितुम्। इत्थं च बहून्यत्र प्रयोजनानि ज्ञेयानि ॥ ११२ ॥

आनन्दात्मचिदात्मकं च तदिदं स्वेनैव संपादितं
शुद्धं यद्यपि कार्यजातमखिलं नो कारणाद्भिद्यते।
लीलोपाधि तथापि भिन्नमभवत् तेषां स्वभावोदयात् सोऽ-
निर्वाच्यतयाद्भुतः परमभूत् सर्गो निसर्गोत्तमः ॥ ११३ ॥

आनन्देति, मायिकसृष्ट्या तत्तत्प्रतिनिधित्वासंभवेन स्वक्रीडा न सिध्यतीति भावः। सर्गः सृष्टिः ॥ ११३ ॥

अथ तत्तद्भावापन्नैर्गोपकुमाराकृतिभिरात्मभिर्वत्साकृतीनात्मन आत्मनैव विकृतेन तेन दिवसावसानमवलोक्य भवनाय वनायनात् समवहारयन् वेणुमवीवदत् ॥ ११४ ॥

गोपकुमाराकृतिभिरात्मभिः सह वत्साकृतीनात्मनो वनरूपं यदयनमास्पदं तस्मात् सकाशात् भवनाय भवनं प्रापयितुं समवहारयन् सम्यगाकर्षन् वेणुमवीवदत् वादयामास ॥ ११४ ॥

तमथ मथनकृतमनसो वेणुरवं निशम्य सर्वे एवात्मभूता भूतारल्यकृतः सहचराः शृङ्गवेणुदलशृङ्गादिरवैरवेधमानमानसतोषाः परितोऽप्यात्मभूतानखिलवत्सान् समवहार्य दिनान्तरवद्व्रजमाविशन्ति स्म ॥ ११५ ॥

शृङ्गादिरवैर्भुवः पृथिव्या अपि तारल्यं हर्षहेतुकं कुर्वन्तीति ते। दलघटितं शृङ्गाकारं दलशृङ्गम् ॥ ११५ ॥

मातृभिरभिव्रजन्तीभिः पूर्वं तनयाननादृत्य यथा कृष्णसंदर्शनं कृतं तथा स्वस्वतनयेष्वेव कृष्णसाधारणं प्रेम लभमानाभिरपि संप्रति च प्रतिचमत्कृतमानसतयेव कुर्वतीभिरेव निर्वव्रे ॥ ११६ ॥

तत्तन्मातॄणां पूर्वतः स्वभावविशेषं तदानीमलक्षितमुत्पन्नं दर्शयति, मातृभिः सुबलादिजननीभिः पूर्वं तनयान्॰ अनादृत्य यथा कृष्णसंदर्शनं कृतं "ब्रह्मन् परोद्भवे कृष्णे इयान् प्रेमा

कथं भवे"दिति "कृष्णमेनमवेहि त्व"मित्यादिशुकपरिक्षित्संवादगतसिद्धान्तानुसारात् तथा संप्रत्यपि कृष्णदर्शनं कुर्वन्तीभिरेव निर्वृतिरलभ्यत । अयं तु विशेषः । पूर्वं तनयाननादृत्य, संप्रति तु प्रतिचमत्कृतमानसतयैवेति । तत्र हेतुः, स्वतनयेष्वित्यादि । कृष्णसाधारणं कृष्णतुल्यं, नतु कृष्णनिष्ठं, तेषां कृष्णस्वरूपत्वेऽपि तत्तत्स्थितचररूपगुणमात्राविष्कारात् । कृष्णस्य तु सर्वगुणाविष्कारात् स्वीयरूपे स्थितत्वान्मूलभूतत्वाच्चापूर्वं वैशिष्ट्यमस्त्येवेति भावः ॥ ११६ ॥

तेऽपि त इव मातृवत्सलतया तथापूर्वं पूर्ववत् स्नपनादिक्रियया मातॄः प्रीणयामासुरयं खलु विशेषोऽशेषोपतापशमना अमी अमीवहारिणस्त इव भगवतो दिनकृतं न कथयामासुः ॥ ११७ ॥

तेऽपि कृष्णात्मका बालास्त इव पूर्वभूतसुबलादय इव । अमीवं विरहवैक्लव्यम् ॥ ११७ ॥

वत्साश्च दिनान्तरेषु निजनिजमातृसविधमुपगतास्ताभिरपि पूर्वतोऽपूर्वतोषतरलहृदयाभिभूततया तथा तथा लिह्यमाना ह्रियमानानन्देन पीयमाना इव सगद्गदगदनघर्घरस्वराभिरङ्के कृता एव सुषुपुः ॥ ११८ ॥

पूर्वतोऽपूर्वेति गवामपि स्वभावविशेष उक्तः ॥ ११८ ॥

कृष्णमपि निजभवनमासाद्य साद्यमानबाल्यविलासम् ।
दोर्भ्यामुत्थाप्य वक्षोभुवि निविडतरस्नेहपीडं निपीड्य
श्मश्रुस्पर्शे सशङ्कं मृदुनि कमलतो न्यस्य वक्त्रे च वक्त्रम् ।
उन्नीयोष्णीषमश्रुप्लुतनयनमवघ्राय चास्योत्तमाङ्गं
नातुष्यन्नाकुलेन्दुः क्षणमथ महिषीतृप्तये तं मुमोच ॥ ११९ ॥

साद्यमानः प्राप्यमाणो ज्ञाप्यमानो वा बाल्यविलासो येन तं, सशङ्कमित्यत्र हेतुः, कमलतोऽपि मृदुनि सुकुमारे वक्त्रे वक्त्रं स्वमुखम् । उत्तमाङ्गं शिरः । नातुष्यत् नातृप्यत् । महिषी श्रीयशोदा तस्याः स्वपुत्रमुखचुम्बनोत्कण्ठामालक्ष्येति भावः ॥ ११९ ॥

ततश्च जनन्यानन्यातुलवात्सल्यपताकया कयाचिदिव कृताभ्यङ्गोद्वर्तनादिकोऽनादिकोऽमलतनुस्तनुमानिव जननीवात्सल्यसारः कृताहारो हारोपस्कृतवक्षाः प्रक्षालितपदः क्षपितक्षणकतिपयः पयःफेनधवले लक्षमूल्यशयनतले कृतशयनोऽसौ निशामनैषीत् ॥ १२० ॥

कयाचिदिव अनिर्वचनीययेव । अनन्यया अद्वितीयया अतुलवात्सल्यस्य पताकया । अनादिको नित्यभूतो जननीवात्सल्यसारस्तनुमानिवेत्यन्वयः । अमला अभ्यङ्गादिभिर्गोधूल्यादिरहिता तनुर्यस्य सः । पयःफेनवद्धवले धवले ॥ १२० ॥

उदितेऽथ किरणमालिनि च वनमालिनि च वनगमनायोद्यते सहचरा जननीभिः पूर्वतोऽपि सुविहितप्रसाधनाहितप्रसाधनाः कृतपानभोजना जनानन्दकारिणो भगवद्भवनमाहेदुः ॥ १२१ ॥

सुविहितेन प्रसाधनेन प्रकृष्टयत्नेन आहितमर्पितं प्रसाधनं भूषणं येषां ते ॥ १२१ ॥

भगवानपि पितृमातृतोषमन्तरेणान्यच्च सादरोऽदरोपलालितस्ताभ्यां सस्नेहं समनुगतश्च कियद्दूरं स आत्मसहचर आत्मपाल्य आत्मपालकः पूर्वपूर्वदिनवद्वनमनुससार ॥ १२२ ॥

अदरम् अनल्पमुपलालितः ॥ १२२ ॥

एवं गच्छत्सु कतिपयेषु मासेषु कस्मिंश्चन दिवसे जनाभिरामेण रामेण सह सहसा कृष्णे चलिते चलितेषु तेषु चात्मस्वरूपेषु स्वरूपेषु सुललितेषु वत्सवत्सपेषु गिरिवरसविधे तानात्मभूतान् वत्सांश्चारयति ॥ १२३ ॥

कस्मिंश्चन दिवस इति लीलाविशेषापेक्षया, वस्तुतस्तु नित्यमेव रामेण सह वनगमनं तस्येति । स्वेषां रूपेषु । वर्णमाधुर्यं विषये सुष्ठु ललितेषु । गिरिवरः श्रीगोवर्धनः ॥ १२३ ॥

रयतिग्मगमनेन सद्यस्तनस्तनपतर्णकानपि विहाय विहायसेवोड्डीयमानाः स्थिरैराभीरैराभीरैर्निबिडदण्डदण्डनेनापि निवारयितुमशक्याः सकला एव धेनवो नवोदीर्णवात्सल्यास्तानेव वत्सतरानुपगत्य गत्यवसादेन खिन्ना अपि हुंवेति गद्गदगदनरुद्धकण्ठं सोत्कण्ठं सोत्साहमभिलिहन्त्यो जिघ्रन्त्यो नतरां निवर्तन्ते तृणमपि न चरन्ति स्म ॥ १२४ ॥

धेनवः सकला एव गावः, तस्यैव गिरिवरस्य शृङ्गवर्तितृणचारिण्योऽकस्माद्दूरत एव तान् वत्सतरानालोक्येत्यर्थतो गम्यते । सद्यस्तनान् सद्योभवान्, अत एव स्तनमात्रपायिनस्तर्णकान् वत्सान्, विहाय त्यक्त्वा, किं पुनर्द्वित्रदिनभवान् मासिकान् वा । रयेण वेगेन तिग्मं तीक्ष्णं यद्गमनं तेन विहायसेव आकाशपथेनेव उड्डीयमाना इवेत्युत्प्रेक्ष्यमाणा इत्यर्थः । ततश्चाभीरैर्गोपैः, आभीरैः रलयोरैक्यादाभीलैः कष्टैः, "स्यात् कष्टं कृच्छ्रमाभील"मित्यमरः, निबिडदण्डैरपि कृत्वा दण्डनेन निवारयितुमशक्याः । तानेव द्वैवार्षिकत्रैवार्षिकानपीत्यर्थः ॥ १२४ ॥

Digitized by Google

तन्निवृत्तये समुपसन्नाः सन्नावयवाः खेदेनापि निवर्तयितुं यदा ते न शेकुस्तदा परितोऽपरितोषहारिणो हारिणो निजतनयानवलोक्य धेनुवृन्दादप्यधिकवात्सल्यभाजो भाजोषेण द्रुतमेव तमेव देशमासाद्य मासाद्यमानसौभगान् मूर्ध्नि नासापुटं मुखे मुखं कृत्वा दोर्भ्यामुरसि रसिकतया समुत्थाप्य नयनाम्बुधौतवक्षसश्चित्रलिखिता इव यदा बभूवुः ॥ १२५ ॥

सन्नावयवा अतिधावनेन जानुगुल्फे जातव्यथाः । भा कान्तिस्तस्या जोषेण सेवनेन, स्वस्वतनयरूपविलोकनेनेत्यर्थः, धावनजनिततद्व्यथामपि विस्मृतवन्त इति भावः । मा शोभा तया साद्यमानं प्राप्यमाणं सौभगं येषां तान् ॥ १२५ ॥

तदा बलभद्रो भद्रोद्भूतसंदेहो देहोपचितहर्षविस्मयस्तानालोक्य च स्वयं मनसि पराममर्श ॥ १२६ ॥

भद्रं यथा स्यात् तथा उद्भूतः संदेहो यस्य सः । तान् वत्सपान् वत्सांश्चालोक्य, चकारात् तेषु तत्तत्पितॄणां च परमवत्सलानाममूषां गवां दृष्टिपथ एव कथमेते वत्सानानीतवन्त इति क्रोधेन तावत् तांस्ताडयितुमागतानामपि तेषां तादृशमपूर्वं वात्सल्यमेवालोक्य च, देहे उपचितो यो हर्षस्तेन ममाप्यपूर्वो निर्हेतुकः कथमेतेषु इत्येवंलक्षणो विस्मयो यस्य सः ॥ १२६ ॥

अहो किमिदम् ।

प्राङ्नासीत् स्तनपेष्वपि व्रजगवां वात्सल्यमेतादृशं
यादृक् संप्रति हन्त वत्सनिचये मुक्तस्तनेऽपीक्ष्यते ।
गोपानां न पुरेदृशः शिशुततौ स्नेहो ममाप्यद्य य-
स्तन्मन्ये भवितव्यमत्र हि कयाप्यस्मत्प्रभोर्मायया ॥ १२७ ॥

नन्वास्ताममीषां तन्मायामोहितत्वात् तेषु तथा तथा भावः किंतु मम शुद्धज्ञानघनस्वरूपस्यापि कथं तथात्वं, तत्र स्वयमेवाह अस्मत्प्रभोः, मदंशसंकर्षणकारणार्णवशाय्याद्यवताराणां सर्वेषामप्यस्माकं प्रभोर्मूलभूतस्यांशिनः प्रभुत्वादेवेच्छया अस्मानपि मोहयितुं समर्थस्येति भावः, अत्रास्य सख्येऽपि तद्रहस्यानुपलम्भात् स्वायोग्यतामननेनैव मद्वयस्योऽयमेतत्कर्माणि मयि न विश्वस्तवानिति दैन्योदयेन दास्यरसास्वादः प्रेमव्याकुलतयैव । एवमेव मधुररसवात्सल्यरसादावपि दृश्यते ।

यथा,

"दास्यास्ते कृपणाया मे सखे दर्शय संनिधिम् ।
मनसो वृत्तयो न स्युः कृष्णपादाम्बुजाश्रयाः" ॥

इति ।

नन्वेतावन्तं कालं प्रत्यहमेव तत्तत्पित्रादीनां तेषु तेषु तथा भावं तथैव गवामपि तादृशापत्ये विलक्षणवात्सल्येन बलात् स्तनपायनं गोदोहनादिसमये पश्यतोऽपि मम कथमद्यैव विस्मयेनैतावान् परामर्शो न तु तदानीं प्रथममेवेति, तत्राह कयापीति । तदिच्छां विना सत्यपि विरोधदर्शने परामर्शवतोऽपि न विरोधस्फूर्तिर्यथाधुनापि महतामप्यमीषां गोपानां, तज्ज्ञापनेच्छायां सत्यां तु सर्वस्यापि मायेयमिति ज्ञानं स्यात्, यथाद्य मम इति । तया अनिर्वचनीययेत्यर्थः ॥ १२७ ॥

अथ कथमपरथा रथाङ्गपाणेरजस्यायजस्यायतो मम दैवी वासुरी प्रभवितुमायाति मायातिमायाविचक्रचूडामणिं तमेव समुपेत्य पृच्छामिच्छामि कर्तुम् ॥ १२८ ॥

अपरथा अन्यथा, यदि तन्माया न स्यादित्यर्थः । रथाङ्गपाणेः सर्वमायासंहारकतेजस्कचक्रहस्तस्य अजस्य स्वयं भगवतः श्रीकृष्णस्याग्रजस्य श्रेष्ठभ्रातुर्ममायतो दैवी आसुरी वा माया प्रभवितुमायाति । अत्रान्यमाययानभिभवः साहजिकोऽपि स्वस्य दैन्येनैव तत्संबन्धेनोक्तः । अत एव अतिमायाविचक्रचूडामणिं तं पृच्छां कर्तुमिच्छामि ॥ १२८ ॥

॥ शेषमग्रे ॥

॥ अथ ज्ञानसिद्धान्तचन्द्रिका ॥

वर्षेसंज्ञकमहापण्डितविरचितज्ञानसिद्धान्तमालायाः अवतारिता ।

तत्र चतुरधिकशततमादिपरिच्छेदाः ।

१०४—सांसारिकेषु विषयेष्वनेकशः परीक्ष्यान्योन्यं तुलितेषु तेषां कियताप्यंशेन साधर्म्यमवश्यमुपलभ्यते । यथा भूमावाकाशादुपलपतने सागरस्य चन्द्रमसमभि प्रसर्पणे द्रव्याणां निबिडसंयोगे स्फटिकादिघनीभावादौ च समानं पदार्थानां परस्परमभिगमनमुपलभ्यते । तथा च सूक्ष्मपरीक्षापुरस्सरं प्राकृतिककार्यसाधर्म्यान्वेषिणां पुरुषं प्रत्युक्तविधानि कार्याणि तत्सविभानि कार्यान्तराणि वा विलक्षणान्याश्चर्यकराणि वा न प्रतीयेरन् । यतो हि लोकेऽद्वितीयानि प्रसिद्धनियतिक्रमविपरीतान्येव कार्याणि विलक्षणानि मन्यन्ते । पदार्थानां भूकेन्द्राभिमुखं गमनं तु नापूर्वं न वा विस्मापकं तादृशवृत्तस्य लोके प्रतिक्षणमुपलम्भात् । परंतु तेषां पृथ्वीकेन्द्रमिव चन्द्रकेन्द्रं प्रति प्रावण्यं तु प्रायः सर्वेषां जनानां प्रायिकप्रकृतिप्रवाहविरुद्धं दुर्घटमिव भासेत । तथाविधगतिप्रावण्यस्य समुद्रवेला विहायान्यत्रानुपलब्धेः । सुबहुदर्शी बाह्यपदार्थवित्तु भूगतानां नभोगतानां च पिण्डानां परस्पराभिमुखगतिप्रावण्यात्मकं साधर्म्यं निरूप्य तदितरेषामनन्तानन्तपदार्थानामपि

Digitized by Google

तादृशमन्योन्याभिमुखं गतिप्रावण्यमनुमिनोति । तच्च स गुरुत्वाकर्षणमिति साधारणाभिधयाभिधत्ते । यत्किमपि तादृगवस्थावस्थितं पश्यति तत्सूपपादमेव प्रत्येति । समुद्रवेलाश्च सोमसंमुखं सजलभूगोलाकर्षणेनोपपादयन्स न ता विचित्ररूपा अचिन्त्यकारणिका वा विभावयति किंतु गुरुत्वाकर्षणरूपस्य साधारणप्रकृतिनियमस्य विशेषोदाहरणभूता मनुते ।

१०५—एवं च प्रापञ्चिकपदार्थज्ञानविषये पदार्थविज्ञानविदां साधारणजनेभ्यो विशेषोहि बहुदर्शित्वकृत एव नतु पदार्थानां यथार्थनिमित्तकारणविशेषज्ञानकृतः प्रतिभाति । निमित्तकारणस्य चेश्वरेच्छानतिरिक्तत्वात् । बहुतरपदार्थदर्शनाद्धि प्राकृतिककार्याणामानुरूप्यमानुगुण्यमानुकूल्यं वा पूर्वाननुभूतानां तु तेषां द्वाषष्टितमपरिच्छेदोक्तदिशा साधारणनियमानुसारित्वं चावगन्तुं शक्यते । अस्ति च तेषामुपमित्याश्रितानां साधारणनियमानां प्राकृतकार्यप्रवाहैकरूप्यस्य चान्वेषणे मनसः सस्पृहं प्रावण्यम् । यतस्तद्द्वाराऽनुपस्थितानि वस्तूनि ज्ञातुं कालतो देशतो वा विप्रकृष्टान् विषयान् प्रायोयाथार्थ्येनोहितुम् अनागतान्यपि वृत्तान्युत्प्रेक्षितुं वा मनः प्रकल्पते । क्रियते चैवंविधः प्रयासो ज्ञानविवर्द्धिषया तेन ।

१०६—परंतु तादृशः साधारणनियमाः समीचीनविचारमन्तरा नैवावधारणीयाः । लोकास्तु पुनः केवलमुपमितिष्वेव गौरवनिर्भरमादधानाः साग्रहं साधारणनियमानाविष्कर्तुं प्रयतन्ते । तेन च तत्त्वार्थहानिस् संपद्यते । यथा गुरुत्वाकर्षणस्य लोके बहुषु स्थलेषूपलम्भाज्जनास्सहसैव तस्य सार्वत्रिकत्वं विदधते, आकर्षकत्वाकृष्टत्वे च निखिलपिण्डानुगतनित्यधर्मरूपे ब्रुवते । परंत्वनयोर्धर्मयोः स्थिरतारकास्वनुपलब्धेर्गुरुत्वाकर्षणनियमस्य सार्वत्रिकत्वं न संभवति । प्रत्युत कतिपयेषु स्थलेषु प्रोक्तनियमविपरीतं नियमान्तरं विजृम्भमाणमिव भासते । यथा महोल्काणामूर्द्धगमनं वायोश्च स्थितिस्थापकत्वमित्यादौ । वस्तुतस्तूक्तस्थलेषु न कोपि नियतधर्मो नियमो वा प्रवर्तते । सर्वं खल्विदमीश्वरेच्छामेवाश्रयति । स हि यादृच्छिकैर्नियमैः कांश्चन पदार्थान् मिथःसंश्लेषयति कांश्चन वियोजयति कांश्चन नियतान्तरएव स्थापयत्यपरांश्चान्योन्यतः सदापसर्पयत्येव । तस्य स्वगतौचित्यज्ञानानुरोधेनैव प्रवृत्तत्वात् ।

१०७—अयं चोक्तव्याख्यानानिष्कर्षक्रमः । आत्मातिरिक्तनिमित्तकारणान्वेषणे वृथैवात्मानं विनोदयन्त्यद्धात्मविद इत्येकं व्याख्यानम् । सर्वामिमां सृष्टिरचनां कस्यचित्सर्वज्ञस्यानन्तशक्तिसंपन्नस्य कर्तुः कृतिं निरूप्य लोकसिद्धान्यनुचितानि मतान्तराण्युपेत्य सर्वोपि विद्वान् प्रापञ्चिककार्यविभावन एव मनोदद्यात् । किमिति विविधानां कार्याणामचिन्त्यशक्तिकातुर्यपरिकल्पितानां तदुपयुक्तवस्त्वन्तराणां चालोचनमेव कार्यकारणभावज्ञानस्य साधूपायं न विदन्ति सुधियः । स्याच्चेयं योग्यतमा पर्यालोचना विदुषाम् इत्यपरम् । नवा प्राकृतिककार्याणां प्रतीक्षापरीक्षाभ्यां सम्यगवगमस्यानावश्यकत्वं क्वाप्युक्तमन्येनापादि । प्रतीक्षापरीक्षयोरत्युपकारकत्वं नानाविधनिगमनानुमापकत्वं च न तान्नियतवस्तुस्वभावाश्रितं नापि तेषां परस्परसंबन्धनियमकृतं किंतु जगन्नियन्तृपरमेश्वरस्य विश्वनिर्वहणलोकहितैषायाः श्रितमेवबोध्यम् । यथा त्रिंशदेकत्रिंशत्तमपरिच्छेदयोः प्रदर्शितमस्माभिरितितृतीयम् । पदार्थानां भूयोदर्शनेन गाढपरीक्षणेन च व्याप्तिग्रहाः प्रकृतिनियमाश्चाविष्क्रियेरंस्ततःसिद्धान्तान्तराणि च निगम्येरन् । परंतु तत्संभवबीजानि यथावदुपपादयितुं नैव शक्येरन् । यतः सर्वाणि व्याप्तिग्रहसहकृतान्यनुमानानि जगत्स्रष्टुस्तुल्यसामग्रीसमवधाने सर्वदा तुल्यकार्यकारित्वम् अस्मदनिर्वाच्यप्रकृतिनियमनित्यानुसारित्वं चाभ्युपेत्यैव प्रवर्तन्तइति तुरीयम्।

१०८—ये तु नानोदाहरणदर्शनात्साधारणनियमान् प्रकल्प्य लौकिककार्यविशेषांस्तदाश्रितान् कथयन्ति ते तादृशकार्याणां लिङ्गान्येवावगच्छन्ति न पुनस्तत्कारणानि । कार्यलिङ्गानि तु स्वसजातीयलिङ्गव्यक्त्यन्तरसंबन्धसादृश्यस्य कार्यकारणभावप्रतिपादकसाधारणनियमस्य वा ऽज्ञानेपि ज्ञातुं शक्येरन् । किंच व्याकरणोक्तानामुत्सर्गशास्त्राणामपवादशास्त्रातिरिक्तत्वेन संकोचमकृत्वैव तत्प्रयोजको वैयाकरणो यथाऽवश्यमशुद्धकारी भवति तथा भूयोदर्शनोहितसाधारणनियमानुसारिणो जनास्तान्नियमानस्वाविषयेष्वपि विषयेषु प्रयुञ्जाना ध्रुवं भ्राम्येयुः ।

१०९—शास्त्रीयग्रन्थाध्येतृणां विदुषां ग्रन्थार्थे तदुपयोगविशेषं चोपेत्य तत्रत्यभाषासौष्ठवासौष्ठवविवेचनमिव वाक्प्रपञ्चविमर्शे प्रत्येकविषयनिष्ठस्य साधारणनियमानुकूल्यस्य यथार्थज्ञानानुसंधानं तत्संपिपादयिषोः पुरुषस्य क्षुद्रधीत्वं सूचयेत् । मनुष्याणामनुध्येयोदारविषयास्तु प्रकृतिसिद्धवस्तुगतयोः प्रसारवैचित्र्ययोः क्रमकमनीयतयोश्चानुवेलमालोचनेनात्मतोषणमोदने यथार्थव्याप्तिग्रहसिद्धानुमानादिनाजगत्स्रष्टुरचिन्त्यज्ञानदयादीनांपूर्णानुभवसंपादनं विविधानां सृष्टपदार्थानां पदार्थान्तरैर्योग्योपजीव्योपजीवकभावस्य यावच्छक्यमन्वेषणम्, परमेश्वरप्रभावस्य तत्कृपानाम् अखिलप्राणिवर्गरक्षासौख्यादीनामनुसंधानं चेत्येवमादयः स्युः ।

११०—सुप्रसिद्धो न्यूटनाचार्यप्रणीतो निबन्धो वस्तुसंबन्धसादृश्यज्ञानस्य पदार्थविज्ञानशास्त्रज्ञानस्य चोत्तमोपायत्वेनाञ्जसैव सर्वैरनुमन्येत परंतु तादृशसुप्रशंसितपन्थस्यारम्भे

Digitized by Google

गतिकालावकाशाः स्वाश्रितपराश्रितभेदेन द्विधा विभिद्यन्ते । तत्राद्यास्तात्त्विका गणिता वाऽभिधीयन्ते । द्वितीयाश्चाभासिका लौकिकावेति । सोयं सुविस्तरं न्यूटनवर्णितो भेदोऽवश्यंगत्यादीनामात्मबाह्यत्वं लोके विषयान्तरसंबन्धेनैव ज्ञानेपि तेषां वस्तुस्थितौ पदार्थान्तरासंबद्धत्वं चापेक्षत इति ध्येयम् ।

१११—गतिकालावकाशानां पदार्थसत्तासातत्यमात्रत्वेन विवक्षितस्य कालस्य विषये तु न किमप्यत्र वक्तव्यमवशिष्यते । तस्य सप्तनवत्यष्टनवतितमपरिच्छेदयोरेव पर्याप्तं प्रपञ्चितत्वात् । अवशिष्टयोर्गत्यवकाशयोस्तावत् न्यूटन एवमाह । तथाहि । स्वाश्रितोऽवकाशोऽतीन्द्रियत्वेनैकरूपोऽपरिवर्तनीयश्चाऽवतिष्ठते । पराश्रितस्तु स स्वाश्रितावकाशस्यैव परिमाणात्मको बोध्यः । तस्य दृश्यपदार्थसंबद्धस्वसंस्थानलक्ष्यत्वे परिवर्तनीयत्वेपि तमपरिवर्त्यं मन्यमाना जना मुह्यन्त्येव । स्थलपदार्थस्तु यत्किंचित्पिण्डाक्रान्तावकाशांश एव ज्ञेयः । अवकाशावस्थानुसारेण स्थलमपि स्वाश्रितपराश्रितभेदेन द्विधा । अथ पिण्डस्य स्वाश्रितस्थलात्स्वाश्रितस्थलान्तरप्राप्तिः स्वाश्रितगतिः, पराश्रितस्थलात्पराश्रितस्थलान्तरप्राप्तिः पराश्रितगतिरित्युच्यते । स्वाश्रितावकाशानामतीन्द्रियत्वात् तेषां स्थानेऽनायत्या प्रत्यक्षीभूतास्तत्परिमाणात्मकाः पराश्रितावकाशा एव प्रयुज्यन्ते । अत एवोभौ गत्यवकाशावपरिवर्तनीयावपि दृश्यपिण्डसंबन्धेनैव लक्ष्येते । परंतु शास्त्रीयविवेचनासु विषया ऐन्द्रियकप्रत्यक्षानुसारेण न निर्वक्तव्याः । निश्चलत्वेन प्रतीयमानानां विषयाणां तत्त्वतश्चाञ्चल्यस्य पदार्थान्तरसंबन्धेन चलतां तु तेषां स्वात्मसंबन्धेन निश्चलत्वस्य च संभवात् । एवमेकैव पिण्डव्यक्तिः स्वस्थानसंबन्धिभेदाद्युगपदेव स्थिरा चञ्चला परस्परविरुद्धगतिमती च संभवति । [यथा कयोश्चिद्यानारूढयोर्विरुद्धदिगभिमुखं प्रव्रजतोः पुंसोः पार्श्वस्थे स्थिरे एव वृक्षश्रेणी विरुद्धदिग्गामिन्यौ प्रतीयेते] परंतु सर्वमिदं वैचित्र्यमाभासिकगतिष्वेवोपलभ्यते न पुनस्तात्त्विकायां स्वाश्रितगत्याम् । [तस्याः सर्वदैकरूप्यात्] इयमेव च शास्त्रीयविचारगोचरा भवितुमर्हति । सेयं वास्तविकी गतिराभासिकगतिभ्यः पञ्चभिर्धर्मैर्विशिष्यते । तत्रावयविनो नियतैकदेशेऽवस्थिता अवयवास्सर्वा अवयविगतीर्भजन्त इत्येकः । आधारभूतस्थानसंचलने आधेयमपि चलति, येन गतिमतिस्थाने स्थापितस्य गतिमद्वस्त्वन्तरस्य स्वस्थानगतिभाक्त्वमपि भवतीति द्वितीयः । न कोप्यप्रेरितः पिण्डो गतिशाली विभिन्नगतिको वा संपद्यत इति तृतीयः । गतिमति पिण्डे परेण गतिबलेन प्रेरिते स पूर्वस्या विभिन्नगतिको भवतीति तुरीयः । केवलपराश्रितायां वर्तुलगत्यां न कदापि वर्तमाना केन्द्रापसर्पिणी गतिस्स्वाश्रितायां तु तस्यां तत्परिमाणतारतम्यानुसारेण न्यूनाधिकभावो भजत इति पञ्चमइति ।

केशवशास्त्री

SARVA-DARS'ANA-SAṄGRAHA

CHAPTER IV.

(Continued from Vol. IX, page 41.)

THE RÁMÁNUJA SYSTEM.

This doctrine of the Árhatas deserves a rational condemnation, for whereas there is only one thing really existent, the simultaneous co-existence of existence, non-existence and other modes in a plurality of really existing things is an impossibility. Nor should any one say: Granting the impossibility of the co-existence of existence and non-existence, which are reciprocally contradictory, why should there not be an alternation between existence and non-existence? there being the rule that it is action not *Ens* that alternates. Nor let it be supposed that the whole universe is multiform, in reliance upon the examples of the elephant-headed Gaṇeśa and of the incarnation of Vishṇu as half man half lion; for the elephantine and the leonine nature existing in one part, and the human in another, and consequently there being no contradiction, those parts being different, these examples are inapplicable to the maintenance of a nature multiform as both existent and non-existent in one and the same part (or place). Again, if any one urge: Let there be existence in one form, and non-existence in another, and thus both will be compatible; we rejoin: Not so, for if you had said that at different

॥ सर्वदर्शनसङ्ग्रहः ॥

तदेतदार्हतकमतं प्रामाणिकगर्हणमर्हति न ह्येकस्मिन् वस्तुनि परमार्थे सति परमार्थसत्तां युगपत् सदसत्त्वादिधर्म्माणां समावेशः सम्भवति । न च सदसत्त्वयोः परस्परविरुद्धयोः समुच्चयासम्भवे विकल्पः किं न स्यादिति वदितव्यं, क्रिया हि विकल्प्यते न वस्त्विति न्यायात् । न चानेकान्तं जगत्सर्व्वं हेरम्बनरसिंहवदिति दृष्टान्तावष्टम्भवशादेष्टव्यम् । एकस्मिन् देशे गजत्वं सिंहत्वं वा अपरस्मिन् नरत्वमिति देशभेदेन विरोधाभावेन तस्यैकस्मिन् देशएव सत्त्वासत्त्वादिना अनेकान्तत्वाभिधाने दृष्टान्तानुपपत्तेः । ननु द्रव्यात्मना सत्त्वं पर्य्यायात्मना तदभाव इत्युभयमप्युपपन्नमिति चेन्मैवम् । कालभेदेन हि कस्यचित् सत्त्वमसत्त्वञ्च स्वभाव इति न कश्चिद्दोषः । न चैकस्य ह्रस्वत्वदीर्घत्ववदनेकान्तत्वं जगतः स्यादिति वाच्यं, प्रतियोगिभेदेन विरोधाभावात् । तस्मात् प्रमाणाभावाद्

Digitized by Google

times existence and non-existence may be the nature of anything, then indeed there would have been no vice in your procedure. Nor is it to be contended: Let the multiformity of the universe be like the length and shortness which pertain to the same thing (in different relations); for in these (in this length and shortness) there is no contrariety inasmuch as they are contrasted with different objects. Therefore for want of evidence, existence and non-existence as reciprocally contradictory cannot reside at the same time in the same thing. In a like manner may be understood the refutation of the other *bhangís* (Árhata tenets).

Again, we ask, is this doctrine of the seven *bhangas*, which lies at the base of all this, itself uniform (as excluding one contradictory), or multiform (as conciliating contradictories). If it is uniform there will emerge a contradiction to your thesis that all things are multiform; if it is multiform you have not proved what you wished to prove, a multiform statement (as both existent and non-existent) proving nothing.* In either case there is rope for a noose for the neck of the Syád-Vádin.

An admirable author of institutes has the founder of the Árhata system, dear to the gods (uninquiring pietist), proved himself to be, when he has not ascertained whether his result is the settling of nine or of seven principles, nor the investigator who settles them nor his organon, the modes of evidence, nor the matter to be evidenced, whether it be ninefold or not!

In like manner if it be admitted that the soul has (as the Árhatas say) an extension equal to that of the body, it will follow that in the case of the souls of ascetics, who by the efficacy of asceticism assume a plurality of bodies, there is a differentiation of the soul for each of those bodies. A soul of the size of a human body would not (in the course of its transmigrations) be able to occupy the whole body of an elephant; and again when it laid aside its elephantine body to enter into that of an ant, it would lose its capacity of filling its former frame. And it cannot be supposed that the soul resides successively in the human, elephantine and other bodies, like the light of a lamp which is capable of contraction and expansion according as it occupies the interior of a little station on the roadside in which travellers are supplied with water or the interior of a stately mansion; for it would follow (from such a supposition) that, the soul being susceptible of modifications and consequently non-eternal, there would be a loss of merits and a fruition of good and evil unmerited.

As if then we had thrown their best wrestler, the redargution of the rest of their categories may be anticipated from this exposition of the manner in which their treatment of the soul has been vitiated.

Their doctrine, therefore, as repugnant to the eternal, infallible, revelation, cannot be adopted. The venerated Vyása accordingly propounded the aphorists "Nay, because it is impossible in one;" and this same aphorism has been analysed by Rámánuja with the express purpose of shutting out the doctrine of the Jainas. The tenets of Rámánuja are as follows. Three categories

* Cf. "The argument in defence of the Maxim of Contradiction is that it is a postulate employed in all the particular statements as to matters of daily experience that a man understands and acts upon when heard from his neighbours; a postulate such that, if you deny it, no speech is either significant or trustworthy to inform and guide those who hear it. You may cite innumerable examples both of speech and action in the detail of life, which the Herakleitean must go through like other persons and when, if he proceeded upon his own theory, he could neither give nor receive information by speech, nor ground any action upon the beliefs which he declares to co-exist in his own mind. Accordingly the Herakleitean Kratylus (so Aristotle says) renounced the use of affirmative speech, and simply pointed with his finger." Grote's Aristotle, vol. 2. pp. 297-8.

युगपत् सत्त्वासत्त्वे परस्परविरुद्धे नैकस्मिन्वस्तुनि वस्तुं युक्ते ॥ एवमन्यासामपि भङ्गीनां भङ्गोऽवगन्तव्यः ॥ किञ्च सर्व्वस्यास्य मूलभूतः सप्तभङ्गनयः स्वयमेकान्तः, अनेकान्तो वा, आद्ये सर्व्वमनेकान्तमिति प्रतिज्ञाव्याघातः, द्वितीये विवक्षितार्थासिद्धिः, अनेकान्तत्वेनासाधकत्वात्, तथा चेयमुभयतः पाशरज्जुः स्याद्वादिनः स्यात् । अपि च नवत्वसप्तत्वादिनिर्द्धारणस्य फलस्य तन्निर्द्धारयितुः प्रमातुश्च तत्करणस्य प्रमाणस्य प्रमेयस्य नवत्वादेरनियमे साधु समर्थितमात्मनस्तीर्थकरत्वं देवानां प्रियेणार्हतमतप्रवर्त्तकेन । तथा जीवस्य देहानुरूपपरिमाणत्वाङ्गीकारे योगबलादनेकपरिग्राहकयोगिजीवेषु प्रतिशरीरं जीवविच्छेदः प्रसज्येत मनुजशरीरपरिमाणो जीवो मतङ्गजदेहं कृत्स्नं प्रवेष्टुं न प्रभवेत् । किञ्च गजादिशरीरं परित्यज्य पपीलिकाशरीरं विशतः प्राचीनशरीरसन्निवेशविनाशोऽपि प्राप्नुयात् । न च यथा प्रदीपप्रभाविशेषः प्रपाप्रासादाद्युदरवर्त्तिसङ्कोचविकाशशाली तथा जीवोऽपि मनुजमतङ्गजादिशरीरेषु स्यादित्येषितव्यं, प्रदीपवदेव सविकारत्वेनानित्यत्वप्राप्तौ कृतप्रणाशाकृताभ्यागमप्रसङ्गात् । एवं प्रधानमल्लनिबर्हणन्यायेन जीवपदार्थदूषणाभिधानदिशान्यत्रापि दूषणमुत्प्रेक्षणीयम् । तस्मान्नित्यनिर्दोषश्रुतिविरुद्धत्वादिदमुपादेयं न भवति । तदुक्तं भगवता व्यासेन नैकस्मिन्नसम्भवादिति । रामानुजेन च जैनमतनिराकरणपरत्वेन तदिदं सूत्रं व्याकारि एष हि तस्य सिद्धान्तः, चिदचिदीश्वरभेदेन भोक्तृभोग्यनियामकभेदेन व्यवस्थितास्त्रयः पदार्था इति । तदुक्तम्, ईश्वरश्चिदचिच्चेति पदार्थत्रितयं हरिः । ईश्वरश्चित इत्युक्तो जीवो दृश्यमचित् पुनरिति ॥ अपरे पुनरशेषविशेषप्रत्यनीकं चिन्मात्रं ब्रह्मैव परमार्थः तच्च नित्यशुद्धबुद्धमुक्तस्वभावमपि तत्त्वमस्यादिवा-

Digitized by Google

are established, enumerated; as soul, not-soul, and Lord; or as subject, object, and supreme disposer. Thus it has been said:

"Lord, soul, and not-soul are the triad of principles: Hari (Vishṇu)

Is Lord; individual spirits are souls; and the visible world is not-soul.

Others, again, (the followers of Śankaráchárya) maintain that pure intelligence, exempt from all differences, the absolute, alone is really existent; and that this absolute whose essence is eternal, pure, intelligent and free, the identity of which with the individuated spirit is learnt from the 'reference to the same object' (predication) "That art thou," undergoes bondage and emancipation. The universe of differences (or conditions) such as that of subject and object, is all illusorily imagined by illusion as in that (one reality), as is attested by a number of texts Existent only, fair sir, was this in the beginning, One only without a second, and so forth. Maintaining this, and acknowledging a suppression of this beginningless illusion by knowledge of the unity (and identity) of individuated spirits and the undifferenced absolute, in conformity with hundreds of texts from the Upanishads such as He that knows spirit passes beyond sorrow; rejecting also any real plurality of things, in conformity with the text condemnatory of duality, viz. Death after death he undergoes who looks upon this as manifold; and thinking themselves very wise, the Śánkaras will not tolerate this division (viz. the distribution of things into soul, not-soul, and Lord). To all this the following counterposition is laid down: This might be all well enough if there were any proof of such illusion. But there is no such ignorance (or illusion), an unbeginning entity, suppressible by knowledge, testified in the perceptions I am ignorant, I know not myself and other things. Thus it has been said (to explain the views of the Śánkara):

"Entitative from everlasting, which is dissolved by knowledge,

Such is illusion,—This definition the wise enunciate.

This perception (they would further contend) is not conversant about the absence of knowledge. For who can maintain this, and to whom? One who leans on the arm of Prabhákara, or one to whom Kumárila-bhaṭṭa gives his hand? Not the former, for in the words:

"By means of its own and of another's form, eternal in the existent and non-existent,

Thing is recognised something by some at certain times.

Non-entity is but another entity, by some kind of relation. Non-entity is but another entity, naught else, for naught else is observed."

They deny any non-entity ulterior to entity. Non-entity being cognisable by the sixth instrument of knowledge (*anupalabdhi*) and knowledge being always an object of inference the absence of knowledge cannot be an object of perception. If again any one who maintains non-entity to be perceptible should employ the above argument (from the perceptions I am ignorant, I know not myself and other things); it may be replied: Is there, or is there not, in the consciousness I am ignorant, an apprehension of self as characterised by an absence, and of knowledge as the thing absent or non-existent? If there is such apprehension, consciousness of the absence of knowledge will be impossible, as involving a contradiction. If there is not, consciousness of the absence of knowledge, which consciousness presupposes a knowledge of the subject and of the thing absent, will not readily become possible. Inasmuch (the Śánkaras

---

मानाधिकरण्याधिगतजीवैक्यं बध्यते मुच्यते च । तदतिरिक्त-
नानाविधभोक्तृभोक्तव्यादिभेदप्रपञ्चः सर्व्वोऽपि तस्मिन्नवि-
द्यया परिकल्पितः सदेव सोम्येदमग्र आसीदेकमेवाद्विती-
यमित्यादिवचननिचयप्रामाण्यादिति ब्रुवाणास्तरति शोक-
मात्मविदित्यादिश्रुतिशिरःशतवशेन निर्व्विशेषब्रह्मात्मैकत्व-
विद्यया अनाद्यविद्यानिवृत्तिमङ्गीकुर्व्वाणाः मृत्योः स मृ-
त्युमाप्नोति य इह नानेव पश्यतीति भेदनिन्दाश्रवणेन
पारमार्थिकं भेदं निराचक्षाणाः विचक्षणम्मन्यास्तमिमं
विभागं न सहन्ते । तत्रायं समाधिरभिधीयते भवेदेतदेवं-
यद्यविद्यायां प्रमाणं विद्येत । न चानादिभावरूपं ज्ञान-
निवर्त्यमज्ञानमहमज्ञो मामन्यञ्च न जानामीति प्रत्यक्ष-
प्रमाणसिद्धम् । तदुक्तम्, अनादिभावरूपं यद्विज्ञानेन विलीयते ।
तदज्ञानमिति प्राज्ञा लक्षणं सम्प्रचक्षत इति ॥ न चैतत् ज्ञा-
नाभावविषयकमित्याशङ्कनीयम् । को हि कं ब्रूयात् प्रभाकरक-
रावलम्बी भट्टदत्तहस्तो वा, नाद्यः स्वरूपपररूपाभ्यां नित्यं
सदसदात्मके । वस्तुनि ज्ञायते किञ्चित् कैश्चिद्रूपं कदाच-
नेति ॥ भावान्तरमभावो हि कयाचित्तु व्यपेक्षया । भावान्त-
रमभावोऽन्यो न कश्चिदनिरूपणाद् इति वदता भावव्यति-
रिक्तस्याभावस्यानभ्युपगमात् । अभावस्य षष्ठप्रमाणगोचरत्वेन
ज्ञानस्य नित्यानुमेयत्वेन च तदभावस्य प्रत्यक्षविषयत्वानुपप-
त्तेः । यदि पुनः प्रत्यक्षाभाववादी कश्चिदेवमाचक्षीत तं प्र-
त्याचक्षीत अहमज्ञ इत्यस्मिन्ननुभवे अहमित्यात्मनोऽभावध-
र्म्मिता ज्ञानस्य प्रतियोगितया चावगतिरस्ति न वा, अस्ति
चेद्विरोधादेव न ज्ञानाभावानुभवसम्भवः । न चेद्धर्म्मिप्रतियो-
गिज्ञानसापेक्षो ज्ञानाभावानुभवः सुतरां न सम्भवति तस्या-
ज्ञानस्य भावरूपत्वे प्रागुक्तदूषणाभावादयमनुभवो भावरूपा-

Digitized by Google

continue) as the foregoing difficulties do not occur if ignorance (or illusion) be entitative, this consciousness (I am ignorant, I know not myself and other things) must be admitted to be conversant about an entitative ignorance.

All this (the Rámánuja replies) is about as profitable as it would be for a ruminant animal to ruminate upon ether; for an entitative ignorance is only equally supposable as an absence of knowledge. For (we would ask) is any self-conscious principle presented as an object and as a subject, as distinct from cognition? If it is presented, how can we, when it is presented, admit that ignorance of it is terminable by knowledge of its essence? If none such is presented, how can we be conscious of an ignorance which has no subject and no object? If you say: a pure manifestation of the spiritual essence is revealed only by the cognition opposed to ignorance (or illusion), and thus there is no absurdity in the consciousness of ignorance accompanied with a consciousness of its subject and object; then we rejoin:—Unfortunately for you this (consciousness of subject) must arise equally in the absence of knowledge (for such we define illusion to be), notwithstanding your assertion to the contrary. It must, therefore, be acknowledged that the cognition I am ignorant, I know not myself and other things, is conversant about an absence of cognition allowed by us both.

A. E. G.

ज्ञानगोचर एवाभ्युपगन्तव्य इति । तदेतत् गगनरोमन्थायितं भावरूपस्याज्ञानस्य ज्ञानाभावसमानयोगक्षेमत्वात् । तथा हि विषयत्वेनाश्रयत्वेन च ज्ञानस्य व्यावर्त्तकतया प्रत्यगर्थः प्रतिपन्नो न वा प्रतिपन्नश्चेत् स्वरूपज्ञाननिवर्त्यं तदज्ञानमिति तस्मिन् प्रतिपन्ने कथङ्कारमवतिष्ठेत अप्रतिपन्नश्चेद्व्यावर्त्तकाश्रयविषयशून्यमज्ञानं कथमनुभूयेत । अथ विशदः स्वरूपावभास एवाज्ञानविरोधिना ज्ञानेनाभासित इति आश्रयविषयज्ञाने सत्यपि नाज्ञानानुभवविरोध इति हन्त तर्हि ज्ञानाभावेऽपि समानमेतत् अन्यत्राभिनिवेशात् । तस्मादुभयाभ्युपगतज्ञानाभाव एवाहमज्ञो मामन्यञ्च न जानामीत्यनुभवगोचर इत्यभ्युपगन्तव्यम् ॥

THE

ŚULVASÚTRA OF BAUDHÁYANA,

WITH THE COMMENTARY BY DVÁRAKÁNÁTHAYAJVAN

(*Continued from page* 50.)

SECOND ADHYÁYA.

अर्धाष्टमपुरुषाः प्रथमोऽग्निः । १

The agni (i. e. the large fire-altar built of bricks which was required at certain periods of the great soma-sacrifices; see Indische Studien XIII). has an area of seven and a half square-purushas, when it is constructed for the first time.

सामान्यपरिभाषानन्तरमग्निधर्माः । अर्धपुरुषोऽष्टमो येषां तेऽर्धाष्टमपुरुषाः । पुरुषशब्देन पञ्चारत्निना विंशत्यधिकशताङ्गुलेन वेणुना परिमितं क्षेत्रमुच्यते । तत्र चतुर्दश सहस्राणि चत्वारि शतान्यङ्गुलयः पुरुषे सन्ति । एतत्पुरुषक्षेत्रं पञ्चदशभिर्हत्वार्धीकृत्य लक्षमष्टौ सहस्राणां चाङ्गुलयोऽर्धाष्टमाः पुरुषाः प्रथमोऽग्निः । प्रथमाहारे कर्तव्योऽग्निः । प्रथमे प्रयोग अर्धाष्टमपुरुषपरिमितक्षेत्रोऽग्निः कर्तव्य इत्यर्थः । एवमुत्तरत्रापि ।

अर्धनवमो द्वितीयः । २

Eight purushas and a half form the second agni.

द्वितीय आहारे कर्तव्योऽग्निः ।

अर्धदशमास्तृतीयः । ३

Nine purushas and a half form the third agni.

पूर्ववद्व्याख्यातम् ।

एवमुत्तरोत्तरो विधाभ्यास एकशतविधात् । ४

In this manner the addition of one part takes place in each consecutive agni, up to the hundred-and-one-fold agni.

विधीयत इति विधा पुरुषप्रमाणक्षेत्रम् । चतुर्थाहारप्रभृत्येवं पुरुषाभ्यास एकशतविधपर्यन्तम् ।

तदेतत्सप्तविधप्रभृत्येकशतविधान्तम् । ५

This (manner of gradual increase) begins with the sevenfold agni ($7\frac{1}{2}$ purushas) and ends with the hundred-and-one-fold agni ($101\frac{1}{2}$ purushas).

उक्तमग्निरूपं सप्तविधप्रभृत्येकशतविधान्तम् । न पूर्वत्र नोत्तरत्रेत्यर्थः । अयमेवोत्तरपक्षार्थोऽयमनुवादः ।

अत ऊर्ध्वमेकशतविधानेव प्रत्याददीत । ६

After that (after having arrived at the ekaśatavidha agni) (no increase is to be made, but) the hundred-and-one-fold agni is to be repeated.

चिनुयादित्यर्थः ।

अनग्निक्रान्वा यज्ञक्रतूनाहरेत् । ७

Or else the yajnakratus are to be performed without an agni.

अत ऊर्ध्वमित्येव । किं सर्वत्र । नेत्याह ।

अन्यत्राश्वमेधात् । ८

With exception of the aśvamedha (where the ekavinśavidha agni is indispensable).

Digitized by Google

एकविंशो ऽग्निर्भवतीत्यश्वमेधस्याग्निना नित्यं संयोगात् ।

अश्वमेधमप्राप्तं चेदाहरेदत ऊर्ध्वं विधामभ्यस्येन्नेतरदाद्रियेत । ९

If the aśvamedha is performed without having been reached (by the agni; i. e. if the last agni which had been constructed before the aśvamedha had not yet been the twenty-fold agni); then nevertheless after the aśvamedha another part has to be added (i. e. for the next agni after the aśvamedha 22½ purushas have to be taken); no other rule is to be followed.

अश्वमेध अप्राप्तश्चेद्विंशतिविधान्तानग्नीनचित्वाश्वमेधं चेदाहरेत्स ततः परमग्निं चिन्वानो द्वाविंशत्यादिविधमेव चिन्वीत न तु पूर्वविधान् । न ज्यायांसं चित्वा कनीयांसं चिन्वीतेति ।

अतीतं चेदाहरेदाहृत्य कृतान्तादेव प्रत्याददीत । १०

If the aśvamedha is performed after having been passed (i. e. if, for instance, immediately before the aśvamedha, which requires an agni of 21½ purushas, an agni of 30½ purushas had been constructed) then after the performance, the sacrificer has to proceed from the end of the constructed agnis (i. e. the next agni, which he constructs, has to contain 31½ purushas).

अतीतं चेदेकविंशतिविधादूर्ध्वमपि विधामभ्यस्य ततः पश्चादश्वमेधमाहरेत् । यथा त्रिंशद्विधाद्यन्ते तस्याप्यश्वमेधे ऽग्निरेकविंश एव । ततः परं तु पूर्वकृतान्तादारभ्यैकत्रिंशादिविधानेव चिन्वीतेति । पूर्वेषां कृतत्वात् । विधाभ्यासः कर्तव्य इत्युक्तम् । तच प्रश्नपूर्वकं प्रकारकथनम् ।

कथमु खलु विधामभ्यस्येत् । ११

But in which manner is the addition of a part (to the area of the agni) to be managed?

वक्ष्यमाणार्थगौरवाच्छिष्याभिमुखीकरणार्थः प्रश्नः ।

यदन्यत्प्रकृतेस्तत्पञ्चदश भागान्कृत्वा विधायां विधायां द्वौ द्वौ भागौ समस्येत्ताभिरर्धाष्टमाभिरग्निं चिनुयात् । १२

That which is different from the original form of the agni (i. e. that area which has to be added to the area of the saptavidha agni) is to be divided into fifteen parts and two of these parts are to be added to each vidhá (to each of the seven purushas; the one remaining part has consequently to be added to the remaining half-purusha); with seven and a half of these (increased) vidhás the agni has to be constructed.—Let us for instance consider the case of the chaturdaśavidha agni where seven purushas had to be added to the saptavidha agni. At first these seven purushas were combined into one square; this was done by finding the saptakaraní of a purusha. Then this square was divided into fifteen parts, either into fifteen small oblongs (dividing one side of the square into three, the other into five parts) or into fifteen small squares (by finding the pañchadaśamakaraṇí). Two of these fifteenth parts were then combined into one; if squares, by taking the dvikaraṇí of one of them; if oblongs, by turning one of them into a square and taking the dvikaraṇí of that square. Lastly the square containing the two fifteenths was combined with a square-purusha into a third square; this third square had to be employed for the chaturdaśavidha agni instead of the original square-purusha used for the saptavidha agni.—The commentary, instead of showing how the desired end could be attained by making use of the geometrical constructions taught in the paribhāshā-sútras, employs arithmetical calculation; but this was of course not the method of the sútrakáras.

द्वितीयाहारे ऽर्धनवमविधे यदन्यत्प्रकृतेरर्धाष्टमेभ्यो ऽधिकं पुरुषक्षेत्रं । तस्याङ्गुलयश्चतुर्दश सहस्राणि चत्वारि शतानि । तत्पञ्चदशभिर्विभज्य लब्धं नव शतानि षष्टिश्चाङ्गुलयः । तद्द्विगुणा विधायां पुरुषाङ्गुलीषु समस्येत्संयोजयेत् । संयोज्य दृष्टा अङ्गुलयः षोडश सहस्राणि त्रीणि शतानि विंशतिश्च । ता[1]: प्रमाणवेणोर्विंशतिशताङ्गुलीषु प्रक्षिप्य प्रकृतिवदिष्टकाकरणमग्निमानं च कुर्यादित्यर्थः । एवमर्धदशमविध अर्धाष्टभ्यो ऽधिकं द्वाभ्यां द्वाभ्यां पुरुषाभ्यां पुरुषाङ्गुलीर्हत्वा पञ्चदशभिर्विभज्य लब्धं द्विगुणीकृत्य पुरुषाङ्गुलीषु संयोजयेत् । तत्र पुरुषाङ्गुलय अष्टादश सहस्राणि द्वे शते चत्वारिंशच्च । तस्य मूलं पञ्चविंशच्छताङ्गुलस्तिलद्वयाधिकः पुरुषवेणुः । यो यथाग्नौ पुरुषस्थानीयस्तस्य विंशतिशततमो भागो विहरण इष्टकाद्यासु[2] चाङ्गुलिः कथ्यते । तिलश्च तस्य चतुस्त्रिंशः । तत्र श्लोकः । खाकाशश्रुतिवेदैकाद्[3] द्विगुणैः पुरुषैर्हतात्[5] । हरेत तिथिभिर्भागं[6] तन्मूलं पुरुषो भवेत्[7] ।

[1]There is apparently something wanting in the commentary vid. words to the effect, that the square root of 16320 has to be extracted.

[2]The passage seems corrupted. C. °विहरणं द्वविंश इष्टका° A. B. विहरणं ।

[3]A. B. द्वाका°

[4]A. B. C. °काद्वि°

[5]A. B. °हंता

[6]A. B. हरेत्तत्र त्रिभिर्भागं

[7]One square purusha has 14400 (khákáśaśrutivedaikáh) square-angulis. In the case of the daśavidha agni (i. e. the agni the area of which is 9½ purushas) 14400 is to be multiplied by 19, the double of the number of the purushas and the product divided by fifteen. The square root of the result gives the length of the purusha which is to be employed for the daśavidha agni.

Digitized by Google

ऊर्ध्वप्रमाणाभ्यासं जानोः पञ्चमस्य चतुर्विंशेनैवैके समामनन्ति । १३

Some teach an increase of the height by the twenty-fourth part of the fifth of a jánu.

The normal height of the agni is one jánu (height of the knee) = 32 angulis and therefore the normal height of one of the five layers = 6 angs. 13½ til. The twenty-fourth part of that is 9 til.

जानोः पञ्चमस्यार्धचतुर्दशतिलाधिकषडङ्गुलस्य चतुर्विंशांशेन तिलनवकेन चतुर्थाहारप्रभृति प्रत्याहरन्ति । तिलनवकेनोर्ध्वप्रमाणाभ्यासमेके समामनन्ति ।

अथ हैक एकविधप्रभृतीनपक्षपुच्छांश्चिन्वते । १४

Some construct the agnis from the one-fold (1½ square-purushas) up to the six-fold (6½ sq. p.) without wings and tail.

The rule refers to the construction of the agni in the form of a śyena, falcon.

अथेति पक्षव्यवच्छेदार्थः । हेत्यवधारणार्थः । एक आचार्या एकविधः प्रथमोऽग्निर्द्विविधो द्वितीय इत्यनेनैव क्रमेण पक्षपुच्छरहितांश्चिन्वते । नार्धाष्टमादीन् । तदेकीयमतं दूषयितुमाह ।

तन्नोपपद्यते पूर्वोत्तरविरोधात् । १५

This is not right because it is in contradiction with earlier and later precepts (? See the Commentary).

यदेकविधादिचयनं कैश्चिदुक्तं तन्न युज्यते । कथम् । पूर्वोत्तरविरोधात् । पूर्वस्मिन्काले कर्तव्यं कर्म येन वाक्येन विधीयते तत्पूर्वं वाक्यम् । एवमुत्तरं वाक्यम् । एवं पूर्वोत्तरकर्मविषयैरनेकशाखाधीतैर्बहुभिर्वाक्यैर्विरोधात् । बहुभिर्ह्येको ऽर्थः प्रतिपाद्यते । तस्मादविरोधेन भवितव्यम् । तानि वाक्यानि स्वयमेवोदाहरति ।

अथ हैकेषां ब्राह्मणं भवति श्येनचिदग्नीनां पूर्वो ततिरिति । १६

Regarding this matter the bráhmaṇa of some is the following: the construction of the agni in the shape of a falcon is the first ceremony among the agnis.

अथशब्दः संबन्धार्थः । उक्तस्यार्थविरोधस्योदाहरणानीति । हेत्यवधारणे । छन्दश्चिदादीनां मध्ये श्येनचिदेव पूर्वो ततिः । विस्तार्यन्ते ऽस्यां धर्मा इति विततिरि[1]त्यर्थः । एतदुक्तं भवति । युञ्जान इत्यादयो मन्त्राः सावित्राणि जुहोतीत्यादिब्राह्मणानि च श्येनचित एवेत्यनेन प्रकृतिरेव पूर्वं कर्तव्येत्युक्तं भवति । यथा द्वादशाहो ऽहर्गणानां प्रकृतिरित्यन्याहर्गणेभ्यः पूर्वं द्वादशाहस्यानुष्ठानम् । अथान्ये तु सामर्थ्याद्विकृतेः प्रथमानुष्ठानं होतृक्रमादीननुसृत्य वचनात्पशुचातुर्मास्यादीनां प्रथमानुष्ठानम् । तस्माद्यत्र सामर्थ्यं वचनं वा नास्ति तत्र प्रकृतेः प्रथमानुष्ठानम् ।

अथापरेषाम् । १७

The bráhmaṇa of others is as follows:—

ब्राह्मणं भवतीत्येव । अथशब्दः पूर्ववत् ।

न ज्यायांसं चित्वा कनीयांसं चिन्वीतेति । १८

Having constructed a larger agni he is not to construct a smaller one.

ज्यायांसं वृद्धतरं बृहत्तरमग्निं चित्वा कनीयांसमल्पतरं न चिन्वीत ।

शु° मी° ज्यायांसमधिकविधाप्रमाणक्षेत्रमग्निं चित्वा कनीयांसं न्यूनविधाप्रमाणक्षेत्रमग्निं न चिन्वीतेत्यर्थः ।

अथास्माकम् । १९

And the following is our bráhmaṇa.

ब्राह्मणं भवतीत्येव । अस्माकं चास्यां[1]शाखायामित्यर्थः ।

शु° मी° श्येनचितस्पक्षपुच्छतानियमप्रतिपादकं तैत्तिरीयकब्राह्मणमुदाहरति ।

पक्षी भवति न ह्यपक्षः पतितुमर्हत्यरत्निना पक्षौ द्राघीयांसौ भवतस्तस्मात्पक्षप्रवयांसि वयांसि व्याममात्रौ पक्षौ च पुच्छं च भवति । २०

He is winged, for an unwinged one can not fly; the two wings are longer (than a purusha) by one aratni; therefore the birds are particularly strong in their wings; wings and tail have the measure of a vyáma.

पक्षीत्युपलक्षणत्वात्पक्षवान्पुच्छवान् । तद्रहितः पतितुं नार्हति । तस्मादरत्निना पक्षौ दीर्घतरौ भवतः । यस्मादेवं तस्मात्पक्षाभ्यां वृद्धतराणि । व्याममात्रौ पञ्चारत्निमात्रौ पक्षौ च पुच्छं च भवति । एवं विरोधप्रतिपादनार्थं ब्राह्मणशाख्य[2]न्युदाहृत्याद्योत्तरभङ्ग्या एकविधादीनामननुष्ठानं प्रकृतिभूतस्य सप्तविधश्येनचित एव प्रथमानुष्ठानं चोदाहरति ।

G. Th.

[1] A. इति प्रकृतिरि° B. इति प्रतिरि°

[1] A. B. C. वास्यां

[2] A. B. हृत्वावोद्योत्तर° C. °हृत्यावाद्योत्तर°

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

Digitized by Google

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥

अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 112. Benares, September 1st, 1875. Vol. X.

काशिकायाः

॥ चतुर्थाध्यायस्य द्वितीयः पादः ॥

सास्मिन्पौर्णमासीति संज्ञायाम् ॥ २१ ॥

सेति प्रथमासमर्थाद् अस्मिन्निति सप्तम्यर्थे यथाविहितं प्रत्ययो भवति, यत्तत्प्रथमासमर्थं पौर्णमासी चेद्भवति । इतिकरणस्ततश्चेद्विवक्षा । संज्ञायामिति समुदायोपाधिः, प्रत्ययान्तेन चेत्संज्ञा गम्यत इति । मासार्द्धमाससंवत्सराणामेषा संज्ञा । पौषी पौर्णमासी अस्मिन्पौषो मासः । पौषोऽर्द्धमासः । पौषः संवत्सरः । इह न भवति । पौषी पौर्णमासी अस्मिन्दशरात्र इति । भृतकमासे च न भवति । इतिकरणस्य संज्ञाशब्दस्य च तुल्यमेव फलं प्रयोगानुसरणं, तत्र किमर्थं द्वयमुपादीयते, संज्ञाशब्देन तुल्यतामितिकरणस्य ज्ञापयितुं, नह्ययं लोके तथा प्रसिद्धः । संज्ञार्थत्वे तु संप्रति ज्ञापिते यत्तत्र तत्रोच्यते इतिकरणस्ततश्चेद्विवक्षेति तदुपपन्नं भवति । अथ पौर्णमासीति कोऽयं शब्दः । पूर्णमासादण्, पौर्णमासी । अथ वा पूर्णो माः पूर्णमाः, पूर्णमास इयं पौर्णमासी । मा इति चन्द्र उच्यते ॥

आग्रहायण्यश्वत्थाट्ठक् ॥ २२ ॥

सास्मिन्पौर्णमासीति सर्वमनुवर्त्तते । आग्रहायणीशब्दादश्वत्थशब्दाच्च प्रथमासमर्थात्पौर्णमास्युपाधिकाद् अस्मिन्निति सप्तम्यर्थे ठक् प्रत्ययो भवति । अणोऽपवादः । आग्रहायणिको मासः । अर्द्धमासः । संवत्सरः । एवमाश्वत्थिकः ॥

विभाषा फाल्गुनीश्रवणाकार्त्तिकीचैत्रीभ्यः ॥ २३ ॥

फाल्गुन्यादयः पौर्णमासीशब्दास्तेभ्यो विभाषा ठक् प्रत्ययो भवति, सास्मिन्पौर्णमासीति संज्ञायामित्येतस्मिन्विषये । नित्यमणि प्राप्ते पक्षे ठग्विधीयते । फाल्गुनो मासः । फाल्गुनिकः । श्रावणः । श्रावणिकः । कार्त्तिकः । कार्त्तिकिकः । चैत्रः । चैत्रिकः ॥

सास्य देवता ॥ २४ ॥

सेति प्रथमासमर्थादस्येति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति, यत्प्रथमासमर्थं देवता चेत्सा भवति । यागसंप्रदानं देवता देयस्य पुरोडाशादेः स्वामिनी, तस्मिन्नभिधेये प्रत्ययः । इन्द्रो देवता ऽस्य ऐन्द्रं हविः । आदित्यम् । बार्हस्पत्यम् । प्राजापत्यम् । देवतेति किम् । कन्या देवता ऽस्य । कथमैन्द्रो मन्त्रः । मन्त्रस्तुत्यमपि देवतेत्युपचरन्ति । कथमाग्नेयो वै ब्राह्मणो देवतयेति, उपमानाद्भविष्यति । महाराजप्रोष्ठपदाट्ठञिति यावत्सास्य देवतेत्यधिकारः । सेति प्रकृते पुनः समर्थविभक्तिनिर्देशः संज्ञानिवृत्त्यर्थः ॥

कस्येत् ॥ २५ ॥

कशब्दो देवतायां प्रजापतेर्वाचकस्ततः पूर्वेणैवाणप्रत्ययः सिद्ध इकारादेशार्थं वचनम् । कस्य इकारादेशो भवति प्रत्ययसन्नियोगेन । कायं हविः । कायमेककपालं निर्वपेत् ॥

शुक्राद् घन् ॥ २६ ॥

शुक्रशब्दात्सास्य देवतेत्यस्मिन्नर्थे घन् प्रत्ययो भवति । अणोऽपवादः । शुक्रियं हविः । शुक्रियोऽध्यायः ॥

अपोनप्त्रपान्नप्तृभ्यां घः ॥ २७ ॥

अपोनप्तृ अपान्नप्तृ इत्येताभ्यां घः प्रत्ययो भवति सास्य देवतेत्यस्मिन्विषये । अणोऽपवादः । अपोनप्त्रियं हविः । अ-

Digitized by Google

पांनप्त्रियम् । अपोनपाद् अपांनपादिति देवताया नामधेये एते । तयोस्तु प्रत्ययसन्नियोगेन रूपमिदं निपात्यते ॥

छ च ॥ २८ ॥

अपोनप्तृ अपान्नप्तृ इत्येताभ्यां छकारः प्रत्ययो भवति सास्य देवतेत्यस्मिन्विषये। अणोपवादः। अपोनप्त्रीयं हविः । अपान्नप्त्रीयम् । योगविभागः संख्यातानुदेशपरिहारार्थः॥ छप्रकरणे पैङ्गाक्षीपुत्रादिभ्य उपसंख्यानम् ॥ * ॥ पैङ्गाक्षीपुत्रीयम् । तार्णबिन्दवीयम् ॥ शतरुद्राच्छश्च घश्च ॥ * ॥ शतरुद्रीयम् । शतरुद्रियम् ॥

महेन्द्राद् घाणौ च ॥ २९ ॥

महेन्द्रशब्दाद् घाणौ प्रत्ययौ भवतः, चकाराच्छश्च, सास्य देवतेत्यस्मिन्विषये । महेन्द्रो देवतास्य महेन्द्रियं हविः । माहेन्द्रम् । महेन्द्रीयम् ॥

सोमाट् ट्यण् ॥ ३० ॥

सोमशब्दात् ट्यण्प्रत्ययो भवति सास्य देवतेत्यस्मिन्विषये । अणोपवादः । णकारो वृद्ध्यर्थः । टकारो ङीबर्थः। सोमो देवतास्य सौम्यं हविः । सौम्यं सूक्तम् । सौमी ऋक् ॥

वाय्वृतुपित्रुषसो यत् ॥ ३१ ॥

वाय्वादिभ्यः शब्देभ्यो यत्प्रत्ययो भवति सास्य देवतेत्येतस्मिन्विषये । अणोपवादः । वायुर्देवतास्य वायव्यम् । ऋतव्यम् । पित्र्यम् । उषस्यम् ॥

द्यावापृथिवीशुनासीरमरुत्वदग्नीषोमवास्तोष्पतिगृहमेधाच्छ च ॥ ३२ ॥

द्यावापृथिव्यादिभ्यश्छः प्रत्ययो भवति सास्य देवतेत्यस्मिन्विषये । अणो यतश्च चापवादः। द्यौश्च पृथिवी च द्यावापृथिव्यौ देवते अस्य, द्यावापृथिवीयम् । द्यावापृथिव्यम् । शुनश्च सीरश्च तौ देवते अस्येति, शुनासीरीयम् । शुनासीर्यम् । शुनो वायुः । सीर आदित्यः । मरुत्वान्देवतास्य, मरुत्वतीयम् । मरुत्वत्यम् । अग्नीषोमीयम् । अग्नीषोम्यम् । वास्तोष्पतीयम् । वास्तोष्पत्यम् । गृहमेधीयम् । गृहमेध्यम् ॥

अग्नेर्ढक् ॥ ३३ ॥

अग्निशब्दाद् ढक् प्रत्ययो भवति सास्य देवतेत्यस्मिन्विषये । अणोपवादः । अग्निर्देवतास्य, आग्नेयोऽष्टाकपालः ॥ प्राग्दीव्यतीयेषु तद्धितार्थेषु सर्वत्राग्निकलिभ्यां ढग्वक्तव्यः ॥ * ॥

कालेभ्यो भववत् ॥ ३३ ॥

कालविशेषवाचिभ्यः शब्देभ्यो भववत्प्रत्यया भवन्ति सास्य देवतेत्यस्मिन्विषये। कालाट्ठञिति प्रकरणे भवे प्रत्यया विधास्यन्ते ते सास्य देवतेत्यस्मिन्नर्थे तथैवेष्यन्ते, तदर्थमिदमुच्यते । वत्करणं सर्वसादृश्यपरिग्रहार्थम् । मासे भवं मासिकम् । आर्द्धमासिकम् । सांवत्सरिकम् । वासन्तम् । प्रावृषेण्यम् । तथा, मासो देवतास्य, मासिकम् । आर्द्धमासिकम् । सांवत्सरिकम्। वासन्तम् । प्रावृषेण्यम् ॥

महाराजप्रोष्ठपदाट्ठञ् ॥ ३५ ॥

महाराजशब्दात्प्रोष्ठपदशब्दाच्च ठञ् प्रत्ययो भवति सास्य देवतेत्यस्मिन्विषये । महाराजो देवतास्य माहाराजिकम् । प्रौष्ठपदिकम् ॥ ठञ्प्रकरणे तदस्मिन्वर्त्ततइति नवयज्ञादिभ्य उपसंख्यानम् ॥ * ॥ नवयज्ञोस्मिन्वर्त्तते, नावयज्ञिकः कालः । पाकयज्ञिकः ॥ पूर्णमासादण् ॥ * ॥ पूर्णमासोऽस्यां वर्त्तते पौर्णमासी तिथिः ॥

पितृव्यमातुलमातामहपितामहाः ॥ ३६ ॥

पितृव्यादयो निपात्यन्ते । समर्थविभक्तिः प्रत्ययः प्रत्ययार्थोऽनुबन्ध इति सर्वं निपातनाद्विज्ञेयम् । पितृमातृभ्यां भ्रातर्यभिधेये व्यत् डुलच् इत्येतौ प्रत्ययौ निपात्येते । पितुर्भ्राता पितृव्यः । मातुर्भ्राता मातुलः । ताभ्यां पितरि डामहच्, मातरि षिच्च । ताभ्यामेव पितरि डामहच् प्रत्ययो भवति । पितुः पिता, पितामहः । मातुः पिता, मातामहः । मातरि षिच्च । पितामही । मातामही ॥ अवेर्दुग्धे सोढदूसमरीसचो वक्तव्याः ॥ * ॥ अवेर्दुग्ध,मविसोढम् । अविदूसम् । अविमरीसम् ॥ तिलान्निष्फलात्पिञ्जपेजौ प्रत्ययौ वक्तव्यौ ॥ * ॥ निष्फलस्तिल,स्तिलपिञ्जः । तिलपेजः ॥ पिञ्जश्छन्दसि डिच्च ॥ * ॥ तिल्पिञ्जः ॥

तस्य समूहः ॥ ३७ ॥

तस्येति षष्ठीसमर्थात्समूह इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति । किमिहोदाहरणम् । चित्तवदादनुदात्तमगोत्रं यस्य च नान्यत्प्रतिपदं ग्रहणम् । अचित्ताट्ठकं वक्ष्यति, अनुदात्तादेरञ्, गोत्राद्वुञ्, प्रतिपदं च केदाराद्यञ्चेत्येवमादि, तत्परिहारेणात्रोदाहरणं द्रष्टव्यम् । काकानां समूहः, काकम् । बाकम् । इनित्रकट्यचश्चेति यावत्समूहाधिकारः ॥ गुणादिभ्यो ग्रामज्वक्तव्यः ॥ * ॥ गुणग्रामः । करणग्रामः । गुण । करण । तत्त्व । शब्द । इन्द्रिय । आकृतिगणः * ॥

भिक्षादिभ्योऽण् ॥ ३८ ॥

भिक्षेत्येवमादिभ्यः शब्देभ्योऽण् प्रत्ययो भवति तस्य समूह इत्येतस्मिन्विषये । अण्ग्रहणं बाधकबाधनार्थम् । भिक्षाणां समूहो, भैक्षम् । गार्भिणम् । युवतिशब्दोत्र पठ्यते, तस्य ग्रहणसामर्थ्याद् पुंवद्भावो न भवति भस्याढे तद्धितइति। युवतीनां समूहो, यौवतम् । भिक्षा । गर्भिणी । क्षेत्र । करीष । अङ्गार।

* गुणादिभ्य इत्यारभ्याकृतिगण इत्यन्तः पाठो बहुषु पुस्तकेषु नास्ति।

Digitized by Google

चर्मिन् । धर्मिन् * । सहस्र । युवति । पदाति । पद्धति । अथर्वन् † । दक्षिणा । भूत ‡ ॥

गोत्रोक्षोष्ट्रोरभ्रराजराजन्यराजपुत्रवत्समनुष्याजाद् वुञ् ॥ ३९ ॥

गोत्रादिभ्यो वुञ्प्रत्ययो भवति तस्य समूह इत्येतस्मिन्विषये । अपत्याधिकारादन्यत्र लौकिकं गोत्रं गृह्यते ऽपत्यमात्रं न तु पौत्रप्रभृत्येव । औपगवानां समूहः, औपगवकम् । कापटवकम् । उक्षन् । औक्षकम् । उष्ट्र । औष्ट्रकम् । उरभ्र । औरभ्रकम् । राजन् । राजकम् । राजन्य । राजन्यकम् । राजपुत्र । राजपुत्रकम् । वत्स । वात्सकम् । मनुष्य । मानुष्यकम् । अज । आजकम् । "प्रकृत्या ऽके राजन्यमनुष्ययुवान" इति यलोपो न भवति आपत्यस्य च तद्धिते नातीति ॥ वृद्धाच्चेति वक्तव्यम् ॥ * ॥ वृद्धानां समूहो, वार्द्धकम् ॥

केदाराद्यञ्च ॥ ४० ॥

केदारशब्दाद् यञ्प्रत्ययो भवति, चकाराद् वुञ् च, तस्य समूह इत्येतस्मिन्विषये । अचित्तलक्षणस्य ठको ऽपवादः । केदाराणां समूहः, कैदार्यम् । कैदारकम् ॥ गणिकायाश्च यञ्वक्तव्यः ॥ * ॥ गणिकानां समूहो, गाणिक्यम् ॥

ठञ् कवचिनश्च ॥ ४१ ॥

कवचिन्शब्दाट्ठञ् प्रत्ययो भवति तस्य समूह इत्येतस्मिन्विषये । कवचिनां समूहः, कावचिकम् । चकारः केदारादित्यस्यानुकर्षणार्थः । केदाराणां समूहः, कैदारिकम् ॥

ब्राह्मणमाणववाडवाद्यन् ॥ ४२ ॥

ब्राह्मणादिभ्यः शब्देभ्यो यन्प्रत्ययो भवति तस्य समूह इत्येतस्मिन्विषये । नकारः स्वरार्थः । ब्राह्मणानां समूहो, ब्राह्मण्यम् । माणव्यम् । वाडव्यम् ॥ यन्प्रकरणे पृष्ठादुपसंख्यानम् ॥ * ॥ पृष्ठानां समूहः, पृष्ठ्यः ॥ अह्नः खः क्रतौ ॥ * ॥ अह्नां समूहो, ऽहीनः क्रतुः । क्रताविति किम् । आह्नः । खण्डिकादिषु दर्शनादञ्भवति ॥ पर्श्वा णस्वक्तव्यः ॥ * ॥ पर्शूनां समूहः, पार्श्वम् । पदसंज्ञकत्वाद् गुणो न भवति ॥ वातादूलः ॥ * ॥ वातानां समूहो, वातूलः § ॥

ग्रामजनबन्धुसहायेभ्यस्तल् ॥ ४३ ॥

ग्रामादिभ्यस्तल्प्रत्ययो भवति तस्य समूह इत्येतस्मिन्विषये । ग्रामाणां समूहः, ग्रामता । जनता । बन्धुता । सहायता ॥ गजाच्चेति वक्तव्यम् ॥ * ॥ गजानां समूहो, गजता ॥

* चर्मन् । धर्मन् । इति पा० २ ।

† अर्वन् । इति पा० २ ।

‡ विषय । श्रोत्र ॥ वृक्षादिभ्यः षण्डः ॥ वृक्षषण्डः । तरुषण्डः । वृक्ष । तरु । पादप । इत्यधिकमत्र पुस्तकद्वये । तत्रैकस्मिन् पुस्तके "वृक्षादिभ्यः षण्डप्रत्ययो भवति । वृक्षषण्डः । तरुषण्डः" । इति पा० २ ।

§ वातादित्यारभ्य वातूल इत्यन्तः पाठो बहुषु पुस्तकेषु नास्ति ।

अनुदात्तादेरञ् ॥ ४४ ॥

अनुदात्तादेः शब्दादञ् प्रत्ययो भवति तस्य समूह इत्येतस्मिन्विषये । कपोतानां समूहः, कापोतम् । मायूरम् । तैत्तिरम् ॥

खण्डिकादिभ्यश्च ॥ ४५ ॥

खण्डिका इत्येवमादिभ्यः शब्देभ्यो ऽञ् प्रत्ययो भवति तस्य समूह इत्येतस्मिन्विषये । आद्युदात्तार्थमचित्तार्थं च वचनम् । खण्डिकानां समूहः, खाण्डिकम् । वाडवम् । क्षुद्रकमालवशब्दोऽत्र पठ्यते । क्षुद्रकाश्च मालवाश्चेति क्षत्रियद्वन्द्वः । ततः पूर्वेणैवाञि सिद्धे वचनं गोत्रवुञ्बाधनार्थम् । ननु च परत्वादञा वुञ् बाधिष्यते । न च गोत्रसमुदायो गोत्रं, न च तदन्तविधिरत्रास्ति । एवं तर्हि एतज् ज्ञापयति वुञि पूर्वविप्रतिषेधः, सामूहिकेषु च तदन्तविधिरस्तीति । प्रयोजनमौपगवकं कापटवकमिति वुञ् भवति । वानहस्तिकं गौधेनुकमिति च तदन्तविधिः । क्षुद्रकमालवादित्येतावता योगविभागेन पूर्वविप्रतिषेधस्तदन्तविधिश्च ज्ञापितः, पुनरस्यैव नियमार्थमुच्यते सेनासंज्ञायामिति । क्षुद्रकमालवात्सेनासंज्ञायामेवाऽञ्भवति । क्षौद्रकमालवी सेना । क्षौद्रकमालवकमन्यत् * ।

अञ्सिद्धिरनुदात्तादेः को ऽर्थः क्षुद्रकमालवात् ।
गोत्राद्वुञ् न च तद्गोत्रं तदन्तान्न च सर्वतः ॥
ज्ञापकं स्यात्तदन्तत्वे तथा चापिशलेर्विधिः ।
सेनायां नियमार्थं च यथा बाध्येत चाञ् वुञा ॥

खण्डिका । वडवा ॥ क्षुद्रकमालवात्सेनासंज्ञायाम् ॥ भिक्षुक । शुक । उलूक । श्वन् । युग । अहन् । वरत्रा । हलबन्ध ॥

चरणेभ्यो धर्मवत् ॥ ४६ ॥

चरणशब्दाः कठकलापादयः, तेभ्यः षष्ठीसमर्थेभ्यः समूहे धर्मवत् प्रत्यया भवन्ति । गोत्रचरणाद्वुञित्यारभ्य प्रत्यया वक्ष्यन्ते, तत्र चैवमुच्यते चरणाद्धर्माम्नाययोरिति, तेन धर्मवदित्यतिदेशः क्रियते । वतिः सर्वसादृश्यार्थः । कठानां धर्मः, काठकम् । कालापकम् । छान्दोग्यम् । औक्थिक्यम् । आथर्वणम् । तथा समूहेऽपि । काठकम् । कालापकम् । छान्दोग्यम् । औक्थिक्यम् । आथर्वणम् † ॥

* गोत्रलक्षणो वुञेव भवतीत्यधिकं पुस्तकान्तरे ।

† ननु धर्मे न कोऽपि प्रत्ययो विधास्यते, कथं धर्मवदित्यतिदेशः । एतदेव ज्ञापयति वार्तिककारो गोत्रचरणाद्वुञित्यस्मिन्प्रकरणे सर्वयोगशेषं 'चरणाद्धर्माम्नाययोरिति वक्ष्यति' तद्भगवतः पाणिनेरप्यभिमतमिति । इत्यधिकमेकस्मिन्पुस्तके ॥

Digitized by Google

अचित्तहस्तिधेनोष्ठक् ॥ ४७ ॥

अचित्तार्थेभ्यो हस्तिधेनुशब्दाभ्यां च ठक् प्रत्ययो भवति तस्य समूह इत्येतस्मिन्विषये । अणोऽपवादः । अपूपानां समूह, आपूपिकम् । शाष्कुलिकम् । हास्तिकम् । धैनुकम् ॥ धेनोरनञ इति वक्तव्यम् ॥ * ॥ आधेनवम् ॥

केशाश्वाभ्यां यञ्छावन्यतरस्याम् ॥ ४८ ॥

केश अश्व इत्येताभ्यां यथासंख्यं यञ् छ इत्येतौ प्रत्ययौ भवतोऽन्यतरस्यां तस्य समूह इत्येतस्मिन्विषये । केशानां समूहः, । कैश्यम् । कैशिकम् । अश्वानां समूह, आश्वम् । अश्वीयम् ॥

पाशादिभ्यो यः ॥ ४९ ॥

पाशादिभ्यो यः प्रत्ययो भवति तस्य समूह इत्येतस्मिन्विषये । पाशानां समूहः, पाश्या । तृण्या * । पाश । तृण । धूम । वात । अङ्गार । पोत । बालक । पिटक । पिटाक । शकट । हल । नड । वन † ॥

खलगोरथात् ॥ ५० ॥

खलगोरथशब्देभ्यो यः प्रत्ययो भवति तस्य समूह इत्येतस्मिन्विषये । खलानां समूहः, खल्या । गव्या । रथ्या । पाशादिष्वपाठ उत्तरार्थः ‡ ॥

इनित्रकट्यचश्च ॥ ५१ ॥

खलगोरथशब्देभ्यो यथासंख्यम् इनि त्र कट्यच् इत्येते प्रत्यया भवन्ति तस्य समूह इत्येतस्मिन्विषये । खलिनी । गोत्रा । रथकट्या ॥ खलादिभ्य इनिर्वक्तव्यः ॥ * ॥ डाकिनी । कुण्डलिनी । कुटुम्बिनी ॥ कमलादिभ्यः खण्डच् प्रत्ययो भवति ॥ * ॥ कमलखण्डम् । अम्भोजखण्डम् । कमल । अम्भोज । पद्मिनी । कुमुद । सरोज । पद्म । नलिनी । कैरविणी । कमलादिराकृतिगणः ॥ नरकरितुरङ्गाणां स्कन्धच् प्रत्ययः ॥ * ॥ नरस्कन्धः । करिस्कन्धः । तुरङ्गस्कन्धः ॥ पूर्वादिभ्यः काण्डः प्रत्ययो भवति ॥ * ॥ पूर्वकाण्डम् । तृणकाण्डम् । कर्मकाण्डम् § ॥

विषयो देशे ॥ ५२ ॥

समूह इति निवृत्तम् । षष्ठी समर्थविभक्तिरनुवर्त्तते । तस्येति षष्ठीसमर्थाद्‌ विषय इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति, योऽसौ विषयो देशश्चेत्स भवति । विषयशब्दो बह्वर्थः । क्व चिद्ग्रामसमुदाये वर्त्तते । विषयो लब्ध इति । क्व चिदिन्द्रियग्राह्ये, चक्षुर्विषयो रूपमिति । क्व चिदत्यन्तशीलिते ज्ञेये, देवदत्तस्य विषयोऽनुवाक इति । क्व चिदन्यत्र भावे । मत्स्यानां विषयो जलमिति । तत्र देशग्रहणं ग्रामसमुदायप्रतिपत्त्यर्थम् । शिबीनां विषयो देशः, शैबः । औष्ट्रः । देश इति किम् । देवदत्तस्य विषयोऽनुवाकः ॥

राजन्यादिभ्यो वुञ् ॥ ५३ ॥

राजन्यादिभ्यः शब्देभ्यो वुञ्प्रत्ययो भवति विषयो देश इत्येतस्मिन्नर्थे । अणोऽपवादः । राजन्यानां विषयो देशः, राजन्यकः । दैवयानकः । आकृतिगणश्चायम् । मालवानां विषयो देशः, मालवकः । वैराटकः । त्रैगर्त्तकः । राजन्य । देवयान । शालङ्कायन । जालन्धरायण । आत्मकामेय । अम्बरीषपुत्र । वसाति । बैल्ववन । शैलूष । उदुम्बर । बैल्वल । आर्जुनायन । संप्रिय । दाक्षि । ऊर्णनाभ * ॥

भौरिक्याद्यैषुकार्यादिभ्यो विधल्भक्तलौ ॥ ५४ ॥

भौरिक्यादिभ्य ऐषुकार्यादिभ्यश्च यथासंख्यं विधल् भक्तल् इत्येतौ प्रत्ययौ भवतो विषयो देश इत्येतस्मिन्विषये । अणोऽपवादः । भौरिकिविधः । वैपेयविधः । ऐषुकार्यादिभ्यः । ऐषुकारिभक्तः । सारस्यायनभक्तः । भौरिकि । वैपेय । भौलिकि । चैटयत । काणेय । वाणिजक । वालिज्य । वालिज्यक । शैकयत । वैकयत । भौरिक्यादिः ॥ ऐषुकारि । सारस्यायन । चान्द्रायण । द्व्याक्षायण । त्र्यायण । औडायन । जौलायन । खाडायन । सौवीर । दासमित्रि । दासमित्रायण । शौद्रायण । दाक्षायण । शयण्ड । तार्क्ष्यायण । शौभ्रायण । सायण्डि । शौण्डि । वैश्वमाणव । वैश्वधेनव । नद । तुण्डदेव । विशदेव † ॥

सोऽस्यादिरिति च्छन्दसः प्रगाथेषु ॥ ५५ ॥

स इति समर्थविभक्तिः । अस्येति प्रत्ययार्थः । आदिरिति प्रकृतिविशेषणम् । इतिकरणो विवक्षार्थः । छन्दस इति प्रकृतिनिर्देशः । प्रगाथेष्विति प्रत्ययार्थविशेषणम् । स इति प्रथमासमर्थादस्येति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति, यत्प्रथमासमर्थं छन्दश्चेत्तदादिर्भवति, यत्तदस्येति निर्दिष्टं प्रगाथाश्चेत्ते भवन्ति, इतिकरणस्ततश्चेद्विवक्षा । पाङ्क्त्यादिरस्य, पाङ्क्तः प्रगाथः । आनुष्टुभः । जागतः । आदिरिति किम् । अनुष्टुम्मध्यमस्य प्रगाथस्य । छन्दस इति किम् । उदुत्यशब्द आदिरस्य प्रगाथस्य । प्रगाथेष्विति किम् । पङ्क्तिरादिरस्यानुवाकस्य । प्रगाथशब्दः क्रियानिमित्तकः क्व चिदेव मन्त्रविशेषे

---

* अत्र स्त्रीलिङ्गत्वं लोकाश्रयत्वाल्लिङ्गस्येत्यधिकं पुस्तकान्तरे ।

† पाटलका । गल । इत्यधिकं पुस्तकान्तरे ।

‡ योगविभाग उत्तरार्थः । पा० २ ।

§ कमलादिभ्य इत्यारभ्य कर्मकाण्डमित्यन्तः पाठ एकस्मिन्पुस्तके नास्ति ।

---

* आपीत । अवीड । वैतिल । वाचक । एतेऽत्राधिकाः पुस्तकान्तरे ।

† अलायत । औलालायत । शौण्ड । शयाण्ड । वैश्वदेव । एते शब्दा अधिकाः पुस्तकान्तरे ।

वर्तते । यत्र द्वे ऋचौ प्रग्रथनेन तिस्रः क्रियन्ते स प्रगाथना-त्मकर्षगानाद्वा प्रगाथ इत्युच्यते ॥ छन्दसः प्रत्ययविधाने न-पुंसके स्वार्थउपसंख्यानम् ॥ * ॥ त्रिष्टुबेव त्रैष्टुभम् । जागतम् ॥

संग्रामे प्रयोजनयोद्धृभ्यः ॥ ५६ ॥

सोऽस्येति समर्थविभक्तिः, प्रत्ययार्थश्चानुवर्तते । प्रथमा-समर्थविशेषणं, प्रयोजनं योद्धारश्च । प्रत्ययार्थविशेषणं संग्रामः । प्रयोजनवाचिभ्यो योद्धृवाचिभ्यश्च शब्देभ्यः प्रथमासमर्थेभ्यो ऽस्येति षष्ठ्यर्थे संग्रामे ऽभिधेये यथाविहितं प्रत्ययो भवति । भद्रा प्रयोजनमस्य संग्रामस्य भाद्रः संग्रामः । सौभद्रः । गौरिमित्रः । योद्धृभ्यः । अहिमाला योद्धारो ऽस्य संग्रामस्य, आहिमालः । स्यान्दनाश्वः । भारतः । संग्रामइति किम् । सुभद्रा प्रयोजनमस्य दानस्य । प्रयोजनयोद्धृभ्य इति किम् । सुभद्रा प्रेक्षिका ऽस्य संग्रामस्य ॥

तदस्यां प्रहरणमिति क्रीडायां णः ॥ ५७ ॥

तदिति प्रथमासमर्थादस्यामिति सप्तम्यर्थे णः प्रत्ययो भवति, यत्तदिति निर्दिष्टं प्रहरणं चेत्तद्भवति । यदस्यामिति निर्दिष्टं क्रीडा चेत्सा भवति । इतिकरणस्ततश्चेद्विवक्षा । दण्डः प्रहरणमस्यां क्रीडायां, दाण्डा । मौष्टा । प्रहरणमिति किम् । माला भूषणमस्यां क्रीडायाम् । क्रीडायामिति किम् । खड्गः प्रहरणमस्यां सेनायाम् ॥

घञः सास्यां क्रियेति ञः ॥ ५८ ॥

सेति समर्थविभक्तिः । अस्यामिति प्रत्ययार्थः स्त्रीलिङ्गः । क्रियेति प्रकृत्यर्थविशेषणम् । घञ इति प्रकृतिनिर्देशः । इति-करणो विवक्षार्थः । घञन्तात्क्रियावाचिनः प्रथमासमर्थादस्या-मिति सप्तम्यर्थे स्त्रीलिङ्गे ञः प्रत्ययो भवति । घञ इति कृद्ग्रहणं तत्र गतिकारकपूर्वमपि गृह्यते । श्येनपातोऽस्यां वर्त्तते श्यैनंपाता । तैलंपाता । घञ इति किम् । श्येनपतनमस्यां वर्त्तते । क्रियेति किम् । प्राकारो ऽस्यां वर्तते । अथ समर्थवि-भक्तिः प्रत्ययार्थश्च कस्मात्पुनरुपादीयते । यावता द्वयमपि प्रकृतमेव । क्रीडायामित्यनेन तत्संबद्धम्, अतस्तदनुवृत्तौ क्रीडानुवृत्तिरपि संभाव्येत । सामान्येन चेदं विधानम् । दण्ड-पातो ऽस्यां तिथौ वर्त्तते दाण्डपाता तिथिः । मौसलपाता तिथिः ॥

तदधीते तद्वेद ॥ ५९ ॥

तदिति द्वितीयासमर्थादधीते वेद इत्येतयोरर्थयोर्यथावि-हितं प्रत्ययो भवति । छन्दोऽधीते, छान्दसः । वैयाकरणः । नैरुक्तः । निमित्तानि वेद, नैमित्तः । मौहूर्त्तः । औत्पातः । द्विस्तद्ग्रहणमधीयानविदुषोः पृथग्विधानार्थम् ॥

क्रतूक्थादिसूत्रान्ताट्ठक् ॥ ६० ॥

क्रतुविशेषवाचिभ्य उक्थादिभ्यश्च सूत्रान्ताच्च ठक्प्रत्ययो भवति तदधीते तद्वेदेत्यस्मिन्विषये । अणोऽपवादः । अग्निष्टो-ममधीते वेद वा, आग्निष्टोमिकः । वाजपेयिकः । उक्थादि-भ्यः । औक्थिकः । लौकायतिकः । सूत्रान्तात् । वार्त्तिकसू-त्रिकः । सांग्रहसूत्रिकः ॥ सूत्रान्तादकल्पादेरिष्यते ॥ कल्पसू-त्रमधीते काल्पसूत्रः । अणेव भवति । उक्थशब्दः केषु चि-देव सामसु रूढः । यज्ञायज्ञीयात्परेण यानि गीयन्ते, न च तान्यधीयाने प्रत्यय इष्यते, किं तर्हि सामलक्षणे औक्थिक्ये वर्तमान उक्थशब्दः प्रत्ययमुत्पादयति । उक्थमधीते, औक्थि-कः । औक्थिक्यमधीतइत्यर्थः । औक्थिक्यशब्दाच्च प्रत्ययो न भवत्येव, अनभिधानात् ॥ विद्यालक्षणकल्पन्तादिति वक्तव्यम् ॥ * ॥ वायसविद्यिकः । सार्पविद्यिकः । गौलक्ष-णिकः । आश्वलक्षणिकः । मातृकल्पिकः । पाराशरकल्पिकः ॥ विद्या च नाङ्गक्षत्रधर्मसंसर्गत्रिपूर्वा ॥ * ॥ अङ्गविद्यामधीते, आङ्गविद्यः । क्षात्रविद्यः । धार्मविद्यः । सांसर्गविद्यः । त्रैविद्यः ॥ आख्यानाख्यायिकेतिहासपुराणेभ्यष्ठग्वक्तव्यः ॥ * ॥ आख्याना-ख्यायिकयोरर्थग्रहणं, मितिहासपुराणयोः स्वरूपग्रहणम् । या-वक्रीतिकः । प्रैयङ्गविकः । वासवदत्तिकः । सौमनोत्तरिकः । ऐतिहासिकः । पौराणिकः ॥ सर्वसादेर्द्विगोश्च लः ॥ * ॥ सर्ववेदः । सर्वतन्त्रः । सादेः । सवार्त्तिकः । ससंग्रहः । द्विगोः । द्विवेदः । पञ्चव्याकरणः ॥ अनुसूर्लक्ष्यलक्षणे च ॥ * ॥ अनुसूर्नाम ग्रन्थ, स्तमधीते, आनुसुकः । लाक्षिकः । लाक्षणि-कः ॥ इकन्पदोत्तरपदात् ॥ * ॥ पूर्वपदिकः * ॥ शतषष्टेः षिकन् पथो बहुलम् ॥ * ॥ शतपथिकः । शतपथिकी । षष्टिपथिकः । षष्टिपथिकी । बहुलग्रहणादणपि भवति । शा-तपथः । षाष्टिपथः । उक्थ । लोकायत । न्याय । न्यास । नि-मित्त । पुनरुक्त । निरुक्त । यज्ञ । चर्चा । धर्म । क्रमेतर । श्लक्ष्ण । संहिता । पद । क्रम । संघात । वृत्ति । संग्रह । गुणागुण । आयुर्वे-द ॥ विद्यालक्षणकल्पान्तात्सूत्रान्तादकल्पादे, र्विद्या चानङ्गक्ष-त्रधर्मसंसर्गत्रिपूर्वा ॥ आख्यानाख्यायिकेतिहासपुराणेभ्यश्च ॥ द्विपदी, ज्योतिषि ॥ अनुपद । अनुकल्प । अनुगुण ॥ शत-षष्टेः पथः षिकन् बहुलम् ॥ इकन्पदोत्तरपदात् ॥

क्रमादिभ्यो वुन् ॥ ६१ ॥

क्रम इत्येवमादिभ्यः शब्देभ्यो वुन्प्रत्ययो भवति तदधीते तद्वेदेत्यस्मिन्विषये । अणोऽपवादः । क्रमकः । पदकः । क्रम । पद । शिक्षा । मीमांसा । सामन् ॥

---

* इकन् बहुलं पदोत्तरपदात् ॥ पदोत्तरपदिकः । अन्ये तु पदोत्तरप-दादिति पदशब्द उत्तरपदं यस्य तस्मादित्यर्थं व्याचक्षते । तन्मते पूर्वपदिकः । उत्तरपदिकः । पा० २ ॥

Digitized by Google

अनुब्राह्मणादिनिः ॥ ६२ ॥

अनुब्राह्मणशब्दादिनिः प्रत्ययो भवति तदधीते तद्वेदेत्यस्मिन्विषये । अणोऽपवादः । ब्राह्मणसदृशोऽयं ग्रन्थोऽनुब्राह्मणम् । तदधीते, ऽनुब्राह्मणी । अनुब्राह्मणिनौ । अनुब्राह्मणिनः । मत्वर्थेनात इनिठनाविति इनिना सिद्धम् । तत्रैतस्मादृवपि प्राप्नोति, अनभिधानाच्च भविष्यति । अणो निवृत्त्यर्थं तर्हि वचनम् ॥

वसन्तादिभ्यष्ठक् ॥ ६३ ॥

वसन्त इत्येवमादिभ्यष्ठक्प्रत्ययो भवति तदधीते तद्वेदेत्यस्मिन्विषये । अणोऽपवादः । वसन्तसहचरितोऽयं ग्रन्थो वसन्तस्तमधीते, वासन्तिकः । वार्षिकः । वसन्त । वर्षा । शरद् । हेमन्त । शिशिर । प्रथम । गुण । चरम । अनुगुण । अपर्वन् । अथर्वन् ॥

प्रोक्ताल्लुक् ॥ ६४ ॥

प्रोक्तसहचरितः प्रत्ययः प्रोक्तः । प्रोक्तप्रत्ययान्तादध्येतृवेदितोरुत्पन्नस्य लुग्भवति । पाणिनिना प्रोक्तं पाणिनीयम्, तदधीते पाणिनीयः । आपिशलः । स्त्रियां स्वरे च विशेषः । पाणिनीया ब्राह्मणी ॥

सूत्राच्च कोपधात् ॥ ६५ ॥

सूत्रवाचिनः ककारोपधादुत्पन्नस्य प्रत्ययस्य लुग्भवति । अप्रोक्तार्थ आरम्भः । पाणिनीयमष्टकं सूत्रं तदधीते, अष्टकाः पाणिनीयाः । दशका वैयाघ्रपदीयाः । त्रिकाः काशकृत्स्नाः ॥ संख्याप्रकृतेरिति वक्तव्यम् ॥ * ॥ इह मा भूत् । महावार्त्तिकं सूत्रमधीते, माहावार्त्तिकः । कालापकमधीते, कालापकः । कोपधादिति किम् । चतुष्टयमधीते, चातुष्टयः ॥

छन्दोब्राह्मणानि च तद्विषयाणि ॥ ६६ ॥

प्रोक्तग्रहणमनुवर्त्तते । छन्दांसि ब्राह्मणानि च प्रोक्तप्रत्ययान्तानि तद्विषयाण्येव भवन्ति । अध्येतृवेदितृप्रत्ययविषयाणि । अनन्यभावो विषयार्थः । तेन स्वातन्त्र्यमुपाध्यन्तरयोगो वाक्यं च निवर्तते । कठेन प्रोक्तमधीयते, कठाः । मौदाः । पैप्पलादाः । आर्चाभिनः । वाजसनेयिनः । ब्राह्मणानि खल्वपि । ताण्डिनः । भाल्लविनः । शाट्यायनिनः । ऐतरेयिणः । ब्राह्मणग्रहणं किम् । यावता छन्द एव तद् । ब्राह्मणविशेषप्रतिपत्त्यर्थमिह तद्विषयता मा भूत् । याज्ञवल्क्येन प्रोक्तानि ब्राह्मणानि, याज्ञवल्क्यानि । सौलभानि । चकारोऽनुक्तसमुच्चयार्थः । कल्पे । काश्यपिनः । कौशिकिनः । सूत्रे । पाराशरिणो भिक्षवः । शैलालिनो नटाः । कर्मन्दिनः । कृशाश्विनः । छन्दोब्राह्मणानीति किम् । पाणिनीयं व्याकरणम् । पैङ्गी कल्पः ॥

तदस्मिन्नस्तीति देशे तन्नाम्नि ॥ ६७ ॥

तदिति प्रथमा समर्थविभक्तिः । अस्मिन्निति प्रत्ययार्थः । अस्तीति प्रकृत्यर्थविशेषणम् । इतिकरणो विवक्षार्थः । देशे तन्नाम्नीति प्रत्ययार्थविशेषणम् । तदिति प्रथमासमर्थादस्मिन्निति सप्तम्यर्थे यथाविहितं प्रत्ययो भवति, यत्प्रथमासमर्थमस्ति चेत्तद्भवति, यदस्मिन्निति निर्दिष्टं देशश्चेत्स तन्नामा भवति, प्रत्ययान्तनामा, इतिकरणस्ततश्चेद्विवक्षा । उदुम्बरा अस्मिन् देशे सन्ति, औदुम्बरः । बाल्बजः । पार्वतः । मत्वर्थीयापवादो योगः ॥

तेन निर्वृत्तम् ॥ ६८ ॥

तेनेति तृतीयासमर्थान्निर्वृत्तमित्यस्मिन्विषये यथाविहितं प्रत्ययो भवति देशनामधेये गम्यमाने । देशे तन्नाम्नीति चतुर्ष्वपि योगेषु संबध्यते । सहस्रेण निर्वृत्ता, साहस्री परिखा । कुशाम्बेन निर्वृत्ता, कौशाम्बी नगरी । हेतौ कर्त्तरि च यथायोगं तृतीया समर्थविभक्तिः ॥

तस्य निवासः ॥ ६९ ॥

तस्येति षष्ठीसमर्थान्निवास इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति देशनामधेये गम्यमाने । निवसन्त्यस्मिन्निति निवासः । ऋजुनावानिवासो देश आर्जुनावो देशः । शैबः । औदिष्टः ॥

अदूरभवश्च ॥ ७० ॥

पूर्वा समर्थविभक्तिरनुवर्त्तते । तस्येति षष्ठीसमर्थाददूरभव इत्यस्मिन्नर्थे यथाविहितं प्रत्ययो भवति । विदिशाया अदूरभवं नगरं, वैदिशम् । हैमवतम् । चकारः पूर्वेषां त्रयाणामर्थानामिह सन्निधानार्थः । तेनोत्तरेषु चत्वारोऽप्यर्थाः संबध्यन्ते ॥

ओरञ् ॥ ७१ ॥

चत्वारोऽर्था अनुवर्त्तन्ते । उवर्णान्तात्प्रातिपदिकाद्यथाविहितं समर्थविभक्तियुक्तादञ् प्रत्ययो भवति तदस्मिन्नस्तीत्येवमादिष्वर्थेषु । अणोऽपवादः । अरडु । आरडवम् । कक्षतु । काक्षतवम् । कर्कटेलु । कार्कटेलवम् । नद्यां तु परत्वान्मतुब्भवति । इक्षुमती । अयमधिकारः प्राक् सुवास्त्वादिभ्योऽणः ॥

मतोश्च बह्वजङ्गात् ॥ ७२ ॥

बह्वच् अङ्गं यस्य सो बह्वजङ्गो मतुप्, तदन्तात्प्रातिपदिकादञ्प्रत्ययो भवति चातुरर्थिकः । अणोऽपवादः । ऐषुकावतम् * । सैध्रकावतम् । बह्वजङ्गादिति किम् । आहिमतम् । यावमतम् । अङ्गग्रहणं बह्वजिति तद्विशेषणं यथा विज्ञायते, मत्वन्तविशेषणं मा विज्ञायीति । मालावतां निवासो, मालावतम् ॥

* ऐकटावतम् । पा० २ ।

बह्वचः कूपेषु ॥ ७३ ॥

बह्वचः प्रातिपदिकादञ् प्रत्ययो भवति चातुरर्थिकः कूपेष्वभिधेयेषु । अणोऽपवादः । यथासंभवमर्थाः संबध्यन्ते । दीर्घवरत्रेण निर्वृत्तः कूपः, दैर्घवरत्रः । कापिलवरत्रः ॥

उदक्च विपाशः ॥ ७४ ॥

विपाश उत्तरे कूले ये कूपास्तेष्वभिधेयेष्वञ् प्रत्ययो भवति चातुरर्थिकः । अणोऽपवादः । अबह्वजर्थ आरम्भः । दत्तेन निर्वृत्तः कूपो, दात्तः । गौप्तः । उदगिति किम् । दक्षिणतो विपाशः कूपेष्वणेव । दात्तः । गौप्तः । स्वरे विशेषः । महती सूक्ष्मेक्षिका वर्त्तते सूत्रकारस्य ॥

संकलादिभ्यश्च ॥ ७५ ॥

कूपेष्विति निवृत्तम् । संकल इत्येवमादिभ्योऽञ् प्रत्ययो भवति चातुरर्थिकः । अणोऽपवादः । यथासंभवमर्थसंबन्धः । संगतः कलः, संकलः । संकलेन निर्वृत्तः, सांकलः । पौष्कलः । संकल । पुष्कल । उद्वप । उडुप । उत्पुट । कुम्भ । विधान । सुदक्ष । सुदत्त । सुभूत । सुनेत्र । सुपिङ्गल । सिकता । पूतीकी । पूलास । कूलास । पलाश । निवेश । गवेष । गम्भीर । इतर । शर्मन् । अहन् । लोमन् । वेमन् । वरुण । बहुल । सद्योज । अभिषिक्त । गोभृत् । राजभृत् । गृह । भृत । भल्ल । माल । वृत् ॥

स्त्रीषु सौवीरसाल्वप्राक्षु ॥ ७६ ॥

देशे तन्नाम्नीत्यस्य विशेषणं सौवीरादयः, स्त्रीत्वं च । ङ्याप्प्रातिपदिकादञ् प्रत्ययो भवति चातुरर्थिकः । अणोऽपवादः । सौवीरे स्त्रीलिङ्गे देशे वाच्ये साल्वे प्राचि । सौवीरे तावत् । दत्तामित्रेण निर्वृत्ता नगरी, दात्तामित्री । साल्वे । विधूमाग्निना निर्वृत्ता, वैधूमाग्नी । प्राचि खल्वपि । ककन्देन निर्वृता काकन्दी । माकन्दी । माणिचरी । जाह्नवी ॥

सुवास्त्वादिभ्योऽण् ॥ ७७ ॥

सुवास्तु इत्येवमादिभ्योऽण् प्रत्ययो भवति चातुरर्थिकः* । अञ उवर्णान्तलक्षणस्य कूपलक्षणस्य चापवादः । सुवास्तोरदूरभवं नगरं, सौवास्तवम् । वार्णवम् । अण्ग्रहणं नद्यां मतुपो बाधनार्थम् । सौवास्तवी नदी । सुवास्तु । वर्णु । भण्डु । खण्डु † । सेचालिन् । कर्पूरिन् । शिखण्डिन् । गर्त । कर्कश । शटीकर्ण । कृष्ण । कर्क । कर्कन्धूमती । गोह्य ‡ । अहिसक्थ । वृत् ॥

* यथासंभवमर्थसंबन्ध इत्यधिकं कुत्र चित् ।

† कण्डु । पा० २ ।

‡ गार्ह्य । पा० २ ।

रोणी ॥ ७८ ॥

रोणीशब्दादण्प्रत्ययो भवति चातुरर्थिकः । यथासंभवमर्थसंबन्धः । कूपलक्षणस्याञोऽपवादः । रोणीति कोऽयं निर्देशो यावता प्रत्ययविधौ पञ्चमी युक्ता, सर्वावस्थप्रतिपत्त्यर्थमेवमुच्यते । रोणीशब्दः सर्वावस्थोऽणप्रत्ययमुत्पादयति, केवलस्तदन्तश्च । रौणः । आजकरोणः । सैंहिकरोणः ॥

कोपधाच्च ॥ ७९ ॥

ककारोपधाच्च प्रातिपदिकादण्प्रत्ययो भवति चातुरर्थिकः । यथासंभवमर्थसंबन्धः । कूपलक्षणस्योवर्णलक्षणस्य चाञोऽपवादः । कार्णच्छिद्रिकः कूपः । कार्णवेष्टकः । कृकवाकुना निर्वृत्तं कार्कवाकवम् । त्रैशङ्कवम् ॥

वुञ्छण्कठजिलसेनिरढञ्ण्ययफक्फिञिञ्ञ्यकक्ठको ऽरीहणकृशाश्वर्श्यकुमुदकाशतृणप्रेक्षाश्मसखिसङ्काशबलपक्षकर्णसुतङ्गमप्रगदिन्वराहकुमुदादिभ्यः ॥ ८० ॥

वुञादयः सप्तदश प्रत्ययाः, अरीहणादयोऽपि सप्तदशैव प्रातिपदिकगणाः । आदिशब्दः प्रत्येकमभिसंबध्यते । तत्र यथासंख्यं सप्तदशभ्यः प्रातिपदिकगणेभ्यः सप्तदश प्रत्यया भवन्ति चातुरर्थिकाः । अणोऽपवादः । यथासंभवमर्थसंबन्धः । अरीहणादिभ्यो वुञ् प्रत्ययो भवति । आरीहणकम् । द्रौघणकम् । अरीहण । द्रुघण । खदिर । सार । भगल । उलन्द । साम्परायण । क्रौष्ट्रायण । भास्त्रायण । मैत्रायण । त्रैगर्त्तायन । रायस्पोष । विपथ । उद्दण्ड । उदञ्चन । खाडायन । खण्ड । वीरण । काशकृत्स्न । जाम्बवन्त । शिंशपा । किरण । रैवत । बैल्व । वैमतायन* । सौसायन । शाण्डिल्यायन । शिरीष । बधिर † । अरीहणादिः ॥ कृशाश्वादिभ्यश्छण्प्रत्ययो भवति । कार्शाश्वीयः । आरिष्टीयः । कृशाश्व । अरिष्ट । अरीश्व । वेश्मन् । विशाल । रोमक । शबल । कूट । रोमन् । वर्वर । सुकर । सूकर । प्रतर । सदृश । पुरग । सुख । धूम । अजिन । विनता ‡ । अवनत । विकुघास । अरुस् । अवयास § । मौद्गल्य । कृशाश्वादिः ॥ ऋश्यादिभ्यः कः प्रत्ययो भवति । ऋश्यकः । न्यग्रोधकः । ऋश्य । न्यग्रोध । शिरा । निलीन । निवास । निधान । निवात । निबद्ध । विबद्ध । परिगूढ । उपगूढ । उत्तराश्मन् । स्थूलबाहु । खदिर । शर्करा । अनडु-

* मैमतायन । पा० २ ।

† वैगर्तायन । गोमतायन । सौमतायन । खाण्डायन । विपाश । सुयज्ञ । जम्बु । सुशर्म । एते ऽत्र गणे ऽधिकाः पुस्तकान्तरे ।

‡ वनिता । पा० २ ।

§ अयावस् । पा० २ ।

Digitized by Google

ह् । परिषंश । वेणु । वीरण * । ऋश्यादिः ॥ कुमुदादिभ्यष्ठच्प्रत्ययो भवति । कुमुदिकम् । शर्क्करिकम् । कुमुद । शर्क्करा । न्यग्रोध । इत्कट † । गर्त्त । बीज । अश्वत्थ । बल्बज । परिवाप । शिरीष । यवाष । कूप । विकङ्कत ‡ । कुमुदादिः ॥ काशादिभ्य इलः प्रत्ययो भवति । काशिलम् । वाशिलम् । काश । वाश । अश्वत्थ । पलाश । पीयूष । विश § । तृण । नर । चरण । कर्द्दम । कर्प्पूर । कण्टक । गृह । काशादिः ‖ ॥ तृणादिभ्यः शः प्रत्ययो भवति । तृणशः । नडशः । तृण । नड । बुस । पर्ण । वर्ण । चरण । अर्ण । जन । बल । लव । वन । तृणादिः ॥ प्रेक्षादिभ्य इनिप्रत्ययो भवति । प्रेक्षी । हलकी । प्रेक्षा । हलका ¶ । बन्धुका । ध्रुवका । क्षिपका । न्यग्रोध । इर्कुट ** । प्रेक्षादिः ॥ अश्मादिभ्यो रप्रत्त्ययो भवति । अश्मरः । अश्मन् । यूष । रूप । मीन । दर्भ । वृन्द । गुड । खण्ड । नग । शिखा †† । अश्मादिः ॥ सख्यादिभ्यो ढञ् प्रत्ययो भवति । साखेयम् । साखिदत्तेयम् । सखि । सखिदत्त । वायुदत्त । गोहित ‡‡ । भल्ल । पाल । चक्रपाल । चक्रवाल । छगल । अशोक । करवीर । सीकर । सकर । सरस । समल §§ । सख्यादिः ॥ संकाशादिभ्यो ण्यप्रत्ययो भवति । सांकाश्यम् । काम्पिल्यम् । संकाश । काम्पिल्य । समीर । कश्मर । शूरसेन । सुपथिन् । सक्थच । यूप । अंश । एग । अश्मन् । कूट । मलिन । तीर्थ । अगस्ति । विरत । चिकार । विरह । नासिका । संकाशादिः ॥ बलादिभ्यो यः प्रत्त्ययो भवति । बल्यः । कुल्यम् । बल । वुल । तुल । उल । डुल । कवल । वन । कुल । बलादिः ॥ पक्षादिभ्यः फक् प्रत्ययो भवति । पाक्षायणः । तौषायनः । पक्ष । तुष । अण्ड । कम्बलिक । चित्र । अश्मन् । अतिस्वन् । पथिन्पन्थ च । ‖‖

* खण्ड । परिवृत्त । कर्दम । अंशु । एते ऽत्र गणे ऽधिकाः पुस्तकान्तरे ।

† उत्कट । पा० २ ।

‡ कण्टक । कङ्कट । संकट । पलाश । त्रिक । कत । दशग्राम । पुस्तकान्तरे एते ऽधिका अत्र गणे ।

§ विस । पा० २ ।

‖ आवास । नड । वन । बधूल । बर्बर । एते ऽत्र गणे ऽधिकाः पुस्तकान्तरे ।

¶ फलका । पा० २

** बुधका । संकट । कूपका । कर्कटा । सुकटा । मंकट । सुक । महा । एते ऽत्राधिकाः पुस्तकान्तरे ।

†† यूथ । रुष । नद । नख । काट । पांम । एते ऽत्र गणे ऽधिकाः पुस्तकान्तरे ।

‡‡ गोहिल । पा० २ ।

§§ चर्क । चक्रपाल । उशीर । सुस । रोह । तमाल । कदल । सप्तल । एते शब्दा अत्र गणे ऽधिकाः ॥

‖‖ कुम्भ । सौरज । सीरक । सरक । सलक । सरस । समल । रोमन् । लोमन् । हंसका । लोमक । सकण्डक । अस्तिबल । यमल । हस्त । सिंहक । एते शब्दा अत्र गणे ऽधिकाः पुस्तकान्तरे ।

पक्षादिः ॥ कर्णादिभ्यः फिञ्प्रत्ययो भवति । कार्णायनिः । वासिष्ठायनिः । कर्ण । वसिष्ठ । अलुश । शल । डुपद । अनडुह । पाञ्चजन्य । स्थिरा । कुलिश । कुम्भी । जीवन्ती । जित्व । आण्डीवत् * । कर्णादिः ॥ सुतङ्गमादिभ्य इञ्प्रत्ययो भवति । सौतङ्गमिः । मौनचित्तिः । सुतङ्गम । मुनिचित्त । विप्रचित्त । महापुत्र । श्वेत । गडिक । शुक्र । विग्र । बीजवापिन् । श्वन् । अर्ज्जुन । अजिर । जीव । सुतङ्गमादिः ॥ प्रगद्यादिभ्यो ञ्यः प्रत्ययो भवति । प्रागद्यम् । प्रगदिन् । मगदिन् । शरदिन् । कलिव । खडिव । गडिव । चूडार । मार्जार । कोविदार । प्रगद्यादिः ॥ वराहादिभ्यः कक् प्रत्त्ययो भवति । वाराहकम् । पालाशकम् । वराह । पलाश । शिरीष । पिनद्ध । स्थूण । विदग्ध । विजग्ध । विभग्न । बाहु । खदिर । शर्करा † । वराहादिः ॥ कुमुदादिभ्यष्ठक् प्रत्ययो भवति । कौमुदिकम् । कुमुद । गोमथ । रथकार । दशग्राम । अश्वत्थ । शाल्मली । कुण्डल । मुनिस्थूल । कूट । मुचुकर्ण ‡ । कुमुदादिः ॥ शिरीषशब्दो ऽरीहणादिषु कुमुदादिषु वराहादिषु च पठ्यते, औत्सर्गिकोपि तत इष्यते, तस्य च वरणादिषु दर्शनाल्लुब्भवति । तथाचोक्तं शिरीषाणामदूरभवो ग्रामः शिरीषा,स्तस्य वनं, शिरीषवनमिति ॥

जनपदे लुप् ॥ ८१ ॥

देशे तन्नाम्नीति यश्चातुरर्थिकः प्रत्ययो भवति, तस्य देशविशेषे जनपदे ऽभिधेये लुब्भवति । ग्रामसमुदायो जनपदः । पञ्चालानां निवासो जनपदः, पञ्चालाः कुरवः । मत्स्याः । अङ्गाः । वङ्गाः । मगधाः । सुह्माः । पुण्ड्राः । इह कस्मान्न भवति । उदुम्बरा अस्मिन्सन्ति, औदुम्बरो जनपदः, वैदिशो § जनपद, इति । तन्नाम्नीति वर्त्तते । न चात्र लुबन्तं तन्नामधेयं भवति ॥

वरणादिभ्यश्च ॥ ८२ ॥

वरणा इत्येवमादिभ्य उत्पन्नस्य चातुरर्थिकस्य प्रत्ययस्य लुब्भवति । अजनपदार्थ आरम्भः । वरणानामदूरभवं नगरं वरणाः । शृङ्गी । शाल्मलयः । चकारोनुक्तसमुच्चयार्थ आकृतिगणतामस्य बोधयति । कटुक‖बदर्या अदूरभवो ग्रामः, कटुकबदरी । शिरीषाः । काञ्ची । वरणाः, पूर्वौ गोदौ ¶ । आलिङ्गायन । पर्णी । शृङ्गी । शाल्मलयः । सदाण्वी । व-

* अर्क । लूष । स्फिक् । ज्ञावत् । एते शब्दा अत्र गणे ऽधिकाः ।

† विनद्ध । निबद्ध । विरुद्ध । मूल । एते ऽत्र गणे ऽधिकाः पुस्तकान्तरे ॥

‡ कुन्द । मधुकर्ण । शुचिकर्ण । शिरीष । एते ऽधिका अत्र पुस्तकान्तरे ।

§ वैतस इति पा० २ ।

‖ कन्दुक इति पा० २ ।

¶ पूर्वेण गोदौ । अपरेण गोदौ इति । पा० २ ।

Digitized by Google

णिकि । वणिक । जानपद । मथुरा । उज्जयिनी । गया । तक्षशिला । उरशा । आक्तस्था ॥

शर्कराया वा ॥ ८३ ॥

शर्कराशब्दादुत्पन्नस्य चातुरर्थिकस्य प्रत्ययस्य वा लुब्भवति । वावचनं किम् । यावता शर्कराशब्दः कुमुदादिषु वराहादिषु च पठ्यते । तत्र पाठसामर्थ्यात्प्रत्ययस्य पक्षे श्रवणं भविष्यति । एवं तर्ह्येतज् ज्ञापयति । शर्कराशब्दादौत्सर्गिको भवति । तस्यायं विकल्पितो लुबिति । शर्करा । शार्करम् । गणपाठाच्च श्रवणमुत्तरसूत्रे विहितौ च ठ्छौ प्रत्ययौ तदेवं षड्रूपाणि भवन्ति । शर्करा । शार्करम् । शर्करिकम् । शार्करकम् । शार्करिकम् । शर्करीयमिति ॥

ठक्छौ च ॥ ८४ ॥

शर्कराशब्दाट्ठक् छ इत्येतौ प्रत्ययौ भवतश्चातुरर्थिकौ । यथासंभवमर्थसंबन्धः । शार्करिकम् । शर्करीयम् ॥

नद्यां मतुप् ॥ ८५ ॥

नद्यामभिधेयायां मतुप्प्रत्ययो भवति चातुरर्थिकः । तत्रान्यो देशस्य विशेषणं नदी । उदुम्बरा यस्यां सन्ति, उदुम्बरावती । मशकावती । वीरणावती । पुष्करावती । इक्षुमती । द्रुमती । इह कस्मान्न भवति । भागीरथी । भैमरथी । मतुबन्तस्यातन्नामधेयत्वात् ॥

मध्वादिभ्यश्च ॥ ८६ ॥

मधु इत्येवमादिभ्यः शब्देभ्यो मतुप्प्रत्ययो भवति चातुरर्थिकः । अनद्यर्थ आरम्भः । मधुमान् । बिसवान् । मधु । बिस । स्थाणु । मुष्टि * । इक्षु । वेणु । रम्य । ऋक्ष । कर्कन्धु । शमी । किरीर । हिम । किशरा । शर्पणा । मरुत् । मरुव । दार्वाघाट । शर । इष्टका । तक्षशिला । शक्ति । आसन्दी । आसुति । शलाका । आमिधी । खडा । वेटा । मध्वादिः ॥

कुमुदनडवेतसेभ्यो ड्मतुप् ॥ ८७ ॥

कुमुद नड वेतस इत्येतेभ्यः शब्देभ्यो ड्मतुप् प्रत्ययो भवति चातुरर्थिकः । कुमुद्वान् । नड्वान् । वेतस्वान् ॥ महिषाच्चेति वक्तव्यम् ॥ * ॥ महिष्मान्नाम देशः ॥

नडशादाड्ड्वलच् ॥ ८८ ॥

नडशादशब्दाभ्यां ड्वलच् प्रत्ययो भवति चातुरर्थिकः । यथासंभवमर्थसंबन्धः । नड्वलम् । शाड्वलम् ॥

शिखाया वलच् ॥ ८९ ॥

शिखाशब्दाद्वलच् प्रत्ययो भवति चातुरर्थिकः । यथासंभवमर्थसंबन्धः । शिखावलं नाम नगरम् । मतुप्प्रकरणेऽपि शिखाया वलज् वक्ष्यति । तदद्देशार्थं वचनम् ॥

* मुष्टि । इति पा० २ ।

उत्करादिभ्यश्छः ॥ ९० ॥

उत्कर इत्येवमादिभ्यश्छः प्रत्ययो भवति चातुरर्थिकः । यथासंभवमर्थसंबन्धः । उत्करीयम् । शफरीयम् । उत्कर । संकल* । शफर । पिप्पल । पिप्पलीमूल । अश्मन् । अर्क । पर्ण । सुपर्ण । खलाजिन । इडा । अग्नि । तिक । कितव । आतप । अनेक । पलाश । तृणव । पिचुक । अश्वत्थ । शकाकुद्र । भस्त्रा । विशाला । अवरोहित । गर्त्त । शाल । अन्य । जन्या । अजिन । मञ्च । चर्मन् । उत्क्रोश । शान्त । खदिर । शूर्पणाय । श्यावनाय । नैव । बक । नितान्त । वृक्ष । इन्द्रवृक्ष । आर्द्रवृक्ष । अर्जुनवृक्ष । उत्करादिः ॥

नडादीनां कुक् च ॥ ९१ ॥

नड इत्येवमादीनां कुगागमो भवति, छश्च प्रत्ययश्चातुरर्थिकः । यथासंभवमर्थसंबन्धः । नडकीयम् । प्लक्षकीयम् । नड । प्लक्ष । बिल्व । वेणु । वेत्र । वेतस । तृण । इक्षु । काष्ठ । कपोत ॥ क्रुञ्चाया ह्रस्वत्वं च ॥ तक्षन्नलोपश्च ॥

* संकर । इति पा० २

॥ अथानन्दवृन्दावनचम्पूकाव्यम् ॥

॥ सप्तमस्तबकावशेषः ॥

इति निकटमुपसृत्य किमिदमहो महोन्नतबुद्धे बुद्धेरगोचरो मम, यदमी बलवदमीवलङ्घिनोऽमरवरा एव सहचराः, अमी च मुनयो नयोद्धुरा एव गोवत्सा इत्येव मे गोचरः, संप्रति संप्रतिजाने श्रीजाने श्रीमान् भवानेव सर्वमिति ॥ १२८ ॥

अहो-आश्चर्यं, हे महोन्नतबुद्धे-इति संबोधनेन मय्यपि तव नो विश्वासः, साधु साधु तवेदं बुद्धिचातुर्यमिति केवलस्नेहोदयेन प्रणयकोपव्यञ्जक उपालम्भः ।

ननु किमित्युपालभसे, त एवामी वत्सास्त एवामी बालका इति सत्यं, यद्यस्मात्-अमी बलवत्-अमीवं पापं तल्लङ्घनशीला देवप्रवरा एव सहचरा बालकाः, अमी च मुनय एव गवां वत्साः, तत्र तत्र तत्तदंशप्रवेशात् तत्तच्छब्देनोक्तिः, संप्रति-अधुना भवानेव सर्वं, तेषां तु कतमोऽपि न दृश्यत इति भावः ।

ननु बलवता निभालनेन निष्टङ्कः कथ्यतां तत्राह, सम्यक्प्रकारेण प्रतिजाने प्रतिज्ञायैवेदं ब्रवीमीति । श्रीर्जाया यस्य स श्रीजानिः, हे श्रीजाने हे लक्ष्मीकान्त-अमी सर्वे भवदंशा लक्ष्मीकान्ताश्चतुर्भुजा दृश्यन्त इति भावः ॥ १२९ ॥

Digitized by Google

किमत्र तत्त्वं तत् त्वं कथयेति कथयेतिहासकथामिव तत् सकलमानुपूर्व्या कथयन् श्रीयशोदाकुमारः कुमारयामास ॥ १३० ॥

इति कथया· इति तद्वाक्येन, इतिहासकथामिव, कुमारयामासेति "कुमार क्रीडने चुरादिः, अत्र तदानीमेव तं प्रति स्वरहस्यज्ञापनेच्छायां भगवतोऽयमभिप्रायो ज्ञेयः, यदि प्रथममेव ब्रवीमि तदा दयालुसरलस्वभावस्य मदग्रजस्य तेषां तादृशावस्थासहनाशक्त्या कोपेन ब्रह्मणोऽपि दण्डने प्रवृत्तिसंभवादेतल्लीलानिर्वाहो मे न स्यात्, यदि तन्निर्वाहानन्तरमेव ब्रवीमि तदा तदानीमेव हन्त किमिति नाब्रवीः कात्र क्षतिरभविष्यत् तथाभूतत्वं तव नाभालितं मयेति तच्छोचनया वैरस्यमेव, यदि पुनर्न ब्रवीम्येव तदा तत्कथनयोग्ये तादृशे सख्यौ तस्मिन् विस्रम्भायोगेन सख्यरसस्यैव हानिः । वर्षे समाप्तप्राये तु कथने न किंचिदवद्यमिति । वस्तुतः सिद्धान्तगत्या तु तादृशस्य महापुरुषांशांशिनः श्रीबलदेवस्यापि मोहकत्वेन महास्वयंभगवत्त्वज्ञापकेन तस्याचिन्त्यशक्त्या ब्रह्मरुद्रादिमोहने कैमुत्यमेवानीतमिति ॥ १३० ॥

एवं वत्सरवत्सरक्षणकौतुके संवृत्तप्राये प्रायेण हि भगवन्महिमहिल्लोलगणगणनायां प्रवृत्तो वृत्तोहः स्वयंभूः स्वयंभूर्लोकमागत्य चोरितेषु मया वत्सवत्सपेषु तत्र किं वृत्तमिति वृत्तमितिरहितस्य तस्य वृत्तमवगन्तुकामः कामपि साध्वसाध्वसतामालम्ब्य दूरत एव तथाविधान् विविधान् विलोक्य वत्सवत्सपान् विस्मितविस्मितविमनाः कथममी तत एव न एवागताः किं वा परे किं वा प्राकृता एवामी मयापहृता वस्तुतोऽवस्तुतोदयेनालीका नालीकासनस्य गलितो गर्व इति ॥ १३१ ॥

एवं वत्सरं व्याप्य वत्सरक्षणस्य क्षणकौतुके उत्सवकौतुके, वृत्तः समाप्त ऊहस्तर्को यस्य सः, वृत्तं चेष्टा लीलेति यावत् तस्य मितिः परिमाणं तद्रहितस्य, वृत्तं वार्ताम्, असाध्वसतां निर्भयतां, विस्मितेन विस्मयेन विगतं स्मितं यस्य स चासौ विमनाश्च,अवस्तुना· अवास्तवम्· अलीका मिथ्याभूता मायिका इत्यर्थः, नालीकासनस्य कमलासनस्य, इति हेतोर्गर्वो गलितः ॥ १३१ ॥

स्वमनुरञ्जयन् भगवति परममायाविनि विनिहितमायोऽहितमायो नलिनजो न-जोषयितुमात्मानं प्रबभूव ॥ १३२ ॥

अहितं मिमीत इत्यहितमायः, यद्वा· अहिता· अपकारिणी· अभद्रा मा कान्तिस्तां यातीति सः, अनुतापेन भ्रष्टश्रीरित्यर्थः । जोषयितुं प्रीणयितुम्· आत्मानं न प्रबभूव न समर्थोऽभूत् ॥ १३२ ॥

अनभिज्ञ इव स्वचरितेनैवाकृती भवन् स्वयैव मायया स्वयमेव बद्ध इति वैकल्येनालीका नालीकासनस्य कृतिरासीत् ॥ १३३ ॥

अलीका मिथ्याभूता ॥ १३३ ॥

अथ * पुनरपि तान् समालोकयति सति तस्मिन्,

सर्वे पङ्कजशङ्खचक्रगदिनः श्रीमच्चतुर्बाहवो-
ऽनन्तानन्दचिदेकमात्रवपुषः सूर्येन्दुकोटित्विषः ।
लीलोल्लासितलोमकूपकुहरोन्मज्जन्निमज्जत्तर-
स्वेदाम्भःकणिकानिकायसदृशब्रह्माण्डभाण्डव्रजाः ॥ १३४ ॥

लीलयैव· उल्लासिता लोम्नां कूपकुहरेषु· अतिशयेन· उन्मज्जन्त उद्गच्छन्तस्तथा· अतिशयेन निमज्जन्तस्तत्रैव लयं गच्छन्तः स्वेदाम्भसां कणिकासमूहैः सदृशा ब्रह्माण्डभाण्डसमूहा येषां ते,अत्र सूक्ष्मः कणः कणी ततोऽप्यल्पार्थे कन्प्रत्ययेन परमाणुभूता अलक्षिता एवेत्यर्थः ॥ १३४ ॥

किंच,

श्यामाः कुण्डलिनो मणीमुकुटिनः केयूरिणो हारिणः
कूजत्कङ्कणिनः क्वणत्कटकिनो मञ्जीरिणो निष्किणः ।
आकण्ठप्रपदं लसत्तुलसिकामालालिझङ्कारिणः
खेलन्मेखलिनस्तडिद्द्युतिकरश्रीचेलिनस्ते बभुः ॥

अथ प्रतिजनमेकेन परमेष्ठिना द्वाभ्यामश्विभ्यां त्रिभिर्गुणैश्चतुर्भिर्वेदैः पञ्चभिस्तन्मात्राभिः षड्भिरृतुभिः सप्तभिरृषिभिरष्टभिः सिद्धिभिर्वसुभिश्च नवभिर्निधिभिर्ग्रहैश्च दशभिर्विश्वदेवैरेकादशभी रुद्रैर्द्वादशभिरादित्यैस्त्रयोदशभिर्बहिरन्तरिन्द्रियाधिष्ठातृदेवैश्चतुर्दशभिर्मनुभिः पञ्चदशभिस्तिथिभिः षोडशभिर्विकारैर्मूर्तिमद्भिरुपास्यमाना मानान्तरानधिगम्यमाना ददृशिरे दृशि रेचितकृपातरङ्गतयागतया च सर्वसौन्दर्यसंपदा कृतास्पदाः ॥ १३५ ॥

श्रोत्रत्वगादीनामधिष्ठातृभिर्दिग्वातादिभिर्दशभिस्तथा मनोबुद्ध्यहंकाराणां च सोमब्रह्मरुद्रैरिति त्रयोदशभिः । इन्द्रियाणि दश मनश्चैकं महाभूतानि पञ्चेति षोडशभिः । मानान्तरेण तत्प्रकाशकेन प्रमाणान्तरेण· अधिगम्यमाना न, किंतु स्वप्रकाशताशक्त्यैव स्वयं दृश्यमाना इति भावः । प्रतिजनं प्रत्येकनारायणं ते ब्रह्मादयो ददृशिरे· इत्यन्वयः । कीदृशाः,

* तथा इति पा० ।

दृशि दृष्टौ । अल्पत्वबोधकमेकवचनम्, अपाङ्गेष्वित्यर्थः, रेचिताः संपृक्ताः कृपातरङ्गा येषां तेषां भावस्तत्ता तया । आगतया, ब्रह्मणोऽनुग्रहार्थमिति भावः, यद्वा स्वाभाविक्यैव तया । आगतया स्थिरया कृतास्पदाः कृतवासा इति ॥ १३५ ॥

एवमवलोकयन्नेव सर्वमेव वासुदेवमयमिति जानन्नविलम्बेनैव दध्योदनकवलकरं वलकरं वसानमिव सर्वसुहृदां हृदां रञ्जनं परितोऽपरितोषेण पुरेव वपुरेव बहुलमाखेदयन्तं वत्सान् वत्सपांश्च समनुसंदधानं दधानं च कक्षे वेत्रविषाणं च जठरपटपरीतमुरलीकमलीकविमनस्कताविरसमिव तत इतो विलोकयन्तमेकमेव विचरन्तमेकमेवाद्वितीयं ब्रह्मेत्यर्थमिव मूर्तिमन्तमालोक्य निराबाधापराधापराजित इव चतुर्मुखश्चतुःसानुः कनकगिरिरिव दण्डवद्भुवि निपपात ॥ १३६ ॥

इत्थं च वत्सवत्सपानां प्रत्येकमेव सपरिकरवैकुण्ठनाथनिष्ठैश्वर्यशालितामभिज्ञाप्य ब्रह्माणं निर्मदीकृत्य तं दैन्यव्याकुलोत्थप्रेमाणां संशोध्य पुनः परमकृपया स्वतेजसा सर्वाच्छादकं मूलभूतं स्वरूपमपि दर्शयामास भगवानित्याह दध्योदनेति, एवं च वत्सरं यावत् तेनैव रूपेण तस्यावस्थितिर्गम्यते, प्रतिदिनं व्रजे गमने च स्वस्वरूपप्रकाशद्वैतेनैव जनकसुतदेवगृहगमनवत् तत्प्रकाशेन कालगमनं च सखीनामिव तस्यापि संक्षेपेणैव जातं, कवलादीनां तथैव स्थितेरिति ज्ञेयम् । निराबाधेन दृढेन । अपराधेन । आ सम्यक् पराजितः पराभूत इव ॥ १३६ ॥

समनन्तरं संचारतो विचारतो विहितस्थितिरेव केवलमभूदभूतपूर्वगाम्भीर्यो विविधशक्तिनर्तकीनाट्यसूत्रधारः सकलगुणाधारस्तमालतरुकदम्ब इव निश्चलः ॥ १३७ ॥

विविधाः शक्तय एव नर्तक्यस्तासां नाट्ये सूत्रधार इति पशुपवंशशिशुत्वनाट्यमित्यस्य पदस्य मूलगतस्य व्याख्यानरूपमिदं,ततश्च तत्र पशुपवंशशिशुत्वं च तथाकारत्वेनैव नटस्य भावो नाट्यं च तयोर्द्वन्द्वैक्यं तदुद्वहदित्यर्थ इति ॥ १३७ ॥

तदनु चतुर्मुखचतुर्मुकुटकोटिमहामणीन्द्रमरीचिवीचयो भगवच्चरणकमलस्पर्शकाम्ययेव धावन्त्यो भगवत एव चरणनखरमणिमञ्जरीभिरनधिकारितया निवार्यमाणा इव कुण्ठतामापेदिरे यदि तदा नालीकासनो नालीकासनो भवन्नुत्थायोत्थाय भूयो भूयो नत्वा यथापराधमतिनम्रतामुपगम्य तमस्तोषीत् ॥ १३८ ॥

अलीकमसच्च दीप्तिर्यस्य सः । तथा न, भगवच्चरणनखकान्तिभिः स्पृष्टत्वात् ॥ १३८ ॥

जय जय नूयते चिदवबोधरसैकमयं
घनरुचि चन्द्रकस्तवकगोञ्जिकहारभृतः ।
चलवनमालिकं कवलवेणुविषाणभृतो
वपुरिदमद्भुतं व्रजपुरंदरनन्दन ते ॥ १३९ ॥

अथ ब्रह्मणश्चतुर्भिर्मुखैश्चतुर्भिर्वेदैरिव सा स्तुतिरिति वेदस्तुतिरिति वेदस्तुतिच्छन्दसा नर्दकेनैव तामुपनिबध्नाति जय जयेति । हर्षमाङ्गल्याभ्यां ते तव वपुर्नूयते स्तूयते । तव कीदृशस्य, चन्द्रकादिभृतः । तथा कवलादिभृतः । वपुः कीदृशं, चला चञ्चला वनमालिका यस्य तत् । एवं च "नौमीड्य तेऽभ्रवपुष"इत्यस्यार्थो विवृतः ॥ १३९ ॥

अथ मदनुग्रहार्थकमशेषविशेषतया
प्रकटितमद्भुतं यदिह वत्सपवत्सवपुः ।
अपि लवमस्य भो न महिमानमवैमि विभो
किमुत तवेदृशायुतविकाशविरामकृतः ॥ १४० ॥

वत्सपवत्सानां वपुर्वासुदेवाकारमेकमपि, तथा च"अस्यापि देववपुष"इति ॥ १४० ॥

अपिच चतुर्भुजाः कमलकम्बुगदारिभृतो
घनरसचिन्मया निखिलभूतिभृतः सकलाः ।
त्वमजित केवलं ललितगोपतनुर्द्विभुजो
नहि विकृतिं प्रयात्यखिलकारण ते प्रकृतिः ॥ १४१ ॥

तत्र "साक्षात् तवैव किमुतात्मे"ति साक्षात्पदस्य तात्पर्यं विवृणोति । अपिचेति । कम्बुः शङ्खः, अरिश्चक्रम्, अखिलानां क्षित्यादीनां प्रापञ्चिकानामप्रापञ्चिकानां च सपरिकरवासुदेवादिस्वरूपाणां च हे कारणभूत, तथापि ते तव प्रकृतिमूलभूतं स्वरूपं विकृतिं प्राकृतमप्राकृतं वा विकारं न प्राप्नोति । प्रकृतिमेव निर्दिशति ललितगोपतनुर्द्विभुज इति ॥ १४१ ॥

अतिरसवर्षिणीं तव पदाम्बुजभक्तिविधा-
महह विहाय यः प्रयतते ह्यवबोधकृते ।
न स लभते श्रमादपरमण्वपि हन्त फलं
तुषवुषघाततो नहि कदापि फलोपगमः ॥ १४२ ॥

विधा प्रकारः, अवबोधो ज्ञानं, तुषो धान्यादिवल्कलं खण्डितं, बुषोऽखण्डितमिति, तथा च "श्रेयः सृति"मित्यादि ॥ १४२ ॥

विजहति ये प्रयासमवबोधविधौ सुधियो
दधति तवाङ्घ्रिपङ्करुहभावमतीव दृढम् ।
अतिकुतुकी स्ववानपि कृपाब्धितरङ्गचल-
स्त्वमजित तैर्जितो भवसि नाथ तदीयवशः ॥ १४३ ॥

Digitized by Google

स्ववानपि स्वाधीनोऽपि । तथा च "ज्ञाने प्रयासमुदपास्य"त्यादि ॥ १४३ ॥

कति च न ते पुरा परमहंसवतंस गणा-
स्तव पदपङ्कजे सदनुरागविलासभृतः ।
तव चरितामृतश्रवणकीर्तनचिन्तनतः
किमपि सनातनं तव सुखेन पदं प्रययुः ॥ १४४ ॥

वतंसोऽवतंसः । तथा च "पुरेह भूम"न्नित्यादि ॥ १४४ ॥

तदपि च निर्गुणस्य तव पुण्यगुणैकनिधे-
र्नहि महिमाऽमलात्मभिरवेतुमहो सुशकः ।
अनुभवमात्रतः परमनन्यविबोध्यतया-
प्यविकृतितो भवेद्यदि भवत्यपि नेतरथा ॥ १४५ ॥

ननु केवलं भजनाग्रह एव किमिति स्थाप्यते, बहुशास्त्रविचारादुत्थज्ञानच्छिन्नसंशयादिमालिन्यकेनान्तरात्मनैव तन्महिमज्ञानसिद्धेस्तथा "तमेव विदित्वातिमृत्युमेती"त्यादिश्रुतेर्ज्ञानाग्रहोऽप्युपादेय एवेति तत्राह तदपिच, तथापि, तादृशे ज्ञाने जातेऽपीत्यर्थः, निर्गुणस्य प्राकृतगुणातीतस्य तव महिमा·अवेतुं न सुशकः, कथं तर्हि सुशकस्तत्राह·अनुभवमात्रतः, भजनमात्रोत्थात् केवलादनुभवादेव यदि महिमा· अवेतुं सुशको भवेत् तर्हि भवति· इतरथा शास्त्रोत्थज्ञानादिभ्यस्तु न भवत्येवेत्यर्थः, यदि शब्दः कार्त्स्न्येन महिमज्ञानाभावज्ञापकः, कीदृशात्, अविकृतितः प्राकृतविकाररहितात्, तथाच "तथापि भूम"न्नित्यादि ॥ १४५ ॥

तव गुणसागरस्य गुणमेकमपीश्वर के
गणयितुमीशते हितकृतेऽप्यवतीर्णवतः ।
अपि धरणीरजांस्यपि च भानि तुषारकणा
अपि गणनीयतां दधति कस्य च कालवशात् ॥ १४६ ॥

तव महिमज्ञानं दूरे वर्ततां, त्वदीयस्यैकस्यापि गुणस्य महिम्नो वार्ता दूरे, तस्य गणनमपि दुष्करमेकस्यापि भेदप्रभेदानामानन्त्यादित्याह तव गुणेति, कस्य च कस्यापि गणनीयतां दधति केनापि कालवशाद्गणनार्हाणि भवन्त्यपि, तव त्वेकमपि गुणं के गणयितुमीशते, न कोऽपीत्यर्थः, तथा च "गुणात्मनस्तेऽपी"त्यादि ॥ १४६ ॥

तव तदनुग्रहग्रहिलताध्वनि दत्तदृशो
नियतिक्रमोपगतदुःखसुखोपभुजः ।
वचनवपुर्मनोभिरनुसंदधतश्च भवत्-
पदकमलं भवन्ति तव धामनि दायभृतः ॥ १४७ ॥

के तर्हि कृतार्थास्तत्राह तवेति, नियतिरदृष्टं, तथा च "तत् तेऽनुकम्पा"मित्यादि ॥ १४७ ॥

अथ मदभव्यतां कलय नाथ जगद्विरलां
त्वयि परमेश्वरे प्रथितमायिकिरीटमणौ ।
स्वविहितमायया स्वयमिहास्मि विमोहितधी-
रनलकणः क्व च क्व च महाप्रलयज्वलनः ॥ १४८ ॥

अहं तु तेषां मध्ये कतमोऽपि न भवामि किंतु परममन्दबुद्धिरेवेत्याह· अथेति, तथा च "पश्येश मेऽनार्य"मित्यादि ॥ १४८ ॥

पुरुकृप मृष्यतां मम महानपि मन्तुरयं
सहजरजोभुवः पृथगधीश्वरभावभृतः ।
बलवदजावलेपपरिलेपमहान्धदृशः
अपि मयि नाथवानयमितीव विधेहि कृपाम् ॥ १४९ ॥

मन्तुरपराधः, बलवान्· अजोऽहमित्यवलेपोऽहंकारः, कथं तर्ह्येतादृशापराधवति त्वयि कृपासंभावनापीति तत्र कृपोद्गमप्रकारं स्मारयति मयि नाथेति, यद्यप्यसावन्यत्र स्वयमेव प्रभुंमन्यस्तथापि मयि विषये नाथवानेवायम्, एतस्य नाथ एवाहम्,अयं तु मद्भृत्य एवेति प्रकारकेणैव परामर्शेन स्वनिष्ठेन कृपां विधेहि· किंतु मन्निष्ठं तदुद्गमकं किंचिदपि लक्षणं नास्त्येवेति भावः, तथा च·"अतः क्षमस्वाच्युते"त्यादि ॥ १४९ ॥

क्व महदहंमहीखमरुदम्बुकृशानुसमा-
वृतजगदण्डभाण्डगतसप्तवितस्तितनुः ।
अहमहह क्व चेदृशपरार्धपराणुगता-
गतपथरोमकूपनिकरेश तवेश्वरता ॥ १५० ॥

नन्वहमेव सर्वजगत्प्रभुरिति सत्यमेव, त्वमपि चेदन्यत्र स्वप्रभुतां ख्यापयसि तर्हि त्वयि स्पर्धैव मे योग्या न तु कृपेति तत्र नहि नहीत्याह क्व महदिति, स्पर्धा हीषत्साम्येऽपि भवति, तव मम तु बह्वन्तरमिति भावः, महदादिभिः समावृतं जगदण्डमेव भाण्डं तद्गता तदन्तर्भूता स्वमानेन सप्तवितस्तिमयी तनुर्यस्य सोऽहं क्व, हे· ईश तवेश्वरता वा क्व·अत्यन्तासंभवज्ञापकं क्वद्वयं, तत्रापि सप्तवितस्तिमितत्वं स्वस्य निकृष्टपुरुषत्वसूचकं· महापुरुषा हि स्वमानेन नववितस्तयो भवन्तीति, ईदृशानां जगदण्डभाण्डानां परार्धसंख्यानां परमाणुतुल्यानां गतागतस्य प्रवेशनिर्गमस्य पन्थानो रोमकूपनिकरा यस्य हे तथाभूत, इति तदंशभूतं प्रथमपुरुषकारणार्णवशायित्वेनोक्त्या साक्षात् तस्यांशिनः परमकैमुत्यमानीतं, तथा च "क्वाहं तमो मह"दिति ॥ १५० ॥

अपि जननीजनोदरगतस्य शिशोश्चरणो-
न्नमनविधिर्भवेन्न जननीष्वपराधकरः ।

त्वदुदरवर्तिनी निखिलजीवघटेति विभो
त्वमसि गजत्प्रसूरिति समक्षकृतोऽनुभवः ॥ १५१ ॥

अथ स्वापराधक्षमापणे युक्तिमुत्थापयन् पितामहस्य जगतो माता धाताहमिति भगवद्गीताप्रामाण्यसाक्षात्कारेण पितृत्वव्यवधानं विनैव मातृत्वं तथा मातृत्वव्यवधानं विनैव च पितृत्वं तस्य गर्भोदशायित्वेनाह श्लोकद्वयेन· अपीत्यादिना। तत्र यथा मातृत्वे गर्भे धारणमेव लिङ्गं तथैव पितृत्वेऽपि मत्तो ब्रह्मा जायतामित्याधानस्थानीयभगवदिच्छैव लिङ्गमवगन्तव्यं, तथा च· "उत्क्षेपणं गर्भगतस्येत्यादि ॥ १५१ ॥

अथ जलशायिनो भगवतश्च तवैव तनो-
र्यदहमभूवमीश्वर ततोऽसि ममापि पिता ।
नहि जनकोऽसतस्तनुभुवोऽप्यपराधकृतः
परिहरते निसर्गसुतवत्सलताकुशलः ॥ १५२ ॥

अपराधकारिणोऽपि तनुभुवः पुत्रान् न परिहरते न त्यजति, तत्र हेतुर्निसर्गेति, तथा च "जगत्त्रयान्तोदधी"त्यादि ॥ १५२ ॥

नरनिकरायणं सकलदेहभृदात्मतया
सहजत एव तद्व्यभिधया च भवानपि सः ।
इति हि तदात्मजोऽप्यहमधीश तवात्मभवः
कुरु करुणां क्षमस्व मम मन्तुमनन्तधृते ॥ १५३ ॥

ननु जलशायी नारायण एव तव माता पिता चेति स त्वमेव तेन गोपेन्द्रसूनोर्मम किमायातं, तत्र न केवलं तदंशित्वेन भवानेव स इति न्यायः किंतु तन्नामनिरुक्तिरपि मुख्या त्वय्येव दृश्यत इत्याह नरनिकरायणमित्यादि, समूहार्थकाणन्तस्य नारशब्दस्य व्याख्या नरनिकर इति, तस्य आश्रयः, केन प्रकारेण, सकलदेहभृतां सर्वजीवानामात्मतया परमात्मत्वेन· इति स्वभावादेव तद्व्यभिधया तन्नाम्नापि स नारायणो भवान्, "साक्षात् प्रकृतिपरो योऽयमात्मा गोपालः कथं त्ववतीर्णो भूम्यां ह वै" इति तापनीश्रुतेः, "कृष्ण· मेनमवेहि त्वमात्मानमखिलात्मना"मिति स्मृतेश्चेति। अनन्तधृते· इति परमधैर्यशालित्वेन, अक्षोभ्यतया तव क्षमा युक्तैवेति भावः, तथा च "नारायणस्त्वं न ही"त्यादि ॥ १५३ ॥

तदपि जलस्थितं तव सदेव वपुः परमं
जलगततेव तस्य नियता न भवेद्भगवन् ।
अथ परिलोकितं न च विलोकितमप्यपरं
यदपि मया तवेष महिमा हि कृपाकृपयोः ॥ १५४ ॥

ननु तर्हि· "आपो नारा इति प्रोक्ता आपो वै नरसूनवः ।
अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः" ॥ इति प्रसिद्धनिरुक्त्या प्राकृतजनान्तःपातित्वेन तद्वपुषः प्राकृतत्वमायातं, तत्र नहि नहीत्याह, तदपि जलस्थितमपि तव वपुः सत् सत्यमेव, किंतु तस्य जलगततेव जलपरिच्छिन्नतेव न नियता· अपितु जलापरिच्छिन्नतापि, अतर्क्यैश्वर्ये तस्मिन् परिच्छेदो न विरुध्यत इत्यर्थः ।

ननु तद्वपुः सत्यं चेद्ब्रूषे तर्ह्येकवारं विलोक्यापि किमिति तृतीयस्कन्धकथानुसारेण भवता पुनर्न विलोकितं तत्राह· अथेति, दर्शनादर्शनं हि तत्र क्रमेण कृपाकृपयोरेव महिमा न तु सत्यासत्यत्वज्ञापकं तदेवेति भावः, तथा च "तत्त्वेज्जलस्य"मित्यादि ॥ १५४ ॥

अथ कथमन्यथा जठरमध्यमधीह विभो
समकलयत् प्रसूस्तव समस्तमधीश जगत् ।
असदिदमीक्ष्यते बहिरहो न तवोदरगं
घनचिति केवलं क्व जडजातविमिश्रविधिः ॥ १५५ ॥

तद्वपुषः प्राकृतजनपरिच्छिन्नत्वानियमो भवतैव स्वयं दृष्टान्तीभवता प्रदर्शित इत्याह·अथेति, अन्यथा यदि वपुषः प्रपञ्चाश्रितत्वमेव स्यादित्यर्थः, तदा जठरमध्यम्· अधि· अधिकृत्य प्रसूर्माता समस्तं जगत् कथं समकलयत् सम्यगपश्यत्, सर्वजगतामाश्रयभूतमेव तद्वपुरिति ज्ञापनार्थमेव मातरं लक्षीकृत्य जठरस्थं जगत् त्वया प्रकटितमिति भावः, किंतु वस्तुतः सिद्धान्तविचारे तु बहिः स्थितमिदं जगत्·असत्· असर्वकालस्थायि नश्वरस्वरूपमेव, तवोदरगतं तु न तथा, सत्यमनश्वरस्वरूपमेव, कारणत्वादित्यर्थः, तत्र हेतुः, केवलं घनचिति त्वद्विग्रहे जडजातस्य विमिश्रविधिर्विलिप्तत्वप्रकारः क्व, नहि घनचैतन्ये जडप्रलेपः संभवेदित्यर्थः, व्रजेश्वर्या जठरस्य तत्रस्थजगतश्च वैधर्म्येणाननुभूतत्वादिति भावः, तथा च· "अत्रैव मायाधम नावतार" इत्यादि ॥ १५५ ॥

पुरुकृपया त्वया जठरवर्ति तदेह जगत्
स्वसहितमीक्षितं न तदमुष्य भवेत् प्रतिमा ।
यदि भवतीह तत्प्रतिमुखत्वममुष्य भवे-
दथ न च मायिकस्तव विनोदकलेव हि सा ॥ १५६ ॥

ननु किमेवं मन्यसे बहिः स्थितस्यैव जगतो मज्जठरे प्रतिबिम्बोऽस्तु मज्जठरस्थितस्यैव जगतो वा छायारूपं बहिःस्थितं जगदस्तु तत्राह हे पुरुकृपेति । त्वत्कृपयैव तव तत्त्वं स्फुरति, न ममात्र शक्तिरिति भावः, तदा तस्मिन् समये त्वया जठरवर्ति यज्जगत्· ईक्षितं दर्शितं, तत्· अमुष्य बहि

भूतस्य जगतः प्रतिमा, त्वयि दर्पणरूपे प्रतिबिम्बो न भवेत्, तत्र हेतुः, स्वसहितं स्वस्सहितं, नहि दर्पणो दर्पणेऽपि दृश्यत इति भावः, यदि अमुष्य बहिर्भूतस्य जगतः तत्प्रतिमुखत्वं भवेत् तस्य जठरवर्तिनो जगतः प्रतिच्छायात्वमिति षष्ठीतत्पुरुषः, अथ तदा अदो बहिर्भूतं जगत् मायिकं न च स्यात्, सत्यवस्तुनश्छायापि सत्यैव भवति, सर्वकालस्थायित्वप्रसक्तेरिति भावः, तर्हि को निश्चयस्तत्राह सा तव विनोदकलेव, तथा च "यस्य कुक्षा"विति ॥ १५६ ॥

अथ यदमी भवांश्चिदवबोधरसैकमयाः
स्वयमभवद्विभो स्वयमथैकक एव पुनः ।
तदपि च मायिकं यदि तदीयजडत्वमिति-
र्यदि जडता ततोऽनुभवसिद्धिविरोधविधिः ॥१५७॥

अमी वत्सवत्सपाद्याः ।

ननु आद्यन्तयोरदृष्टत्वात् तत् सर्वं मायिकमस्तु तत्राह तदपि चेति, तदा तदीयजडत्वस्य मितिः प्रमितिः स्यात् । अस्तु को दोष इति चेत् तत्राह, यदि जडता स्यात् तदा अनुभवस्य सत्यज्ञानानन्तानन्दमात्रैकरसमूर्तय इत्युक्तप्रकारस्य साक्षात्कारस्य या सिद्धिर्युक्तया निष्पन्नता तस्या विरोधकारणमिति, न ह्यनुभवसिद्धे वस्तुनि अप्रामाण्यशङ्का संभवतीति भावः, तथा च "अद्यैव त्वदृते" इत्यादि । तस्यायमर्थः, त्वदृते त्वां विना अन्यस्य मायात्वं न दर्शितं किंतु दर्शितमेव, वत्सवत्सपाद्यास्ततश्चतुर्भुजाद्याश्च त्वमेव भवसीति त्वद्रूपा एव ते इति न तेषां मायिकत्वं, त्वदृते इत्यनेन त्वद्भिन्नानामेव मायिकत्वोक्तेरित्याह एकोऽसीत्यादि । अद्वयं ब्रह्म शिष्यत इति बहूनामपि तेषां त्वत्स्वरूपत्वात् त्वमेवैको भवसीत्यर्थ इति ॥ १५७ ॥

तत इदमूह्यते तव तु काचिदहो इयती
व्युपमितिरीशता त्रिभुवनैकविमोहकरी ।
घनरसचित्तया बहुविधोऽसि न वै नृतया
तदितरयोगिनां तव च भेद इयान् हि महान् ॥१५८॥

व्युपमितिर्निरुपमा ईशता ऐश्वर्यं, न नृतया, नृशब्दस्य मनुष्यार्थत्वात् तेषां च प्रकृतिजन्यत्वात्, न प्राकृततयेत्यर्थः । तत् तस्मादितरेषां योगिनां तव च इयान् एतावान् भेदो महानिति । तेषां मायिकरूपत्वेनैव बहुरूपतासामर्थ्यं न तु घनरसचिद्रूपत्वेनेति । तथा च "अद्यैव त्वदृते". इत्यस्यैव तात्पर्यतो युक्तिनिर्द्धार इति ॥ १५८ ॥

प्रथमत एकक: स्वयमभूरथ भूरितरा
स्वचरवत्सकावलिरभूरथ सापि पुनः ।
अजनि चतुर्भुजा प्रतिजनं च मयोपनुता
पुनरसि चैकक इत्यपि कलेव न ते कुहकम् ॥ १५६ ॥

मया ब्रह्मरूपेण उपनुता स्तुता कलेव कौतुकमेव, यद्वा, तवांश एव न कुहकं मायेति,तथा च "तस्यैव पद्मस्य "एकोऽसि प्रथम"मित्यादि ॥ १५९ ॥

तव पदवीमिमामविदुषां तु मनः कुहरे
भवसि हरे पृथक् पृथगिव प्रतिभानपरः ।
अवनविधाननाशकर एकक एव भवा-
निह हरिरब्जजो भव इतीश्वर ते कुहकम् ॥ १६० ॥

एकक एव भवान् पृथक् पृथगिव, त्वत्तो हरिः पृथक्, ब्रह्मापि पृथगेव, तत्रापि युक्तिराह अभावसूचक इव शब्द इति, एतद्भानं ते कुहकं माया, अत्र च हरेः स्वरूपेणैव, ब्रह्मरुद्रयोस्तु गुणावतारत्वेनैक्यमिति मन्तव्यम् । यद्वा, स्वायंभुवमन्वन्तरे यज्ञावतारेणैव इन्द्रत्वमिव क्वचित् कल्पे विष्णुस्वरूपेणैव ब्रह्मरुद्रत्वमिति, तदपेक्षयैवोक्तं, तथा ह्युक्तं भागवतामृते ।

"भवेत् क्वचिन्महाकल्पे ब्रह्मा जीवोऽप्युपासनैः ।
क्वचिदत्र महाविष्णुर्ब्रह्मतां प्रतिपद्यते"

इत्यादीति, तथा च "अजानतां त्वत्पदवी"मित्यादि ॥ १६० ॥

सुरमुनिमानुषादिषु तवाविरहो यदिदं
हितकृतये सतामहितसंविधये*ऽप्यसताम् ।
तदखिलमंशतो यदपि तन्न विभो कुहकं
ह्यवयविनो विरूप इव नावयवप्रकरः ॥ १६१ ॥

गुणावतारान् प्रस्तूय लीलावतारानपि तदैक्येन प्रस्तौति, सुरादिषु वामनादिरूपेणाविर्भावः, तदखिलमंशत एव यद्यपि तथापि तद् विराड्वत् कुहकं, तत्र हेतुः अवयविन इति, नहि मानुषस्यावयविनो हस्तपादाद्या विजातीयाः पश्वादिसंबन्धिनो भवन्ति, "तथाहि सुरे"ष्वित्यादि ॥ १६१ ॥

त्वमसि परात् परः सकलशक्तिकदम्बमयः
परभगवत्तया त्वमखिलेश्वरमूर्धमणिः ।
घटयसि दुर्घटं विघटयस्यपि भो सुघटं
तव महिमा हि मादृशगिरां न भवेद्विषयः ॥ १६२ ॥

यद्यप्येवमैक्यं तथापि पूर्णत्वेनावतारित्वात् तेषां मूलभूतस्त्वं पृथगेवेत्याह त्वमसीति, ते परमस्वरूपाः, त्वं तु परात् परः, ते यथोपयोगिज्ञानेच्छाकृत्यादिशक्तिप्रकाशवन्तः, त्वं तु

* संनिधये इति पा० ।

सकलशक्तिकदम्बमयः, ते भगवत्तया अखिलानामीश्वराः,त्वं तु परमभगवत्तया तेषामपि मूर्धमणिरूपः, तथा च "को वेत्ति-भूम"न्नित्यस्याभासतात्पर्यम् ॥ १६२ ॥

क इह नु वेत्ति ते चरितमण्वपि भूमतमो-
त्तम भगवन् परात्मतम योगविदां परम ।
क्व कति कथं कदा यदपि योगकलां प्रथयन्
विहरसि लीलया शिवविरञ्चिदुरासदया ॥ १६३ ॥

तेऽवतारा भूमानः,त्वं तु भूमतमोत्तम इति,"एवं परात्मतमे"त्यादि ॥ १६३ ॥

इदमखिलं जगद्यदपि नश्वरमीश्वर भोः
पुरुतरदुःखदं विरसमन्तत एव हि यत् ।
त्वयि रसबोधनित्यवपुषि प्रकटं विलसद्
भवति भवत्पदप्रतिममेव हि शाश्वतिकम् ॥ १६४ ॥

असतोऽपि सत्ताप्रदत्वात् त्वमेव साक्षादीश्वर इत्याह, इदमखिलं जगद् यद्यपि नश्वरं मायिकत्वात् त्वत्स्वरूपाद्भिन्नं, तथापि त्वयि प्रकटं विलसद् भवति, तथापि त्वत्सेवनोन्मुखं चेत् स्याद् भवति, तदा भवतः पदं स्थानं धाम तत्प्रतिममेव तत्सदृशमेव शाश्वतिकं नित्यभूतं भवति । तथा च "तस्मादिद"मित्यादि, तस्यायमर्थः, मायात उद्यदपि जगत् मायावृत्तिज्ञातमपि नित्यसुखबोधतनौ त्वयि विषये स्यात्, त्वत्सेवानुकूलं चेत् स्यादित्यर्थः, तदा सदिव सत्यं वैकुण्ठमिव भातीति ॥ १६४ ॥

त्वमनितरः पुराणपुरुषः स्वयमात्ममहः-
प्रकरविसारतः समधिरूढसमस्तभगः ।
घनसुखचिद्रसो रसविलासविशेषमयः
पुरुकरुणामयः क इह तेऽस्तु कटाक्षपदम् ॥ १६५ ॥

अनितरः न विद्यते इतरो यस्मात् सः, एक इत्यर्थः । भग ऐश्वर्यादिः । तव कटाक्षपदं तिरस्कार्यः कोऽस्तु, न कोऽपीत्यर्थः, तत्र हेतुः पुरुकरुणामय इत्यादिः ।

यद्वा, ते तव पुरुकरुणामयत्वादुक्तलक्षणस्य कटाक्षपदं कृपावलोकास्पदं को भवेत्, कस्य एतादृशं महाभाग्यमस्तीत्यर्थः, भङ्ग्या तु को ब्रह्मा करुणामयस्य तव कटाक्षपदमस्त्वित्याशास्ते च । तथा च "एकस्त्वमात्मे"त्यादि ॥ १६५ ॥

गुणनिधिमीदृशं ननु भवन्तमुपास्यतया
चरणसरोरुहे निहितमत्तमनोभ्रमरः ।
अनुपधिचिद्रसप्रसवकान्तिलसद्वपुषं
भजति हि सद्गुरोः करुणयेव सुधीः कतमः ॥१६६॥

अनुपधेरुपाधिशून्यस्य निरञ्जनस्य चिद्रसस्य प्रसवः प्रकाशो यस्मात् तच्च अत एव कान्त्या लसच्च वपुर्यस्य तं, तथा च "एवंविधं त्वा"मित्यादि । तत्र आत्मात्मतयेत्यस्यार्थोऽनुपधीत्यादिना विवृतः । किरणरूपस्य निरञ्जनचिद्रसमयस्यात्मनोऽप्यात्मा परमाश्रयभूतं त्वद्वपुरिति, अतो विचक्षण इति, त एव विचक्षणा ज्ञेया इति भाव इति । तेन साक्षाद्भवदुपासकः कतम एव, विरलः सुधीः, अन्ये पुनस्त्वद्वपुःकिरणरूपब्रह्मोपासकाः साक्षात् त्वच्छुद्धभजनत्यागिनो मन्दधिय एव बहव इति द्योतितम्, अत एव तैरविचक्षणैरत्र भक्तिरसमये ग्रन्थे किमित्येतदभिप्रेत्य तन्निष्ठाप्रकारप्रदर्शक"मात्मानमेवात्मतया विजानता"मित्यादिश्लोकचतुष्टयमुल्लङ्घितमेवेति ॥ १६६ ॥

तव चरणाम्बुजोल्लसदनुग्रहशुद्धमति-
स्तव निजतत्त्वविद्भवति कोऽपि परः सुकृती ।
न तु निगमागमाद्यखिलशास्त्रविचारणया
कृतमतिरप्यसौ सुनिपुणोऽपि महानपि यः ॥ १६७ ॥

ननु तर्हि केवलब्रह्मतत्त्वमात्रज्ञानपरा मामभजन्तो विगीताः सन्तु, किंतु साक्षान्मां भजतामपि मत्तत्त्वज्ञापनार्थं तेषां ज्ञानिनामिव वेदादिशास्त्रविचारणमपेक्षितं स्यादेव, तत्र नेत्याह तवेति, तथा च "अथापि ते देवे"त्यादि ॥ १६७ ॥

अत इदमेव भूरितरभाग्यमिहैव जनुः
किमपि यतो भवेत् तव जनाङ्घ्रिरजःस्नपनम् ।
स्वजनगणस्य जातिकुलशीलधनादि भवान्
चरणरजोऽधुनापि तव वेदविमृग्यतमम् ॥ १६८ ॥

तत्रापि भक्त्येकमये श्रीवृन्दावनधाम्नि ये यत् किंचिज्जन्ममात्रवन्तस्तेषां भाग्यमाशासान एव स्तौति अत इति, किमपि तृणगुल्मादिसंबन्ध्यपि यतो जनुषः, नन्वत्र साक्षान्मय्यपि तिष्ठति मदीयजनाङ्घ्रिरजसि कोऽयमत्याग्रहस्तत्र तेषामिव प्रेमाणं निगूढमाशासानस्तानेव सगद्गदं स्तौति स्वजनेति, जातीति, अहो त्वयि ममता परिपाटीति भावः, अत एव वेदैरप्यतिशयेन विमृग्यमेव न तु प्राप्तं, तथा च "तद्भूरि भाग्य"मित्यादि ॥ १६८ ॥

तदिह ममाप्यहो भवतु जन्म किमत्र भवे
किमथ परत्र गुल्मतरुपक्षिपशुप्रभृतौ ।
अहमपि येन ते चरणपद्मनिषेविजना-
ननु चरणाम्बुजं तव भजामि निरस्तमदः ॥ १६९ ॥

तदेवात्यौत्सुक्येन स्पष्टमाह तदिति, अत्र भवे इति स्वजनगणस्येत्यस्य प्रक्रान्तत्वादत्र भवे मनुष्यमात्रयोनौ, पुन-

Digitized by Google

इतिदैन्योदयेन तत्र स्वस्य योग्यताभावमाशङ्क्याह परत्र गुल्मेत्यादि, अनु· अनुलक्षीकृत्य तत्सङ्गात् तादृशं भजनमनुशिक्ष्येत्यर्थः, तत्र वृन्दावनस्थानां तरुगुल्मादीनां पुष्पपल्लवादिप्रसाधनप्रदानैः शुकादिपक्षिणामपि प्रियभाषणैर्गवादिपशूनामपि भारादिवहनैः प्रसिद्धं भजनमस्तीति, तथा च "तदस्तु मे नाथ" इत्यादि ॥ ९९ ॥

सुकृतमहो· अहो बत महोन्नति घोषजुषां
यदसि परं बृहत् त्वमसि चिद्रसपूर्णतनुः ।
महदहमोः परः प्रकृतिपूरुषयोश्च परः
परमसुहृत्तमो बत यदीय इयानतुलः ॥ १०० ॥

नन्वत्रत्यानामेषामेव किं तद्भाग्यं तत्राह, तन्निर्वक्तुं केन शक्यते किंतु फलेन फलकारणमनुमीयते· इति न्यायेन कथंचिदुच्यत इत्याह सुकृतमिति, अहो· इति पुनरुक्तिरित्याश्चर्यं, बतेति तत्राप्यतिचमत्कारे, महती· उन्नतिर्यस्य तत्, महदहमोर्महत्तत्त्वाहंकारयोः, भक्त्या तु तदधिष्ठातृत्वाद्ब्रह्मरुद्रयोः, परः कियदेतत् प्रथमकक्षागतं माहात्म्यमिति, तयोरपि परयोः प्रकृतिपुरुषयोरपि परः,

ननु "बृहत्त्वाद्बृंहणत्वाच्च तद्ब्रह्म परमं विदु"रिति ब्रह्मैव बहुत्र सर्वपरमभूतत्वेन श्रूयते तत्राह बृहत्, ब्रह्म परं परमभूतं सत् त्वमसि, "ब्रह्मणोऽपि प्रतिष्ठा ह" मित्यादिश्रुतिवाक्यैस्तस्याप्याश्रयभूतश्चिद्रसपूर्णतनुस्त्वमेव भवसीत्यर्थः, एवंभूतस्त्वं यद्यस्माद् घोषजुषां व्रजवासिनां परमसुहृत्तमः, न च सुहृदेव नापि परमसुहृत्तरश्चेति भावः, तत्राप्यतिविस्मये बतेति, इयान्· एतावान्·, अतुलः· निरुपमोऽपि त्वं यदीयः स्वस्वामिसंबन्धेन येषां स्वामीत्यर्थः, तत्र तादृशप्रेमैव कारणमिति भावः, तेन तैरेव सेवितैस्तत्प्रसादेन त्वं लभ्यसे नान्यथेत्यतः साधूक्तं मया "तव जनाङ्घ्रिरजःस्नपन"मिति, तथा च· "अहो भाग्यमहो भाग्य"मित्यादि ॥ १०० ॥

अहमिह धन्यतां किमनुवच्मि गवां सुदृशामपि जगदुत्तरां जगदधीश भवान् भगवान् ।
अपिबदनुत्तमं बत यदीयपयोधरजं
रसमिह वत्सवत्सपलीलशरीरधरः ॥ १०१ ॥

तेष्वपि मध्ये मुख्यमुख्यतराणां माहात्म्यं पुनरतीव दुष्पारमिति दिग्दर्शनरीत्याह·अहमिहेति, इह व्रजे पुनरिहेति· अत्र समये, वत्सवत्सपेति बहुविधरूपधारणेन स्तन्यानं तव महातल्लोभपारवश्यव्यञ्जकमिति भावः, तथा च·"अहोऽतिधन्या" इत्यादि ॥ १०१ ॥

अथ मनुजाकृतिं गतवतामिह घोषभुवां
करणकुलाश्रयास्तव पदाम्बुजशीधु कियत् ।
यदुपलभामहे तदवर्षिष्टमनेन वयं
बहु सुभगा अमी किमु भवन्तु गिरां विषयाः ॥ १०२ ॥

करणकुलाश्रयाः· इन्द्रियकुलान्याश्रित्य तदधिष्ठातृदैवतत्वेन वर्यमित्यर्थः, अत्र यद्यप्यभिमन्तुरात्मन एव विषयभोगो न तु तत्तत्कर्तॄणामिन्द्रियाधिदेवानामित्यध्यात्मसिद्धान्तस्तथापि बुद्धौ ब्रह्मा तिष्ठति चक्षुषि सूर्यस्तिष्ठति तं तमधिष्ठातारं विना तु तत्तदिन्द्रियं श्रीकृष्णनिष्ठानामपि रूपरसादीनां ग्राहकं न स्यादिति सामान्यदृष्ट्या, अध्यात्मविदां प्रवादोऽपि श्रीकृष्णे प्रेमोत्कण्ठवतां ब्रह्मादीनामानन्दहेतुः कर्तृत्वमात्रेणैव भोक्तृत्वाभिमानस्वीकारात्. प्रेम्णामेव विलक्षणेयं प्रक्रिया, दृश्यते चान्यत्र पद्मावल्यादौ "मिथ्यापवादवचसाप्यभिमानसिद्धि"रित्यादीति, अन्यथा चिदानन्दमयवपुषां श्रीभगवत्परिवाराणां तेषामिन्द्रियादेः प्राकृतत्वमेव न शक्यते वक्तुं कुतस्तत्र तत्र प्रपञ्चगतानां ब्रह्मादीनां प्रवेश इति, तथा च· "एषां तु भाग्यमहिमाच्युते"त्यादि ॥ १०२ ॥

विषविषमस्तनापि कृतमातृसुवेशतया
समजनि पूतना तव सुधाम्नि सहावरजा ।
धनजनजीवनाद्यखिलदानकृतां किमहो
व्रजपुरवासिनां वितरितेति भवाम्यपधीः ॥ १०३ ॥

कृतो मातुर्यशोदाया इव वेशो यया तस्या भावस्तत्ता तया, सुधाम्नि शोभनधाम्नि वैकुण्ठे, समजनि समभूत्, किं वितरिता कं वरं भवान् दास्यतीति,तदनुसारेणैषामुचितस्य वरस्यासंभवादृणित्वेनैवैतत्पारतन्त्र्यं युक्तमेवेति भावः, तथा च· "एषां घोषनिवासिना"मित्यादि ॥ १०३ ॥

अथ बत लोभकोपमदमत्सरकाममुखा
विदधति तावदेव हि जनस्य मलिम्लुचताम् ।
गृहमपि तावदस्य परमेश्वर बन्धगृहं
तव चरणाब्जयोर्न खलु यावदयं निरतः ॥ १०४ ॥

एषां तादृशस्य प्रेम्णस्तावदास्तां महिमा दूरत एव, सामान्यतो भक्तेरेव महिमा परमाद्भुत इत्याह·अथेति,मलिम्लुचतां मालिन्यं, तथा च "तावद्रागादयः स्तेना" इत्यादि ॥ १०४ ॥

अहह विदन्तु ये तु महिमानमहो भवतः
सुभग विदन्तु ते सुकृतिनोऽतिविदग्धधियः ।
नहि विवदामहे न खलु तेषु घृणां तनुमो
मम तनुहृद्गिरामपदमेव भवन्महिमा ॥ १०५ ॥

Digitized by Google

भगवद्भक्तिरहस्योद्घाटनचापल्येन स्वस्य भगवत्तत्त्वविज्ञम-न्यतामात्रमाशङ्क्य सप्रश्रयमाह· अहहेति, अतिविदग्धधिय इति विदग्धलक्षणया, श्लेषेण तु· आकाशपरिमाणामिव विशेषतो दग्धैव धीस्तेषामिति, तथा सुकृतिन इत्यत्राप्यका-रप्रश्लेष इति, न विवदामह इति, तैर्विवादोऽपि परममूर्खतेति भावः, घृणां न तनुम इति भवत्तत्त्वानिश्चयाच्चापल्यमात्रं कृत-वतो ममापि तादृशत्वं जातमेवेति भावः, किंतु भवत्कृ-पया साम्प्रतमेव सा मम मूर्खता· अपगतेत्याह मम· इत्यादि, अपदमनास्पदमगम्य एवेत्यर्थः, तथा च "जानन्त एव जान-न्त्वित्यादि ॥ १७५ ॥

इदमनुमन्यतां कृपणवत्सल यामि भव-
त्कृतपरमेष्ठितास्पदपदानुपदः पदवीम् ।
अखिलजगज्जनान्तरविदेकचिदेकरसो
मम हृदयं च वेत्सि वत देव नमामि पदे ॥ १७६ ॥

अथ तादृशस्वयाच्ञायां कृपयतापि भगवता कृतमौनेन यावदधिकारमवस्थितिराधिकारिकाणामिति न्यायेन स्वस्य सत्यलोकप्रस्थापनमेव साम्प्रतमभिप्रेतमित्यनुमाय सलालसा-गर्भविनयं समयोचितमाह, अनुमन्यताम्· अनुमतिं कुरु,पदवीं सत्यलोकं यामि, कीदृशः,भवतैव कृतं स्वाज्ञया प्रयुक्तं यत्-परमेष्ठितास्पदं सृष्ट्यादिव्यवसायस्तेनैवानुपद्यते· अनुगच्छती-ति तथाभूतः, तेनात्रावस्थानानर्हतया तादृशत्वदाज्ञास्था-यित्वमेव मम निकृष्टदासस्य युक्तमिति भावः, अखिलाना-मेव जगज्जनानामन्तरं वेत्सि· अतस्तन्मध्यपतितस्य ममापि हृदयं वेत्सि, किं मया स्वाभिलषितं मुहुर्विज्ञाप्यमिति भावः, तेनैतदधिकारान्ते मदभीष्टं संपादयितुं श्रीभगवच्चरणा एव प्रमाणं द्योत्यते,न च प्राकृतस्येव तवात्र विस्मृतिः संभाव्येति द्योतयन्नाह,एको मुख्यश्चिदेकरसो ज्ञानघनरसमय इत्यर्थः, तथा च·"अनुजानीहि मां कृष्ण" इत्यादि । "अत्र तदस्तु मे नाथे"त्यादिश्रीकृष्णवृष्णिकुलपुष्करेत्यन्तानां मूलपद्यानाम-र्थक्रमानुरोधेन पाठक्रमस्त्यक्तः, तत्र "पशुपाङ्गजाये"ति स्तवो-त्क्रमानुरोधेनात्युपयुक्तलघुत्वाभावादिव प्रपञ्चनिष्प्रपञ्चोऽ-पीति श्रीकृष्णवृष्णिकुलपुष्करेति पद्यद्वयार्थो न विवृतः,किंतु "एकचिदेकरसो" "नमामी"ति पदाभ्यामुट्टङ्कित एव,श्रीम-द्भागवतश्लोकव्याख्याचातुर्यवद्भियां तदेकार्थरसास्वादविक्लाव-मिह दर्शितम् ॥ १७६ ॥

गते स्वयंभुवि भुवि सुविमलायां नवतृणाङ्कुराचा-मोदारमोदा रभसेन चरन्ती पूर्ववत्सा वत्सावलिरथ रथ-चरणपाणिना ददृशे ॥ १७७ ॥

नवतृणाङ्कुराणाम्· आचामेन· आस्वादेन· उदारो मोदो यस्याः सा । रभसेण हर्षेण ॥ १७७ ॥

तदनु कलकोमलगभीरहाङ्कारकलितचलनेङ्गिताङ्गि-तानुविद्धलघुलघुयष्टिकाघूर्णनेन ससंभ्रमभ्रमणेन मुखविव-रविगलदर्धावलीढतृणाङ्कुरनिकरकरम्बितधरणितलं वत्स-कुलमनु मनुजाकृति परं ब्रह्म ब्रह्ममोहनानन्तरमनन्तर-मणीयरहस्यहस्यमानपरमोपयोगियोगिकुलं पूर्वभोजनस्थ-लमनुससार ॥ १७८ ॥

तादृशहाङ्कारः परावर्तनार्थं तादृशसंकेतध्वनिस्तेन कलितं कृतं चलनेङ्गितं तस्यापि· अङ्कितया· अङ्कित्वेन· अनुविद्धं लघु-लघुयष्टिकाघूर्णनं तेन हेतुना यत् ससंभ्रमभ्रमणं तेन ॥ १७८ ॥

सारभृतां मुकुटमणिमिममालोक्य तेऽपि तदनवलो-कनवैमनस्यं वै मनस्यञ्जसा यदुपजग्मुस्तदपहाय हायनं गतमपि क्षणार्धमिव मन्यमाना मानान्तरानधिगम्यमान-महिमानमहिमानहारिहारिचरितमुपव्रजन्तो नाभोजि भो जितरिपुसमीकवल कवल एकोऽपि भवन्तमन्तरेणेति वदन्तो दन्तोज्ज्वलकिरणमञ्जरीजरीजृम्भ्यमाणमधुराधरा धराभरापहारिणं हारिणं तमभित आवव्रुः ॥ १७९ ॥

मानान्तरेण प्रमाणान्तरेण· अनधिगम्यमानो न ज्ञायमा-नो महिमा यस्य तम् । अहिरघासुरस्तस्य मानहारि ज्ञान-नाशकं गर्वहारीति वा हारि मुग्धं चरितं यस्य तम् । एको-ऽपि कवलो न· अभोजि । भो· इति संबोधने । समीकं सैन्यम् ॥ १७९ ॥

तदनु दनुजदमनोऽपि धायिनीं सप्रणयमुवाच वाच-मतिमधुरतराम्,एवमेवमे प्रणयलोभवतां भवतां सुचिर-मयि मयि हृद्यसौहृद्यसौरभमितिनिगदितदिताखिलता-या लतापाशवलयवलयितकराः करायं भगवत आधृत्य· एहि चिरारब्धमशनं समापयामो यामोऽशनायायाः पार-मिति मितिरहितकथामोदेन तेषां जातकौतुकः स दान-वनाशनो वनाशनोत्सवपरिसमाप्तिमभिललाष ॥ १८० ॥

मनसोऽपि धायिनीं प्रेम्णा·आच्छादनकारिणीम्, अयि सं-बोधने, मयि विषये यद् हृद्यं हृदयप्रियं सौहृद्यं तस्य सौरभं तद्वदिन्द्रियाह्लादकत्वं, दितः खण्डितः· अखिलतापो येषां ते,अशनायायाः, "अशनायाबुभुक्षा क्षु"दित्यमरः ॥ १८० ॥

अथ भोजनरस उपरते परतेजसा तेन दिवसमणे-र्ललाटंतपस्यातपस्यापनोदाय विनोदाय विश्रामेण च स-

* अत्रापि पूर्ववत् सा इत्येवं मुद्रणीये पूर्ववत्सा, इत्येवं मेलयित्वा मुद्रणं लिपितोऽपि यमकसौष्ठवप्रतीत्यर्थम्, एवमन्यत्रापि क्वचित् सति संभवेऽलेखोऽप्यूह्यम् ।

वमलसतालसतामवयवानां खेलाखेदं प्रच्छाय प्रच्छायललिततरुमूलमालम्बमानो लम्बमानोदारहार: सहचरोरुमूलकृतोपधानो मुहूर्तं सुष्वाप सुस्वापतेयमिव रमणीयतादेव्या: ॥ १८१ ॥

दिवसमणे: सूर्यस्य । कीदृशस्य, परतेजसा ललाटंतपस्य, “असूर्यललाटयोर्दृशितपो”रिति खश् । तत्संबन्धिन आतपस्य अपनोदाय निवारणार्थं, विश्रामेण हेतुना वणं विनोदाय आनन्दार्थम्, भोजनहेतुकया अलसतया आलस्येन लसतां शोभमानानाम् अङ्गानां खेलाजनितं खेदं प्रच्छाय दूरीकृत्य, “छो छेदने” । प्रकृष्टा छाया यत्र तथाभूतं तरुमूलं सुष्वाप । कीदृशं, रमणीयतादेव्या: शोभनं स्वापतेयं धनमिव, “पथ्यतिथिस्वपतेर्ढ”ञिति ढञ्, रमणीयत्वस्य सर्वस्वभूतं तत् शयनमित्यर्थ: ॥ १८१ ॥

अथ भगवन्निलयलयनार्थमिव गगनचत्वरत्वरमाणे चरमदिग्वनितानितान्तपरभागभागतिशयप्रणयमहिम्नेव तद्भवनमालम्बितुमुपक्रान्तेऽपक्रान्ते च सकललोकतापतोऽपतोषतया कमलिनीमलिनीभावभावयितरि तरिमिव गगनपारावारपारावारयो: स्वमण्डलीमण्डलीनामिव चिकीर्षति भगवति गभस्तिमालिनि ॥ १८२ ॥

भगवतो निलये लयनं संश्लेषप्राप्तिस्तदर्थमिव गभस्तिमालिनि सूर्ये गगनचत्वरात् त्वरमाणे सतीति, श्रीकृष्णसङ्गिनां तेषां सुखमयसमयस्याल्पप्रमाणत्वभानात्, सर्वे सहचरा: श्रीकृष्णं पुरो निधाय पुर: पुर्या: पुरोऽग्रदेशस्य समीपमुपसीदन्ति स्मेत्यन्वय: । गभस्तिमालिनि कीदृशे, चरमदिगेव वनिता तस्या नितान्तपरभागम् अतिशयशोभां भजते तथाभूतो योऽतिशय: प्रणयस्तस्य महिम्ना इव तद्भवनम् आलम्बितुम् उपक्रान्ते कृतारम्भे, ततश्च सकललोककर्मकरात् तापतोऽपक्रान्ते निवृत्ते तद्वनिताविरहसंतप्तेनेव तेन सकललोकतापनात्, ततश्च अपतोषतया स्वकर्तृकत्यागेन गतसंतोषतया कमलिन्या मलिनीभावस्य भावयितरि उत्पादके । किंच, स्वमण्डलीं निजबिम्बम् अण्डलीनां ब्रह्माण्डकटाहलग्नामिव चिकीर्षति, स्वमण्डलीं कीदृशीं, गगनमेव पारावार: समुद्रस्तस्य पारावारयो: परावरतटयोर्गमनार्थं तरिमिव नौकामिव, श्लेषेण स्वमण्डलीं स्वगोष्ठीं तथाभूतां चिकीर्षति । तद्वनितास्थानमेकाकित्वेनैव जिगमिषयेति भाव: ॥ १८२ ॥

वेणुविषाणध्वनिध्वनितदिग्वलया निलयाय निभृतहृदया हृदयाधिनाथेन तेन सह सहचरा: सर्व एव सवेतो वत्सान् समवहारयन्तो * रयन्तोषस्यासाद्य व्रजन्तो व्रजन्तोऽयदेन सह नभोदिवसा इव भोगिनस्तस्यैव पूर्णाभोगं भोगं वीक्ष्य सकौतुकमहो महोज्ज्वलन्त: खेलागह्वरमिदं जातमिति परस्परं गदन्तोऽगदन्तोदहरमिव श्रीकृष्णं निधाय पुर: पुर:समीपं समुपसीदन्ति स्म ॥ १८३ ॥

रयं वेगं, तोषस्य संतुष्टे:, आसाद्य प्राप्य, व्रजं गोष्ठं, नभस: श्रावणस्य दिवसा इवेति तदविनाभावित्वं ध्वनितं, भोगिन: सर्पस्य, तस्य अघासुरस्य, भोगं शरीरं, “भोग: शरीर”मिति भागवृत्ति:, पूर्णभोगं पूर्णविस्तारम्, अगदम् औषधं, तोदहरं व्यथाहरम् ॥ १८३ ॥

* रयं तोषस्येत्येवमुचिते पदविभागे रयन्तोषस्येवं संधिर्लिपितोऽपि यम कर्णोष्ठवप्रतिपत्त्यर्थानुसंधेय: । एवमेव व्रजं यदेनेत्यत्र,ऽगदं तोदहरमित्यत्रापि मूले द्रष्टनीयम् ।

॥ शेषमग्रे ॥

॥ अथ ज्ञानसिद्धान्तचन्द्रिका ॥

बर्क्लैसंज्ञकमहापण्डितविरचितज्ञानसिद्धान्तमालाया:

अवतारिता ।

तत्र द्वादशशततमादिपरिच्छेदा: ।

११२—तदेवं न्यूटनाचार्येण प्रकाममुक्तेऽपि पराश्रितगतीतरा न कापि गति: सिद्ध्यति । गतिपदार्थज्ञानेऽन्ततो द्वयो: पिण्डव्यक्त्योर्नियमेनापेक्षाया: सत्त्वात् । तयोरन्तरालदेशस्य संस्थानविशेषस्य वा परिवर्तनस्यैव च गतिरित्यभिधानात् । यदि जगत्येकैव नाम पिण्डव्यक्तिरभविष्यत्तर्हि न जातु तद्गति:समभविष्यत् । एवं च गतिज्ञाने पदार्थान्तरसंबन्धज्ञानमवश्यमन्तर्भवतीति स्पष्टमेव ।

११३—गतिज्ञानस्यानेकपिण्डज्ञानसापेक्षत्वेऽपि नानेकपिण्डप्रेरणा तत्रावश्यकी । एकपिण्डप्रेरणायामपि गतिज्ञानस्य सौलभ्यात् । कामं पराश्रितगतिस्तथा लक्ष्यतां यथा या कापि पिण्डव्यक्ति: प्रेरिता ऽप्रेरिता वा पिण्डान्तराद्यधिकस्वान्तरवैविध्यशालित्वमात्राद्गतिमतीति कथ्येत । परंतु पराश्रितगतेरिन्द्रियग्राह्यत्वाल्लौकिकव्यवहारगोचरीभूतत्वाच्च न तस्या: केवलं शास्त्रविद्वेद्यत्वमेवापितु साधारणजनबोध्यत्वमपि संभवति । तथासति य: कोपि पथिक: पृच्छतां यन्मार्गे व्रजतस्तव पद्भ्यामुल्लङ्घिता: प्रस्तरा अपि त्वत्पादावधिकान्तरपरिवर्तनशालितया किंस्विद्गतिमन्त: कथ्यन्ते । सनैव ब्रूयात्कथ्यन्त इति । गतिपदार्थस्य पिण्डद्वयसंबन्धघटितत्वेऽपि तयोरुभयोरपि संबन्धिनोर्गतिमत्त्वामाभिधेयत्वस्यानियमात् । चि-

Digitized by Google

न्त्यमानस्य विषयस्य चिन्तकत्वमिव न कस्यापि पदार्थस्य विश्लेषावधिभूतत्वे गम्यमानत्वे वा गन्तृत्वं संभवति ।

११४—भिन्नभिन्ननिरूपकदृष्ट्या तस्यैव स्थलस्य वैलक्षण्यमिव गत्यवधिभेदेन गतेरपि नानात्वं भवति । यथा पोतस्थः पुरुषः पोतप्रान्तदृष्ट्या निश्चल स्तीरदृष्ट्या तु गतिमान् पोतसंबन्धेन वा पूर्वगामी तदितरसंबन्धेन पश्चिमगामी वा स्यात् । यद्यपि लोके साधारणजना न कस्यापि पदार्थस्य स्थानं लक्षयितुं भुवोऽन्यत्र क्वापि गच्छन्ति भूसंबन्धेन निश्चलं पिण्डमेव स्वाश्रितगतिमन्तं ब्रुवते तथापि यथार्थपदार्थसंस्थितिविदो बहुदर्शिनः कोविदा भुवमपि गतिमतीमुत्प्रेक्षमाणाः परितोऽव्याप्रवद्व्योममण्डलं भूगतेरवधिं प्रकल्प्य तत्संबन्धेन भुवः स्वाश्रितां गतिमाकलयन्ति । स्वानुभवमालोड्यालोचिते तु सर्वा ज्ञेयाः स्वाश्रितगतयो यथोक्तपराश्रितगतिभ्योऽन्यादृश्यो नैव प्रतीयन्ते । सर्वविधसंबन्धशून्यगतेर्दुर्लक्ष्यत्वात् । पूर्वनिर्दिष्टानां स्वाश्रितगतिसंबन्धिनां धर्माणां कार्यकारणभावानां च यथोक्तपराश्रितगतिष्वप्युपलम्भाच्च । यच्च केन्द्रापसारिशक्तिविषय उच्यते नैवेयं वर्तुलपराश्रितगतिमाश्रयतीति तदपि न । तत्साधकत्वेन संमतस्य न्यूटनप्रणीतगणितादि,पदार्थविज्ञानशास्त्राष्टमप्रकरणधृतपरीक्षाप्रकारस्य प्रोक्तसाध्यसाधनाक्षमत्वात् । * उत्कृष्टपराश्रितवर्तुलगतिमत्त्वेन चिन्त्यमानस्य तन्नोदाहृतोदकुम्भस्थितजलस्य पूर्वगतपरिच्छेदोक्तदिशा सर्वथा गतिशून्यत्वात् ॥

११५—स एव पिण्डो गतिमान् यो यत्किंचिद्देशवियोगपूर्वकं देशान्तरं प्राप्नुयात् प्रेरणाशाली च स्यात् । अनयोर्धर्मयोरेकतरस्याप्यभावे न कोपि पिण्डः स्वानुभवानुसारतः शब्दार्थमर्यादया वा गतिमानित्यभिधीयेत । यदा च वस्तुतोऽगतिमदपि द्रव्यान्तरं पदार्थान्तरदृष्ट्या तत्स्थानपरिवर्तनमात्रमालोक्य गतिमदिवमन्यते तदा तथामत्वा तस्मिन् पिण्डे प्रेरणाप्यारोप्यत एव । एतेनागतिमतः पदार्थान् गतिमत्त्वेन जानतां पुंसां भ्रमयोग्यतामात्रं व्यज्यते नतु वस्तुतोऽगतिमतो गतिमत्त्वम् ॥

११६—एतावता शास्त्रीयगतिविमर्शोपि यावदैन्द्रियकविषयसंबन्धविनिर्मुक्तं स्वाश्रितावकाशसद्भावं साधयितुं नालमित्यागतम् । यैश्च हेतुभिः प्रत्यक्षविषयाणामात्मानतिरिक्ताधिकरणकत्वमुपपाद्यते तैरेवावकाशस्यापि तथात्वं साध्यते । सकलपदार्थान्तरसंबन्धशून्यस्वाश्रितावकाशस्याभेद्यभेदज्ञानापरपर्यायं धृतिज्ञानं न भवतीत्यपि शुद्धधियां स्पष्टमेव । तादृशाभेद्यभेदज्ञानजननस्यैवासंभवात् । चलतां स्वशरीरावयवादीनामव्याहतगत्यनुभव एव चावकाशस्तदवरोधानुभवश्च पिण्ड इत्यभिधीयते । गत्यवरोधतारतम्यं चावकाशशुद्धितारतम्यतुल्ययोगक्षेमम् । बहुत्र मया प्रयुक्तेन शुद्धावकाश इति पदेन न क्वापि पिण्डविशेषाविशेषितो गतिज्ञानापूर्वको वा ज्ञानविशेषोऽभिप्रेयते । यावदसमस्तं संज्ञावाचकं पदं कांचनैकां ज्ञानान्तरामिश्रां ज्ञानव्यक्तिं बोधयतीति लोकप्रसिद्धं मतं त्वयुक्तमेव । तस्यानेकदोषमूलत्वात् । एकां पुंव्यक्तिं विहाय सकलजगन्नाशसंभावनायामपि शुद्धावकाशोऽस्माकं प्रसिद्ध्येदेव । तच्छरीरावयवानां तदाप्यनवरुद्धगतेः संभवात् । तस्या अपि व्यक्तेर्विनाशकल्पनायां तु गतेरसत्त्वादवकाशो न प्रसिद्ध्येत् । केचन चक्षुषैव शुद्धावकाशो गृह्यत इति जातु मन्येरन् परंतु स्थलान्तरोक्तव्याख्यानरीत्या दूरत्वावकाशादिज्ञानस्य तादृशेन्द्रियाग्राह्यत्वमेव पर्यवस्यति । विस्तरस्त्वस्मत्कृतदृङ्निर्णयप्रपाठके द्रष्टव्यः ॥

११७—इत्थं गत्यादिनिरपेक्षविशुद्धावकाशस्यैव प्रत्याख्यानेन तत्स्वभावविषयकाः सर्वे विवादा आक्षेपाश्च व्युदस्ताः । अन्यथा किंस्विद्विशुद्धावकाश एव ईश्वर आहोस्विदीश्वरातिरिक्तमपि किंचिदनाद्यनन्तमनन्तविभागयोग्यमपरिणामि शाश्वतं चास्तीत्युभयोः पक्षयोरन्यतरो दुर्निवारः स्यात् । यथोक्तव्याख्यानानुसारतस्तु तयोर्दुष्टत्वं बाधितत्वं च सूपपादमितिन तत्संभवः । नाल्पे ब्रह्मविद्यायां सुनिष्णाताः परमार्थविदोऽध्यात्मविदश्चाऽवकाशस्य प्रध्वंसमवधिं वाऽशक्यकल्पनं मन्यमानाः शुद्धावकाश ईश्वरांश एवेति निर्णययांचक्रुः । कतिपयेऽर्वाचीनसूरयोऽप्यनिर्वचनीयानामैशगुणानामेतेन विशेषतः साक्ष्यं प्रदर्शयितुं बद्धपरिकराः सन्ति । तदेतन्मतं परमार्थतो नितान्तं गर्ह्यमपि यावच्चिरंतना लोकस्वीकृताः सिद्धान्ता न परिह्रियेरंस्तदवधि परिहर्तुं नैव शक्येतेति ध्येयमित्यलं पदार्थविज्ञानशास्त्रविषयालोडनेन ॥

११८—अथ विचारपर्यवसायिशास्त्रस्य गणितशास्त्रं नाम शाखान्तरं विजिज्ञास्यते । यथेष्टमस्य शास्त्रस्य निर्दुष्टसुस्पष्टोपपत्तिविषये शास्त्रान्तराण्यपेक्ष्याऽभ्यर्हितत्वेपि तन्मूलसिद्धान्तेषु लौकिकजनसाधारणो गाणितिकानां प्रच्छन्नो भ्रम उपलभ्येत चेत्तस्य सर्वात्मना निर्दुष्टत्वं न सिद्ध्येत् । यद्यपि गणितशास्त्रीयाः प्रतिज्ञा दृढतरप्रमाणसिद्धा विद्यन्ते तथापि तन्मूलसिद्धान्ताः पदार्थपरिमाणानुसारेणैव नियम्यन्ते ॥ इति

* अत्रोत्कृष्टः परीक्षाप्रकारोऽपि तस्मिन् ग्रन्थे इत्थं प्रतिपाद्यते । किमपि पात्रं रज्ज्वा गले बध्वाऽधस्तादवलम्ब्यताम् । तस्या रज्ज्वाः परिवर्तमस्तब्धत्वं यावत्तत्पात्रं दक्षिणेन परिवर्त्यताम् । ततश्च तत् स्थिरं संधार्य तस्मिन् जलं क्षिप्यताम् । पश्चात् तज्जलपूर्णं पात्रं वामतः परिवर्तितुमुन्मुच्यताम् । एवं स्थिते पात्रस्थं जलं यावत् पात्रसंघर्षणप्रेरितं न स्यात्तावत्तैव परिवर्त्स्यते । तात्कालिकं जलस्थैर्यं तु तत्रैकं काष्ठखण्डं संतरीतुं प्रक्षिप्य निर्णेयितेति ॥

संभवद्दोषाणामपि सकलशास्त्रान्तरनियामकानां तादृशमूलसिद्धान्तानां याथार्थ्यं निर्णेतुं न कदापि गाणितिका व्यवस्यन्ति । तेन च तत्रस्था दोषा गणितादिसकलशास्त्रेषु प्रसरन्ति । गणिताचार्यैर्व्यवस्थापितानां सिद्धान्तान्तराणां तद्वारकानुमानानां च निर्दुष्टत्वाविवदनं यत्त्वे तु नापलपामः किन्त्विदमेव कथयामो यदस्मिन् गणितशास्त्रे सामान्यतो निखिलशास्त्रोपयोगितया विशिष्य कण्ठरवेण क्वाप्यनुक्तैरपि सर्वत्र शास्त्रप्रक्रियायामविशेषेणाश्रीयमाणैः कतिपयैरलक्षितदोषैः साधारणनियमैः सर्वे गणितभेदा विदूष्यन्ते । एवंच न केवलमितरजना एवापितु गाणितिका अपि साधारणाभेदाभेदज्ञानसिद्धान्तादात्मेतराधिकरणसिद्धान्ताच्च प्रादुर्भवतो दोषान् भजन्ते ॥

११९—व्यक्तगणितविषयो हि संख्याभेदाभेदज्ञानात्मक एव मन्यते । नाप्यङ्कानां परस्परस्थानसंबन्धस्य तद्धर्माणां च सम्यग्ज्ञानं क्षुद्रोविचारांशोमन्यते । साधारणगुणबोधकत्वसिद्धान्तवशादेव संख्यां विख्यातसूक्ष्मधियोपि विपश्चितोविचारार्हां मन्यते । अत एव ते संख्याविषयकविचारान् क्षुद्रतमान् लोकव्यवहारे सर्वथानुपयुक्तान् विनोदमात्रफलकानपि गुर्वर्थान् परमोपयोगिनश्च चिन्तयन्ति । किंच तादृशाभेदाभेदज्ञानसिद्धान्तेनानेकजनमनांसि तथा व्यकारिषत यथा तद्विद्वोजनाः परमनिगूढानि संख्यातत्त्वान्यध्यगच्छामेति विभावयन्ते तद्वारा प्राकृतिकविषयांश्चोपपादयितुं प्रयतन्ते । स्वानुभवावेक्षणपुरस्सरमुक्तयन्यपर्यालोचनया तु सर्वस्यास्यसाधारणज्ञानसिद्धान्तविषयकाकाण्डताण्डवस्य संख्याश्रिताखिलकल्पनानां च निस्सारत्वदुर्ज्ञेयत्वे व्यावहारिकप्रयोजनशून्यत्वं च स्पष्टमवगम्येरन् ॥

१२०—उपोद्घातप्रकरणे त्रयोदशपरिच्छेदे च प्रतिपादितेभ्यो हेतुभ्यः केवलं शुद्धैकत्वज्ञानं न संभवतीति तावत् स्पष्टम् । संख्यायाश्चैकत्वसमष्टिव्यष्ट्यात्मकत्वाच्छुद्धैकत्वज्ञानस्यासंभवे संख्यासंज्ञाचिन्हादीनां साधारणज्ञानबोधकत्वं दुर्घटमेव । तथाच गणितशास्त्रविषया यदि तादृशसंज्ञाचिन्हादिभ्यः संख्येयविषयेभ्यः सकललौकिकव्यवहारेभ्यश्च पृथक् क्रियेरंस्तर्हि तादृशशास्त्रस्य निर्विषयतैवापद्येत । इत्थंच गणितशास्त्रमत्यन्तलोकव्यवहारोपयोग्यपि कल्पनामात्रविषयकत्वदशायां कथं क्षुद्रं निस्सारं च संपद्येत इत्युदारधियः परामृशन्तु ।

१२१—अभेदाभेदज्ञानसिद्धान्तसत्यसंकाशतावञ्चितानां निर्णेकगाणितप्रतिज्ञाविमर्शं कालमपयापयतां कतिपयजनानां संभवाद्यद्यहं तादृशमताभिमानस्यासामञ्जस्यं निर्मूलत्वं च गाढतरं परीक्षेय स्पष्टतरं प्रदर्शयेय च बुधेभ्यस्तर्हि न कोप्येतदसाधु मन्येत । परंत्वेतन्मच्चिकीर्षितं गणितशास्त्रमौलिकावस्थाक्रमस्य तादृशशास्त्राभ्यासे प्राथमिकजनप्रवृत्तिनिमित्तस्य शास्त्रोद्देश्यविषयकपूर्वापरकल्पनाविरोधस्य च प्रदर्शनादृते न सेत्स्यतीति गणितशास्त्रारम्भक्रमादिकमेव तावद्विलप्यते । तत्रेदमनुमीयते यदादौ जनाःस्मृत्युपकाराय गणनासौकर्याय वा केवलं रेखाबिन्द्वादिकं गणनासाधनं प्रायुञ्जत । एकैकया रेखया बिन्दुना वा तत्तदेकैकजिगणयिषितपदार्थव्यक्तिमभिप्रेयुः । दिनेषु गच्छत्सु चानेकरेखाबिन्द्वादीनां प्रसङ्गे वर्णविशेषप्रयोगात्मकं संक्षिप्ततरं गणनाप्रकारमुपलेभिरे । अन्ततश्च यवनदेशीयो भारतवर्षीयो वा संख्यालेखनप्रकारः प्रादुर्बभूव । अस्मिन् प्रकारे हि स्वल्पानां वर्णानामङ्कानां वा [समानपङ्क्तौ] भूयो भूयो लेखनेन तत्तत्स्थानविशेषसंबन्धानुसारतोऽर्थवैचित्र्यसंपत्तौ सर्वविधा संख्या योग्यतरं प्रकाशयितुं शक्यते । सोयं चरमः संख्यालेखनप्रकारः संख्यावाचकशब्दानुकरणेनैवासाधीति प्रतीयते । अङ्काङ्काभिधानयोर्मिथः सादृश्यस्य दर्शनात् । आदिमानां नवानां केवलसंख्याचिह्नानां केवलाभिराद्यनवसंख्यासंज्ञाभिरानुगुण्यात् । अङ्कस्थानविशेषाणां चाङ्कसंज्ञाविशेषार्थानुसारित्वात् । स्वरूपस्थानविशेषाश्रिताङ्कमूल्यानुसारेणैव च कस्मिंश्चपि निर्दिष्टाङ्कराशौ तद्घटकावयवेषु वा तादृशराशे राशिखण्डानां वा बोधने योग्यानां स्वस्वोचितस्थानस्थितानां तत्तदङ्कानां सम्यगनुसन्धानप्रकाराश्चाकल्पिषत । येन चेष्टाङ्कानां परिज्ञाने वाच्यवाचकयोः सादृश्यनियमं यथापूर्वमनुस्टत्यानायासेनैव तादृशा लिखिताङ्काः शब्दैरभिव्यञ्जयितुं शक्यन्ते । अयमेव चाङ्कपर्याप्तज्ञानप्रकारो नाम । कस्या अपि निर्दिष्टायाः पदार्थसंख्याया नामचिह्नसादृश्यनियमानुसारतस्तत्तत्स्थानज्ञानपूर्वकाङ्कज्ञानसंपत्त्यैव पर्याप्तज्ञानस्याभ्युपगमात् । यतस्स्थानसंबन्धज्ञानपूर्वकाङ्कज्ञान एव गणितप्रक्रियानुसारेण यत्किमपि राशिघटकाङ्कचिह्नानि यथावज्ज्ञातुं शक्यन्ते । एवंच संख्याचिह्नान्येव गणयन्तो वयं जिगणयिषितान्साक्षात् पदार्थानेव यथोचितं संकलयितुं व्यवकलयितुं समीकर्तुं च शक्नुमः । संख्येयसंख्याचिह्नयोरभेदात् । एकत्वादिविशिष्टानां वस्तूनां तदभिव्यञ्जकैकाद्यङ्काभेदेन विवक्षणाद्वा ॥

१२२—एवंच यद्यपि गणितशास्त्रे केवलमङ्काश्चिह्नान्येव वा विचार्यन्ते न पुनस्साक्षाद्वस्तूनि, तथापि तद्विचारा न तावदङ्कज्ञानाभिसन्धिना किंतु तद्द्वारा पदार्थसंख्यातारतम्यादिज्ञानसंपत्तय एवानुष्ठीयन्ते । अत्रोपोद्घातप्रकरणस्थोनविंशपरिच्छेदोक्तशब्दविषयकव्याख्यानरीत्या ज्ञानविशेषाबोधकानां संख्यावाचकपदानां ज्ञानसामान्यबोधकत्वमाशङ्क्येत । परंतु तत्परिहारप्रकारमत्र सविशेषं व्याख्यातुमनिच्छन्नप्यहं केवलमेतावदेव वच्मि यद् गणितशास्त्रे साधारणज्ञानोद्देश्यकत्वेनाभ्युपेताः प्रतिज्ञाः संख्याशब्दान् अङ्कान् वा विहाय न का-

Digitized by Google

नपि संख्येयविषयातिरिक्तपदार्थानुद्दिशन्ति । संख्याशब्दादयस्तु प्रथमतो गणितशास्त्रे जिगणयिषितवस्तुविशेषसूचनाभिसन्धिनैव प्रयोजिपतेत्युक्तमेव । एवं स्थितेऽङ्कानां तन्मात्रार्थाभ्यासो भाषाया मौलिकोपयोगोचितप्रयोगावुपेत्य केवलशब्दानां गुणदोषपरीक्षयोऽर्थनिरपेक्षशब्दकलहे वा कालमतिवाहयतः पुरुषविशेषस्ये द्वेश इवाऽसाधुफलकः स्यात् ।

१२३–अथाङ्कविचारोद्धं परिमाणं तावद्विमृश्यते । तत्र सम्बन्धिकं परिमाणमेव भूमितिशास्त्रस्य विषयः । सावधेः परिमाणविशेषस्य निरवधिविभागयोग्यत्वं नाम सिद्धान्तस्तु क्वापि तस्मिञ्छास्त्रे स्वतः सिद्धसिद्धान्तत्वेनापपाद्यसिद्धान्तत्वेन वा स्पष्टमसंकीर्तितोऽपि सर्वत्र तादृशशास्त्रप्रक्रियानिर्वाहायापेक्ष्यते । सकलैश्च गणितज्ञैर्यावद्भूमितिसिद्धान्तनित्यसहकारित्वेन निःशङ्कमुरीक्रियते । किंत्वायमेव सिद्धान्तः केवलकौतुकावहानि सकलजननित्यानुभवैस्साक्षाद्विप्रतिपन्नानि ज्ञानलवादुर्विदग्धैः पुम्भिर्वैरलमेव स्वीकृतानि भूमितेर्मतान्तराणीव गणितशास्त्रविस्तृतिकाठिन्यादिप्रयोजकाः सर्वाः परमातिसूक्ष्मकल्पनाः समूलयति । एवं च यदि वयं सावधिपरिमाणस्यानन्तविभागानर्हत्वं साधयितुं शक्नुयाम तर्हि भूमितिशास्त्रमध्यावधिमानवबुद्धिवैकल्यानुमापकेभ्यो बहुभ्यो विरोधेभ्यो ज्ञानसंकटेभ्यश्च सहसैव मुच्येत स्वल्पतराभ्याससाध्यं च स्यात् ॥

१२४–सर्वस्यापि ज्ञेयपरिमाणविशेषस्यात्मगतज्ञानविशेषात्मकत्वान्न तस्यांशतो ज्ञानं संभवति किंतु पर्याप्त्यैव । तथाच परिमाणविशेषस्यावयवानन्त्यं साक्षान्नोपलभ्येत चेत्तर्हि तस्यानन्तावयवघटितत्वमनुमीयत एव । नचोपलभ्यन्ते परीक्षया कस्यापि प्रत्यक्षोपलब्धस्य रेखाविशेषस्य पिण्डविशेषस्य फलकविशेषस्य वाऽनन्ता अवयवा इति तादृशरेखादीनामनन्तावयवघटितत्वाभावः स्पष्ट एव । सर्वेषां ज्ञेयपरिमाणविशेषाणामात्मगतज्ञानानतिरिक्तत्वस्यैव निर्णीतत्वात् । ज्ञानविशेषाणां त्वनन्तविभागयोग्यत्वासंभवात् । परिमाणपदेन ज्ञानातिरिक्तमेव किंचिद्विवक्ष्येत चेत्तस्य दुर्ज्ञानत्वान्न किमपि तद्विषये विधातुं निषेद्धुं वा शक्येत । परिमाणविभागादिपदैस्तत्तदाशुज्ञेयज्ञानांन्येव संविवक्ष्य तेषामनन्तखण्डकत्वे त्वनुभवविरोधः । न कोपि विवेकशालीजन एतन्मतम् अभिनवोपात्तखीष्टधर्मः पुरुषविशेषः ख्रीष्टपुस्तकोक्तम् अपूपमद्यपरिवर्तनादिलक्षितभोजनसंस्कारसिद्धान्तमिव शनैःशनैस्तत्र तद्विश्वासोत्पादनमन्तरा संमंस्यते । अत्रेदं बोध्यम् । प्रायो मूलनियमाः कतिपयैर्बुद्धमूलैः प्राचीनार्वाचीनैर्विदूष्यन्ते । सङ्कलल्लब्धयथार्थनियमसंमानास्तथाविकृता अपि ते तदूहितनियमान्तराणि च सर्वविधपरीक्षानिर्मुक्तानीव मन्यन्ते । अयमेव च मनुष्यबुद्धिविपर्ययस्य क्रमः ॥

केशवशास्त्री

SARVA-DARSANA-SANGRAHA

CHAPTER IV.

THE RÁMÁNUJA SYSTEM.

(Continued from page 72.)

Let then (the Sānkaras may contend) the form of cognition evidentiary of illusion, which is under disputation, be inference; a cognition that has for its antecedent another entity, an entity different from mere prior non-existence of knowledge, which envelopes the objects of knowledge, which is terminable by knowledge, which occupies the place of knowledge, inasmuch as it (the cognition) illuminates an object not before illuminated, like the light of a lamp springing up for the first time in the darkness. This argument (we reply) will not stand grinding (in the dialectic mill); for to prove the (antecedent) illusion you will require an ulterior illusion which you do not admit, and a violation of your own tenets will ensue, while if you do not so prove it, it may or may not exist; and moreover the example is incompatible with the argument, for it cannot be the lamp that illumines the hitherto unillumined object, since it is knowledge only that illumines; and an illumination of objects may be effected by knowledge even without the lamp, while the light of the lamp is only ancillary to the visual organ which effectuates the cognition, ancillary mediately through the dispulsion of the obstruent darkness. We dismiss further prolixity.

The counterposition (of the Rámánujas) is as follows. The illusion under dispute resides in knowledge only, because it is an illusion, like the illusion about nacre &c. If any one ask: Has the self-conscious entity that underlies the illusion about nacre, &c. knowledge only for its nature? they rep'y: Do not start such difficulties; for we suppose that consciousness by its bare existence has the nature of creating conformity to the usage

॥ सर्वदर्शनसङ्ग्रहः ॥

अस्तु तर्ह्यनुमानं विवादास्पदं प्रमाणज्ञानं स्वप्रागभावव्यतिरिक्तस्वविषयावरणस्वनिवर्त्यस्वदेशगतवस्त्वन्तरपूर्वकम् अप्रकाशितार्थप्रकाशकत्वात् अन्धकारे प्रथमोत्पन्नप्रदीपप्रभावदिति तदपि न क्षोदक्षमम् अज्ञानेऽप्यनभिमताज्ञानान्तरसाधने अपसिद्धान्तापातात् तदसाधने अनैकान्तिकत्वात् दृष्टान्तस्य साधनविकलत्वाच्च न हि प्रदीपप्रभाया अप्रकाशितार्थप्रकाशकत्वं सम्भवति ज्ञानस्यैव प्रकाशकत्वात् सत्यपि प्रदीपे ज्ञानेन विषयप्रकाशसम्भवात् प्रदीपप्रभायास्तु चक्षुरिन्द्रियस्य ज्ञानं समुत्पादयतो विरोधिसन्तमसनिरसनद्वारेणोपकारकत्वमात्रमेवेत्यलमतिविस्तरेण ।

प्रतिप्रयोगश्च विवादाध्यासितमज्ञानं न ज्ञानमात्रब्रह्माश्रितं अज्ञानत्वाच्छुक्तिकाद्यज्ञानवदिति । ननु शुक्तिकाद्यज्ञानस्याश्रयस्य प्रत्यगर्थस्य ज्ञानमात्रस्वभावत्वमेवेति चेन्मैवं

about (*i. e.* name and notion of) some object; and such consciousness, also called knowledge, apprehension, comprehension, intelligence, &c., constitutes the soul, or knowledge, of that which acts and knows. If any one ask How can the soul if it consists of cognition, have cognition as a quality? they reply: This question is futile; for as a gem, the sun, and other luminous things, existing in the form of light, are substances in which light as a quality inheres—for light as existing elsewhere than in its usual receptacle, and as being a mode of things though a substance, is still styled and accounted a quality derived from determination by that substance,—so this soul, while it exists as a self-luminous intelligence, has also intelligence as its quality. Accordingly the Vedic texts: A lump of salt is always within and without one entire mass of taste, so also this soul is within and without an entire mass of knowledge; Herein this person is itself a light; Of the knowledge of that which knows there is no suspension; He who knows, smells this; and so also This is the soul which consisting of knowledge, is the light within the heart; For this person is the seer, the hearer, the taster, the smeller, the thinker, the understander, the doer; Knowledge is soul the person, and the like texts.

It is not to be supposed that the Veda also affords evidence of the existence of the cosmical illusion, in the text Enveloped in untruth *(anṛita)*; for the word untruth *(anṛita)* denotes that which is other than truth *(ṛita)*. The word *ṛita* has a passive sense, as appears from the words Drinking *ṛita*. *Ṛita* means works done without desire of fruit; the reward for the attainment of which is the propitiation of the Supreme Spirit. In the text in question untruth *(anṛita)* designates the scanty fruit enjoyed during transmigratory existence, as opposed to that (which results in propitiation of the Supreme Spirit); which temporal fruit is obstructive to the attainment of supreme existence *(brahman)*; the entire text (when the context is supplied) being: They who find not this supreme sphere *(brahma-loka)* are enveloped in untruth. In such texts, again, as Let him know illusion *(māyā)* to be the primary emanative cause *(prakṛiti)*, the term *(māyā)* designates the emanative cause consisting of the three 'cords' *(guṇa)*, and creative of the diversified universe. It does not designate the inexplicable illusion (for which the Sāṅkaras contend).

In such passages as, By him, the defender of the body of the child, moving rapidly, the thousand illusions *(māyā)* of the barbarian were swooped upon as by a hawk, we observe that the word illusion *(māyā)* designates the really existent weapon of a Titan capable of projective diversified creation. The Veda, then, never sets out an inexplicable illusion. Nor (is the cosmical illusion to be inferred from the 'grand text' That art thou), inasmuch as the words That art thou, being incompetent to teach unity, and indicating a conditionate Supreme Spirit we cannot understand by them the essential unity of the mutually exclusive supreme and individual spirits; for such a supposition (as that they are identical) would violate the law of excluded middle. To explain this. The term That denotes the Supreme Spirit exempt from all imperfections, of illimitable excellence, a repository of innumerable auspicious attributes, to whom the emanation, sustentation, retractation of the universe is a pastime;* such being the Supreme Spirit spoken of in such texts as That desired, let me be many, let me bring forth. Perhaps the word Thou, referring to the same object (as the word That) denotes the Supreme Spirit characterised by consciousness, having all individual spirits as his body; for a 'reference to the

* Cf the dictum of Herakleitus: Making worlds is Zeus's pastime; and that of Plato (Laws, Book, VII., p. 803): Man is made to be the plaything of God.

शङ्किष्ठाः अनुभूतिर्हि स्वसद्भावेनैव कस्यचिद्वस्तुनो व्यवहारानुगुण्यापादकस्वभावा ज्ञानावगतिसंविदाद्यपरनामा सकर्म्मकानुभवितुरात्मनो ज्ञानत्वमित्याश्रयणात् । ननु ज्ञानरूपस्यात्मनः कथं ज्ञानगुणकत्वमिति चेत्तदसारं यथा हि मणिद्युमणिप्रभृति तेजोद्रव्यं प्रभावद्रूपेणावतिष्ठमानं प्रभारूपगुणाश्रयः, स्वाश्रयादन्यत्रापि वर्त्तमानत्वेन रूपत्वेन च प्रभा द्रव्यरूपापि तच्छेषत्वनिबन्धनगुणव्यवहारा एवमयमात्मा स्वप्रकाशचिद्रूप एव चैतन्यगुणः । तथा च श्रुतिः सदा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एव एवं वा अरे अयमात्मानन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एव अत्रायं पुरुषः स्वयं ज्योतिर्भवति न विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते अथ यो वेदेदं जिघ्राति शृणोति स आत्मा योयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुष एष हि द्रष्टा श्रोता रसयिता घ्राता मन्ता बोद्धा कर्त्ता विज्ञानात्मा पुरुष इत्यादिका । न चानृतेन हि प्रत्यूढा इति श्रुतिरपि विद्यापक्षे प्रमाणमित्याश्रयितुं शक्यं ऋतेतरविषयो ह्यनृतशब्दः ऋतशब्दश्च कर्म्मवचनः ऋतं पिबन्ताविति वचनात् ऋतं कर्म्म फलाभिसन्धिरहितं परमपुरुषाराधनवेषं तत्प्राप्तिफलम् । अत्र तद्व्यतिरिक्तं सांसारिकाल्पफलं कर्म्मानृतं ब्रह्मप्राप्तिविरोधि स एतं ब्रह्मलोकं न विन्दन्ति अनृतेन हि प्रत्यूढा इति वचनात् । मायान्तु प्रकृतिं विद्यादित्यादौ मायाशब्दो विचित्रार्थसर्गकरत्रिगुणात्मकप्रकृत्यभिधायको नानिर्व्वचनीयाज्ञानवचनः ।

तेन मायासहस्रं तच्छम्बरस्याशुगामिना ।
बालस्य रक्षता देहमेकैकं शो निसूदितम् ॥

इत्यादौ विचित्रार्थसर्गसमर्थस्य पारमार्थिकस्यैवासुरास्त्रविशेषस्यैव मायाशब्दाभिधेयत्वोपलम्भात् अतो न कदाचिदपि श्रुत्यानिर्व्वचनीयाज्ञानप्रतिपादनं नाप्यैक्योपदेशानुप-

Digitized by Google

same object' designates one thing determined by two modes. Here perhaps an Advaita-vādin may reply: Why may not the purport of the reference to the same object in the words That art thou be undifferenced essence, the unity of souls, these words (That and thou) having a (reciprocally) implicate power by abandonment of opposite portions of their meaning; as is the case in the phrase This is that Deva-datta. In the words This is that Deva-datta, we understand by the word That a person in relation to a different time and place, and by the word This a person in relation to the present time and place. That both are one and the same is understood by the form of predication ('reference to the same object'). Now as one and the same thing cannot at the same time be known as in different times and places, the two words (This and That) must refer to the essence (and not to the accidents of time and place), and unity of essence can be understood. Similarly in the text That art thou, there is implicated an indivisible essence, by abandonment of the contradictory portions (of the denotation), viz. finite cognition (which belongs to the individual soul or Thou), and infinite cognition (which belongs to the real or unindividual soul). This suggestion (the Rāmānujas reply) is unsatisfactory, for there is no opposition (between This and That) in the example (This is that Deva-datta), and consequently not the smallest particle of 'implication' (both This and That being used in their denotative capacity). The connection of one object with two (places and) times past and present involves no contradiction. And any contradiction supposed to arise from relation to different places, may be avoided in the same manner as the contradiction supposed to arrise from difference of time, the existence in the former place being the same existence as that in the present place. Even if we concede to you the 'implication,' the (supposed) contradiction being avoidable by supposing one term (either That or Thou) to be implicative, it is unnecessary to admit that both words are implicative. Otherwise (if we admit that both words are implicative) if it be granted the that one thing may be recognised, with the concomitant assurance that it differs as this and as that, permanence in things will be inadmissible, and the Buddhist assertor of a momentary flux of things will be triumphant.

We have therefore (the Rāmānujas continue) laid it down in this question that there is no contradiction in the identity of the individual and the Supreme Spirit, the individual spirits being the body and the Supreme Spirit the soul. For the individual spirit as the body, and therefore a form, of the Supreme Spirit, is identical with the Supreme Spirit, according to another text Who abiding in the soul, is the controller of the soul, who knows the soul, of whom soul is the body.

Your statement of the matter, therefore, is too narrow. ALL words are designatory of the Supreme Spirit. They are not all synonymous, a variety of media being possible; thus as bodies of individual spirits, all systems divine, human, whatsoever, the forms (of such bodies), all things are identical with Supreme Spirit. Hence:

God, Man, Yaksha, Pisácha, Serpent, Rákshasa, Bird, tree, creeper, wood, stone, grass, jar, cloth,—these and all other words, be they what they may, which are current among mankind as denotative by means of their base and its suffixes, as denoting those things, in denoting things of this or that apparent constitution, really denote the individual soul which assumed to them such body, and the whole complexus of things terminating in the Supreme Spirit ruling within. That God and all other words whatsoever ultimately denote the Supreme Spirit is stated in the fourth section of the Tattvamuktávalī:—

यस्या तत्त्वं पदयोः सविशेषब्रह्माभिधेयत्वेन विरुद्धयोर्जीवपरयोः स्वरूपैक्यस्य प्रतिपत्तुमशक्यतया अर्थापत्तेरनुदयदोषदूषितत्वात् । तथा हि तत्पदं निरस्तसमस्तदोषमनवधिकातिशयासङ्ख्येयकल्याणगुणास्पदं जगदुदयविभवलयलीलं ब्रह्म प्रतिपादयति तदैक्षत बहु स्यां प्रजायेयेत्यादिषु तस्यैव प्रकृतत्वात् समानाधिकरणं त्वंपदं च चिद्विशिष्टं जीवशरीरं ब्रह्माचष्टे प्रकारद्वयविशिष्टैकवस्तुपरत्वात् सामानाधिकरण्यस्य । ननु सोऽयं देवदत्त इतिवत् तत्त्वमितिपदयोर्विरुद्धभागत्यागलक्षणयोर्निर्विशेषस्वरूपमात्मैक्यं सामानाधिकरण्यार्थः किं न स्यात् यथा सोऽयमित्यत्र तच्छब्देन देशान्तरकालान्तरसम्बन्धी पुरुषः प्रतीयते इदंशब्देन च सन्निहितदेशवर्त्तमानकालसम्बन्धी तयोः सामानाधिकरण्येनैक्यमवगम्यते तत्रैकस्य युगपद्विरुद्धदेशकालप्रतीतिर्न सम्भवतीति द्वयोरपि पदयोः स्वरूपपरत्वे स्वरूपस्य चैक्यं प्रतिपत्तुं शक्यमेवमत्रापि किञ्चिज्ज्ञत्वसर्वज्ञत्वादिविरुद्धांशप्रहाणेनाखण्डस्वरूपं लक्ष्यत इति चेत् विषमोऽयमुपन्यासः । दृष्टान्तेऽपि विरोधवैधुर्येण लक्षणागन्धासम्भवादेकस्य तावद् भूतवर्त्तमानकालद्वयसम्बन्धो न विरुद्धः । देशान्तरस्थितिर्भूता सन्निहितदेशस्थितिर्वर्त्तत इति देशभेदसम्बन्धविरोधश्च कालभेदेन परिहरणीयः । लक्षणापक्षेऽप्येकस्यैव पदस्य लक्षकत्वाश्रयणेन विरोधपरिहारे पदद्वयस्य लाक्षणिकत्वस्वीकारो न सङ्गच्छते । इतरथा एकस्य वस्तुनस्तत्तेदन्ताविशिष्टत्वावगाहनेन प्रत्यभिज्ञायाः प्रामाण्यानङ्गीकारे स्थायित्वासिद्धौ क्षणभङ्गवादी बौद्धो विजयेत, एवमत्रापि जीवपरमात्मनोः शरीरात्मभावेन तादात्म्यं न विरुद्धमिति प्रतिपादितं जीवात्मा हि ब्रह्मणः शरीरतया प्रकारत्वात् ब्रह्मात्मकः, य आत्मनि तिष्ठन्नात्मनोऽन्तरः य आत्मानं वेद यस्यात्मा शरीरम् इति श्रुत्यन्तरादत्यल्पमि

God and all other words designate the soul, none else than That, called the established entity,
Of this there is much significant and undoubted exemplification in common speech and in the Veda;
Existence when dissociated from spirit is unknown; in the form of gods, mortals, and the rest
When pervading the individual spirit, the infinite, has made a diversity of names and forms in the world.

In these words the author setting forth that all words God, and the rest, designate the body, and showing in the words No unity in systems &c. the characteristic of body, and showing in the words By words which are substitutes for the essences of things, &c. that it is established that nothing is different from the universal Lord, lays down in the verses Significant, &c. that all words ultimately designate the Supreme Spirit. All this may be ascertained from that work. The same matter has been enforced by Rāmānuja in the Vedārtha-saṅgraha, when analysing the Vedic text about names and forms.

Moreover every form of evidence having some determinate object, there can be no evidence of an undetermined (unconditionate) reality. Even in non-discriminative perception it is a determinate (or conditioned,) thing that is cognised. Else in discriminative perception there could not be shown to be a cognition characterised by an already presented form. Again that text That art thou is not sublative of the universe, as rooted in illusion, like a sentence declaratory that what was illusorily presented as a snake is a piece of rope; nor does knowledge of the unity of the absolute and the soul bring (this illusory universe) to an end; for we have already demonstrated that there is no proof of these positions.

Nor is there an absurdity (as the Sāṅkaras would say) on the hypothesis enunciatory of the reality 'of the universe, in affirming that by a cognition of one there is a cognition of all things: for it is easily evinced that the mundane egg consisting of the primary emanative cause, intellect, self-position, the rudimentary elements, the gross elements, the organs (of sense and of action) and the fourteen worlds, and the gods, animals, men, immovable things and so forth that exist within it, constituting a complex of all forms, is all an effect, and that from the single cognition of absolute spirit as its (emanative), cause when we recognise that all this is absolute spirit (there being a tautology between cause and effect), there arises cognition of all things, and thus by cognition of one cognition of all. Besides, if all else than absolute spirit were unreal, then all being non-existent, it would follow that by one cognition all cognition would be sublated.

A.E.G.

त्वमुच्यते सर्व्वे शब्दाः परमात्मन एव वाचकाः । न च पर्य्यायत्वं द्वारभेदसम्भवात् तथाहि जीवस्य शरीरतया प्रकारभूतानि देवमनुष्यादिसंस्थानानीव सर्व्वाणिवस्तूनीति ब्रह्मात्मकानि तानि सर्व्वाणि ग्रतो,

देवो मनुष्यो यक्षो वा पिशाचोरगराक्षसाः ।
पक्षी वृक्षो लता काष्ठं शिला तृणं घटः पटः ॥

इत्यादयः सर्व्वे शब्दाः प्रकृतिप्रत्यययोगेनाभिधायकतया प्रसिद्धा लोके तद्वाच्यतया प्रतीयमानतत्तत्संस्थानवद्वस्तुमुखेन तदभिमानिजीवतदन्तर्यामिपरमात्मपर्य्यन्तसंस्थानस्य वाचकाः । देवादिशब्दानां परमात्मपर्य्यन्तत्वमुक्तं तत्त्वमुक्तावल्यां चतुरन्तरे च ।

जीवंदेवादिशब्दो वदति तदपृथक् सिद्धभावाभिधानं
निष्कर्षाकूतयुक्तो बहुरिह च दृढो लोकवेदप्रयोगः ।
ग्रात्मासम्बन्धकाले स्थितिरनवगता देवमर्त्यादिमूर्त्ते-
र्जीवात्मानुप्रवेशाज्जगति विभुरपि व्याकरोन्नामरूपे ॥

इत्यनेन देवादिशब्दानां शरीरपर्य्यन्तत्वं प्रतिपाद्य संस्थानैक्याद्यभाव इत्यादिना शरीरलक्षणं दर्शयित्वा शब्दैस्तत्त्वस्वरूपप्रतिकृतिभिरित्यादिना विश्वेश्वरादपृथक् सिद्धत्वमुपपाद्य निष्कर्षाकूतेत्यादिना पद्येन सर्व्वेषां शब्दानां परमात्मपर्य्यन्तत्वं प्रतिपादितं तत् सर्व्वं तत एवावधार्य्यम् । ग्रयमेवार्थः समर्थितो वेदार्थसंग्रहे नामरूपश्रुतिव्याकरणसमये रामानुजेन ।

किञ्च सर्व्वप्रमाणस्य सविशेषविषयतया निर्विशेषवस्तुनि न किमपि प्रमाणं समस्ति निर्विकल्पकप्रत्यक्षेऽपि सविशेषमेव वस्तु प्रतीयते । ग्रन्यथा सविकल्पके सोऽयमिति पूर्व्वप्रतिपन्नप्रकारविशिष्टप्रतीत्यनुपपत्तेः किञ्च तत्त्वमस्यादिवाक्यं न प्रपञ्चस्य बाधकं भ्रान्तिमूलकत्वात् भ्रान्तिप्रयुक्तरज्जुसर्पवाक्यवत् नापि ब्रह्मात्मैक्यज्ञानं निवर्त्तकं तत्र प्रमाणाभावस्य प्रागेवोपपादनात् । न च प्रपञ्चस्य सत्यत्वप्रतिष्ठापनपक्षे एकविज्ञानेन सर्व्वविज्ञानप्रतिज्ञाव्याकोपः प्रकृतिपुरुषमहदहङ्कारतन्मात्रभूतेन्द्रियचतुर्द्दशभुवनात्मकब्रह्माण्डतदन्तर्वर्त्तिदेवतिर्य्यङ्मनुष्यस्थावरादि सर्व्वप्रकारसंस्थानसंस्थितं कार्य्यमपि सर्व्वं ब्रह्मैवेतिकारणभूतब्रह्मात्मज्ञानादेव सर्व्वविज्ञानं भवतीत्येकविज्ञानेन सर्व्वविज्ञानस्योपपन्नतरत्वात् । ग्रपिच ब्रह्मव्यतिरिक्तस्य सर्व्वस्य मिथ्यात्वे सर्व्वस्यासत्त्वादेवैकविज्ञानेन सर्व्वविज्ञानं बाध्येत

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

Digitized by Google

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 113. Benares, October 1st, 1875. Vol. X.

काशिकायाः

॥ चतुर्थाध्यायस्य द्वितीयः पादः ॥

शेषे ॥ ९२ ॥

शेषइत्यधिकारोयम् । यानित ऊर्ध्वं प्रत्ययाननुक्रमिष्यामः, शेषेर्थे ते वेदितव्याः । उपयुक्तादन्यः शेषः । अपत्यादिभ्यश्चतुरर्थपर्यन्तेभ्योन्योर्थः शेषः, तस्येदं विशेषा ह्यपत्यसमूहादयस्तेषु घादयो मा भूवन्निति शेषाधिकारः क्रियते । किं च सर्वेषु जातादिषु घादयो यथा स्युरनन्तरेणैवार्थादेशेन संबन्धित्वेन कृतार्थता मा ज्ञायीति साकल्यार्थं शेषवचनम् । वक्ष्यति । राष्ट्रावारपाराद् घखौ । राष्ट्रियः । अवारपारीणः । शेषइति लक्षणं चाधिकारश्च । चक्षुषा गृह्यते, चाक्षुषं रूपम् । श्रावणः शब्दः * । दृषदि पिष्टाः, दार्षदाः सक्तवः । उलूखले क्षुण्णः, औलूखलो यावकः । अश्वैरुह्यते, आश्वो रथः । चतुर्भिरुह्यते, चातुरं शकटम् । चतुर्दश्यां दृश्यते, चातुर्दशं रक्ष इति ॥

राष्ट्रावारपाराद् घखौ ॥ ९३ ॥

राष्ट्र अवारपार इत्येताभ्यां यथासंख्यं घखावित्येतौ प्रत्ययौ भवतः । राष्ट्रियः । अवारपारीणः ॥ विगृहीतादपीष्यते ॥ अवारीणः । पारीणः ॥ विपरीताच्च ॥ पारावारीणः । प्रकृतिविशेषोपादानमात्रेण तावत्प्रत्यया विधीयन्ते । तेषां तु जातादयोर्थाः समर्थविभक्तयश्च पुरस्ताद्वक्ष्यन्ते ॥

* रासनो रसः । स्पार्शनः स्पर्शः । इत्येकस्मिन्पुस्तके ऽधिकम् ।

ग्रामाद्यखञौ ॥ ९४ ॥

ग्रामशब्दाद्य खञ् इत्येतौ प्रत्ययौ भवतः । ग्राम्यः । ग्रामीणः ॥

कत्त्र्यादिभ्यो ढकञ् ॥ ९५ ॥

कत्त्रि इत्येवमादिभ्यो ढकञ् प्रत्ययो भवति । कात्त्रेयकः । औम्भेयकः । कत्त्रि । उम्भि । पुष्कर । पुष्कल । मोदन । कुम्भी । कुण्डिन । नगर । वञ्जी । भक्ति । माहिष्मती । चर्मण्वती * । ग्राम । उख्या ॥ कुल्याया यलोपश्च ॥ कत्त्र्यादिः ॥

कुलकुक्षिग्रीवाभ्यः श्वास्यलङ्कारेषु ॥ ९६ ॥

कुलकुक्षिग्रीवाशब्देभ्यो यथासंख्यं श्वन् असि अलंकार इत्येतेषु जातादिष्वर्थेषु ढकञ् प्रत्ययो भवति । कौलेयको भवति श्वा चेत् । कौलोन्यः । कौक्षेयको भवत्यसिश्चेत् । कौक्षोन्यः । ग्रैवेयको भवत्यलंकारश्चेत् । ग्रैवोन्यः ॥

नद्यादिभ्यो ढक् ॥ ९७ ॥

नदी इत्येवमादिभ्यो ढक् प्रत्ययो भवति । नादेयम् । माहेयम् । पूर्वनगरीशब्दोत्र पठ्यते । पौर्वनगरेयम् । के चित्तु पूर्वनगिरीति पठन्ति, विच्छिद्य च प्रत्ययं कुर्वन्ति । पौरेयम् । वानेयम् । गैरेयमिति । तदुभयमपि दर्शनं प्रमाणम् । नदी । मही । वाराणसी । श्रावस्ती । कौशाम्बी । नवकौशाम्बी । काशफरी । खादिरी । पूर्वनगरी । पावा । मावा । साल्वा । दार्वा । दाल्वा । वासेनकी ॥ वडवाया वृषे ॥

* चर्मती । इति पा० २

Digitized by Google

दक्षिणापश्चात्पुरसस्त्यक् ॥ ९८ ॥

दक्षिणा पश्चात् पुरस् इत्येतेभ्यस्त्यक् प्रत्ययो भवति शैषिकः। दाक्षिणात्यः। पाश्चात्यः। पौरस्त्यः॥

कापिश्याः ष्फक् ॥ ९९ ॥

कापिशीशब्दात् ष्फक् प्रत्ययो भवति शैषिकः। षकारो ङीषर्थः। कापिशायनं मधु। कापिशायनी द्राक्षा॥ बाह्ल्युर्दिपर्द्दिभ्यश्चेति वक्तव्यम् ॥ * ॥ बाह्लायनी। और्द्दायनी। पार्द्दायनी॥

रङ्कोरमनुष्येऽण् च ॥ १०० ॥

रङ्कुशब्दादण् प्रत्ययो भवति, चकारात्ष्फक्च शैषिकोऽमनुष्येऽभिधेये। राङ्कवो गौः। शङ्कवायणो गौः। अमनुष्य इति किम्। राङ्कवको मनुष्यः। ननु च रङ्कुशब्दः कच्छादिषु पठते, तत्र च मनुष्यतत्स्थयोर्वुञिति मनुष्ये परत्वाद्वुञेव भवितव्यं, कच्छादिपाठादमनुष्येऽणपि सिद्धः, किमिह मनुष्यप्रतिषेधेनाण्ग्रहणेन च। तदुच्यते। नैवायं मनुष्यप्रतिषेधः किं तर्हि नञिवयुक्तन्यायेन मनुष्यसदृशे प्राणिनि प्रतिपत्तिः क्रियते। राङ्कवः कम्बल इति ष्फग् न भवति। विशेषविहितेन च ष्फकाऽणो बाधा मा भूदित्यण्ग्रहणमपि क्रियते॥

द्युप्रागपागुदक्प्रतीचो यत् ॥ १०१ ॥

दिव् प्राच् अपाच् उदच् प्रत्यच् इत्येतेभ्यो यत्प्रत्ययो भवति शैषिकः। दिव्यम्। प्राच्यम्। अपाच्यम्। उदीच्यम्। प्रतीच्यम्। अव्ययात्तु कालवाचिनः परत्वात् ट्युट्युलौ भवतः। प्राक्तनम्॥

कन्थायाष्ठक् ॥ १०२ ॥

कन्थाशब्दाट्ठक् प्रत्ययो भवति शैषिकः। कान्थिकः॥

वर्णौ वुक् ॥ १०३ ॥

कन्थाया इत्येव। वर्णौ या कन्था तस्या वुक् प्रत्ययो भवति शैषिकः। ठकोऽपवादः। वर्णुर्नाम नदस्तत्समीपो देशो वर्णुः। तद्विषयार्थवाचिनः कन्थाशब्दादयं प्रत्ययः। तथाहि जातं हिमवत्सु कान्थकम्॥

अव्ययात्त्यप् ॥ १०४ ॥

अव्ययात् त्यप् प्रत्ययो भवति शैषिकः।

अमेहक्वतसित्रेभ्यस्त्यब्विधिर्योऽव्ययात्स्मृतः।
निनिर्भ्यां ध्रुवगत्योश्च प्रवेशो नियमे तथा * ॥

अमात्यः। इहत्यः। क्वत्यः। इतस्त्यः। तत्रत्यः। यत्रत्यः। परिगणनं किम्। औपरिष्टः। पौरस्तः। पारस्तः †। वृद्धात्तु छो भवति। आरातीयः॥ त्यब्नेर्ध्रुवे ॥ * ॥ नियतं ध्रुवम्। नित्यम्॥ निसो गते ॥ * ॥ निर्गतो वर्णाश्रमेभ्यो निष्ट्यश्चण्डालादिः॥ आविसश्छन्दसि ॥ * ॥ आविस्शब्दाच्छन्दसि त्यप् प्रत्ययो भवति। आविष्ट्यो वर्द्धते॥ अरण्याण्णो वक्तव्यः ॥ * ॥ आरण्याः सुमनसः॥ दूरादेत्यः ॥ * ॥ दूरेत्यः पथिकः॥ उत्तरादाहञ् ॥ * ॥ औत्तराहः॥

ऐषमोह्यःश्वसोऽन्यतरस्याम् ॥ १०५ ॥

ऐषमस् ह्यस् श्वस् इत्येतेभ्योऽन्यतरस्यां त्यप् प्रत्ययो भवति शैषिकः। ऐषमस्त्यम्। ऐषमस्तनम्। ह्यस्त्यम्। ह्यस्तनम्। श्वस्त्यम्। श्वस्तनम्। श्वसस्तुट् चेति ठञपि तृतीयो भवति। शौवस्तिकम्॥

तीररूप्योत्तरपदादञ्ञौ ॥ १०६ ॥

तीरोत्तरपदाद् रूप्योत्तरपदाच्च प्रातिपदिकाद्यथासंख्यमञ् ञ इत्येतौ प्रत्ययौ भवतः शैषिकौ। अणोऽपवादौ। काकतीरम्। पाल्वलतीरम्। रूप्योत्तरपदात्। वार्करूप्यम्। शैवरूप्यम्। तीररूप्यान्तादिति नोक्तं, बहुच्प्रत्ययपूर्वाद् मा भूदिति। बाहुरूप्यम्। अणेव भवति * ॥

दिक्पूर्वपदादसंज्ञायां ञः ॥ १०७ ॥

असंज्ञायामिति प्रकृतिविशेषणम्। दिक्पूर्वपदात्प्रातिपदिकादसंज्ञाविषयाद् ञः प्रत्ययो भवति शैषिकः। अणोऽपवादः। पौर्वशालः। दाक्षिणशालः। आपरशालः। असंज्ञायामिति किम्। पूर्वेषुकामशमः। अपरेषुकामशमः। दिक्संख्ये संज्ञायामिति समासः। प्राचां ग्रामनगराणामित्युत्तरपदवृद्धिः। पदग्रहणं स्वरूपविधिनिरासार्थम्॥

मद्रेभ्योऽञ् ॥ १०८ ॥

दिक्पूर्वपदादित्येव। दिक्पूर्वपदान्मद्रशब्दादञ् प्रत्ययो भवति शैषिकः। पौर्वमद्रः। आपरमद्रः। दिशो मद्राणामिति पर्युदासादादिवृद्धिरेव॥

उदीच्यग्रामाच्च बह्वचोऽन्तोदात्तात् ॥ १०९ ॥

दिग्ग्रहणं निवृत्तम्। उदीच्यग्रामवाचिनः प्रातिपदिकाद् बह्वचोऽन्तोदात्ताद् अञ् प्रत्ययो भवति शैषिकः। अणोऽपवादः। शैवपुरम्। माण्डवपुरम्। उदीच्यग्रामादिति किम्। माथुरम् †। बह्वच इति किम्। ध्वजो। ध्वाजम्। अन्तोदात्तादिति किम्। शार्करीधानम्। शार्करीधानशब्दे लित्स्वरेण धाशब्द उदात्तः॥

---

* इदं पद्यार्धं कुत्र चिन्त्यास्ति।

† पारस्त इत्यस्याग्रे ऽव्ययानां भमात्रे टिलोप इत्यधिकमेकस्मिन्पुस्तके।

* स्वरे विशेष इत्यधिकं पुस्तकान्तरे।

† माथुरमिति पा० २।

Digitized by Google

प्रस्थोत्तरपदपलद्यादिकोपधादण् ॥ ११० ॥

प्रस्थोत्तरपदात् पलद्यादिभ्यः ककारोपधाच्च प्रातिपदिकादण् प्रत्ययो भवति शैषिकः । उदीच्यग्रामलक्षणस्याञोऽपवादः । माद्रीप्रस्थः । माहकीप्रस्थः । पलद्यादिभ्यः । पालदः । पारिषदः । ककारोपधात् । नैलीनकः । चैयातकः * । पलद्यादिषु यो वाहीकग्रामस्तस्माट्ठञ्ञिठयोरपवादः । यथा । गोष्ठी,नैतकीति † । गोमतीशब्दः पठ्यते, ततो रोपधेतोः प्राचामिति वुञोऽपवादः । वाहीकशब्दः कोपधोऽपि पुनः पठ्यते परं छं बाधितुम् । अण्ग्रहणं बाधकबाधनार्थम् । पलदी । परिषत् । यकृल्लोमन् । रोमक । कालकूट । पटच्चर । वाहीक । कलकीट । मलकीट । कमलकीठ । कमलभिदा । कमलकीर । बाहुकीट । नैतकी । परिखा । शूरसेन । गोमती । उदयान ‡ । पलद्यादिः ॥

कण्वादिभ्यो गोत्रे ॥ १११ ॥

गोत्रमिह न प्रत्ययार्थो न च प्रकृतिविशेषणं, तर्ह्येवं संबध्यते, कण्वादिभ्यो गोत्रे यः प्रत्ययो विहितस्तदन्तेभ्य एवाण् प्रत्ययो भवति शैषिकः । छस्यापवादः । काण्वाश्छात्राः । गौकक्षाः § ॥

इञश्च ॥ ११२ ॥

गोत्रइत्येव । गोत्रे य इञ् विहितस्तदन्तात्प्रातिपदिकादण् प्रत्ययो भवति शैषिकः । छस्यापवादः । दाक्षाः । प्लाक्षाः । माहकाः । गोत्रइत्येव । सौतङ्गमेरिदं सौतङ्गमीयम् ॥

न द्व्यचः प्राच्यभरतेषु ॥ ११३ ॥

द्व्यचः प्रातिपदिकात्प्राच्यभरतगोत्रादिञन्तादण् प्रत्ययो न भवति । पूर्वेण प्राप्तः प्रतिषिध्यते । चैदीयाः ‖ । पौष्कीयाः । काशीयाः । द्व्यच इति किम् । पान्नागाराः । प्राच्यभरतेष्विति किम् । दाक्षाः । काशीया इति कथमुदाहृतं, यावता काश्यादिभ्यष्ठञ्ञिठाभ्यां भवितव्यम् । नैतदस्ति । देशवाचिनः काशिशब्दस्य तत्र ग्रहणं चेदि¶शब्देन साहचर्यात् । गोत्रात्तु वृद्धाच्छ एव भवति । ज्ञापकादन्यत्र प्राच्यग्रहणेन भरतग्रहणं न भवतीति स्वशब्देन भरतानामुपादानं कृतम् ॥

* वैयतक इति पा० २ ।

† नैकेतीति पा० २ । एकस्मिन्पुस्तके, ऽपरस्मिन्नैधिकीति पा० २ ।

‡ पद्य । कललकीट । कललकीकटा । गोष्ठी । नैधिकी । नैकेती । यकृल्लोमन् । इत्यधिकमत्र पुस्तकान्तरे ।

§ गोत्रइति किम् । कण्वो देवता ऽस्य काण्वं,तस्येदं काण्वीयम् । कण्वादिर्गर्गाद्यन्तर्गणः । इत्यधिकं पुस्तकान्तरे ।

‖ बैदीया इति पा० २ ।

¶ बैदीति पा० २ ।

वृद्धाच्छः ॥ ११४ ॥

गोत्रइति नानुवर्त्तते । सामान्येन विधानम् । वृद्धात्प्रातिपदिकाच् छः प्रत्ययो भवति शैषिकः । अणोऽपवादः । गार्गीयः । वात्सीयः । शालीयः । मालीयः । अव्ययतीररूप्योत्तरपदोदीच्यग्रामकोपधविधींस्तु परत्वाद्बाधते ॥

भवतष्ठक्छसौ ॥ ११५ ॥

वृद्धादित्येव । भवच्छब्दाद् वृद्धात् ठक्छसौ प्रत्ययौ भवतः शैषिकौ । छस्यापवादौ । सकारः पदसंज्ञार्थः । भवतस्त्यदादित्वाद्वृद्धसंज्ञा । भावत्कः । भवदीयः । अवृद्धात्तु भवतः अणेव भवति । भावतः ॥

काश्यादिभ्यष्ठञ्ञिठौ ॥ ११६ ॥

काशि इत्येवमादिभ्यष्ठञ् ञिठ इत्येतौ प्रत्ययौ भवतः शैषिकौ । इकार उच्चारणार्थः । ञकार एवोभयत्र विपर्यस्तदेशोऽनुबन्धः । स्त्रीप्रत्यये विशेषः । काशिकी । काशिका । बैदिकी । बैदिका । वृद्धादित्यत्रानुवर्त्तते, ये त्ववृद्धाः पठ्यन्ते वचनप्रामाण्यात्तेभ्यः प्रत्ययविधिः । देवदत्तशब्दः पठ्यते तस्य एङ् प्राचां देशइति वृद्धसंज्ञा । दैवदत्तिकः । वाहीकग्रामस्य तु नास्ति वृद्धसंज्ञा । दैवदत्तः । कथं भाष्यउदाहृतं वा नामधेयस्य वृद्धसंज्ञा वेदितव्या देवदत्तीया दैवदत्ता इति, यावता वृद्धसंज्ञापक्षे काश्यादित्वाट्ठञ्ञिठाभ्यां भवितव्यम् । तत्रैवं वर्णयन्ति वा नामधेयस्येति व्यवस्थितविभाषेयं, सा छे कर्त्तव्ये भवति ठञ्ञिठयोर्न भवतीति । काशि । चेदि * । संज्ञा । संवाह । अच्युत । मोहमान । शकुलाद । हस्तिकर्षू । कुनामन् † । हिरण्य । करण । गोधाशन । भौरिकि । भौलिङ्गि । अरिन्दम । सर्वमित्र । देवदत्त । साधुमित्र । दासमित्र । दासग्राम । सौधावतान । युवराज । उपराज । सिन्धुमित्र । देवराज ॥ आपदादिपूर्वपदात्कालान्तात् ॥ आपत्कालिकी । आपत्कालिका । और्ध्वकालिकी । और्ध्वकालिका । तात्कालिकी । तात्कालिका ॥

वाहीकग्रामेभ्यश्च ॥ ११७ ॥

वृद्धादित्येव । वाहीकग्रामवाचिभ्यो वृद्धेभ्यष्ठञ्ञिठौ प्रत्ययौ भवतः शैषिकौ । छस्यापवादौ । शाकलिकी । शाकलिका । मान्थविकी । मान्थविका ॥

विभाषोशीनरेषु ॥ ११८ ॥

वृद्धादिति वर्तते, वाहीकग्रामेभ्य इति च । उशीनरेषु ये वाहीकग्रामास्तद्वाचिभ्यो वृद्धेभ्यः प्रातिपदिकेभ्यो विभाषा

* बैदीति पा० २ ।

† कुनामन्निति पा० २ ।

Digitized by Google

ठञ्ञिठौ प्रत्ययौ भवतः । आह्वजालिकी । आह्वजालिका । आह्वजालीया । सौदर्शनिकी । सौदर्शनिका । सौदर्शनीया ॥

ओर्देशे ठञ् ॥ ११९ ॥

वृद्धादिति नानुवर्त्तते । उत्तरसूत्रे पुनर्वृद्धग्रहणात् । उवर्णान्ताद् देशवाचिनः प्रातिपदिकात् ठञ् प्रत्ययो भवति शैषिकः । नैषादकर्षुकः । शावरजम्बुकः * । देशइति किम् । पटोश्छात्राः, पाटवाः । ठञ्ञिठयोः प्रकरणे ठञः केवलस्यानुवृत्तिर्न लभ्यतइति ठञ्ग्रहणं कृतम् ॥

वृद्धात्प्राचाम् ॥ १२० ॥

ओर्देशइत्येव । उवर्णान्ताद् वृद्धात्प्राग्देशवाचिनः प्रातिपदिकाट्ठञ् प्रत्ययो भवति शैषिकः । आढकजम्बुकः । शाकजम्बुकः † । नापितवास्तुकः । पूर्वेणैव ठञि सिद्धे नियमार्थं वचनं वृद्धादेव प्राचामवृद्धाच भवतीति । मल्लवास्तु । माल्लवास्तवः ॥

धन्वयोपधाद्वुञ् ॥ १२१ ॥

वृद्धादिति वर्तते, देशइति च । धन्ववाचिनो यकारोपधाच्च देशाभिधायिनो वृद्धात्प्रातिपदिकाद् वुञ् प्रत्ययो भवति शैषिकः । धन्वशब्दो मरुदेशवचनः । पारेधन्वकः । ऐरावतकः । योपधात् । सांकाश्यकः । काम्पिल्यकः ॥

प्रस्थपुरवहान्ताच्च ॥ १२२ ॥

वृद्धादित्येव, देशइति च । अन्तशब्दः प्रत्येकमभिसंबध्यते । प्रस्थ पुर वह इत्येवमन्ताद्देशवाचिनः प्रातिपदिकाद्वृद्धाद्वुञ् प्रत्ययो भवति शैषिकः । छस्यापवादः । मालाप्रस्थकः । नान्दीपुरकः । कान्तीपुरकः । पैलुवहकः । फाल्गुनीवहकः । पुरान्तो रोपधस्तत उत्तरसूत्रेणैव सिद्धमप्रागर्थमिह ग्रहणम् ॥

रोपधेतोः प्राचाम् ॥ १२३ ॥

वृद्धादित्येव, देशइति च । तद्विशेषणं प्राग्ग्रहणम् । रोपधादीकारान्ताच्च प्राग्देशवाचिनो वृद्धाद्वुञ् प्रत्ययो भवति शैषिकः । छस्यापवादः । पाटलिपुत्रकाः । ऐकचक्रकाः । ईतः खल्वपि । काकन्दी । काकन्दकः । माकन्दी । माकन्दकः । प्राचामिति किम् । दात्तामित्रीयः । तपरकरणं विस्पष्टार्थम् ॥

जनपदतदवध्योश्च ॥ १२४ ॥

वृद्धादित्येव, देशइति च । तद्विशेषणं जनपदतदवधी । वृद्धाज्जनपदवाचिनस्तदवधिवाचिनश्च प्रातिपदिकाद्वुञ् प्रत्ययो भवति शैषिकः । छस्यापवादः । आभिसारकः । आदर्शकः । जनपदावधेः खल्वपि । औपुष्टकः । श्यामायनकः ।

* केण इति हस्व इत्यधिकमेकस्मिन्पुस्तके ।

† शालजम्बुक इति पा॰ २ ।

तदवधिरपि जनपद एव गृह्यते न ग्रामः । किमर्थं तर्हि ग्रहणं, बाधकबाधनार्थं गर्त्तोत्तरपदाच्छं बाधित्वा वुञेव जनपदावधेर्भवति । त्रैगर्त्तकः ॥

अवृद्धादपि बहुवचनविषयात् ॥ १२५ ॥

जनपदतदवध्योरित्येव । अवृद्धाद्वृद्धाच्च जनपदात्तदवधिवाचिनश्च बहुवचनविषयात्प्रातिपदिकाद्वुञ् प्रत्ययो भवति शैषिकः । अणछयोरपवादः । अवृद्धाज्जनपदात्तावत् । अङ्गाः । वङ्गाः । कलिङ्गाः । आङ्गकः । वाङ्गकः । कालिङ्गकः । अवृद्धाज्जनपदावधेः । अजमीढाः । अजक्रन्दाः । आजमीढकः । आजक्रन्दकः । वृद्धाज्जनपदात् । दार्वाः । जाम्ब्वाः । दार्वकः । जाम्ब्वकः । वृद्धाज्जनपदावधेः । कालञ्जराः । वैकुलिशाः । कालञ्जरकः । वैकुलिशकः । विषयग्रहणमनन्यत्र भावार्थम् । जनपदैकशेषबहुत्वे मा भूत् । वर्त्तन्यः । वार्त्तनः * । अपिग्रहणं किम् । यावता वृद्धात्पूर्वेणैव सिद्धं तत्क्रोपिङ्न्यायेन बाधा मा विज्ञायीति समुच्चीयते ॥

कच्छाग्निवक्त्रगर्त्तोत्तरपदात् ॥ १२६ ॥

देशइत्येव । उत्तरपदशब्दः प्रत्येकमभिसंबध्यते । कच्छाद्युत्तरपदाद्देशवाचिनः प्रातिपदिकाच्चाद्वृद्धादवृद्धाच्च वुञ् प्रत्ययो भवति शैषिकः । छाणोपवादः । दारुकच्छकः । पैप्पलीकच्छकः । काण्डाग्नकः । वैभुजाग्नकः । ऐन्द्रवक्त्रकः । सैन्धुवक्त्रकः । बाहुगर्त्तकः । चाक्रगर्त्तकः ॥

धूमादिभ्यश्च ॥ १२७ ॥

धूमादिभ्यो देशवाचिभ्यः प्रातिपदिकेभ्यो वुञ् प्रत्ययो भवति शैषिकः । अणादेरपवादः । धौमकः । खाण्डकः † । पाथेयशब्दः पठ्यते तस्य योपधत्वादेव वुञि सिद्धे सामर्थ्याद्देशार्थं ग्रहणम् । तथा विदेहानर्त्तशब्दयोर्जनपदलक्षणे वुञि सिद्धे ऽदेशार्थः पाठः । विदेहानां क्षत्रियाणां स्वं वैदेहकम् । आनर्त्तकम् । समुद्रशब्दः पठ्यते तस्य नावि मनुष्ये च वुञिष्यते । सामुद्रिका नौः । सामुद्रका मनुष्यः । अन्यत्र न भवति । सामुद्रं जलमिति । धूम । खण्ड ‡ । शशादन । आर्ज्जुनाद । दाण्डायनस्थली । माहकस्थली । घोषस्थली । माषस्थली । राजस्थली । राजगृह । सत्रासाह । भक्षास्थली । मद्रकूल । गर्त्तकूल । आञ्जीकूल । द्व्याहाव । त्र्याहाव । संहीय । वर्वर । वर्चगर्त्त । विदेह । आनर्त्त । माठर ।

* वर्तनी च वर्तनी च वर्तनी च वर्तन्यः, वर्तनीषु भव इति वुञ् न भवति । सर्वविवक्षाया अभावे बहुवचनाभावात् । वर्तन्यः । वार्तनः । इति पा॰ २ ।

† खाण्डपडकः । पा॰ २ ।

‡ खण्डपड इति पा॰ २ ।

तस्मिन्नणि च युष्माकास्माकौ ॥ २ ॥

तस्मिन्निति साक्षाद्विहितः खञ् निर्दिश्यते न चकारानुकृष्टश्छः । तस्मिन्खञि अणि च युष्मदस्मदोर्यथासंख्यं युष्माक अस्माक इत्येतावादेशौ भवतः । निमित्तयोरादेशौ प्रति यथासंख्यं कस्मान्न भवति । योगविभागः करिष्यते तस्मिन् । खञि युष्मदस्मदो र्युष्माकास्माकौ भवतः । ततो ऽणि चेति । यौष्माकीणः । आस्माकीनः । यौष्माकः । आस्माकः । तस्मिन्नणि चेति किम् । युष्मदीयः । अस्मदीयः ॥

तवकममकावेकवचने ॥ ३ ॥

एकवचनपरये र्युष्मदस्मदोस्तवक ममक इत्येतावादेशौ भवतो यथासंख्यं तस्मिन्खञि अणि च परतः । निमित्तयोस्तु यथासंख्यं पूर्ववदेव न भवति । ननु च न लुमताङ्गस्येति प्रत्ययलक्षणप्रतिषेधादेकवचनपरता युष्मदस्मदोर्न संभवति । वचनात्प्रत्ययलक्षणं भविष्यति * । अथ वा नैवेदं प्रत्ययलक्षणं किं तर्ह्यर्थग्रहणम् । एकवचने युष्मदस्मदी एकस्यार्थस्य वाचके तवकममकावादेशौ प्रतिपद्येते इति सूत्रार्थः । तावकीनः । मामकीनः । तावकः । मामकः । तस्मिन्नणि चेत्येव । त्वदीयो, मदीयः ॥

अर्धाद्यत् ॥ ४ ॥

अर्धशब्दाद् यत् प्रत्ययो भवति शैषिकः । अणोपवादः । अर्ध्यम् ॥ सपूर्वपदाट्ठञ्वक्तव्यः ॥ * ॥ वालेयार्धिकम् । गौतमार्धिकम् ॥

परावराधमोत्तमपूर्वाच्च ॥ ५ ॥

पर अवर अधम उत्तम इत्येवंपूर्वाच्चार्धाद्यत् प्रत्ययो भवति शैषिकः । परार्ध्यम् । अवरार्ध्यम् । अधमार्ध्यम् । उत्तमार्ध्यम् । पूर्वग्रहणं किम् । परावराधमोत्तमेभ्य इत्युच्यते, अर्धादिति वर्तते । तस्य तत्पूर्वता विज्ञास्यते । परावरशब्दावदिग्ग्रहणा अपि स्तः, परं सुखमवरं सुखमिति । तत्र कृतार्थत्वाद् दिक्छब्दपक्षे परेण ठञ्यतौ स्याताम्, अस्मात्पूर्वग्रहणाद्यत्प्रत्ययो भवति परार्ध्यमवरार्ध्यमिति ॥

दिक्पूर्वपदाट्ठञ्च ॥ ६ ॥

दिक्पूर्वपदादर्धान्तात्प्रातिपदिकात् ठञ् प्रत्ययो भवति चकाराद्यच्च शैषिकः । अणोपवादः । पूर्वार्ध्यम् । पौर्वार्धिकम् । दक्षिणार्ध्यम् । दाक्षिणार्धिकम् । पदग्रहणं स्वरूपविधिनिवारणार्थम् ॥

ग्रामजनपदैकदेशादञ्ठञौ ॥ ७ ॥

दिक्पूर्वपदादित्येव । ग्रामैकदेशवाचिनो जनपदैकदेशवाचिनश्च प्रातिपदिकाद्दिक्पूर्वपदादर्धान्तादञ्ठञौ प्रत्ययौ भवतः शैषिकौ यतोपवादौ । इमे खल्वस्माकं ग्रामस्य जनपदस्य वा पौर्वार्धाः पौर्वार्धिकाः । दाक्षिणार्धाः दाक्षिणार्धिकाः ॥

मध्यान्मः ॥ ८ ॥

मध्यशब्दान्मः प्रत्ययो भवति शैषिकः । अणोपवादः । मध्यमः ॥ आदेश्चेति वक्तव्यम् ॥ * ॥ आदिमः ॥ अवोधसोर्लोपश्च ॥ * ॥ अवमम् । अधमम् ॥

अ सांप्रतिके ॥ ९ ॥

अकारः प्रत्ययो भवति मध्यशब्दात्सांप्रतिके जातादौ प्रत्ययार्थे । मस्यापवादः । सांप्रतिकं न्याय्यं युक्तमुचितं सममुच्यते । नातिदीर्घं नातिह्रस्वं मध्यं काष्ठम् । नात्युत्कृष्टो नात्यवकृष्टो मध्यो वैयाकरणः । मध्या स्त्री ॥

द्वीपादनुसमुद्रं यञ् ॥ १० ॥

समुद्रसमीपे यो द्वीपस्तस्माद् यञ् प्रत्ययो भवति शैषिकः । कच्छादिपाठाद् अणो मनुष्यवुञश्चापवादः । द्वैप्यम् । द्वैप्यं भवन्तोनुचरन्ति चक्रम् । अनुसमुद्रमिति किम् । द्वैपकम् । द्वैपमन्यत् ॥

कालाट्ठञ् ॥ ११ ॥

कालविशेषवाचिनः प्रातिपदिकात् ठञ् प्रत्ययो भवति शैषिकः । अणोपवादः । वृद्धात् तु छं परत्वाद्बाधते । मासिकः । आर्धमासिकः । सांवत्सरिकः ॥ यथाकथं चिद्गुणवृत्त्यापि काले वर्तमानात्प्रत्यय इष्यते ॥ कादम्बपुष्पिकम् । व्रैहिपलालिकम् । तत्र जात इति प्रागतः कालाधिकारः ॥

श्राद्धे शरदः ॥ १२ ॥

शरच्छब्दात् ठञ् प्रत्ययो भवति श्राद्धे ऽभिधेये शैषिकः । ऋत्वणोपवादः । श्राद्धमिति च कर्म गृह्यते न श्रद्धावान्पुरुषो ऽनभिधानात् । शारदिकं श्राद्धम् । शारदमन्यत् ॥

विभाषा रोगातपयोः ॥ १३ ॥

शरद इत्येव । रोगे आतपे चाभिधेये शरच्छब्दाट्ठञ् प्रत्ययो वा भवति शैषिकः । ऋत्वणोपवादः । शारदिको रोगः । शारदिक आतपः । शारदो रोगः । शारद आतपः । रोगातपयोरिति किम् । शारदं दधि ॥

निशाप्रदोषाभ्यां च ॥ १४ ॥

निशाप्रदोषशब्दाभ्यां विभाषा ठञ् प्रत्ययो भवति शैषिकः । कालाट्ठञिति नित्ये ठञि प्राप्ते विकल्प उच्यते । नैशम् । नैशिकम् । प्रादोषम् । प्रादोषिकम् ॥

श्वसस्तुट् च ॥ १५ ॥

विभाषेत्येव । श्वःशब्दाद्विभाषा ठञ् प्रत्ययो भवति, तस्य च तुडागमो भवति । त्यप्प्रत्ययोप्यतो विहित एवमोश्च:-

* वचनात्प्रत्ययलक्षणप्रतिषेधो न संभवति । पा॰ २ ।

श्वसोऽन्यतरस्यामिति । एताभ्यां मुक्ते ट्युट्युलावपि भवतः । शौवस्तिकः । श्वस्त्यः । श्वस्तनः ॥

संधिवेलाद्यृतुनक्षत्रेभ्योऽण् ॥ १६ ॥

कालादित्येव । संधिवेलादिभ्य ऋतुभ्यो नक्षत्रेभ्यश्च कालवृत्तिभ्योऽण् प्रत्ययो भवति शैषिकः । ठञोऽपवादः । ऋतुग्रहणं वृद्धाच्छस्य बाधनार्थम् । संधिवेलादिभ्यस्तावत् । सांधिवेलम् । सांध्यम् । ऋतुभ्यः । ग्रैष्मम् । शैशिरम् । नक्षत्रेभ्यः । तैषम् । पौषम् । संधिवेला । संध्या । अमावास्या । त्रयोदशी । चतुर्दशी । पञ्चदशी । पौर्णमासी । प्रतिपत् ॥ संवत्सरात्फलपर्वणोः ॥ सांवत्सरं फलम् । सांवत्सरं पर्व ॥

प्रावृष एण्यः ॥ १७ ॥

प्रावृष्शब्दादेण्यः प्रत्ययो भवति शैषिकः । ऋत्वणोऽपवादः । प्रावृषेण्यो बलाहकः ॥

वर्षाभ्यष्ठक् ॥ १८ ॥

वर्षाशब्दाट्ठक् प्रत्ययो भवति शैषिकः । ऋत्वणोऽपवादः । वार्षिकं वासः । वार्षिकमनुलेपनम् ॥

छन्दसि ठञ् ॥ १९ ॥

वर्षाशब्दाच् छन्दसि विषये ठञ् प्रत्ययो भवति शैषिकः । ठकोऽपवादः । स्वरे भेदः । नभश्च नभस्यश्च वार्षिकावृतू ॥

वसन्ताच्च ॥ २० ॥

छन्दसीत्येव । वसन्तशब्दाच् छन्दसि विषये ठञ् प्रत्ययो भवति शैषिकः । ऋत्वणोऽपवादः । मधुश्च माधवश्च वासन्तिकावृतू ॥

हेमन्ताच्च ॥ २१ ॥

छन्दसीत्येव । हेमन्तशब्दाच् छन्दसि विषये ठञ् प्रत्ययो भवति शैषिकः । ऋत्वणोऽपवादः । सहश्च सहस्यश्च हैमन्तिकावृतू । योगविभाग उत्तरार्थः ॥

सर्वत्राण् च तलोपश्च ॥ २२ ॥

हेमन्तशब्दादण् प्रत्ययो भवति तत्संनियोगेन चास्य तकारलोपः । हैमनं वासः । हैमनमुपलेपनम् । सर्वत्रग्रहणं छन्दोऽधिकारनिवृत्त्यर्थम् । छन्दसि भाषायां च सर्वत्रैतद्भवति । ननु च छन्दसीति नानुवर्तिष्यते । सैवाननुवृत्तिः शब्देनाख्यायते प्रयत्नाधिक्येन पूर्वसूत्रेऽपि संबन्धार्थम् । हैमन्तिकमिति भाषायामपि ठञं स्मरन्ति । अणाण्चेति चकारः किमर्थः । अण् यथाप्राप्तं च ऋत्वणिति, कः पुनरनयोर्विशेषः । ऋत्वणि हि तकारलोपो नास्ति हैमन्ती पङ्क्तिरिति । तदेवं त्रीणि रूपाणि भवन्ति । हैमन्तिकं हैमन्तं हैमनमिति ॥

सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च ॥ २३ ॥

कालादित्येव । सायंतनम् । चिरंतनम् । प्राह्णेतनम् । अव्ययेभ्यः । दोषातनम् । दिवातनम् । सायमिति मकारान्तं पदमव्ययं, ततोऽव्ययत्वादेव सिद्धः प्रत्ययः । यस्तु स्यतेरन्तकर्मणो घञि सायशब्दस्तस्येदं मकारान्तत्वं प्रत्ययसंनियोगेन निपात्यते । दिवसावसानं सायः । चिरशब्दस्यापि मकारान्तत्वं निपात्यते । प्राह्णे प्रगे इत्येकारान्तत्वम् ॥ चिरपरुत्परारिभ्यस्त्नो वक्तव्यः ॥ * ॥ चिरत्नम् । परुत्नम् । परारित्नम् ॥ प्रगस्य छन्दसि गलोपश्च ॥ * ॥ प्रत्नम् ॥ अग्रपश्चाड्डिमच् ॥ * ॥ अग्रिमम् । पश्चिमम् ॥ अन्ताच्चेति वक्तव्यम् ॥ * ॥ अन्तिमम् ॥

विभाषा पूर्वाह्णापराह्णाभ्याम् ॥ २४ ॥

पूर्वाह्णापराह्णशब्दाभ्यां विभाषा ट्युट्युलौ प्रत्ययौ भवत,-स्तुट् च तयोरागमः । कालाट्ठञिति ठञि प्राप्ते वचनं पक्षे सोऽपि भवति । पूर्वाह्णेतनम् । अपराह्णेतनम् । पौर्वाह्णिकम् । आपराह्णिकम् । घकालतनेषु कालनाम्न इति सप्तम्या अलुक् । यदा तु न सप्तमी समर्थविभक्तिः पूर्वाह्णः सोढोऽस्येति तदा पूर्वाह्णतन इति भवितव्यम् ॥

तत्र जातः ॥ २५ ॥

अणादयो घादयश्च प्रत्ययाः प्रकृतास्तेषामतः प्रभृत्यर्थाः समर्थविभक्तयश्च निर्दिश्यन्ते । तत्रेति सप्तमीसमर्थाज्जात इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति । स्रुघ्ने जातः, स्रौघ्नः । माथुरः । औत्सः । औदपानः । राष्ट्रियः । अवारपारीणः । शाकलिकः । ग्राम्यः । ग्रामीणः । कात्त्रेयकः । औम्भेयकः ॥

प्रावृषष्ठप् ॥ २६ ॥

प्रावृट्शब्दात्सप्तमीसमर्थाज्जात इत्येतस्मिन्नर्थे ठप् प्रत्ययो भवति । एण्यस्यापवादः । पकारः स्वरार्थः । प्रावृषि जातः, प्रावृषिकः ॥

संज्ञायां शरदो वुञ् ॥ २७ ॥

शरच्छब्दात्सप्तमीसमर्थाज्जात इत्येतस्मिन्नर्थे वुञ् प्रत्ययो भवति, ऋत्वणोऽपवादः समुदायेन चेत्संज्ञा गम्यते । शारदका दर्भाः । शारदका मुद्गाः । दर्भविशेषस्य मुद्गविशेषस्य चेयं संज्ञा । संज्ञायामिति किम् । शारदं सस्यम् । संज्ञाधिकारं के चि'त्कृतलब्धक्रीतकुशला' इति यावदनुवर्त्तयन्ति ॥

पूर्वाह्णापराह्णार्द्रामूलप्रदोषावस्कराद्वुन् ॥ २८ ॥

पूर्वाह्णादिभ्यः शब्देभ्यो वुन् प्रत्ययो भवति तत्र जात इत्येतस्मिन्विषये संज्ञायां गम्यमानायाम् । पूर्वाह्णकः । अप-

Digitized by Google

पाथेय । घोष । शिष्य । मित्र । बल । आराज्ञी । धार्तराज्ञी । अवयात तीर्थ ॥ कूलात्सौवीरेषु ॥ समुद्रान्नावि मनुष्ये च ॥ कुक्षि । अन्तरीप । द्वीप । अरुण । उज्जयिनी । दक्षिणापथ । साकेत* ॥

नगरात्कुत्सनप्रावीण्ययोः ॥ १२८ ॥

नगरशब्दाद्वुञ् प्रत्ययो भवति शैषिकः कुत्सने प्रावीण्ये च गम्यमाने । प्रत्ययार्थविशेषणं चैतत् । कुत्सने प्रावीण्ये च जातादौ प्रत्ययार्थेइति । कुत्सनं निन्दनम् । प्रावीण्यं नैपुण्यम् ॥

केनायं मुषितः पन्था गात्रे पक्ष्मालिधूसरः ।

इह नगरे मनुष्येण संभाव्यतएतन्नागरकेण । चौरा हि नागरका भवन्ति ।

केनेदं लिखितं चित्रं मनोनेत्रविकाशि यत् ।

इह नगरे मनुष्येण संभाव्यतएतन्नागरकेण प्रवीणा हि नागरका भवन्ति । कुत्सनप्रावीण्ययोरिति किम् । नागरा ब्राह्मणाः । कत्त्र्यादिषु तु संज्ञाशब्देन साहचर्यात्संज्ञानगरं पठ्यते, तस्मिन्नागरेयकमिति प्रत्युदाहार्यम् ॥

अरण्यान्मनुष्ये ॥ १२९ ॥

अरण्यशब्दाद्वुञ् प्रत्ययो भवति शैषिको मनुष्ये ऽभिधेये । औपसंख्यानिकस्य णस्यापवादः । आरण्यको मनुष्यः ॥ पथ्यध्यायन्यायविहारमनुष्यहस्तिष्विति वक्तव्यम् ॥ * ॥ आरण्यकः पन्थाः । आरण्यको ऽध्यायः । आरण्यको न्यायः । आरण्यको विहारः । आरण्यको मनुष्यः । आरण्यको हस्ती ॥ वा गोमयेषु ॥ * ॥ आरण्या आरण्यका गोमयाः । एतेष्विति किम् । आरण्याः पशवः ॥

विभाषा कुरुयुगन्धराभ्याम् ॥ १३० ॥

कुरु युगन्धर इत्येताभ्यां विभाषा वुञ् प्रत्ययो भवति शैषिकः । कौरवकः । कौरवः । यौगन्धरकः । यौगन्धरः । जनपदशब्दावेतौ ताभ्यामवृद्धादपीति नित्ये वुञि प्राप्ते विकल्प उच्यते । कुरुशब्दः कच्छादिष्वपि पठ्यते तत्र वचनादणपि भविष्यति । पारिशेष्याद्युगन्धरार्था विभाषा † । मनुष्यतत्स्थयोस्तु कुरुशब्दान्नित्य एव वुञ् प्रत्ययो भवति । कौरवको मनुष्यः, कौरवकमस्य हसितमिति ॥

मद्रवृज्योः कन् ॥ १३१ ॥

मद्रवृजिशब्दाभ्यां कन् प्रत्ययो भवति शैषिकः । जनपदवुञोपवादः । मद्रेषु जातः, मद्रकः । वृजिकः ॥

* मानवल्ली । वल्ली । सुराज्ञी । एते ऽत्र गणे ऽधिकाः कुत्र चित् ।

† सैषा युगन्धरार्था विभाषा । पा० २ ।

कोपधादण् ॥ १३२ ॥

देशइत्येव । ककारोपधात्प्रातिपदिकादण् प्रत्ययो भवति शैषिकः । जनपदवुञोपवादः । अन्यत्र जनपदं मुक्त्वा पूर्वेणैव कोपधादण् सिद्धम् । ऋषिकेषु जातः, आर्षिकः । माहिषिकः । अणग्रहणमुवर्णान्तादपि स्यात् । इक्ष्वाकुषु जातः, ऐक्ष्वाकः ॥

कच्छादिभ्यश्च ॥ १३३ ॥

देशइत्येव । कच्छ इत्येवमादिभ्यो देशवाचिभ्यो ऽण् प्रत्ययो भवति शैषिकः । वुञादेरपवादः । काच्छः । सैन्धवः । वार्णवः । कच्छशब्दो न बहुवचनविषयस्तस्य मनुष्यतत्स्थयोर्वुञर्थः पाठः । विजापकशब्दः पठ्यते । तस्य कोपधत्वादेवाणि सिद्धे ग्रहणमुत्तरार्थम् । कच्छ । सिन्धु । वर्णु । गन्धार । मधुमत् । कम्बोज । कश्मीर । साल्व । कुरु । रङ्कु । अणु * । खण्ड । द्वीप । अनूप । अजवाह । विजापक । कुलून । कच्छादिः ॥

मनुष्यतत्स्थयोर्वुञ् ॥ १३४ ॥

कच्छादिभ्य इत्येव । मनुष्ये मनुष्यस्थे च जातादौ प्रत्ययार्थे कच्छादिभ्यो वुञ् प्रत्ययो भवति । अणोपवादः । काच्छको मनुष्यः । काच्छकमस्य हसितं जल्पितम् । काच्छिका चूडा । सैन्धवको मनुष्यः । सैन्धवकमस्य हसितं जल्पितम् । सैन्धविका चूडा । मनुष्यतत्स्थयोरिति किम् । काच्छो गौः । सैन्धवो वार्णवः ॥

अपदातौ साल्वात् ॥ १३५ ॥

साल्वशब्दः कच्छादिषु पठ्यते ततः पूर्वेणैव मनुष्यतत्स्थयोर्वुञि सिद्धे नियमार्थं वचनम् । अपदातावेव मनुष्ये मनुष्यस्थे साल्वशब्दाद्वुञ् प्रत्ययो भवति । साल्वको मनुष्यः । साल्वकमस्य हसितं जल्पितम् । अपदाताविति किम् । साल्वः पदातिर्व्रजति ॥

गोयवाग्वोश्च ॥ १३६ ॥

गवि यवाग्वां च जातादौ प्रत्ययार्थे साल्वशब्दाद्वुञ् प्रत्ययो भवति शैषिकः । कच्छाद्यणोपवादः । साल्वको गौः । साल्विका यवागूः । साल्वमन्यत् ॥

गर्त्तोत्तरपदाच्छः ॥ १३७ ॥

देशइत्येव । गर्त्तोत्तरपदाद्देशवाचिनः प्रातिपदिकाच्छः प्रत्ययो भवति शैषिकः । अणोपवादः । वाहीकग्रामलक्षणं तु प्रत्ययं परत्वाद्बाधते । वृकगर्त्तीयम् । शृगालगर्त्तीयम् । श्वाविद्गर्त्तीयम् । उत्तरपदग्रहणं बहुच्पूर्वनिरासार्थम् । बाहुगर्त्तम् ॥

* अण्ड इति पा० २ ।

Digitized by Google

गहादिभ्यश्च ॥ १३८ ॥

गह इत्येवमादिभ्यः प्रातिपदिकेभ्यश्छः प्रत्ययो भवति शैषिकः । अणञोरपवादः * । गहीयः । अन्तस्थीयः । देशाधिकारेपि संभवापेक्षं विशेषणं न सर्वेषाम् । मध्यमध्यमं चाण् चरणइति पठ्यते, तस्यायमर्थः । मध्यशब्दः प्रत्ययसन्नियोगेन मध्यममापद्यते । मध्यमीयाः । चरणे तु प्रत्ययार्थेऽण् भवति, माध्यमा इति । तदेतद्विशेषणत्र स्मर्यते पृथिवीमध्यस्य मध्यमभावः । चरणसंबन्धेन निवासलक्षणोऽणिति च ॥ मुखपार्श्वतसोर्लोपश्च ॥ मुखतीयम् । पार्श्वतीयम् ॥ कुग्जनस्य परस्य च ॥ * ॥ जनकीयम् । परकीयम् ॥ देवस्य चेति वक्तव्यम् ॥ * ॥ देवकीयम् ॥ वेणुकादिभ्यश्छण्वक्तव्यः ॥ आकृतिगणोयम् । वैणुकीयम् । वैत्रकीयम् । औत्तरपदकीयम् । प्रास्थकीयम् † । माध्यमकीयम् । गह । अन्तस्थ । सम । विषम ॥ मध्यमध्यमं चाण्चरणे ॥ उत्तम । अङ्ग । वङ्ग । मगध । पूर्वपक्ष । अपरपक्ष । अधमशाख । उत्तमशाख । समानशाख । एकग्राम । एकवृक्ष । एकपलाश । इष्वग्र । इष्वनी ‡ । अवस्यन्दी § । कामप्रस्थ । खाडायनि ‖ । कावेरणि ¶ । शैशिरि । शौङ्गि । आसुरि । आहिंसि । आमित्रि । व्याडि । वैदजि । भौजि । आढ्यश्वि । आनृशंसि । सौवि । पारकि । अग्निशर्मन् । देवशर्मन् । श्रौति । आरटकि । वाल्मीकि । क्षेमवृद्धिन् । उत्तर । अन्तर ॥ मुखपार्श्वतसोर्लोपः ॥ जनपरयोः कुक्च ॥ देवस्य च ॥ वेणुकादिभ्यश्छण् ॥ गहादिः ॥

प्राचां कटादेः ॥ १३९ ॥

देशइत्येव । तद्विशेषणं प्राग्ग्रहणम् । प्राग्देशवाचिनः कटादेः प्रातिपदिकाच्छः प्रत्ययो भवति शैषिकः । अणोपवादः । कटनगरीयम् । कटघोषीयम् । कटपल्वलीयम् ॥

राज्ञः क च ॥ १४० ॥

असंभवाद्देशाधिकारो न विशेषणम् । राज्ञः ककारश्चान्तादेशो भवति छश्च प्रत्ययः । राजकीयम् । आदेशमात्रमिह विधेयं प्रत्ययस्तु वृद्धाच्छ इत्येव सिद्धः ॥

वृद्धादकेकान्तखोपधात् ॥ १४१ ॥

देशइत्येव । वृद्धाद्देशवाचिनोऽक इक इत्येवमन्तात् खकारोपधाच्च प्रातिपदिकाच्छः प्रत्ययो भवति शैषिकः । कोपधलक्षणस्याणोपवादः । वाहीकग्रामलक्षणस्य च प्रत्ययस्य रोपधेतोः प्राचामिति च । अकान्तात्तावत् । आरीहणकीयम् । द्रौघणकीयम् । इकान्तात् । आश्वपथिकीयम् । शाल्मलिकीयम् । खोपधात् । कौटिशिखीयम् । आयोमुखीयम् । अकेकान्तग्रहणे कोपधग्रहणं सौसुकाद्यर्थम् । सौसुकीयम् । मौसुकीयम् । ऐन्द्रवेणुकीयम् ॥

कन्थापलदनगरग्रामह्रदोत्तरपदात् ॥ १४२ ॥

देशइत्येव, वृद्धादिति च । कन्थाद्युत्तरपदाद्देशवाचिनो वृद्धात्प्रातिपदिकाच्छः प्रत्ययो भवति शैषिकः । वाहीकग्रामादिलक्षणस्य प्रत्ययस्यापवादः । दाक्षिकन्थीयम् । माहकिकन्थीयम् । दाक्षिपलदीयम् । माहकिपलदीयम् । दाक्षिनगरीयम् । माहकिनगरीयम् । दाक्षिग्रामीयम् । माहकिग्रामीयम् । दाक्षिह्रदीयम् । माहकिह्रदीयम् ॥

पर्वताच्च ॥ १४३ ॥

पर्वतशब्दाच्छः प्रत्ययो भवति शैषिकः । अणोपवादः । पर्वतीयो राजा । पर्वतीयः पुरुषः ॥

विभाषाऽमनुष्ये ॥ १४४ ॥

पर्वतशब्दाच्छः प्रत्ययो भवति वाऽमनुष्ये वाच्ये । पूर्वेण नित्ये प्राप्ते विकल्प उच्यते । पर्वतीयानि फलानि । पार्वतानि फलानि । पर्वतीयमुदकम् । पार्वतमुदकम् । अमनुष्यइति किम् । पर्वतीयो मनुष्यः ॥

कृकणपर्णाद्भारद्वाजे ॥ १४५ ॥

देशइत्येव । भारद्वाजशब्दोपि देशवचन एव न गोत्रशब्दः । प्रकृतिविशेषणं चैतन्न प्रत्ययार्थः । कृकणपर्णशब्दाभ्यां भारद्वाजदेशवाचिभ्यां छः प्रत्ययो भवति शैषिकः * । कृकणीयम् । पर्णीयम् । भारद्वाजइति किम् । कार्कणम् । पार्णम् ॥

इति श्रीजयादित्यविरचितायां काशिकायां वृत्तौ
चतुर्थाध्यायस्य द्वितीयः पादः ॥

काशिकायाः

चतुर्थाध्यायस्य तृतीयः पादः ।

युष्मदस्मदोरन्यतरस्यां खञ्च ॥ १ ॥

देशाधिकारो निवृत्तः । युष्मदस्मदोः खञ् प्रत्ययो भवति शैषिकः । चकाराच्छश्च । अन्यतरस्यां ग्रहणादण् यथा प्राप्तम् । तदेते त्रयः प्रत्यया भवन्ति तत्र वैषम्याद्यथासंख्यं न भवति । त्यदादित्वाद्वृद्धसंज्ञकयोर्युष्मदस्मदोश्छे प्राप्ते प्रत्येकं प्रत्ययत्रयं विधीयते । यौष्माकीणः । आस्माकीनः । युष्मदीयः । अस्मदीयः । यौष्माकः । आस्माकः ॥

---

* अणादेरपवादः । पा० २ ।
† प्रास्थीयम् । पा० २ ।
‡ इष्वनीक । पा० २ ।
§ अवस्कन्द । पा० २ ।
‖ खाण्डायनी । पा० २ ।
¶ कामवेरणि । पा० २ ।

* शैषिक इत्यस्याग्रे अणोपवाद इत्यधिकं कुत्र चित् ।

राह्णकः। विभाषा पूर्वाह्णापराह्णाभ्यामित्यस्यापवादः। आर्द्रकः। मूलकः। नक्षत्राणोपवादः। प्रदोषकः। निशाप्रदोषाभ्यां चेत्यस्यापवादः। अवस्करकः। औत्सर्गिकस्याणोपवादः। असंज्ञायां तु यथाप्राप्तं ठञादय एव भवन्ति ॥

पथः पन्थ च ॥ २९ ॥

पथिशब्दाद्वुन् प्रत्ययो भवति तत्र जात इत्येतस्मिन्विषये ऽणोपवादः, प्रत्ययसंनियोगेन च पथः पन्थ इत्ययमादेशो भवति। पथि जातः, पन्थकः ॥

अमावास्याया वा ॥ ३० ॥

अमावास्याशब्दाद् वुन् प्रत्ययो भवति वा तत्र जात इत्येतस्मिन्विषये। संधिवेलादिषु पाठादणोपवादः। अमावास्यकः। आमावास्यः। एकदेशविकृतस्यानन्यत्वादमावस्यशब्दादपि भवति। अमावस्यकः। आमावस्यः ॥

अ च ॥ ३१ ॥

अमावास्याशब्दादकारः प्रत्ययो भवति तत्र जात इत्येतस्मिन्विषये। पूर्वेण वुञणोः प्राप्तयोरयं तृतीयः प्रत्ययो विधीयते। अमावास्यः। अमावास्यकः। आमावास्यः। अमावस्यः। अमावस्यकः। आमावस्यः ॥

सिन्ध्वपकराभ्यां कन् ॥ ३२ ॥

सिन्धुशब्दादपकरशब्दाच्च कन् प्रत्ययो भवति तत्र जात इत्येतस्मिन्विषये। सिन्धुशब्दः कच्छादिस्तेनाणि मनुष्यवुञि च प्राप्ते विधानम्, अपकरशब्दादप्यौत्सर्गिके ऽणि। सिन्धुकः। अपकरकः ॥

अणञौ च ॥ ३३ ॥

सिन्ध्वपकरशब्दाभ्यां यथासंख्यमणञौ प्रत्ययौ भवतस्तत्र जात इत्येतस्मिन्विषये। पूर्वेण कनि प्राप्ते वचनम्। सैन्धवः। आपकरः ॥

श्रविष्ठाफल्गुन्यनुराधास्वातितिष्यपुनर्वसुहस्तविशाखाषाढाबहुलाल्लुक् ॥ ३४ ॥

श्रविष्ठादिभ्यः शब्देभ्यो नक्षत्रेभ्य आगतस्य जातार्थे लुग्भवति। तस्मिंस्त्रीप्रत्ययस्यापि लुक्तद्धितलुकीति भवति। श्रविष्ठासु जातः, श्रविष्ठः। फल्गुनः। अनुराधः। स्वातिः। तिष्यः। पुनर्वसुः। हस्तः। विशाखः। अषाढः। बहुलः ॥ लुक्प्रकरणे चित्रारेवतीरोहिणीभ्यः स्त्रियामुपसंख्यानम् ॥ * ॥ चित्रायां जाता, चित्रा। रेवती। रोहिणी। स्त्रीप्रत्ययस्य लुकि कृते गौरादित्वान् ङीष् ॥ फल्गुन्यषाढाभ्यां टानौ वक्तव्यौ ॥ * ॥ फल्गुनी ॥ अषाढा ॥ श्रविष्ठाषाढाभ्यां छणपि वक्तव्यः ॥ * ॥ श्राविष्ठीयः। आषाढीयः ॥

स्थानान्तगोशालखरशालाच्च ॥ ३५ ॥

स्थानान्तात्प्रातिपदिकाद् गोशालशब्दात्खरशालशब्दाच्च जातार्थे प्रत्ययस्य लुग्भवति। गोस्थाने जातः, गोस्थानः। अश्वस्थानः। गोशालः। खरशालः ॥

वत्सशालाभिजिदश्वयुक्छतभिषजो वा ॥ ३६ ॥

वत्सशालादिभ्यः परस्य जातार्थे प्रत्ययस्य लुग् वा भवति। वत्सशालायां जातः, वत्सशालः। वात्सशालः। अभिजित्। आभिजितः। अश्वयुक्। आश्वयुजः। शतभिषक्। शातभिषजः। बहुलग्रहणस्यायं प्रपञ्चः ॥

नक्षत्रेभ्यो बहुलम् ॥ ३७ ॥

नक्षत्रेभ्य उत्तरस्य जातार्थे प्रत्ययस्य बहुलं लुग्भवति। रोहिणः। रौहिणः। मृगशिराः। मार्गशीर्षः ॥

कृतलब्धक्रीतकुशलाः ॥ ३८ ॥

तत्रेत्येव। सप्तमीसमर्थात्कृतादिष्वर्थेषु यथाविहितं प्रत्ययो भवति। स्रुघ्ने कृतो वा लब्धो वा क्रीतो वा कुशलो वा, स्रौघ्नः। माथुरः। राष्ट्रियः। ननु च यत्रत्य कृतं जातमपि तत्र भवति यच्च यत्र क्रीतं लब्धमपि तत्रैव भवति किमर्थं भेदेनोपादानं क्रियते। शब्दार्थस्य भिन्नत्वाद्वस्तुमात्रेण क्रीतं लब्धं भवति शब्दार्थस्तु भिद्यत एव ॥

प्रायभवः ॥ ३९ ॥

तत्रेत्येव। सप्तमीसमर्थान् ङ्याप्प्रातिपदिकात्प्रायभव इत्येतस्मिन्विषये यथाविहितं प्रत्ययो भवति। प्रायशब्दः साकल्यस्य किंचिन्न्यूनतामाह। स्रुघ्ने प्रायेण बाहुल्येन भवति, स्रौघ्नः। माथुरः। राष्ट्रियः। प्रायग्रहणमनर्थकं, तत्रभवेन कृतत्वात्। अनित्यभवः प्रायभव इति चेद् मुक्तसंशयेन तुल्यम् ॥

उपजानूपकर्णोपनीवेष्ठक् ॥ ४० ॥

उपजान्वादिभ्यः शब्देभ्यः सप्तमीसमर्थेभ्यः प्रायभव इत्येतस्मिंन्विषये ठक् प्रत्ययो भवति। अणोपवादः। औपजानुकः। औपकर्णिकः। औपनीविकः ॥

॥ अथानन्दवृन्दावनचम्पूकाव्यस्य ॥

॥ सप्तमस्तबकावशेषः ॥

तत्र च मातृस्तनपानोत्सुकतया सत्वराग्रचरणा रणाजिरोदित्वरमहर्षि महर्षिद्धिकृति पश्चाद्गुर्विणि भगवति विलम्बमानोत्तरचरणा इव सर्ववत्सा उभयतस्त्वरात्वराभ्यां सहजतोऽपि मन्थरगतय एव बभूवुः ॥ १८४ ॥

Digitized by Google

तत्र च समुपसादनक्रियायां सर्वे वत्साः, उभयतः· अग्रतः पृष्ठतश्च, क्रमेण त्वरा·अत्वरा च ताभ्यां, तत्र त्वरायां हेतुः· मातृस्तनेनेति, अत्वरायां हेतुः पश्चाद्वर्तिनि भगवतीति। कीदृशे रणाजिरे, युद्धाङ्गने· उदित्वरम्· उदयशीलं महस्तेजो यस्य तस्मिन्, स्वजीवनरक्षके प्रेम समुचितमेवेति भावः। मङ्गसिद्धिकृति· उत्सवसंपादके· इति तत्र प्रेम्णि तादृशबुद्धिपूर्वककृतत्वशङ्कापि निरस्ता। सहजतोऽपि मन्थरगतय इति त्वरातोऽप्यत्वराया आधिक्यं बोधयति, तेन च स्वात्मदेहादितोऽपि तेषां श्रीकृष्णे प्रेमाधिक्यं द्योत्यत इति ॥ १८४ ॥

प्रविष्टे च व्रजपुरं व्रजपुरंदरनन्दने कलमधुरमुरलीरवमधुभिः कुर्वति सकललोकश्रुतिसेचनकमसेचनकमधुरिमाणि रचयति समस्तजनजीवनागमनमिव स्नेहभरनिर्भरनिर्भुग्नहृदयाभ्यां तन्मुरलीनादगुणेनाकृष्टाभ्यां पितृभ्यां प्रतोलीतलमुपसेदे ॥ १८५ ॥

श्रुतिसेचनकमिति स्वार्थे कः,असेचनकं परमानन्दकारी मधुरिमा यस्य तस्मिन्,“तदसेचनकं तृप्तेर्नास्त्यन्तो यस्य दर्शना”दित्यमरः। तत्र दर्शनादित्युपलक्षणमनुभवस्यापि, तथा दीर्घादित्वं च क्वचिदिति तट्टीकाकृतः। प्रतोली रथ्या ॥ १८५ ॥

तदनु दनुजदमनसहचराश्चराचरगुरोस्तस्यैव वत्सरान्तरकृतं कृतं तदद्यतनमिव जानन्तोऽनन्तोत्तमसंतोषतः स्वस्वजननीजननीरजस्कीक्रियमाणवपुषः सन्तो निजगदुः ॥ १८६ ॥

वत्सरान्तरे कृतं तत् कृतं कर्म· अघासुरवधलक्षणम् ॥ १८६ ॥

जननि जननि जननितान्तविस्मापकं स्मापकं चास्माकमतिसाहसपुष्करं दुरासदं रासदं कर्म कृतवान्। अस्मानपि विषमविषमहानलदग्धानविदग्धानविलम्बेनेव जीवयामास* चतुरशिरोमणिरिति वत्सरक्षणा वत्सरक्षणाहितलक्षणाः शिशवः सर्वमेवानुपूर्व्या कथयांबभूवुः ॥ १८७ ॥

स्मापकं च मन्दहास्यजनकं च अतिसाहसेन पुष्करं पुष्कलं रलयोरैक्यात्, रासो विनोदः। वत्सरः क्षणवद्येषां ते वत्सरक्षणाः। वत्सानां रक्षणे आहितलक्षणा निपुणाः, “गुणैः प्रतीते तु कृतलक्षणाहितलक्षणा”वित्यमरः। अत्र· एषु मातृभिः श्वस्तनादिव्यवसायस्य प्रश्नः, तास्वेभिरपि प्रत्युत्तरेण तदनुमोदनं, श्रीभगवत्प्रभावेण पूर्वस्वरूपेष्वपि निजतयैषां स्फूर्तेरिति ज्ञेयम् ॥ १८७ ॥

अथ घोषराजो राजोचितपरिच्छेदकरैः परिचारकनिकरैः करैकदिश्यमानैरुपचरितं चारुचरितं चारुणाक्षं प्रभूतनयं तनयं स्नानपानाहारादिभिरपसारितखेदं खे—दंदह्यमानस्य खरकिरणस्य किरणस्यन्दः कथमनेनसानेन साधुनाधुना शिरीषकोमलवपुषा सह्यत इति जनन्यानन्यातिशयवत्सलया करतलेनामृश्यमानसकलाङ्गं विश्रामाय नियोजयामास ॥ १८८ ॥

करैकेण दक्षिणकरेण· एतदेतदेवमेवं क्रियतामिति स्वयमभिनयेन दिश्यमानैराज्ञाप्यमानैः। दंदह्यमानस्य· अतिशयेन दाहकस्य खरकिरणस्य सूर्यस्य किरणस्यन्दो रश्मिधारापातः। अनेनसा· अघरहितेन, वस्तुतस्तु पञ्चम्यन्यपदार्थबहुव्रीहिणा. अघहन्त्रा। जनन्या कर्त्र्या करतलेनामृश्यमानानि सकलान्यङ्गानि यस्य तम्। कीदृश्या, न विद्यते· अन्यस्याम् अतिशयो यस्यास्तथाभूता चासौ वत्सला चेति तया ॥ १८८ ॥

गतवति भवनमध्यमध्यवसायसहस्रैरप्यनधिगम्यभावलीलेऽवलीलेहितयोगीन्द्रवृन्ददुष्करकरणे भववति व्रजपुरंदरोऽदरोत्साहसाहसिक्यवशो महिष्या समं मन्त्रयामास ॥१८९ ॥

कीदृशे, अवलीलयैव· ईहितं कृतं योगीन्द्रवृन्दैरपि दुष्करं करणं कर्म ब्रह्ममोहनादिलक्षणं येन तस्मिन्। अदरेण· अनल्पेन· उत्साहेन साहसिक्यं सहसा प्रवर्तनं तद्वशः ॥१८९॥

अयि श्रीकृष्णजननि परिचारकादिपरिच्छद इव कृष्णस्य पृथगावासोऽपि कारयितुमर्हः सहसा हसन्ती साह सन्तीह कति दिवसा अस्य जातस्य नाधुनानेन धुनानेन सकलाङ्गतापं शून्योत्सङ्गया मया भवितुं शक्यते ॥ १९० ॥

सा यशोदा· आह। कीदृशी, सहसा हसन्ती प्रश्नस्यात्यन्तायोग्यत्वमननेन कृतहासा। अस्य कृष्णस्य जातस्य सतः कति दिवसाः सन्ति ते स्वयं गण्यन्ताम्, इत्यपेक्षितस्य शेषस्यानुक्तिरपर्यालोचितचिकीर्षिते त्वयि किं प्रत्युत्तरयितव्यमिति व्यज[illegible]नार्थपोषिका। अनेन श्रीकृष्णेन, अधुना· इदानीमेव, धुनानेन दूरीकुर्वता, शून्योत्सङ्गया शून्यक्रोडया ॥ १९० ॥

स चोवाच वाचमतिकोमलाममलामयि न जानासि नासि विज्ञा विज्ञानामिदमपि किंचिदभिमानसुखं यदपत्ये जातमात्र एव तद्वैभवभवनाय प्रमोदन्ते संपन्ना हि पितरः, सुखविशेष एवायं कथमत्र शून्योत्सङ्गया भवितव्यं भवत्येति स्मितपूर्वं तूष्णीकया तया कृतानुमोदनो मोदनोनुद्यमानमानसस्तदपरेद्युरारभ्य कृष्णार्थं पृथगेवात्मपुरसदृशमात्मपुरलग्नमेव पुरं कारयामास ॥ १९१ ॥

*—मास च चतुर—इति पा०।

Digitized by Google

इत्यानन्दवृन्दावने कौमारलीलालताविस्तारे वत्सकवत्सकाघासुरवधपुलिनभोजनब्रह्मसंमोहनो नाम सप्तमः स्तबकः ॥ ७ ॥ :: :: ॥

संपन्ना धनादिमन्तः, तूष्णीकया मौनवत्या कृतानुमोदन इति, "मौनं संमतिलक्षण"मित्युक्तेः, मोदेन नोनुद्यमानम् अतिशयेन प्रेर्यमाणं मानसं यस्य सः ॥ १९१ ॥

इत्यानन्दवृन्दावनचम्पूकाव्यटीकायां सुखवर्तिन्यां सप्तमस्तबकसंगमनम् ॥ ७ ॥ :: :: ॥

॥ अथानन्दवृन्दावनचम्पूकाव्यस्य ॥

॥ अष्टमस्तबकारम्भः ॥

अथ कौमारलीलां तिरोधाप्य क्रमानुरोधाप्यक्रमानुत्तमवयोऽवस्थावस्थानस्वीकारेणाविर्भावितपौगण्डो गण्डोड्डमरतारतामन्दहसितासवः स वने विस्मृतधूलिखेलोऽलिखेलोड्डमरकुसुमकन्दुकखेलापरोऽपरोक्षघनरसो रसोत्सवकरोऽवकरोज्झितनिखिलगुणैः सह सहचरैर्वत्सरक्षणक्षणमपहाय हायनानीतो धेनुपालनलीलालीलावण्यमुरीचकार १ ॥

अथ पौगण्डकैशोरलीले युगपदुद्गते ।
कृष्णस्य गुरुभिः कान्तावर्गैरास्वादिते क्रमात् ॥
पूर्वरागो व्रजस्त्रीणां कृष्णजन्मतिथौ महान् ।
उत्सवः कन्दुकक्रीडा धेनुकस्य वधोऽष्टमे ॥

क्रमानुरोधेन· आप्यः प्राप्यो यः क्रमः परिपाटी, "क्रमः शक्तौ परीपाट्या" मिति विश्वः, तेन· अनुत्तमाया वयोऽवस्थाया अवस्थितिस्वीकारेण· आविर्भावितं पौगण्डं येन सः । गण्डयोः कपोलयोरुड्डमरता उच्चतिस्तस्याम्· आरतम्· अमन्दहसितमेव· आसवो मधु यत्र सः । स श्रीकृष्णः । अलीनां भ्रमराणां खेलया· उड्डमरैरुच्चतैः कुसुमैरेव कन्दुकैः खेलापरः । रसायाः पृथिव्या उत्सवकरः । अवकरो मालिन्यम् । हायनातीतः हायनान् संवत्सरपरिवत्सरेडावत्सरानुवत्सरवत्सरान् पञ्च· अतीतः षड्वर्षवयाः, ऐश्वर्यपक्षेऽपि कालातीतः । लीलानामाली श्रेणी तस्या लावण्यम् ॥ १ ॥

एवमस्य पौगण्डे वयसि कैशोरप्राग्भाव इव क्रमविरलायमाणतारल्यतया प्रथमारब्धगाम्भीर्यस्वाध्यायमिव गमनं शैशवदशासहचरीविरहेण मलिनमुखीभावमनुसरन्तीव लोमलतिका क्व गतमस्य बालचापल्यमिति सुहृद्विच्छेदेनेव क्रमचीयमाणमवलम्बं क्व गतमस्य शैशवतारल्यमिति तदनुसंधानमधुरंधरतयेव चापल्यमभ्यस्यन्ती इव नयनकमले ॥ २ ॥

बालचापल्यं बालैः सह चापल्यं धावनकूर्दनाद्युपयोगि ॥ २ ॥

सुकविकाव्यमिव· अस्थानस्थपदादिदूषणरहितमुदितम् ॥ ३ ॥

पदादीत्यादिशब्दात् पदैकदेशः, उदितं वाक्यम् ॥ ३ ॥

किं बहुना,

अधिमधुदिनमनुपर्वकर्वुरितनवाङ्कुरकन्दलदलद्रामणीयकनवतमालकडम्बविडम्बकम् ॥ ४ ॥

तदा तस्य तदपि वपुरपूर्वमिवासीदित्यन्वयः । कीदृशम्, अधिमधुदिनं वसन्तदिवसेषु· अनुपर्व पर्वणि पर्वणि प्रतिग्रन्थि· इत्यर्थः, कर्वुरितैः किर्मीरायितैर्नवाङ्कुरकन्दलैर्दलत् प्रस्फुटद् रामणीकं रमणीयत्वं यस्य तथाभूतस्य नवतमालकदम्बस्य विडम्बकं स्वरोमावल्याद्युद्गमशोभया तिरस्कारकम् ॥ ४ ॥

प्रत्यङ्गरङ्गितरङ्गितविशेषमाधुरीधुरीणमन्तरुत्पद्यमानमधुपरागमधुपरागभागभिनवकुड्मलीभावभावहितं कुसुममिव ॥ ५ ॥

प्रत्यङ्गम्· अङ्गस्याङ्गस्य, रङ्गी रङ्गसूचको यस्तरङ्गितविशेषस्तेन या माधुरी तस्या धुरीणं वहनसमर्थं, तरङ्गितेति क्यङ्यर्थक्विबन्ताद्भावे निष्ठा । पौगण्डमात्रत्वेऽपि· अन्तर्गतकैशोरधर्मसूचकत्वे दृष्टान्तः, अन्तरुत्पद्यमानाभ्यां मधुपरागाभ्यां मकरन्दधूलिभ्यां मधुपस्य भ्रमरस्य रागं भजते तथाभूतं च· अभिनवस्य कुड्मलीभावस्य भा कान्तिस्तत्रावहितं सावधानम् दार्ष्टान्तिकपक्षे मधु रमणाभिलाषः परागस्तदुचितधीरलालित्योपयोगिनी चेष्टा, मधुपोऽत्रानङ्गः । उत्पद्यमानेति वर्तमानकालत्वं क्षणक्षणवृद्धिसूचकम् ॥ ५ ॥

अपाकनिष्कषायमृदुमधुरलुलितं श्यामलतायाः लतायाः फलमिव ॥ ६ ॥

ननु तथापि प्रकटपौगण्डमात्रकत्वे तस्य कथं शृङ्गारत्वेन सौरस्यं तत्राह· अपाकम्· अप्राप्तपाकं, किंच, निष्कषायं कषायदशामतिक्रान्तं, मृदु कोमलं मधुरं सुस्वादु लुलितं लोभ्यं किमप्यनिर्वाच्यं फलमिति, तेन प्रथमपौगण्डेऽप्यस्यातितेजस्वित्वात् पौगण्डशेषं प्राप्तमिव, प्रथमकैशोरं स्पृष्टवदिव वपुरभूदित्यर्थः ॥ ६ ॥

स्वयमेव रत्नान्तरेण परिवर्तितविशिष्टरत्नान्तरायमाणैरिव लावण्यविशेषैरुपचीयमानम् ॥ ७ ॥

तदेव स्पष्टयति, रत्नान्तरेण बाल्यसंबन्धिलावण्येन परिवर्तितं विशिष्टरत्नान्तरं कैशोरवर्तिलावण्यं तद्वदाचरद्भिः ॥ ७ ॥

मदमुदितमातङ्गकुलमिव सदानवापीनवक्षोभं वक्षोभङ्गिमसङ्गिमधुरिमांसमांसलताभ्यां तदप्यन्यदिव प्रतिभासमानमसमानमञ्जुलमखिललोकलोचनचमत्कारकारणं वपुरपूर्वमिव तदा तदासीत् ॥ ८ ॥

दानवाप्या सूचितो यो नवक्षोभस्तेन सह वर्तमानं, "वापी तु दीर्घिके"त्यमरः, पक्षे सदा नवा नवीना आपीनस्य वक्षसो भा यत्र तत् । वक्षसि भङ्गिमसङ्गी लम्पटत्वासञ्जको यो मधुरिमा अंसयोः स्कन्धयोर्मांसलता च ताभ्यां, "भङ्गो धूम्यादविद्धयो"रिति विश्वः, भङ्गस्य भावो भङ्गिमा विद्धत्वम् ॥ ८ ॥

अथमवसरे भगवदुपमासपत्ना मासपत्नानन्तरं भगवदवतारस्य या अनुधरणि धरणिधरेन्द्रदुहितृसुन्दरतादरताकारिण्यो भगवतः प्रियतमा यतमानास्तस्यैव नित्यसङ्गित्वेऽङ्गित्वे च प्रथमरसस्य रसस्यन्दरूपा अवतेरुः ॥ ९ ॥

भगवदुपमानां नीलमणिमेघनीलोत्पलादीनां सपत्नाः कनकविद्युच्चम्पकादयो रूपकाणि वर्तन्ते यासु ताः, धरणिधरेन्द्रदुहितुः, पार्वत्या अपि सुन्दरतायाः सौन्दर्यस्य दरताकारिण्योऽल्पताकारिण्यः प्रियतमाः श्रीराधिकाद्याः, तस्यैव भगवतो नित्यसङ्गित्वे यतमानाः क्रियमाणयत्नाः प्रथमरसस्य शृङ्गारस्य अङ्गित्वे मुख्यत्वे निमित्ते च यतमानाः, तासां तादृशीश्चेष्टा विना तस्य मुख्यत्वमेव महात्मभिरनादृतं स्यादिति, यथोक्तं, ॥

"हरिरेव न चेदवातरिष्य
न्मधुरायां मधुराक्षिराधिका च ।
अभविष्यदियं वृथा विसृष्टि-
र्मकराङ्कस्तु विशेषतस्तदात्रेति ॥ ९ ॥

इति ।

तासामपि कौमारापगमे ऋजूभूय वर्धिता मञ्जरीव तिरश्चीना दृष्टिः हेमन्तदिनमिव क्रमहीयमानं हसितं, काव्यगुणविशेष इव वाक्यार्थेऽपि पदमात्रप्रयोगो व्याहारः, वलीकप्रान्तनिस्स्यन्दी निर्वृष्टजलधरजलबिन्दुसंदोह इव क्रममन्दमन्दश्चरणविहारः ॥ १० ॥

काव्यगुणेति, तथा चोक्तं, "पदार्थे वाक्यरचनं वाक्यार्थे च पदाभिधे"ति । पदमात्रेति, न तु बाल्यवदिदानीमपि वचनप्राचुर्यमित्यर्थः, यथा सुन्दरि कमवलोकसे इति सख्या पृष्टा सुस्निग्धनीरदं सस्पृहमीक्षमाणा काचित् तां प्रत्याह आसेचनकमिति, "तदासेचनकं तृप्तेर्नास्त्यन्तो यस्य दर्शना"दित्यमरः । एवमेव वाक्यार्थेषु अभिसारिका कुञ्ज इत्यादिपदमात्रप्रयोगो ज्ञेयः । वलीकं छदिप्रान्तदेशः तस्मादपि प्रान्तान्निस्यन्दी क्षरणशीलः । निर्वृष्टो वृष्टिं कृत्वा विरतो जलधरो मेघो यस्य तथाभूतो जलबिन्दुसमूह इव ॥ १० ॥

दीनलब्धमहारत्नमिव जनलोकनसंकोचाच्छन्नं वचः, अर्घपात्रमिव अवगुण्ठनमुद्रयावगुण्ठितमुत्तमाङ्गम्, अन्तर्वर्तिरत्नशलाकं मृणालशकलमिव कौमारापगमेन निष्कृष्टमपि कयापि देवतयेव जुष्टं मानसं, कौमारपरिचितानपरिचितानिव विषयान् कुर्वाणं ज्ञानम् ॥ ११ ॥

जनलोकनसंकोचेनैवाच्छन्नं न तु वस्त्राच्छादनमपि कर्तुं शक्यत इति भावः, तथात्वे आत्मनो युवतित्वख्यापने लज्जा स्यात् । उत्तमाङ्गं शिरः । अन्तर्वर्तिनी रत्नशलाका यस्य तथाभूतं मृणालखण्डमिव मानसमिति, मनसो बाल्यसूचकं सारल्यं प्रकटलक्ष्यमाणमपि यौवनस्पर्शेनासारल्यगर्भं जातमित्यर्थः, कौमारस्यापगमे विरामे विषयेण निष्कृष्टमपि निष्कर्षमप्राप्तमपि, संदिग्धमपीति यावत्, कयापि कामोन्मादाङ्कुररूपया । कौमारे परिचितान् रथ्याधूलिक्रीडितादीन् विषयान् अपरिचितानिव कुर्वाणं ज्ञानम् ॥ ११ ॥

आरुण्यं करतलयोः, पीयूषरश्मिता वदनबिम्बे, अङ्गारकतानङ्गे, सौम्यता दृङ्निपाते, गुरुता श्रोणौ, काव्यता वचने, शनैश्चरता चरणयोः, तमस्ता केशपाशे, केतुत्वं गुणगणेषु, इति नवैव ग्रहा आश्रममिव चक्रुः ॥ १२ ॥

अनुभावशोभासंपत्तिं वर्णयित्वा तात्कालिकीमङ्गशोभासमृद्धिमपि वर्णयति आरुण्यं रक्तिमा, पक्षे अरुणः सूर्यस्तस्य भाव आरुण्यम् । पीयूषममृतं तदिव सुरसा रश्मयो यत्र तत्ता, पक्षे पीयूषरश्मिश्चन्द्रः । अङ्गानि इयर्ति प्राप्नोतीति, "ऋ गतौ"वित्यस्माण्ण्वुलि अङ्गारकः, पक्षे मङ्गलग्रहः । "सौम्यो बुधे मनोज्ञे स्यादनुग्रे सोमदैवते" इति विश्वः । शनैः शनैश्चलत इति शनैश्चरौ चरणौ, पक्षे शनैश्चरो मन्दः । तमोऽन्धकारो राहुश्च । केतुः पताका तन्नामा ग्रहश्च । अत्राङ्गपक्षे तमस्ता केतुत्वमित्येतद्द्वयमाचारार्थक्विबन्तात्कर्तृवाचकवद्भावप्रत्ययेन सिद्धम् । अत एव केतुत्वमित्यत्र द्वितकारकः संयोगस्तुक्, अनचि चेति द्वित्वेन च । यद्वा भवति हि ताद्धर्म्यात्ताच्छब्द्यमिति लक्षणयैव सेत्स्यति, अलमेतावता कष्टेनेति ॥ १२ ॥

Digitized by Google

किंच,

चरणचाञ्चल्यं नयनेन मध्यगौरवं श्रोणीभारेण स्थानतानवमुदरेण वचनचातुर्यं माधुर्येण हृतमिति शैशवाधिकारे नश्यति सत्यङ्गादीनां परगुणविशेषलुण्ठाकतासीत् ॥ १३ ॥

तानवं कृशता ॥ १३ ॥

किंच,

अणिमा मध्यमे महिमा श्रोणिभारे लघिमा वचसि प्राप्तिरपत्रपायां कामावसायिता मनसि ईशिता लावण्ये वशिता नयनकोणयोः प्राकाम्यं माधुर्ये इति सिद्धयोऽपि तदा तासु प्रादुरासन् ॥ १४ ॥

अणोर्भावोऽणिमा कार्श्यं, महतो भावो महिमा स्थौल्यं, लघिमा अल्पता, कामावसायिता कन्दर्पव्यवसायः, ईशिता ऐश्वर्यं, वशिता वशीकरणं, प्राकाम्यं परिपूर्णता ॥ १४ ॥

येन खलु सुरभीकृतमिव व्रजनगरं रञ्जितमिव सकलमेव भुवनं संपादितमिव कुसुमधनुषो जनुषः साफल्यं शोधित इव शृङ्गाराख्यो रसः मार्जिता इव सर्वे भावाः सरसीकृतमिव लीलाविलसितं श्रीकृष्णस्य कृतार्थीकृतमिव कविकुलवाङ्गिर्माणम् ॥ १५ ॥

येनेत्यादीनां तासां स कोऽपि हृद्विकारः समजनीत्यनेनान्वयः ॥ १५ ॥

येन च तासामपि उत्कलिका उत्कलिका, मनोभूर्मनोभूः, मनोरथो मनोरथो, रतिरतिद्राघीयसी, त्रपात्रपारशून्या, साध्वसं साध्वसंकोचम्, उच्चैररतिररतिग्मा, अनुत्साहोऽनुत्साहो, वैमनस्यं वै-मनस्यन्दुकप्रायम्[1] ॥ १६ ॥

उत्कलिका उत्कण्ठा, कीदृशी, उद्गता कलिकेव यस्यास्तथाभूता, अबहिः प्रकाशितगुणेत्यर्थः । मनोभूः कन्दर्पः, कीदृशः, मनोभूर्मनस्येव भवति, न बहिः प्रकाशितव्यापार इत्यर्थः । मनोरथः श्यामसुन्दरेण सह रंस्यामहे इत्येवंलक्षणः, मन एव रथोऽधिकरणं यस्य सः । अत्र त्रपा लज्जा । साध्वसं जनशङ्का, साधु यथा स्यात् तथा न विद्यते संकोचोऽल्पता यस्य तत्, परिपूर्णमेवेत्यर्थः । अरतिः अनिर्वृत्तिः, अरं द्रुतं तिग्मा तीक्ष्णा । अनुत्साहः कथंभूतः, नुदं खण्डनं न सहत इति दुश्चिकित्स्य इत्यर्थः, असूर्यंपश्या इति वत् । यद्वा न उत्साहोऽनुत्साह इति नञा पश्चात् संबन्धः । वैमनस्यं दुर्मनस्कता वै निश्चितं मनसि अन्दुकम् निगडप्रायम् । "अन्दुको निगडोऽस्त्रिया"मित्यमरः ॥ १६ ॥

यश्च षष्टिकशालिरिव अन्तरे परिपाकं व्रजन्नपि न बहिर्विकाशी परिजनैरनुयोज्यमानोऽपि निन्हूयमानः ॥ १७ ॥

षष्टिकशालिः षाठीति ख्यातं धान्यम् । अनुयोज्यमानः पृच्छमानः "प्रश्नोऽनुयोगः पृच्छा" चेत्यमरः ॥ १७ ॥

रस इव अशब्दवाच्यः, मुख्यार्थ इव न कदापि लक्ष्यः, निरूढलक्ष्यार्थ इव अव्यङ्ग्यः ॥ १८ ॥

अशब्दवाच्यः शब्देनाभिधातुमशक्यः, रसस्यानुभवैकगोचरत्वात्, तथात्वे चारसतैव स्यात्, दूषणं च, यथोक्तं, "व्यभिचारिरसस्थायिभावानां शब्दवाच्यते"ति, पक्षे तद्वाचकशब्दस्ताभिर्न प्रयुज्यते । मुख्यार्थः संकेतितः, यथा गङ्गादिशब्दानां प्रवाहादिलक्षणोऽर्थः, कदापि न लक्ष्यो लक्षणावृत्तिगम्यो न भवति पक्षे अन्यैर्दुर्लक्ष्यः । अव्यङ्ग्यः, न विद्यते व्यंग्यं यत्र सः कुशलमण्डप इत्यादौ, पक्षे ताभिर्व्यञ्जनयापि न प्रकाश्यः ॥ १८ ॥

अन्तर्विघूर्णमानोऽपि सुस्थिरः, उद्वेगजनकोऽप्यनुद्वेगः, संनिपातज्वर इव अस्थिसंध्यादिविमर्दकरः सततं तृष्णाजनकश्च, तासां स कोऽपि हृद्विकारः समजनि ॥ १९ ॥

न विद्यते नुत् खण्डनं यस्य तथाभूतो वेगो यस्य सः अनुद्वेगः अखण्ड्यवेग इत्यर्थः । तृष्णा पिपासा संभोगेच्छा च ॥ १९ ॥

यस्तु *अविपक्वमरसभावितं तासामन्तरं वंशमिव घुणः संततमेव निकृन्तति ॥ २० ॥

यस्तु इति तुकारः पूर्वतो भिन्नक्रमार्थः । तादृशमन्तरं प्रति तस्य घुणसाधर्म्यं तु स्वरूपलक्षणमिति ज्ञापनाय ॥ २० ॥

तस्मिन् सति लवलीफलपाण्डुरं कपोलतलम्, आतपशुष्यमाणकिशलयमिवोष्ठाधरं, सावश्यायनीलनलिनदलमिव नयनयुगलं, निदाघदिनमिव दीर्घोष्णं श्वसितम्, अज्ञजनहृदयमिव अन्तः शून्यमवलोकनम्, आत्मारामप्रस्थानमिव उद्देश्यशून्यं पदविहरणं, ग्रहग्रस्तदशापन्नजनचरितमिव अनवस्थितं वचनं, निर्विण्णजनशीलमिव गृहादिकार्यपराङ्मुखं व्यवसितमिति स्थिते ॥ २१ ॥

अवश्यायो नीहारः । दीर्घं च तदुष्णं चेति दीर्घोष्णम् । उद्देश्यशून्यं गन्तव्यदेशनिश्चयाभावात् संस्कारवशेनेत्यर्थः । एवमत्र ।

"लालसोद्वेगजागर्यास्तानवं जडिमात्र तु ।
वैयग्र्यं व्याधिरुन्मादो मोहो मृत्युर्दशा दश" ॥

---

१ कर्ण्यातिरिक्तविषयस्पृहा ॥

* रपि पक्व—इति पा० ।

इति पूर्वरागोक्ता दशा अप्युक्तेषु यथायोगं सूचिता विविच्य ज्ञेयाः। यथा· अन्तर्विघूर्णन्यत्र लालसा, उद्वेगजनकइति उद्वेगः, संनिपातेति व्याधिः, लवलीफलेति पुनर्व्याधिः, आतपेति मोहः, सावश्यायेति जागर्या, निदाघेति व्याधिः, अञ्जनेति जडिमा आत्मारामेत्युद्वेगः, यदयस्तेत्युन्मादः, निर्विण्णजनेति तानवम्, अविपक्केति मृतेरुदर्कताज्ञापनम् ॥ २१ ॥

सहजवर्ती जवर्तीयो गृहादिषु तासां भगवति भावो भावोध्यतया नव इव लक्ष्यमाणो वक्ष्यमाणो यदा नाभूत् ॥ २२ ॥

यदि तासां भगवति भावो भगवच्चिष्ठो भावो वक्ष्यमाणो नाभूत्, मनोमध्य एवायमस्माभिर्निह्नवनीयः, कथमपि सखीभ्योऽपि न वक्तव्य इति निश्चितोऽभूदित्यर्थः । कथंभूतो भावः, गृहादिषु जवर्तीयः, जवेन वेगेन ऋतीया घृणा यस्मात् न चायमागन्तुकः, किंतु सहजवर्ती स्वाभाविकः । तथापि भा कान्तिस्तया बोध्यतया ज्ञेयत्वेन नवो नवीन इव लक्ष्यमाणः ॥ २२ ॥

तदादुः सहचर्यो दुःसहचर्योपचारसंचारसमये तत्तद्धृदयज्ञतया ज्ञतया च तमवगम्यापि तद्विशेषावगतये गतयेव धिया श्रीकृष्णस्य तनुमहसः सादृश्यं दृश्यं वहन्ति नवेन्द्रमणिमयालंकरणान्यलं-करणान्यथाभावकारीणि सुरञ्जनान्यञ्जनान्यवतंसीकरणार्थमानीतान्यामोदितकुवलयानि कुवलयानि पुरतः समानीय ॥ २३ ॥

तदा सहचर्यो नवेन्द्रमणिमयालंकरणादीनि पुरतः समानीय· अदुरित्यन्वयः । कदा, दुःसहाया असह्यायाः, चर्यायाः पूर्वरागजन्यायाः स्थितेर्य उपचारस्तस्य संचारसमये । ज्ञतया विदग्धतया । तं कृष्णनिष्ठं भावं ताभिरप्रकाशितमपि· अवगम्यापि सामान्याकारेण ज्ञात्वापि तस्य विशेषस्य· अवगतये गतया प्राप्तया· इव धिया । तानि सर्वाणि कीदृशानि, कृष्णास्याङ्गकान्तेर्दृश्यं मनोरमं सादृश्यं वहन्ति । अलम्· अतिशयेन करणानां नेत्रत्वगादीन्द्रियाणामन्यथाभावकारीणि· अश्रुरोमाञ्चादिमत्त्वकारीणि । आमोदितकुवलयानि सुवासितभूमण्डलानि कुवलयानि नीलोत्पलानि ॥ २३ ॥

प्रियसख्यः पश्यत, श्यत नयनयोरनयोरसारस्यं, रस्यं कृष्णरुचिरुचिरं नेपथ्यं पथ्यं गोरेष्वङ्गेषु भवतीनामिति यदूचिरे अचिरेण तदा तानि कृष्णाङ्गवर्णसदृशानि दृशा निभाल्य, कृष्णनाम च नाम चरितं श्रुतिपथे समनुभूय, भूयस्त्वेन विपुलपुलकान्यङ्गानि धौतकज्जलानि जलानि वहन्तीर्दृशो बहिरिव निःसरन्ति श्वसितानि श्वसितानि धारयमाणासु रयमाणासु च कामपि दशां, कामपि सहचरीं चरीकरीति स्म प्रणयपरीहासमिव ॥ २४ ॥

असारस्यं तापं श्यत दूरीकुरुत,"शो तनूकरणे" इत्यस्य रूपम् । रस्यं रसार्हं नेपथ्यं भूषणम् । नाम प्राकाश्ये, श्रुतिपथे कृष्णनाम, चरितं चलितं, प्रविष्टमित्यर्थः, अनुभूय·आस्वाद्य कामपि दशां रयमाणासु प्राप्नुवतीषु, जलानि वहन्तीर्दृशो दृष्टीर्बहिर्निःसरन्ति श्वसितानि·इव बहिर्गच्छतः प्राणानिव श्वसितानि श्वासान् धारयमाणासु, तासु मध्ये कामपि मुख्यां सखीम् । चरीकरीतीति यङ्लुगन्तं पदम् ॥ २४ ॥

आः कष्टमालि मालिन्यं हृदि मे जातं, यदिदमञ्जनमीक्षितमेव ते नयनजलजं जलजङ्घालतास्तिमितमकरोत्, इदमपि पुरंदरमणीन्द्राभरणमपिनद्धमेव विपुलपुलकमयीं चकार वपुर्यष्टिम्, इदमपीन्दीवरजालमनाघ्रातमेव स्फीतसरसामिव गन्धवहां गन्धवहां संपादयामास, नयनादौ कृतानि पुनः किं करिष्यन्तीमानीति ॥ २५ ॥

ईक्षितमेव सत्· अञ्जनं कर्तृ जलेन जङ्घालतया· अतिवेगेन स्तिमितम्· आर्द्रितं, "जङ्घालोऽतिजवे" इत्यमरः । अपिनद्धम्· अपरिहितमेव सत् । गन्धवहां नासां गन्धवहां दूरादेव· ईषद्गन्धं वहन्तीं सतीम् । स्फीता स्फुल्ला चासौ सरसा चेति तथाभूतां संपादयामास । अत्र नामाफुल्लत्वनासाद्वौ कृष्णाङ्गगन्धसाजात्यानुभवेन जातौ ॥ २५ ॥

मा नीतिपरोऽयं सखीजनः सखि स खिद्यति खिद्यति ॥ २६ ॥

अयं सखीजनो मा नीतिपरो न नीतिज्ञः, हे सखि स प्रसिद्धो, मल्लक्षण इत्यर्थः, खिद्यति,खेदं प्राप्नोति, हे खिद्यति, खित् संपदादिक्किपा खेदः,तां यती गच्छन्ती प्राप्नुवती, तस्याः संबोधने हे खिद्यति ॥ २६ ॥

तदिह तत्त्वं तत्त्वं कथय, किमेषामेव शक्तिविशेषः-किं भवतीनामेव मनसः कोऽपि विकार इति स्थिते सर्वासामेवानुरागिणीनामूढानूढानां सर्वा एव सहचर्यः परमगुणोत्तराः ॥ २७ ॥

तत् तस्मादिह तत् प्रसिद्धं तत्त्वं त्वं कथय, ऊढानां गोपेव्यूढानां श्रीराधाचन्द्रावल्यादीनाम्, अनूढानां धन्यादिकन्यानां, सर्वा एव सहचर्यस्तासां भावपरीक्षणे क्षणवशाः कौतुकवशा बभूवुरित्यन्वयः ॥ २७ ॥

Digitized by Google

यासां निन्दितकमलाचरणानि चरणानि ॥ २८ ॥

निन्दितं कमलाया लक्ष्म्या अपि· आचरणं स्वाङ्गप्रसाधनादि कर्म येस्तानि, एतच्चरणस्यस्वाभाविकसौन्दर्यमपि लक्ष्म्या भूषणादिप्रसाधितसमस्ताङ्गेष्वपि नास्तीति भावः ।

न चात्र व्यतिरेकालंकारेण चरणैः पद्मशोभावेव इति शक्यते व्याख्यातुम्, अग्रे मुखैरेव पद्मशोभाखण्डनस्य वर्णयिष्यमाणत्वेन पौनरुक्त्यापत्तेः,

न च चरणादिमुखान्तानामङ्गानां प्रत्येकमुपमाखण्डनप्रक्रमस्य भङ्गः, लक्ष्मीसर्वाङ्गतिरस्कारिशोभत्वेन चरणानामपि सामान्याकारेण तथात्वस्य भङ्ग्योदितत्वात् ।

तथा· "इन्दिरामृग्यसौन्दर्यस्फुरदंघ्रिनखाञ्चले"ति महानुभावसर्वज्ञकविचूडामणिश्रीमद्रूपगोस्वामिवर्णितराधासाक्ष्यधारिविशाखादीनां तथोत्कर्षस्य सिद्धान्तविरुद्धत्वाभावेन प्रस्तुतोपयोगित्वाच्च । एतदेव साधु व्याख्यानमिति ॥ २८ ॥

विहतशोभारम्भा रम्भातरवः, कामसिंहासनह्रासनकारीणि श्रोणिबिम्बानि, धिक्कृतडमरुमध्यानि मध्यानि, यासां च कुचकोरकैरपि कृतानि सौन्दर्येषु विफलानि फलानि दाडिमीलतानाम् ॥ २९ ॥

विशेषेण हतशोभो रम्भाणामारम्भो येभ्यस्ते । कामस्य यत् सिंहासनं तस्य ह्रासनकारीणीति, एतत्तुल्यं कामस्य राजपट्टभूतसिंहासनमन्यन्नास्तीत्यत्रैव कामः साम्राज्यार्थमास्ते, इति भावः । दाडिमीलतानां फलानि सौन्दर्येषु विफलानि कृतानीत्यन्वयः ॥ २९ ॥

दशनवसनैरपहृतशोणिमसौरभ्यादिबन्धुजीवानि बन्धुजीवानि जातानि, दशनैः पराजितानि मनोरमाणि माणिक्यशकलानि ॥ ३० ॥

बन्धुजीवानि बन्धुजीवकुसुमानि यासां दशनवसनैरपहृतशोणिमसौरभ्यादिबन्धुजीवानि जातानीत्यन्वयः । अपहृतः शोणिम्नः शोणत्वस्य सौरभ्यस्य· आदिशब्दात् प्रकाशस्य च बन्धुरूपो जीव आत्मापि येषां तानि ॥ ३० ॥

नासापुटैरवधीरिता मुहुरधोमुखकामेषुधिरधोमुखकामेषुधिषणा च कटाक्षैः ॥ ३१ ॥

अवधीरिता तिरस्कृता· अधोमुखो कामस्य·इषुधिस्तूणः। लज्जया अधोमुखस्य कामस्य इषुषु या धिषणा संधानवती बुद्धिः सा च कटाक्षैरवधीरिता ॥ ३१ ॥

नयनैरपि तिरस्कृतानि विलसत्कालिकालिन्दीवरेन्दीवरे हितानि ॥ ३२ ॥

विशेषेण लसत् कं सुखं येषां तथाभूता अलयो भ्रमरा येषु तेषां कालिन्दीसंबन्धिश्रेष्ठेन्दीवराणाम्·ईहितानि विकाशान्दोलनादीनि नयनैस्तिरस्कृतानि ॥ ३२ ॥

विधूयमानवदनविधूयमानवदनालंकृतकमलानि कमलानि ॥ ३३ ॥

उपमानादाचारे क्यङ। विधूयमानैर्विधुतुल्यैर्वदनैर्विधूयमानवद् विशेषेण कम्पमानानीव खण्ड्यमानानीव वा कमलानि पद्मानि जातानीत्यर्थः,इवार्थकेन वद्धप्रत्ययेन सह समासः । अत एव· अनलंकृतम्· अभूषितं कमलं जलं येभ्यस्तानि,"सलिलं कमलं जल"मित्यमरः । यासां सख्य एव· ईदृशसौन्दर्यास्ता यूथपाः केन कविना वर्णयितुं शक्या इति न ता वर्णिता इति द्योतितम् ॥ ३३ ॥

तास्ताः स्वस्वयूथपायूथपारवश्यं गता गताशङ्कं तासां भावपरीक्षणक्षणवशा बभूवुः ॥ ३४ ॥

स्वस्वयूथपानां यूथे पारवश्यं वशतां गताः प्राप्ताः ॥ ३४ ॥

नित्यसिद्धानामासां नित्यसिद्धा-नामासांमुख्यं नार्हति कदाचिदपि सा रसरीतिः, न च सा वयस्कृतेति, वयस्कृतेतिकर्तव्यता च तस्या इति कैशोरागमे रागमेदुरता च तासां न विस्मयजनिका, जनिकालसमकालमेवाजनि काचिदभिव्यक्तिरेव कैशोरे· इति रहस्ये ॥ ३५ ॥

आसां नित्यसिद्धानां सा रतिरीतिरपि नित्यसिद्धा कदाचिदपि· असांमुख्यंश्रीकृष्णानुन्मुखतां नार्हति, नाम प्राकाश्ये, इत्युक्तहेतोरेव सा रसरीतिः प्राकृतानामिव न च वयस्कृता न कैशोरवयोजनिता । तथा तस्या रसरीतेः· इतिकर्तव्यता तत्तद्व्यापारश्च न च वयस्कृता । कैशोरस्यागमे प्राप्ते तासां रागस्य मेदुरता· अनुरागस्य निबिडता न विस्मयजनिका, नित्यसिद्धरतिक्रीडावतीनामप्यासां कैशोर एव लौकिकरीत्या किमिति पूर्वराग इति विद्वज्जनविस्मयं नोत्पादयतीत्यर्थः । तत्र समाधत्ते जनिकालेति, रहस्ये· इत्यतिगोप्यसिद्धान्तस्वे स्थिते सतीत्यर्थः ॥ ३५ ॥

रहस्येका काचिदमृतवल्लिशाखाविदग्धमधुरा मधुराधरमात्मनः प्रियसखीं राधां निगदति स्म ॥ ३६ ॥

रहसि विविक्तदेशे, एका सखीषु मुख्या ॥ ३६ ॥

सुमुखि कथमकस्मादेष ते हृद्विकारः
प्रणयिपरिजनानां प्राणसंबाधकारी ।
समजनि जनिमात्रेणैव यातश्च पाकं
तदपि न चतुराणामप्ययं तर्कगम्यः ॥ ३७ ॥

पाकं विपरिणामं यातः प्राप्तः ॥ ३७ ॥

Digitized by Google

यतः,

क्व तेऽध्ययनकौतुकं क्व शुकसारिकाध्यापना
क्व बर्हिनटनेक्षणं क्व परिवादिनीवादनम् ।
क्व हासपरिहासिनी प्रियसखीजनैः संकथा
किमालि वनमालिना तव मनोमणिश्चोरितः ॥ ३८ ॥

कथमसाववसित इति चेत्, तत्राह क्व ते इति, परिवादिनी वीणा ॥ ३८ ॥

नैतदसंभावनीयं, नहि कुमुदबान्धवमन्तरेण कुमुद्वती मुद्वती भवितुमर्हति ॥ ३९ ॥

मुद्· आनन्दस्तद्वती ॥ ३९ ॥

तपनमण्डलमन्तरेण कमलिनी मलिनीभावमर्हत्ये व ॥ ४० ॥

ननु शीतलस्वभावे कुमुदबान्धवे कुमुद्वती मोदतां नाम कृष्णस्य तु तथात्वमनिश्चित्य कथं प्रीतिस्तत्र कर्तुमुचिता बहुवल्लभत्वेन तत्र कठिनचरितत्वस्यापि संभवात्, तत्राह तपनेति, कान्तस्य तैक्ष्ण्यं प्रणयिन्याः सुखायैव भवतीति भावः ॥ ४० ॥

नापि स्वमुदि मुदिरमन्तरेण सारङ्गी सारङ्गीतमन्यस्य मन्यते ॥ ४१ ॥

ननु कथं तत्रैव प्रीतेरैकान्तिकत्वप्रतिनिश्चयस्तत्राह नापीति, स्वस्य मुदि हर्षे सारङ्गी चातकी मुदिरं मेघं विना· अन्यस्य गीतं सारं न मन्यते, मेघे चातकीनामिव कृष्णे गोकुलबालानामौत्पत्तिक एव तथाभाव इति भावः ॥ ४१ ॥

नापि कुसुमधन्वानमन्तरेण रतिरतिरतिमती क्वापि भवति ॥ ४२ ॥

ननु तथापि मेघचातक्योः परस्परसापेक्षत्वशोभासादृश्याभावः स्पष्ट एव, विनापि चातकीर्मेघशोभाया अप्रच्युतत्वदर्शनादित्यत आह नापि कुसुमेति ॥ ४२ ॥

नहि जलधरोत्सङ्गसङ्गमन्तरेण सौदामिनी दामिनी भवितुमीष्टे ॥ ४३ ॥

ननु मा भवत्वन्यत्रातिरतिमती किंतु विनापि कन्दर्पं संवरगृहे तस्या बहुकालमवैकल्यं दृष्टमित्यत आह नहि जलधरेति, सौदामिनी विद्युत्, "सौदा·मिनी च सौदाम्नी सौदामिन्यपि दृश्यते" इति द्विरूपकोशः, दामिनी दामयुक्ता, शोभावतीत्यर्थः, ततश्च शोभाया अभावादेवान्यत्र न तिष्ठत्येवेति भावः ॥ ४३ ॥

१ सारं गीतमित्येवं मुद्रणीये संधिः; पूर्ववत् ।

न च मधुमासमन्तरेण क्वचन कलकण्ठी समुत्कण्ठीभवति ॥ ४४ ॥

ननु तस्या अपि तत्रास्थैर्यमेव स्पष्टो दोष इत्यत आह न च मध्विति, मधुमासश्चैत्रः, कलकण्ठी कोकिलाङ्गना, समुत्कण्ठीति च्विप्रत्ययान्तः, अत्रोभयोः परस्परसापेक्षत्वेनैव शोभासादृश्यं कलकण्ठ्यास्तत्रास्थैर्याभावः, तदविनाभावस्तु· उपमाप्रयोजकभूततद्धर्माभावादेवेति न पूर्वोक्ता दोषाः ॥ ४४ ॥

नापि कमलाकरमपहाय सलिलमात्र एव शोभते राजहंसी ॥ ४५ ॥

ननु कलकण्ठ्याः कण्ठस्वरः प्रशस्यतां नाम, न तु गात्रसौन्दर्यमित्यत आह नापि कमलेति ॥ ४५ ॥

न च वलक्षपक्षमन्तरेण परिपुष्टिमीयते चान्द्रमसी रेखा ॥ ४६ ॥

किंच, प्रीतेर्योग्यप्रतियोगिसङ्गस्य भावाभावाभ्यामेव समृद्धिनाशावपीत्यत्र दृष्टान्तो न च वलक्षेति, वलक्षपक्षं शुक्लपक्षम्, ईयत इति, "ईङ् गतौ"दैवादिकः ॥ ४६ ॥

न च निकषपाषाणशकलं विना निजगुणमाविष्करोति काञ्चनी रेखा ॥ ४७ ॥

अन्यच्च, स्वनिष्ठप्रेमादिमहागुणपरीक्षणं च तादृशप्रतियोगिन्येव नान्यत्रेति दृष्टान्तो न च निकषेति ॥ ४७ ॥

न च वसन्तमन्तरेण परिमलमालम्बते वासन्ती ॥४८॥

किंच,गुणानामप्रसिद्ध्यादिकं सर्वमेव तादृशप्रतियोगिसाहित्येनैव प्रकाशते नान्यथेति, अत्र दृष्टान्तो न च वसन्तेति, परिमलमिति गुणः, वसन्तोऽपि सुरभिः । वासन्तीति नाम, स चापि वसन्तनामा । लतासु मध्ये श्रेष्ठा माधवीति प्रसिद्धिः, स चापि ऋतुषु श्रेष्ठ इत्यादि ।

तथा परस्परशोभासापेक्षत्वाविनाभावस्थैर्यसौन्दर्याद्याः पूर्वपूर्वदृष्टान्तनिष्ठा गुणा अप्यत्र वर्तन्त एवेत्ययमेव मुख्यो दृष्टान्त इत्यत्रैव पर्यवसानमिति, दार्ष्टान्तिकपक्षेऽपि वैदग्ध्यादिना गुणेन तुल्यावेव राधामाधवौ, माधवेति राधेति तुल्यपर्यायत्वान्नाम्नापि प्रसिद्ध्या च लोकोत्तरया प्रेम्णा च परस्परसापेक्षत्वादिभिश्चेति ॥ ४८ ॥

किं बहुना,चन्द्र एव चन्द्रिका रत्न एव रत्नप्रभा कुसुम एव माध्वीकधारेति ॥ ४९ ॥

अथ तत्राप्यत्यन्तैक्यविवक्षया धर्मधर्मिरूपेण पौराणिकसिद्धान्तोपयोगित्वाच्छक्तिशक्तिमत्तारूपेण वा संबन्धेन दृष्टान्तत्रयं, तत्र चन्द्रचन्द्रिकयोः सुखस्पर्शता त्वगिन्द्रियगम्या· रत्नरत्नप्रभयोर्दर्शनीयता नेत्रेन्द्रियगम्या जाड्यादिराहित्येन पू-

Digitized by Google

र्वतोऽप्यधिका, कुसुममाध्वीकधारयोस्तु सौरभ्यं सुखस्पर्शत्वं सुदर्शत्वमिति सर्वेन्द्रियगम्यत्वमित्यत्रैव श्लेषविश्रान्तिरिति ॥४९॥

किमयि मयि तेऽपलापः, न खलु मणिवणिजामगोचरो मणेरान्तरः कोऽपि भावः, तन्नापलपनीयमिदं, पनीयमिदञ्जसा ॥ ५० ॥

अपलापः संगोपनम्, "अपलापस्तु निह्नव" इत्यमरः। मणिवणिजामिति, त्वत्सखीत्वात् त्वत्साधर्म्यवत्यो वयं, स्वानुभवेनैव सर्वं जानीम इत्यर्थः। भावः स्वरूपम्, इदं हृद्विकारचिह्नम्। अञ्जसा साक्षान्नापलपनीयं, पनीयास्तव्या मित् स्नेहो यस्याः, हे पनीयमित् सखि, स्नेहेन मयि सर्वमेव कथयेति भावः। "पन स्तुतौ" "ञिमिदा स्नेहने" इति धातू ॥ ५० ॥

इति तदुदितोपरमे परमेण प्रणयेन सकलगुणललिता ललिता चोवाच, युक्तमुक्तमुदारप्रणयद्रुमशाखया विशाखया विचित्रं नैतत्, पीयूषमयूखेनेव विभावरी त्विभा वरीयसी भवति, त-मन्तरेण चकोरी च-कोरीकरोति कमपरम् ॥ ५१ ॥

विभावर्या राज्या विभा कान्तिः। तं विना चकोरीकमपरम् उरीकरोति स्वीकरोतीति। तव कान्तिदायित्वं जीवनदायित्वं च केवलमेकस्य कृष्णस्यैव नान्यस्येत्येकत्रैव दृष्टान्तद्वयतात्पर्यम् ॥ ५१ ॥

इत्युक्ता साह साहसमिदं भवतीनां यदिदमसंभाव्यमपि संभाव्यते, विशाखा विशाखाभावं न त्यजति, यदियं माधवमाससहायिनीति ॥ ५२ ॥

इति ललितयोक्ता सा राधा आह। वशाखाभावं विशाखानक्षत्रस्वभावम्। माधवमासो वैशाखः, 'वैशाखे माधवो राध" इत्यमरः, तं जिहीते गच्छति प्राप्नोतीति यज्ञादिणिनिः वैशाखपूर्णिमायां विशाखानक्षत्रयोगात्, भङ्ग्या तु विशाखा त्वं तस्मिन् माधवे संगतैव तिष्ठसीति मा स्वसदृशीं मां जानीहीति नर्म सूच्यते, पक्षे माधवस्य कृष्णस्य मा शोभा तस्याः सहायिनी सहायवती तदनुकूलव्यापारयुक्ता। अत्रादृष्टाश्रुतचरोऽपि श्रीकृष्णो प्रथममस्या रागः श्रीमदुज्ज्वलनीलमणिदर्शितात्ललनानिष्ठस्वरूपादेव, ततो वक्ष्यमाणप्रकाराद्वुलभीतले दर्शनादयं स इति निश्चय आसीत्, ततस्तदनुसंधानधृतचित्ततया अन्यजनपरिशीलिततत्प्रसङ्गपरामर्शाद्वामादिज्ञानमिति विवेचनीयम् ॥ ५२ ॥

तदुदितान्तेऽतान्तेन मनसा पुनर्ललिताह, भाविनि भावि नियतमेव भवति, राधाभिख्ये तव राधेव साहाय्यमवलम्बते, राधाविशाखयोरैक्यात् ॥ ५३ ॥

अतान्तेन, प्रफुल्लेनेत्यर्थः, तस्याः स्वस्वप्रभावप्रकाशनकर्मठनर्मश्रवणात्। हे भाविनि सुन्दरि भावि भवितव्यम्। राधाभिख्ये राधनाम्नि तव वैशाखमासे तत्सनाम्नी राधैव।

ननु का तत्र राधा तत्राह, राधाविशाखयोरैक्यात्, एकपर्यायत्वात्। तत्र विशाखानक्षत्रमेव राधा उच्यत। इत्यर्थः, श्लेषेण राधया अभिख्या शोभा यस्य तस्मिन् श्रीकृष्णे "अभिख्या नामशोभयो"रित्यमरः ॥ ५३ ॥

अथाह सा हसामृतमधुरं ललितेन ह्याकाशलता काशलताकुसुमसमानकुसुमेति शक्योतिवक्तुम् ॥ ५४ ॥

हसामृतमधुरं यथा स्यात् तथा सा राधा आह आकाशेति। आकाशलतायाः कीदृशं कुसुममिति प्रश्ने काशलतायाः कुसुमतुल्यं तदित्युत्तरमिव भवतीनामलीकमूलके प्रश्ने ममापि किं तादृशमुत्तरमुचितमित्यर्थः ॥ ५४ ॥

तदपि मुखविजितनालीके नालीकेन वितर्कणा संभावनीयोऽयं जनः। ॥ ५५ ॥

मुखेन विजितं नालीकं कमलं यया हे तथाभूते, अलीकेन मिथ्याभूतेन वितर्कणा न संभावनीयः, अयं मल्लक्षणो जनः ॥ ५५ ॥

इत्येवमवसरे स्वभावश्यामा श्यामा नाम राधाराधाय प्रतिदिनमेवागमनशीला तदापि तदापितहृदया हृदयालुतया तत्रैवाजगाम ॥ ५६ ॥

स्वभावेन श्यामा, 'शीतकाले भवेदुष्णे"त्याद्युक्तलक्षणा राधाया आराधाय आराधनाय, सुहृत्पक्षत्वादुपसर्पणायेत्यर्थः, तदापि तत्रैवाजगाम। कीदृशी, तस्यां राधायाम् आपितं प्रापितं समर्पितं हृदयं स्वमनो यया सा। तत्र हेतुः, हृदयालुतया, सौहार्देनेत्यर्थः ॥ ५६ ॥

॥ शेषमग्रे ॥

SARVA-DARS'ANA-SAṄGRAHA

CHAPTER IV.

The Rámánuja System.

(Continued from page 98.)

It is laid down (by the Rāmānujas) that retractation into the universe *(pralaya)* is when the universe the body whereof consists of souls and the originant *(prakṛiti)* return to its imperceptible state, unsus-

---

॥ सर्वदर्शनसङ्ग्रहः ॥

नामरूपविभागानर्हसूक्ष्मदशापन्न प्रकृतिपुरुषशरीरं ब्रह्म कारणावस्थं जगतस्तदापत्तिरेव प्रलयः, नामरूपविभागविभक्तस्थूलचिदचिद्वस्तुशरीरं ब्रह्म कार्यावस्थं ब्रह्मणस्तथावि-

Digitized by Google

ceptible of division by names and forms; existing as absolute spirit the emanative cause; and that creation (or emanation) is the gross or perceptible condition of absolute spirit, the body whereof is soul and not soul divided by diversity of names and forms, in the condition of the (emanative) effect of absolute spirit. In this way the identity of cause and effect laid down in the aphorism (of Vyāsa) treating of origination, is easily explicable. The statements that the Supreme Spirit is void of attributes are intended (it is shown to deny thereof phænomenal qualities which are to be escaped from by those that desire emancipation. The texts which deny plurality are explained as allowed to be employed for the denial of the real existence of things apart from the Supreme Spirit which is identical with all things, it being Supreme Spirit which subsists under all forms as the soul of all, all things sentient and unsentient being forms as being the body of absolute Spirit.*

What is the principle here involved, pluralism or monism or a universe both one and more than one? Of these alternatives monism is admitted in saying that Supreme Spirit alone subsists in all forms as the body of all; both unity and plurality are admitted in saying that one only Supreme Spirit subsists under a plurality of forms diverse as soul and not-soul; and plurality is admitted in saying that the essential natures of soul, not-soul, and the Lord, are different, and not to be confounded.

Of these (soul, not-soul, and the Lord) individual spirits, or souls, consisting of uncontracted and unlimited pure knowledge, but enveloped in illusion, that is, in works from all eternity, undergo contraction and expansion of knowledge according to the degrees of their merits. Soul experiences fruition, and after reaping pleasures and pains proportionate to merits and demerits, there ensues knowledge of the Lord, or attainment of the sphere of the Lord. Of things which are not-soul, and which are objects of fruition (or experience of pleasure and pain), unconsciousness, unconduciveness to the end of man, susceptibility of modification, and the like, are the properties. Of the Supreme Lord the attributes are subsistence as the internal controller (or animator) of both the subjects and the objects of fruition; the boundless glory of illimitable knowledge, dominion, majesty, power, brightness and the like, the countless multitude of auspicious qualities; the generation at will of all things other than himself, whether spiritual or non-spiritual; various and infinite adornment with unsurpassable excellence singular, uniform, and divine.

Veṅkanta-nátha has given the following distribution of things.

Those who know it have declared the principle to be substance and non-substance, and that which is both;

Substance is dichtomized as unsentient and sentient; the former being the unevolved (*avyakta*), and time.

The latter is the self-conscious and cognition; the self-conscious being twofold as either soul, or the Lord;

Eternal is their glory and intelligence; the other principle some have called the unsentient primary.

Of these:

Substance undergoes a plurality of conditions; the originant is possessed of goodness and the other cords;

* "Whose body nature is, and God the soul." Pope.

धस्थूलभावश्च सृष्टिरित्यभिधीयते । एवञ्च कार्य्यकारणयोरनन्यत्वमप्यारम्भणाधिकरणे प्रतिपादितमुपपन्नतरं भवति निर्गुणवादाश्च प्राकृतहेयगुणनिषेधविषयतया व्यवस्थिताः नानात्वनिषेधवादाश्च एकस्यैव ब्रह्मणः शरीरतया प्रकारभूतं सर्व्वं चेतनाचेतनात्मकं वस्त्विति सर्व्वस्यात्मतया सर्व्वप्रकारं ब्रह्मैवावस्थितमिति सर्व्वात्मकब्रह्मपृथग्भूतवस्तुसद्भावनिषेधपरत्वाभ्युपगमेन प्रतिपादिताः । किमत्र तत्त्वं भेदो ऽभेद उभयात्मकं वा सर्व्वं तत्त्वं तत्र सर्व्वशरीरतया सर्व्वप्रकारं ब्रह्मैवावस्थितमित्यभेदोऽभ्युपेयते एकमेव ब्रह्म नानाभूतचिदचित्प्रकारत्वानात्वेनावस्थितमिति भेदाभेदौ चिदचिदीश्वराणां स्वरूपस्वभाववैलक्षण्यादसंकराच्च भेदः । तत्र चिद्रूपाणां जीवात्मनामसंकुचितापरिच्छिन्ननिर्म्मलज्ञानरूपाणामनादिकर्म्मरूपाविद्यावेष्टितानां तत्तत् कर्म्मानुरूपज्ञानसङ्कोचविकाशौ भोग्यभूता चित् भोक्ता संसर्गः तदनुगुणसुखदुःखोपभोगद्वयवत् क्षता भगवत्प्रतिपत्तिः भगवत्पदप्राप्तिरित्यादयः स्वभावाः । अचिद्वस्तूनान्तु भोग्यभूतानामचेतनत्वमपुरुषार्थत्वं विकारास्पदत्वमित्यादयः परस्येश्वरस्य भोक्तृभोग्ययोरुभयोरन्तर्यामिरूपेणावस्थानमपरिच्छेद्यज्ञानैश्वर्य्यवीर्य्यशक्तितेजःप्रभृत्यनवस्थितिकातिशयासंख्येयकल्याणगुणगणता स्वसंकल्पप्रवृत्तस्वेतरसमस्तचिदचिद्वस्तुजातता स्वाभिमतस्वानुरूपैकरूपदिव्यरूपनिरतिशयविविधानन्तभूषणतेत्यादयः । वेङ्कटनाथेन त्वित्थं निराटङ्कि पदार्थविभागः ॥

द्रव्याद्रव्यप्रभेदान्मितमुभयविधं तद्विदस्तत्त्वमाहुः ।
द्रव्यं द्वेधा विभक्तं जडमजडमिति प्राच्यमव्यक्तकालौ ।
अन्त्यं प्रत्यक् पराक् च प्रथममुभयथा तत्र जीवेशभेदात्
नित्या भूतिर्मतिश्चेत्यपरमिह जडामादिमां केचिदाहुः ॥

Time has the form of years, &c.; soul is atomic and cognisant; the other spirit is the Lord;

Eternal bliss has been declared as transcending the three cords (or modes of phænomenal existence), and also as characterised by goodness;

The cognisable manifestation of the cognisant is knowledge; thus are the characteristics of substance summarily recounted.

Of these (soul, not-soul, and the Lord), individual spirits, called souls, are different from the Supreme Spirit, and eternal. Thus the text: Two birds companions, friends, &c. Accordingly it is stated (in the aphorisms of Vyāsa), Souls are diverse by reason of diversity of conditions. The eternity of souls is often spoken of in revelation.

The soul is neither born, nor dies, nor having been shall it again cease to be;

Unborn, unchanging, eternal, this ancient of days is not killed when the body is killed. (Bhagavad-gítá II. 20).

Otherwise (were the soul not eternal) there would follow a failure of requital and a fruition (of pleasures and pains) unmerited. It has accordingly been said (in the aphorisms of Gautama): Because no birth is seen of one whose passions are past away. That the soul is atomic is well known from revelation:

"If the hundredth part of a hair be imagined to be divided a hundred times,

The soul may be supposed a part of that, and yet it is capable of infinity;"

and again:

"Soul is of the size of the extremity of the spoke of a wheel. Spirit is to recognised by the intelligence as atomic."

अत्र

द्रव्यं नाना दशावत् प्रकृतिरिह गुणैः सत्त्वपूर्व्वैरुपेता
कालोऽब्दाद्याकृतिः स्यादणुरवगतिमान् जीवईशोन्य आत्मा ।
संप्रोक्ता नित्यभूतिस्त्रिगुणसमधिका सत्त्वयुक्ता तथैव
ज्ञातुर्ज्ञेयावभासा मतिरिति कथितं संग्रहाद्द्रव्यलक्ष्म ॥

इत्यादिना ।

तत्र चिच्छब्दावाच्यजीवात्मानः परमात्मनः सकाशाद्भिन्ना नित्याश्च, तथाच श्रुतिर्द्वा सुपर्णा सयुजा सखाये-त्यादिका । अत एवोक्तं नानात्मानो व्यवस्थात इति । तन्नित्यत्वमपि श्रुतिप्रसिद्धम् ।

न जायते म्रियते वा विपश्चिन्नायं भूत्वा भविता वा न भूयः ।
अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे
इति ॥

The visible, unsentient, world designated by the term not-soul, is divided into three, as the object, the instrument, or the site, of fruition. Of this world the efficient and substantial cause is the Deity, known under the names Purushottama (best of spirits), Vāsudeva (a patronymic of Krishṇa), and the like.

Vāsudeva is the supreme absolute spirit, endowed with auspicious attributes,

The substantial cause, the efficient, of the worlds, the animator of spirits.

This same Vásudeva infinitely compassionate, tender to those devoted to him, the supreme spirit, with the purpose of bestowing various rewards apportioned to the deserts of his votaries, in consequence of pastime, exists under five modes distinguished as 'adoration" (*archā*), 'emanation' (*vibhava*), 'manifestation '(*vyūha*) 'the subtile' (*sūkshma*), and the 'internal controller.' (1) 'Adoration' is images and so forth. (2) 'Emanation' is, his incarnation as Ráma and so forth. (3) His 'manifestation' is fourfold, as Vāsudeva, Saṅkarshaṇa, Pradyumna, and Aniruddha. (4) 'The subtile,' is the entire Supreme Spirit, with six attributes, called Vāsudeva. His attributes are exemption from sin, and the rest. That he is exempt from sin is attested in the Vedic text, Passionless, deathless, without sorrow, without hunger, desiring truth, true in purpose. (5) The 'internal controller,' the actuator of all spirits, according to the text: Who abiding in the soul, rules the soul within. When by worshipping each former embodiment a mass of sins inimical to the end of the soul (i. e. emancipation) have been destroyed, the votary becomes intitled to practise the worship of each latter embodiment. It has, therefore, been said:

अपरथा कृतप्रणाशाकृताभ्यागमप्रसङ्गः । अतएवोक्तं वीतरागजन्मादर्शनादिति । तदणुत्वमपि श्रुतिप्रसिद्धम् ।

बालाग्रशतभागस्य शतधा कल्पितस्य च ।
भागो जीवः स विज्ञेयः स चानन्त्याय कल्पत इति ॥

आराग्रमात्रः पुरुषोऽणुरात्मा चेतसा वेदितव्य इति च ।

अचिच्छब्दवाच्यं दृश्यं जडं जगत् त्रिविधं भोग्यभोगोपकरणभोगायतनभेदात् । तस्य जगतः कर्त्तोपादानं चेश्वरपदार्थः पुरुषोत्तमो वासुदेवादिपदवेदनीयः । तदप्युक्तम् ।

वासुदेवः परं ब्रह्म कल्याणगुणसंयुतः ।
भुवनानामुपादानं कर्त्ता जीवनियामक इति ॥

स एव वासुदेवः परमकारुणिको भक्तवत्सलः परमपुरुषस्तदुपासकानुगुणतत्तत्फलप्रदानाय स्वलीलावशादर्चाविभवव्यूहसूक्ष्मान्तर्यामिभेदेन पञ्चधावतिष्ठते । तत्रार्चा नाम

Vāsudeva in his tenderness to his votaries, gives, as desired by each,
According to the merits of his qualified worshippers, large recompense.
For that end, in pastime he makes to himself his five embodiments;
Images and the like are 'adoration;' his incarnations are 'emanations;'
As Saṅkarshaṇa, Vāsudeva, Pradyumna, Aniruddha, His manifestation is to be known to be four-fold; 'the subtile' is the entire six attributes;
That selfsame called Vāsudeva, is styled the Supreme Spirit;
The internal controller is declared, as residing in the soul, the actuator of the soul,
Described in a multitude of texts of the Upanishads such as "Who abiding in the soul."
By the worship of 'adoration' a man casting off his defilement, becomes a qualified votary,
By the subsequent worship of 'emanation,' he becomes qualified for the worship of 'manifestation;' next,
By the worship thereafter of 'the subtile,' he becomes able to behold the internal controller.

The worship of the Deity is described in the Pañcharātra as consisting of five elements, *viz.*, (1) the access, (2) the preparation, (3) oblation, (4) recitation, (5) devotion. Of these, access is the sweeping, smearing, and so forth, of the way to the temple. The preparation is the provision of perfumes, flowers, and the like appliances of worship. Oblation is worship of the deities. Recitation is the muttered ejaculation of sacred texts with attention to what they mean, the rehearsal of hymns and lauds of Vishṇu, the commemoration of his names, and study of institutes which set forth the truth.

प्रतिमादयः । रामाद्यवतारो विभवः । व्यूहश्चतुर्व्विधः वासुदेवसंकर्षणप्रद्युम्नानिरुद्धसंज्ञकः । सूक्ष्मं संपूर्णं षड्गुणं वासुदेवाख्यं परं ब्रह्म । गुणा अपहतपाप्मत्वादयः सोऽपहतपाप्मा विरजा विमृत्युर्विशोको विजिघत्सः सत्यकामः सत्यसंकल्प इति श्रुतेः । अन्तर्यामी सकलजीवनियामकः य आत्मनि तिष्ठन्नात्मानमन्तरो यमयतीति श्रुतेः । तत्र पूर्व्वपूर्व्वमूर्त्त्युपासनया पुरुषार्थपरिपन्थिदुरितनिचयक्षये सत्युत्तरोत्तरमूर्त्त्युपास्त्यधिकारः । तदुक्तम्

वासुदेवः स्वभक्तेषु वात्सल्यात् तत्तदीहितम् ।
अधिकार्य्यानुगुण्येन प्रयच्छति फलं बहु ॥
तदर्थं लीलया स्वीयाः पञ्च मूर्त्तीः करोति वै ।
प्रतिमादिकमर्च्चा स्यादवतारास्तु वैभवाः ॥

Devotion is meditation on the deity. When the vision of the visible world has been brought to a close by knowledge accumulated by the merit of such worship, the infinitely compassionate Supreme Spirit, tender to his votaries, bestows upon the votary devoted to his lord and absorbed in his lord, his own sphere infinite and endless marked by consciousness of being like him, from which there is no future return (to the sorrows of transmigratory existence). So the traditionary text:

"When they have come to me the high-souled no longer undergo future birth, a receptacle of pain, transitory, having attained to the supreme consummation."

"Vāsudeva having found his votary bestows upon him his own mansion, blissful, undecaying, from whence there is no more return."

After laying up all this in his heart, leaning upon the teaching of the great Upanishad, and finding the gloss on the Vedānta aphorisms by the venerated Bodhāyanachārya too prolix, Rāmānuja composed a commentary on the Śārīrakamīmāṅsā (or Vedānta theosophy). In this the sense of the first aphorism. "Then hence the absolute must be desired to be known," is given as follows. The word *then* in this aphorism means, after understanding the hitherto-current sacred rites. Thus the glossator writes "After learning the sacred rites" he desires to know the absolute. The word *hence* states the reason, *viz.* because one who has read the Veda and its appendages and understands its meaning, is averse from sacred rites, their recompense being perishable. The wish to know the absolute springs up in one who longs for permanent liberation, as being the means of such liberation. By the word *absolute* is designated the Supreme Spirit from whom are essentially excluded

---

संकर्षणो वासुदेवः प्रद्युम्नश्चानिरुद्धकः ।
व्यूहश्चतुर्विधो ज्ञेयः सूक्ष्मं संपूर्णषड्गुणम् ॥
तदेव वासुदेवाख्यं परं ब्रह्म निगद्यते ।
अन्तर्यामी जीवसंस्थो जीवप्रेरक ईरितः ॥
य आत्मनीतिवेदान्तवाक्यजालैर्निरूपितः ।
अर्च्चोपासनया क्षिप्ते कल्मषेऽधिकृतो भवेत् ॥
विभवोपासने पश्चाद् व्यूहोपास्तौ ततः परम् ।
सूक्ष्मे तदनुशक्तः स्यादन्तर्यामिणमीक्षितुमिति ॥

तदुपासनञ्च पञ्चविधम् अभिगमनमुपादानमिज्या स्वाध्यायो योग इति श्रीपञ्चरात्रेऽभिहितम् । तत्राभिगमनं नाम देवतास्थानमार्गस्य संमार्जनोपलेपनादि । उपादानं गन्धपुष्पादिपूजासाधनसम्पादनम् । इज्या नाम देवतापूजनम् । स्वाध्यायो नाम अर्थानुसन्धानपूर्व्वको मन्त्रजपो वैष्णवसूक्त-

Digitized by Google

all imperfections, who is of illimitable excellence and of innumerable auspicious attributes. Since then the knowledge of sacred rites and the performance of those rites, is mediately through engendering dispassionateness and through putting away the defilement of the understanding, an instrument of the knowledge of the absolute; and knowledge of sacred rites and knowledge of the absolute being consequently cause and effect, the former and the latter Mīmānsā constitute one system of institutes. On this account the glossator has described this system as one with the sixteen-fold system of Jaimini. That the fruit of sacred rites is perishable and that of the knowledge of the absolute imperishable, has been laid down in virtue of Vedic texts such as Scanning the spheres gained by rites let him become dispassionate, Not wrought by the rite performed, accompanied with inference and disjunctive reasoning. Revelation, by censuring each when unaccompanied by the other, shows that it is knowledge together with works that is efficacious of emancipation, in the words: Blind darkness they enter who prefer illusion, and a greater darkness still do they enter who delight in knowledge only; knowledge and illusion, he who knows these both, he passing beyond death together with illusion, tastes immortality by knowledge. Conformably it is said in the Pancharātra-rahasya:

"That ocean of compassion, the Lord, tender to his votaries,
For his worshippers' sake takes five embodiments upon him.
These are styled Adoration, Emanation, Manifestation, the Subtile, the Internal Controller,
Resorting whereto souls attain to successive stages of knowledge.
As a man's sins are worn away by each successive worship,
He becomes qualified for the worship of each next embodiment.
Thus day by day, according to religion revealed and traditional,
By the aforesaid worship Vāsudeva becomes propitious to mankind.
Hari, when propitiated by devotion in the form of meditation,
At once brings to a close that illusion which is the aggregate of works.
Then in souls the essential attributes, from which transmigration has vanished,
Are manifested, auspicious, omniscience and the rest.

स्तोत्रपाठो नामसंकीर्त्तनं तत्त्वप्रतिपादकशास्त्राभ्यासश्च । योगो नाम देवतानुसन्धानम् । एवमुपासनाकर्म्मसमुच्चितेन विज्ञानेन दृष्टदर्शने नष्टे भगवद्भक्तस्य तन्निष्ठस्य भक्तवत्सलः परमकारुणिकः पुरुषोत्तमः स्वयाथात्म्यानुभवानुगुणनिरवधिकानन्तरूपं पुनरावृत्तिरहितं स्वपदं प्रयच्छति । तथाच स्मृतिः

मामुपेत्य पुनर्ज्जन्म दुःखालयमशाश्वतम् ।
नाप्नुवन्ति महात्मानः संसिद्धिं परमां गता इति ॥
स्वभक्तं वासुदेवोऽपि संप्राप्यानन्दमक्षयम् ।
पुनरावृत्तिरहितं स्वीयं धाम प्रयच्छति ॥

तदेतत् सर्व्वं हृदि निधाय महोपनिषन्मतावलम्बनेन भगवद्बोधायनाचार्य्यकृतां ब्रह्मसूत्रवृत्तिं विस्तीर्णामालक्ष्य रामानुजः शारीरिकमीमांसाभाष्यमकार्षीत् । तत्राथातो ब्रह्मजिज्ञासेति प्रथमसूत्रस्यायमर्थः अत्र अथशब्दः पूर्व्वप्रवृत्तकर्म्माधिगमनानन्तर्य्यार्थः तदुक्तं वृत्तिकारेण वृत्तात् कर्म्माधिगमादनन्तरं ब्रह्म विविदिषतीति अतः शब्दो हेत्वर्थः अधीतसाङ्गवेदस्याधिगततदर्थस्य विनश्वरफलात् कर्म्मणो विरक्तत्वाद्धेतोः स्थिरमोक्षाभिलाषुकस्य तदुपायभूतब्रह्मजिज्ञासा भवति ब्रह्मशब्देन स्वभावतो निरस्तसमस्तदोषानवधिकातिशयासंख्येयकल्याणगुणः पुरुषोत्तमोऽभिधीयते । एवञ्च कर्म्मज्ञानस्य तदनुष्ठानस्य च वैराग्योत्पादनद्वारा चित्तकल्मषापनयनद्वारा च ब्रह्मज्ञानं प्रति साधनत्वेन तयोः कार्य्यकारणत्वेन पूर्व्वोत्तरमीमांसयोरेकशास्त्रत्वम् । अतएव वृत्तिकारा एकमेवेदं शास्त्रं जैमिनीयेन षोडशलक्षणेनेत्याहुः । कर्म्मफलस्य क्षयित्वं ब्रह्मज्ञानफलस्य चाक्षयित्वं परीक्ष्य लोकान् कर्म्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेनेत्यादिश्रुतिभिरनुमानार्थापत्त्युपबृंहिताभिः प्रत्यपादि । एकैकनिन्दया कर्म्मविशिष्टस्य ज्ञानस्य मोक्षसाधनत्वं दर्शयति श्रुतिः अन्धं तमः प्रविशन्ति ये विद्यामुपासते ततो भूय इव ते तमो य उ विद्यायां रताः विद्याञ्चाविद्याञ्च यस्तद्वेदोभयं सह अविद्यया मृत्यु तीर्त्वा विद्ययामृतमश्नुते इत्यादि । तदुक्तं पाञ्चरात्ररहस्ये

स एव करुणासिन्धुर्भगवान् भक्तवत्सलः ।
उपासकानुरोधेन भजते मूर्त्तिपञ्चकम् ॥
तदर्च्चाविभवव्यूहसूक्ष्मान्तर्यामिसंज्ञकम् ।
यदाश्रित्यैव चिद्वर्गस्तत्तज्ज्ञेयं प्रपद्यते ॥
पूर्व्वपूर्व्वोदितोपास्तिविशेषक्षीणकल्मषः ।
उत्तरोत्तरमूर्त्तीनामुपास्त्यधिकृतो भवेत् ॥
एवं ह्यहरहः श्रौतस्मार्त्तधर्म्मानुसारतः ।
उक्तोपासनया पुंसां वासुदेवः प्रसीदति ॥
प्रसन्नात्मा हरिर्भक्त्या निदिध्यासनरूपया ।
अविद्यां कर्म्मसंघातरूपां सद्यो निवर्त्तयेत् ॥

Digitized by Google

These qualities are common to the emancipated spirits and the Lord,
Universal efficiency alone among them is peculiar to the deity.
Emancipated spirits are ulterior to the infinite absolute which is unsusceptible of aught ulterior;
They enjoy all beatitudes together with that Spirit.

It is therefore stated that those who suffer the three kinds of pain must, for the attainment of immortality, investigate the absolute spirit known under such appellations as the Highest Being. According to the maxim, The base and the suffix convey the meaning conjointly, and of these the meaning of the suffix takes the lead, the notion of desire is predominant (in the word *jijñāsitavya*), and desired knowledge is the predicate (in the aphorism, Then hence the absolute must be desired to be known.) Knowledge is cognition designated by such terms as meditation, devotion; not the merely superficial knowledge derived from verbal communication, such being competent to any one who hears a number of words and understands the force of each, even without any predication; in conformity with such Vedic texts as Soul indeed it is that is to be seen, to be heard, to be thought, to be pondered; He should meditate that it is soul alone; Having known let him acquire excellent wisdom; He should know that which is beyond knowledge. In these texts 'to be heard' is explanatory hearing being understood (but not enounced) in the text about sacred study (viz. *shadaṅgena vedo 'dhyeyo jñeyaścha,* the Veda with its six appendages is to be studied and known); so that a man who has studied the Veda must of his own accord in acquiring the Veda and its appendages, engage in 'hearing,' in order to ascertain the sense by examining it and the occasion of its enounment. The term 'to be thought' (or 'to be inferred') is also explanatory, cogitation (or inference) being understood as the complementary meaning of hearing, according to the aphorism: Before its signification is attained the system is significant. Meditation is a reminiscence consisting of an unbroken succession of reminiscences like a stream of oil, it being revealed in the text. In continuity of reminiscence there is a solution of all knots, so that it is unintermittent reminiscence that is the means of emancipation. And this reminiscence is equivalent to intuition.

"Cut is his heart's knot, solved are all his doubts
And exhausted are all his works, when he has seen
the Highest and Lowest,"

because he becomes one with that Supreme. So also in the words Soul indeed is to be seen, it is predicated of this reminiscence that it is an intuition. Reminiscence becomes intuitional through the vivacity of the representations. The author of the Vākya has treated of all this in detail in the passage beginning cognition is meditation. The characters of this meditation are laid out in the text: This soul is not attainable by exposition, nor by wisdom, nor by much learning; Whom God chooses by him God may be attained. To him this soul unfolds its own nature. For it is that which is dearest which is choiceworthy, and as the soul finds itself most dear so the Lord is of himself most dear, as was declared by the Lord himself:

ततः स्वाभाविकाः पुंसां ते संसारतिरोहिताः ।
आविर्भवन्ति कल्याणाः सर्व्वज्ञत्वादयो गुणाः ॥
एवं गुणाः समानाः स्युर्मुक्तानामीश्वरस्य च ।
सर्व्वकर्तृत्वमेवैकं तेभ्यो देवे विशिष्यते ॥
मुक्तास्तु शेषिणि ब्रह्मण्यशेषे शेषरूपिणः ।
सर्व्वानश्नुवते कामान् सह तेन विपश्चितेति ॥

तस्मात्तापत्रयातुरैरमृतत्वाय पुरुषोत्तमादिपदवेदनीयं ब्रह्म जिज्ञासितव्यमित्युक्तं भवति । प्रकृतिप्रत्ययौ प्रत्ययार्थं प्राधान्येन सह ब्रूत इतः स नोऽन्यत्रेतिवचनबलादिच्छाया इष्यमाणप्रधानत्वादिष्यमाणं ज्ञानमिह विधेयं तच्च ध्यानोपासनादिशब्दवाच्यं वेदनं न तु वाक्याजन्यमापातज्ञानं पदसन्दर्भश्राविणो व्युत्पन्नस्य विधानमन्तरेणापि प्राप्तत्वात् आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः आत्मेत्येवोपासीत विज्ञाय प्रज्ञां कुर्व्वीत अनुविद्य विजानातीत्यादिश्रुतिभ्यः । अत्र श्रोतव्य इत्यनुवादः अध्ययनविधिना साङ्गस्य स्वाध्यायस्य ग्रहणे अधीतवेदस्य पुरुषस्य प्रयोजनवदर्थदर्शनात्तन्निर्णयाय स्वरसत एव श्रवणे प्रवर्त्तमानतया तस्य प्राप्तत्वात् । मन्तव्य इति चानुवादः श्रवणप्रतिष्ठार्थत्वेन मननस्यापि प्राप्तत्वादप्राप्ते शास्त्रमर्थवदिति न्यायात् । ध्यानञ्च तैलधारावदविच्छिन्नस्मृतिसन्तानरूपा ध्रुवा स्मृतिः स्मृतिप्रतिलम्भे सर्व्वग्रन्थीनां विप्रमोक्ष इति ध्रुवायाः स्मृतेरेव मोक्षोपायत्वश्रवणात् । सा च स्मृतिर्दर्शनसमानाकारा

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्व्वसंशयाः ।
क्षीयन्ते चास्य कर्म्माणि तस्मिन् दृष्टे परावरे ॥

इत्यनेनैकत्वात् । तथाच आत्मा वा अरे द्रष्टव्य इत्यनेनास्या दर्शनरूपता विधीयते । भवति च भावनाप्रकर्षात् स्मृतेर्दर्शनरूपत्वम् । वाक्यकारेणैतत् सर्वं प्रपञ्चितं वेदनमुपासनं स्यादित्यादिना । तदेव ध्यानं विशिनष्टि श्रुतिः नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वामिति । प्रिय-

"To them always devoted, who worship me with love,
I give the devotion of understanding whereby they come to me."

And again:

"That Supreme Spirit, Arjuna, is attainable by faith unwavering."

A. E. G.

तम एव हि वरणीयो भवति यथायं प्रियतममात्मानं प्राप्नोति तथा स्वयमेव भगवान् प्रियतम इति भगवतैवाभिहितम्

तेषां सततयुक्तानां भजतां प्रीतिपूर्व्वकम् ।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते इति ॥
पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्ययेति च ।

॥ श्रीयुतराजारामशास्त्रिणो जीवनवृत्तान्तः ॥

आसीदसीमासमशीलशाली
शालीनताशून्यमतिः सभासु ॥
स भासुरो वाचि यशांसि विन्दन्
गोविन्दशर्मा स्मरवैरिपुर्याम् ॥ १ ॥

अमुष्य चानेकविधाध्वरधुरंधरतासंपादितविमलकीर्त्तेः सार्वकालिकतपश्चर्यासुपवित्रमूर्तेस्त्रयस्तनया नयाश्रिता विधेरिव वेदा उदभूवन्, येषां कनिष्ठो वरिष्ठो गुणैः प्राप्तप्रतिष्ठो ऽखिलविद्यासु समजायत सुमहितभागधेयो धीमतां धुरि गृहीताभिधेयो राजारामशास्त्रीति ।

दशसमद्वेशीये ऽस्मिँस्त्रिदशसमत्वं समीहमानो ऽस्य ॥
उपयममविधायैव प्रापोपयमं पिता ऽपि तापार्त्तः ॥ २ ॥

अनन्तरं च यथाविधि विहिते तदौर्ध्वदैहिककर्मणि त्रिलोचनघट्टे निवसतो विहसतो मुनीनपि निजतपःसंपदा पदाक्रमणपूतवसुंधरस्य रानडेपाख्यश्रीहरिशास्त्रिणः सविधे नातिबहुलेनैव कालेन सकलेषु काव्येषु कौमुद्यां च व्युत्पन्नतायमतिमानुषमनीषो विशेषेण ।

आस्येन्दोर्यदमुष्य निःसृतवती नानाऽऽकरा कौमुदी
ध्वस्तं मानसमन्धकारमतनोत्तात्यद्भुतेयं कथा ॥
चित्रं त्वेतदतीव सर्वजनताविस्मापकं श्रूयतां
काव्ये यत्स्थिरतां ततान स बुधः सूर्याश्रयात्संततम् ॥ ३ ॥

ततश्च ।

यस्मिन्नास्तिकनास्तिकोभयविधे षड्दर्शने कौशलं
यन्नामग्रहणे ऽधुना ऽपि विबुधा मूर्धानमाधुन्वते ॥
कीर्त्तिः शारदशीतरश्मिसदृशी यस्यावनिव्यापिनी
श्रीदामोदरशास्त्रिणायममुना तर्कान् समध्याप्यत ॥ ४ ॥
व्युत्पत्तिप्रतिभाविधानकुशलः किं तत्र सो ऽध्यापको
वाग्देवी किमु नित्यवासरसिका पात्रानुरागादभूत् ॥
राजारामविपश्चितः किमु पुरा सत्कर्म लोकातिगं
संशेते जनता यथेत्यथ धिया तादृक् तदा जृम्भितम् ॥ ५ ॥

क्रमेण च प्रतिक्षणमुपचीयमानामनुपमानां वार्षिकत्रिदशतटिनीमिव प्रतिभामस्यावलोक्य पर्यालोच्य च वर्षीयस्तया स्वस्य तादृशान्तेवासिपाठने भूयांसमसह्यं परिश्रमं श्रीमते सकलवसुंधरालंकारहीरवरायमाणाय नानाविधविद्याकुलनिकेतनायानेकवादिद्विरदघटाघोरकण्ठीरवाय श्रीकाशीनाथशर्मशास्त्रिणे समर्प्य सादरमिममिदमूचे दामोदरशास्त्री ।

यः सिक्त्वा श्रमवारिभिः कुसुमयन् नानाविधैर्हेतुभिः
सिद्धान्तैः फलितं विधाय बहुलैर्विद्वद्द्विजानन्ददम् ॥
विद्याकल्पतरुं चिरं स्थिरतरं कुर्याद् भवन्मूलकं
रत्नं नूत्नमिमं ददामि भवते यत्नादयं पाल्यताम् ॥ ६ ॥

अनन्तरमस्मादपि महाशयाद् व्याकरणादीनि नानाविधानि शास्त्राण्यभ्यस्तचराणीवासाद्य सहसैव चित्रकूटमधितिष्ठतः श्रीमतो ऽनेकविद्वद्द्विहङ्गाश्रयकल्पपादपस्य श्रीविनायकरावनृपतेर्वार्षिक्यां दिगन्तरागतपरःशतविपश्चित्सभास्तारसभाजितायां सभायां विविधशास्त्रसंबन्धिनीषु विप्रतिपत्तिषु परमामितरदुरधिगमां प्रतिष्ठां सममेव भृशं परितुष्यतः श्रीमतो भूयसा संमानेन प्रापदसौ मध्यमलोकवाचस्पतिः । चित्रं चैतत् । यतः ।

प्रागाश्रीयत रामेण चित्रकूटगिरिस्थितिः ॥
खण्डिता वादिनां तेन चित्रकूटगिरि स्थितिः ॥ ७ ॥

ततो विततसाधुवादपुरःसरं प्राप्तः काशिकामचिरेणैव समागतवता कृतवता राजकीयपाठालये प्रधानतमविद्वत्कल्पसकलान्तेवासिजनपरीक्षामालोचितवता चैतस्य नानाविधेषु दर्शनेषु दृढतमां व्युत्पत्तिमलौकिकीं च प्रतिभामुपस्थितिं च सकलजनातिगां श्रीमता संस्कृतादिविविधविद्याविशेषनिपुणेन जानम्यूरसाहिबेन नितरां प्रमुदितवता केवलमीदृशोत्तमतमपण्डितरत्नसहभावो भवेदतीव यशस्कर इति विचार्य कार्ये च प्राड्विवाकपदवीसमारूढस्य स्वस्य क्वचित्क्वचिद्विषये भारतदेशीयधर्मशास्त्रसंमतिसंपादनरूपमपरं च स्वेनैव विरच्यमानानां सुन्दरतरगुणगणमण्डितानां वाग्विलासानां परिशोधनमेतदेकसुकरमिति सखिनिर्विशेषं संमान्य नीत आजमगढाभिधं नगरं किं चिन्न्यूनाधिकमवात्सीत्तत्रैव वर्षपञ्चकम् ॥

अथ प्राप्योत्साहाद् बुधवरवृतं गालवपुरं
रणत्तोरणयुग्मं क्षपितविमतं वीक्ष्य नृपतिम् ॥
वशे कृत्वा ऽत्यत्यान् सकलसुधियो वादविमुखा-
नवापासौ मानं परममहिमानं च नृपतेः ॥ ८ ॥

सततं मानसं मोदं वचोभिर्यो ऽतनोन्नृणाम् ॥
स ततं मानसंमोदं कुतो वा नाप्नुयाद् बुधः ॥ ९ ॥

ततो ऽक्षिशशिनागभूप्रमितवत्सरे वैक्रमे
क्रमैधितयशःशरच्छशिविकाशिताशामुखः ॥
मुखाम्बुजविनिःसरत्सरससारवाक्चातुरी-
विनिर्जितविवादिवाक् सदनमेष भेजे निजम् ॥ १० ॥

यद्यप्यन्तं तदानीमभजत विधवोद्वाहशङ्कासमाधिः
श्रीकाशीनाथशास्त्रिप्रणयनविषयः सर्वशास्त्रज्ञमान्यः ॥
तत्राक्षेपानपूर्वांस्तदुपरि सहितान् हेतुवाक्यैः समाधीं-
श्चक्रे ऽसौ येन पुष्टिं दधति जहुरिहासूयका दोषदृष्टिम् ॥ ११ ॥

प्रीतस्ततो गुरुवरश्चिरमार्यगृह्य-
मेनं प्रशस्य सपदि प्रथयांबभूव ॥
ग्रन्थे ऽभिधानमदसीयमितो ऽन्यथा स
तत्पारितोषिकविधावनृणः कथं स्यात् ॥ १२ ॥

अनन्तरं तदुत्तरएव वत्सरे सर्वोत्तरमहत्तरगुणविजृम्भमाणभारतीकुलनिकेतनीभवन्तं तत्रभवन्तमिमं सांख्यशास्त्रपाठने न्ययुङ्क्त सांप्रतं यशोमात्रावशेषतामापन्नः परं विचारचतुरस्तदानींतनराजकीयप्रधानपाठालयमुख्यतमाध्यक्षो बालन्टैनसाहिबाख्यमहाशयः ॥

असंख्येष्वपि संख्यावत्स्वाद्यसंख्याश्रयो ह्यसौ ॥
सांख्याध्यापनकार्ये ऽतो नियुक्त इति युज्यते ॥ १३ ॥

अनल्पतरकल्पनाविषयहेतुवादैस्तत-
स्ततःप्रभृति पाठितः सकलशास्त्रपूगो ऽमुना ॥
यथा विजितवादिनः सदसि वीक्ष्य विद्यार्थिनः
सगद्गदगिरो बुधा दधति साधुवादान् बहून् ॥ १४ ॥

नानादेशसमागतैर्बहुविधैर्व्युत्पन्नविद्यार्थिभि-
र्देशं भारतमेनमावृतवतीं स्वल्पैर्दिनैर्भारतीम् ॥
वीक्ष्येव प्रससार पारमुदधेर्यस्माद् यशश्चन्द्रिका
तस्याध्यापनचातुरी कथमिव प्रोच्येत मादृग्विधैः ॥ १५ ॥

ततः परं विंशत्यधिकैकोनविंशतिशततमे वैक्रमे हायने सांप्रतिकसंस्कृतपाठशालाप्रधानाध्यक्षो नानाविधसंस्कृतादिविद्याविशदनिजाशयः श्रीग्रिफिथसाहिबाभिधमहाशयः पर्यालोच्यैनं धर्मशास्त्रपाठनधुरंधरं नियोजयामासामुत्र महता ऽऽदरेण ॥

श्रुतिस्मृतिसदागमैश्चिरतरं समालोचिते-
र्भवेद्यदिह निर्णयो दुरुपलक्ष्यधर्माध्वनः ॥
स नैव सुकरः परैरिति विचार्य तं तत्क्षमं
नियोजितवतः प्रभोः सुरगुरूपमेया मतिः ॥ १६ ॥

प्रसिध्यति गरुत्मतो गगनपक्षपातो भृशं
कलाच्युतिवशात् स्फुटो बहुलपक्षपातो विधोः ।
न च द्विजपतिः परः क्वचिदपक्षपातीति किं
ववाञ्छ नृपतिस्ततः सुकृतसंकटे निर्णयम् ॥ १७ ॥

अर्जित्वा प्रथमे वयस्यनुपमां विद्यामवद्यापहां
सन्मानं धनमाप्य मध्यमवयस्यध्याप्य विद्यार्थिनः ।
कैलासोदरसोदरेण यशसा संभूष्य भूमिं ततो
वैराग्यात्त्रिदशापगातटमठे योगं श्रयन्सो ऽवसत् ॥ १८ ॥

कृतसकलविधेयो यद्यपीहाविहीनो
ऽत्यजदिह सदनादीन् मोक्षमार्गैकनिष्ठः ।
तदपि विलपदन्तेवासिवर्गव्यथाहेतो-
रधिकसदयचेताः सो ऽर्जयामास वित्तम् ॥ १९ ॥

एवमतिवाह्य कथंचिदपि पञ्चषान्वत्सरान्मत्सरादिदोषविहीनमानसो मानसारधनो धन्यजनाग्रयायी स श्रीराजारामशास्त्री द्वात्रिंशदधिकैकोनविंशतिशततमे विक्रमहायने श्रावणशुक्लद्वादश्यां संन्यस्य विन्यस्य ततःप्रभृति प्रणवार्थे धियं धिक्कृत्य निखिलं विषयजातं विहाय जीवनहेतुभूतमाहारं देहान्तं यावद्यथापूर्वमवहितचेता भाद्रपदकृष्णतृतीयायां गुरुदिने दिनेश्वरे तालमात्रोच्छ्रिते परमं पदमासाद्य योगिसुगमं महीमहीनेन यशसैव केवलमलंचक्रे ऽलं चक्रे च मन्ये मोदमेदुरां हंसवाहनसभाम् ।

गङ्गावारिविसृष्टनश्वरतनुः कीर्त्या वितत्यावनि-
च्छायच्छायपदार्थचिन्तनभवद्भूरिप्रमोदः सदा ॥
धर्माधर्मसुखासुखादि सकलं संत्यज्य बाह्यं भ्रमं
रम्यं प्रापदतीव तत्पदमसौ यत्प्राप्य नाप्यं परम् ॥ २० ॥

गुरोः कालेकरोपाह्वश्रीमद्राजारामशास्त्रिणः ॥
गङ्गाधरो विलिखति वृत्तान्तं जीवनाश्रितम् ॥ २१ ॥

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 114. Benares, November 1st, 1875. Vol. X.

काशिकायाः

॥ चतुर्थाध्यायस्य तृतीयः पादः ॥

संभूते ॥ ४१ ॥

तत्रेत्येव । सप्तमीसमर्थाद् ङ्याप्प्रातिपदिकात् संभूत इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति । अवक्लृप्तिः प्रमाणानतिरेकश्च संभवत्यर्थ इह गृह्यते नोत्पत्तिः सत्ता वा, जातभवाभ्यां गतत्वात् । स्रुघ्ने संभवति, स्रौघ्नः । माथुरः । राष्ट्रियः ।

कोशाड्ढञ् ॥ ४२ ॥

कोशशब्दाद् ढञ् प्रत्ययो भवति तत्र संभूत इत्यस्मिन्विषये । अणोऽपवादः । कोशे संभूतं, कौशेयं वस्त्रम् । रूढिरेषा तेन क्रिमौ न भवति, खड्गकोशाच्च ॥

कालात्साधुपुष्प्यत्पच्यमानेषु ॥ ४३ ॥

तत्रेत्येव । कालविशेषवाचिभ्यः सप्तमीसमर्थेभ्यः साध्वादिष्वर्थेषु यथाविहितं प्रत्ययो भवति । हेमन्ते साधुः, हैमन्तः प्राकारः । शैशिरमनुलेपनम् । वसन्ते पुष्प्यन्ति, वासन्त्यः कुन्दलताः । ग्रैष्म्यः पाटलाः । शरदि पच्यन्ते, शारदाः शालयः । ग्रैष्मा यवाः ॥

उप्ते च ॥ ४४ ॥

तत्रेत्येव कालादिति च । सप्तमीसमर्थात्कालवाचिनः प्रातिपदिकादुप्ते यथाविहितं प्रत्ययो भवति । हेमन्ते उप्यन्ते, हैमन्ता यवाः । ग्रैष्मा व्रीहयः । योगविभाग उत्तरार्थः ॥

आश्वयुज्या वुञ् ॥ ४५ ॥

आश्वयुजीशब्दाद्वुञ् प्रत्ययो भवति उप्तेऽर्थे । ठञोऽपवादः । आश्वयुज्यामुप्ता, आश्वयुजका माषाः । अश्विनीभ्यां युक्ता पौर्णमासी, आश्वयुजी । अश्विनीपर्यायो ऽश्वयुक्शब्दः ॥

ग्रीष्मवसन्तादन्यतरस्याम् ॥ ४६ ॥

ग्रीष्मवसन्तशब्दाभ्यामन्यतरस्यां वुञ् प्रत्ययो भवति उप्तेऽर्थे । ऋत्वणोऽपवादः । ग्रैष्मं सस्यम् । ग्रैष्मकम् । वासन्तम् । वासन्तकम् ॥

देयमृणे ॥ ४७ ॥

तत्रेत्येव कालादिति च । सप्तमीसमर्थात्कालवाचिनः प्रातिपदिकाद्देयमित्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति, यद्देयमृणं चेत्तद्भवति । मासे देयमृणं मासिकम्, अर्द्धमासिकम् । सांवत्सरिकम् । ऋणमिति किम् । मासे देया भिक्षा ॥

कलाप्यश्वत्थयवबुसाद्वुन् ॥ ४८ ॥

कालादित्येव । कलापि अश्वत्थ यवबुस इत्येतेभ्यः कालवाचिभ्यः सप्तमीसमर्थेभ्यो देयमृणमित्येतस्मिन्नर्थे वुन् प्रत्ययो भवति । कलाप्यादयः शब्दाः साहचर्यात्काले वर्त्तन्ते । यस्मिन्काले मयूराः कलापिनो भवन्ति स कलापी । यस्मिन्नश्वत्थाः फलन्ति सोऽश्वत्थः । यस्मिन्यवबुसं संपद्यते स यवबुसशब्देनोच्यते । कलापिनि काले देयमृणं, कलापकम् । अश्वत्थकम् । यवबुसकम् ॥

ग्रीष्मावरसमाद्वुञ् ॥ ४९ ॥

ग्रीष्मावरसमशब्दाभ्यां वुञ् प्रत्ययो भवति देयमृणमित्येतस्मिन्नर्थे । अण्ठञोरपवादः । ग्रीष्मे देयमृणं, ग्रैष्मकम् ।

आवरसमकम् । प्रत्ययान्तरकरणं वृद्ध्यर्थम् । समाशब्दो वर्षपर्यायः ॥

संवत्सराग्रहायणीभ्यां ठञ्च ॥ ५० ॥

संवत्सराग्रहायणीशब्दाभ्यां ठञ् प्रत्ययो भवति, चकाराद्वुञ्च देयमृणमित्येतस्मिन्नर्थे । संवत्सरे देयमृणं, सांवत्सरिकम् । सांवत्सरकम् । आग्रहायणिकम् । आग्रहायणकम् । वेति वक्तव्ये ठञ्ग्रहणं संधिवेलादिषु संवत्सरात्फलपर्वणोरिति पठ्यते, तत्र फले ऋणत्वेन विवक्षिते ऽणं बाधित्वा ठञेव यथा स्यादिति ॥

व्याहरति मृगः ॥ ५१ ॥

तत्रेत्येव, कालादिति च । कालवाचिनः सप्तमीसमर्थात्प्रातिपदिकाद् व्याहरति मृग इत्येतस्मिन्विषये यथाविहितं प्रत्ययो भवति । निशायां व्याहरति मृगः, नैशः । नैशिकः । प्रादोषः । प्रादोषिकः । मृग इति किम् । निशायां व्याहरत्युलूकः ॥

तदस्य सोढम् ॥ ५२ ॥

कालादित्येव । तदिति प्रथमासमर्थात्कालवाचिनः प्रातिपदिकादस्येति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति यत्तत्प्रथमासमर्थं सोढं चेत्तद्भवति, सोढं जितमभ्यस्तमित्यर्थः । निशासहचरितमध्ययनं निशा, तत्सोढमस्य छात्रस्य, नैशः । नैशिकः । प्रादोषः । प्रादोषिकः ॥

तत्र भवः ॥ ५३ ॥

कालादिति निवृत्तम् । तत्रेति सप्तमीसमर्थाद् ङ्याप्प्रातिपदिकाद्भव इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति । सत्ता भवत्यर्थो गृह्यते न जन्म, तत्र जात इति गतार्थत्वात् । स्रुघ्ने भवः स्रौघ्नः । माथुरः । राष्ट्रियः । पुनस्तत्रग्रहणं तदस्येति निवृत्त्यर्थम् ॥

दिगादिभ्यो यत् ॥ ५४ ॥

दिश् इत्येवमादिभ्यः प्रातिपदिकेभ्यो यत्प्रत्ययो भवति तत्र भव इत्येतस्मिन्विषये । अणशब्दस्य चापवादः । दिशि भवं दिश्यम् । वर्ग्यम् । मुखजघनशब्दयोरशरीरावयवार्थः पाठः, सेनामुख्यं, सेनाजघन्यमिति * । दिश् । वर्ग । पूग । गण । पक्ष । धाय्या । मित्र । मेधा । अन्तर । पथिन् । रहस् । अलीक । उखा । साक्षिन् । आदि । अन्त । मुख । जघन । मेघ । यूथ ॥ उदकात्संज्ञायाम् † ॥ न्याय । वंश । अनुवंश । विश । काल । अप् । आकाश । दिगादिः ॥

* मुखजघनाभ्यां सेनाया अग्रभागपश्चाद्भागावुच्येते इत्यधिकः पाठः कुत्र चित्पुस्तके ।

† उदकात्संज्ञायामित्यस्यार्थे उदक्या रजस्वला । संज्ञायामिति किम् । औदको मत्स्यः । इत्यधिकं पुस्तकान्तरे ।

शरीरावयवाच्च ॥ ५५ ॥

शरीरं प्राणिकायः । शरीरावयववाचिनः प्रातिपदिकाद् यत्प्रत्ययो भवति तत्र भव इत्येतस्मिन्विषये । अणोऽपवादः । दन्तेषु भवं, दन्त्यम् । कण्ठ्यम् । ओष्ठ्यम् ॥

दृतिकुक्षिकलशिवस्त्यस्त्यहेर्ढञ् ॥ ५६ ॥

दृत्यादिभ्यः प्रातिपदिकेभ्यो ढञ् प्रत्ययो भवति तत्र भव इत्येतस्मिन्विषये । दृतौ भवं, दार्तेयम् । कौक्षेयम् । कालशेयम् । वास्तेयम् । आस्तेयम् । आहेयमजरं विषम् । अस्तिशब्दः प्रातिपदिकं, न तिङन्तः ॥

ग्रीवाभ्योऽण् च ॥ ५७ ॥

ग्रीवाशब्दादण्प्रत्ययो भवति चकाराड्ढञ्च, तत्र भव इत्येतस्मिन्विषये, शरीरावयवाद्यतोऽपवादः । ग्रीवासु भवं, ग्रैवेयम् । ग्रैवम् । ग्रीवाशब्दो धमनीवचनस्तासां बहुत्वाद्बहुवचनं कृतम् ॥

गम्भीराञ्ञ्यः ॥ ५८ ॥

गम्भीरशब्दाद् ञ्यः प्रत्ययो भवति तत्र भव इत्येतस्मिन्विषये । अणोऽपवादः । गम्भीरे भवं, गाम्भीर्यम् ॥ बहिर्देवपञ्चजनेभ्यश्चेति वक्तव्यम् ॥ * ॥ बाह्यम् । दैव्यम् । पाञ्चजन्यम् * ॥

अव्ययीभावाच्च ॥ ५९ ॥

अव्ययीभावसंज्ञकात्प्रातिपदिकाच्च ञ्यः प्रत्ययो भवति तत्र भव इत्येतस्मिन्विषये । अणोऽपवादः । न च सर्वस्मादव्ययीभावाद्भवति, किं तर्हि परिमुखादेः, परिमुखादीनां च गणपाठस्यैतदेव प्रयोजनं तेषां विशेषणमव्ययीभावग्रहणम् । परिमुखं भवं, पारिमुख्यम् । पारिहनव्यम् । परिमुखादेरन्यत्र न भवति । औपकूलम् । परिमुख । परिहनु । पर्योष्ठ । पर्युलू । औपमूल । खल । परिसीर । अनुसीर । उपसीर । उपस्थल । उपकलाप । अनुपथ । अनुखड्ग । अनुतिल । अनुशीत । अनुमाष । अनुयव । अनुयूप । अनुवंश † ॥

अन्तःपूर्वपदाट्ठञ् ॥ ६० ॥

अव्ययीभावादित्येव । अन्तःशब्दो विभक्त्यर्थे समस्यते, तत्पूर्वपदादव्ययीभावाट्ठञ् प्रत्ययो भवति तत्र भव इत्येतस्मिन्विषये । अणोऽपवादः । आन्तर्वेश्मिकम् । आन्तर्गेहिकम् ‡ ॥ समानशब्दाट्ठञ् वक्तव्यः ॥ * ॥ समाने भवं सामानिकम् ॥ तदादेश्च ॥ * ॥ सामानग्रामिकम् । सामानदेशिकम् ॥ अध्यात्मादिभ्यश्च ॥ * ॥ आध्यात्मिकम् । आधिदैविकम् । आ-

* चतुर्मासाद्यज्ञे ण्यो वक्तव्यः ॥ * ॥ चातुर्मास्यानि व्रतानि । चातुर्मास्यो यज्ञः । चातुर्मासो ऽन्यत्र । इत्यधिकं बहुषु पुस्तकेषु ।

† अनुखङ्ग । पुस्तकान्तरे ऽयं शब्दोऽधिकोऽत्र गणे ।

‡ आन्तरगारिकम् । इत्यधिकं पुस्तकान्तरे ।

Digitized by Google

धिभौतिकम्*। अध्यात्मादिराकृतिगणः ॥ ऊर्ध्वंदमाच्च ठञ् वक्तव्यः ॥ * ॥ और्ध्वंदमिकः। ऊर्ध्वशब्देन समानार्थ ऊर्ध्वंदमशब्दः ॥ ऊर्ध्वंदेहाच्च ॥ * ॥ और्ध्वंदेहिकम् ॥ * ॥ लोकोत्तरपदाच्च ॥ * ॥ ऐहलौकिकम्। पारलौकिकम् ॥ मुखपार्श्वशब्दाभ्यां तसन्ताभ्यामीयः प्रत्ययो वक्तव्यः ॥ * ॥ मुखतीयम्। पार्श्वतीयम् ॥ जनपरयोः कुक्च ॥ * ॥ जनकीयम्। परकीयम् ॥ मध्यशब्दादीयः ॥ * ॥ मध्यीयः ॥ मण्मीयौ च प्रत्ययौ वक्तव्यौ ॥ * ॥ माध्यमम्। मध्यमीयम् ॥ मध्यो मध्यं दिनण् चास्मात् ॥ * ॥ मध्ये भवं, माध्यंदिनम् ॥ स्थाम्नो लुग्वक्तव्यः ॥ * ॥ अश्वत्थामा ॥ अजिनान्ताच्च ॥ * ॥ वृकाजिनः। सिंहाजिनः।

समानस्य तदादेश्च अध्यात्मादिषु चेष्यते।
ऊर्ध्वंदमाच्च देहाच्च लोकोत्तरपदस्य च ॥
मुखपार्श्वतसोरीयः कुग्जनस्य परस्य च।
ईयः कार्योऽथ मध्यस्य मण्मीयौ प्रत्ययौ तथा ॥
मध्यो मध्यं दिनण् चास्मात्स्थाम्नो लुगजिनात्तथा ॥

ग्रामात्पर्यनुपूर्वात् ॥ ६१ ॥

अव्ययीभावादित्येव। ग्रामशब्दान्तादव्ययीभावात्परि अनु इत्येवंपूर्वाट्ठञ् प्रत्ययो भवति तत्र भव इत्येतस्मिन्विषये। अणोपवादः। पारिग्रामिकः। आनुग्रामिकः ॥

जिह्वामूलाङ्गुलेश्छः ॥ ६२ ॥

जिह्वामूलशब्दादङ्गुलिशब्दाच्च छः प्रत्ययो भवति तत्र भव इत्येतस्मिन्विषये। यतोपवादः। जिह्वामूलीयम्। अङ्गुलीयम् ॥

वर्गान्ताच्च ॥ ६३ ॥

वर्गशब्दान्ताच्च प्रातिपदिकाच्छः प्रत्ययो भवति तत्र भव इत्येतस्मिन्विषये। अणोपवादः। कवर्गीयम्। चवर्गीयम् ॥

अशब्दे यत्खावन्यतरस्याम् ॥ ६४ ॥

वर्गान्तादित्येव। शब्दादन्यस्मिन्प्रत्ययार्थे वर्गान्तात्प्रातिपदिकादन्यतरस्यां यत्खौ प्रत्ययौ भवतः तत्र भव इत्येतस्मिन्विषये। छे प्राप्ते वचनं, पक्षे सोपि भवति। वासुदेववर्ग्यः। वासुदेववर्गीणः। वासुदेववर्गीयः†। युधिष्ठिरवर्ग्यः। युधिष्ठिरवर्गीणः। युधिष्ठिरवर्गीयः। अशब्दइति किम्। कवर्गीया वर्णाः ॥

कर्णललाटात्कनलंकारे ॥ ६५ ॥

कर्णललाटशब्दाभ्यां कन् प्रत्ययो भवति तत्र भव इत्येतस्मिन्विषये ऽलंकारे ऽभिधेये। यतोपवादः। कर्णिका। ललाटिका। अलंकारइति किम्। कर्ण्यम्। ललाट्यम् ॥

* अनुशतिकादीनां चेत्युभयपदवृद्धिरित्यधिकं क्वचित्।
† अर्जुनवर्ग्यः। अर्जुनवर्गीणः। अर्जुनवर्गीयः। इत्यधिकं पुस्तकान्तरे।

तस्य व्याख्यानइति च व्याख्यातव्यनाम्नः ॥ ६६ ॥

व्याख्यायते ऽनेनेति व्याख्यानं, व्याख्यातव्यस्य नाम व्याख्यातव्यनाम। तस्येति षष्ठीसमर्थाद् व्याख्यातव्यनाम्नः प्रातिपदिकाद्व्याख्याने ऽभिधेये यथाविहितं प्रत्ययो भवति तत्र भवे च। वाक्यार्थसमीपे चकारः श्रूयमाणः पूर्ववाक्यार्थमेव समुच्चिनोति तत्र भव इति। सुपां व्याख्यानः, सौपो ग्रन्थः। तैङः। कार्त्तः। सुप्सु भवं, सौपम्। तैङम्। कार्त्तम्। व्याख्यातव्यनाम्न इति किम्। पाटलिपुत्रस्य व्याख्यानी सुकोसला, पाटलिपुत्रं सुकोसलया व्याख्यायते, एवंसंनिवेशं पाटलिपुत्रमिति, न तु पाटलिपुत्रो व्याख्यातव्यनाम। भवव्याख्यानयोर्युगपदधिकारो ऽपवादविधानार्थः। कृतनिर्देशौ हि तौ ॥

बह्वचोन्तोदात्ताट्ठञ् ॥ ६७ ॥

बह्वचो व्याख्यातव्यनाम्नः प्रातिपदिकादन्तोदात्ताद्भवव्याख्यानयोष्ठञ् प्रत्ययो भवति। अणोपवादः। षात्वणत्विकम्। नातानतिकम्। समासस्वरेणान्तोदात्ताः प्रकृतयः। बह्वच इति किम्। द्व्यचष्ठकं वक्ष्यति। एकाच् प्रत्युदाह्रियते। सौपम्। तैङम्। कार्त्तम्। अन्तोदात्तादिति किम्। संहितायाः सांहितम्। संहिताशब्दो हि गतिस्वरेणाद्युदात्तः ॥

क्रतुयज्ञेभ्यश्च ॥ ६८ ॥

क्रतुभ्यो यज्ञेभ्यश्च व्याख्यातव्यनामभ्यः प्रातिपदिकेभ्यो भवव्याख्यानयोरर्थयोष्ठञ् प्रत्ययो भवति। अणोपवादः। क्रतुभ्यस्तावत्। अग्निष्टोमस्य व्याख्यानस्तत्र भव, आग्निष्टोमिकः। वाजपेयिकः। राजसूयिकः। यज्ञेभ्यः। पाकयज्ञिकः। नावयज्ञिकः। अनन्तोदात्तार्थ आरम्भः। क्रतुभ्य इत्येव सिद्धे यज्ञग्रहणमसोमयागेभ्योपि यथा स्यात्, पाञ्चौदनिकः। दाशौदनिकः। बहुवचनं स्वरूपविधिनिरासार्थम् ॥

अध्यायेष्वेवर्षेः ॥ ६९ ॥

ऋषिशब्दाः प्रवरनामधेयानि तेभ्य ऋषिशब्देभ्यो भवव्याख्यानयोरर्थयोष्ठञ् प्रत्ययो भवति। अणोपवादः। अध्यायेष्वेव प्रत्ययार्थविशेषणेषु। व्याख्यातव्यनाम्न इत्यनुवर्त्तते तत्साहचर्य्यादृषिशब्दैर्ग्रन्थ उच्यते। वसिष्ठस्य व्याख्यानस्तत्र भवो वा वासिष्ठिको ऽध्यायः। वैश्वामित्रिकः। अध्यायेष्विति किम्। वासिष्ठी ऋक् ॥

पौरोडाशपुरोडाशात् ष्ठन् ॥ ७० ॥

पौरोडाशशब्दात्पुरोडाशशब्दाच्च भवव्याख्यानयोरर्थयोः ष्ठन् प्रत्ययो भवति। पुरोडाशाः पिष्टपिण्डास्तेषां संस्कारको मन्त्रः पौरोडाशस्तस्य व्याख्यानस्तत्र भवो वा पौरोडाशिकः। पौरोडाशिकी। पुरोडाशसहचरितो ग्रन्थः पुरोडाशस्तस्य

Digitized by Google

व्याख्यानस्तत्र भवो वा पुरोडाशिकः । पुरोडाशिकी । षकारो ङीषर्थः ॥

छन्दसो यदणौ ॥ ७१ ॥

छन्दःशब्दाद्भवव्याख्यानयोरर्थयोर्यदणौ प्रत्ययौ भवतः । ठ्ञ इति ठकि प्राप्ते वचनम् । छन्दस्यः । छान्दसः ॥

द्व्यजृद्ब्राह्मणर्क्प्रथमाध्वरपुरश्चरणनामाख्याताट्ठक् ॥ ७२ ॥

द्व्यजादिभ्यः प्रातिपदिकेभ्यो व्याख्यातव्यनामभ्यो भवव्याख्यानयोरर्थयोष्ठक् प्रत्ययो भवति । अणादेरपवादः । द्व्यचस्तावत्, ऐष्टिकः । पाशुकः । ऋकारान्तात् । चातुर्होतृकः । पाञ्चहोतृकः । ब्राह्मण । ब्राह्मणिकः । ऋक् । आर्चिकः । प्रथम । प्राथमिकः । अध्वर । आध्वरिकः । पुरश्चरण । पौरश्चरणिकः । नामाख्यातग्रहणं संघातविगृहीतार्थम् । नामिकः । आख्यातिकः । नामाख्यातिकः ॥

अणृगयनादिभ्यः ॥ ७३ ॥

ऋगयनादिभ्यः प्रातिपदिकेभ्यो भवव्याख्यानयोरर्थयोरण् प्रत्ययो भवति । ठञादेरपवादः । आर्गयनः । पादव्याख्यानः । अण्ग्रहणं बाधकबाधनार्थम् । वास्तुविद्यः । ऋगयन । पदव्याख्यान । छन्दोमान । छन्दोभाषा । छन्दोविचिति । न्याय । पुनरुक्त । व्याकरण । निगम । वास्तुविद्या । अङ्गविद्या । क्षत्रविद्या । उत्पात । उत्पाद । संवत्सर । मुहूर्त । निमित्त । उपनिषत् । शिक्षा * । ऋगयनादिः ॥

तत आगतः ॥ ७४ ॥

तत इति पञ्चमीसमर्थादागत इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति । स्रुघ्नादागतः स्रौघ्नः । माथुरः । राष्ट्रियः । तत इति मुख्यमपादानं विवक्षितं यत्तदिह गृह्यते, न नान्तरीयकम् । स्रुघ्नादागच्छन्वृक्षमूलादागत इति ॥

ठगायस्थानेभ्यः ॥ ७५ ॥

आय इति स्वामिग्राह्यो भाग उच्यते स यस्मिन्नुत्पद्यते तदायस्थानम् । आयस्थानवाचिभ्यः प्रातिपदिकेभ्यष्ठक् प्रत्ययो भवति तत आगत इत्येतस्मिन्विषये, अणोपवादः । छं तु परत्वाद्बाधते । शुल्कशालाया आगतः, शौल्कशालिकः । आकरिकम् † । बहुवचनं स्वरूपविधिनिरासार्थम् ॥

शुण्डिकादिभ्योऽण् ॥ ७६ ॥

शुण्डिक इत्येवमादिभ्यः प्रातिपदिकेभ्योऽण् प्रत्ययो भवति तत आगत इत्येतस्मिन्विषये । आयस्थानठकोऽपवादः । शुण्डिकादागतः, शौण्डिकः । कार्कणः । अण्ग्रहणं बाधकबाधनार्थम् । औदपानः । शुण्डिक । कृकण । स्थण्डिल । उदपान । उपल । तीर्थ । भूमि । तृण । पर्ण । शुण्डिकादिः ॥

विद्यायोनिसंबन्धेभ्यो वुञ् ॥ ७७ ॥

विद्यायोनिकृतः संबन्धो येषां ते विद्यायोनिसंबन्धाः । तद्वाचिभ्यः शब्देभ्यो वुञ् प्रत्ययो भवति तत आगत इत्येतस्मिन्विषये । अणोपवादः । छं तु परत्वाद्बाधते । विद्यासंबन्धेभ्यस्तावत् । उपाध्यायादागतम्, औपाध्यायकम् । शैष्यकम् । आचार्यकम् । योनिसंबन्धेभ्यः । मातामहकः । पैतामहकः । मातुलकः * ॥

ऋतष्ठञ् ॥ ७८ ॥

विद्यायोनिसंबन्धेभ्य इत्येव । ऋकारान्तेभ्यः प्रातिपदिकेभ्यो विद्यायोनिसंबन्धवाचिभ्यष्ठञ् प्रत्ययो भवति तत आगत इत्येतस्मिन्विषये । वुञोपवादः । विद्यासंबन्धवाचिभ्यस्तावत् । होतुरागतं, हौतृकम् । पौतृकम् । योनिसंबन्धवाचिभ्यः । भ्रातृकम् । स्वासृकम् । मातृकम् । तपरकरणं मुखार्थम् । विद्यायोनिभ्यामन्यत्र सावित्रम् ॥

पितुर्यच्च ॥ ७९ ॥

पितृशब्दाद् यत् प्रत्ययो भवति चकाराट्ठञ्च तत आगत इत्येतस्मिन्विषये । पितुरागतं, पित्र्यम् । पैतृकम् ॥

गोत्रादङ्कवत् ॥ ८० ॥

अपत्याधिकारादन्यत्र लौकिकं गोत्रमपत्यमात्रं गृह्यते । गोत्रप्रत्ययान्तात्प्रातिपदिकादङ्कवत्प्रत्ययविधिर्भवति तत आगत इत्येतस्मिन्विषये । अङ्कग्रहणेन तस्येदमर्थसामान्यं लक्ष्यते । तस्माद्वुञतिदिश्यते † नाणेव संघाङ्कलक्षणेष्वञ्यञिञामणिति । औपगवानामङ्कः, औपगवकः । कापटवकः । नाडायनकः । चारायणकः । एवमौपगवेभ्य आगतमौपगवकम् । कापटवकम् । नाडायनकम् । चारायणकम् ॥

हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः ॥ ८१ ॥

हेतुभ्यो मनुष्येभ्यश्चान्यतरस्यां रूप्यः प्रत्ययो भवति तत आगत इत्येतस्मिन्विषये । मनुष्यग्रहणमहेत्वर्थम् । हेतुः कारणम् । हेतुभ्यस्तावत् । समादागतं, समरूप्यम् । समीयम् । विषमरूप्यम् । विषमीयम् । गहादित्वाच्छः । मनुष्येभ्यः । देवदत्तरूप्यम् । यज्ञदत्तरूप्यम् । दैवदत्तम् । याज्ञदत्तम् । बहुवचनं स्वरूपविधिनिरासार्थम् ॥

* छन्दो विजिनी । व्याय । निरुक्त । विद्या । उच्छ्राव । भिक्षा । एते शब्दा अधिका अत्र गणे पुस्तकान्तरे ।

† नागरिकम् । आपणिकम् । इत्यपि कुत्र चित्पुस्तके ।

* मातुलक इत्युदाहरणं बहुषु पुस्तकेषु नास्ति ।

† गोत्रचरणाद्वुञितीत्यधिकं पुस्तकान्तरे ।

Digitized by Google

मयट् च ॥ ८२ ॥

हेतुभ्यो मनुष्येभ्यश्च मयट् प्रत्ययो भवति तत आगत इत्येतस्मिन्विषये । सममयम् । विषममयम् । मनुष्येभ्यः । देवदत्तमयम् । यज्ञदत्तमयम् । टकारो ङीबर्थः । सममयी । योगविभागो यथासंख्यनिरासार्थः ॥

प्रभवति ॥ ८३ ॥

तत इत्येव । पञ्चमीसमर्थाद् ङ्याप्प्रातिपदिकात्प्रभवतीत्येतस्मिन्विषये यथाविहितं प्रत्ययो भवति । प्रभवति प्रकाशते प्रथमत उपलभ्यत इत्यर्थः । हिमवतः प्रभवति, हैमवती गङ्गा । दारदी सिन्धुः ॥

विदूराञ्ञ्यः ॥ ८४ ॥

विदूरशब्दात् ञ्यः प्रत्ययो भवति ततः प्रभवतीत्येतस्मिन्विषये । अणोऽपवादः । विदूरात्प्रभवति, वैदूर्यो मणिः । ननु च वालवायादसौ प्रभवति न विदूरात् तत्र तु संस्क्रियते । एवं तर्हि

वालवायो विदूरं च प्रकृत्यन्तरमेव वा ।
न वै तत्रेति चेद्ब्रूयाज्जित्वरीवदुपाचरेत् ॥

तद्गच्छति पथिदूतयोः ॥ ८५ ॥

तदिति द्वितीयासमर्थाद्गच्छतीत्येतस्मिन्विषये यथाविहितं प्रत्ययो भवति, योऽसौ गच्छति पन्थाश्चेत्स भवति दूतो वा । स्रुघ्नं गच्छति, स्रौघ्नः पन्था दूतो वा । माथुरः* । तत्स्थेषु गच्छत्सु पन्था गच्छतीत्युच्यते । अथ वा स्रुघ्नप्राप्तिः पथो गमनम् । पथिदूतयोरिति किम् । स्रुघ्नं गच्छति सार्थः ॥

अभिनिष्क्रामति द्वारम् ॥ ८६ ॥

तदित्येव । द्वितीयासमर्थादभिनिष्क्रामतीत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति यत्तदभिनिष्क्रामति द्वारं चेत्तद्भवति । आभिमुख्येन निष्क्रामति, अभिनिष्क्रामति, स्रुघ्नमभिनिष्क्रामति कान्यकुब्जद्वारं स्रौघ्नम् । माथुरम् । राष्ट्रियम । द्वारमभिनिष्क्रमणक्रियायां करणं प्रसिद्धं तदिह स्वातन्त्र्येण विवक्ष्यते यथा साध्वसिश्छिनत्तीति । द्वारमिति किम् । स्रुघ्नमभिनिष्क्रामति पुरुषः ॥

अधिकृत्य कृते ग्रन्थे ॥ ८७ ॥

तदित्येव । अधिकृत्येतदपेक्ष्य द्वितीया । अधिकृत्य, प्रस्तुत्य, आगूर्येत्यर्थः । तदिति द्वितीयासमर्थादधिकृत्य कृत इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति यत्तत्कृतं ग्रन्थश्चेत्स भवति । सुभद्रामधिकृत्य कृतो ग्रन्थः, सौभद्रः । गौरिमित्रः । यायातः । ग्रन्थ इति किम् । सुभद्रामधिकृत्य कृतः प्रासादः ॥

* राष्ट्रिय इत्यधिकमन्यत्र ।

लुबाख्यायिकार्थस्य प्रत्ययस्य बहुलम् ॥ * ॥ वासवदत्तामधिकृत्य कृता ऽऽख्यायिका वासवदत्ता । सुमनोत्तरा । उर्वशी । न च भवति, भैमरथी ॥

शिशुक्रन्दयमसभद्वन्द्वेन्द्रजननादिभ्यश्छः ॥ ८८ ॥

तदित्येव । अधिकृत्य कृते ग्रन्थ इति च । शिशुक्रन्दादिभ्यो द्वितीयासमर्थेभ्यश्छः प्रत्ययो भवति अधिकृत्य कृते ग्रन्थे । अणोऽपवादः । शिशूनां क्रन्दनं शिशुक्रन्दः । तमधिकृत्य कृतो ग्रन्थः, शिशुक्रन्दीयः । यमस्य सभा यमसभं, यमसभीयः । द्वन्द्वात् । अग्निकाश्यपीयः । श्येनकपोतीयः । शब्दार्थसंबन्धीयं प्रकरणम् । वाक्यपदीयम् । इन्द्रजननादिभ्यः । इन्द्रजननीयम् । प्रद्युम्नागमनीयम् * । इन्द्रजननादिराकृतिगणः प्रयोगतो ऽनुसर्तव्यः, प्रातिपदिकेषु न पठ्यते ॥ द्वन्द्वे देवासुरादिभ्यः प्रतिषेधः ॥ * ॥ दैवासुरम् । राक्षोसुरम् । गौणमुख्यम् । इन्द्रजननादेराकृतिगणत्वात् शिशुक्रन्दादयोऽपि तत्रैव द्रष्टव्याः । प्रपञ्चार्थमेषां ग्रहणम् । एवं सति देवासुरादिप्रतिषेधोऽपि न वक्तव्यः, ततश्छप्रत्ययस्यादर्शनात् ॥

सोऽस्य निवासः ॥ ८९ ॥

स इति प्रथमासमर्थादस्येति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति यत्प्रथमासमर्थं निवासश्चेत्स भवति, निवसन्त्यस्मिन्निति निवासो देश उच्यते । स्रुघ्नो निवासो ऽस्य स्रौघ्नः । माथुरः । राष्ट्रियः ॥

अभिजनश्च ॥ ९० ॥

सोऽस्येत्येव । स इति प्रथमासमर्थादस्येति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति यत्प्रथमासमर्थमभिजनश्चेत्स भवति । अभिजनः पूर्वबान्धवः । तत्संबन्धाद्देशोऽप्यभिजन इत्युच्यते । यस्मिन्पूर्वबान्धवैरुषितं तस्मादिह देशवाचिनः प्रत्ययो, न बन्धुभ्यो निवासप्रत्यासत्तेः । स्रुघ्नोऽभिजनोऽस्य स्रौघ्नः । माथुरः । राष्ट्रियः । निवासाभिजनयोः को विशेषः । यत्र संप्रत्युष्यते स निवासः । यत्र पूर्वैरुषितं सोऽभिजनः । योगविभाग उत्तरार्थः ॥

आयुधजीविभ्यश्छः पर्वते ॥ ९१ ॥

सोऽस्याभिजन इति वर्तते । आयुधजीविभ्य इति तादर्थ्ये चतुर्थी, पर्वत इति प्रकृतिविशेषणम् । पर्वतवाचिनः प्रथमासमर्थादभिजनादस्येति षष्ठ्यर्थे छः प्रत्ययो भवति । आयुधजीविभ्यश्च आयुधजीव्यर्थमायुधजीविनोऽभिधातुं प्रत्ययो भवतीत्यर्थः । हृद्गोलः पर्वतोऽभिजन एषामायुधजीविनां हृद्गोलीयाः । अन्धकवर्तीयाः । रोहितगिरीयाः । आयुधजीविभ्य इति किम् । ऋक्षोदः पर्वतोऽभिजन एषां ब्राह्मणानाम्, आर्क्षोदा ब्राह्मणाः । पर्वत इति किम् । सांकाश्यका आयुधजीविनः ॥

* सीतान्वेषणीयः । इत्यधिकं पुस्तकान्तरे ।

Digitized by Google

शण्डिकादिभ्यो ञ्यः ॥ ९२ ॥

शण्डिक इत्येवमादिभ्यः प्रातिपदिकेभ्यो ञ्यः प्रत्ययो भवति सोऽस्याभिजन इत्येतस्मिन्विषये । अणादेरपवादः । शाण्डिक्यः । सार्वसेन्यः । शण्डिक । सर्वकेश । सर्वसेन । शक । सट । रक । शङ्ख । बोध । शण्डिकादिः ॥

सिन्धुतक्षशिलादिभ्योऽणञौ ॥ ९३ ॥

आदिशब्दः प्रत्येकमभिसंबध्यते । सिन्ध्वादिभ्यः प्रातिपदिकेभ्यस्तक्षशिलादिभ्यश्च यथासंख्यमणञौ प्रत्ययौ भवतः सोऽस्याभिजन इत्येतस्मिन्विषये । सैन्धवः । वार्णवः । सिन्धु । वर्णु । गन्धार । मधुमत् । कम्बोज । कश्मीर । साल्व । किष्किन्धा । गब्दिका । उरस । दरत् * । ये तु कच्छादिषु पठ्यन्ते सिन्धुवर्णुप्रभृतयस्तेभ्यस्तत एवाणि सिद्धे मनुष्यवुञो बाधनार्थं वचनम् । तक्षशिलादिभ्यः खल्वपि । ताक्षशिलः । वात्सोद्धरणः । तक्षशिला । वत्सोद्धरण । कौमेदुर । काण्डवारण । ग्रामणी । सरालक । कंस । किन्नर । संकुचित । सिंहकोष्ठ । कर्णकोष्ठ । बर्बर । अवसान ॥

तूदीशलातुरवर्मतीकूचवाराड्ढक्छण्ढञ्यकः ॥ ९४ ॥

तूद्यादिभ्यश्चतुर्भ्यः शब्देभ्यो यथासंख्यं चत्वार एव ढक् छण् ढञ् यक् इत्येते प्रत्यया भवन्ति सोऽस्याभिजन इत्येतस्मिन्विषये । अणोऽपवादः । तौदेयः । शालातुरीयः । वार्मतेयः । कौचवार्यः ॥

भक्तिः ॥ ९५ ॥

समर्थविभक्तिः प्रत्ययार्थश्चानुवर्त्तते । अभिजन इति निवृत्तम् । स इति प्रथमासमर्थादस्येति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति, यत्प्रथमासमर्थं भक्तिश्चेत्तद्भवति । भज्यते सेव्यत इति भक्तिः । स्रुघ्नो भक्तिरस्य स्रौघ्नः । माथुरः । राष्ट्रियः ॥

अचित्ताददेशकालाट्ठक् ॥ ९६ ॥

देशकालव्यतिरिक्तादचित्तवाचिनः प्रातिपदिकाट्ठक् प्रत्ययो भवति सोऽस्य भक्तिरित्येतस्मिन्विषये । अणोऽपवादः । वृद्धाच्छं परत्वाद्बाधते । अपूपा भक्तिरस्य आपूपिकः । शाष्कुलिकः । पायसिकः । अचित्तादिति किम् । दैवदत्तः । अदेशादिति किम् । स्रौघ्नः । अकालादिति किम् । ग्रैष्मः ॥

महाराजाट्ठञ् ॥ ९७ ॥

महाराजशब्दाट् ठञ् प्रत्ययो भवति सोऽस्य भक्तिरित्येतस्मिन्विषये । अणोऽपवादः । महाराजो भक्तिरस्य माहाराजिकः । प्रत्ययान्तरकरणं स्वरार्थम् ॥

वासुदेवार्जुनाभ्यां वुन् ॥ ९८ ॥

वासुदेवार्जुनशब्दाभ्यां वुन् प्रत्ययो भवति सोऽस्य भक्तिरित्येतस्मिन्विषये । छाणोरपवादः । वासुदेवो भक्तिरस्य वासुदेवकः । अर्जुनकः । ननु वासुदेवशब्दाद्गोत्रक्षत्रियाख्येभ्य इति वुञस्त्येव । न चात्र वुन्वुञोर्विशेषो विद्यते किमर्थं वासुदेवग्रहणम् । संज्ञैषा देवताविशेषस्य न क्षत्रियाख्या । अल्पाच्तरमेजाद्यदन्तमिति वार्जुनशब्दस्य पूर्वनिपातमकुर्वन् ज्ञापयत्यभ्यर्हितं पूर्वं निपततीति ॥

गोत्रक्षत्रियाख्येभ्यो बहुलं वुञ् ॥ ९९ ॥

गोत्राख्येभ्यः क्षत्रियाख्येभ्यश्च प्रातिपदिकेभ्यो बहुलं वुञ् प्रत्ययो भवति सोऽस्य भक्तिरित्येतस्मिन्विषये । अणोऽपवादः । वृद्धाच्छं परत्वाद्बाधते । ग्लुचुकायनिर्भक्तिरस्य ग्लौचुकायनकः । औपगवकः । कापटवकः । क्षत्रियाख्येभ्यः । नाकुलकः । साहदेवकः । साम्बकः । आख्याग्रहणं प्रसिद्धक्षत्रियशब्दपरिग्रहार्थं, यथाकथंचित् क्षत्रियवृत्तिभ्यो मा भूत् । बहुलग्रहणात् क्वचिदप्रवृत्तिरेव । पाणिनो भक्तिरस्य पाणिनीयः । पौरवीयः ॥

जनपदिनां जनपदवत्सर्वं जनपदेन समानशब्दानां बहुवचने ॥ १०० ॥

जनपदिनो ये बहुवचने जनपदेन समानशब्दास्तेषां जनपदवत्सर्वं भवति प्रत्ययः प्रकृतिश्च सोऽस्य भक्तिरित्येतस्मिन्विषये । जनपदतदवध्योश्चेत्यत्र प्रकरणे ये प्रत्यया विहितास्ते जनपदिभ्योऽस्मिन्नर्थेऽतिदिश्यन्ते । जनपदिनो जनपदस्वामिनः क्षत्रियाः । अङ्गा जनपदो भक्तिरस्य आङ्गकः । वाङ्गकः । सौह्मकः । पौण्ड्रकः । तद्वदङ्गाः क्षत्रिया भक्तिरस्य आङ्गकः । वाङ्गकः । सौह्मकः । पौण्ड्रकः । जनपदिनामिति किम् । पञ्चाला ब्राह्मणा भक्तिरस्य पाञ्चालः । सर्वग्रहणं प्रकृत्यतिदेशार्थं स च द्व्येकयोरतिदेशं प्रयोजयति । वृद्धिनिमित्तेषु च वुञादिषु विशेषो नास्तीति । मद्रवृज्योः कनि विशेषः । मद्रस्यापत्यं, द्व्यञ्मगधकलिङ्गसूरमसादण्, माद्रः । वृजिशब्दादपि वृद्धेत्कोसलाजादाञ्ञ्यङ्, वार्ज्यः । स भक्तिरस्येति प्रकृतिनिर्ह्रासे कृते मद्रकः । वृजिकः । जनपदेन समानशब्दानामिति किम् । अनुषण्डो जनपदः, पौरवो राजा स भक्तिरस्य पौरवीयः । बहुवचनग्रहणं समानशब्दताविषयलक्षणार्थम्, अन्यथा हि यत्रैव समानशब्दता तत्रैवातिदेशः स्याद्, एकवचनद्विवचनयोर्न स्यात्, वाङ्गो वाङ्गौ वा भक्तिरस्येति । बहुवचने तु बहुवचने समानशब्दानामेकवचनद्विवचनयोः सत्यपि शब्दभेदेऽतिदेशो भवति । वाङ्गः वाङ्गौ वा भक्तिरस्य वाङ्गकः ॥

---

* कुलून । दिरसा । एतौ शब्दौ पुस्तकान्तरेऽत्र गणेऽधिकौ ।

तेन प्रोक्तम् ॥ १०१ ॥

तेनेति तृतीयासमर्थात्प्रोक्तमित्यस्मिन्नर्थे यथाविहितं प्रत्ययो भवति । प्रकर्षेणोक्तं प्रोक्तमित्युच्यते, न तु कृतम् । कृते ग्रन्थइत्यनेन गतत्वात् । अन्येन कृता माथुरेण प्रोक्ता माथुरी वृत्तिः । पाणिनीयम् । आपिशलम् । काशकृत्स्नम् ॥

तित्तिरिवरतन्तुखण्डिकोखाच्छण् ॥ १०२ ॥

तित्तिर्यादिभ्यः शब्देभ्यश्छण् प्रत्ययो भवति तेन प्रोक्तमित्येतस्मिन्विषये । अणोपवादः । तित्तिरिणा प्रोक्तमधीयते तैत्तिरीयाः । वारतन्तवीयाः । खाण्डिकीयाः । औखीयाः ॥ छन्दसि वायमिष्यते ॥ तित्तिरिणा प्रोक्तः श्लोक इत्यत्र न भवति । शौनकादिभ्यश्छन्दसीत्यत्रास्यानुवृत्तेश्छन्दोधिकारविहितानां च तद्विषयतेष्यते * ॥

काश्यपकौशिकाभ्यामृषिभ्यां णिनिः ॥ १०३ ॥

काश्यपकौशिकशब्दाभ्यामृषिवाचिभ्यां णिनिः प्रत्ययो भवति तेन प्रोक्तमित्येतस्मिन्विषये । छस्यापवादः । णकार उत्तरत्र वृद्ध्यर्थः कल्पस्ताभ्यां प्रोक्त इति स्मर्यते । तस्यापि च तद्विषयता भवत्येव । शौनकादिभ्यश्छन्दसीत्यत्रानुवृत्तेश्छन्दोधिकारविहितानां च तत्र तद्विषयतेष्यते । काश्यपेन प्रोक्तं कल्पमधीयते काश्यपिनः † । ऋषिभ्यामिति किम् । इदानींतनेन गोत्रकाश्यपेन प्रोक्तं काश्यपीयम् ॥

कलापिवैशंपायनान्तेवासिभ्यश्च ॥ १०४ ॥

कलाप्यन्तेवासिनां वैशंपायनान्तेवासिनां च ये वाचकाः शब्दास्तेभ्यो णिनिः प्रत्ययो भवति तेन प्रोक्तमित्येतस्मिन्विषये । अणोपवादः । छं तु परत्वाद्बाधते । तत्र कलाप्यन्तेवासिनश्चत्वारः, हरिद्रुः । छगली । तुम्बुरुः । उलपः । इति । वैशंपायनान्तेवासिनो नव । आलम्बि । पलङ्ग । कमल । ऋचाभ । आरुणि । ताण्ड्य । श्यामायन । कठ । कलापी । इति । प्रत्ययकर्तृरिणो गृह्यन्ते न तु व्यवहिताः शिष्यशिष्याः । कुतः । कलापिखाडायनग्रहणात् । तथाहि, वैशंपायनान्तेवासी कलापी तदन्तेवासिनो वैशंपायनान्तेवासिन एव भवन्ति किं कलापिग्रहणेन । तथा वैशंपायनान्तेवासी कठस्तदन्तेवासी खाडायनस्तस्य किं शौनकादिषु पाठेन । तदेतत्प्रत्ययकारिग्रहणस्य लिङ्गम् । कलाप्यन्तेवासिभ्यस्तावत् । हरिद्रुणा प्रोक्तमधीयते हारिद्रविणः । तौम्बुरविणः । औलपिनः । छगलिनो ठिनुकं वक्ष्यति । वैशंपायनान्तेवासिभ्यः । आलम्बिनः । पालङ्गिनः । कामलिनः । आर्च्चाभिनः । आरुणिनः । ताण्डिनः । श्यामायनिनः । कठाल्लुकं वक्ष्यति । कलापिनश्चाणम् ॥

हरिद्रुरेषां प्रथमस्ततश्छगलितुम्बुरू ।
उलपेन चतुर्थेन कालापकमिहोच्यते ॥
आलम्बिश्चरकः प्राचां पलङ्गकमलावुभौ ।
ऋचाभारुणिताण्ड्याश्च मध्यमीयास्त्रयोऽपरे ॥
श्यामायन उदीच्येषु उक्तः कठकलापिनोः ।

चरक इति वैशंपायनस्याख्या तत्संबन्धेन सर्वे तदन्तेवासिनश्चरका इत्युच्यन्ते ॥

पुराणप्रोक्तेषु ब्राह्मणकल्पेषु ॥ १०५ ॥

प्रत्ययार्थविशेषणमेतत् । तृतीयासमर्थात्प्रोक्ते णिनिः प्रत्ययो भवति यत्प्रोक्तं पुराणप्रोक्ताश्चेद्ब्राह्मणकल्पास्ते भवन्ति । पुराणेन चिरन्तनेन मुनिना प्रोक्ताः । ब्राह्मणेषु तावत् । भाल्लविनः । शाट्यायनिनः । ऐतरेयिणः । कल्पेषु । पैङ्गी कल्पः । आरुणपराजी । पुराणप्रोक्तेष्विति किम् । याज्ञवल्कानि ब्राह्मणानि । आश्मरथः कल्पः । याज्ञवल्कादयोऽचिरकाला इत्याख्यानेषु वार्त्ता । तया व्यवहरति सूत्रकारः । तद्विषयता कस्मान्न भवति । प्रतिपदं ब्राह्मणेषु यः प्रत्ययस्तस्य तद्विषयता विधीयते णिनेः । अयं तु याज्ञवल्क्यशब्दस्य कण्वादिषु पाठादण् । न वायं योगश्छन्दोधिकारमनुवर्त्तयति, तेन कल्पेष्वपि न भवति । पुराणइति निपातनात्तुडभावः । न वात्यन्तबाधैव, तेन पुरातनमित्यपि भवति ॥

शौनकादिभ्यश्छन्दसि ॥ १०६ ॥

शौनक इत्येवमादिभ्यो णिनिः प्रत्ययो भवति तेन प्रोक्तमित्येतस्मिन्विषये छन्दस्यभिधेये । छाणोरपवादः । शौनकेन प्रोक्तमधीयते शौनकिनः । वाजसनेयिनः । छन्दसीति किम् । शौनकीया शिक्षा । कठशाठ इत्यत्र पठ्यते । तत्संघातार्थं, केवलाद्धि लुकं वक्ष्यति । कठशाठाभ्यां प्रोक्तमधीयते काठशाठिनः । शौनक । वाजसनेय । साङ्गरव । शार्ङ्गरव । सांपेय । शाखेय । खाडायन । स्कन्ध । स्कन्द । देवदत्तशठ । रज्जुकण्ठ । रज्जुभार । कठशाठ । कषाय । तलवकार । पुरुषासक । अश्वपेय । शौनकादिः * ॥

कठचरकाल्लुक् ॥ १०७ ॥

कठचरकशब्दाभ्यां परस्य प्रोक्तप्रत्ययस्य लुग्भवति । कठशब्दाद्वैशंपायनान्तेवासिभ्य इति णिनेश्चरकशब्दादण्णः । कठेन प्रोक्तमधीयते कठाः । चरकाः । छन्दसीत्येव । काठाः । चारकाः † ॥

---

* शौनकेत्यादीष्यतइत्यन्तग्रन्थस्य स्थाने शौनकादिभ्यश्छन्दसीत्यनेदमनुवर्तयितव्यमित्याहुरिति पाठो बहुषु पुस्तकेषु ।

† कौशिकिन इत्यधिकं बहुषु पुस्तकेषु ।

* स्कम्भ । अयं पुस्तकान्तरेऽत्र गणेधिकः ।

† श्लोका इत्यधिकं कुत्र चित् ।

Digitized by Google

कलापिनोऽण् ॥ १०८ ॥

कलापिशब्दादण् प्रत्ययो भवति तेन प्रोक्तमित्येतस्मिन्विषये । वैशंपायनान्तेवासित्वाणिणिनेरपवादः । कलापिना प्रोक्तमधीयते कालापाः । इनण्यनपत्यइति प्रकृतिभावे प्राप्ते, नान्तस्य टिलोपे सब्रह्मचारिपीठसर्पिकलापिकुथुमि * तैतलिजाजलिलाङ्गलि†लाङ्गलिशिलालिशिखण्डिसूकरसद्मसुपर्वणामुपसंख्यानम् ॥ * ॥ इति टिलोपः । अणग्रहणं किम्, यथाप्राप्तमित्येव सिद्धम् । अधिकविधानार्थं, तेन माथुरी वृत्तिः, सौलभानि ब्राह्मणानीत्यादि सिद्धम् ॥

छगलिनो ढिनुक् ॥ १०९ ॥

छगलिन्शब्दाद् ढिनुक् प्रत्ययो भवति तेन प्रोक्तमित्येतस्मिन्विषये । कलाप्यन्तेवासित्वाणिणिनेरपवादः । छगलिना प्रोक्तमधीयते छागलेयिनः ॥

पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः ॥ ११० ॥

णिनिरिहानुवर्त्तते, न ढिनुक् । पाराशर्यशिलालिभ्यां णिनिः प्रत्ययो भवति तेन प्रोक्तमित्येतस्मिन्विषये । भिक्षुनटसूत्रयोरिति यथासंख्यं प्रत्ययार्थविशेषणं, सूत्रशब्दः प्रत्येकमभिसंबध्यते तद्विषयता चाश्रीयते, तदर्थं छन्दोग्रहणमनुवर्त्यं, गुणकल्पनया च भिक्षुनटसूत्रयोश्छन्दस्त्वम् । पाराशर्येण प्रोक्तमधीयते पाराशरिणो भिक्षवः । शैलालिनो नटाः । भिक्षुनटसूत्रयोरिति किम् । पाराशरम् । शैलालम् ॥

कर्मन्दकृशाश्वादिनिः ॥ १११ ॥

भिक्षुनटसूत्रयोरित्येव । कर्मन्दकृशाश्वशब्दाभ्यामिनिः प्रत्ययो भवति । अणोऽपवादः । तेन प्रोक्तमित्येतस्मिन्विषये यथासंख्यं भिक्षुनटसूत्रयोरभिधेययोः, इहापि तद्विषयतार्थं छन्दोग्रहणमनुवर्त्यम् । कर्मन्देन प्रोक्तमधीयते कर्मन्दिनो भिक्षवः । कृशाश्विनो नटाः । भिक्षुनटसूत्रयोरित्येव । कार्मन्दम् । कार्शाश्वम् ॥

तेनैकदिक् ॥ ११२ ॥

तेनेति तृतीयासमर्थादेकदिगित्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति । एकदिक् तुल्यदिक्, समानदिगित्यर्थः । सुदाम्ना एकदिक् सौदामनी विद्युत् । हैमवती । त्रैककुदी । पैलुमूली । तेनेति प्रकृते पुनः समर्थविभक्तिग्रहणं छन्दोधिकारनिवृत्त्यर्थम् । पूर्वंच हि छन्दोधिकारात् तद्विषयता साध्यते ॥

तसिश्च ॥ ११३ ॥

तसिश्च प्रत्ययो भवति तेनैकदिगित्येतस्मिन्विषये । पूर्वेषु घादिषु अणादिषु च प्राप्तेष्वयमपरः प्रत्ययो विधीयते । स्वरादिपाठादव्ययत्वम् । सुदामतः । हिमवत्तः । पीलुमूलतः ॥

उरसो यच्च ॥ ११४ ॥

उरःशब्दाद्यत् प्रत्ययो भवति चकारात्तसिश्च, तेनैकदिगित्येतस्मिन्विषये । अणोऽपवादः । उरसा एकदिग् उरस्यः । उरस्तः ॥

उपज्ञाते ॥ ११५ ॥

तेनेत्येव । तृतीयासमर्थादुपज्ञातइत्येतस्मिन्विषये यथाविहितं प्रत्ययो भवति । विनोपदेशेन ज्ञातमुपज्ञातं स्वयमभिसंबद्धमित्यर्थः । पाणिनिनोपज्ञातं पाणिनीयमकालकं व्याकरणम् । काशकृत्स्नम् । गुरुलाघवम् । आपिशलम् । पुष्करणम् ॥

कृते ग्रन्थे ॥ ११६ ॥

तेनेत्येव । तृतीयासमर्थात्कृतइत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति, यत्तत्कृतं ग्रन्थश्चेत्स भवति । वररुचिना कृता वाररुचाः श्लोकाः । हैकुपादो ग्रन्थः । भैकुराटो ग्रन्थः । जालूकः । ग्रन्थइति किम् । तक्षकृतः प्रासादः । उत्पादितं कृतं, विद्यमानमेव ज्ञातमुपज्ञातमित्ययमनयोर्विशेषः ॥

संज्ञायाम् ॥ ११७ ॥

तृतीयासमर्थात्कृतइत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति समुदायेन चेत्संज्ञा ज्ञायते । मक्षिकाभिः कृतं माक्षिकम् । कार्मुकम् * । सारघम् । पौत्तिकम् । मधुनः संज्ञा एताः ॥

कुलालादिभ्यो वुञ् ॥ ११८ ॥

तेन कृते संज्ञायामिति चैतत्सर्वमनुवर्तते । कुलालादिभ्यो वुञ् प्रत्ययो भवति तेन कृतमित्येतस्मिन्नर्थे संज्ञायां गम्यमानायाम् । कौलालकम् । वारुडकम् । कुलाल । वरुड । चण्डाल । निषाद । कर्मार । सेना । सिरिध्र । सैन्द्रिय । देवराज । परिषत् । वधू । रुरु । ध्रुव । रुद्र । अनडुह् । ब्रह्मन् । कुम्भकार । श्वपाक । कुलालादिः ॥

क्षुद्राभ्रमरवटरपादपादञ् ॥ ११९ ॥

तेन कृते संज्ञायामिति सर्वमनुवर्तते । क्षुद्रादिभ्योऽञ् प्रत्ययो भवति तेन कृतइत्येतस्मिन्विषये संज्ञायां गम्यमानायाम् । अणोऽपवादः । स्वरे विशेषः । क्षुद्राभिः कृतं क्षौद्रम् । भ्रामरम् । वाटरम् । पादपम् ॥

---

* कौथुमीति पा० ।

† लाङ्गलीति बहुषु पुस्तकेषु न दृश्यते ।

* कार्मुतमिति पा० २ ।

॥ आनन्दवृन्दावनचम्पूकाव्यस्य ॥

॥ अष्टमस्तबकावशेषः ॥

—⟡—

आगतायां च तस्यामेतस्या मेदुरहृदः कमलमुख्या मुख्याया हृदयमतिस्निग्धमुग्धमुदितमासीत् ॥ ५७ ॥

एतस्या मुख्यायाः श्रीराधायाः ॥ ५७ ॥

परस्परं मिलितवतीषु सकलासु सकलासु सुस्मितगाम्भीर्यावहित्थं मुख्याह कमलमुख्याहरस्व मे वचसि मनो मनोज्ञे प्रियसखि श्यामे, दृश्या मे दृशोः कर्पूरवर्तिरिव भवती भवतीह तदाकर्णय कर्णयशस्करं किमपि मे सखीजनवचनमिति सख्योरुदितं कथयति ॥ ५८ ॥

सकलासु कलाभिर्वैदग्धीभिः सहितासु मुख्या राधा आह मे वचसि मनः आहरस्व प्रवेशय, भवती मम दृश्या सती दृशोर्नेत्रयोः कर्पूरवर्तिरिव भवति ॥ ५८ ॥

श्यामाह मा हरिणाक्षि सखीजनमभ्यसूयतु भवती सकलास्वेव गोकुलकुललललनापरिषत्सु, गोकुलललनाललामभूतायास्तव स्तवनकथाप्रसङ्गे सङ्गेयमिदं वृत्तं तत् स्वभावो हि भावो हिमकरकुमुदिन्योरिव तस्य तव च जायमान एव सकलगोकुलनगरीगरीयःसौरभ्यमभ्यागमयति ॥ ५९ ॥

परिषत् सभा, ललामभूतायाः भूषणरूपायाः "ललामं पुच्छपुण्ड्राश्वभूषाप्राधान्यकेतुष्वि"त्यमरः। संगेयं प्रशंसनीयं· स्वभावो हि भाव इत्यतिनिरुपाधित्वविवक्षया लक्षणा, स्वाभाविको भाव इत्यर्थः ॥ ५९ ॥

मुख्या हसितमुख्याह सितमयूखमुखि सत्यमेव भवति लोभवती भवती च तस्मिन् जने यदात्मकथामन्यषासञ्जयसि जयसि त्वं सर्वकलया ॥ ६० ॥

मुख्या राधा आह हसितमुखी सतीति नर्मार्थं, सितमयूखमुखि चन्द्रमुखि, सर्वकलया सर्वांशेन ॥ ६० ॥

कथमिदमपि संभाव्यते पश्य का पुनरहिमकरं हिमकरं वा करेणाहर्तुमभिलषतु ॥ ६१ ॥

पूर्वरागपाकावस्थायां दैन्यस्यैव संचारिणः प्राबल्यात्तदनुरूपमाह, तत्र प्रथमं कृष्णातिदुर्लभतास्फूर्त्याह, कापुनरिति। अहिमकरं सूर्यं, हि मकरं चन्द्रम् ॥ ६१ ॥

का च काचमणिना महामणिं परिवर्तयितुमुद्यता भवतु ॥ ६२ ॥

शुद्धप्रेम्णा दुर्लभोऽपि वशीकर्तुं शक्य इतिचेत्तत्र स्वप्रेम्णोऽपि तथात्वाभावं दैन्येनैवाह, काचेति। का च नारी काचमणिना स्वनिष्ठप्रेम्णा महामणिमिन्द्रनीलमणिं श्रीकृष्णनिष्ठप्रेमाणं परिवर्तयितुं स्वकर्तृकप्रेमाणं कृष्णेऽर्पयित्वा कृष्णकर्तृकप्रेमाणमात्मन्यर्पयितुम् ॥ ६२ ॥

का वा रत्नाकरवर्तीनि करवर्तीनि कर्तुमाकाङ्क्षतु महारत्नानि ॥ ६३ ॥

अथ कृष्णस्याक्षयाणां महागुणानामानन्त्यमवकलय्यात्मनश्च तदुदाहरणोचितपात्रत्वाभावमाशङ्क्य सविचारमाह, का वा रत्नाकरेति। नहि रत्नाकरस्यसमस्तरत्नानि करतलमात्रे मान्तीति भावः ॥ ६३ ॥

का वा जगमगायमानमणिवरलोभेन फणधरफणाधरणार्थमर्थिनी भवतु ॥ ६४ ॥

अत्ययोग्यत्वेऽप्यात्मनः कदाचिदपि प्राप्तुमशक्येऽपि वस्तुनि साहसाविष्कारेण कष्टमेवोदर्कं स्यान्न तु सुखमिति सभयदर्शनमाह, का वा जगमगेति। स्निग्धोज्ज्वल्यवाचि भाषानुकरणम् ॥ ६४ ॥

का च वा कण्ठीरवकिशोरकेशरकेशरचनार्थमुद्यतताम् ॥ ६५ ॥

"प्रायो वीररतास्त्रिय" इति न्यायेन कान्तस्य शौर्यं सुखमेवावहतीत्यन्तराभिलाषे सत्यपि आत्मनो मौग्ध्यमात्रमाविष्कृत्य कृष्णस्य चाघबकाद्यसुरमारणोद्दण्डप्रभाववत्तां व्यञ्जयन्ती सत्रासं सान्तरौत्सुक्यं चाह, का च वेति। कण्ठीरवकिशोरस्य केशरैर्या केशानां रचना तदर्थमुद्यततामुद्यमं करोतु, अत्र समासाद्विधेयांशाविमर्शो यमकानुरोधात् सोढव्य इति ॥ ६५ ॥

तदलं प्रतारितालीकेनामुना वृतान्तेन ॥ ६६ ॥

प्रतारिता आली सखी येन तेन वृतान्तेन ॥ ६६ ॥

श्यामाह श्यामाहतं ते सत्यमेव हृदयं हृदयङ्गमेनामुनेव वचसा च सातिशयमेव व्यक्तीकृतं कृतं ते प्रतारणेन ॥ ६७ ॥

श्यामेन श्रीकृष्णेन आहतमुत्कण्ठोत्पादनया भावनागतेन ताडितमित्यर्थः, वचसा दैन्यबोधकेन, तदुत्कर्षकथनमेव तव स्पृहाव्यञ्जकमिति भावः। तस्मात् प्रतारणेन कृतमलमित्यर्थः ॥ ६७ ॥

इत्युक्तवत्या मे तस्याः प्रतारणचातुरी चातुरीभूता यदि तदा स्वभावभावभावुकसुभगम्भावुकमनोवृत्तितया रोमाञ्चमाञ्चनचटुलकपोलपालिपालितकज्जलजलमिषेण नय-

नकमलाभ्यामन्तर्गतं कृष्णकान्तिद्रवमिव वमन्तीमं तीव्रतरकृष्णानुरागपरभागपरभाजनभावं व्यञ्जयन्ती जयन्तीव वैजयन्ती सर्वसौभाग्यसंपदां सखीजनहृदयद्रवाय समजनि ॥ ६८ ॥

आतुरीति च्विः। स्वभां निजकान्तिमवति रक्षतीति तथाभूतो यो भावः बद्धमूल इत्यर्थः, तस्य भावुकेन कुशलेन सुभगम्भावुका मनोवृत्तिर्यस्यास्तत्तया हेतुना यो रोमाञ्चस्तस्य या शोभा तस्या अञ्चनेन प्राप्त्या चटुलौ शोभनौ कपोलौ तयोः पालिभ्यां क्रोडाभ्यां पालितं रचितं यत् कज्जलसंबन्धि जलं तन्मिषेण तच्छलेन। "चटुलः सुन्दरे चले"इतिधरणिः, "पालिरस्त्र्यंकपङ्क्तिष्वि"त्यमरः। नयनकमलाभ्यां तद्द्वाराभ्यां वमन्ती उद्गिरन्ती। ततः किं तत्राह तीव्रतरः परिपक्वो यः कृष्णानुरागस्तेन परभागः सौन्दर्यं तस्य परभाजनभावं श्रेष्ठपात्रत्वं व्यञ्जयन्ती आत्मन इत्यर्थः। ततः किं तत्राह वैजयन्ती पताका जयन्तीव सर्वोत्कर्षेण वर्तमानेव ॥ ६८ ॥

क्षणमाश्वास्य च श्यामे क्व मे क्वणतु तादृशं भागधेयभूषणम्। अवधेहि।

अतिपरममहार्घ्यमस्य चेतो-
मणिमतिलोकमणीन्द्रवन्दनीयम्।
तृणमणिवदयं ममानुरागः
परिपणितुं पणतां कथं प्रयातु ॥
इति रोदिति ॥ ६६ ॥

अतिलोका लोकमतिक्रान्ता लोकोत्तरा ये मणीन्द्रास्तैरपि वन्दनीयं वन्दनार्हं तत्स्थानीयमित्यर्थः। तृणमणिः तृणाकर्षको मणिविशेषः, परिपणितुं क्रेतुं, पणतां मूल्यताम् ॥ ६९ ॥

श्यामाह मा हन्त खेदनीयं वामनयने नय नेतव्यतामस्मद्वचसि प्रामाण्यम् ॥ ७० ॥

अस्मद्वचसि प्रामाण्यं प्राधानकर्मभूतं नेतव्यतां ग्राह्यतां नय प्रापय तत्र प्रामाण्ये तव उपादेयता तिष्ठतु नतु हेयतेत्यर्थः ॥ ७० ॥

समाश्वसिहि विश्वसिहि विगतालीक्ये मदालिवाक्ये ॥ ७१ ॥

विगतमालीक्यमलीकत्वं मिथ्यात्वं यस्य तस्मिन् ममालीनां सखीनां वाक्ये ॥ ७१ ॥

त्वदनुरागरत्नेनैतन्मनोमाणिक्यं परिचीयते।
तथाहि।

प्रसरति सहजावरोहहाने-
रधिनिधि कश्चन वीरुधोऽवरोहः।
निधिरपि न स तेन दुर्विदः स्यात्
कलयति यस्तमहो स एव वेत्ति ॥ ७२ ॥

त्वदनुरागरत्नं तत्रैव लग्नं सत् तन्मनोरूपं माणिक्यं परिचिनोत्येवेत्यर्थः। तत्र दृष्टान्तः। सहजस्य एव अवरोहस्य शाखाजटाया हानिस्त्यागो यस्यास्तथाभूताया अपि वीरुधः अधिनिधि निधिप्रदेशे अवरोहः प्रसरति "शाखा शिफावरोहः स्यादि"त्यमरः। ततश्च स निधिरपि तेन अवरोहेण दुर्विदो दुर्ज्ञेयो न स्यात् कुतः अहो आश्चर्यं यो योऽवरोहो लम्बितः सन् तं कलयति गृह्णाति अतः स एव तं निधिं वेत्ति अत्र निधिस्थानीयं श्रीकृष्णमनः कर्मभूतमवरोहस्थानीयस्त्वदनुराग एव गृह्णाति जानाति च नान्य इत्यनेन त्वयाकृष्टमेव तस्यापि मनः साम्प्रतं वर्तत एवेति व्यञ्जितं तत्राप्ययमनुरागो नाधुनिक एव किन्त्वदृष्टाश्रुतचरेऽपि तस्मिन् प्रागेवारभ्य आसीदित्यपि व्यञ्जितम् ॥ ७२ ॥

आहतुरुभे विशाखाललिते ललितेक्षणे श्यामे पुरापि तव तस्य चेति मुदितमुदितमधुना मधुनापिहितमिव किञ्चिदुच्यते तदपिमधुरहसिते वहसिते किमपि श्रवणपथातिथित्वमागतमिव। साह साहसिक्यमिदं यदहं कथयामि ॥ ७३ ॥

मुदितमानन्दः, उदितमुदयं प्राप्तं, मधुनापिहितं मधुमिश्रितमिव "विगतालीक्ये मदालिवाक्य" इति तथा "निधिरपि न स तेन दुर्विदः स्यादि"त्यनेन च सुरसमित्यर्थः ॥ ७३ ॥

उभे आहतुः श्यामे शपावहे स्वशिरसा रसान्तरेण चेदिदं भवति तदसंकोचेनालप लपनेन्दोस्ते निर्मञ्छनं यावः ॥ ७४ ॥

आलप कथय, लपनेन्दोर्मुखचन्द्रस्य "आननं लपनं मुख"मित्यमरः ॥ ७४ ॥

अथ सा हसन्त्याह सन्त्यायतधियो मदीयाः सहचर्यस्ता एकदा कदाचन वनगमनारम्भसंभावितवेणुविषाणगुञ्जाशिखण्डादिभूषणादिसंभारैः सह सहचरैरग्रेसरस्तथाविधविविधभूषणो व्रजपुरन्दरनन्दनः ॥ ७४ ॥

हसन्तीति वर्णयिष्यमाणराधिकौत्सुक्यचापल्यस्मरणात्। व्रजपुरन्दरनन्दनः कामप्याकस्मिकीं रुजमासाद्य कमपि प्रियनर्मसहचरं यदुवाच तत् मदीयाः सहचर्यस्ताः अन्विष्यमाणाभ्यः शुकीभ्यः शृण्वन्ति स्मेत्यन्वयः। कथंभूतः सचित्यपे-

Digitized by Google

क्षायां प्रथम एव क्रमेण समस्तोदन्तं विवृण्वती विशिनष्टि वनगमनारम्भ इत्यादिना ॥ ७५ ॥

पुरतोरणात्: पुरतो रणत: कनकमणिमयालङ्कारान् दधानोऽयमधिवलभीतलमधिवलभीतलङ्घितनयनमितस्ततोऽवलोकयन्ती भवत्या: सखीमाकस्मिकेनाकुटिलेनालोकनेनेषत्तरां तमालोक्य तत्समकालजनितमन्दाक्षमन्दाक्षमपवर्तमानां वर्तमानान्दोलितानन्दोल्लासपराभवेन पुनरपि विवलितग्रीवमालोकमानामाकस्मिकेनैवाकुटिलेन तदालोकनेनार्द्धवर्त्मनि निकृत्तस्य कटाक्षस्य चरमार्द्धमुपसंहरन्तीमनपेक्षमाणेन पूर्वार्द्धेन छिन्नविशिखार्द्धेनेव हृदि विद्धो नियतिनियोगेन निकृत्तभुजगीपूर्वार्द्धेन दष्ट इव कामपि दैवोपसन्नामाकस्मिकीं रुजमासाद्य सोत्कण्ठं सचमत्कारं सविस्मयं पश्यन् कमपि प्रियनर्मसहचरं यदुवाच तदन्विष्यमाणाभ्य: पञ्जरतो विच्युताभ्य: शुकीभ्य: श्रृण्वन्ति स्म ॥ ७६ ॥

पुरस्य तोरणात: बहिर्द्वारात् पुरतोऽग्रे वर्तमान: । पुन: कथंभूत: रणत: क्वणत: कनकमणिमयालङ्कारान् दधान: । रण ध्वन शब्दे शत्रन्त: । अयमिति बुद्ध्या प्रकटीकृतं तमङ्गुल्या दर्शयामीवेति भाव: । पुन: कीदृश: भवत्या: सखीं वर्ण्यमानलक्षणामनपेक्षमाणेन कटाक्षस्य पूर्वार्द्धेन छिन्नशरार्द्धेनेव हृदि विद्ध: । कीदृशीमधिवलभीतलं वलभीतले अधिवलेन अधिकवलेन भीतेन भयेन लङ्घिते आक्षिप्ते नयने यत्र तथाभूतं यथा स्यात् सचकितमित्यर्थ: इतस्ततोऽवलोकयन्तीं "चंद्रशाला च वलभी स्यातां प्रासादमूर्द्धनी"ति श्रीधर: । आकस्मिकेन अकस्मात्जातेन आलोकनेन ईषत्तरामल्पतरं यथा स्यात् तथा तं श्रीकृष्णमालोक्य तत्समकालजनितं यन्मन्दाक्षं लज्जा तेन मन्दे वेगहीने अक्षिणी नेत्रे यत्र तद्यथा स्यात् अपवर्तमानां तिरोभवन्तीं "मन्दाक्षं ह्रीस्त्रपा व्रीडे"त्यमर: । ततश्च वर्तमान: जायमान: आन्दोलित: आन्दोलं प्रापित: आनन्दो येन तथाभूतात् उल्लासात् औत्सुक्यात् य: पराभव: स्वधीरताया ध्वंस: तेन पुनरपि किमयं मां पश्यन्नस्ति हन्त हन्त गतो वा म्रियतां नाम मे लज्जा यद्भावि तद्भवतु किन्त्वेकवारमीक्षितव्य एवासाविति चापल्येन विवलितग्रीवं ग्रीवामुत्थाप्य आलोकमानां । ततश्च आकस्मिकेनैव तदालोकेन कृष्णालोकेन अर्द्धवर्त्मनि निकृत्तस्य छिन्नस्येति द्वयो: परस्परं प्रतितुल्यकालमेव कटाक्षशरसन्धानात् कटाक्षस्य स्वकृतस्य चरमार्द्धमुपसंहरन्तीमिति संपूर्णस्योपसंजिहीर्षायां सत्यामपि पृष्टदेशार्द्धमेव, पूर्वार्द्धस्य तीक्ष्णफलिकायुक्तस्य कृष्णकटाक्षेण छिन्नत्वात् अतस्तादृशीं तामनपेक्षमाणेन छिन्नशरार्द्धेनेति तस्याशक्यनिर्गमत्वात् । नियतिनियोगेन दैवप्रेरणया । निकृत्तभुजगीति तद्विषस्य दु:शकप्रतीकारत्वात् । अत्रायमर्थ: । मामयं मा पश्यतु अहं त्वेनमेकवारं पश्यामीति वाञ्छया अवलोकनारम्भे तदैव श्रीकृष्णावलोकनं दैवाज्जातमालक्ष्य हन्त हन्त मामयं दृष्टवानेव तदौत्सुक्यसूचिका मे दृष्टिरियमेतस्य दृष्टिगता मा भवत्विति तिरोदधन्त्या एतस्या: संपूर्णदृष्टेरेवोपसंहारेच्छा किंतु दृष्टे: प्रथमभागस्य प्रथममेव कृष्णदृष्टौ योगोऽभूदिति न तस्योपसंहार: शक्य इति पश्चाद्भाग एवोपसंहृत: तथा एकस्या: संपूर्णाया दृष्टे: पूर्वार्द्धयो: प्रकाशाप्रकाशौ तात्कालिक्या कृष्णदृष्ट्यैव संपादिताविति तथा मध्ये छेद उत्प्रेक्षित:, तेन च अभिलषणीयत्वेऽपि तत्पश्चाद्भागस्य कृष्णेनाप्राप्तिरेव सैरस्यात्तदुत्कण्ठावर्द्धिनी जातेति ॥ ७६ ॥

यथा प्रियसख केयं वलभीतलविद्योतिनी निर्मुदिरा विद्युदिव, नन्दनवनतो निपत्य वडभीतलमालम्बमाना बालकल्पलतिकेव, त्रिलोकीलोकसंमोहकारिणी मदनैन्द्रजालिकस्य कुहककनकपाञ्चालिकेव, गोकुलपुराधिष्ठातृदेवतेव ॥ ७७ ॥

निर्मुदिरा मेघविनाभूता, विद्युदिवेति नेत्रचमत्काररूपचाकचिक्यवतीत्वेन, बालकल्पलतेति मनोलोभनीयवस्तुदित्सुतया, कुहकेति अदृष्टाश्रुतचरत्वेनासंभाव्यसौन्दर्यस्याकस्माद्दुद्गमेन तत्रापि स्वस्य कामसुखमनुस्मृत्य, मदनैन्द्रेति तत्राप्यतिशयमालक्ष्य, सम्मोहेति ऐन्द्रजालिकविद्यया स्वस्याशक्यवशीकरत्वं संभाव्याह गोकुलपुरेति ॥ ७७ ॥

केनापि परमकलावता चित्रकरेण चित्रिता निर्भित्तचित्रलेखेव, गगनसरसो लम्बमाना हेमहंसीव, आकाशकनककेतकीव, कुसुमधनुषो निष्कृपा कृपाणीव ॥ ७८ ॥

तादृशमुखनेत्राद्यङ्गसौष्ठवस्य विधातृसृष्टावसंभावितत्वं निश्चित्याह, चित्रलेखेति तत्राप्यतिलोकोत्तरतामनुभूय परमकलावतेति, केनापीति विश्वकर्मतोऽपि वैलक्षण्यं ध्वनितं, निर्भित्तेति तस्यातर्क्यशक्तिता सूचिता, अलङ्कारक्वणितस्य कर्णाह्लादकतामनुभूयाह हेमहंसीति अङ्गसौगन्ध्यस्य मनोभ्रमरव्याकुलीकारित्वदिग्दर्शनेनाह कनककेतकीति तदनुस्मृत्या कामपीडामनुभूयाह कुसुमधनुष इति ॥ ७८ ॥

अद्वितीया द्वितीयाचन्द्रलेखेव, सम्मोहस्य महिमवल्लीव ॥ ७९ ॥

तत्रापि चिताह्लादकतया दोषास्पृष्टतया द्वितियातिथिचन्द्रलेखेवेति अद्वितीया नविद्यते साम्येन द्वितीया यस्या: सा तत्र हेतुमानन्दमूर्छाजनकत्वं तस्या: प्राह संमोहेति ॥ ७९ ॥

Digitized by Google

लावण्यस्य दर्पणिकेव, माधुर्यस्य पताकिकेव, गुणमणीन्द्रवृन्दतेजोमञ्जुमञ्जरीव, सौरूप्यविहङ्गपुटपञ्जरिकेव, क्षणमेवाविर्भूय तिरोभवति ॥ ८० ॥

अथ लावण्यमाधुर्यसाद्गुण्यसौन्दर्याणामवधिभूतत्वेन उत्प्रेक्षते क्रमेण चतसृभिः, मणिदर्पणायमानत्वमङ्गानां लावण्येनैव भवति इयन्तु साक्षाल्लावण्यस्यैव दर्पणिकेति। तथाहि तल्लक्षणं"मुक्ताफलेषु छायायास्तरलत्वमिवान्तरा प्रतिभाति यदङ्गेषु तल्लावण्यं विदुर्बुधा"इति। पताकिका उत्कर्षपरावधिसूचिका सौरूप्यं सौन्दर्यं तद्रूपो विहङ्गः पक्षी अस्यां पञ्जरिकाभूतायामेव बद्धस्तिष्ठतीति तेनान्यत्र न दृश्यत इति भावः। यद्वा। सौरूप्यं शोभनस्वरूपत्वं वर्णितधर्माणां समस्तानामेव तत् तेनेव तत्रविष्टास्त एव वर्णितगुणाः क्वापि न निःसृता इति भावः ॥ ८० ॥

किमयं मे स्वप्नः किमुत भ्रम एव वा किमुत मदीयमनसो विभ्रामिका कापि दैवी माया । ८१ ॥

स्वप्न इति। तस्यैवासंभाव्यसंभावकत्वं कदाचिद्युज्यते इति भावः । तिष्ठतश्चलतश्च मे गोचारणाय स कथं संभवेदिति भ्रमस्तात्कालिकः स चापि निर्हेतुकः कथं स्यादिति दैवी माया ॥ ८१ ॥

स आह सखे सखेदेन मा भवितव्यमियं हि वार्षभानवी नवीनेव सृष्टिर्वेधसः, यां खलु सर्वसौभाग्यसाराधिकां राधिकां प्राहुरित्युक्ते सति, आं जानामि नामितसकलसुन्दरीसौन्दर्यगर्वामेनां गुणवतीगणगणनाप्रसङ्गे संगेयचरित्रामम्बयोः संवाद एव किंत्वद्यैव मे नयनपथि पथिकेयमित्यवहित्थया प्रसङ्गान्तरमापाद्य हृदि संजातविकारो बहिः प्रकृत इव अनुगवीनो नवीनो नटन्मेघ इव मेदुरदुरवगाहनीलधामा धामातिश्यामायितं विपिनमलङ्चकार ॥ ८२ ॥

अम्बयोः श्रीयशोदारोहिण्योः कदाचित्तया संवादः पूर्वमासीदिति ज्ञापितं, संगेयचरित्रां प्रशंसार्हचरितां । अवहित्थया आकारसंगोपनेन,प्रसङ्गान्तरमिति विरमतु तावदनुचितेयं वार्ता प्रस्तुतानुसरणमेव चारु हंहो सखायोऽद्य कुत्र वने विक्रीडिषा भवतां का वा तत्र खेलेत्येवं लक्षणं। अनुगवीनो गवां पश्चादलंगामी "अनु खलंगामी"ति खः। मेदुरं सान्द्रस्निग्धं दुरवगाहं नीलं धाम कान्तिर्यस्य सः ॥ ८२ ॥

तदपि दयिते ललिते निर्व्यूढमुभयोरेव मनसि मनोरथमहाङ्कुरेण काले द्विपत्रायितं क्रमेण फलदशाप्यस्य संभावनीया ॥ ८३ ॥

एकस्यैव मनोरथस्याखिन एकेनैव महाङ्कुरेण उभयोर्मनसि निर्व्यूढमित्यनेन द्वयोर्मनसोरप्येकत्वमेवेति द्योतितं, अत एव मनसीत्येकवचनं । तथाह्युक्तं श्रीमदुज्ज्वलनीलमणौ"राधाया भवतश्च चित्तजतुनी" इत्यादि ॥ ८३ ॥

मुग्ध्याह श्यामे अलीकवादिनि विरम विरम नाहं कदाप्येकाकिनी वडभीतलमारूढा तन्नापरमिमं जनं लघुतरीकर्तुमर्हसि पादयोस्ते निपतामि मा परमपवापारावारे पातय मामिति तदुदितोपरमे सा आह यदियमलीकैव वार्ता तत् कथमपापवपापारावारः ॥ ८४ ॥

पारावारः समुद्रः ॥ ८४ ॥

अतो निह्नूयमानोऽपि न निह्नोतुं शक्यते स्वाभाविकोऽपि भावः । तदिदं क्षम्यतां मे चापलमतः परं विश्वस्ता भव निजभागधेयसंपदोत्येवं तदा समस्ता एव व्रजनगरे स्वस्य यूथपाभिः समं स्वस्वसख्यः समन्तत एवमेव यथास्वं सरसकथाप्रसङ्गेन श्रीकृष्णे जातमनुरागं व्यञ्जयन्ति स्म। निरन्तरं च वर्द्धत एव पूर्वरागनाटकपूर्वरङ्गः। तथाहि ध्वजकमलादिविलक्षणलक्षलक्षितचरणचिह्नमयी पृथिवी, तत्कान्तिसक्रान्ततरणितनयासलिललीलानि सकलान्येव सलिलानि, तदीयश्यामलमहोमयानि सकलान्येवमहांसि, तद्गन्धवाहिनः सर्वे एव गन्धवाहाः, तन्मुखचन्द्रचन्द्रिकाधौतमाकाशमिति तासां सर्वान्येव भूतानि तन्निष्ठानि जातानि ॥ ८५ ॥

अथासां गाढासक्तिव्यञ्जकं तन्मयत्वानुसन्धानं दर्शयति ध्वजेत्यादिना । चरणचिह्नमयीति सर्वेषामेव पृथिवीस्थानामङ्कुरेखादीनां स्वबुद्ध्यैव ध्वजादिसाधारण्यकल्पनया तच्चिह्नत्वेनैव प्रतीतिरित्यर्थः । तत् कान्त्या सक्रान्तं तुल्यं यत् तरणितनयाया यमुनायाः सलिलं तेन समाना लीला रूपविलासो येषां तानि ॥ ८५ ॥

एवं ध्यानेनैकतानतायां च तासां तद्रूपमेव नयनेषु, तदधररस एव रसनासु, तद्गन्ध एव गन्धवहासु, तत्स्पर्श एव त्वक्षु ॥ ८६ ॥

एवं वैशेषिकदर्शनोक्तानां पृथिव्यादिद्रव्याणां तन्मयत्वेनैव ग्रहणमुक्त्वा तद्दर्शनोक्तानामन्येषां रूपरसादिचतुर्विंशतिगुणानामपि केषांचित्तदीयानामेव केषांचित्तदनुकूलतयैवोपादेयतां तासामाह ध्यानैकतानतायां ध्यानैकाग्रमनस्तायां सत्यामित्यर्थः। "एकतानोऽनन्यवृत्ति"रित्यमरः। रसनासु जिह्वासु तदधररस इति भावनयैव साक्षादुपनत इत्यर्थः। तत्स्पर्श इति संयोगलीलादिकमपि तथैव निर्व्यूढमेवेति ध्वन्यते ॥ ८६ ॥

Digitized by Google

तद्दर्शनक्षणगणनासु संख्या, तदधिकरणप्रेमपरीक्षणेषु परिमाणम् ॥ ८७ ॥

तद्दर्शने तद्दर्शनानन्तरं वा ये क्षणास्तेषां गणने संख्या, एकक्षणमात्रं श्रीकृष्णो मया दृष्टः कृष्णदर्शनानन्तरं मे पञ्च क्षणाः पञ्चकल्पायमाना व्यतीता इत्येवं। तदधिकरणे कृष्णरूप आश्रयालम्बने प्रेमा स्वविषयकस्तस्य परीक्षणे कियानयं जात इति जिज्ञासायां परिमाणं तोलनं लक्षितम् ॥ ८७ ॥

गुरुजनादिवर्गात् पृथक्त्वं, तदाकार एव मनसः संयोगः, पत्यादिगृहाद्विभागः, गुरुपरिजनेषु परत्वं, कृष्णसंबन्धिष्वपरत्वम् ॥ ८८ ॥

पृथक्त्वं तस्माद्भिन्नतया आत्मनां स्थितिर्भावना, आदिशब्दात् तत्संबन्धिजनवर्गादपि। विभागो विश्लेषः, आदिशब्दात् श्वश्वादिगृहादपि कन्यानां तु पित्रोर्गृहात्। परत्वं बहिरङ्गबुद्धिः शत्रुत्वं वा, अपरत्व स्वीयत्वम् ॥ ८८ ॥

॥ शेषमग्रे ॥

॥ अथ ज्ञानसिद्धान्तचन्द्रिका ॥

बङ्कसंज्ञकमहापण्डितविरचितज्ञानसिद्धान्तमालायाः

अवतारिता।

तत्र पञ्चविंशत्यधिकशततमादिपरिच्छेदाः

१२५–साधारणज्ञानसिद्धान्ताभिभूतचेतसो जनाः साधारणपरिमाणस्य [अचिन्त्यरूपस्यापि] निरवधिविभागयोग्यत्वम् अनुबोध्येरन्। एवमैन्द्रियकविषयाणाम् आत्मनो बहिष्ट्वमनुमन्यमानाः पुरुषविशेषा स्वपक्षानुरोधेन केवलाङ्गुलपरिमितामपि रेखामनन्तातीन्द्रियखण्डघटितां मन्तुं कदाचित् प्रवर्त्येरन्। न केवलमुक्तविधा एव जना अपितु भूमितिज्ञा अप्येतैर्भ्रमैः कलुषितया धिया ऽनल्पाः कल्पना रचयन्ति। परिमाणविभागानन्त्योपपादकहेतूनां तादृशभ्रममूलकत्वंत्व ऽनायासेनैव प्रदर्शयितुं शक्येत। अथ विभागानन्त्यसिद्धान्ते गाणितिकप्रवृत्तेर्बीजं तावदनुसंधीयते।

१२६–उपोद्घातप्रकरणस्यपञ्चदशपरिच्छेदे हि भूमितिशास्त्रीयाः प्रतिज्ञास्तदुपपत्तयश्च सामान्यज्ञानान्येवोद्दिश्य प्रवर्तन्त इत्युक्तम्। तस्य यथार्थाभिप्रायोपि मया तत्रैव वर्णितो यत्परिलेखविशेषगता भुजकोणादयो बहूनां भिन्नभिन्नपरिमाणकानां रेखाकोणादीनां प्रतिरूपका वा मन्यन्ते [तदुपपत्तिप्रदर्शनकाले] भूमितिविद्भिस्तत्तद्विशेषपरिमाणरहिता वा चिन्त्यन्त इति। नैतावतात्र भूमितिविदां परिमाणसाधारणज्ञानोद्देश्यकत्वं सिद्ध्यति किंतु रेखाकोणविशेषपरिमाणान्युपेक्ष्य तेषूपपत्तिप्रदर्शकत्वमेव। एवं च परिलेखगतैकाङ्गुलपरिमितापि रेखा सकलरेखोपलक्षकत्वेन विवक्षितत्तया परःशतैरंशैर्घटितेति वक्तुं शक्यत एव। परंतु तस्याः सकलरेखाप्रतिरूपकत्वं न तावत्स्वरूपाश्रितं किंतु तदुपलक्ष्यरेखागणाश्रितमेव। तथाचोपलक्षितदीर्घतररेखानामयुतादिविभागार्हत्वस्य संभवादुपलक्षकरेखाया ह्रस्वतरत्वे ऽपि शताधिकांशघटितत्व संगच्छते। एवमेवोपलक्ष्यरेखागुणा अप्युपलक्षकरेखायां आरोप्यन्ते। भ्रान्तधियस्तु सकलरेखागुणांस्तादृशैकरेखाव्यक्तिसमवेतानेव मन्यन्त इति विशेषः।

१२७–इत्थंच रेखाविशेषाणामधिकाधिकांशघटिततायाः संभवेन कस्या अपि रेखांशसंख्याया उत्कृष्टतमत्वस्यासंभवेपि यद् अङ्गुलपरिमितरेखाया अप्यनन्तसंख्यकावयवकत्वमुच्यते न तत्तादृशैकरेखाव्यक्त्याश्रितमपितु तदुपलक्षितबृहत्तररेखागणाश्रितमेवेति सिद्धम्। लोकास्तु पुनरीदृशं विवेकमस्मरन्तः परिलेखलिखितं ह्रसिष्ठमेव रेखाविशेषमनन्तांशघटित चिन्तयन्ति। [नैतद्युक्तम्] तादृशरेखायाः साक्षादयुततमभागस्याप्यसंभवात्। उक्तरेखायाः पुनः क्रोशार्धस्य पृथ्वीव्यासार्धस्य वोपलक्षकत्वे तु तस्यास्तावानंशः संभवेदेव। यथा कस्मिंश्चित्पत्त्रे लिखितस्य त्रिकोणविशेषस्यान्यतमो भुजो यदा भूव्यासार्धबोधकत्वेन विवक्ष्यते तदा सोऽयुतभागेषु लक्षभागेषु वा विभाज्यश्चिन्त्यते। तादृशभुजायुततमादिभागानां स्वयमकिंचिद्रूपत्वेन निःशङ्कमक्लेशं चोपेक्षणीयत्वेपि तदुपलक्ष्यविषयस्य बृहत्तरत्वेनायुताद्यंशानां संभवाल्लोकव्यवहारे स्वीकृतत्वाच्च। उपलक्ष्योपलक्षकयोस्त्वर्थतस्तादात्म्यात्।

१२८–एवंच रेखाशास्त्रस्यानां प्रतिज्ञानां यावदुद्देश्यानुगतत्वं तु परिलेखगतासु रेखासु स्वानारम्भकैरप्यवयवैर्घटितत्वमारोप्यैव प्रवर्तते। यतोह्यस्मिन् विषये सर्वो मनीषी स्वपरीक्षयेदमेवोपलभेत यत्र क्वापि क्षेत्रस्याङ्गुलपरिमिता रेखा साक्षात्सहस्रधा कर्तुं शक्यते किंतु तदुपलक्षितं महत्तररेखान्तरमेव। रेखाया निरवधिविभागार्हत्वंतु तस्या अपरिच्छिन्नदैर्घ्यवत्त्वे एव संभवति। इदमेव च भूमितौ परिच्छिन्नपरिमाणस्यापरिच्छिन्नविभागयोग्यत्वकल्पनाया बीजमितिदिक्।

१२९–लोकप्रसिद्धस्यानन्तविभागसिद्धान्तस्य खण्डने तु तन्मूलका विविधा बाधितार्थाः परमार्थविरोधा एव वा पर्याप्तहेतुभूताः सन्ति। परंत्वीश्वरोपि सर्वथाविरुद्धान् पदार्थान् परस्परमनुकूलयति, तात्त्विकवस्तुभ्यो ऽतात्त्विकार्था अपि फलन्तीति वा तर्कयन्त इव शास्त्रविद आनन्त्यविषयकसिद्धान्तखण्डनाय परतः सिद्धप्रमाणानि नोपादेयानीत्येकमश्रुतपूर्वन्यायसमयं समाश्रयन्ते। विमर्शशालिनां त्वस्य पक्षस्य दौर्बल्यमलसजनमनोविनोदैकफलकत्वं च स्पष्टमेव। अलसा हि

प्रायो मनोमान्द्यप्रभवं लौकायतिकपक्षमेवानुरुन्धन्ति न पुनः स्वीकृतार्थानां संभवासंभवौ गाढं परीक्षितुं प्रयतन्ते ।

१३०–किं चैतमनन्तविभागसिद्धान्तमधिकृत्य पुरातनैरन्तेवासिभिस्तथा विलक्षणाः सूक्ष्मसूक्ष्मकल्पना उद्भाव्यन्त यथा ऽर्वाचीनेषु रेखादिषु नाल्पाय विवादानिर्णयाय कल्पन्ते । एके ख्यातधियः सूरयो निर्दिष्टरेखाया अनन्तविभागा भवन्तीति मतेनासंतुष्टचेतसः मन्तस्तादृशानन्तविभागानपि प्रत्येकमनन्तसूक्ष्मतरविभागवतान् कथयन्ति पुनस्तानप्यतिसूक्ष्मतरविभागयोग्या नित्युत्तरोत्तरं निरवधि विभागकल्पनाः कुर्वन्ति । एवंच तेषां नये अङ्गुलमात्रमिता रेखा न केवलं परमाणुष्वेवापितु तद्भागेषु तद्भागभागेषु चेत्युत्तरोत्तरं निस्सीमं विभाज्यते । अपरे त्वपरिच्छिन्नपरमाणुमेव विभागावधिं प्रकल्प्य तदुत्तरं विभागक्रमं निषेधन्ति । तादृशपरमाणोर्बहुगुणीकरणे निर्दिष्टरेखातौल्यं चाबाधितमुत्प्रेक्षन्ते । परंतु परमाणववधिकमेव पदार्थविभागं स्वीकुर्वाणानां विदुषां मते वास्तविकपदार्थात्मकानां मूलानां वर्गघनादयो घाता अकिंचिद्रूपाः संपद्यन्ते इतिमहदसामञ्जस्यम् ।

१३१–एवं चोभयोरप्युक्तमतयोरनुपपन्नत्वमेव । निस्सीमाल्पानां परमाणुभागानामनन्तांशघटितपरिच्छिन्नपरिमाणानां चाप्रसिद्धेः । नचैतत्खण्डने भूमितिशास्त्रस्यैव विलयापत्तिः । तच्छास्त्रप्रवर्तकाचार्याविष्कृतानां सूक्ष्मसूक्ष्मकल्पनानां त्वदृष्ट्या मनोविलसितमात्रत्वादिति वाच्यम् । सर्वस्याप्यर्थस्य लोकव्यवहारोपकारकस्य च क्षेत्रविद्यांशस्यास्मत्पक्षे लेशतोऽप्यनपायात् । प्रत्युतास्मत्पक्षे तदुपयोगिविषयाः समर्थ्यन्ते न पुनर्मिथ्याग्रहैर्विदूष्यन्ते । परंत्वस्य स्पष्टं प्रतिपादनं सावधेः परिमाणस्य निरवधिविभागानकल्पयित्वा रेखाक्षेत्रादीनां मानरीतिस्तद्गुणान्वेषणप्रकारश्च स्थलान्तरे प्रदर्शयिष्यन्ते । यद्यप्यतिदुर्गमा विसंकुलकल्पनामयाश्च कतिपये गणितांशा मया प्रत्याख्यायन्ते तथापि तेषां सर्वथा लोकव्यवहारबहिर्भूततया परमोपयोगिनो गणितशास्त्रान्निष्कासने न कापि क्षतिः । प्रत्युताभीष्टार्थः सिद्ध्येद् यत्संप्रति प्रज्ञावन्तो विचारशालिनश्च जना श्चित्तविनोदमात्रफलकानि कल्पनाजालान्युज्झित्वा लोकव्यवहारे साक्षात्संबद्धेषु तत्वार्थप्रकाशकेषु विषयेष्वेवसविशेषं व्याप्रियेरन्निति ॥

१३२–नन्वनन्तविभागकल्पनाया बाधितत्वे बहूनां निर्णीतयाथार्थ्यानां गणितप्रतिज्ञानां समुच्छेदः स्यात् । तासामनन्तविभागसिद्धान्तमाश्रित्यैव प्रवृत्तत्वादिति चेन्मैवम् । यतो हि न कस्मा अपि योग्यप्रयोजनाय सावधेः परिमाणस्य निरवधिविभागा स्तज्ज्ञानं वा ऽपेक्ष्यते । किंच विचारपटूनामतीन्द्रियपरिमाणस्यैव मन्तुमशक्यतया तत्परिमाणक एकोऽपि विभागो न संभवति किंपुनरनन्ताः ।

१३३–एवं चोक्तग्रन्थसंदर्भे खण्डितेभ्यः कूटसिद्धान्तेभ्यो बहून्यनिष्टफलानि प्रभवन्ति तत्प्रतिद्वन्द्विसिद्धान्तेभ्यस्त्वनन्ता अध्यात्मशास्त्रीया धर्मशास्त्रीयाश्चेष्टतमार्था निष्पद्यन्ते इति प्रस्फुटम् । किंच लौकिक्याः पारमार्थिक्याश्च विद्याया नितान्तपरिपन्थिन एव बाह्यविषयसत्तां निस्संशयं विश्वसन्तीत्यप्यतिविशदम् । परंतु तत्वपक्षपातिनः कोविदा मन्मतमेवाद्रियेरन्सुदृढमाश्रयेरंश्चेत्याशासे । यतो हि विषयविषयज्ञानयोर्भेदं प्रकल्प्य बाह्यविषयसत्तास्वीकारे नैकोऽपि पदार्थ उपपद्यते प्रत्युतानेके दोषा दुरुच्छेदज्ञानसङ्कटानि चोपलभ्यन्ते । नापि बाह्यविषयसत्ता केनापि दृढप्रमाणेन निश्चीयते । नवा तत्स्वीकारजन्यानि फलानि परीक्षाप्रकाशं यथेच्छजिज्ञासां वा सहन्ते । किंतु निरन्तानि वस्तूनि निर्वक्तुमशक्यन्त इतिसामान्यव्यपदेशेनैव गोपाय्यन्ते । किंच बाह्यविषयव्युदासो न किमप्यनिष्टमापादयति नवा कस्यापि पदार्थस्योपपत्तिस्तत्सत्तासापेक्षा प्रतीयते । सर्वं वस्तुजातं वरं तत्प्रत्याख्याने एव समीचीनतया ऽधिकसौष्ठवेन वा बोद्धुं बोधयितुं च शक्यते । अपिच केवलयोर्ज्ञानात्मनोः स्वीकारे एव सर्वे संदेहवादिनो ऽनीश्वरवादिनश्चाभिभूयन्ते धर्मविवेकौ चानुष्ठीयेते । एतेन त्वन्मतमपेक्ष्य बाह्यविषयसत्तासिद्धान्तस्याधिकोपपन्नत्वमिति केचिदाहुस्तन्निरस्तम् ।

१३४–ननु बहवो वादग्रन्थाः कल्पनाश्च बुद्धिपरिष्कारकतया प्रशस्तोपयोगा विचारशास्त्राभ्युपेता अपि भवद्भिरमी निष्फला इव प्रत्याख्यायन्त इति चेत्सत्यम् । वादप्रिया निरर्थककल्पनासक्ताश्च विपरीतमताभिनिविष्टा जनास्तादृशवादग्रन्थादिप्रत्याख्यानकारणात्काममस्मत्सिद्धान्तान् विद्विष्युः । परंतु युष्मत्सिद्धान्तैर्विचारशास्त्रं सुलभीक्रियते संक्षिप्यते पूर्वतो विशद्यते चेतिहेतोरस्मत्सिद्धान्तोपेक्षणं तु न कोपि विमर्शकारी संमनुयादित्याशास्महे ।

१३५–एतावता प्रबन्धेनैन्द्रियकज्ञानोपलब्धिमधिकृत्य विवक्षितं विषयजातमशेषतः प्रतिपाद्य संप्रत्यात्मस्वरूपं तावन्मीमांस्यते । यच्चाल्पज्ञैर्लौकिकविषयान्तराणामिवात्मकज्ञानस्यानवगमात्तज्ज्ञानविषये मानवबुद्धेर्वैकल्यमुद्भाव्यते । तच युक्तम् । आत्मवृत्तिज्ञानपदार्थस्यैवासंभवे तदज्ञानकारणाद्बुद्धिवैकल्योत्प्रेक्षणस्यायुक्तत्वात् [नहि कश्चिच्छशशृङ्गं न जानातीति कृत्वा मूढः कथ्यते] स्पष्टमुपपादितं चैतदेकानविंशतितमपरिच्छेदे । किंचात्मनो ज्ञानाधिकरणत्वस्य निर्णीतत्वात्तस्यापि ज्ञानात्मकत्वे ज्ञानसाम्ये वा ऽधिकरणान्तरापेक्षायामनवस्थादोषप्रसङ्गात् ।

Digitized by Google

१३६—नचास्माकं ज्ञानाधिकरणज्ञानयोग्यमिन्द्रियमेव नास्ति। यदि तथाविधमिन्द्रियमभविष्यत्तर्हि वयं त्रिकोणत्वेत्रमिवात्मानमप्यज्ञास्यामेति जातु वाच्यम्। तादृशेन्द्रियप्राप्रावप्यैन्द्रियकज्ञानान्तरोपलब्धेरेव संभवात्। न खलु ज्ञानाधिकरणपदेनैन्द्रियकज्ञानान्तरमेव कोप्यभिप्रेयादिति संभाव्यते। अतश्च सर्वान् पदार्थान् यथावद्विचार्येदमनुमिनुमो यज् ज्ञानाधिकरणीभूतस्य ज्ञातुरात्मनो वृत्त्यात्मकज्ञानाभावाद्धेतोर्मानवबुद्धिवैकल्यकल्पनं वर्तुलचतुष्कोणकत्वेत्राज्ञानाद्धेतोस्तथाकल्पनमिव निर्युक्तिकं स्यात्।

१३७—यया रीत्येन्द्रियविषया ज्ञायन्ते तयैवात्मानोपीतिमतंत्वात्मस्वरूपविषये बहूनि बाधितान्यधर्म्याणि च लोकायतिकमतानि प्रादुरबीभवत्। किंचैतन्मताश्रिता नरा आत्मनःप्रतिबिम्बात्मकं वृत्तिज्ञानमनुपलभमानाः शरीराद्भिन्नस्यात्मनः सद्भाव एव कदाचित्सन्दिहीरन्। जडाया ज्ञानरूपिण्या वृत्तेर्नित्यंप्रवृत्तिशीलस्य निरालम्बस्यात्मनः प्रतिरूपकत्वस्य कथनं तु स्वरूपव्याक्रियैव निराक्रियेत। यदि वोच्येत यद् आत्मवृत्तिरात्मानं प्रवृत्तिमत्त्वचेतनत्वनिरालम्बत्वादिधर्मेष्वननुकुर्वत्यपि धर्मान्तरेषु तमनुकुर्यात्। सादृश्यप्रतियोग्यनुयोगिनोः सर्वांशसाधर्म्यस्यानियमादितिचेदुच्यतेऽपिमपरिच्छेदे।

१३८—तथाहि। यदि चात्मवृत्तिरात्मानमुक्तधर्मेषु नानुकरोति चेद्धर्मान्तरेष्वपि तं नैवानुकुर्वीत। यतो बोद्धृत्त्वैषितृत्वयतितृत्वादिधर्मेषु त्यक्तेषु न कोप्यात्मधर्मोऽवशिष्यते येन वृत्तेरात्मसादृश्यं संभवेत्। आत्मपदेन हि ज्ञाता यतमानश्चिन्तयमानो वस्तुविशेष एवाभिप्रेयते। तादृशगुणसमवायिन एवात्मपदार्थत्वात्। एवं चैकतमस्याप्यात्मगतधर्मस्य वृत्त्यननुकार्यत्वे आत्माकारकवृत्तिरेव न संभवतीति पर्यवस्यति।

१३९—नन्वात्मा जीवोऽधिकरणमित्यादिपदबोध्यस्य वृत्तिज्ञानस्यैवासंभवे तानि पदानि किं निरर्थकान्येव सन्तीति चेन्न। तेषां वृत्तिवृत्तिसदृशपदार्थातिरिक्तपदार्थबोधकत्वात्। न खल्वसौ जीवो ज्ञानात्मा किंतु ज्ञानस्य द्रष्टा ज्ञानस्यैषिता ज्ञानस्य विवेचयिता च। आत्मैव चाहमस्मि अहं गच्छामीत्यादावहमा निर्दिश्यते। यदि त्वयमहंप्रत्ययसात्यकिंचिद्रूपो वृत्त्यन्तरात्मक एव वोच्येत चेन्महाबाधितार्थावलम्बः [अहं न किंचिदस्मीतिकथने वदतोव्याघातात्। वृत्तेर्जडतया वृत्त्यन्तरग्रहणेऽसामर्थ्याच्च] नचायं केवलं संज्ञाविषयक एव वादः यतश्च केचनपदार्था वृत्तयोऽपरेतु नेत्युच्यते। नचासौ युक्तः। सर्वेषामितरपदार्थानां ज्ञानाभिधेयत्वे आत्मनस्तु तदनभिधेयत्वे मानाभावादिति वाच्यम्। [विभिन्नस्वभावकाभ्यां पदार्थाभ्यामेकसंज्ञादानेऽसामञ्जस्यात्] तथाहि। सर्वेषामात्मविषयाणां निष्क्रियत्वं ज्ञेयत्वं च साधर्म्यंस्तः। न पुनरात्मन्येतद्धर्मद्वयमुपलभ्यते। तस्य नित्यंप्रवृत्तिमत्त्वाज्ज्ञातृत्वाच्च। तथाचेत्थं सर्वथाविरुद्धधर्माणौ ज्ञानात्मानौ यद्येकेनात्मसाधारणेन ज्ञानपदेन व्यवह्रियेयातां तर्हि तत्स्वभावविषये साङ्कर्यं भ्रमश्च प्रसज्येयाताम् इति तयोर्नामभेदोऽत्यावश्यकः। सप्तविंशतितमपरिच्छेदश्चात्र द्रष्टव्यः।

केशवशास्त्री।

SARVA-DARSANA-SANGRAHA

CHAPTER IV.

The Rámánuja System.

(Continued from page 121.)

But devotion (or faith) is a kind of cognition which admits no other motive than the illimitable beatitude, and is free from all other desires; and the attainment of this devotion is by discrimination and other means. As is said by the author of the Vákya: Attainment thereof results from discrimination *(viveka)*, exemption *(vimoka)*, practice *(abhyāsa)*, observance *(kriyā)*, excellence *(kalyāna)*, freedom from despondency *(anavasāda)*, satisfaction *(anuddharsha)*, according to the equivalence (of the definition) and the explication (of these terms). Of these means, discrimination is purity of nature resultant from eating undefiled food and the explication (of discrimination) is, from purity of diet, purity of understanding, and by purity of understanding the unintermittent reminiscence. Exemption is non-attachment to sensuous desires; the explication being, Let the quietist meditate. Practice is reiteration; and of this a traditionary explication is quoted (from the Bhagavad-gítá) by (Rámánuja) the author of the commentary: For ever modified by the modes thereof. Observance is the performance of rites enjoined in revelation and tradition according to one's ability; the

---

॥ सर्वदर्शनसङ्ग्रहः ॥

भक्तिस्तु निरतिशयानन्दप्रियानन्यप्रयोजनसकलेतरवैतृष्ण्यवज्ज्ञानविशेष एव, तत्सिद्धिश्च विवेकादिभ्यो भवतीति वाक्यकारेणोक्तं, तल्लब्धिर्विवेकविमोकाभ्यासक्रियाकल्याणानवसादानुद्धर्षेभ्यः सम्भवान्निर्वचनाच्चेति। तत्र विवेको नामा दुष्टादन्नात् सत्त्वशुद्धिः। अत्र निर्वचनम्, आहारशुद्धेः सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिरिति। विमोकः कामानभिष्वङ्गः, शान्त उपासीतेति निर्वचनम्। पुनःपुनः संशीलनमभ्यासः निर्वचनञ्चस्मार्त्तमुदाहृतं भाष्यकारेण, सदा तद्भावभावित इति। श्रौतस्मार्त्तकर्म्मानुष्ठानं शक्तितः क्रिया, क्रियावानेष ब्रह्मविदां वरिष्ठ इति निर्वचनम्। सत्यार्जवदयादानादीनि कल्याणानि

explication being (the Vedic text), He who has performed rites is the best of those that know the supreme. The excellences are veracity, integrity, clemency, charity (almsgiving) and the like; the explication being, It is attained by veracity. Freedom from despondency is the contrary of dejection ; the explication being, This soul is not attained by the faint-hearted. Satisfaction is the contentment which arises from the coutrary of dejection ; the explication being Quiescent, self-subdued. It has thus been shown that by the devotion of one in whom the darkness has been dispelled by the grace of the Supreme Spirit propitiated by certain rites and observances, which devotion is meditation transformed into a presentative manifestation of soul, without ulterior motive, as incessantly and illimitably desired, the sphere of the Supreme Spirit (Vaikuṇṭha) is attained. Thus Yámuna says : Attainable by the final and absolute devotion of faith in one internally purified by both (works and knowledge); that is in one whose internal organ is rectified by the devotion of works and knowledge.

In anticipation of the inquiry But what absolute is to be desired to be known? the definition is given (in the second aphorism). From which the genesis and so forth of this. The genesis and so forth, the creation (emanation), sustentation, and retractation (of the universe). The purport of the aphorism is that the emanation, sustentation and retractation of this universe inconceivably multiform in its structure, and interspersed with souls, from Brahmá to a clump of grass, of determinate place, time, and fruition, is from this same universal Lord, whose essence is contrary to all qualities which should be escaped from, of illimitable excellences, such as indefeasible volition, and of innumerable auspicious attributes, omniscient, and omnipotent.

In anticipation of the (further) inquiry What proof is there of an absolute of this nature? it is stated that the system of institutes itself is the evidence, (in the third aphorism) : Because it has its source from the system. To have its source from the system is to be that whereof the cause or evidence is the system. The system, then, is the source (or evidence) of the absolute, as being the cause of knowing the soul which is the cause of knowing the absolute. Nor is the suspicion possible that the absolute may be reached by some other form of evidence. For perception can have no conversancy about the absolute, since it is supersensible. Nor can inference : for the illation The ocean and the rest must have a maker because it is an effect like a water-pot, is worth about as much as a rotten pumpkin. It is evinced that it is such texts as Whence also these elements, that prove the existence of the absolute thus described.

Though the absolute (it may be objected) be unsusceptible of any other kind of proof, the system, did it not refer to activity and cessation of activity, could not posit the absolute aforesaid To avoid by anticipation any queries on this point, it is stated (in the fourth aphorism) : But that is from the construction. This is intended to exclude the doubt anticipated. The evidence, then, of the system is the only evidence that can be given of the absolute. Why? Because of the construction, that is, because the absolute, that is the

सत्येन लभ्यत इत्यादिनिर्व्वचनम्। दैन्यविपर्य्ययो ऽनवसादः, नायमात्मा बलहीनेन लभ्यत इति निर्वचनम्। तद्विपर्य्ययजा तुष्टिरनुद्धर्षः, शान्तो दान्त इति निर्वचनम्। तदेवमेवंविधनियमविशेषसमासादितपुरुषोत्तमप्रसादविध्वस्ततमःस्वान्तस्य अनन्यप्रयोजनानवरतनिरतिशयप्रियविशदात्मप्रत्ययावभासतापन्नध्यानरूपया भक्त्या पुरुषोत्तमपदं लभ्यत इति सिद्धम्। तदुक्तं यामुनेन, उभयपरिकर्म्मितस्वान्तस्यैकान्तिकात्यन्तिकभक्तियोगलभ्य इति। ज्ञानकर्म्मयोगसंस्कृतान्तःकरणस्येत्यर्थः।

किं पुनर्ब्रह्म जिज्ञासितव्यमित्यपेक्षायां लक्षणमुक्तं जन्माद्यस्य यत इति। जन्मादीति सृष्टिस्थितिप्रलयं तद्गुणसंविज्ञानो बहुव्रीहिः, अस्याचिन्त्यविविधरचनारच्यस्य नियतदेशकालभोगब्रह्मादिस्तम्बपर्य्यन्तक्षेत्रज्ञमिश्रस्य जगतः यतो यस्मात् सर्व्वेश्वरात् निखिलहेयप्रत्यनीकस्वरूपात् सत्यसंकल्पाद्यनवधिकातिशयासंख्येयकल्याणगुणात् सर्व्वज्ञात् सर्व्वशक्तेः पुंसः सृष्टिस्थितिप्रलयाः प्रवर्त्तन्त इति सूत्रार्थः।

इत्थम्भूते ब्रह्मणि किं प्रमाणमिति जिज्ञासायां शास्त्रमेव प्रमाणमित्युक्तं शास्त्रयोनित्वादिति शास्त्रं योनिः कारणं प्रमाणं यस्य तच्छास्त्रयोनि तस्य भावस्तत्त्वं तस्माद्ब्रह्मज्ञानकारणात्मज्ञानकारणत्वाच्च शास्त्रस्य तद्योनित्वं ब्रह्मण इत्यर्थः। न च ब्रह्मणः प्रमाणान्तरगम्यत्वं शङ्कितुं शक्यमतीन्द्रियत्वेन प्रत्यक्षस्य तत्र प्रवृत्त्यनुपपत्तेः। नापि महार्णवादिकं सकर्तृकं कार्य्यत्वात् घटवद् इत्यनुमानस्य पूतिकुष्माण्डायमानत्वात् तल्लक्षणं ब्रह्म यतो वा इमानि भूतानीत्यादिवाक्यं प्रतिपादयतीति स्थितम्।

यद्यपि ब्रह्म प्रमाणान्तरगोचरतां नावतरति तथापि प्रवृत्तिनिवृत्तिपरत्वाभावे सिद्धरूपं ब्रह्म न शास्त्रं प्रतिपादयितुं प्रभवतीति एतत्पर्य्यनुयोगपरिहारायोक्तं तत्तु समन्वयादिति। तुशब्दः प्रसक्ताशङ्काव्यावृत्त्यर्थः तच्छास्त्रप्रमाणकत्वं ब्रह्मणः सम्भवत्येव कुतः समन्वयात् परमपुरुषार्थभूतस्यैव ब्रह्मणो ऽभिधेयतयान्वयादित्यर्थः। न च प्रवृत्तिनिवृत्त्योरन्यतरविरहिणः प्रयो-

Digitized by Google

highest end for man, is construed as the subject (of the first aphorism, viz. Then thence the absolute is to be desired to be known). Moreover a sentence which has nothing to do either with activity or with cessation of activity is not therefore void of purpose, for we observe that sentences merely declaratory of the nature of things, such as A son is born to you, This is not a snake, convey a purpose, viz. the cessation of joy or of fear. Thus there is nothing unaccounted for. We have here given only a general indication. The details may be learnt from the original (viz. Rámánuja's Bháshya on the Vedánta aphorisms); we therefore decline a further treatment, apprehensive of prolixity; and thus all is clear. A. E. G.

जनशून्यत्वं स्वरूपपरेष्वपि पुत्रस्ते जातः नायं सर्पइत्यादिषु हर्षभयनिवृत्तिरूपप्रयोजनवत्त्वं दृष्टमेवेति न किञ्चिदनुपपन्नम्। दिङ्मात्रमत्र प्रदर्शितं विस्तरस्त्वाकरादेवावगन्तव्य इति विस्तरभीरुणोदास्यत इति सर्व्वमनाकुलम्।

इति सर्व्वदर्शनसंग्रहे रामानुजदर्शनम्।

THE

ŚULVASÚTRA OF BAUDHÁYANA,

WITH THE COMMENTARY BY DVÁRAKÁNÁTHAYAJVAN

(Continued from page 74.)

SECOND ADHYÁYA.

नापक्षपुच्छः श्येनो विद्यते न चासप्तविधस्य पक्षपुच्छानि विद्यन्ते न च सप्तविधं चित्वैकविधप्रसङ्गस्तस्मात्सप्तविध एव प्रथमो ऽग्निः। २१

There is no falcon to be constructed without wings and tail; the agni which is not sevenfold (*i. e.* the agnis from the one-fold up to the sixfold) has neither wings nor tail; and it is not allowed to construct the one-fold agni after having constructed the seven-fold one; for all these reasons the first agni must be seven-fold.

पक्षपुच्छरहितस्य श्येनचितो ऽभावात्पक्षपुच्छानां सप्तविधवाक्यशेषत्वादेकविधादीनां सपक्षपुच्छत्वे व्याममात्रौ पक्षौ च पुच्छं च भवतीत्यनेनैकविधादिश्रुतिविरोधात्सप्तविधं चित्वैकविधचयने न ज्यायांसं चित्वा कनीयांसं चिन्वीतेति प्रतिषेधेन प्रसङ्गाभावात्सर्वप्रकृतिभूतः सप्तविधश्येनो ऽग्निरेव पूर्वं चेतव्यः। एवं विरोधादेकविधादीनां निवृत्तिरेवापतिता। कल्पे षड्विधः सप्तविध इत्यादिना षड्विधादीनामपि प्रकृतित्वमुक्तम्। तत्रापि पक्षपुच्छरहित एव षड्विधो ऽग्निः पूर्वोक्तहेतुनोपन्यासात्। अथाग्निधर्मानाह।

भेदान्वर्जयेत्। २२

The "clefts" are to be avoided.

भेदस्वरूपं स्वयमेवाह।

अधरोत्तरयोः पार्श्वसंधानं भेदा इत्युपदिशन्ति। २३

The meeting of the edges (of the bricks used) in an under and an upper layer is called "bheda"; thus they teach.

As we shall see further on, every agni consists of five layers (prastára, chiti) of bricks (200 bricks in each layer). Now the bricks in the second layer, for instance, had to be arranged in that way that none of them ever covered exactly a brick of the first layer, but that the line in which two bricks of the first layer were meeting was covered by a brick of the second layer. The same rule had to be observed with regard to the second and third layer a. s. o. The diagrams, which will illustrate the third adhyáya, will render this point clearer.

किं सर्वत्र। नेत्याह।

तदग्न्यन्तेषु न विद्यन्ते। २४

These bhedas do not occur (are not to be considered as such) on the outer periphery of these agnis (for there of course the edges of the bricks of all five layers must meet).

अग्न्यन्तेषु अग्निपर्यन्तेषु। अन्तस्यावर्जनीयत्वादिति भावः।

न स्रक्तिपार्श्वयोः। २५

And secondly not (i. e. the rule is not valid) in the case of the angles and of the sides (this refers to the sárarathachaksachit, where unavoidable bhedas occur in the centre of the nábhi—the nave—of the wheel and on the sides of the aras, the spokes.)

स्रक्तिपार्श्वयोः। साररथचक्रचयने नाभिमध्ये स्रक्तीनामेव संगमः। तयोरवर्जनीयत्वादिति भावः।

शु° मी° साररथचक्रचयने नाभिमध्ये स्रक्तीनां संगमे पार्श्वे च भेदान्वर्जयेदित्येतन्न विद्यते। तत्राप्यवर्जनीयत्वाद्भेदानामिति भावः।

साहस्रं चिन्वीत प्रथमं चिन्वान इति। २६

He who constructs the agni for the first time has to construct it with one thousand bricks (two hundred in each of the five layers).

Digitized by Google

विज्ञायत इति शेषः । प्रथममग्निं चिन्वानः सहस्रेष्टकापरिमितमग्निं चिन्वीत । तत्र पञ्च चितयो भवन्ति । तस्मात्पञ्चचितीकश्चेतव्य इत्यादिवचनात्पञ्चभिश्चयनैरेव भवितव्यम् । तत्र समविभागस्य न्याय्यत्वादेष द्विशतः प्रस्तार इति । द्विशतानामुपधानदर्शनात्पञ्चसु प्रस्तारेषु प्रतिप्रस्तारं द्विशता इष्टका भवन्ति । तत्र मन्त्राणामपर्याप्तत्वाद् गणावृत्तिभिर्वा यावन्तो मन्त्राः संभवन्ति तावतीरिष्टका उपधाय शेषा इष्टका इष्टकामन्त्रयोरिष्टकाव्यतिरेक इति न्यायेन द्वैधोक्तमार्गेण गणाद्यावृत्त्या वा उपधेयाः । पञ्चमायां चितौ मन्त्राणां भूयस्त्वान्मन्त्रव्यतिरेक अक्ताः शर्करा इति न्यायेनोपधानम् ।

पञ्चमायां वा चितौ संख्यां पूरयेत् । २७

Or the number is to be made full in the fifth layer.

I have not yet been able to procure that previous part of Baudháyana's kalpasútra which treats of the ritual connected with the construction of the agni. Without it, it is not very well possible to explain satisfactorily the above sútras as well as a considerable number of the following sútras of the second adhyáya; a part of them, as the commentaries show, contains in fact nothing but additional explanations of the corresponding part of the kalpasútra.

एवं वा तत्र मन्त्राणामपर्याप्तत्वाद्यावत्सिद्धैर्मन्त्रैः पञ्च लोकंपृणाभिश्चोपधाय शेषाः पञ्चमायां चितावुपदध्यात् । तत्रापीष्टकाव्यतिरेके लोकंपृणाभिर्गणावृत्तिभिर्वोपधानं कर्तव्यम् । तत्र पञ्चमीव्यतिरिक्तासु पञ्चभिर्लोकंपृणाभिर्यावत्य इष्टकाः संभवन्ति तावतीर्गणयित्वा भेदपरिहारेणाग्निं चपरिमितमिष्टकाः कार्याः । पञ्चमायां चितौ पूर्वासु चितीषूपहितशिष्टानां भेदपरिहारेण कल्पनम् । आचार्येणास्मिन्पक्षे करणानुपदेशादापस्तम्बादिभिरनुक्तत्वाच्च पूर्वैर्व्याख्यातृभिर्दिङ्मात्रमुक्तम् ।

द्विशताश्चेच्चिकीर्षेत्पञ्चचोडाभिर्नाकसदः समानसंख्यं प्रतीयात् । २८

If the intention is to give to all prastáras two hundred bricks, then the pañchachoḍás and nákasats are to be considered as forming one number together.

The pañchachoḍás and nákasats are two classes of bricks employed in the fifth layer of the agni; their height is according to II. 59 only a half of the ordinary height of the bricks and therefore, in counting the bricks, one nákasat and one pañchachoḍá together could be considered as forming one brick only.

समष्ट्यभिप्रायेण नपुंसकत्वम् । द्विशतप्रस्तारपक्षे ऽयं विशेषः । पञ्चचोडाः । अयं पुरो हरिकेश इत्युपर्युपधेया अर्धोच्छ्राया इष्टकाः । राज्ञ्यसीति पञ्च नाकसदस्तावदुच्छ्रायास्तासामधस्तादुपधेयाः । ता दश भवन्ति[1] । द्विशतपूरणार्थमिष्टकागणनायां पञ्चेति विद्यात् । पञ्चमायां वा चितावित्यस्मिन्पक्षे भेदेन गणयेदित्यर्थः । समानसंख्यम् । द्वे द्वे एकीकृत्य गणयेत् । दक्षिणोत्तरपार्श्वयोरिष्टकानां समानरूपप्रतिपादनार्थं ब्राह्मणान्तरमाह ।

पशुधर्मा ह वा अग्निर्यथा ह वै पशोर्दक्षिणेषामस्थ्नां यद्दक्षिणं पार्श्वं तदुत्तरेषामुत्तरं यदुत्तरेषां दक्षिणं तद्दक्षिणेषामुत्तरं यदवाक् चोर्ध्वं च तत्समानमेवमिष्टकानां रूपाण्युपदध्यात् । २९

The agni indeed has the properties of an animal; for as the right (southern) side of those bones of an animal, which are situated in the right half of its body, is the left (northern) side of those bones which are situated in the left half of the body, and *vice versâ* and as that which is in the under and the upper part (or on the west and east-sides) is the same, in the same way the different shapes of the bricks are to be placed.

"Dakshineshám asthnám, etc.;" f. e. the end of the right-side ribs of an animal is the "dakshiṇa párśva" of these ribs; to this "dakshiṇa párśva" corresponds in the left half of the animal's body the end of the ribs situated there and this is the "uttarah párśva uttareshám asthnám"—Regarding the words "uttara" and "dakshiṇa" I remark that they will be translated throughout by "northern" and "southern" (not by "left" and "right") when they refer to the agni; in this way the connexion with the expressions "púrva" and "paśchima" is preserved.

There seems to be a lacuna in the first words of the commentary on this passage.

तत्सदृशम् । यदवाक् । अस्थ्यभिप्रायेण नपुंसकत्वम् । पश्चाद्भागः । ऊर्ध्वं च पूर्वभागः । तत्समानम् । तदुभयं सदृशं भवति । एवमिष्टकानां रूपाण्युपदध्यात् । एवमिष्टकाः कुर्यादित्युक्तं ब्राह्मणे । तस्यार्थमाह या दक्षिणावृतो लेखा इत्यादिना । तथा चापस्तम्बः । सर्वोन्वर्णानिष्टकानां कुर्यादिति लेखाधिकारो भवतीति । आचार्येण

[1] A. B. दश सन्ति ।

लेखाधिकारस्य पशुत्वेनोक्तत्वात्सर्वान्वर्णानिष्टकानां कुर्यादिति पशुधर्मत्वमुक्तं वेदितव्यम् ।

या दक्षिणावृतो लेखास्ता दक्षिणत उपदध्यात् । ३०

Those lines which run towards the southern (right) side (*i.e.* those bricks which are marked with such lines) are to be placed in the southern half of the agni).

सव्यपार्श्वादारभ्य दक्षिणपार्श्वं प्रति चक्ररूपेणावृता दक्षिणावृल्लेखा । सव्यहस्तेन परिमृष्टेति यावत् ।

सव्यावृत उत्तरतः । ३१

Those marked with lines which run towards the northern (left) side are to be placed in the northern half.

तद्विपरीताः सव्यावृतः । लेखानामुपधानासंभवात्तद्वत्य इष्टका लक्ष्यन्ते । दक्षिणत उपदध्यात् दक्षिणपार्श्व उपदध्यात् । एवमुत्तरतः । ऋजुलेखाः पश्चात्पुरस्ताच्च भवन्ति । ३२

The bricks with straight lines are to be placed on the east and west side of the agni.

ऋजुलेखा अकुटिललेखा अग्नेः पश्चाद्भागे पूर्वभागे च । त्र्यालिखिता मध्ये । ३३

Those marked with three lines in the middle.

मध्ये तिस्र आभिमुख्येन या लिखिता लेखास्तास्त्र्यालिखिताः । ता अग्नेर्मध्य उपदध्यात् । एवंगुणा इष्टकाः कार्या इत्यनुक्ता या दक्षिणावृत इति लोक इष्टकाकारिणां प्रसिद्धमनूद्य देशविधानाल्लोके च लेखाधिकारस्य प्रायिकत्वात्कल्पेऽनुक्तत्वाच्च लेखाधिकारो विकल्पते । लेखाकरणपक्ष अग्निक्षेत्रं पञ्चधा विभज्य प्रोक्तदेशवद्दिक्संबन्धलेखा युक्तास्तेषूपदध्यात् ।

Śulvamímáṇsá to 30-33:

इष्टकासु या इष्टका दक्षिणमावर्तन्ते सव्यमारभ्य दक्षिणं प्रति चक्ररूपेणावर्तन्ते लेखा इति तद्वत्य इष्टका लक्ष्यन्ते । दक्षिणावृतलेखायुक्ता इष्टका दक्षिणत उपदध्यादिति यावत् । एवं दक्षिणमारभ्य सव्यमावर्तन्ते या लेखास्तद्युक्ता इष्टका उत्तरत उपदध्यात् । या इष्टका ऋजुलेखायुक्तास्ताः पश्चात्पुरस्ताच्च यथा भवन्ति तथोपदध्यादित्यर्थः । तिस्र आभिमुख्येन लिखितास्तादृशलेखायुक्ता मध्य अग्निमध्य उपदध्यात् ।

अथ या विशयस्था यथा ह वै पशोः पृष्ठवंशो नैवैकस्मिन्पार्श्वे व्यतिरेकेण वर्तते नैवापरस्मिन्नेवं तासामुपधानं प्रतीयात् । ३४

Regarding those bricks which are placed in the middle of the agni: (on the line running from the east to the west through the centre of the agni) as the backbone of an animal does not extend more towards one side (than towards the other), and not towards the other side (but is right in the middle of the body), in the same way the placing of those bricks is to be understood.

अथशब्दः पूर्वस्माद्व्यवच्छेदार्थः । व्यवच्छेदश्च लेखाधिकारो नास्तीति । विशयस्था मध्यस्थाः । यस्मादारभ्य पक्षपुच्छस्था इष्टका विविधं शेरत इति विशयाः । पुच्छादारभ्यान्तान्मध्यरेखायां या इष्टका उपधेयास्ता विशयस्था इत्यर्थः । यथा ह वै पशोः पृष्ठवंशः । शालाया मध्यवंश इव । जाघनीप्रभृत्यामुखादेकस्मिन्पार्श्वे व्यतिरेकेण उदग्दक्षिणादिपार्श्वभूतो[1] नैव वर्तते । नैवापरस्मिन् । अपरस्मिन्पार्श्वे नाधिक्येन वर्तते । उभाभ्यामेवकाराभ्यां कदाचिदपि न वर्तत इति सूचयति । एवं तथेत्यर्थः । तासामुपधानं मध्यदेशवर्त्यस्थितुल्यतामापाद्योक्तं भवति । पुच्छापरान्तमध्यादारभ्याशिरोऽग्रमध्यादुन्नीयते । अग्नेः पशुधर्मविधानार्थं ब्राह्मणान्तरमुक्तम् । तदुदाहृतम् । तत्रास्थिसादृश्यमुक्तम् । स्वशाखायां चेष्टकानामस्थिसादृश्यमात्रवचनमस्तीत्याह ।

अथापि ब्राह्मणं भवति । ३५

For this point we have also the following bráhmaṇa.

अथशब्दोऽस्माकमिति द्योतनार्थः । अपिशब्दः समुच्चय एव । न परकीयमेव । अस्मदीयमप्यस्तीत्यर्थः । किं तत् ।

प्रजापतिर्वा अथर्वाग्निरेव दध्यङ्ङाथर्वणस्तस्येष्टका अस्थानीति । ३६

Prajápati indeed is Atharvan and Agni is Dadhyaṅ, Atharvan's son; the bricks are his bones.

अथर्वा नाम प्रजापतिरग्निरेव मान्य अथर्वणः पुत्रो दध्यङ् । तस्य दधीच अस्थान्यस्थीनीष्टका इति ब्राह्मणस्यार्थः । तस्मात्सादृश्यवाक्योपन्याससामर्थ्याद्विधिं प्रकल्प्येष्टकानामस्थिसादृश्यमापाद्योपदध्यादिति शेषः ।

[1] A. B. C. उद्गादयेत्यादि°

बहिस्तन्वं चेच्चिनुयात्तन्वोपप्लवमध्यैरात्मोपप्लवमध्यान्त्संदध्यात् । ३७

If the sacrificer constructs one of those agnis, which have limbs situated outsides (the body or átman of the agni) then he is to join the middle of the lines in which the limbs touch the átman with the middle of the lines in which the átman touches the limbs.

Such limbs are the head of the śyenachit, the feet of the kaṅkachit and kúrmachit, etc. The diagrams to the III. Adhyáya will illustrate the meaning of the Sútra.

तन्वशब्दो ऽङ्गपर्यायः । अङ्गानि चात्र शिरःपक्षपुच्छपादत्सर्वाङ्गानि[1] श्येनकङ्कालजद्रोणकूर्मादीनां बहिर्भूतान्यङ्गानि[2] । रथचक्रश्मशानादीनामन्तर्भूतानि । तत्र यदि बहिस्तन्वमग्निं चिनुयात् तन्वोपप्लवमध्यैः । तन्वानामुपप्लवमध्यास्तन्वोपप्लवमध्याः । उपप्लवशब्दो ऽन्तपर्यायः । तेषां मध्यैरात्मोपप्लवानामात्मोपप्लवमध्यान् पार्श्वानां मध्यान्त्संदध्यात् । आत्मनः पूर्वपार्श्वान्तमध्यं शिरसः पश्चिमान्तमध्येन संयोजयेत् । एवं पक्षादिषु द्रष्टव्यम् । कङ्कपादयोस्तु तावदन्तरालविधानात्सान्तरालपादद्वयं मध्यं पुच्छान्तमध्ये भवति । अन्यथासंभवात् । कूर्मे तु प्रध्यपच्छेदमध्यान्पादान्तमध्यैः[3] श्लेषयेत् । एतत्सर्वमाकृतिवचनेनैव सिद्धं विस्पष्टार्थमुच्यते । कस्यां दिशि कतमदङ्गं संदध्यादित्यत आह ।

प्राञ्चमेनं चिनुत इति विज्ञायते । ३८

He constructs the agni in that way that it is turned towards the east (with the head); this is the tradition.

प्राञ्चं प्राक्शिरसमेनमग्निं चिनुत इति । अनेनेदमस्मिन्प्रदेशे संदध्यादिति विस्पष्टार्थं विज्ञायते अविज्ञातमुखानां प्रउगादीनां मुखादिप्रदेशपरिज्ञानमेव प्रयोजनं[4] प्रयोक्तुरुप[5]स्थानाद्यर्थम् ।

अमृन्मयीभिरनिष्टकाभिर्न संख्यां पूरयेत् । ३९

He is not to make the number (of the bricks) full with bricks not made of clay or not having the form of bricks.

अमृन्मयीभिर्हिरण्येष्टकाभिः । मृन्मयत्वे सत्यपि कुम्भेकष्टाभिर्न संख्यां सहस्रादिका पूरयेत् । लोकप्रसिद्धाभिरेव मृन्मयीभिरिष्टकाभिः संख्यां पूरयेदित्युक्तं भवति । लोकप्रसिद्धैव मृन्मयत्वे सिद्धे मृन्मयग्रहणं स्वप्रयोजनं च । यत्र प्रारब्ध उत्तमे प्रस्तारे प्राप्ते पूर्वस्यां रात्रौ चोरेण द्विषद्भिर्वा इष्टका अपहृताः स्युः सद्यः पुनरिष्टकाकरणस्याशक्यत्वादारब्धस्यावश्यपरिसमाप्यत्वात्प्रतिनिधिप्राप्तौ पशुभिः शिलाभिर्वा सादृश्यात्तथेष्टकाः कारयित्वोपधानं स्यात् । तन्निवृत्त्यर्थमस्याम[1]प्यवस्थायाममृन्मय्यः संख्यायां नान्तर्भवेयुः । अस्य प्रतिषेधस्य हेतुरूपेण श्रुतिं दर्शयन्नाह ।

इष्टकचिद्वा अन्यो ऽग्निः पशुचिदन्य इत्येतस्माद्ब्राह्मणात् । ४०

For another agni is that one which is constructed with bricks, another that constructed with animals; on account of this bráhmaṇa (the preceding sútra is valid).

अग्निहोत्रस्य वत्साभिमर्शनस्यार्थवादः । इष्टकया चित एको ऽग्निः पशुना चित अन्यो ऽग्निरित्येतस्मादन्यार्थवादविषयब्राह्मणलिङ्गादिष्टकाभिरेव चिन्वीत न द्रव्यान्तरेणापीत्यत्र[2] प्रसिद्धश्चयनाग्निरनूद्यते ऽभिमर्शनेन । पशुचितमेनमग्निं कुरुत इति ज्ञापनार्थम् । अनेन ब्राह्मणेनेष्टकाभिरेवेत्यत्र स्वशाखायां चास्ति लिङ्गमिति प्रतिपादितं भवति । अन्यच्च ।

पशुर्वा एष यदग्निर्योनिः खलु वा एषा पशोर्विक्रियत इति यत्प्राचीनमेष्टकाद्यजुः क्रियत इति च । ४१

(And there are other passages to the same purport:) For this agni is an animal; the yoni of an animal is made in different forms; all the ceremonies in which mantras of the Yajurveda are used, are performed before placing the bricks.

यो ऽग्निरेष पशुधर्मत्वा[3]दभेदेन पशुधर्म इत्युच्यते । योनिरुत्पत्तिस्थानम् । एषा योनिः पशोर्विक्रियते विविधं क्रियते । कथम् । यत्प्राचीनं यस्मात्प्राचीनं पूर्वमेष्ट[4]कात्

Footnotes (left column):

[1] A. first hand B. C. °पादाः सर्वेषां श्ये°

[2] A. adds on the margin (without marking where to be inserted): त्सकश्चतुरस्रद्रोणे । पादाः कङ्ककूर्मयोः । परिमण्डलद्रोणे कूर्मे चोष्ठः ।

[3] C. °मध्यान्यात्मान्तमध्यैः

[4] प्रयोजनं only in A. on the margin.

[5] A. B. C. प्रयोक्तुमुप°

Footnotes (right column):

[1] c. स्यात् । तस्याम°

[2] a. °रणेत्यत्रं

[3] a. b. यो ऽग्निः पत्ययः यो ऽग्निश्चित् । एष पशुपः पशुधर्म°

[4] c. नं सर्वमे°

Digitized by Google

इष्टकासंबन्धाच्चयनाद्यदिष्टकानां यजुर्मन्त्रवत्कर्म क्रियते दर्भस्तम्बोपधानकर्षणादि अचेष्टकात्पूर्वमित्यनेनेष्टक यथाग्निरुपधातुं[1] शक्यते । चशब्दः समुच्चयार्थः । इदं च लिङ्गमिति । अत्र यत्प्राचीनमित्यादिना लिङ्गदर्शनेनेष्टकचित्वे सिद्धे पशुधर्मत्वं चाग्नेः स्वशाखायामस्तीति दर्शयितुं पशुर्वा एष इत्याद्युदाहृतम् ।

लोकबाधीनि द्रव्याण्यवटेषूपदध्यात् । ४२

Those things which would occupy space, are to be placed into holes in the earth.

The sútra refers to certain objects, as f. e. the heads of five sacrificed animals, etc., which were required for the construction of the agni (see Indische Studien, XIII. p. 250 ff.) and which had to be put into holes dug out under the agni so as not to displace any ishṭakás.

इष्टकानां स्थानबाधीनि उलूखलपशुशिरःप्रभृतीन्यवटेषु गर्तेषूपदध्यात् । इष्टका अपसार्योलूखलादिद्रव्यस्योपधित्सितस्य स्थान इष्टका अपनीयावटं खात्वा तत्रोपधाय समां भूमिं कृत्वापनीता इष्टकाः स्थाप्याः । अवकाः स्वयमातृण्णाश्चोत्तरास्वपि चितिषु दृष्टत्वात्सर्वत्र संधिषूपदध्यात् ।

मण्डलमृषभं विकर्णीमितीष्टकासु लक्ष्माणि प्रतीयात् । ४३

By the expressions "a circle" "a bull" "a woman without ears" (which had been used in the kalpasútra in connexion with the construction of the agni) we are to understand signs (diagrams) of that form, made on the bricks (not bricks having the shape of a circle, etc).

इ[3]तिरेवमित्यर्थे । मण्डलेष्टकामुपदधाति ऋषभमुपदधाति विकर्णीमुपदधातीत्येवं यत्र श्रूयते तत्रेष्टकासु लक्ष्माणि चिह्नानि प्रतीयात् । इष्टकानां मण्डलाकृतिविधानमिति न जानीयात् । चतुरस्राभिरित्यादिवचनविरोधात् । तत्र तिसृषु मण्डलाकारं लिखेत् । पञ्चस्वृषभाकारम् । एकस्यां विकर्णेस्त्रीरूपमर्धचन्द्राकृतिं वा लिखेत् ।

इष्टकामन्त्रयोरिष्टकाव्यतिरेके लोकंपृणाः संपद्यन्ते परिमाणाभावात् । ४४

If, among the bricks and the mantras (which are spoken while the bricks are placed) the bricks are more in number, then (the bricks which are in excess) are to be considered as lokampriṇás (i. e. the mantras properly belonging to the lokampriṇás are to be employed for those bricks); since the number of the lokampriṇás is not fixed.

[1] a. b. °रुपधातुं

[2] c. यथा°

[3] a. inserts before इति°: उत्करणाभिः चतुरस्राभिः b. उत्करणाभी.

या इष्टका मन्त्रा अवधेयाः मन्त्रप्रकरणपठिता आचार्येणोक्ताश्च । इष्टकानां मन्त्राणां मध्य इष्टकाव्यतिरेके इष्टकाधिक्ये प्रथमे प्रस्तारे शतमष्टषष्टिश्च मन्त्रा द्रष्टव्याः तापश्चिदादीनां[1] मन्त्राणां विनियोगान्तरे पञ्चषष्टिरिति । यद्वा त्रिंशत्पञ्चत्रिंशद्वेष्टका मन्त्रेभ्योऽतिरिच्यन्ते ता लोकंपृणाः संपद्यन्ते । कुतः । इयत्य एव लोकंपृणा इति परिमाणाभावात् । ननु पञ्च लोकंपृणा इति वक्ष्यति । कथं परिमाणाभावः । सत्यम् । पञ्चैवेति न तस्यार्थः । द्वेधोत्क्रमार्गेण गणावृत्तौ द्विशताश्चेदित्यस्मिन्पक्षे पञ्चमायां चितौ चावश्यं पञ्चोपधेया इति तस्यार्थः । अनुष्टुभानुचरतीति वचनात् । तस्मात्प्राणाः सर्वाण्यङ्गान्यनुचरतीत्यर्थवादाच्च । द्वितीये प्रस्तारे शतमष्टत्रिंशच्चातिरिक्ताः । तृतीये पञ्चदशातिरिक्ताः । चतुर्थे षोडशाधिकं सप्तदशाधिकं वा शतम् । पञ्चमे नेष्टकातिरेक उत्तमायां पूरणत्वेऽतिरिच्यन्ते[2] । तथाथोदीचीभिरिति दर्शनात्स्वकल्पोक्तमार्गेण लोकंपृणाभिरेव पूरणम् । द्वेधोत्क्रमार्गेण वा[3] गणावृत्त्योपधानम् । न संकलितोपधानम् ।

अतीतानेवेष्टकागणानेतदेवोपदध्यात् । ४५

The past classes of bricks (those which have been placed before) are to be placed there.

अत्र[4] एतस्मिन्काले लोकंपृणानामुपधानकाल अतीतानेवेष्टकागणानपस्याश्विनीर्दिश्याश्छन्दस्याःस्तोमीयासपत्नादीनुपदध्यात् । अथवा कल्पे अपानभृद्भिश्चितिराप्यते पुरुषेण वालखिल्याभिर्व्युष्टीभिर्नवचेष्टकाभिश्चितिराप्यत इति वचनात् । अतीतानुपधानकाले विस्मृतानिष्टकागणानेतस्मिन्काल उपदध्यात् । अस्मिन्पक्षे ऽत्रेति शब्दो ऽनर्थकः । कल्प आप्यत इति वचनेनान्यगणापानभृदादिभिरपि पूरणं सूचयति । तत्र पुरुषेण चितिराप्यत इति वचनात्पुरुषो वय इत्यस्यैवावृत्तिः । अन्यथेतरेष्विव वयस्याभिरित्येवावक्ष्यत् ।

पञ्च लोकंपृणाः । ४६

There are, five lokampriṇás (in every agni).

सर्वप्रकारेष्वपि पूरणे पञ्च । लोकंपृणाः पञ्चावश्यमुपदध्यादित्यर्थः ।

[1]. A. B. मन्त्राः इष्टकाचिते । यश्चिदादीनां

[2]. ? C. पूरत्वेतिरिच्यते

[3]. B. C. वा deest.

[4]. A. adds on the margin (after अत्र) द्वेधोत्क्रमार्गेण पूरणे ।

Digitized by Google

मन्त्रव्यतिरेकेऽक्ताः शर्करा संधिषूपदध्यात् । ४७

If the number of the mantras is greater (than that of the bricks) pebbles anointed with ghee are to be placed in the spaces between the bricks.

द्विशतप्रस्तारपक्षे पञ्चमे तेजो घृतमिति वाक्यशेषाद् घृताक्ताः शर्करा श्वत्तव्यास्[1] सगराद्यैर्मन्त्रैः पैार्णमास्यन्तैः शतं विंशतिसंयुक्ताः संधिष्विष्टकाविवरेषूपदध्यात् । प्रतितारकपक्षे द्वे द्वे भवतः ।

प्राचीरुपदधाति प्रतीचीरुपदधातीति गणेषु रीतिवादः । ४८

The meaning of rules as "he places the bricks towards the east" he places the bricks" towards the west is that the classes of bricks are to be placed in a straight line (running in the specified direction).

प्राचीरुपदधाति प्रतीचीरुपदधातीति कल्पे श्रुतौ वा यत्र श्रूयते अपस्यादिषूपलक्षणत्वात् । उदीचीर्दक्षिणा इति च यत्र श्रूयते । तत्रायमर्थः । तेषु गणेषु रीतेर्वादः श्रेण्याः वाद अभिधानम् । रीतिशब्देन प्रसिद्धाऽकुटिला गतिरुच्यते । प्रागपवर्गा इत्युक्तं भवति ।

प्राचीमुपदधाति प्रतीचीमुपदधातीति कर्तुर्मुखवादः । ४९

Rules as "he places the brick towards the east" etc. refer to the direction of the face of him who constructs the agni.

अस्यां शाखायामुदाहृतरूपस्योभयस्याभावादर्थवादरूपेण ग्रहणम् । अस्य च प्रदर्शनार्थत्वात्पञ्चैकामित्यादिषु प्राङ्मुख इत्यादिचयनकर्तुश्चोदनं भवति ॥ तत्र प्राङ्मुखत्वादेरिष्टकाया असंभवादुपधानकर्तुरित्युक्तम् ।

पुरस्तादन्याः प्रतीचीरुपदधाति पश्चादन्याः प्राचीरित्यपवर्गवादः । ५०

पुरस्तादन्याः । नक्षत्रेष्टकास्वंसादारभ्याश्रोणे रोहिण्याद्या विशाखान्ताः प्रत्यगपवर्गाः । पश्चादन्याः । श्रोण्या आरभ्यांसादनुराधाद्या अपभरण्यन्ताः प्रागपवर्गाः । तत्रापवर्गवादो न रीतिवादः । आरम्भावसानस्थानवचनात्तदवश्यं संपाद्यं कुटिलतायां तु दोषः ।

चतुरस्रास्वेवैतदुपपद्यते । ५१

अनन्तरोक्तनक्षत्रेष्टकासु । अंसश्रोणिविशिष्टं विधानं चतुरस्रासु चितिष्वेवोपपद्यते । अन्यत्र रथचक्रादिषु गोण्यावृत्त्या संपाद्यत इत्यर्थः । अथेष्टकाधर्माः ।

न खण्डामुपदध्यात् । ५२

No brick, which has been formed by breaking is to be employed for the construction of the agni. (f. i. a triangular brick which has been formed by dividing a square-shaped brick is forbidden).

वाश्यादिना संतक्ष्य पादेष्टकादिमापाद्य नोपदध्यात् । तत्र भिन्नप्रतिषेधादेवमुक्तम् ।

शु० मी० वाश्यादिना चतुरस्रकृतामिष्टकां भित्त्वा तत्संपादितेष्टकां नोपदध्यात् ।

न भिन्नामुपदध्यात् । ५३

No brick, which is cleft (f. i. a squareshaped brick made out of two triangular bricks) is to be employed.

द्विधाभूतां पुनः संधायैकीभूतां नोपदध्यात् ।

न जीर्णामुपदध्यात् । ५४

And no brick which is damaged in any way.

एकदेशजीर्णां किंचिद्विशिष्टामपि नोपदध्यात् ।

न कृष्णामुपदध्यात् । ५५

And no brick of black colour (which may be produced by the burning, etc.).

उदरदेशे[1] कृष्णापि कृष्णैव । यथा सर्वा रोहिता इत्यत्रैकदेशरोहितापेक्षया तद्विशेषणत्वम्[2] ।

शु० मी० पाकाधिक्येन न्यूनतया वा नीलवर्णाम् ।

न लक्ष्मणामुपदध्यात् । ५६

And no brick is to be employed, which has some mark (an impression of some foreign body, etc.).

शोषणकाले काष्ठपाषाणादिनाङ्किताम् । निर्मथ्येन लोहिनीः पचन्तीति वचनादिष्टकास्वतोवव्यतिरिक्तश्वेतश्यावादिवर्णा अपि वर्जनीयाः[3] ।

न स्वयमातृण्णा ऽ स्वयंचितावुपदध्यात् । ५७

In the chitis where the svayamátriṇṇá is used it is to be placed so as not to be covered (by a brick).

1. B. C.° तव्याः

1. In A. corrected into एकदेशे

2. C. °षणत्वात्

3. A. first hand, B. °ष्टकास्वभावव्यतिरिक्तश्वेतवास्यादिवर्जनीयां B. second hand क्तश्वेतवर्णा अपि वर्जनीयाः C. °ष्टकासु अतीव व्यतिरिक्तश्चेत् वाश्यादि वर्जनीयं

Digitized by Google

तृतीयस्याः स्वयमातृण्णायाः प्रस्तारसमाप्त्यावुपधेयत्वात् पूर्वयोरयं धर्मः स्वयंचितौ स्वयमातृण्णावत्यां चिताविष्टकया नापिदध्यात् । यथा संधो भवति तथेष्टकयोर्मध्य इत्यर्थः ।

ऊर्ध्वप्रमाणमिष्टकानां जानोः पञ्चमेन कारयेत् । ५८

The fifth part of a jánu (=$6\frac{2}{5}$ angulis) is to be taken as the height of the bricks (so that the height of the whole chiti with its five prastáras is equal to one jánu (=32 angulis).

इष्टकानां गार्हपत्यधिष्ण्येष्टकाभिः सर्वासामपृथग्विधानादिष्टकाग्रहणाच्च ।

अर्धेन नाकसदां पञ्चचोडानां च । ५९

The height of the nákasats and pañchachodás is to be made with half that measure ($3\frac{1}{5}$ angulis).

पञ्चमार्धेन ।

यच्छोषपाकाभ्यां प्रतिह्रसेत पुरीषेण तत्संपूरयेत्पुरीषस्यानियतपरिमाण[1]त्वात् । ६०

That which is lost by the heat and the burning (from the right size of the bricks) is to be filled up with loose earth since for that no fixed size is prescribed.

यच्छोषपाकाभ्यामुपलक्षणत्वात्कालेन वा प्रतिह्रसेत उक्तप्रमाणाद्धीयते पुरीषेण तत्संपूरयेत् । पुरीषस्यानियतपरिमाणत्वात् । परिमाणनियतवचनाभावात् । न केवलं विवरेष्वेव निम्नोन्नतपरिहारार्थं जान्वादिप्रमाणाविरोधेन पुरीषोपधानम् । तस्मान्मांसेनेत्यर्थवादेन शोषपाकाभ्यां ह्रासवचनेन । उक्तानि प्रमाणानि करणीनामेव । नेष्टकानामित्युक्तं भवति ।

व्यायाममात्री भवतीति गार्हपत्यचितेर्विज्ञायते । ६१

It is of the measure of a vyáyáma, this is the tradition for the construction of the Gárhapatya-fire.

The Gárhapatya is either a square the side of which is one vyáyáma long or a circle of the same area.

चतुररत्निर्व्यायामः कल्प एतेनैव ज्यायसः प्रक्रमानित्यस्योपलक्षणत्वात् । व्यायाममात्राद्गार्हपत्यपरिमाणात्प्राग्वंशिकमाहवनीयपरिमाणं पदचतुष्टयं परित्यज्य शिष्टानि षट्त्रिंशदङ्गुलानि प्राग्वंशस्य पूर्वापरप्रक्रमप्रमाणेन षोडशधा विभज्य सपादमङ्गुलद्वयं प्रक्रमे प्रक्षिप्य प्राग्वंशमानकाले तेन प्रक्रमस्थानीयेन षोडशप्रक्रमायाममित्यादिना मीत्वा पश्चाद्भागे षष्ट्यङ्गुलं संचरमवशिष्य ततः पुरस्तात्षष्ट्यङ्गुलविष्कम्भपरिमण्डलं गार्हपत्यायतनं कृत्वा तस्य पुरस्ताच्चतुश्चत्वारिंशच्छताङ्गुलेन प्रमाणेन शङ्कुं निहत्य ततः षण्णवत्यङ्गुलायामां वेदिं कृत्वा ततः पुरस्ताच्चतुररत्न्यायामं च समचतुरस्रमाहवनीयं कृत्वा दीक्षादिवसेषु मध्ये ऽग्निं निधाय चयनकाले ऽथैनमग्निमित्यादि एवं कृते प्रकृतिसिद्धयोः पूर्वापरयोः संचरयोर्वेद्याश्च संकोचो न भवति । आहवनीयो ऽप्यायतनमध्ये निहितो भवति । गार्हपत्यचितेः सर्वाग्नीनामङ्गत्वात्परिभाषाध्याय उच्यते[1] ।

चतुरस्रेत्येकेषाम् । ६२

According to one opinion it (the gárhapatya) has the form of a square.

अग्निरिति शेषः ।

परिमण्डलेत्येकेषाम् । ६३

According to others it has the orm of a circle.

पूर्ववत् । परिमण्डलपक्षे व्यायामार्धेन परिमण्डलकरणम् । तत्र चतुररत्न्यायामः ।

चतुरस्रं सप्तधा विभज्य तिरश्चीं त्रेधा विभजेत् । ६४

Having divided the square (of the Gárhapatya) into seven parts (by lines running from the east to the west) one has to divide its breadth into three parts.

Thus the whole area af the gárhapatya is divided into twenty-one oblongs and the first layer of the chiti is consequently formed by twenty-one bricks placed in seven rows.

पूर्वापरेण सप्तधा विभागः । विभागद्वारेण करणान्युक्तानि भवन्ति । तत्र द्वात्रिंशदङ्गुल आयामः । दशतिलोनचतुर्दशाङ्गुलव्यासमेकमेव करणम् ।

अपरस्मिन्प्रस्तार उदीचीरुपदधाति । ६५

In the second layer the bricks are to be placed towards the north.

For this layer the square is divided into twenty-one parts by seven lines running from the south towards the north and by three lines running from the east towards the west. In the third and the fifth layer the bricks are placed in the same manner as in the first; in the fourth layer in the same manner as in the second

In this way the "bhedas" (see above) are avoided throughout.

उदीचीरुदगायताः । अस्मादेव व्यत्यासवचनादत्रापि भेदवर्जनं पशुधर्मत्वं चाग्रयणीयमिति सूचितं भवति ।

समचतुरस्राश्चेदुपदध्यात् । ६६

If one wishes to employ square-shaped bricks for the chiti—

[1]. C. °तप्रमाण°

[1]. A. adds on the margin (after ध्याय) तद्व्यायाम

इष्टका इति शेषः । अथ ।

व्यायामषष्ठेनेष्टकाः कारयेच्चतुर्थेन तृतीयेनेति । ६७

—Then (three kinds of) bricks are to be made, with the sixth part, the fourth part and the third part of a vyáyáma.

The sides of these bricks have the length of sixteen, twenty-four and thirty-two aṅgulis respectively.

षोडशाङ्गुलेनारत्निना द्वात्रिंशदङ्गुलेन । इतिरेवमर्थे ।

तासां नव प्रथमा द्वादश द्वितीया इति पूर्वस्मिन्प्रस्तार उपदधाति । ६८

Out of these nine of the first kind and twelve of the second kind are to be employed for the first layer.

The nine bricks of the first kind are arranged in a square in the middle of the gárhapatya, and the twelve of the second kind surround this square.

प्रथमाः प्रथमोक्ताः षोडशाङ्गुलाः । द्वितीया द्वितीयोक्ता अरत्नयः । इतिशब्दः समुच्चयार्थः । [1]अरत्निद्वयसमचतुरस्रे [2]प्रथमा उपदध्यात् । परितो द्वादशारत्नयः । एवं पशुधर्मत्वं भवति ।

पञ्च तृतीयाः षोडश प्रथमा इत्यपरस्मिन् । ६९

Five bricks of the third kind, and sixteen of the first kind are employed for the second layer.

In each corner of the gárhapatya four bricks of the first kind form a small square; the five of the third kind are arranged between the four squares in the shape of a cross.

महादिक्षु चतस्रः । मध्य एका । एवं पञ्च तृतीयाः । चतसृषु स्रक्तीषु चतस्रश्चतस्रश्चतुरस्रकृताः षोडश प्रथमाः । एवं भेदवर्जनं पशुधर्मत्वं च सिध्यति । *G. Th.*

[1]. A. inserts on the margin (before अर°) मध्ये

[2]. A. inserts on the margin (before प्रथ°) नव

A PROPHECY IN FAVOUR OF THE BRITISH GOVERNMENT.

Kalpasútra, a Jain sacred book, written A. D. 453 says that "on the night immediately preceding the new "moon, was the time of the adorable ascetic hero (Mahá-"víra) completed, his earthly career finished, the bonds "of decay and death loosed, when he entered into a "state of perfect bliss, wisdom, liberty, freedom from "care and passion, and release from all pain." "The same night, the planet *Kshudra Bhasmak*, destined to continue two thousand years, ascended the natal constellation of the Lord Mahávíra, and as long as it continues in it, there will be a great waning of piety and religious worship among male and female ascetics and religious persons; but when the planet descends from that constellation, asceticism and piety will blaze forth with new brilliance."

"जं रयणिं च णं खुद्दाए भासरासीणामं महग्गहे दोवाससहस्सठिई समणस्स० जम्मनिक्खत्तं संकंते ॥ तप्पभिइं च णं से खुद्दाए भासरासीए महग्गहे दो वास सहस्सठई समणस्स० जम्मनक्खत्तसंकंते तप्पभिइं च णं समणाणं निग्गंथाणं निग्गंथीणं यनो उदये पूयासक्कारेई पवत्तई ॥ जया णं से खुद्दाए भावज्जम्मनक्खत्ताउ विइक्कंते भविस्सइ तया णं समणाणं निग्गंथाणं निग्गंथीणाय उदिए पूयए सक्कारे भविस्सइ ॥

भगवान् महावीरो निर्वाणं प्राप्तः तस्यां रात्रौ क्षुद्रो क्रूरः भस्मराशिनामा अष्टाशीतिग्रहाणां मध्ये त्रिंशत्तमो ग्रहो यस्य एकस्मिन् राशौ द्विसहस्रवर्षाणि तिष्ठति तावत् भगवच्छासने साधु साध्वीनां उदयः पूजासत्कारश्च न भविष्यति तदा इन्द्रेण निर्वाणसमये श्रीमहावीरस्य विज्ञप्तं हेस्वामिन् घटीद्वयं आयुर्वर्द्धनीयं दुष्टो भस्मराशिग्रहः भवद्दृष्ट्या निर्बलो भवेत् तदा इन्द्रं प्रति स्वामीप्राह नेयं भूयं नेयं भव्वं नेयं भविस्सइ अनन्तबलवीर्या अपि आयुर्वर्द्धापने न केचित्समर्थाः न पूर्वे भूताः न च भवंति न चाग्रे भविष्यन्ति एतत् अवश्यं भावि अस्य आयुषो हानिर्वा वृद्धिर्वा केनापि कर्त्तुंशक्यानास्ति पुनर्यदा सद्दुष्टो भस्मग्रहो भगवतो जन्मराशेरुत्तरिष्यति ततः परं भगवतः शासने साधुसाध्वीनां उदयः पूजासत्कारश्च भविष्यति ॥

As Mahávíra died B. C. 527, the evil influence of the planet *Bhasmak*, after continuing full two thousand years, must have ceased in the year 1473 A. D., which was just about the time that Bartholomew Diaz came to the Cape of Good Hope, and led Vasco da Gama to follow him, who may be truly said to have laid the foundations of the British Empire in the East, and may be allowed to have the credit of the emancipation of the country from the clutches of the tyrants, after two thousand years of misrule, anarchy, and the "waning of piety and religious worship," at least according to the Jain sacred books. There is not the least doubt that the Jains and Buddhists have been persecuted from the beginning, *i. e.* from the days of Mahávíra and Śákya Muni Gautam; and it is only under the full toleration of the British rule that Jain "asceticism and piety" are blazing forth "with new brilliance." They have found at last their golden age, under the genial shadow of the British rule, after enduring for two thousand years, the iron age of the planet *Bhasmak*; and now, is they suffer themselves to slacken their pious zeal, they will have to blame, not the planet, but themselves.

BANARAS, *9th September*, 1875. } ŚIVAPRASAD.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

Digitized by Google

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 115. Benares, December 1st, 1875. Vol. X.

काशिकायाः

॥ चतुर्थाध्यायस्य तृतीयः पादः ॥

तस्येदम् ॥ १२० ॥

तस्येति षष्ठीसमर्थादिदमित्येतस्मिन्विषये यथाविहितं प्रत्ययो भवत्य,णादयः पञ्च महोत्सर्गाः । घादयश्च प्रत्यया यथाविहितं विधीयन्ते । प्रकृतिप्रत्ययार्थयोः षष्ठ्यर्थमात्रं तत्संबन्धिमात्रं च विवक्षितं यदपरं लिङ्गसंख्याप्रत्यक्षपरोक्षादिकं तत्सर्वमविवक्षितम् । उपगोरिदमौपगवम् । कापटवम् । राष्ट्रियम् । अवारपारीणम् । अनन्तरादिष्वनभिधानान्न भवति । देवदत्तस्यानन्तरमिति ॥ वहेस्तुरणिट् च ॥ * ॥ संवोढुः स्वं सांवहित्रम् । सिद्ध एवात्राण् इडर्थमुपसंख्यानम् ॥ अग्नीधः शरणे रण् भं च ॥ * ॥ आग्नीध्रम् ॥ समिधामाधाने षेण्यण् ॥ * ॥ सामिधेन्यो मन्त्रः । सामिधेनी ऋक् ॥

रथाद्यत् ॥ १२१ ॥

रथशब्दाद्यत् प्रत्ययो भवति तस्येदमित्येतस्मिन्विषये । अणोपवादः । रथस्येदं रथ्यं, चक्रं वा युगं वा ॥ रथाङ्ग एवेष्यते नान्यत्रा,नभिधानात् ॥ रथसीताहलेभ्यो यद्विधाविति तदन्तविधिरुपसंख्यायते ॥ * ॥ परमरथ्यम् । उत्तमरथ्यम् ॥

पत्त्रपूर्वादञ् ॥ १२२ ॥

पतन्ति तेनेति पत्त्रमश्वादिकं वाहनमुच्यते । तत्पूर्वाद्रथशब्दादञ् प्रत्ययो भवति तस्येदमित्येतस्मिन्विषये । पूर्वस्य यतोऽपवादः । आश्वरथं चक्रम् । औष्ट्ररथम् । गार्दभरथम् * ॥

पत्त्राध्वर्युपरिषदश्च ॥ १२३ ॥

पत्त्रं वाहनं तद्वाचिनः प्रातिपदिकादध्वर्युपरिषच्छब्दाभ्यां चाऽप्रत्ययो भवति तस्येदमित्येतस्मिन्विषये, ऽणोपवादः ॥ पत्त्राद्वाह्ये ॥ * ॥ अश्वस्येदं वहनीयमाश्वम् । औष्ट्रम् । गार्दभम् । आध्वर्यवम् । पारिषदम् ॥

हलसीराट्ठक् ॥ १२४ ॥

हलसीरशब्दाभ्यां ठक् प्रत्ययो भवति तस्येदमित्यस्मिन्विषये, ऽणोपवादः । हलस्येदं, हालिकम् । सैरिकम् ॥

द्वन्द्वाद्वुन्वैरमैथुनिकयोः ॥ १२५ ॥

द्वन्द्वसंज्ञकाद् वुन् प्रत्ययो भवति तस्येदमित्येतस्मिन्विषये, वैरमैथुनिकयोः प्रत्ययार्थविशेषणयोः । अणोपवादः । छं तु परत्वाद्बाधते । वैरे तावत् । बाभ्रव्य*शालङ्कायनिका । काकोलूकिका । मैथुनिकायाम् । अत्रिभरद्वाजिका । कुत्सकुशिकिका । विवहनमैथुनिका । वैरस्य नपुंसकत्वेप्यमी स्वभावतः स्त्रीलिङ्गाः† ॥ वैरे देवासुरादिभ्यः प्रतिषेधो वक्तव्यः ॥ * ॥ दैवासुरम् । राक्षोऽसुरं वैरम् ॥

गोत्रचरणाद्वुञ् ॥ १२६ ॥

गोत्रवाचिभ्यश्चरणवाचिभ्यश्च प्रातिपदिकेभ्यो वुञ् प्रत्ययो भवति तस्येदमित्येतस्मिन्विषये, ऽणोपवादः । छं तु परत्वाद्बाधते । गोत्रात्तावत् । ग्लौचुकायनकम् । औपगवकम् ॥ चरणाद्धर्माम्नाययोरिष्यते ॥ काठकं, कालापकम् । मौदकम् । पैप्पलादकम् ॥

---

* गार्दभरथमित्यस्याग्रे 'शालभरथम् । छं परत्वाद्बाधते' इत्यधिकमेकस्मिन्पुस्तके ।

* बाभ्रवेति पा० २ ।

† वैरस्येत्यारभ्य स्त्रीलिङ्गा इत्यन्तं क्व चिन्न दृश्यते ।

Digitized by Google

संघाङ्कलक्षणेष्वञ्यञिञामण् ॥ १२७ ॥

संघादिषु प्रत्ययार्थविशेषणेष्वञन्तात् यञन्तात् इञन्ताच्च प्रातिपदिकादण् प्रत्ययो भवति तस्येदमित्येतस्मिन्विषये। पूर्वस्य वुञो ऽपवादः ॥ घोषग्रहणमत्र कर्त्तव्यम् ॥ * ॥ तेन वैषम्याद्यथासंख्यं न भवति । अञन्तात् । बैदः संघः । बैदोऽङ्कः । बैदं लक्षणं, बैदो घोषः । यञन्तात् । गार्गः संघः । गार्गोऽङ्कः । गार्गं लक्षणम् । गार्गो घोषः । इञन्तात् । दाक्षः संघः । दाक्षोऽङ्कः । दाक्षं लक्षणम् । दाक्षो घोषः । अङ्कलक्षणयोः को विशेषः । लक्षणं लक्ष्यभूतस्यैव चिह्नभूतं स्वं यथा विद्या बिदानाम्, अङ्कस्तु गवादिस्थोऽपि गवादीनां स्वं न भवति । णित्करणं ङीबर्थं पुंवद्भावप्रतिषेधार्थं च । बैदी विद्या ऽस्य, बैदीविद्यः ॥

शाकलाद्वा ॥ १२८ ॥

शाकलशब्दात्संघादिषु प्रत्ययार्थविशेषणेषु वाण्प्रत्ययो भवति तस्येदमित्येतस्मिन्विषये । वुञोऽपवादः । शाकलेन प्रोक्तमधीयते, शाकलाः । तेषां संघः, शाकलः । शाकलकः । शाकलो ऽङ्कः । शाकलकोऽङ्कः । शाकलं लक्षणम् । शाकलकं लक्षणम् । शाकलो घोषः । शाकलको घोषः ।

छन्दोगौक्थिकयाज्ञिकबह्वृचनटाञ्ञ्यः ॥ १२९ ॥

संघादयो निवृत्ताः, सामान्येन विधानम् । छन्दोगादिभ्यः शब्देभ्यो ञ्यः प्रत्ययो भवति तस्येदमित्येतस्मिन्विषये । वुञणोरपवादः । चरणाद्धर्माम्नाययोस्तत्साहचर्यान्नटशब्दादपि धर्माम्नाययोरेव भवति । छन्दोगानां धर्मो वा ऽऽम्नायो वा छान्दोग्यम् । औक्थिक्यम् । याज्ञिक्यम् । बाह्वृच्यम् । नाट्यम् । अन्यत्र छान्दोगं कुलमित्यादि ॥

न दण्डमाणवान्तेवासिषु ॥ १३० ॥

दण्डप्रधाना माणवा दण्डमाणवाः, अन्तेवासिनः शिष्याः, तेष्वभिधेयेषु वुञ् प्रत्ययो न भवति । गोत्रग्रहणमिहानुवर्त्तते तेन वुञ्प्रतिषेधो विज्ञायते । गौक्षाः दण्डमाणवा अन्तेवासिनो वा । दाक्षाः । माहकाः ।

रैवतिकादिभ्यश्छः ॥ १३१ ॥

रैवतिकादिभ्यश्छः प्रत्ययो भवति तस्येदमित्येतस्मिन्विषये । गोत्रप्रत्ययान्ता एते, ततः पूर्वेण वुञि प्राप्ते छविधानार्थं वचनम् । रैवतिकीयः । स्वापिशीयः । रैवतिक । स्वापिशि । क्षैमवृद्धि । गौरग्रीवि । औदमेयि । औदवाहि । बैजवापि ॥

कौपिञ्जलहास्तिपदादण् ॥ १३२ ॥

कौपिञ्जलहास्तिपदशब्दाभ्यामण् प्रत्ययो भवति तस्येदमित्येतस्मिन्विषये । गोत्रवुञोऽपवादः । गोत्राधिकारात् । कौपिञ्जलः । हास्तिपदः ॥

आथर्वणिकस्येकलोपश्च ॥ १३३ ॥

अणित्येव । आथर्वणिकशब्दादण् प्रत्ययो भवति तत्सन्नियोगेन चेकलोपः, तस्येदमित्येतस्मिन्विषये । चरणाद्वुञोऽपवादः । आथर्वणिकस्यायमाथर्वणो धर्म आम्नायो वा । चरणाद्धर्माम्नाययोः ॥

तस्य विकारः ॥ १३४ ॥

तस्येति षष्ठीसमर्थाद्विकार इत्येतस्मिन्विषये यथाविहितं प्रत्ययो भवति । प्रकृतेरवस्थान्तरं विकारः । किमिहोदाहरणम्, अप्राण्याद्युदात्तमवृद्धं यस्य च नान्यत्र प्रतिपदं ग्रहणम् । अश्मनो विकारः, आश्मनः । आश्मः । अश्मनो विकार इति टिलोपः पाक्षिकः । भास्मनः । मार्त्तिकः । नित्स्वरेणाद्युदात्ता एते । तस्यप्रकरणे तस्येति पुनर्वचनं शैषिकनिवृत्त्यर्थम् । विकारावयवयोर्घादयो न भवन्ति । हालः । सैरः ।

अवयवे च प्राण्योषधिवृक्षेभ्यः ॥ १३५ ॥

प्राण्योषधिवृक्षवाचिभ्यः शब्देभ्यः षष्ठीसमर्थेभ्यो ऽवयवे यथाविहितं प्रत्ययो भवति, चकाराद्विकारे च । तत्र प्राणिभ्यो ऽञं वक्ष्यति । कपोतस्य विकारो ऽवयवो वा, कापोतः । मायूरः । तैत्तिरः । ओषधिभ्यः । मौर्वं काण्डं, मौर्वं भस्म । वृक्षेभ्यः । कारीरं काण्डं, कारीरं भस्म । इत उत्तरे प्रत्ययाः प्राण्योषधिवृक्षेभ्यो विकारावयवयोर्भवन्ति * । अन्येभ्यस्तु विकारमात्रे । कथं द्वयमप्यधिक्रियते तस्य विकारः, अवयवे च प्राण्योषधिवृक्षेभ्य इति । विकारावयवयोर्युगपदधिकारो ऽपवादविधानार्थः । कृतनिर्देशौ हि तौ ॥

बिल्वादिभ्यो ऽण् ॥ १३६ ॥

बिल्व इत्येवमादिभ्यो ऽण् प्रत्ययो भवति विकारावयवयोरर्थयोः । यथायोगमञ्मयटोरपवादः । बिल्वस्यावयवो विकारो वा, बैल्वः । गवेधुकाशब्दोऽत्र पठ्यते, ततः कोपधादेव सिद्धे मयड्बाधनार्थं ग्रहणम् । बिल्व । व्रीहि । काण्ड । मुद्ग । मसूर । गोधूम । इक्षु । वेणु । गवेधुका । कर्पासी । पाटली । कर्कन्धू । कुटीर । बिल्वादिः ।

कोपधाच्च ॥ १३७ ॥

ककारोपधात्प्रातिपदिकादण् प्रत्ययो भवति यथायोगं विकारावयवयोरर्थयोः । अञोऽपवादः । तर्कु । तार्कवम् । तित्तिडीक । तैत्तिडीकम् । माण्डूकम् । दार्दुरूकम् । माधूकम् ॥

* भवन्तीत्यस्याग्रे 'वृक्षशब्देन वनस्पतयो ऽपि गृह्यन्ते । न्यग्रोधस्य विकारो ऽवयवो वा, नैयग्रोधः । पैप्पलः । औदुम्बरः । ओषधिशब्दाल्लतादयो ऽपि गृह्यन्ते । ताम्बूल्या विकारो ऽवयवो वा, ताम्बूलः । गान्डूचः । एभ्यो विकारावयवयोर्भवन्ति' इत्यधिकमेकस्मिन्पुस्तके ।

Digitized by Google

त्रपुजतुनोः षुक् ॥ १३८ ॥

त्रपुजतुशब्दाभ्यामण् प्रत्ययो भवति विकारे, तत्सन्नियोगेन तयोः षुगागमो भवति । ओरञोऽपवादः । त्रपुणो विकारः, त्रापुषम् । जातुषम् । अप्राण्यादित्वाच्चावयवे ॥

ओरञ् ॥ १३९ ॥

उवर्णान्तात्प्रातिपदिकादञ् प्रत्ययो भवति विकारावयवयोरर्थयो,रणोऽपवादः । अनुदात्तादेरन्यदिहोदाहरणम् । दैवदारवम् । भाद्रदारवम् ॥

अनुदात्तादेश्च ॥ १४० ॥

अनुदात्तादेः प्रातिपदिकादञ् प्रत्ययो भवति विकारावयवयोरर्थयो,रणोऽपवादः । दाधित्थम् । कापित्थम् । माहित्थम् ॥

पलाशादिभ्यो वा ॥ १४१ ॥

पलाशादिभ्यः प्रातिपदिकेभ्यो वा ऽञ् प्रत्ययो भवति विकारावयवयोरर्थयोः । पालाशम् । खादिरम् । यवासम् । उभयत्र विभाषेयम् । पलाशखादिरशिंशपास्यन्दनानामनुदात्तादित्वात्प्राप्ते ऽन्येषामप्राप्ते । पलाश । खदिर । शिंशपा । स्यन्दन । करीर । शिरीष । यवास । विकङ्कत । पलाशादिः ॥

शम्याष्ट्लञ् ॥ १४२ ॥

शमीशब्दाट् ट्लञ् प्रत्ययो भवति विकारावयवयोरर्थयोः । अञोऽपवादः । शामीलं भस्म । शामीली स्रुक् ॥

मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः ॥ १४३ ॥

प्रकृतिमात्राद्वा मयट् प्रत्ययो भवति भक्ष्याच्छादनवर्जितयोर्विकारावयवयोरर्थयोर्भाषायां विषये यथायथं प्रत्ययेषु प्राप्तेषु । अश्ममयम् । आश्मनम् । मूर्वामयं, मौर्वम् । भाषायामिति किम् । बैल्वः खादिरो वा यूपः स्यात् । अभक्ष्याच्छादनयोरिति किम् । मौद्गः सूपः । कार्पासमाच्छादनम् । एतयोरित्यनेन किम् । यावता विकारावयवौ प्रकृतावेव ये विशेषप्रत्ययाः प्राणिरजतादिभ्योऽञित्येवमादयस्तद्विषयेऽपि यथा स्यात् । कपोतमयम् । कापोतम् । लोहमयम् । लौहमिति ॥

नित्यं वृद्धशरादिभ्यः ॥ १४४ ॥

भाषायामभक्ष्याच्छादनयोरित्येव । वृद्धेभ्यः प्रातिपदिकेभ्यः शरादिभ्यश्चाभक्ष्याच्छादनयोर्विकारावयवयोर्भाषायां विषये नित्यं मयट् प्रत्ययो भवति । वृद्धेभ्यस्तावत् । आम्रमयम् । शालमयम् । शाकमयम् । शरादिभ्यः । शरमयम् । दर्भमयम् । मृन्मयम् । नित्यग्रहणं किम् । यावता ऽऽरम्भसामर्थ्यादेव नित्यं भविष्यति । एकाचो नित्यं मयटमिच्छन्ति, तदनेन क्रियते । त्वङ्मयम् । स्रङ्मयम् । वाङ्मयमिति । शर । दर्भ । मृत् । कुटी । तृण । सोम । बल्वज ॥

गोश्च पुरीषे ॥ १४५ ॥

गोशब्दात्पुरीषे ऽभिधेये मयट् प्रत्ययो भवति । गोमयम् । पुरीष इति किम् । गव्यं पयः । पुरीषं न विकारो न चावयवस्तस्येदंविषये विधानम् । विकारावयवयोस्तु गोपयसोर्यदिति वक्ष्यति ॥

पिष्टाच्च ॥ १४६ ॥

पिष्टशब्दान्नित्यं मयट् प्रत्ययो भवति तस्य विकार इत्येतस्मिन्विषये, ऽणोऽपवादः । पिष्टमयं भस्म ॥

संज्ञायां कन् ॥ १४७ ॥

पिष्टशब्दात्कन् प्रत्ययो भवति विकारे संज्ञायां विषये । मयटोऽपवादः । पिष्टकः ॥

व्रीहेः पुरोडाशे ॥ १४८ ॥

व्रीहिशब्दान्मयट् प्रत्ययो भवति पुरोडाशे विकारे । बिल्वाद्यणोऽपवादः । व्रीहिमयः पुरोडाशः । व्रैहमन्यत् ॥

असंज्ञायां तिलयवाभ्याम् ॥ १४९ ॥

तिलयवशब्दाभ्यामसंज्ञाविषये मयट् प्रत्ययो भवति विकारावयवयोरर्थयोः । तिलमयम् । यवमयम् । असंज्ञायामिति किम् । तैलम् । यावकः । यावादिभ्यः कन् ॥

द्व्यचश्छन्दसि ॥ १५० ॥

द्व्यचः प्रातिपदिकाच् छन्दसि विषये मयट् प्रत्ययो भवति विकारावयवयोरर्थयोः । भाषायां मयडुक्तः छन्दस्यप्राप्तो विधीयते । यस्य पर्णमयी जुहूर्भवति । दर्भमयं वासो भवति । शरमयं बर्हिर्भवति ॥

नोत्वद्वर्ध्रबिल्वात् ॥ १५१ ॥

उत्वतः प्रातिपदिकाद्वर्ध्रबिल्वशब्दाभ्यां च मयट् प्रत्ययो न भवति । द्व्यचश्छन्दसीति प्राप्तः प्रतिषिध्यते । मौञ्जं शिक्यम् । गार्मुतं चरुम् । वार्ध्री बालप्रग्रथिता भवति । बैल्वो ब्रह्मवर्चसकामेन कार्यः । तपरकरणं तत्कालार्थम् । धूममयान्यभ्राणि । मतुब्निर्देशस्तदन्तविधिनिरासार्थः । इहैव स्यात् । वैणवी यष्टिरिति ॥

तालादिभ्योऽण् ॥ १५२ ॥

तालादिभ्यः प्रातिपदिकेभ्यो ऽण् प्रत्ययो भवति विकारावयवयोरर्थयोः । मयडादीनामपवादः । तालं धनुः । बार्हिणम् । ऐन्द्रालिशम् ॥ तालाद्धनुषि * ॥ बार्हिण । इन्द्रा-

---

* तालाद्धनुषीत्यस्याग्रे तालमयमन्यत् । नित्यं वृद्धेति मयट् । इत्यधिकमेकस्मिन्पुस्तके ।

लिश । इन्द्रादृश । इन्द्रायुध । चाप * । श्यामाक । पीयुक्षा । तालादिः ॥

जातरूपेभ्यः परिमाणे ॥ १५३ ॥

जातरूपं सुवर्णम् । बहुवचननिर्देशात्तद्वाचिनः सर्वे गृह्यन्ते । जातरूपवाचिभ्यः प्रातिपदिकेभ्यो ऽण् प्रत्ययो भवति परिमाणे विकारे । मयडादीनामपवादः । हाटको निष्कः । हाटकं कार्षापणम् । जातरूपम् । तापनीयम् । परिमाणइति किम् । यष्टिरियं हाटकमयी ॥

प्राणिरजतादिभ्यो ऽञ् ॥ १५४ ॥

प्राणिवाचिभ्यः प्रातिपदिकेभ्यो रजतादिभ्यश्चाञ् प्रत्ययो भवति विकारावयवयोरर्थयोः । अणादीनामपवादः । अनुदात्तादेरञ् विहित एव, परिशिष्टमिहोदाहरणम् । प्राणिभ्यस्तावत् । कापोतम् । मायूरम् । तैत्तिरम् । रजतादिभ्यः । राजतम् । सैसम् । लौहम् । रजतादिषु ये ऽनुदात्तादयः पठ्यन्ते रजतकण्टकारप्रभृतयस्तेभ्योऽञि सिद्धे पुनर्वचनं मयड्बाधनार्थम् । रजत । सीस । लोह । उदुम्बर । नीच † । दारु । रोहितक । बिभीतक । कपीत । दारु । तीव्रदारु । त्रिकण्टक । कण्टकार ॥

ञितश्च तत्प्रत्ययात् ॥ १५५ ॥

अञित्येव । तदिति विकारावयवयोरर्थयोः प्रत्यवमर्शः । ञितो विकारावयवप्रत्ययस्तदन्तात्प्रातिपदिकादञ् प्रत्ययो भवति विकारावयवयोरेव ‡ । मयटोपवादः । ओरञ् । शम्याष्ट्लञ् । प्राणिरजतादिभ्योञ् । उष्ट्राद्वुञ् । एण्या ढञ् । कंसीयपरशव्ययोर्यञञौ । इत्येते प्रत्यया गृह्यन्ते । दैवदारवस्य विकारो ऽवयवो वा, दैवदारवम् । दाधित्थस्य, दाधित्थम् । पालाशस्य, पालाशम् । शामीलस्य, शामीलम् । कापोतम् । औष्ट्रकस्य, औष्ट्रकम् । ऐणेयस्य, ऐणेयम् । कांस्यस्य, कांस्यम् । पारशवस्य, पारशवम् । ञित इति किम् । बैल्वमयम् । तत्प्रत्ययादिति किम् । बैदमयम् ॥

क्रीतवत्परिमाणात् ॥ १५६ ॥

प्राग्वतेष्ठञित्यत आरभ्य क्रीतार्थे ये प्रत्ययाः परिमाणाद्विहितास्ते विकारे ऽतिदिश्यन्ते । परिमाणात् क्रीतइव प्रत्यया भवन्ति तस्य विकार इत्येतस्मिन्विषये । अणादीनामपवादः । संख्या परिमाणग्रहणेन गृह्यते, न रूढिपरिमाणमेव । निष्केण क्रीतं, नैष्किकम् । एवं निष्कस्य विकारो, नैष्किकः । शतेन क्रीतं, शत्यं, शतिकम् । शतस्य विकारः, शत्यः, शतिकः । साहस्रः । वतिः सर्वसादृश्यार्थः । अध्यर्द्धपूर्वाद् द्विगोर्लुगसंज्ञायामित्येवमादिकमप्यतिदिश्यते । द्विसहस्रः । द्विसाहस्रः । द्विनिष्कः । द्विनैष्किकः ।

उष्ट्राद्वुञ् ॥ १५७ ॥

उष्ट्रशब्दाद्वुञ् प्रत्ययो भवति विकारावयवयोरर्थयोः । प्राण्यञोपवादः । उष्ट्रस्य विकारो ऽवयवो वा औष्ट्रकः ॥

उमोर्णयोर्वा ॥ १५८ ॥

उमाशब्दादूर्णाशब्दाच्च वा वुञ् प्रत्ययो भवति विकारावयवयोरर्थयोः । औमम् । औमकम् । और्णम् । और्णकम् ।

एण्या ढञ् ॥ १५९ ॥

एणीशब्दाद् ढञ् प्रत्ययो भवति विकारावयवयोरर्थयोः । प्राण्यञोपवादः । ऐणेयं मांसम् । पुंसस्त्वञेव भवति । एणस्य मासमैणम् * ॥

गोपयसोर्यत् ॥ १६० ॥

गोपयःशब्दाभ्यां यत् प्रत्ययो भवति विकारावयवयोरर्थयोः । गव्यम् । पयस्यम् । सर्वत्र गोरजादिप्रसङ्गे यदस्त्येव, मयड्विषये तु विधीयते ॥

द्रोश्च ॥ १६१ ॥

द्रुशब्दाद्यत्प्रत्ययो भवति विकारावयवयोरर्थयोः । ओरञोपवादः । द्रव्यम् ॥

माने वयः ॥ १६२ ॥

द्रुशब्दान्माने विकारविशेषे वयः प्रत्ययो भवति । यतोपवादः । द्रुवयम् ॥

फले लुक् ॥ १६३ ॥

विकारावयवयोरुत्पन्नस्य फले तद्विशेषे विवक्षिते लुग्भवति । आमलक्याः फल,मामलकम् । कुवलम् । बदरम् । फलितस्य वृक्षस्य फलमवयवो भवति विकारश्च । पल्लवितस्येव पल्लवः ।

प्लक्षादिभ्योण् ॥ १६४ ॥

फलइत्येव । प्लक्षादिभ्यः प्रातिपदिकेभ्यः फले विकारावयवत्वेन विवक्षिते ऽण् प्रत्ययो भवति । अञोपवादः । विधानसामर्थ्यात्तस्य न लुग्भवति । प्लाक्षम् । नैयग्रोधम् । प्लक्ष । न्यग्रोध । अश्वत्थ । इङ्गुदी । शिग्रु । कर्कन्धु † । बृहती ‡ ॥

* वर्णेति पा० २ ।

† नीचेति पा० २ ।

‡ विकारावयवयोरित्येवेति पा० २ ।

* एणस्य मांसमैणमित्यस्याग्रे 'कोशाड्ढञ् वक्तव्यः ॥ * ॥ कौशेयं वासः सूत्रं च । इत्यधिकमेकस्मिन्पुस्तके ।

† अरुकतु । पा०२ द्वितीयपुस्तके कर्कन्तु । पा०३

‡ कच्च । तुरुक । इत्यधिकं कुत्र चित् ।

Digitized by Google

जम्ब्वा वा ॥ १६५ ॥

फलइत्येव । जम्बूशब्दात्फले ऽभिधेये वा ऽण् प्रत्ययो भवति । अञोपवादः । अत्राणो विधानसामर्थ्याल्लुग्न भवति । अञस्तु भवत्येव । जाम्बवानि फलानि । जम्बूनि वा ॥

लुप् च ॥ १६६ ॥

वेत्येव । जम्ब्वाः फलेभिधेये प्रत्ययस्य वा लुब्भवति । युक्तवद्भावे विशेषः । जम्ब्वाः फलं, जम्बूः फलम् । जम्बु फलम् । जाम्बवमिति वा ॥ लुप्प्रकरणे फलपाकशुषामुपसंख्यानम् ॥ * ॥ व्रीहयः । यवाः । माषाः । मुद्गाः । तिलाः ॥ पुष्पमूलेषु बहुलम् ॥ * ॥ मल्लिकायाः पुष्पं, मल्लिका । नवमल्लिका * जातिः । विदार्याः मूलं, विदारी । अंशुमती । बृहती । न च भवति पाटलानि पुष्पाणि, शाल्वानि मूलानि । बहुलवचनात्क्वचिदन्यदपि भवति । कदम्बं पुष्पम् । अशोकम् । करवीरम् । बैल्वानि फलानीति ॥

हरीतक्यादिभ्यश्च ॥ १६७ ॥

हरीतकी इत्येवमादिभ्यः शब्देभ्यः फले प्रत्ययस्य लुब् भवति । लुकि प्राप्ते लुपो विधाने युक्तवद्भावे स्त्रीप्रत्ययश्रवणं च विशेषः । हरीतक्याः फलं हरीतकी । कोशातकी । नखरजनी । अत्र च व्यक्तिर्युक्तवद्भावेनेष्यते, वचनं त्वभिधेयवदेव भवति । हरीतक्याः फलानि, हरीतक्यः । हरीतकी । कोशातकी । नखरजनी † । शष्कण्डी ‡ । दाडी । दोडी । टडी । श्वेतपाकी । अर्जुनपाकी । काला । द्राक्षा । ध्वाङ्क्षा । गर्गरिका । कण्टकारिका । शेफालिका § ॥

कंसीयपरशव्ययोर्यञञौ लुक् च ॥ १६८ ॥

प्राक्क्रीताच्छेन कंसीयः । उगवादिभ्यो यत् । परशव्यः । कंसीयपरशव्यशब्दाभ्यां यथासंख्यं यञञौ प्रत्ययौ भवतस्तस्य विकार इत्येतस्मिन्विषये, तत्संनियोगेन च कंसीयपरशव्ययोर्लुग्भवति । कंसीयस्य विकारः, कांस्यः । परशव्यस्य विकारः, पारशवः । प्रातिपदिकाधिकाराद्धातुप्रत्ययस्य न लुग्भवति । परशव्यशब्दादनुदात्तादित्वादेवाञि सिद्धे लुगर्थं वचनम् । ननु च यस्येति लोपे कृते हलस्तद्धितस्येति यलोपो भविष्यति । नैतदस्ति । ईतीति तत्र वर्त्तते ॥

इति श्रीजयादित्यविरचितायां काशिकायां वृत्तौ चतुर्थाध्यायस्य तृतीयः पादः ॥

* नवमालिका पा० २ ।

† नखररजनी । पा० २ ।

‡ शाकपडी । पा० २ ।

§ शेफालिकेत्यस्याग्रे 'येषां च फलपाकनिमित्तः शोषः ॥ पुष्पमूलेषु बहुलम्' ॥ इत्यधिकं बहुषु पुस्तकेषु ।

काशिकायाः

॥ चतुर्थाध्यायस्य चतुर्थः पादः ॥

प्राग्वहतेष्ठक् ॥ १ ॥

तद्वहति रथयुगप्रासङ्गमिति वक्ष्यति । प्रागेतस्माद्वहतिसंशब्दनाद्यानर्थाननुक्रमिष्यामः, ठक् प्रत्ययस्तेष्वधिकृतो वेदितव्यः । वक्ष्यति । तेन दीव्यति खनति जयति जितमिति । अक्षैर्दीव्यति आक्षिकः ॥ ठक्प्रकरणे तदाहेति माशब्दादिभ्य उपसंख्यानम् ॥ * ॥ माशब्द इत्याह माशब्दिकः । नैत्यशब्दिकः । कार्यशब्दिकः । वाक्यादेतत्प्रत्ययविधानम् ॥ आहौ प्रभूतादिभ्यः ॥ * ॥ प्रभूतमाह, प्राभूतिकः । पार्याप्तिकः । क्रियाविशेषणात्प्रत्ययः ॥ पृच्छतौ सुस्नातादिभ्यः ॥ * ॥ सुस्नातं पृच्छति सौस्नातिकः । सौखरात्रिकः । सौखशायनिकः ॥ गच्छतौ परदारादिभ्यः ॥ * ॥ परदारान् गच्छति पारदारिकः । गौरुतल्पिकः ॥

तेन दीव्यति खनति जयति जितम् ॥ २ ॥

तेनेति तृतीयासमर्थाद् दीव्यति खनति जयति जितमित्येतेष्वर्थेषु ठक् प्रत्ययो भवति । अक्षैर्दीव्यति, आक्षिकः । शालाकिकः । अभ्र्या खनति, आभ्रिकः । कौद्दालिकः । अक्षैर्जयति, आक्षिकः । अक्षैर्जितमाक्षिकम् । शालाकिकम् । सर्वत्र करणे तृतीया समर्थविभक्तिः । देवदत्तेन जितमिति प्रत्ययो न भवति, अनभिधानात् । अङ्गुल्या खनतीति च । प्रत्ययार्थे संख्याकालयोरेव विवक्षा । क्रियाप्रधानत्वेपि चाख्यातस्य तद्धितः स्वभावात्साधनप्रधानः ॥

संस्कृतम् ॥ ३ ॥

तेनेति तृतीयासमर्थात्संस्कृतमित्येतस्मिन्नर्थे ठक् प्रत्ययो भवति । सत उत्कर्षाधानं संस्कारः । दध्ना संस्कृतं, दाधिकम् । शार्ङ्गवेरिकम् । मारिचिकम् । योगविभाग उत्तरार्थः ॥

कुलत्थकोपधादण् ॥ ४ ॥

कुलत्थशब्दात्ककारोपधाच्छब्दाच्च प्रातिपदिकादण् प्रत्ययो भवति संस्कृतमित्येतस्मिन्विषये । ठकोपवादः । कुलत्थैः संस्कृतं, कौलत्थम् । ककारोपधात् । तैत्तिडीकम् * । दार्दभकम् ॥

तरति ॥ ५ ॥

तेनेति तृतीयासमर्थात्तरतीत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति । तरति प्लवत इत्यर्थः । काण्डप्लवेन तरति, काण्डप्लविकः । औडुपिकः ॥

* तैत्तिरीकम् । पा० २

Digitized by Google

गोपुच्छाट्ठञ् ॥ ६ ॥

गोपुच्छशब्दाट् ठञ्प्रत्ययो भवति तरतीत्येतस्मिन्नर्थे। ठकोपवादः। स्वरे विशेषः। गौपुच्छिकः॥

नौद्व्यचष्ठन् ॥ ७ ॥

नौशब्दाद् द्व्यचश्च प्रातिपदिकाट् ठन् प्रत्ययो भवति तरतीत्येतस्मिन्नर्थे। ठकोपवादः। नावा तरति, नाविकः। द्व्यचः खल्वपि। घटिकः। प्लविकः। बाहुकः। षकारः सांहितिको नानुबन्धः। बाहुका स्त्री॥

आकर्षात्पर्पादेर्भस्त्रादिभ्यः कुसीदसूत्राच्च।
आवसथात्किसरादेः षितः षडेते ठगधिकारे॥
विधिवाक्यापेक्षं च षट्त्वं प्रत्ययास्तु सप्त॥

चरति ॥ ८ ॥

तेनेति तृतीयासमर्थाच्चरतीत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति। चरतिर्भक्षणे गतौ च वर्त्तते। दध्ना चरति, दाधिकः। हास्तिकः। शाकटिकः॥

आकर्षात्ष्ठल् ॥ ९ ॥

आकर्षशब्दात् ष्ठल् प्रत्ययो भवति चरतीत्येतस्मिन्नर्थे। ठकोपवादः। लकारः स्वरार्थः। षकारो ङीषर्थः। आकर्षेण चरति, आकर्षिकः। आकर्षिकी। आकर्ष इति सुवर्णपरीक्षार्थो निकषोपल उच्यते॥

पर्पादिभ्यः ष्ठन् ॥ १० ॥

पर्प इत्येवमादिभ्यः ष्ठन् प्रत्ययो भवति चरतीत्येतस्मिन्नर्थे। ठकोपवादः। नकारः स्वरार्थः। षकारो ङीषर्थः। पर्पिकः। पर्पिकी। अश्विकः। अश्विकी। पर्प। अश्व। अश्वत्थ। रथ। जाल। न्यास। व्याल॥ पादः पच्च॥ पदिकः॥

श्वगणाट्ठञ्च ॥ ११ ॥

श्वगणशब्दाट्ठञ् प्रत्ययो भवति, चकारात् ष्ठन्, चरतीत्येतस्मिन्नर्थे। ठकोपवादः। श्वगणेन चरति, श्वागणिकः। श्वागणिकी। ठन्। श्वगणिकः। श्वगणिका। श्वादेरिञीत्यत्र वक्ष्यति, इकारादिग्रहणं च कर्त्तव्यं श्वागणिकाद्यर्थमिति। तेन ठञि द्वाराद्दिकार्यं न भवति॥

वेतनादिभ्यो जीवति ॥ १२ ॥

तेनेति तृतीयासमर्थेभ्यो वेतनादिभ्यः शब्देभ्यो जीवतीत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति। वेतनेन जीवति वैतनिकः कर्मकरः। धनुर्दण्डग्रहणमच संघातविगृहीतार्थम्। धानुर्दण्डिकः। धानुष्कः। दाण्डिकः। वेतन। वाह। अर्द्धवाह। धनुर्दण्ड। जाल। वेस। उपवेस। प्रेषण। उपस्ति। सुख। शय्या। शक्ति। उपनिषत्। उपवेष। स्रक्। पाद। उपस्थान॥

वस्नक्रयविक्रयाट्ठन् ॥ १३ ॥

वस्नक्रयविक्रयशब्दाभ्यां तृतीयासमर्थाभ्यां ठन् प्रत्ययो भवति जीवतीत्येतस्मिन्विषये। ठकोपवादः। वस्नेन जीवति, वस्निकः। क्रयविक्रयग्रहणं संघातविगृहीतार्थम्। क्रयविक्रयिकः। क्रयिकः। विक्रयिकः॥

आयुधाच्छ च ॥ १४ ॥

आयुधशब्दाच्छप्रत्ययो भवति, चकाराट्ठंश्च जीवतीत्येतस्मिन्विषये। आयुधेन जीवति, आयुधीयः। आयुधिकः॥

हरत्युत्सङ्गादिभ्यः ॥ १५ ॥

तेनेत्येव। उत्सङ्गादिभ्यस्तृतीयासमर्थेभ्यो हरतीत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति। हरतिर्देशान्तरप्रापणे वर्त्तते। उत्सङ्गेन हरति, औत्सङ्गिकः। औडुपिकः। उत्सङ्ग। उडुप। उत्पत। पिटक। उत्सङ्गादिः *॥

भस्त्रादिभ्यः ष्ठन् ॥ १६ ॥

भस्त्रेत्येवमादिभ्यस्तृतीयासमर्थेभ्यो हरतीत्येतस्मिन्नर्थे ष्ठन्प्रत्ययो भवति। भस्त्रया हरति, भस्त्रिकः। भस्त्रिकी। भरटिकः। भरटिकी। भस्त्रा। भरट। भरण†। शीर्षभार। शीर्षेभार। अंसभार। अंसेभार॥

विभाषा विवधवीवधात् ॥ १७ ॥

हरतीत्येव। विवधवीवधशब्दाभ्यां तृतीयासमर्थाभ्यां विभाषा ष्ठन् प्रत्ययो भवति। तेन मुक्ते प्रकृतष्ठग्भवति। विवधेन हरति, विवधिकः। विवधिकी। वीवधिकः। वीवधिकी। ठक् खल्वपि। वैवधिकः। वैवधिकी। विवधवीवधशब्दौ समानार्थौ पथि पर्य्याहारे च वर्त्तते॥

अण्कुटिलिकायाः ॥ १८ ॥

हरतीत्येव। कुटिलिकाशब्दात्तृतीयासमर्थादण् प्रत्ययो भवति हरतीत्येतस्मिन्नर्थे। कुटिलिकया हरति मृगो व्याधं, कौटिलिको मृगः। कुटिलिकया हरत्यङ्गारान्, कौटिलिकः कर्मारः। कुटिलिका वक्रगतिः कर्माराणामायुधकर्षणी लोहमयी यष्टिरुच्यते॥

निर्वृत्ते ऽक्षद्यूतादिभ्यः ॥ १९ ॥

तेनेत्येव। अक्षद्यूतादिभ्यस्तृतीयासमर्थेभ्यो निर्वृत्तइत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति। अक्षद्यूतेन निर्वृत्तम्, आक्षद्यूतिकं वैरम्। जानुप्रहृतिकम्। अक्षद्यूत। जानुप्रहृत। जङ्घाप्रहृत। पादस्वेदन। कण्टकमर्द्दन। गतागत। यातोपयात। अनुगत॥

---

* उडुप। पिटाक। एतौ शब्दावत्र पुस्तकान्तरे ऽधिकौ।

† भरण। पा० २।

च्वेर्मम्नित्यम् ॥ २० ॥

निर्वृत्तइत्येव ड्वितः क्त्रिरित्ययं त्रिशब्दो गृह्यते। अयन्तान्नित्यं मप् प्रत्ययो भवति तेन निर्वृत्तइत्येतस्मिन्नर्थे। डुपचष् पाके। पाक्त्रिमम्। डुवप्। उप्त्रिमम्। डुकृञ्। कृत्रिमम्। नित्यग्रहणं स्वातन्त्र्यनिवृत्त्यर्थम्। तेन अयन्तं नित्यं मप्रत्ययान्तमेव भवति। विग्रहान्तरे न प्रयोक्तव्यमिति॥ भावप्रत्ययान्तादिमब्वक्तव्यः॥ * ॥ पाकेन निर्वृत्तं, पाकिमम्। त्यागिमम्। सेकिमम्। कुट्टिमम्॥

अपमित्ययाचिताभ्यां कक्कनौ ॥ २१ ॥

निर्वृत्तइत्येव। अपमित्ययाचितशब्दाभ्यां यथासंख्यं कक् कन् इत्येतौ प्रत्ययौ भवतो निर्वृत्तइत्येतस्मिन्नर्थे। आपमित्यकम्। याचितकम्॥

संसृष्टे ॥ २२ ॥

तेनेत्येव। तृतीयासमर्थात्संसृष्टइत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति। संसृष्टमेकीभूतमभिन्नमित्यर्थः। दध्ना संसृष्टं, दाधिकम्। मारिचिकम्। शार्ङ्गवेरिकम्। पैप्पलिकम्॥

चूर्णादिनिः ॥ २३ ॥

चूर्णशब्दादिनिः प्रत्ययो भवति संसृष्टे। ठकोऽपवादः। चूर्णैः संसृष्टाश्चूर्णिनोऽपूपाः। चूर्णिनो धानाः॥

लवणाल्लुक् ॥ २४ ॥

संसृष्टइत्यनेनोत्पन्नस्य ठको लवणशब्दाल्लुग्भवति। लवणः सूपः। लवणं शाकम्। लवणा यवागूः। द्रव्यवाची लवणशब्दो लुकं प्रयोजयति न गुणवाची॥

मुद्गादण् ॥ २५ ॥

मुद्गशब्दादण् प्रत्ययो भवति संसृष्टइत्येतस्मिन्विषये। ठकोऽपवादः। मौद्ग ओदनः। मौद्गी यवागूः॥

व्यञ्जनैरुपसिक्ते ॥ २६ ॥

तेनेत्येव। व्यञ्जनवाचिभ्यः प्रातिपदिकेभ्यस्तृतीयासमर्थेभ्य उपसिक्तइत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति। दध्ना उपसिक्तं दाधिकम्। सौपिकम्। घार्तिकम्। व्यञ्जनैरिति किम्। उदकेनोपसिक्त ओदनः॥

ओजःसहोम्भसा वर्तते ॥ २७ ॥

ओजस् सहस् अम्भस् इत्येतेभ्यस्तृतीयासमर्थेभ्यो वर्ततइत्यर्थे ठक् प्रत्ययो भवति। ओजसा वर्तते, औजसिकः शूरः। साहसिकश्चौरः। आम्भसिको मत्स्यः॥

तत्प्रत्यनुपूर्वमीपलोमकूलम् ॥ २८ ॥

तदिति द्वितीया समर्थविभक्तिः। प्रति अनु इत्येवंपूर्वेभ्य ईपलोमकूलशब्देभ्यो द्वितीयासमर्थेभ्यो वर्ततइत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति। ननु च वृतिरकर्मकः, तस्य कथं कर्मणा संबन्धः, क्रियाविशेषणमकर्मकाणामपि कर्म भवति। प्रतीपं वर्तते, प्रातीपिकः। आन्वीपिकः। प्रातिलोमिकः। आनुलोमिकः। प्रातिकूलिकः। आनुकूलिकः॥

परिमुखं च ॥ २९ ॥

परिमुखशब्दाद् द्वितीयासमर्थाद्वर्ततइत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति। परिमुखं वर्तते, पारिमुखिकः। चकारोऽनुक्तसमुच्चयार्थः। पारिपार्श्विकः॥

प्रयच्छति गर्ह्यम् ॥ ३० ॥

तदिति द्वितीयासमर्थात्प्रयच्छतीत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति, यत्तद्द्वितीयासमर्थं गर्ह्यं चेत्तद्भवति। द्विगुणार्थं द्विगुणं, तादर्थ्यात्ताच्छब्द्यम्। द्विगुणं प्रयच्छति, द्वैगुणिकः। त्रैगुणिकः॥ वृद्धेर्वृधुषिभावो वक्तव्यः॥ * ॥ वार्धुषिकः। प्रकृत्यन्तरं वा वृद्धिपर्यायो वृधुषिशब्दः। गर्ह्यमिति किम्। द्विगुणं प्रयच्छत्यधमर्णः॥

कुसीददशैकादशात् ष्ठन्ष्ठचौ ॥ ३१ ॥

प्रयच्छति गर्ह्यमित्येव। कुसीदं वृद्धिः, तदर्थं द्रव्यं कुसीदम्। एकादशार्था दश दशैकादशशब्देनोच्यन्ते। कुसीददशैकादशशब्दाभ्यां यथासंख्यं ष्ठन् ष्ठच् इत्येतौ प्रत्ययौ भवतः प्रयच्छति गर्ह्यमित्यस्मिन्विषये। ठकोऽपवादौ। कुसीदं प्रयच्छति कुसीदिकः। कुसीदिकी। दशैकादशिकः। दशैकादशिकी॥

उञ्छति ॥ ३२ ॥

तदिति द्वितीयासमर्थादुञ्छतीत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति। बदराण्युञ्छति, बादरिकः। श्यामाकिकः। भूमौ पतितस्यैकैकस्य कणस्योपादानमुञ्छः। कणानुञ्छति, काणिकः * ॥

रक्षति ॥ ३३ ॥

तदिति द्वितीयासमर्थाद्रक्षतीत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति। समाजं रक्षति, सामाजिकः। सांनिवेशिकः॥

शब्ददर्दुरं करोति ॥ ३४ ॥

तदिति द्वितीयासमर्थाभ्यां शब्ददर्दुरशब्दाभ्यां करोतीत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति। शब्दं करोति, शाब्दिको वैयाकरणः। दार्दुरिकः कुम्भकारः॥

पक्षिमत्स्यमृगान्हन्ति ॥ ३५ ॥

तदित्येव। पक्ष्यादिभ्यो द्वितीयासमर्थेभ्यो हन्तीत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति॥ स्वरूपस्य पर्यायाणां तद्विशेषाणां

* भूमावित्यारभ्य काणिक इत्यन्त बहुषु पुस्तकेषु नास्ति।

च ग्रहणमिहेष्यते ॥ पक्षिणो हन्ति, पाक्षिकः । शाकुनिकः । मायूरिकः । तैत्तिरिकः । मत्स्य । मात्स्यिकः । मैनिकः । शाफरिकः । शाकुलिकः । मृग । मार्गिकः । हारिणिकः । सौकरिकः । सारङ्गिकः ॥

परिपन्थं च तिष्ठति ॥ ३६ ॥

परिपन्थशब्दात्तदिति द्वितीयासमर्थात्तिष्ठतीत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति । परिपन्थं तिष्ठति, पारिपन्थिकश्चौरः । चकारो भिन्नक्रमः प्रत्ययार्थं समुच्चिनोति । परिपन्थं हन्ति, पारिपन्थिकः । समर्थविभक्तिप्रकरणे पुनर्द्वितीयोच्चारणं लौकिकवाक्यप्रदर्शनार्थम् । परिपथशब्दपर्यायः परिपन्थशब्दोस्तीति ज्ञापयति,स विषयान्तरेपि प्रयोक्तव्यः ॥

माथोत्तरपदपदव्यनुपदं धावति ॥ ३७ ॥

माथशब्दोत्तरपदात्प्रातिपदिकात्पदवी अनुपद इत्येताभ्यां च धावतीत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति । दण्डमाथं धावति, दाण्डमाथिकः । शौल्कमाथिकः । पादविकः । आनुपदिकः । माथशब्दः पथिपर्यायः ॥

आक्रन्दाट्ठञ्च ॥ ३८ ॥

आक्रन्दन्त्येतस्मिन्नित्याक्रन्दो देशः । अथ वा ऽऽक्रन्दनमित्याक्रन्द, आर्त्तायनमुच्यते । विशेषाभावाद् द्वयोरपि ग्रहणम् । आक्रन्दशब्दात्तदिति द्वितीयासमर्थाद्धावतीत्येतस्मिन्नर्थे ठञ् प्रत्ययो भवति, चकाराट्ठक्च । स्वरे विशेषः । आक्रन्दं धावति आक्रन्दिकः । आक्रन्दिकी ॥

पदोत्तरपदं गृह्णाति ॥ ३९ ॥

पदशब्द उत्तरपदं यस्य तस्मात्पदोत्तरपदशब्दात्तदिति द्वितीयासमर्थाद्गृह्णातीत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति । पूर्वपदं गृह्णाति, पौर्वपदिकः । औत्तरपदिकः । पदान्तादिति नोक्तं, बह्वच्पूर्वान्मा भूदिति ॥

प्रतिकण्ठार्थललामं च ॥ ४० ॥

प्रतिकण्ठार्थललामशब्देभ्यस्तदिति द्वितीयासमर्थेभ्यो गृह्णातीत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति । प्रतिकण्ठं गृह्णाति, प्रातिकण्ठिकः । आर्थिकः । लालामिकः ॥

धर्मं चरति ॥ ४१ ॥

धर्मशब्दात्तदिति द्वितीयासमर्थाच्चरतीत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति । चरतिरासेवायां नानुष्ठानमात्रे । धर्मं चरति, धार्मिकः ॥ अधर्माच्चेति वक्तव्यम् ॥ * ॥ आधर्मिकः ॥

प्रतिपथमेति ठंश्च ॥ ४२ ॥

प्रतिपथशब्दाद्द्वितीयासमर्थाद् एतीत्यस्मिन्नर्थे ठन् प्रत्ययो भवति, चकाराट्ठक् च । प्रतिपथमेति, प्रतिपथिकः । प्रातिपथिकः ॥

समवायान् समवैति ॥ ४३ ॥

समवायवाचिभ्यः शब्देभ्यस्तदिति द्वितीयासमर्थेभ्यः समवैतीत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति । समवायः समूह उच्यते न संप्रधारणा । समवायानिति बहुवचनं स्वरूपविधिनिरासार्थम् । समवैति आगत्य तदेकदेशो भवतीत्यर्थः । समवायान्समवैति, सामवायिकः सामाजिकः । सामूहिकः । सान्निवेशिकः ॥

परिषदो ण्यः ॥ ४४ ॥

*परिषदो ण्यः प्रत्ययो भवति समवायान्समवैतीत्येतस्मिन्विषये । ठकोपवादः । परिषदं समवैति, पारिषद्यः ॥

सेनाया वा ॥ ४५ ॥

सेनाशब्दाद् वा ण्यः प्रत्ययो भवति समवायान्समवैतीत्येतस्मिन्नर्थे । ठकोपवादः । पक्षे सोपि भवति । सेनां समवैति, सैन्यः । सैनिकः ॥

संज्ञायां ललाटकुक्कुट्यौ पश्यति ॥ ४६ ॥

ललाटकुक्कुटीशब्दाभ्यां तदिति द्वितीयासमर्थाभ्यां पश्यतीत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति संज्ञायां विषये । संज्ञाग्रहणमभिधेयनियमार्थं,न तु रूढ्यर्थम् । ललाटं पश्यति, लालाटिकः सेवकः । कौक्कुटिको भिक्षुः । सर्वावयवेभ्यो ललाटं दूरे दृश्यते तदनेन ललाटदर्शनेन सेवकस्य स्वामिनं प्रत्यनुपश्लेषः कार्येष्वनुपस्थायित्वं लक्ष्यते । लालाटिकः सेवकः । स्वामिनः कार्येषु नोपतिष्ठत इत्यर्थः । कुक्कुटीशब्देनापि कुक्कुटीपातो लक्ष्यते । देशस्याल्पतया हि भिक्षुरविक्षिप्तदृष्टिः पादविक्षेपदेशे चक्षुः संयम्य गच्छति स उच्यते कौक्कुटिक इति † ॥

---

* परिषदो ण्य इत्यस्याग्रे 'परिषोदन्त्यस्मिन्नित्यधिकरणे क्विप्' । इत्यधिकमेकस्मिन्पुस्तके ।

† कौक्कुटिक इतीत्यस्याग्रे 'तदयमभिधेयनियमः संज्ञाग्रहणेन क्रियते कुक्कुटी दाम्भिकचेष्टा ।

॥ आनन्दवृन्दावनचम्पूकाव्यस्य ॥

॥ अष्टमस्तबकावशेषः ॥

जीवने गुरुत्वं, चेतसि द्रवत्वं, प्रेमणि स्नेहत्वं, श्रवणे तद्गुणशब्दः, तत्संयोगचिन्तासु बुद्धिः, तत्सङ्गप्रत्याशाया-मेव सुखं, तदसङ्ग एव दुःखं, तदासत्तिषु इच्छा, गुर्वादिषु द्वेषः,कृष्णोपसर्पण एव प्रयत्नः,तदुपसत्तिरेव धर्मः,तदन्यथा-भाव एवाधर्मः ; तत्प्रेमकरण एव संस्कारः, इत्येवं सर्वासां चतुर्विंशतिरेव गुणा तदानीमेवंविधा आसन् ॥ ८६ ॥

गुरुत्वं भारबुद्धिः, द्रवत्वमिति धर्मधर्मिणोरभेदोपचारात् तदाधिक्यविवक्षया चेत एव द्रव इत्यर्थः, स्नेहत्वं स्नेहवाचकत्वं किंवा श्रीमदुज्ज्वलनीलमण्युक्तानुसारेण प्रेम्ण एव किञ्चिदुत्कर्षं प्राप्तस्यैव स्नेहत्वमिति, आसत्तिः सामीप्यम् ॥ ८९ ॥

एवञ्च तासामन्योन्यं सरसानुलापश्चासीत् ।

ईदृशा पुरुषभूषणेन या
भूषयन्ति हृदयं न सुभ्रुवः ।
धिक् तदीयकुलशीलयौवनं
धिक् तदीयगुणरूपसंपदः ॥
जीवितं सखि पणीकृतं मया
किं गुरोश्च सुहृदश्च मे भयम् ।
लभ्यते स यदि कस्य वा भयं
लभ्यते न यदि कस्य वा भयम् ॥ ६० ॥

यदि न लभ्यते एव तर्हि तदप्राप्तिवेदनातुराया मरिष्यन्त्या मम गुरुभयं किं नामेत्यर्थः ॥ ९० ॥

किञ्च ।

माधवो यदि निहन्ति हन्यतां
बान्धवो यदि जहाति हीयताम् ।
साधवो यदि हसन्ति हस्यतां
माधवः स्वयमुरीकृतो मया ॥

किन्तु ।

व्रीडां विलोडयति लुञ्चति धैर्यमार्य-
भीतिं भिनत्ति परिलुम्पति चित्तवृत्तिम् ।
नामैव यस्य कलितं श्रवणोपकण्ठे ।
दृष्टः स किं न कुरुतां सखि । मद्विधानाम् ॥ ६१ ॥

हन्यतां हीयतां हस्यतामिति त्रयं भावसाधनम् । लुञ्चति अपनयति ॥ ९१ ॥

एवं सकलाः स कलानिधिर्दिनमुखे मुखेन विधुरीकृतपीयूषमयूखेन मुरलीं वादयमानो दयमानो नोदितनयनकमलाञ्चलचञ्चलचटुलतया तत इतो निरीक्षणेन क्षणेन वर्त्मनि उभयतोऽभयतोषकरीषु वीथिषु निजनिजपुरगोपुरगोचरान् गोकुलकुलवृद्धानानन्दवृन्दवृतमनसः कुर्वन्ननुगवीनो नवीनो नट इव भवनतो वनं वनतो भवनं यदा याति यदायाति च ॥ ६२ ॥

एवं स कलानिधिः श्रीकृष्णो दिनमुखे दिनादौ भवनतो यदा वनं याति यदा च वनतो भवनमायाति च तदैव समयद्वये गोकुलकुलबाला वलभीतलमारोहन्तीत्यन्वयः । विधुरीकृतस्तिरस्कृतः पीयूषमयूखश्चन्द्रो येन तेन मुखेन मुरलीं वादयमानः । पुनः कथंभूतः सकलाः उक्तलक्षणाः स्वानुरागिणीर्दयमानः कृपयन् । केन प्रकारेण नोदिते प्रेरिते ताः प्रति प्रस्थापिते ये नयनकमलयोरञ्चले तयोश्चञ्चलचटुलतया कर्मधारयोत्तरभावप्रत्ययान्तत्वादेकत्वं, चाञ्चल्यसौन्दर्यमित्यर्थः। "चटुलः सुन्दरे चले" इति धरणिः । क्षणेन उत्सवेन वीथिषु महावर्त्मप्रान्तगतासु प्रतिपुरप्रवेशार्थपदवीषु निजनिजपुरस्य स्वस्वावासस्य गोपुरगोचरान् सिंहद्वारे दृष्टिविषयीभूतान् ॥ ९२ ॥

तदैव काश्चित् केशप्रसाधनसाधनतोऽकृतकेशबन्धाः, काश्चिदाप्लवतो वतोदकमपि नापसारयन्त्यः ॥ ६३॥

केशानां प्रसाधनस्य भूषणस्य यत् साधनं बालपाशपटचमरीमाल्यादि तस्मात् तत् परित्यज्य ल्यब्लोपे पञ्चमी । आप्लवतः स्नानात् आप्लवमपरिसमाप्येत्यर्थः ॥ ९३ ॥

काश्चिदालिजनेनाञ्जनेनाञ्जयतेक्षणे मदिरेक्षणे ! क्षणं विरमेति निषिध्यमाना अप्यञ्जितार्द्धैकनयनाः, काश्चित् सखीजनेनानुरक्तेनालक्तेनालमारज्यमानैकचरणाश्चरणाङ्कचिह्नेनैकेनैकपार्श्व एव सोपानपदवीमरुणयन्त्यः ॥ ६४ ॥

आलीजनेन सखीजनेन कर्त्रा अञ्जनेन कज्जलेन ईक्षणे नेत्रे अञ्जयता हे मदिरेक्षणे कृष्णनूपुरध्वनिमात्रेणैवाधैर्यादतिचपलनेत्रे इति भावः । अत्रैकवचनमेकैकां प्रति एकैकस्याः सख्या उक्तेः । अलक्तेन यावकेन अलमत्यर्थमारज्यमान एकचरणो यासाम् ॥ ९४ ॥

काश्चिदेकचरणाकृतनूपुरतयारतया विशृङ्खलशिञ्जिते भीस्थगितत्वसत्वरचलनछिन्नार्द्धशृङ्खलातिविशृङ्खलारवाः ॥ ६५ ॥

एकचरण एव कृतो नूपुरो यासां तत्तया, कीदृश्या विशृङ्खलशिञ्जिते द्वितीयनूपुराभावादव्यथितशब्दे भारलया, पुनरपि भिया गुरुजनभयेन स्थगितत्वं सत्वरचलनं च ताभ्यां छिचा या अर्द्धशृङ्खलापि तया हेतुना पूर्वतोऽप्यतिविशृङ्खला भारवा यासु ताः, अर्द्धनूपुरशब्दस्याभावात् तद्ध्वनेः पूर्वतोऽप्यत्यव्यथितत्वमित्यर्थः ॥ ९५ ॥

काश्चिदर्द्धग्रथितमेखलाञ्चलचलनकृतचरणायमार्जना मृणालनालसन्दानिता नितान्तविशृङ्खलगामिन्यो राजहंस्य इव महागुरुगुरुभयमधो निधाय धावमाना गोकुलबाला बालातपविकाशिन्यः कमलिन्य इव वडभीतलमारोहन्ति ॥ ९६ ॥

अर्द्धग्रथिता या मेखला काञ्ची तस्या अञ्चलेन चलने गमनकर्मणि कृतं चरणायमार्जनं यासां ताः । सन्दानिता बद्धाः, बालातपः प्राभातिकसूर्यकिरणः ॥ ९६ ॥

एवञ्च सति ।

अहो मध्ये हृदि निवसतो माधवस्यावलोके
निद्राणायाः कुवलयततेः श्रीहराणीक्षणानि ।
प्रातः सायं कलितवडभीजालरन्ध्राणि तासां
मुष्णान्त्याभ्यामहह वसतां पञ्जरे खञ्जनानाम् ॥ ९७ ॥

अहो मध्य इति तदाविरहवैवश्येन तद्ध्याननिष्ठतया ईक्षणानां मुद्रितत्वं, जालरन्ध्राणि पञ्जरस्थानीयानि ॥ ९७ ॥

एवमनूढानामपि नाम पिहितमनोरथानां धूलिखेलावधिभगवद्वनकृतगतागतानां गोपजातिस्वभावत ऋजुमार्गस्थितत्वेन सर्वजनगोचराणां विशेषतो मातापितृभ्यामद्यतनीयमिति प्रत्येकमधिगततयाऽवलोकितदूषणानां स्वस्ववासनासनाथेन भाविपतिभावेन दृढतरेण निभृतनिखातमहानिधिनेवान्तस्तृप्ततया बहिस्तदविलासेन दुःस्थितवद्दृश्यमानानां जनानामिव हृदयनिहितभावसरसतया बहिर्व्यञ्जितताटस्थ्यानां कुमारीणामयमेव नः पतिर्भावीति मनोरथवहनेन समयं गमयन्तीनां दिनानि कतिचिद् जातानि ॥ ९८ ॥

अनूढानां कन्यानां, नाम प्राकाश्ये, स्वस्ववासनया चोत्पत्तिक्यैव, सनाथः सफलो, भाविपतिभावः अस्माकं कृष्ण एव भावी पतिरिति तस्य भावेन भाविपतित्वेन, तस्मिन् कृष्ण एव हृदये निहिते यो भावस्तदुचितः प्रेमा तेन सरसतया अपि बहिर्व्यञ्जितं ताटस्थ्यं गोपनार्थं तत्रौदासीन्यं याभिस्तासां, तत्र दृष्टान्तः । निभृतमन्यजनालक्षितं यथा स्यात् तथा निखातेन खनित्वा पृथिवीमध्ये स्थापितेन, ब्रह्मयोषन्यायेनाह, अयमेव न इति ॥ ९८ ॥

अथैकदा मणिपञ्जरतः केलिशुकं निष्काश्य करकमलतले विनिधाय परिपक्वदाडिमीबीजमेकैकं चञ्चुपुटनिकटे समर्पयन्ती कृष्णानुरागभरनिर्भरभज्यमानहृदयतया कृष्णां वदेति मुहुरभिलापयन्ती कमपि तोषमाससाद वृषभानुपुत्री ॥ ९९ ॥

कमपि तोषमिति कृष्णनाम्नः स्वशाब्दसाधर्म्यंव स्वस्वरूपत्वात् ॥ ९९ ॥

तदन्तरान्तरारूढमहानुरागनिर्विण्णतया किञ्चन पद्यं हृद्यं श्रावयित्वेव पठति स्म ॥

यथा ।

दुरापजनवर्तिनी रतिरपत्रपा भूयसी
गुरूक्तविषवर्षणैर्मतिरतीव दौस्थ्यं मता ।
वपुः परवशं जनुः परमिदं कुलीनान्वये
न जीवति तथापि किं परमदुर्मरोऽयं जनः ॥ १०० ॥

तदन्तरा तन्मध्य एव । अयं मल्लक्षणो जनः ॥ १०० ॥

स च शुकः परमविदग्धः प्रागेवाधीतसकलविद्यस्तदपि पद्यं श्रावं श्रावमेव कण्ठे चकार । तस्मिन्नेव समये स्वभावपक्षिभावेन स्वातन्त्र्यमासाद्य परिपुष्टोऽपि कृष्णाकृष्णेति तदुक्तं पठन्नपि तत्करकमलतः समुड्डीय गगनमुत्पपात । अनन्तरमुड्डयनाप्रवीणतया पुरभवनपटलात् पुरभवनपटलान्तरं निपतन् क्रमेण गोकुलराजकुमारस्य भवनालिन्दे निपत्य कलकोमलस्वरेण किमपि रञ्जयन् दुरापजनवर्तिनी रतिरित्यादि तदेव पद्यमगासीत् । तदाकर्ण्य कर्णरम्यमहो किमिदमिति सविस्मयकौतुकमये कोऽसि कस्यासीति व्रजराजकुमारस्तमादातुकामः स्वयमेव तदभ्यासमभ्यागच्छन्तं पुनः पठ्यतामिति सप्रणयमुवाच । स च तत् पुनः पपाठ ॥ १०१ ॥

तं शुकं, कीदृशं स्वयमेव तदभ्यासं कृष्णसमीपमाभिमुख्येनागच्छन्तं वस्तुशक्त्यैवाकर्षणादिति भावः ॥ १०१ ॥

कृष्ण आह महामेध! मे धन्यीकृतं त्वया श्रवणयुगलं परमविद्वत्तरवचसा च साम्प्रतं, ततस्त्वमतीव धन्योऽसि । स आह व्रजराजनन्दन! अतीव कृतघ्नोऽयं जनः कथं धन्योऽसीति वृथा स्तूयते, यदयम् ।

गाढानुरागभरनिर्भरभङ्गुरायाः
कृष्णेति नाम मधुरं मृदु पाठयन्त्याः ।
धिङ्मामधन्यमतिचञ्चलजातिदोषा-
द्देव्याः कराम्बुरुहकोरकतश्च्युतोऽस्मि ॥

श्रीकृष्णः अहो महानुरागवत्याः कस्याश्चित् करतललालितोऽयं भविष्यतीति मनसि विभाव्य अये क्षणमिहैव स्थीयतां यावदहं तवाभीष्टमास्पदं प्रापयामीति करकमलं प्रसारयामास । स च निःसाध्वसमेव तदिच्छाप्रतिपालनलालसया तत्करकमलमारुरोह ॥ १०२ ॥

मेधा धारणावती बुद्धिः, वचसा चेति चकारात् तव स्वाभाविककूजितेनापि, व्रजराजनन्दनेति पूर्वं कदाचित् बलभीतले वनाय गच्छन्तं कृष्णमालोक्य तेन शुकेन कोऽयमिति पृष्टया विशाखया व्रजराजनन्दनोऽयमिति परिचायितत्वात् तस्येति ज्ञेयम् ॥ १०२ ॥

तदेवमवसरे कश्चिदुर्वीगीर्वाणपुत्रः कुसुमासवो नाम बटुः श्रीकृष्णस्य हासप्रियसखः समागत्य वयस्य ! महाविदग्धोऽयं शुकः केलिकौतुकाय संपत्स्यते यत्नादयं रक्षणीय इति दाडिमीबीजनिकरेण तमनुतर्पयति । तत्रैव समये कृष्णानुरागभरपराभवभज्यमानमृदुलाङ्गी सा किल वृषभानुदुहिता करतलादुड्डीय गतं तं शुकं गवेषयितुकामा काममप्यनुचरीमाह ॥ १०३ ॥

उर्वीगीर्वाणो विप्रः, हासप्रियसखो विदूषकाख्यः ॥ १०३ ॥

मधुरिके ! धात्रेयीमिमामादाय गवेषय कुतो गतवानयं शुकशावक इति प्रहितानुचरी धात्रेय्या सह ततस्ततोऽन्वेषयन्ती दैवान्निजपुरगोपुरपरिसरे वसन्तं वसन्तं मधुनेव कुसुमासवेन सह तमेव लालयन्तं लयं तं गतं तस्मिन्नेवानन्दे तत्परिपठितपद्यद्वयार्थानुभवभवदतिहृदयगाढवेदनावेदनाय जनमन्यमपश्यन्तं स्वहृदयेनैव सह विचारयन्तं च ध्यानलब्धायां तस्यामेव मनोमनोरमं कृष्णमालोकयामास ॥ १०४ ॥

धात्रेयीं धात्र्याः पुत्रीं, वसन्तमृतुराजमिव तं कृष्णमालोकयामास, मधुनेव चैत्रेणेव, तमेव शुकं लालयन्तं, तस्मिन्नेव लालनात्मके आनन्दे लयमत्यासक्तिं गतं तमिति कृष्णविशेषणं लयविशेषणं वा, तेन शुकेन पठितं यत् पद्यद्वयं प्रथमं वृषभानुसुतोक्तं दूरायेति, द्वितीयं शुकोक्तं गाढानुरागेति, प्रथमेऽनुरागो व्यङ्ग्यः द्वितीये वाच्यः तस्य पद्यद्वयस्यार्थानुभवेन हेतुना भवन्ती अतिशया या हृदयगाढवेदना तस्या वेदनाय ज्ञापनाय ॥ १०४ ॥

आलोक्योपसृत्य च जयति २ श्रीव्रजराजकुमारः, पीतांशुक ! शुक एष मद्देव्याः तदयं सदयं सरसभावेन दीयतामादीयतामात्मनो यशःपरिमलो विमलो विविध एव ते गुणगणः किमपरं ब्रवीमि ॥ १०५ ॥

हे पीतांशुक हे पीताम्बर, आदीयतां गृह्यताम् ॥ १०५ ॥

कुसुमासव आह तव देव्या अयमिति किमत्र निगमनं नागमनं नापि वचस्ते यदि भवति तदाहूयतां, आहूतश्चेत् तव करमारोहति तदा संभाव्यते तावक इति ॥ १०६ ॥

निगमनं ज्ञापकम् ॥ १०६ ॥

साह बटो ! व्रजराजकुमारकरकमलस्पर्शाय को न स्पृहयति यदस्यास्वादमनुभवन्ती अचेतनापि वंशी कदापि न परिहरति किमुतायं चेतनः पक्षी ॥ १०७ ॥

आस्वादमनुभवन्ती अचेतनापि वंशीत्यनेन स्वदेव्यास्तत्रानुरागोऽपि भङ्ग्याभिव्यञ्जितः ॥ १०७ ॥

तत् कुमार ! सा नो देवी शुकादिगीतगुणचरितं प्रति परमलालसा तद्विना क्षणमपि न निर्वृणोति तदयं दीयतामिति ॥ १०८ ॥

तत् तस्मात् कुमार हेयुवराज कृष्ण "युवराजस्तु, कुमार" इत्यमरः । शुकादीनां गीतं च गुणश्च चरितं च तत् प्रति परमा लालसा यस्याः सा, आदिशब्दात् शारिका हंसाश्च, पक्षे शुकादिभिः श्लेषेण व्यासपुत्रादिभिर्गीतानि गुणाश्चरितानि च यस्य तं श्रीकृष्णं, तद्विना तदीयगुणचरितं विना । यद्वा । शुकादिभिर्गीतं यद्गुणचरितं तद्विना तस्य कृष्णसंबन्धित्वं प्रत्यासत्तिभङ्ग्यालब्धम्, अत्रादिशब्दात् सखीभिः सुहृद्भिश्च ॥ १०८ ॥

कुसुमासव आह भवति हि, एवंविधगुणं न-व-कीरं-धनं न काः कामयन्ते ॥ १०९ ॥

हि निश्चितं भवति भवितुं युज्यत एवैतदित्यर्थः । नवकीरं नवीनं शुकं धनं धनरूपं का न कामयन्ते अपि तु सर्वा एवेति प्राप्तिस्तु दुर्घटेति भावः । पक्षे वकीरन्धनं पूतनाघातिनं कृष्णं का न कामयन्ते न किन्तु सर्वाः कामयन्त एवेत्यर्थः । तत्र एवंविधगुणमिति स्ववयस्यपक्षपातितामालम्ब्य तां प्रति अनिर्वचनीयाद्भुतगुणे मद्वयस्ये भवद्देव्या अनुराग उचित एवेति तस्या अभिनन्दनं, पुनश्च वकीरन्धनमिति तस्याः प्रतिपक्षपातितामालम्ब्य तूष्णीं स्थितं स्ववयस्यं प्रति एतादृशानुरागवत्यामपि

तस्यां स्वरागमनभिव्यञ्जयतस्तव स्त्रीवधेऽपि भयं नास्ति यतस्त्वया प्रथममेव सा पूतना घातितैवेत्युपालम्भनं द्योतितम् ॥ १०९ ॥

साह तस्या एवायं कथमत्र कामना ॥ ११० ॥

अयं शुकः, पक्षे कृष्णः ॥ ११० ॥

स आह का ते देवी, साह यथायं ते वयस्यो व्रजराजस्य कस्यापि नन्दनः सा च तथा नन्दिनी कतमस्य तमस्य भवतः साक्षात् किं प्रख्यापयामि ॥ १११ ॥

तं तस्याः पितरं व्रजराजतुल्यमित्यर्थः । अस्य धृष्टरूपस्य भवत इत्यर्थः । तेन सदृशान्वयजातत्वेनापि तस्याः श्रीकृष्णेन सह प्रतियोगिता समुचितैवेति सूचितम् ॥ १११ ॥

स आह भवतु, कथमयमस्माभिर्दातव्यः अचोरीकृत्यचोरीकृत्यमनेनानायि नानायितकलालोभवत्यो भवत्यो मृषा दोषमासञ्जयितुं भ्रमन्ति ॥ ११२ ॥

अचोरश्चोरः संपद्यते तस्य कृत्यमिति च्विः, तत् उरीकृत्य अङ्गीकृत्य अनेन मद्वयस्येन अयं शुको न आनायि न आनीतः । नानायितासु नानाप्रकाराचरन्तीषु कलासु नर्मशिल्पेषु लोभवत्यः दोषमासञ्जयितुमिति शुकानयनव्याजेन मद्वयस्येन सह संवदितुं कञ्चित् क्षणं विलम्ब्य भङ्ग्या दूत्यमिवाङ्गीकृत्य कदाचिदपि सह प्रवादान्तरमप्युत्थापयितुं भवत्यः शक्नुवन्तीति भावः । इयमाश्वासभङ्ग्येव ननु वस्तुत आक्रोशः ॥ ११२ ॥

देवादयं शरणागतः शरणागतवत्सलेनामुनारक्षित्वा पुनः कथं दास्यत इत्येवमवसरे व्रजेश्वरी तत्रागत्य वत्स! कथं विलम्बसे ।

अन्नं शीतलतामुपैति नियतश्चाहारकालो ययो
माता भोजितपायितास्तत इतः प्राप्ताः सखायस्तव ।
उत्कर्णं विवृतेक्षणं विचलितग्रीवं सहंवारवं
धेनूनां निचयश्च तात! भवतः पन्थानमुद्वीक्षते ॥११३॥

भोजितपायिता इति प्रथमं भोजिताः ततः पायिताः, "पूर्वकालैके"त्यादिना समासः ॥ ११३ ॥

तदेहि भोजनानन्तरं भो जनानन्तरङ्गानादाय गोष्ठमासीदेति यदोवाच तदैवोपसृत्य कुसुमासव आह मातर्मातः परं कुतुकमस्ति ॥ ११४ ॥

भोः कृष्ण जनान् सखीनन्तरङ्गान् आदाय गोष्ठं गवां स्थानमासीद प्राप्नुहि ॥ ११४ ॥

यदयं शुकः शुक इव परमबुधः, बुध इव कलानिधिभूः, निधिभूरिव सर्वजनगोचरः, चर इव सर्वहृदयाग्रहः ॥ ११५ ॥

शृङ्खलामयरसनारूपकेण शुकं वर्णयति, शुक इव वैयासकिरिव, बुध इव चतुर्थग्रह इव कलानिधिभूश्चन्द्रपुत्रः, पक्षे कला वैदग्धी सैव निधिस्तं प्राप्तः । भूः प्राप्तौ क्विबन्तः । निधिभूर्निधितैवं । सर्वेषां हृदयं मन आ सम्यक् गृह्णातीति सः, पक्षे सर्वेषामेव मनस आग्रहो यत्र सः ॥ ११५ ॥

दयाग्रह इव चेतोद्रवास्पदं, पदमिव विभक्तियुक्, भक्तियुगिव प्रियंवदः, वद इव मेधावी ॥ ११६ ॥

दयारूपो ग्रहो दयाग्रहः, विभक्तयः स्वादयो गुणवैलक्षण्यरूपा विभागाश्च, भक्तियुग् भगवद्भक्तः, वदः सिद्धान्तवक्ता, ॥ ११६ ॥

धावीव समुत्कण्ठः, कण्ठ इव सर्वस्वराश्रयः, स्वराश्रय इव सुमनाः, सुमना इव शान्तिकमनः ॥ ११७ ॥

धावी धावनपरः सम्यगुद्गतः उर्ध्वीकृतः कण्ठो यस्य सः, पक्षे समीचीना उत्कण्ठा अध्ययनादिविषया अस्मत्सविधस्थितिविषया वा यस्य सः, स्वराश्रय इव स्वर्गवासीव सुमनाः देवः "सुपर्वाणः सुमनसस्त्रिदिवेशा" इत्यमरः । पक्षे सुमनाः कोविदः "सुमनाः पुष्पमालत्योस्त्रिदशे कोविदेऽपि च"ेति विश्वः । सुमना इव साधुरिव शान्त्या शान्तिगुणेन कमनः कमनीयः ॥ ११७ ॥

मन इव दुर्धरः, धर इव स्थिरः, स्थिरचरचमत्कारकारः ॥ ११८ ॥

दुर्धरः धर्तुमशक्यः उपमेयस्यैव प्राधान्यात् पुंस्त्वं, धरः पर्वतः ॥ ११८ ॥

सहसा सह साधूत्कण्ठया समुड्डीय वयस्यकरे पतितः । तदस्य विविधकलापेनालापेनातिचमत्कृतमना मनागत्र वयस्यो वयस्योतेन प्रणयेन विललम्बेऽलं वेदनयानया । किंच शुकोऽयं वयस्येन मादृशादप्यधिकं प्रणयपात्रीक्रियते ॥११९॥

साधु यथा स्यात् तथा उत्कण्ठया सहवर्तमानः । यद्वा । साध्वी या उत्कण्ठा तया, विविधाः कलाः पातीति तथाभूतेनालापेन वयसि पक्षिणि ओतेन ग्रथितेन प्रणयेन हेतुना विललम्बे, प्रेम्णा तल्लालनार्थं विलम्बितवानित्यर्थः । अत एव अनया. अन्नं शीतलतामित्यादिना व्यञ्जितया वेदनया अलम् ॥ ११९ ॥

तदन्तरान्तरारूढमदा मदासञ्जितदोषा गोपकुमारीयं मद्देव्याः शुकोऽयमिति वदन्ती नेतुमभिलषति तेना-

Digitized by Google

नयादनया दत्तमुत्तरं वयस्यं व्यथयति। व्रजेश्वरी तदुक्तिमाकर्ण्य पार्श्वतो विलोक्य कथमिहैव मधुरिकेति सानुग्रहं करेणामृशति ॥ १२० ॥

तदन्तरा तन्मध्य एव, अनयात् अनीतिमालम्ब्य अनया गोपकुमार्य्या उत्तरमिति कर्तृपदं ॥ १२० ॥

सा चससाध्वसभक्तिश्रद्धं प्रणम्य व्रजाधीश्वरि! न मया किमप्युक्तं मद्भर्त्र्या राधाया अयं शुकः क्रीडोपकरणमनेन विना सा खिद्यतीति केवलमहमवोचम् ॥ १२१ ॥

सा च मधुरिका, ससाध्वसेति कदाचिद् व्रजेश्वरी मयि खिद्येदिति भावनया साध्वसं भक्तिश्रद्धे तु साहजिक्यावेव। राधाया इति अत्र नामगोपनस्यायुक्तत्वात् ॥ १२१ ॥

सा चाह निभृतं मधुरिके! त्वमधुना भवनमनुसर वत्से वनं गतवति मयैवायं शुको भवद्भर्त्र्ये प्रेषयितव्यः। मधुरिका च यथाज्ञापयति तथभवतीति प्रणम्य निश्चक्राम। ततः सा व्रजेश्वरी तनयस्य करकमलमाधृत्य एहि वत्स! एहीत्युत्थाप्य कुसुमासव! शुकमेनमात्मनेव सावधानं रक्ष भक्षय चैनं कनकपुटिकया घृतोदनमिति यदा निगदति स्म ॥ १२२ ॥

तदा श्रीकृष्णः समुवाच मयैव भोजयितव्योऽयमिति करकमलकृतशुकः पीतांशुकः पीतां श्रवणपुटकेन तां गाथामन्तरनुपठन् तदुत्तररूपं किंचन पद्यं शुकं श्रावयित्वा जनान्तिकं कुसुमासवमामन्त्र्य पठति स्मः॥१२३॥

जनान्तिकमिति तृतीयजनाज्ञाप्यं, श्रावयित्वेति तत्कण्ठस्थीकृतेन पुनश्च स्वभावादेव राधायै पठिष्यमाणेन तेन पद्येनैव स्वानुरागव्यञ्जनया तामाश्वासयितुमिति भावः ॥१२३॥

सखे कुसुमासव!

न वनगमने नाप्यासङ्गे वयस्यगणैः समं

न च मुरलिकानादे मोदो न धेनुगणावने।

इममसृणवं यावत् कीरोत्तमाननमिःसृतं

कमपि दयितालापं गाढानुरागभरालसम् ॥

इति मातुरनुपदं पदकमलमाधाय चालितपदो भोजनासनमध्यास्य भुञ्जानः स्वसंमुखेन कनकपुटिकायामात्मनेव श्रीकरकमलेन सुरभितरघृताक्तमोदनं शुकमाशयामास। अनन्तरमाचान्तः पूर्वपूर्वदिनवदनुगवीनो जिगमिषुर्जननि! जननिरपेक्षतया रक्षितव्योऽयं शुक इति सप्रणयं स प्रणिजगाद। ततश्च गतवति सति धेनुपालनाय विपिनमध्यं लीलाकिशोरे श्रीकृष्णे धात्रीदुहित्रा राधाशुकं राधागृहे प्रेषयामास श्रीकृष्णजननी। तामथ करकमलकलितशुकां श्रीकृष्णजननीधात्रेयीमालोक्य श्यामलया सखीभ्यां च सह सहसोत्थाय एह्येहि इति सबहुमानमाहूय निजासनार्द्धमध्यारोप्य भवति कुशलं तत्रभवत्याः श्रीव्रजेश्वर्य्या इति सप्रणयभक्तिश्रद्धं निगदति स्म वृषभानुकिशोरी। साह कल्याणिनः खलु ते चरणाः ॥ १२४ ॥

गाढेन अनुरागभरेण अलसं तस्यातिगुरुत्वात् वोढुमसमर्थमिवेति भावः ॥ १२४ ॥

किंतु तवामुना शुकेनानाशुकेनानन्दितः कुमारः कुमारयति स्म। चिरं रुचिरं रुतं चाश्रुत्य श्रुत्यपरिमेयपरितोषमासादितवान् दितवान् चक्षुष्मतां त्वपत्रयम् ॥ १२५ ॥

शुकेन कीदृशेन आशुकेन आशु शीघ्रं कं सुखं यस्मात् तेन, कुमारः श्रीकृष्णः कुमारयति स्म क्रीडितवान्, चिरं रुतं च आ सम्यक् श्रुत्वा श्रुत्योः कर्णयोरपरिमेयतोषं प्राप्तः छितवान् खण्डितवांश्च,तदा तथाभूतोत्फुल्लमुखोऽभूदयमत तदानीं संपश्यतां त्रिविधतापं खण्डितवानित्यर्थः ॥ १२५ ॥

अथ तस्मिन् धेनुचारणाय वनं गतवति तव तिलमात्रदुःखासहनयानया समर्यादया दयावत्या त्वयि त्वयि कुशले! कुशलेशमात्रमपि विलम्बमकुर्वाणया प्रेषितोऽयं खगोत्तमो व्रजेश्वर्य्या ॥ १२६ ॥

अनया श्रीव्रजेश्वर्य्या त्वयि तु दयावत्या अयि संबोधने हे कुशले कुशलेशो दर्भसंबन्धी अतिसूक्ष्मांशविशेषस्तद्व्यतिक्रमे सूर्यस्य यावान् कालो भवति तन्मात्रमपि ॥ १२६ ॥

श्यामाह सुवदने! वद नेदं, इह गोकुले गोपकुले गोपनीयमगोपनीयं वा यत् किंचन रत्नभूतं भूतं भूतसरूपं तत् सकलमेव व्रजराजनन्दनस्य, नन्दनस्य विहगोत्तमेभ्योऽप्ययं सोभगवान् भगवान् यमसुं करे चकार ॥ १२७ ॥

श्यामाहेति तया स्वहृदयस्य राधिकाहृदयेन सहैक्यनिश्चयात्। रत्नभूतं रत्नरूपं भुवस्तत्सरूपं भूषणरूपं भूतमभूत्। नन्दनस्य स्वर्गोद्यानस्य, भगवानिति सर्वां प्रति प्रणयपरीहासव्यञ्जना। यद्वा, श्रीमान् "भगं श्रीकाममाहात्म्यवीर्ययत्नार्ककीर्तिष्वि"त्यमरः ॥ १२७ ॥

तदयं तस्यैव खेलोपकरणं करणीयः किंतु सम्प्रति प्रतिप्रेषणमसाम्प्रतं साम्प्रतं गच्छतु भवती पश्चाद्गतागतललितया ललितयायं धेन्ववनतो वनतो भवनमागत एव तस्मिन् व्रजेश्वरीसमक्षं समर्पणीयः ॥ १२८ ॥

Digitized by Google

असाम्प्रतमनुचितम् ॥ १२८ ॥

मुख्याह सुमुख्याह सुललितमेव श्यामा, तद्गम्यतां
गम्यतां प्रापय मे नतिविततीनामीश्वरीचरणान् ॥ १२६ ॥

सुमुखी श्यामा सुललितमेवाह, तत् तस्मात् त्वया गम्यतामीश्वरीचरणान् प्रति मे मम नतिविततीनां प्रणतिसमूहानां गम्यतां प्रापय नतिविततीनामिति "कृत्यानां कर्तरि वे"ति षष्ठी । ईश्वरीचरणा मम नतिविततिभिर्गम्या इति ज्ञापयेत्यर्थः । अत्र यदि श्रीमत्या व्रजेश्वर्य्या स्वपुत्रसौख्यमनपेक्ष्याप्यस्मासु स्निग्धतया अस्मत्सुखमनुरुन्धत्या प्रेषितोऽयमास्माकीनः शुकः तर्ह्यस्माभिरपि तत्पुत्रसौख्यानुमोदनेनैव प्रसादनीया सा परमवत्सला गरीयसीति स्वाभिप्रायं ज्ञापिता तया धात्रेयी, वस्तुतो मूलाभिप्रायस्त्वस्याः श्रीकृष्णसंगतेन स्वीयशुकेनैव स्वसंगमसुखमभिमन्यमानायाः मम परमविदग्धेन शुकेनैव तत्प्रीतिपात्रीभवता सर्वाभीष्टं साधयिष्यते इत्येषोऽपि न मुख्यः किंतु प्रेम्णो रीतिरेवेयं यत् प्रियतमस्य प्रीत्यर्थमेवात्मदेहप्रियवस्त्वादि भवतीति ॥ १२९ ॥

गतायामथ तस्यां सा वार्षभानवी नवीनकृष्णानुरा-
गपरभागभागभिमुखमागतं तं विहगोत्तममयि धन्यसि
सौभाग्यधनेन त्वं यदमुष्य दुर्लभजनस्य सुखाकरकरस्प
र्शस्त्वया भो अलम्भि, अलं भियाऽभियाहि मत्पाणौ ॥१३०॥

नवीनकृष्णानुरागस्य परभागं शोभामुत्कृष्टभागं भजत इति सा, सौभाग्यधनेन हेतुना त्वं धनी धनवानसि, सुखाकर इति "सुखप्रियादानुलोम्ये" इति आच् । यद्वा । सुखस्याकरो यः करस्तस्य स्पर्शः । भिया अलमिति हन्त असमीक्ष्यकारिणा मया लालयन्त्या अपि भवत्याः पाणितो जातिस्वभावादुड्डीय गत्वा अपराद्धमेव कथं पुनस्तत्रैव पाणावुपविशामीति भयं न कर्तव्यमित्यर्थः । अभियाहि आभिमुख्येनैव मत्पाणावागच्छ ॥ १३० ॥

भवन्तं स्पृशन्ती शं तीव्रमनुभवानीति नीतिमतो तं
पाणौ कृत्वा कथय किमाकलितमिति यदा बभाषे बभाषे
च तदा सोऽपि ॥ १३१ ॥

भवता नापराद्धं प्रत्युत मदीष्टमेव साधितमित्याह । भवन्तमिति । भवन्तं स्पृशन्ती सती तीव्रं निर्भरं शं सुखमनुभवानीति । त्वत्स्पर्शेन परम्परया ममापि तत्पाणिस्पर्शाभिमानो भवत्विति भावः ॥ १३१ ॥

मया निगदितं वचः श्रवणवर्त्म यावद्ययौ
स तावदति दुःस्थितो मनसि केश्च नालक्षितः ॥
चरन्नपि निजैः समं हृदि निगूढगाढव्रणः
किशोरवरवारणोत्तम इवानिशं शीर्य्यति ॥ १३२ ॥

श्रवणवर्त्मेत्यत्र तस्येत्यनुक्तिः प्रेमवैवश्येनैवेति न्यूनपदतादोषो नाशङ्कनीयः, कैश्च कैरपि मनसि दुःस्थितः न आ सम्यक् लक्षितः ईषत्तु चतुरजनैर्लक्षित एवेत्यर्थः, तस्यातिगाम्भीर्येऽपि तादृशत्वद्विषयकभावस्य दुर्गोप्यत्वादिति भावः ॥ १३२ ॥

उक्तं च सखायं लक्षीकृत्य जनान्तिकं सखे कुसुमासव !
न वनगमने नाप्यासङ्गे वयस्यगणैः समं
न च मुरलिकागाने मोदो न धेनुगणावने ।
इममसृणवं यावत् कीरोत्तमाननिःसृतं
कमपि दयितालापं गाढानुरागभरालसम् ॥

श्यामाह मा हसनीयास्मि संप्रतिपन्नं मे वचनं च नन्दयितुं दयितुं चार्हति यदयं दयितालापमिति दयितात्वेन भवतीमुरीचकार । मुख्याह श्यामे ! श्यामेरितं नाध्यबोधि बोधिद्रुमदलोदरि ! मा परिहासकर्म धारय कर्मधारय एवायं न षष्ठीतत्पुरुषः ॥ १३३ ॥

मा हसनीयास्मि इतः परमहं त्वया हसितुं न शक्यास्मि मे वचनं नन्दयितुं च दयितुं कृपयितुं च अर्हसि ननु पूर्ववच्चिन्दितुं नाप्युपक्रममात्र एव छेत्तुमिति भावः । श्यामस्य ईरितं वाक्यं न अध्यबोधि भवत्या न ज्ञातं, बोधिद्रुमस्य अश्वत्थस्य दलवदुदरं यस्या हे तथाभूते इति सौन्दर्येणैव मत्तस्त्वमधिका त्वज्वी न तु विमर्शनैपुण्येनेति भावः । परिहासरूपं कर्म मा धारय मा कुर्वित्यर्थः । यतो दयितालापमित्ययं समासः कर्मधारय एव न षष्ठीतत्पुरुषः । ततश्च दयितश्चासावालापश्चेति तं । मेधाविनोऽधीतशास्त्रस्य शुकस्यालापो निसर्गादेव सकललोकस्य प्रियो भवत्येव किं पुनः सदा क्रीडापरस्य तस्य । अनुरागभरालसमित्यशृणवमितिक्रियाविशेषणं स्पष्टमेव तच्च व्याख्यातं, मया निगदितं वच इत्यादि तु शुककृतं पद्यमप्रमाणमेव ॥ १३३ ॥

तत्पुरुषः स खलु दुर्लभ एव किमसंभावनयानया
मामतिलघूकरोषि ॥ १३४ ॥

तत् तस्माद्धेतोः स खलु पुरुषो दुर्लभ एव इति प्राक्तनं मद्वाक्यमेव प्रमाणं त्वद्वचनं तु युक्तिक्लिष्टमिति भावः ॥ १३४ ॥

भवतु परमाद्भुतस्य तस्य दशा तादृशीदृशीषड्भाग-
धेये जने कथमीयतेऽनुमीयते नु वा कथं भवत्या ॥ १३५ ॥

ननु षष्ठीतत्पुरुषस्त्वया कथं खण्डित इत्यत आह । भवत्विति । तुष्यतु न्यायेन स्वीकारे भवतु षष्ठीतत्पुरुषस्तथापि परमाद्भुतस्य तस्य तादृशी भवत्या व्याख्याता दशा ईदृशे अल्पभाग्ये मल्लक्षणे जने विषये कथमीयते ज्ञायते निर्धार्यते

भवत्या इत्यर्थः । अनुमानादिति चेत्, नु प्रश्ने कथं वा अनुमीयते तत्र तादृशो हेतुरुच्यतां स तु नास्त्येव तस्मादपरस्यामेव कस्याञ्चित् तथा संभवेदिति भावः ॥ १३५ ॥

भवत्यात्मसमापि समापितोपरोधा परिहासे हा! सेधयति कौतुकं ॥ १३६ ॥

आत्मसमा मत्समापि भवती समापितः समाप्तीकृतः उपरोधो यया सा, हा खेदे, परिहासे विषये कौतुकं सेधयति सिद्धं करोति । सिधु संराद्धौ ण्यन्तः । न तु मदुपरोधेन व्यथिता भवती प्रत्युत कौतुकवती परिहसत्येव मां तस्मान्मय्यनुरोधस्तव नास्तीत्यर्थः ॥ १३६ ॥

साह अयि असमीक्ष्यभाषिणि! मधुरिका तेऽनुचरीति गोकुले को न वेत्ति सेयं यदा मदीयदेव्याः शुकोऽयमित्याललाप तदैवासौ भवतीमबोधिष्ट तदलमनयासंभावनयेति विश्रान्तो विवादः ॥ १३७ ॥

हे असमीक्ष्यभाषिणि अपर्यालोच्यैव सर्वं ब्रूषे इत्यर्थः । आत्मन्ययोग्यतामध्यारोप्य दैन्यादेवेति भावः ॥ १३७ ॥

अथैकदा भगवज्जन्मतिथिरतिथिरभूद्यदि तदा महामहारम्भेऽरं भेरीभाङ्कारलम्पटपटहपटुमर्दलदलन्मुरजदुन्दुभिदम्मदम्मकारचमत्कारकारिनानाध्वनिध्वनिते॥१३८॥

अथ "स्वप्नाद्वा श्रवणाद्वापि चित्रादेर्वाऽवलोकनात् । साक्षादाकस्मिकाद्वापि दर्शनाद्दुर्लभे जने ॥ प्राक्तनी रतिरुद्गते"त्याद्यलङ्कारकौस्तुभोक्तहेतुवैविध्येन जातपूर्वरागाणां विविधानामेव तासां "लालसोद्वेगजागर्या तानवं जडिमात्र तु । वैयग्र्यं व्याधिरुन्मादो मोहो मृत्युर्दशादशे"ति पूर्वदर्शितदशदशाप्रापिततादृशविपदां संधुक्षणार्थमिव शुभदैवयोगादेकस्मिन् दिने सर्वासामेव युगपदेव साक्षाद्दर्शनं समीपगमनोपायनप्रदानादिकमपि घटितमित्याह । अथैकदेति । तदा महामहारम्भे अजिते श्रीकृष्णे दिव्यासनमारूढे गोपा गोपाङ्गनाश्च प्रत्येकं तं पूजयामासुरित्यन्वयः । महामहो महोत्सवस्तस्यारम्भे कीदृशे अरं द्रुतमेव भेरीणां भाङ्कारैर्लम्पटैः प्रौढनिनदोद्गत्यर्थद्भिः पटहैर्दक्षैः स्वशब्दनचातुर्यवद्भिर्मर्दलैः दलद्भिः प्रस्फुटत्स्वनितैर्मुरजैर्दुन्दुभीनां च दम्मदम्मकारैश्चमत्कारिणो ये नानाध्वनयस्तैरेव ध्वनिते नानादिग्देशगतजनान् प्रति व्यञ्जिते ॥ १३८ ॥

ऽध्वनि तेषां घोषजुषां घोषजुषां समेधमाने मेधमाने परमानन्दे ॥ १३९ ॥

ततश्च अध्वनि पथि घोषजुषां व्रजवासिस्त्रीपुरुषसामान्यानां, घोषजुषां स्वीयनूपुरादिमृदङ्गादिशब्दयुक्तानां, समेधमाने सम्यग्वर्द्धमाने मेधमाने परस्परसङ्गमवति परमानन्दे सति । मेधृ संगमे शानजन्तः ॥ १३९ ॥

द्विजवृषभसभोदीरितमन्त्रपूतसलिलपरिपूरितस्फटिकघटसहस्रधाराघटसहस्रधाराघटमानाभिषेकमङ्गलामङ्गलावण्यलक्ष्मीं दधाने ॥ १४० ॥

ततश्च अजिते श्रीकृष्णे प्रथमं कीदृशे द्विजवृषभाणां द्विजश्रेष्ठानां सभाभिरुदीरितेन मन्त्रेण पूतैः सलिलैः पूरिता ये स्फटिकघटसहस्रधाराघटाः । स्फटिकानां घटे घटनं शिल्पविशेषविन्यासं सहस्रधा सहस्रप्रकारं रान्ति गृह्णन्ति धारयन्तीति सोमपाशब्दवत् आकारान्तः । तथाभूतैर्घटैर्याः सहस्रधाराः ताभिर्घटमानेनाभिषेकेण मङ्गलां मङ्गलभूतामङ्गानां लावण्यशोभां दधाने धारयति सति ॥ १४० ॥

धृतनव्यदिव्यपीतकौशेयप्रत्युद्गमनीये प्रत्युद्गमनीयेन मणिमण्डनमहसा महसारूप्यमहौज्ज्वल्ये ॥ १४१ ॥

ततश्चार्द्रशुष्कसूक्ष्मशुभ्रवस्त्रैर्गात्रजलापसारणं ज्ञेयं ततो वस्त्रादिपरिधानं । प्रत्युद्गमनीयं धौतोत्तरीयं "तत् स्यादुद्गमयं यद्धौतयोर्वस्त्रयोर्युग"मित्यमरः । प्रत्युद्गमनीयेन प्रत्युत्कर्षज्ञेयेन मणिमण्डनानां महसा कान्त्या महस्य उत्सवस्य सारूप्यमनुरूपत्वमौचित्येन तुल्यत्वमिति यावत् तेन महत् औज्ज्वल्यं यस्य तस्मिन् ॥ १४१ ॥

मङ्गलमणिबन्धमणिबन्धवलयोपरिपरिचितहारिद्रसूत्रनद्धदूर्वाङ्कुरे गोरोचनारोचनायतविशेषकविशेषकमनीये ॥ १४२ ॥

ततश्च मङ्गलान्येव मणयस्तेषां बन्धो यत्र तथाभूतस्य मणिबन्धस्य वलयोपरि परिचितेन हरिद्राक्तसूत्रेण नद्धौ बद्धौ दूर्वाङ्कुरौ यत्र तस्मिन् । ततो गोरोचनया रोचनायतं कान्त्या विस्तृतं यद्विशेषकं तिलकं तेन विशेषतः कमनीये ॥१४२॥

जनन्या जनन्यायविदो प्रवरयोत्सवरयोत्सवदामोदया दयाशीलया शिरसि निहिताशीःकुसुमधान्ये सबहुमानमाहूताभिः व्रजपुरपुरन्ध्रीभिर्मङ्गलगानपुरस्सरं सरन्तीभिः कृतनीराजने ॥ १४३ ॥

उत्सवरयस्य उत्सववेगस्य उत्सवः प्रकृष्टः सवः प्रसरः उत्पत्तिस्तं ददातीति तथाभूत आमोद आनन्दो यस्यास्तया कृतनीराजने कृतनिर्मञ्छने ॥ १४३ ॥

जनेन सकलेन कृतकौतुकयौतुकयौगपद्ये समनन्तरमनन्तरसोपकरणमोदकपायसापूपादिभिराहितसौहित्ये ॥ १४४ ॥

Digitized by Google

ततश्च सर्वजनेन कृतानि कौतुकेन यौतुकानि उत्सवदेयानि वस्तूनि तैर्यौगपद्यं तुल्यकालत्वं यत्र तस्मिन्। तदानीं पूर्वपश्चाद्भावमसहमानाः सर्व एव युगपदेव यौतुकान्युपाजह्रुरित्यर्थः। अनन्तरसान्युपकरणानि येषां तैर्मोदकादिभिराहितमर्पितं सौहित्यं तृप्तिर्यत्र तस्मिन् ॥ १४४ ॥

हित्ये सकलजन्यानां जन्यानां प्रेमधामनि पुनरपि नीराजितेऽजिते दिव्याचनमाहूठे रूठेद्धमहसि ॥ १४५ ॥

हित्ये हितहिते "तस्मै हित"मिति यत्। यद्वा हितार्हे दण्डादित्वात् यः। सकलानां जन्यानां सामान्यतः स्निग्धबन्धूनां तथा जन्यानां विशेषतो व्रजेश्वर्याः सखीनां प्रेमास्पदे "जन्याः स्निग्धा वरस्य ये" इत्यमरः। 'जन्या मातृवयस्या स्यादि"ति धरणिः। पुनरपि ताम्बूलप्राशनानन्तरं नीराजिते ताभिरेव कृतारात्रिके अजिते श्रीकृष्णे इति विशेष्यपदं रूठं प्रादुर्भूतमिद्धं दीप्तं महो यस्य तस्मिन् ॥ १४५ ॥

महसिद्धिनिमित्तमित्तरलतासिद्धबन्धुवर्गनिमन्त्रणव्यवहारेण व्रजमहिष्या निमन्त्रितेषु व्रजपुरपुरन्ध्रीजनेषु वधूजनकुमारिकाजनेषु व्रजराजेन निमन्त्रितेषु द्विजवृषभेषु सन्नन्दोपनन्दप्रभृतिसकलाभीरनिकरेषु च ॥ १४६ ॥

महस्य उत्सवस्य सिद्धिनिमित्ते मिदस्तरलतया स्नेहतारल्येन सिद्धः बन्धुवर्गाणां निमन्त्रणव्यवहारस्तेन। मिदिति ञिमिदा स्नेहन इत्यस्य भावक्विपा रूपम् ॥ १४६ ॥

सन्नन्दादिवधूभिः सह सकलगुणरोहिण्या रोहिण्या याचितेनोनाविधेरुपकरणैराशयितुं समुचितसमयसमागमे सति पुनरपि प्रतिभवनं तांस्तानानायितुं प्रेषितेषु स्त्रीपुंसपरिकरेषु समागतानां तेषां सर्वेषां मध्ये यथाक्रमं गोपा गोपाङ्गनाश्च परमसुकुमारं कुमारं तमाशीर्भिरभ्यर्चयितुमुत्कण्ठमानाः कण्ठमानाय्य मणिहारान् प्रत्येकं पूजयामासुः ॥ १४७ ॥

तांस्तान् पुरन्ध्रीजनादीन् द्विजवृषभादींश्च प्रेषितेषु स्त्रीपुंसपरिकरेष्विति व्रजेश्वर्या स्त्रीपरिकरेषु व्रजराजेन तु पुंपरिकरेष्विति यथाक्रमं पूर्ववत् ज्ञेयं। कण्ठमानाय्य कुमारस्यैव कण्ठं प्रापय्य कण्ठे समर्प्येत्यर्थः ॥ १४७ ॥

तदनु श्वश्रूम्मन्यानामनुपदीना अदीनाप्रपदीनाप्रपन्नमालिन्यप्रतनुतरप्रावारविवरविवेक्षीयमाणातनुकिरणकन्दलीकाः ॥ १४८ ॥

श्वश्रूम्मन्यानां गर्वोद्धुरजटीपकोत्कजटिलाभारुण्डादीनामनुपदं प्रविशन्त्यः "अनुपदसर्वान्नायानयं वद्धाभक्षयतिनेयेष्व"त्यत्र बद्धेत्यस्य पारतन्त्र्यमयप्रवेशवद्वाचित्वात् खः प्रत्ययः। अदीनमतिबहुमूल्यमाप्रपदीनं पादाग्रपर्यन्तव्यापि अन्तरीयवस्त्रं यासां ताः। "आप्रपदं व्याप्नोती"ति खः। अप्रपन्नमालिन्यं पूर्वरागलक्षणविरहजनितं यस्यास्तथाभूता प्रतनुतरस्य प्रकृष्टसूक्ष्मतरस्य प्रावारस्य उत्तरीयवस्त्रस्य विवरेभ्यः सूक्ष्मसूक्ष्मरन्ध्रेभ्योऽपि वेवीयमाणा अतिशयेन विवृतिमती स्वप्रकाशकारिणी तनोर्देहस्य किरणकन्दली कान्तिश्रेणी यासां ताः। "द्वौ प्रावारोत्तरासङ्गावि"त्यमरः ॥ १४८ ॥

मृदुतानवतानवचलचोनावगुण्ठनपटाञ्चलचञ्चलैरन्तरुदित्वरत्वरमाणस्वभावभावपिशुनैरपि तत्कालीनावहित्थया निर्विकारकुटिलावलोचनैर्लोचनकुवलयैर्वलयैरप्यमुखरैः खरैरनुरागिस्ताः काश्चन नवानुरागिण्यो दैवोपपन्नसंपन्नसंस्तवस्तवकितसौभाग्यभाजनतया जनतया अतर्क्यमानया परममहानिधिवल्लभमानवल्लभमाननया दायदायमददत ॥ १४९ ॥

ताः काश्चन नवानुरागिण्यो दायदायं दायस्य दानमददत दत्तवत्यः। "यौतुकादिषु यद्देयं स दाय"इत्यमरः। दायमददतेति, दानं दद्याद् मवां, वचनमुवाच, सत्यवादी, सत्यं वदतीत्यादिवत् पौनरुक्त्यमविरुद्धं। केन प्रकारेण मृदुतानवेत्यादिविशेषणविशिष्टैर्लोचनकुवलयैः परममहानिधिवल्लभमानवल्लभा या मानना संमानना तया, परममहानिधिरूपो यो वल्लभः कृष्णस्तस्य मानवती आदरयुक्ता लभा लाभो यस्या यया वा तथाभूता चासौ मानना चेति तया। लभेति डुभलष संप्राप्तावित्यस्य पित्त्वादङ्। कीदृश्या जनतया तत्रत्यजनसमूहेन अतर्क्यमाणया। लोचनकुवलयैः कीदृशैः मृदुतया कोमलतया नवेन तानवेन निर्माणवैरल्यकल्पितया श्लक्ष्णतया चलं स्वभावादेव चञ्चलं यच्चीनस्य सूक्ष्मसूत्रावगुण्ठनपटस्याञ्चलं तस्माच्चञ्चलैस्ततो निसृत्य चलद्भिरिवेत्यर्थः। अन्तः अन्तःकरणे उदित्वरः उदयशीलः त्वरमाणस्त्वरायुक्तः स्वभावो यस्य तथाभूतो यो भावश्चापलाख्यसंचारी तस्य सूचकैरपि तत्कालीनया तत्कालजनितया अवहित्थया लज्जाहेतुकतादृशभावगोपने हेतुना निर्विकारमेव कुटिलं तिरश्चीनमवलोचनमवलोको येषु तैः। अमुखरैर्निःशब्दैः वलयानाममौखर्यं संकोचप्रश्रयाभ्यां शैथिल्यव्यञ्जकं हस्ताभ्यां गृहीत्वा दायप्रदानसमये तेषां तत्प्रसक्तिः स्यादिति निषेधः। खरैस्तीक्ष्णैरतिगाढैरित्यर्थः। कया योग्यतया तादृशसंमाननेत्यपेक्षायामाह। दैवेन शुभादृष्टेनैव उपपन्नो यः संपन्नसंस्तवः संपूर्णपरिचयस्तेन स्तवकितं तादृशपुण्यफलार्थं कोरकितं यत् सौभाग्यं तस्य भाजनतया पात्रतया ॥ १४९ ॥

Digitized by Google

॥ ज्ञानसिद्धान्तचन्द्रिका ॥

बर्क्लेसंज्ञकमहापण्डितविरचितज्ञानसिद्धान्तमालायाः

अवतारिता ।

अथ चत्वारिंशदधिकशततमादिपरिच्छेदाः ।

१४०—इदं तु बोध्यम् । आत्मनो वृत्त्यात्मकज्ञानस्य विरहेपि किमपि व्यापकार्थकं तज्ज्ञानं भवत्येव । अन्यथा आत्मनः साक्षात्काराभावे तदुद्देश्यकयोर्विधिनिषेधयोरेवानुपपत्तेः । अपरं च स्वात्मनिष्ठवृत्तिज्ञानैः परात्मनिष्ठवृत्तयइव स्वात्मना परात्मानोनुमीयन्ते इति स्वात्मनि परात्मसादृश्यमारोप्येत । परंत्वीदृशं स्वपरात्मसादृश्यं स्वपरात्मनिष्ठयोः शुक्लत्वकृष्णत्वलक्षणयोः सादृश्यमिवाप्रयोजकम् ॥

१४१—आत्मनः स्वाभाविकममर्त्यत्वं चास्मन्मतादेव निर्गच्छति । तत्स्वाभाविकामर्त्यत्वोक्त्या न तत्स्रष्टाऽनन्तशक्तिमानीश्वरोपि तं नाशयितुं नालमित्यभिप्रेमः किंतु प्रायिकैः प्राकृतिकनियमैरविकार्यत्वमेव । येत्वात्मानं प्रतनुज्योतीरूपं प्राणं भूतसंयोगजशक्तिविशेषात्मकं वा ब्रुवते तेषां नये शरीरस्येवात्मनोपि चयवृद्ध्यादिकमापद्येतैव । तादृशप्रतनुज्योतीरूपस्यात्मनः स्वावरकशरीरनाशेऽविनाशासंभवात् । पुरुषाप्रसदास्त्विदम् मतं सकलधर्मोपदेशोल्लङ्घनभयमोचकं बुध्वा सतृष्णमाश्रयन्ते । परंतु यत्किमपिपरिमाणवतः शरीरस्य अज्ञानात्मकतया जडत्वादात्मनस्तु चेतनत्वात् तयोस्तेजस्तिमिरयोरिव साजात्यमुपादानोपादेयत्वं वा न कथमपि संघटते । किंचात्मनोऽमूर्तत्वाद्विभुपरिमाणत्वादभेद्यत्वाच्चाविकार्यत्वमेव युज्यते । एवंचोपचयापचयास्थित्यादिरूपपरिणतिप्रवाहः प्रतिक्षणं पार्थिवादिपिण्डेष्वेवोपलभ्यमानो विशुद्धं चेतनं न कदापि विषयीकुर्यादित्यात्मनि प्रकृतिव्यापाराणां व्याहतत्वात्तस्य स्वभावतोऽमर्त्यत्वमेव पर्यवस्यति ॥

१४२—एतावता ग्रन्थेनात्माऽचेतनविषयवदुपलब्धिविषयो न भवतीति प्रपञ्चितम् । तयोः सर्वथाविरुद्धधर्मवत्त्वेन नितरां वैसादृश्यात् । ननु ज्ञेयत्वेन सत्तावत्त्वेन वा तयोः साधर्म्यस्य संभवात्सादृश्यं सुलभमिति चेन्न ।* केवलयोरुक्तधर्मयोः सादृश्यानियामकत्वात् । तथाचाधिकेन्द्रियसंपत्तौ ज्ञानशक्तिवृद्धौ वा त्रिकोणक्षेत्रादिस्थूलवस्तूनामिवात्मनो ज्ञानं सुलभं स्यादिति प्रत्याशा चक्षुषा शब्दज्ञानस्याशेवापार्था । इत्थं पर्यवगते न कोप्यात्मविषये भ्रमस्सन्देहो वाऽशिष्येत । तथाचात्मव्यापाराणां ज्ञानेच्छाकृतीनां ज्ञेयत्वेऽपि न तज्ज्ञानस्य वृत्तिपदाभिधेयत्वं किंतु स्वरूपज्ञानाख्यत्वं तद्विषयीभूतानां पदार्थज्ञानानां तु वृत्त्यभिधेयत्वमेवेति विवेकः । यद्यपि स्वरूपज्ञानवृत्तिज्ञानपदयोः पर्यायत्वे न कोप्यनुभवविरोधस्तथापि विजातीयपदार्थानां समानाभिधाने जना वस्तुस्वभावविषये भ्राम्येयुरिति तथासंज्ञाभेद उपाश्रीयते । आत्मव्यापाराणामिव संयोगादिज्ञानसंबन्धानामपि ज्ञानं स्वरूपज्ञानकोटिप्रविष्टमेव बोध्यम् । यद्यखिलानामात्मानात्मनां वृत्तिपदव्यवहारे एवाग्रहश्चेन्नामविषयकएवायमाग्रहो नत्वर्थविषयक इति तथात्वेपि न कापि क्षतिः ॥

१४३—अभेदाभेदज्ञानसिद्धान्तोपि न स्वल्पं ज्ञानकाण्डं तिमिरयति । यतोहि लोका आत्मव्यापारादीनामभेदाभेदज्ञानानि सुलभानि मत्वैकैकमात्मव्यापारं न केवलं स्वविषयविनिर्मुक्तं प्रत्युतात्मवियुक्तमपि विभावयामासुः । तद्बोधनाय व्यामोहकाभिनवसंज्ञाश्चाध्यात्मादिशास्त्रेषु प्रचिक्षिपुः । येन विदुषां मध्येऽनन्ता विवादाः शास्त्रकाठिन्यं चाजनिषत ॥

१४४—किंचात्मधर्मादिविषयकाणां मिथ्यामतानां मुख्यं बीजं तु तादृशपदार्थबोधनतात्पर्येणौपचारिकपदप्रयोग एव । यथा कृतिरात्मगतिरित्यभिधीयते । मन्यते च लोके यदात्मा लगुडेन कन्दुकइवेन्द्रियकविषयैः प्रेर्यते इति । इदमेव मूलमासाद्य बहवो विवादाः संदेहाश्च प्ररोहन्ति । परंतु यदि बुधाः सर्वाणीमानि व्यामोहकवाक्यान्युपेत्य क्षणमात्मनि विश्राम्येयुस्तर्ह्यपगताखिलभ्रमसंदेहखेदाः सन्तो यथावद्वस्तुतत्त्वान्युपलभेरन् ॥

१४५—स्वेतरात्मसत्ता त्वनुमानादेव सिद्ध्यति । तथाहि । स्वकर्तृकव्यापारानिवान्यव्यापारान् वीक्ष्य स्वमिव तादृशव्यापारकर्तारोऽन्यात्मानः सन्तीत्यनुमीयते । ज्ञानविशेषाविर्भावतिरोभावोपलम्भश्चात्मनां तादृशज्ञानाधिष्ठातृत्वं प्रत्याययति । एवंचात्मान्तराणि न वृत्तिज्ञानानीव साक्षाज्ज्ञायन्ते किंतु तत्कार्यभूतत्वेन तत्सहचरितत्वेन वोपलब्धज्ञानद्वारैव ॥

१४६—यद्यपि कतिपयविषयाणां मनुष्यकृतिसाध्यत्वं प्रतीयेत तथापि प्राकृतिककार्यापरपर्यायाणां भूयिष्ठानां वस्त्वन्तराणां मनुष्यकृतिनिरपेक्षत्वं सर्वानुभूतमस्त्येव तानि कार्याणि तु स्वतो वर्तितुं न शक्नुवन्तीत्येकोनत्रिंशत्तमपरिच्छेदोक्तदिशा तत्कर्त्रात्मान्तरमनुमीयते । परंतु प्राकृतिककार्याणां सुव्यवस्थितरचनां नियतपौर्वापर्यक्रमं च बृहत्कायानां तु तेषामविकलाङ्गत्वद्युतिसौन्दर्यं च ह्रस्वकायानां पुनः सूक्ष्मसूक्ष्मावयवसन्निवेशचातुरीं सर्वेषां संभूय समस्तजगदानुगुण्यं च किं बहुना प्राणिनामनवाप्रपर्याप्रस्तुतोन्त्सुखदुःखनियमांश्चेष्टाविशेषेषु नैसर्गिकप्रावण्यानि धर्म्याधर्म्यादिवासनाः कामक्रोधादिभावांश्च यदि वयं सावधानं निरीक्षेमहि यदि चाद्वितीयोऽनाद्यनन्तः सर्वज्ञः सर्वशक्तिमान्सकलजन्तुहितैषीत्यादिविशेषणानां यथार्थार्थमवद्धीमहि तर्हि पूर्वोक्तमनुमानं सर्वाधारं

* सादृश्यस्य तु तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वात्मकत्वात् ।

परमात्मानमेव लक्ष्यीकरोतीति स्पष्टमवगच्छेम । तथाचोच्यते "आत्मवेदं सर्वं सृजति तस्मिंश्चैव तदवतिष्ठत" इति ।

१४७–एवंच जीवात्मनामिव परमात्मनोपि सत्ता प्रामाणिकी परिस्फुटा च । प्रत्युत मनुष्यकार्याण्यपेक्ष्य प्राकृतिककार्याणामतिप्राचुर्याद्दुरुहतरार्थकत्वाच्च जीवसत्तातः परमात्मसत्ता दृढतरं प्रामाण्यमावहति । किंबहुना जीवकर्तृकं कार्यमपि परमेश्वरसत्तां प्रत्याययति । मनुष्याकृतिर्हि पुरुषान्तरे विकारमुत्पादयिष्यन्ती केवलं स्वशरीरावयवचेष्टाविशेषानेव प्रवर्तयति । तादृशचेष्टाभिः पुरुषान्तरे विकारोत्पादस्तु सर्वात्मना स्रष्टुरिच्छाधीन एव । परमात्मैव लोकव्यवहारं प्रविवर्तयिषुर्जीवात्मसु मिथोबोध्यबोधकत्वं विदधाति । येन तेऽन्योन्यमाकलयितुं प्रभवन्ति । यथाचोच्यते "येनैव सर्वं स्वशक्त्या संविधीयत" इति । परंत्वेवं प्रकाशरूपोनिरामयोखिलावभासकोपि भगवानिन्द्रियागोचर एव वर्तते ।

१४८–वयमीश्वरं न जानीमो यतस्तं द्रष्टुं न शक्नुमः । तमद्रक्ष्याम चेत्तर्हि तत्सत्तां व्यश्वसिष्याम तदाज्ञां चापालयिष्यामेतिजल्पन्तं पामरगणं प्रतिब्रवीमि हंत भोः केवलं नेत्रमात्रमुन्मील्य सर्वत्र काशमानं सर्वाधीशं भूतग्राममपेक्ष्याधिकस्पष्टेन स्वच्छतरं चालोकयिष्यमिति । परंतु नैतावताहं माल्ब्रांशाचार्यइवेश्वरं साक्षाच्चक्षुर्विषयं मन्ये इतिमन्तव्यम् । मम मते तादृशकल्पनाया दुरुपपादत्वात् । माल्ब्रांशोहि बाह्यद्रव्यदर्शनासंभवं बुद्ध्वा न तानि स्वरूपतो ज्ञायन्ते किंतु द्रव्यप्रतिबिम्बतां गतेन परमात्मचैतन्येन द्वारेणेत्याह । ममत्वयमनुभवोयज्जीवात्मानो यथाऽशरीरत्वाद्यनक्त्वादिन्द्रियैर्न गृह्यन्ते किंतु व्यक्तिविशेषगतगत्याकृतिवर्णादीनां दर्शनात्स्वात्मन्युत्पद्यमानैर्नानाविधसमुदायरूपेण तत्रोपस्थितैश्च ज्ञानविशेषैरनुमाप्यन्ते । अतएव न कोपि पुरुषः साक्षाज्ज्ञायते किंतु ज्ञानविशेषसमुदायैः स्वसहचरितगतिविवेकमूलत्वेन ज्ञाप्यत इत्युच्यते । तादृशपुरुषपदेन स्वमिव जीवतो जानतश्चिन्तयतश्चेतनविशेषस्यैव विवक्षणात् । तथैवेश्वरोपि न साक्षात्कर्तुं शक्यते ऽपि त्वनुमीयत एव । तयोरियानेव विशेषो यदात्मानं कश्चित्परिच्छिन्नो ज्ञानगणो ज्ञापयति, परमात्मानुमापकलिङ्गानि तु सर्वत्र सर्वदा च सुव्यक्तमुपलभ्यन्ते । सर्वस्यापि चक्षुःश्रोत्रत्वगादिविषयस्य किंबहुना जीवचेष्टाया अपि केवलं परमेश्वरेच्छासिद्धत्वात् ।

१४९–तथाचेश्वरसत्ताज्ञानं स्वल्पविवेकशालिनामपि सुगमम् किम् पुनर्विदुषाम् । तस्य सर्वेषां सदा निकटवर्तित्वाच्छरीरयात्रानिर्वाहकाद्यखिलज्ञानपरम्पराजनकत्वेन सकलजीवजीवनैकाश्रयत्वाच्च । तथाच स्मर्यते "येनैव सर्वे जीवा जीवन्ति वसन्ति चेष्टन्ते चेति" । सोयं परमार्थो दैनंदिनव्यवहारगोचरोपि न कैश्चिदप्यनुसन्धीयत इति तु लोकप्रमादात्तयोरेकमतिविचित्रोदाहरणं प्रतीयते । यतस्तेषां चेतांसि परमेश्वरप्रख्यापकेषु पदार्थेषु परितो भूरिशो वर्तमानेष्वपि प्रकाशातिशयान्धीकृतलोचनानीव मार्गव्यालोचयन्ति ।

१५०–किंहो सर्वं कार्यजातं साक्षादीश्वरकर्तृकमेवास्तिचेदुच्यतां प्रकृतिः किमनुतिष्ठतीतिचेच्छृणु । किंस्वित्प्रकृतिः किंचिन्नियमानुसारि दृश्यकार्यप्रवाहमात्रमुत तस्मात्क्रियात्मकेश्वराच्चातिरिक्तमेव किंचिदिष्यते । आद्यं चेत्कार्याणां जडत्वस्य सर्वसंमतत्वेन तस्या निष्क्रियत्वं निर्विवादम् एव । यदि द्वितीयं तर्हि तादृशपदार्थस्याप्रसिद्ध्याप्रकृतिरेव न संभवति । यद्यपीश्वरस्य सर्वव्यापकत्वसर्वशक्तिमत्त्वादिधर्माणामनभिज्ञैर्नास्तिकैस्तथाविधा किंचिद्रूपाया एव तस्याः सर्वकर्तृत्वं स्वीक्रियते तथाप्यास्तिकानां धर्मसंहितां च श्रद्दधतामीशवीयानां तु तथाकल्पनमसमञ्जसम् । धर्मपुस्तकेषु भूयोभूयस्साक्षादीश्वरस्यैव सर्वकर्तृतायाः प्रतिपादनात् । तथा च स्मर्यते खीष्टान्तेवासिजेरमाख्यमुनिस्मृतौ दशमाध्यायस्य त्रयोदशपरिच्छेदे-" स एव बाष्पमुद्गमयति समेघां विद्युतं च सृजतीत्यादि" । अमोसाभिधोप्याह स्वसंहितायां पञ्चमाध्यायस्याष्टमपरिच्छेदे "स एव निशीथमहनि परिवर्तयति दिनं च रात्रिरूपे" इति । एवं सामाख्यायां भगवद्गीत्यामपि श्रूयते पञ्चषष्टितमोल्लासे । "स वै भूमिमवतरंस्तां वर्षार्द्रां करोति, महीरुहान् प्ररोहयति, द्वादशापि मासान्स्वप्रसादचिह्नैरलंकरोति चेति । अत एव गोचरो गोवृन्दैः क्षेत्राणि च शस्यैराव्रियन्ते" इति । एवमादिष्वनेकनिगमोक्तिषु सतीष्वपि न जाने केन हेतुना जना जगत्स्रष्टुः साक्षात्सकललोकतन्त्वनिर्वाहकत्वं न विश्वसन्ति प्रत्युत महात्मनि पाल्भमुनौ तं भगवन्तं प्रतिव्यक्त्यन्तिकतमं कथयत्यपि तमतिविप्रकृष्टं विभाव्य कां चनानिर्वचनीयां प्रकृतिं सर्वप्रसूं परिकल्पयन्ति ।

१५१–नन्वस्मिंल्लोकप्रपञ्चे कार्याणामनुक्रमं नियमविशेषपारतन्त्र्येण च जननादकालजननमरणानां फलोदयात्प्रागेव पुष्पनाशस्यानुर्वरप्रदेशे वृष्टेर्नृशंसप्राणिसृष्टेर्जन्तुविपद्दुःखादीनां च दर्शनादयं संसारोऽनन्तज्ञानदयानिधिना परमेश्वरेण स्वयं सृष्टः साक्षादधिष्ठितो वा प्रतीयत इत्याक्षेपस्तु द्वाषष्टितमपरिच्छेद एव समाहितः । सर्वसाधारणान्सर्वदैकरूपान्सुनिश्चितनियमाननुसरन्त्यां सांसारिककार्योत्पत्तौ निरुक्तसृष्टिक्रमस्यात्यावश्यकत्वात् । नियमानुसारिकार्योत्पादस्यैव वैश्व-

Digitized by Google

रचिन्त्यचातुर्यलिङ्गत्वात् । भगवता हि तथा परमविलक्षणकौशल्येनैतत्संसारचक्रं निरमायि यथा सत्स्वपि तद्विषयेष्वस्मज्ज्ञानगोचरेषु तच्चालकः केवलेन चर्मचक्षुषा ग्रहीतुं न शक्यते । तथ्यमाह दैवज्ञ ईशेहाख्यो मनुष्यमुद्दिश्य स्वनिबन्धस्य पञ्चचत्वारिंशत्तमाध्याये पञ्चदशपरिच्छेदे । "परमात्मैवासि ननु निगूहस्यात्मानमिति" । यद्यप्यलसानां सर्वथा विचारक्लेशाक्षमाणां विषयिणां परमात्मा न क्वापि दृश्यते तथाप्यन्तश्चक्षुषां मिथ्यामतादूषितहृदयानां विदुषां तु स सर्वत्र काशमानः सर्वकर्ता सर्वसाक्षी सर्वनियामकः स्वसंनिकटस्थ एव च प्रतिभाति । एतेन लोकव्यवहारे कार्येकार्याणां सम्भाव्यासंभाव्यानां च विषयाणां प्राकृतिककार्यनिगूढतत्त्वानां च सम्यग्ज्ञानाय नियतिक्रमानुसारिकैर्यास्थितिरत्यावश्यिकास्तीत्यपि स्पष्टम् । तन्नियमाभावे तु नैतत्सिद्ध्येत् । तादृशज्ञानानुकूलानुमानादीनामेवासंभवात् । अनुमित्याद्यसहकृतस्यात्मन इन्द्रियागोचरं वृत्तं ज्ञातुमक्षमत्वाच्च । प्रपञ्चितं चेदमेकत्रिंशत्तमपरिच्छेदे । एवं चाशेषविश्वस्येश्वरनियमसिद्धत्वात्स्थलविशेषे प्रायिकस्थितिवैपरीत्यस्यापि तत्त्वाददूष्यत्वमेवेति बोध्यम् ।

१५२—किंच चित्रफलकगतान् भास्वरवर्णांस्तदन्वितकृष्णच्छायेव लौकिकवृत्तानां कादाचित्को विपर्ययस्सृष्टिरचनावैचित्र्यमधिकं सुशोभयति । तथाचोत्पत्तिबीजानां भ्रूणानां महीरुहाणां जन्तूनां चाकालिकाकस्मिकनाशस्य दर्शनात्स्रष्टरि नैर्घृण्याविमृश्यकारित्वाद्यारोपः क्षुद्रानुदारधीकृत एव । भूरिपरिश्रमोद्योगसाध्यवस्तूनां मितव्ययो लोके नूनं मनुष्यचातुर्यं व्यञ्जयेत् परंतु परमेश्वरस्येच्छामात्रेणैव सर्वस्रष्टृत्वादचिन्त्यरचनानां प्राणिमहीरुहादिसंस्थितीनामपि निर्माणे तृणलोष्टादिनिर्माणापेक्षितश्रमाधिकश्रमानपेक्षणात्स्रष्टवस्तूनामपरिमितव्ययेपि नासामञ्जस्यम् । तथाच क्षणभङ्गुरायाः सृष्टेरतिसमृद्धिर्न तत्स्रष्टुरविमृश्यकारित्वमतिव्ययित्वं वा सूचयति किंतु तच्छक्त्युद्रेकमेवेत्यपि बोध्यम् ॥

१५३—एवं साधारणप्रकृतिनियमवशाज्जगति मर्त्यान्तःकरणेषूत्पद्यमाना उत्पातखेदा अपि लोकानामत्यन्तं हितमेवावहन्ति । मनुष्यबुद्धिः पुनरेकदेशित्वाच्च तथावगन्तुमीष्टे । अतएव लोके कस्यापि व्यक्तिविशेषस्य किंचिदनिष्टं बुद्ध्वा तदनुचितमिति मन्यते । परंतूदारयाधिया तादृशदुःखदानप्रयोजनेषु सृष्टपिण्डानां परस्परमाश्रयाश्रयिभावेषु मनुष्यसृष्ट्यभिसन्धौ मनुष्यकृत्यऽपारतन्त्र्ये च पर्यालोचितेषु सर्वाणि प्रातिस्विकदुःखादीनि समस्तजगत्संस्थितिदृष्ट्या योग्यतराण्येव प्रतीयेरन् ॥

१५४—नास्तिक्यस्य पाषंडत्वस्य वा प्रसरस्तु केवलं जनानां प्रमादादमनोयोगाद्वा प्रभवतीति प्रस्फुटम् । यदि पामरा ईश्वरचरितान्युपेक्षेरंस्तर्हि न चित्रम् । तेषां विचित्ररचनासौन्दर्यकौशल्यादीनां ग्रहणेऽक्षमत्वात् । यच्च पुनर्विचारशीलाः सूक्ष्मधिषणावन्तोपि कोविदा ऐश्वरीं सृष्टिरचनाचातुरीं सर्वत्रोचितां दयालुतां च न सावधानं विलोकयन्तीति तु तेषां प्रमाद एव । बुद्धिपूर्वकेण विचारपराङ्मुखत्वेन ज्ञानचक्षुःपिधानेन वाऽऽदित्यवदात्मनि देदीप्यमानमपि किं किं ज्ञानतत्त्वमलक्षितमेव न तिष्ठेत् । एवं च विवेकिपुरुषैकगम्यमीश्वरज्ञानं यदि सदा सांसारिकविषयेष्विन्द्रियसुखेषु वा व्यासक्ताः स्वप्नेप्यात्मचिन्तनमकुर्वाणाः प्राकृता नासादयेयुस्तर्हि किं चित्रम् ॥

१५५—किंच जनानामीश्वरास्तित्वे सन्देहो न तथाऽऽश्चर्यवहो यथा तेषां तत्र सर्वात्मनोपेक्षाबुद्धिः । अद्भुततरं त्वेतद् यद्बहवो गुणवन्तो लौकिककृत्येषु कृतकृत्या आस्तिकसंसर्गिणोपि पुरुषाः केवलं परमार्थोपेक्षया विचारालस्येन वा नास्तिकपक्षमवललम्बिरे । यद्यपि ते परमेश्वरं सर्वथाऽपलपितुं न शक्नुवन्ति तथापि तत्सत्तायां न विश्वसन्ति । यदि च ते पावित्र्योचितकारित्वसर्वव्यापकत्वादीश्वरगुणान् यथावदज्ञास्यंस्तर्हि तस्य तन्नियमानां चोपेक्षणे न सहसा प्रावर्त्स्यन् । अतः स्वश्रेयोर्थिना पुंसा मनोयोगपुरस्सरं तादृशाः परमेश्वरगुणाः सम्यगनुसंधेयाः । येन "स सर्वतश्चक्षुः सर्वेषां गुणं दोषं च पश्यति । स सर्वत्रावस्थितः सर्वान् प्राणिनो यथायथं स्थानेषु स्थापयति तेभ्योऽशनाच्छादनं च ददाति । मामवीयनिगूढतमेष्वपि भावेषु वर्तमानोऽशेषांस्तत्सङ्कल्पान् जानाति । जीवजातं च सर्वात्मना तदाश्रितमेवास्ती"ति निगमाद्युक्तवाक्यानां याथार्थ्यं प्रतीयेत । एषां महावाक्यानां सम्यग्ज्ञानमेव पुंहृदीश्वरविषयकं भयादरादिकमप्रमत्तत्वं च जनयेत् जनानां धर्मे प्रवृत्तिमधर्मादुपरतिं च कुर्यात् ।

१५६—ग्रन्थावसाने स्वपाठकानिदमेव विज्ञपयामि यन्ममैतावान् प्रयासः केवलं जनान्परमेश्वरानुसंधाने स्वधर्मानुष्ठाने च प्रवर्तयितुमेव । सर्वेषां मनुष्यकार्याणां तयोरेवाभ्यर्हितत्वात् । यद्येतद्ग्रन्थद्वारा जनानां परमात्मनि तद्यथार्थज्ञानपूर्विकां भक्तिमुत्पादयितुं तथा विद्वदनुपेक्षितानां निरर्थककल्पनानां मिथ्यात्वं प्रदर्श्याऽऽगमोक्तेषु कल्याणैकमात्रसाधकेषु परमार्थेषु तेषामत्यादरं च जनयितुं न शक्नुयां तर्हि सर्वमिमं ग्रन्थप्रयत्नं व्यर्थमेव मनुयाम् । इति श्रीमद्बर्क्ले संज्ञकमहापण्डितविरचितज्ञानसिद्धान्तमालाया अवतारिता ज्ञानसिद्धान्तचन्द्रिकासमाप्ता ॥

THE

ŚULVASŪTRA OF BAUDHĀYANA,

WITH THE COMMENTARY BY DVĀRAKĀNĀTHAYAJVAN

(Continued from page 146.)

SECOND ADHYĀYA.

परिमण्डलायां यावत्संभवेत्तावत्समचतुरश्रं कृत्वा तन्नवधा विभजेत् । ७०

When the gārhapatya is circular, a square as large as possible is to be drawn in it, and this square to be divided into nine parts (squares).

Two diameters standing at right angles on each other are drawn in the circle and their end points joined by four lines; these are the sides of the largest possible square. In the first layer the corners of the square point towards the north-east, the north-west, etc.

अर्धव्यायामेन मण्डलं परिलिखेदित्युक्तम् । तत्र यावत्प्रमाणं समचतुरश्रं कृत्वा तन्नवधा विभजेत् । येषम-न्यूनानतिरिक्तं मण्डलमध्ये संभवति । तावत्प्रमाणं समचतुरश्रं कृत्वावान्तरदिक्षु यथा स्रक्तयस्तथा विष्कम्भार्धे-द्विकरण्यष्टषष्ट्यङ्गुलेन चतुस्तिलोनेन समचतुरश्रं कृत्वा तच्चतुरश्रं नवधा विभजेत् ।

प्रधींस्त्रेधा विधेति । ७१

The parts on the circumference of the circle, *i. e.* the segments adjoining the four sides of the square are to be divided into three parts each.

प्रधिरिव प्रधिः । प्रधिश्चक्रपर्यन्तः । तांस्त्रेधा विभजेत् । इतिरेवमित्यर्थे । एवमेकविंशतिः संपद्यन्त इत्यर्थः । जानोः पञ्चमप्रमाणोत्सेधं व्यायामविष्कम्भपरिमण्डलमेवं क्वचिदापाद्योक्तेन मार्गेण विभजेदित्याचार्यस्य पक्षः । गणितविदः करणीरिष्टकाः कुर्वन्ति । त्रीणि करणानि । समचतुरश्रं प्रधिमध्यं प्रध्यन्तमिति । समचतुरश्रं द्वात्रिंशत्यङ्गुलं सैकविंशतितिलम् प्रधिमध्यमपार्श्वमान्योः प्रमाणमेतदेव । तिर्यङ्मान्यो दशतिलोनत्रयोदशाङ्गुले । एकं पार्श्वफलकं धनुरिव नमेत्[1] । यथाङ्गुलिर्द्वादशतिलाः शरप्रमाणं भवति । प्रध्यन्तं तु त्रिकरणम् । तस्यापि चतुरश्रवदेकं पार्श्वम् । अपरं पार्श्वं त्रयोदशाङ्गुलं दशतिलोनम् । षडंशकं तिलद्वयोनमपरम् । धनुरिव नमेत् । यथाङ्गुलिः सप्तविंशतितिलाश्च शरो भवति । प्रथमे प्रस्तारे चतुरश्रस्रक्तीरवान्तरदिक्षु संपादयेत् ।

[1]. A. B, नमयेत्

अपरं प्रस्तारं तयोर्मध्याद्यथा प्रध्यन्तीकेषु स्रक्तयो भवन्ति । ७२

The second layer is to be placed in that way that the corners of the square are situated in the middle of the pradhis (of the first layer; by shifting the position of the bricks in the described manner the bhedas are avoided. The corners of the square are turned towards the east, the north, etc.)

प्रध्यन्तीकेषु प्रधिमध्येषु चतुरश्रस्रक्तयो भवन्ति । महादिक्ष्वित्यर्थः ।

धिष्ण्या एकचितीकाश्चतुरश्राः परिमण्डला वा । ७३

The dishnya-fires have one layer only; they are either square-shaped or circular.

एकचितीका एकप्रस्ताराः । एकचितीकत्वं प्राप्तस्य पुनर्वचनं प्रयोजनं पशुधर्मपरिग्रहार्थम् । ततश्च खण्डामित्यादिप्रतिषेधो ऽप्याग्नयणीयः । चतुरश्राः परिमण्डला वा । धिष्ण्यानां द्विःप्रादेशो विष्कम्भ इति वचनात् । मानाधारस्य चेचत्यारत्निविष्कम्भपरिमण्डलत्वान्मण्डलं चतुरश्रमित्यादिना चतुरश्रकरणम् । तत्र चतुरश्रकरण्येकविंशतिरङ्गुलयो नव तिलाश्च ।

तेषामाग्नीध्रीयं नवधा विभज्यैकस्याः स्थाने ऽश्मानमुपदध्यात् । ७४

Among those (the dhishnya-fires) the āgnīdhrīya is to be divided into nine parts and instead of one brick a stone to be placed.

When the āghnīdhrīya is square-shaped, it is divided into nine small squares, and the square in the centre covered with a stone instead of a brick; when it is circular, a round stone of eight angulis diameter is placed in the centre of the circle, the remaining area of which is divided into eight equal parts.

तेषां धिष्ण्यानां मध्य आग्नीध्रीयं नवधा विभज्य मध्ये दिवो निहितः पृश्निरश्मेति लिङ्गान्मध्यमामुद्धृत्य तत्प्रमाणमश्मानमुपधाय पुरस्तादारभ्येतराभिरुपधानम् । एतासामेकं करणम् । विभागविधानेन करणान्युपदिष्टानीति वेदितव्यं सर्वत्र । परिमण्डलपक्षे ऽष्टाङ्गुलविष्कम्भं परिमण्डलमश्मानं मध्ये निधाय परितः सममष्टधा विभजेत् । एवं भूमौ लिखित्वेष्टकाः कारयेत् । तत्र बाह्यफलकं बहिर्वक्रम् । अभ्यन्तरफलकमन्तर्वक्रम् ।

Digitized by Google

अथ होतुर्धिष्ण्यं नवधा विभज्य पूर्वांस्त्रिभागानेकैकं द्वेधा विभजेत् । ७५

Then the dhishṇya of the hotar is divided into nine parts, and the three eastern parts into two parts each.

This is the rule for the square-shaped dhishṇya; according to the commentary the circular one has to be divided into twelve equal parts.

अथशब्द उपधानक्रममनुवदति नेष्टकाकरणक्रमम् । पूर्वान् पूर्वरीतिस्थान् । द्वेधा । अष्टाङ्गुलदीर्घान् चतुरङ्गुलव्यासान् । तासामेकं करणम् । इतरासामाग्नीध्रीयवत् । एवं द्वादश होत्रीय उपदधातीत्युक्तं भवति । मण्डलपक्षे द्वादशधा समशः प्रतिविभागः । तत्र बाह्यफलकं धनुर्वक्रम् । अभ्यन्तरं प्रदेशशून्यमेव[1] । मण्डलपक्षे सर्वत्र भूमौ लिखित्वेष्टकाः कारयेत् ।

अथेतरान्नवधा नवधा विभज्य मध्यमपूर्वौ द्वौ भागौ समस्येत् । ७६

The other dhishṇyas are then divided into nine parts (squares) each and the part lying in the centre combined with the eastern part (with the part situated to the east of the centre part; eight bricks are therefore required for these dhishṇyas. If they are circular, they are divided into eight equal parts).

इतरान्प्रशास्तृप्रभृतीन्पञ्च धिष्ण्यान्नवधा नवधा विभज्य द्वितीयतृतीयरीत्योर्मध्यमौ भागौ समस्येत् एकीकुर्यादित्यर्थः । तासामेकैकं करणमष्टाङ्गुलव्यासं षोडशाङ्गुलदीर्घम् । उत्तरासामाग्नीध्रीयवत् । एवं धिष्ण्या अष्टेष्टका भवन्ति । मण्डलपक्षे तु समप्रविभागः ।

अथ मार्जालीयं त्रेधा विभज्य पूर्वापरौ भागौ पञ्चधा विभजेत् । ७७

Then the márjálíya-fire is divided into three parts (by lines drawn from the south towards the north); of these three parts the eastern part and the western part are again divided into five parts together (*i. e.* the eastern part is divided into two and the western part into three parts).

The márjálíya, when circular, is divided into six equal parts.

दक्षिणोत्तरेण त्रेधा विभज्य पूर्वं द्वेधाष्टाङ्गुलव्यासं द्वादशाङ्गुलदीर्घं विभजेत् । तयोरेकं करणम् । अपरं त्रेधा विभजेत् । तासामाग्नीध्रीयवदेकं करणम् । मध्यमस्य धिष्ण्यायाममष्टाङ्गुलव्यासमेकं करणम् । मण्डले तु समशः षोढा विभागः । एवं धिष्ण्यानां चतुरस्रपक्षे पञ्च करणानि । अष्टाङ्गुलसमचतुरस्रमेकम् । तेन द्विपञ्चाशदिष्टकाः । अष्टाङ्गुलदीर्घं चतुरङ्गुलव्यासं द्वितीयम् । तेन षडिष्टकाः । षोडशाङ्गुलदीर्घमष्टाङ्गुलव्यासं तृतीयमेकम् । तेन पञ्च । अष्टाङ्गुलव्यासं द्वादशाङ्गुलदीर्घं चतुर्थम् । तेन द्वे । धिष्ण्यदीर्घमष्टाङ्गुलव्यासमेकं पञ्चमम् । तेनैका । एवं समस्ताः षट्षष्टिरिष्टकाः । मण्डलपक्ष आग्नीध्रीयहोत्रीयाष्टेष्टकमार्जालीयानां चत्वारि करणानीष्टकाश्च द्रष्टव्याः ।

उख्यभस्मना संसृज्येष्टकाः कारयेदिति । ७८

He (the sacrificer) is to make the bricks having mixed them with ashes from the ukhá (see Indische Studien XIII. 219 f. f.)

उख्यभस्मना संसृज्येष्टकाः कारयेदिति शाखान्तरीयवचनमस्ति । संवत्सरमुख्यं बिभर्तीति संवत्सरभृद्यजमानः । एतदुख्यभस्मना संसृज्येष्टकाकरणम् ।

संवत्सरभृत एवैतदुपपद्यते न रात्रिभृतः । ७९

This rule is meant only for him whose díkshá lasts a year (or according to the commentator, longer than a month; literally: he who carries the ukhá during that time) not for him whose díkshá lasts a (smaller) number of nights.

रात्रिशब्देन तिस्रो रात्रीर्दीक्षितः स्यादित्यादिरात्रिशब्देन विहितदीक्षाकल्पा लक्ष्यन्ते । त्रिंशद्रात्रिपर्यन्तेषु दीक्षाकल्पेषु प्रवृत्तस्य नोपपद्यते । संवत्सरशब्दोऽपि मासादिकल्पस्योपलक्षणम् । तावन्मात्रेणापि कालेनेष्टकाकरणस्य शक्यत्वात् । तत्परत्वाद्वाक्यस्य ॥

एवमस्य मन्त्रवती चितिक्लृप्तिः । ८०

In this manner (by proceeding according to S. 77) the sacrificer makes the whole construction of the agni to participate in the mantras (for the ukhá is made with mantras).

अस्य यजमानस्य मन्त्रेण कृतायामुखायां मन्त्रेण संस्कृतस्योख्यस्य भस्मना संसृष्टत्वादिष्टकाक्लृप्तिर्मन्त्रवतीति ।

छन्दश्चितं त्रिषाहस्रस्य परस्ताच्चिन्वीत । ८१

After having constructed the agni consisting of three thousand bricks (*i. e.* after having constructed the agni for the third time on which occasion the number of three thousand bricks is prescribed) the sacrificer is to construct the chhandaśchit *i. e.* an agni consisting as

[1] The "interior" side of the twelve bricks forming the circular hotriya dhishṇya has no extension; for they all meet in the centre of the circle.

Digitized by Google

it were of mantras instead of ishtakás. The shape of the agni is drawn on the ground and then the whole ceremony of the agnichayana gone through, but instead of placing bricks on the ground the sacrificer only touches the places on which they would be placed and mutters at the same time the appropriate mantras).

छन्दांस्येव चीयन्त इति छन्दश्चित्। न तु छन्दोभिश्चीयत इति। कल्पे छन्दश्चित्यश्च क्वचाहुतिरागच्छति जुहोत्येव तत्राथ यदन्यदाहुतिभ्यः शरीरवद्यजुरेवेति तत्र देशे जपेदिति वचनात्। तत्र शरीरवदिष्टकाद्व्यवदित्यर्थः। कर्मान्ते चाग्निं विहरेदग्निरूपाणीति दर्शयेदित्युक्तम्। तत्र मिनुयादग्निं पक्षपुच्छादिविभागेन रूपाणि दर्शयेदिष्टकारूपाण्यर्धेष्टकापादेष्टकारूपाणि तत्तद्देशे यथास्थानं लिखित्वा शुष्केष्टकासूपधानमन्त्रं जपेदित्यर्थः। तस्माच्छन्दांस्येव चीयन्त इति छन्दश्चित्। त्रिषाहस्रस्य परस्ताच्चिन्वीत। ब्राह्मणक्रमात्तु पूर्वानुष्ठानम्। तस्माच्छ्येनचितः प्रकृतित्वात्त्रिषाहस्रस्यान्ते प्रकृत्यनुष्ठानपरिसमाप्तिरित्यभिप्रेत्योक्तं त्रिषाहस्रस्य परस्ताच्चिन्वीतेति। प्रकृतिं कृत्वैव विकृतेरधिकारः। इत्येकविधप्रसङ्गादुक्तम्। अनेन प्रक्रम्य त्रिषाहस्रपर्यन्तं चित्वैव विकृतेश्चयनमिति गम्यते। उक्तमर्थं साधयितुं हेतुमाह।

शु॰ मी॰ श्येनस्य प्रकृतित्वेन श्येनचित्त्रिषाहस्रकत्वाच्छन्दः शब्दस्योपलक्षणपरत्वेन छन्दश्चित्कङ्कादीनां विकृतित्वेन पश्चादनुष्ठानं केचिदाहुः। तदनुपपन्नम्। श्येनस्य त्रिषाहस्रपर्यन्तमवच्छिन्नतयानुष्ठानं कृत्वा पश्चात्कङ्कादीनामनुष्ठानमित्यत्र प्रमाणाभावात्। ननु त्रिषाहस्रस्य परस्ताच्छन्दश्चितं चिन्वीतेति सामान्यनिर्देशेऽपि श्येनचित्यादावनुष्ठानोपक्रमात् अस्मिन्नेव त्रिषाहस्रपर्यन्तमनुष्ठानं कृत्वा तदनन्तरमितरेषामनुष्ठानमिति चेत्। एवं तर्हि कङ्कादिष्वपि त्रिषाहस्रपर्यन्तमननुष्ठाय अन्तराग्न्यन्तरानुष्ठानं न स्यात्। ननु श्येनचिदिव त्रिषाहस्रपर्यन्तमनुष्ठानमग्न्यन्तराणामपि अस्त्विति चेन्न। त्रिषाहस्रानुष्ठानानन्तरं जानुदघ्नस्य वा ग्रीवदघ्नस्य वानुष्ठानमिति द्वैधेनियमितत्वात् प्रत्येकं त्रिषाहस्रानुष्ठानाप्रसक्तेः। अतो यस्य कस्याप्यग्नेस्त्रिषाहस्रानन्तरं छन्दश्चयनं कर्तव्य,मुक्तं चैतत्। तथा हि साहस्रं चिन्वीत प्रथमं चिन्वानः द्विषाहस्रं चिन्वीत द्वितीयं चिन्वानः त्रिषाहस्रं चिन्वीत तृतीयं चिन्वान इति जानुदघ्नादिक्रमेणाम्नातानां साहस्रादीनां प्रथमादिभावेन त्रिषाहस्रानन्तर्यस्यैव युक्तत्वात्। ननु त्रिषाहस्रानन्तरमपि छन्दश्चितेरनुष्ठानं न प्राप्नोति। जानुदघ्ना वा ग्रीवदघ्ना वा कार्या इति परिमाणस्यानन्तरानुष्ठेयेष्वपि समत्वादिति चेत्। अनिन्दकश्छन्दश्चिदाम्नानमहिमा? न, जानुदघ्ना वेत्यादिनियमस्य तदितरपरिमाणकङ्कादिविषयत्वात्। यदि श्येनचित्यैव त्रिषाहस्रपर्यन्तमनुष्ठानमङ्गीक्रियते तदा श्मशानचयनस्य नाभिदघ्नं द्विषाहस्रं चाङ्गीकृत्य धर्मोपदेशो विरुद्धः स्यात् यदि नाभिदघ्नं पुरस्तात् जानुदघ्नं पश्चात् इत्यादिकल्पसूत्रमप्यनुपपन्नं स्यात् तस्माच्छ्येनानन्तरं श्येनकङ्कसमूह्यादित्थं नियमेन[1]? त्रिषाहस्रं कृत्वा त्रिषाहस्रस्य परस्ताच्छन्दश्चितं चिन्वीतेति वचनबलात् त्रिषाहस्रानन्तरमेव छन्दश्चितोऽनुष्ठानमिति सिद्धम्।

कामविवेकात्। ८२

Since there is a difference in the wish (the object which the sacrificer wishes to obtain).

फलभेदात्काम्यत्वात्परस्तादेवेत्यर्थः।

According to another opinion adopted by the Śulvamímánsá and mentioned in Dvárakánáthayajvan's Commentary on the following sútra we have to separate kám avivekát and to translate: what shape (does the chhandaśchit take)? As no distinguishing rule is given for it, its shape is, etc. (Sútra 83).

तस्य रूपंश्येनाकृतिर्भवतीति प्रकृतित्वात्। ८३

The shape of the chhandaśchit is the shape of a falcon since the falconchiti is the type for all chitis.

तत्र मन्त्ररूपमात्रत्वेऽपीष्टकारूपाणि दर्शयेदित्युक्तत्वात्। आकृत्यपेक्षायां प्रकृतित्वाच्छ्येनाकृतिर्भवतीति। अन्ये त्वाहुः। छन्दश्चितं त्रिषाहस्रस्य परस्ताच्चिन्वीत। काम्। छन्दश्चित्कामाकृतिमाश्रयत इति शेषः। अविवेकात् आकृतेरनुक्तत्वात्। विविच्येयमिति वचनाभावादित्यर्थः। तस्य रूपं श्येनाकृतिर्भवतीति। प्रकृतित्वात्। इतिकरणः परिभाषासमाप्त्यर्थः।

शु॰ मी॰ छन्दश्चित्कामाकृतिमाश्रयतीति पृच्छति कामिति। उत्तरमाह अविवेकादिति। अतावाकृतिविशेषस्यानिर्धारणात् प्रकृतिमेवाश्रयतीत्यर्थः।

टीकाभटात्मजेनेत्थं द्वारकानाथयज्वना।
द्वितीयो व्याकृतोऽध्यायस्त्वग्नीनां धर्मवाचकः॥

End of the second adhyáya.

1. °समूह्यादीनामन्यतमस्य नियमेन?।

Digitized by Google

THIRD ADHYÁYA.

आद्येऽध्याये सामान्येन सर्वेष्टकाकरणमुक्तम्। द्वितीयेऽध्यायेऽग्नीनामविशेषेण परिभाषा कथिता। छन्दश्चितश्चयनं विशेषाभावात्परिभाषासूत्रम्। इदानीमग्नीनां सर्वेषामाकृतिविशेषं विवक्षन्नाह।

अथ वै भवति श्येनचितं चिन्वीत सुवर्गकाम इति १।

There now we have the following injunction: He who desires heaven is to construct the altar in the form of a falcon.

श्येन इव चित् श्येनचित्।

आकृतिर्द्वैविध्यम्। २

Two different forms of the falcon construction may be taken.

प्रतिज्ञातस्य श्येनस्य रूपद्वैविध्यम्। अस्तीति वाक्यशेषः। तदेव दर्शयति।

चतुरस्रात्मा। ३

The one is that the body of which is square:

आकृतिसंहितो बहुव्रीहिः। चतुरस्र आत्मा यस्य स चतुरस्रात्मा श्येनचित्। अथवा चतुरस्र आत्मा श्येनचित इति वाक्यशेषः।

श्येनाकृतिश्च। ४

The other is that which has the real shape of a falcon.

श्येनस्येवाकृतिर्यस्येति श्येनाकृतिः। कारणमाह।

विज्ञायते। ५

For there is tradition for it.

श्रुतिः। अवगम्यते। सा च श्रुतिः किं ब्राह्मणमहोस्विन्मन्त्र इति तत्राह।

उभयं ब्राह्मणम्। ६

Both passages are Bráhmaṇa.

भवतीति वाक्यशेषः। उभयं वाक्यं ब्राह्मणमेव भवति। तदपि दाशतय्यां विज्ञायते। प्र सप्तगुमृतधीतिमवर्त्या इति शुन इत्यादिवन्मन्त्र इत्यर्थः। चतुरस्रात्मत्वे ब्राह्मणलिङ्गमुदाहरति।

पञ्च दक्षिणायाꣳश्रोण्यामुपदधाति पञ्चोत्तरस्यां वस्तो वय इति दक्षिणेꣳस उपदधाति वृष्णिर्वय इत्युत्तरे व्याघ्रो वय इति दक्षिणे पक्ष उपदधाति सिꣳहो वय इत्युत्तरे पुरुषो वय इति मध्य इति च। ७

Six (bricks) he places in the south-western corner, etc.

तथांसश्रोण्यादिशब्दानां चतुरस्रश्येनस्यैव मुख्यत्वादिति भावः। अथ श्येनाकृतिब्राह्मणमुदाहरति।

अथापरं वयसां वा एष प्रतिमया चीयते यदग्निरिति। ८

And the other passage is: the agni in truth is constructed after the image of the birds.

वयसां पक्षिणां प्रतिमया प्रतिबिम्बेन यः प्रतिज्ञातोऽग्निः स एषः पक्षिणामाकृतिप्रतिमया रूपेण चीयत इत्यर्थः। ब्राह्मणे प्रतिमयेति श्रुतत्वात्किं तुण्डदृष्टिश्रोणाद्यवयवयुक्तेन। नेत्याह।

उत्पततां छाययेत्यर्थः। ९

The meaning of that is: the agni is to be constructed after the shadow of birds when flying up.

इति ब्राह्मणे श्रुतस्य प्रतिमाशब्दस्यार्थ इत्यर्थः।

अथ चतुरस्राणामप्यग्नीनां पूर्वोदाहरणेन गौण्यावृत्त्या श्रोण्यंससहितात्मसंभवाच्चतुरस्रैकविषयं ब्राह्मणान्तरमुदाहरति।

समचतुरस्राभिरग्निं चिन्वीत दैव्यस्य च मानुषस्य च व्यावृत्त्या इति मैत्रायणीयब्राह्मणम्। १०

"He is to construct the agni with square bricks for the separation of what is divine and what is human" thus the bráhmaṇa of the Maitráyaṇíyas teaches. (The bricks used for wordly purposes, the construction of palaces, etc. have usually the shape of oblongs).

समचतुरस्राभिरिष्टकाभिर्मानुषं लौकिकं लोके आयतचतुरस्राभिरनियतरूपाभिर्वा प्रासादायः क्रियन्ते तस्माद्दैव्यस्य मानुषस्य च व्यावृत्त्यै समचतुरस्राभिरेव चिन्वीतेति ब्राह्मणस्यार्थः। समचतुरस्राभिरेव श्येनाकृतेः कर्तुमशक्यत्वात्समचतुरस्रार्थता सिद्धास्य ब्राह्मणस्य।

तस्येष्टकाः कारयेच्चतुर्थेन पञ्चमेन षष्ठेन दशमेनेति ११।

The bricks for this (agni constructed with square bricks) are to be made with the fourth part, the fifth part, the sixth part and the tenth part (of a purusha). Thus we get four classes of square bricks the sides of which are = 30 angulis 24 ang. 20 ang. 12 ang.

तस्य चतुरस्रश्येनचितः पुरुषस्य चतुर्थेन त्रिंशदङ्गुलेन पुरुषक्षेत्रवर्गस्य षोडशधा विभागः। पञ्चमेन अरत्निना पुरुषक्षेत्रवर्गस्य पञ्चविंशो भागः। षष्ठेन पुरुषस्य विंशत्यङ्गुलेन पुरुषक्षेत्रस्य षट्त्रिंशांशः। दशमेन प्रादेशेन पुरु-

Digitized by Google

चतुर्वेचस्य शतांश: । इतिकरणः करणसमाप्त्यर्थः । एवं चत्वारि करणानि । प्रथमेन षण्णवतिरिष्टका: । द्वितीयेन दशाधिकं षट्शतम् । तृतीयेन चतुस्त्रिंशाधिकं शतद्वयम् । चतुर्थेन षष्टि: । तत्र चोडानाकसदश्चतस्र: पञ्चम्य: षट्षड्भागीया: ।

अथाग्निं विमिमीते । १२

Then the area for the agni is measured out.

उख्यभस्मना संसृज्येष्टका: कारयेदिति वचनाट्टीचितस्येष्टका: कृत्वानन्तरं दीक्षान्त्यदिवसे ऽग्निं विमिमीते । रात्रिभरणपचे अग्निविमाने न दीक्षादिलचणा । अथाग्निं विमिमीत इति यच्चास्ति तत्राथशब्दस्यायमर्थ: । मानप्रकारमाह ।

यावान्पुरुष ऊर्ध्वबाहुस्तावदन्तराले वेणोश्छिद्रे करोति । १३

Two marks are cut on a cane at a distance equal to to the height of a man with uplifted arms.

यावत्प्रमाणं पुरुषो यजमान ऊर्ध्वबाहु: अनेन लौकिकपुरुष उक्तो भवति यजमानारत्निना पारिभाषिक: पञ्चारत्नि: । इष्टकाकरणे य: पुरुष: परिगृहीतस्तेनाग्निं विमिमीते[1] । तावदन्तराले पुरुषमाणान्तराले ययोश्छिद्रयोस्ते तथोक्ते । प्रमाणात्किंचिदतिरिक्तं वेणुं परिगृह्य पुरुषप्रमाणमन्तरालं यथा भवति तथान्तयोश्छिद्रे करोति । तत्र छिद्राभ्यन्तरार्धयो: पुरुष[2]प्रमाणे ऽन्तर्भाव: ।

मध्ये तृतीयम् । १४

A third cut is to be made in the middle (between the two first marks).

करोतीति शेष: ।

यदमुत्र स्पन्द्यया करोति तदिह वेणुना करोति । १५

What there is done with a cord, is to be done here with the cane.

i. e. in the measurement of the agnikshetra the cane has to be used throughout instead of the cord used in other cases.

अमुत्र क्षेत्रकरण उभयत: पाशस्थानीये ऽन्त्ये छिद्रे मध्यछिद्रं लचणस्थानीयम् ।

[1]. A. on the margin (seemingly, to replace पञ्च°—°या:) पञ्चमांशेन कार्या: । एवमग्रे ऽपि ।

[2]. A. on the margin (apparently in order to replace the words परि°–°मीते): अग्निमाने ऽपि स एव भवति ।

[3]. °षप्रमाणमन्तरालं—यो: पुरु° only in A. on the margin.

तस्यात्मा । १६

The body of the śyena (wings and tail excluded)—

प्रधानावयवत्वात्पचपुच्छव्यतिरिक्तांश आत्मेत्युच्यते ।

समचतुरस्रश्चत्वार: पुरुषा: । १७

is a square consisting of four square-purushas.

आत्मन[1]: प्रमाणं द्विपुरुषप्रमाणकरणीकसमचतुरस्रमित्यर्थ: ।

पच: समचतुरस्र: पुरुष: । १८

The (southern) wing is one square-purusha.

दक्षिण: पच: पुरुषप्रमाणकरणीक: समचतुरस्र: । आत्ममध्येन पचमूलमध्यसंधानम् ।

स तु दक्षिणतो ऽरत्निना द्राघीयान् । १९

But it (the wing) is to be lengthened by one aratni (24 aṅg.) on its southern side.

स पच: दक्षिणान्ते पुरुषमाणायामेनारत्निना द्राघीयान् । दीर्घतर: । दक्षिणोत्तरेण षडरत्निरित्यर्थ: ।

एतेनोत्तरपचो व्याख्यात: । २०

Thereby the northern wing is explained (i. e. it has the same dimensions)

पुच्छं समचतुरस्र: पुरुष: । २१

The tail is one square-purusha.

पुरुषप्रमाणकरणीक: । प्राञ्चमेनमित्युक्तत्वात्पश्चात्पुच्छं भवति । मध्ये संधानं च ।

तमवस्तात्प्रादेशेन वर्धयेत् । २२

It is to be lengthened on the westside by one prádeśa (= 12 aṅgulis).

पूर्वापरयोर्द्वादशप्रादेशप्रमाण इत्यर्थ: । *G. Th.*

[1]. A. on the margin : चेत्रतश्चत्वार: पुरुषा: आत्म°

COMPLETION OF PROFESSOR MAX MÜLLER'S CHIPS FROM A GERMAN WORKSHOP.

Now ready, in 8vo. price 18s. cloth.

CHIPS FROM A GERMAN WORKSHOP. BY F. MAX MÜLLER, M.A. Prof. of Comparative Philology at Oxford, Foreign Member of the French Institute. VOL. IV. containing Essays chiefly on the Science of Language, and completing the Work.

CHIPS from a GERMAN WORKSHOP, VOLS. I. and II. Essays on the Science of Religion, and on Mythology, Traditions, and Customs, Second Edition, price 24s. VOL. III. Essays on Literature, Biography, and Antiquities, price 16s.

The Work complete, in 4 vols. 8vo. price £2. 18s.
London, LONGMANS & Co.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO, AT THE MEDICAL HALL PRESS, BENARES.

Digitized by Google

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 116. Benares, January 1st, 1876. Vol. X.

काशिकायाः

॥ चतुर्थाध्यायस्य चतुर्थः पादः ॥

तस्य धर्म्यम् ॥ ४७ ॥

तस्येति षष्ठीसमर्थाद् धर्म्यमित्येतस्मिन्नर्थे ठक् प्रत्ययो भवति । धर्म्यं न्याय्यम् । आचारयुक्तमित्यर्थः । शुल्कशालाया धर्म्यं शौल्कशालिकम् । आकरिकम् । आपणिकम् । गौल्मिकम् ॥

अण् महिष्यादिभ्यः ॥ ४८ ॥

महिषीत्येवमादिभ्योऽण् प्रत्ययो भवति तस्य धर्म्यमित्येतस्मिन् विषये । ठकोऽपवादः । महिष्या धर्म्यं, माहिषम् । प्राजावतम् । महिषी । प्रजावती । प्रलेपिका । विलेपिका । अनुलेपिका । पुरोहित । मणिपाली । अनुचारक । होतृ । यजमान ॥

ऋतोऽञ् ॥ ४९ ॥

ऋकारान्तात्प्रातिपदिकादञ् प्रत्ययो भवति तस्य धर्म्यमित्येतस्मिन्विषये । ठकोऽपवादः । पोतुर्धर्म्यं पौत्रम् । औद्गात्रम् ॥ नराच्चेति वक्तव्यम् ॥ * ॥ नरस्य धर्म्या, नारी । विशसितुरिड्लोपश्च ॥ * ॥ विशसितुर्धर्म्यं वैशस्त्रम् ॥ विभाजयितुर्णिलोपश्च ॥ * ॥ विभाजयितुर्धर्म्यं वैभाजित्रम् ॥

अवक्रयः ॥ ५० ॥

तस्येत्येव । षष्ठीसमर्थादवक्रय इत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति । अवक्रीणीते ऽनेनेत्यवक्रयः पिण्डक उच्यते । शुल्कशालाया अवक्रयः, शौल्कशालिकः । आकरिकः * । आपणिकः । गौल्मिकः । नन्ववक्रयोपि धर्म्यमेव । नैतदस्ति । लोकपीडया धर्मातिक्रमेणाप्यवक्रयो भवति ॥

* आन्तरगारिक इति पा० २ ।

तदस्य पण्यम् ॥ ५१ ॥

तदिति प्रथमासमर्थादस्येति षष्ठ्यर्थे ठक् प्रत्ययो भवति यत्तत्प्रथमासमर्थं पण्यं चेत्तद्भवति । अपूपाः पण्यमस्य, आपूपिकः । शाष्कुलिकः । मौदकिकः । पण्यमिति विशेषणं तद्धितवृत्तावन्तर्भूतमतः पण्यशब्दो न प्रयुज्यते ॥

लवणाट्ठञ् ॥ ५२ ॥

लवणशब्दाट्ठञ् प्रत्ययो भवति तदस्य पण्यमित्येतस्मिन्विषये । ठकोऽपवादः । स्वरे विशेषः । लवणं पण्यमस्य, लावणिकः ॥

किशरादिभ्यष्ठन् ॥ ५३ ॥

किशर इत्येवमादिभ्यष्ठन् प्रत्ययो भवति तदस्य पण्यमित्येतस्मिन्विषये । ठकोऽपवादः । किशरादयो गन्धविशेषवचनाः । किशराः पण्यमस्य, किशरिकः । किशरिकी । नरदिकः । नरदिकी । किशर । नरद । नलद । सुमङ्गल । तगर । गग्गुलु । उशीर । हरिद्रा । हरिद्रायणी ॥

शलालुनोऽन्यतरस्याम् ॥ ५४ ॥

शलालुशब्दादन्यतरस्यां ठन् प्रत्ययो भवति तदस्य पण्यमित्येतद्विषये । ठकोऽपवादः । पक्षे सोपि भवति । शलालुशब्दो गन्धविशेषवचनः । शलालु पण्यमस्य, शलालुकः । शलालुकी । शालालुकः । शालालुकी ॥

शिल्पम् ॥ ५५ ॥

तदिति प्रथमासमर्थादस्येति षष्ठ्यर्थे ठक् प्रत्ययो भवति

Digitized by Google

यत्तत्प्रथमासमर्थं शिल्पं चेत्तद्भवति । शिल्पं कौशल्यम् । मृदङ्गवादनं शिल्पमस्य, मार्दङ्गिकः । पाणविकः । वैणिकः । मृदङ्गवादने वर्त्तमानो मृदङ्गशब्दः प्रत्ययमुत्पादयति शिल्पं तद्धितवृत्तावन्तर्भवति ॥

मड्डुकझर्झरादणन्यतरस्याम् ॥ ५६ ॥

मड्डुकझर्झरशब्दाभ्यामन्यतरस्यामण् प्रत्ययो भवति तदस्य शिल्पमित्येतस्मिन्विषये । ठकोपवादः । पक्षे सोपि भवति । मड्डुकवादनं शिल्पमस्य, माड्डुकः । माड्डुकिकः । झार्झरः । झार्झरिकः ॥

प्रहरणम् ॥ ५७ ॥

तदस्येत्येव । तदिति प्रथमासमर्थादस्येति षष्ठ्यर्थे ठक् प्रत्ययो भवति यत्तत्प्रथमासमर्थं प्रहरणं चेत्तद्भवति । असिः प्रहरणमस्य, आसिकः । प्रासिकः । चाक्रिकः । धानुष्कः ॥

परश्वधाट्ठञ् च ॥ ५८ ॥

परश्वधशब्दात् ठञ् प्रत्ययो भवति चकारात् ठक् । स्वरे विशेषः । परश्वधः प्रहरणमस्य, पारश्वधिकः ॥

शक्तियष्ट्योरीकक् ॥ ५९ ॥

शक्तियष्टिशब्दाभ्यामीकक् प्रत्ययो भवति तदस्य प्रहरणमित्येतस्मिन्विषये । ठकोपवादः । शक्तिः प्रहरणमस्य, शाक्तीकः । याष्टीकः ॥

अस्तिनास्तिदिष्टं मतिः ॥ ६० ॥

तदस्येत्येव । तदिति प्रथमासमर्थेभ्यो ऽस्ति नास्ति दिष्ट इत्येतेभ्यः शब्देभ्यो ऽस्येति षष्ठ्यर्थे ठक् प्रत्ययो भवति यत्तत्प्रथमासमर्थं मतिश्चेत्तद्भवति । अस्ति मतिरस्य, आस्तिकः । नास्ति मतिरस्य, नास्तिकः । दैष्टिकः । न च मतिसत्तामात्रे प्रत्यय इष्यते, किं तर्हि परलोकोऽस्तीति यस्य मतिरस्ति स आस्तिकः । तद्विपरीतो नास्तिकः । प्रमाणानुपातिनी यस्य मतिः स दैष्टिकः । तदेतदभिधानशक्तिस्वभावाल्लभ्यते । अस्तिनास्तिशब्दौ निपातौ, वचनसामर्थ्याद्वा आख्याताद्वाक्याच्च प्रत्ययः ॥

शीलम् ॥ ६१ ॥

तदस्येत्येव । तदिति प्रथमासमर्थादस्येति षष्ठ्यर्थे ठक् प्रत्ययो भवति यत्तत्प्रथमासमर्थं शीलं चेद्भवति । शीलं स्वभावः । अपूपभक्षणं शीलमस्य, आपूपिकः । शाष्कुलिकः । मौदकिकः । भक्षणक्रिया तद्विशेषणं च शीलं तद्धितवृत्तावन्तर्भवति ॥

छत्रादिभ्यो णः ॥ ६२ ॥

छत्र इत्येवमादिभ्यः प्रातिपदिकेभ्यो णः प्रत्ययो भवति तदस्य शीलमित्येतस्मिन्विषये । ठकोपवादः । छत्रं शीलमस्य, छात्रः । छादनादावरणाच्छत्रम् । गुरुकार्येष्ववहितस्तच्छिद्रावरणप्रवृत्तश्छत्रशीलः शिष्यश्छात्रः । स्थाशब्दो ऽत्र पठ्यते स उपसर्गपूर्वोऽत्र गृह्यते । आस्था संस्था अवस्थेति । छत्र । बुभुक्षा । शिक्षा । पुरोह । स्था । चुरा । उपस्थान । ऋषि । कर्मन् । विश्वधा । तपस् । सत्य । अनृत । शिबिका ॥

कर्माध्ययने वृत्तम् ॥ ६३ ॥

तदस्येत्येव । तदिति प्रथमासमर्थादस्येति षष्ठ्यर्थे ठक् प्रत्ययो भवति यत्तत्प्रथमासमर्थं कर्म चेद्वृत्तमध्ययनविषयं भवति । एकमन्यदध्ययने कर्म वृत्तमस्य, ऐकान्यिकः । द्वैयन्यिकः । त्रैयन्यिकः । एकमन्यदिति विगृह्य तद्धितार्थे इति समासः । ततश्च ठक् प्रत्ययः । अध्ययने कर्म वृत्तमित्येतत्सर्वं तद्धितवृत्तावन्तर्भवति । यस्याध्ययने नियुक्तस्य परीक्षाकाले पठतः स्खलितमपपाठरूपमेकं जातं स उच्यते ऐकान्यिक इति । एवं द्वैयन्यिकः । त्रैयन्यिक इति ॥

बह्वच्पूर्वपदाट्ठच् ॥ ६४ ॥

बह्वच् पूर्वपदं यस्य तस्माद्बह्वच्पूर्वपदात्प्रातिपदिकाट्ठच् प्रत्ययो भवति तदस्य कर्माध्ययने वृत्तमित्येतस्मिन्नर्थे । ठकोपवादः । द्वादशान्यानि कर्माण्यध्ययने वृत्तान्यस्य, द्वादशान्यिकः । त्रयोदशान्यिकः । चतुर्दशान्यिक इति । चतुर्दशापपाठा अस्य जाता इत्यर्थः । उदात्ते कर्त्तव्ये यो ऽनुदात्तं करोति स उच्यते ऽन्यत्त्वं करोषीति ॥

हितं भक्षाः ॥ ६५ ॥

तदस्येत्येव । तदिति प्रथमासमर्थादस्येति षष्ठ्यर्थे ठक् प्रत्ययो भवति यत्तत्प्रथमासमर्थं हितं चेत्तद्भवति तच्च भक्षाः । ननु च हितयोगे चतुर्थ्या भवितव्यं तत्र कथं षष्ठ्यर्थे प्रत्ययो विधीयते । एवं तर्हि सामर्थ्याद्विभक्तिपरिणामो भविष्यति । अपूपभक्षणं हितमस्मै, आपूपिकः । शाष्कुलिकः । मौदकिकः । हितार्थक्रिया च तद्धितवृत्तावन्तर्भवति ॥

तदस्मै दीयते नियुक्तम् ॥ ६६ ॥

तदिति प्रथमासमर्थाद् अस्मा इति चतुर्थ्यर्थे ठक् प्रत्ययो भवति यत्तत्प्रथमासमर्थं तच्चेद्दीयते नियुक्तम् । नियोगेनाव्यभिचारेण दीयत इत्यर्थः । अव्यभिचारो नियोगः । अग्रे भोजनमस्मै नियुक्तं दीयते, आग्रभोजनिकः । आपूपिकः । शाष्कुलिकः । केचित्तु नियुक्तं नित्यमाहुः । अपूपा नित्यमस्मै दीयन्ते, आपूपिकः ॥

श्राणामांसौदनाट्टिठन् ॥ ६७ ॥

श्राणामांसौदनशब्दाभ्यां टिठन् प्रत्ययो भवति तदस्मै दीयते नियुक्तमित्येतस्मिन्नर्थे । ठकोपवादः । इकार उच्चार-

Digitized by Google

णार्थः । टकारो ङीबर्थः । श्राणा नियुक्तमस्मै दीयते, श्राणिकः । श्राणिकी । मांसौदनिकः । मांसौदनिकी । ननु च ठञेव कस्मान्नोच्यते नह्यत्र ठञष्ठिठनो वा विशेषोऽस्ति । मांसौदनग्रहणं संघातविगृहीतार्थं केचिदिच्छन्ति । तत्र वृद्ध्यभावो विशेषः । श्रोदनिकः । श्रोदनिकी ॥

भक्तादणन्यतरस्याम् ॥ ६८ ॥

भक्तशब्दादण् प्रत्ययो भवत्यन्यतरस्यां तदस्मै दीयते नियुक्तमित्येतस्मिन्विषये । ठकोऽपवादः । पक्षे सोऽपि भवति । भक्तमस्मै दीयते नियुक्तं, भाक्तः । भाक्तिकः ॥

तत्र नियुक्तः ॥ ६९ ॥

तत्रेति सप्तमीसमर्थान्नियुक्त इत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति । नियुक्तो ऽधिकृतो व्यापारित इत्यर्थः । शुल्कशालायां नियुक्तः, शौल्कशालिकः । आकरिकः*। आपणिकः । गौल्मिकः । दौवारिकः ॥

अगारान्ताट्ठन् ॥ ७० ॥

अगारशब्दान्तात्प्रातिपदिकाट्ठन् प्रत्ययो भवति तत्र नियुक्त इत्येतस्मिन्विषये । ठकोऽपवादः । देवागारे नियुक्तो, देवागारिकः । कोष्ठागारिकः । भाण्डागारिकः ॥

अध्यायिन्यदेशकालात् ॥ ७१ ॥

तत्रेत्येव । सप्तमीसमर्थाददेशवाचिनः प्रातिपदिकादकालवाचिनश्चाध्यायिन्यभिधेये ठक् प्रत्ययो भवति । अध्ययनस्य यौ देशकालौ शास्त्रेण प्रतिषिद्धौ तावदेशकालशब्देनोच्येते तत इदं प्रत्ययविधानम् । श्मशाने ऽधीते, श्माशानिकः । चातुष्पथिकः । अकालात् । चतुर्दश्यामधीते, चातुर्दशिकः । आमावास्यिकः । अदेशकालादिति किम् । स्रुघ्ने ऽधीते । पूर्वाह्णे ऽधीते ॥

कठिनान्तप्रस्तारसंस्थानेषु व्यवहरति ॥ ७२ ॥

तत्रेत्येव । कठिनशब्दान्तात्सप्तमीसमर्थात् प्रस्तारसंस्थानशब्दाभ्यां च ठक् प्रत्ययो भवति व्यवहरतीत्येतस्मिन्नर्थे । व्यवहारः क्रियातत्त्वम् । यथा लौकिकव्यवहार इति । वंशकठिने व्यवहरति, वांशकठिनिकः । वार्ध्रकठिनिकः । प्रास्तारिकः । सांस्थानिकः ॥

निकटे वसति ॥ ७३ ॥

निकटशब्दात्सप्तमीसमर्थाद्वसतीत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति । यस्य शास्त्रतो निकटवासस्तत्रायं विधिः । आरण्यकेन भिक्षुणा ग्रामात्क्रोशे वस्तव्यमिति शास्त्रम् । निकटे वसति, नैकटिको भिक्षुः ॥

* आन्तरिक इति पा० २ ।

आवसथात् ष्ठल् ॥ ७४ ॥

तत्रेत्येव । आवसथशब्दात्सप्तमीसमर्थाद् वसतीत्येतस्मिन्नर्थे ष्ठल् प्रत्ययो भवति । लकारः स्वरार्थः । षकारो ङीषर्थः । आवसथे वसति, आवसथिकः । आवसथिकी । ठकः पूर्णो ऽवधितः परमन्यः प्रत्ययो विधीयते ॥

प्राग्घिताद्यत् ॥ ७५ ॥

तस्मै हितमिति वक्ष्यति । प्रागेतस्माद्धितसंशब्दनाद्यानित ऊर्ध्वमनुक्रमिष्यामो यत्प्रत्ययस्तेष्वधिकृतो वेदितव्यः । वक्ष्यति । तद्वहति रथयुगप्रासङ्गम् । रथ्यः । युग्यः । प्रासङ्ग्यः ॥

तद्वहति रथयुगप्रासङ्गम् ॥ ७६ ॥

तदिति द्वितीयासमर्थेभ्यो रथयुगप्रासङ्गेभ्यो वहतीत्येतस्मिन्नर्थे यत्प्रत्ययो भवति । रथं वहति, रथ्यः । युग्यः । प्रासङ्ग्यः । रथसीताहलेभ्यो यद्विधाविति तदन्तविध्युपसंख्यानात् परमरथ्य इत्यपि भवति ॥

धुरो यड्ढकौ ॥ ७७ ॥

तद्वहतीत्येव । धुर् इत्येतस्माद् द्वितीयासमर्थाद्वहतीत्येतस्मिन्नर्थे यत् ढक् इत्येतौ प्रत्ययौ भवतः । धुरं वहति, धुर्यः । धौरेयः ॥

खः सर्वधुरात् ॥ ७८ ॥

तद्वहतीत्येव । सर्वधुराशब्दाद् द्वितीयासमर्थाद्वहतीत्येतस्मिन्नर्थे खः प्रत्ययो भवति । सर्वधुरां वहति, सर्वधुरीणः । स्त्रीलिङ्गन्याय्ये सर्वधुरादिति प्रातिपदिकमात्रापेक्षो निर्देशः । ख इति योगविभागः कर्त्तव्य इष्टसंग्रहार्थः । उत्तरधुरीणः । दक्षिणधुरीणः ॥

एकधुराल्लुक् च ॥ ७९ ॥

तद्वहतीत्येव । एकधुराशब्दाद् द्वितीयासमर्थाद्वहतीत्येतस्मिन्नर्थे खः प्रत्ययो भवति तस्य लुग्भवति । वचनसामर्थ्यात्पक्षे लुग्विधीयते । एकधुरां वहति, एकधुरीणः । एकधुरः ॥

शकटादण् ॥ ८० ॥

तद्वहतीत्येव । शकटशब्दाद् द्वितीयासमर्थाद्वहतीत्येतस्मिन्नर्थे ऽण् प्रत्ययो भवति । शकटं वहति, शाकटो गौः ।

हलसीराट्ठक् ॥ ८१ ॥

तद्वहतीत्येव । हलसीरशब्दाभ्यां द्वितीयासमर्थाभ्यां वहतीत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति । हलं वहति, हालिकः । सैरिकः ॥

संज्ञायां जन्याः ॥ ८२ ॥

तद्वहतीत्येव । जनीशब्दाद् द्वितीयासमर्थाद्वहतीत्येतस्मिन्नर्थे यत् प्रत्ययो भवति समुदायेन चेत्संज्ञा गम्यते ।

जनीं वहति, जन्या । जामातुर्वयस्या । सा हि विहारादिषु जामातृसमीपं प्रापयति । जनी वधूरुच्यते ।

विध्यत्यधनुषा ॥ ८३ ॥

तदितिद्वितीयासमर्थाद् विध्यतीत्येतस्मिन्नर्थे यत् प्रत्ययो भवति न चेद्धनुष्करणं भवति । पादौ विध्यन्ति, पद्याः शर्कराः । ऊरव्याः कण्टकाः । अधनुषेति किम् । पादौ विध्यति धनुषा । नन्वसमर्थत्वादनभिधानाच्च प्रत्ययो न भवति । नहि धनुषा पद्य इत्युक्ते विवक्षितोऽर्थः प्रतीयते । एवं तर्हि धनुष्प्रतिषेधेन व्यधनक्रिया विशेष्यते यस्यां धनुष्करणं न संभाव्यते इति । तेनेह न भवति चौरं विध्यति शत्रुं विध्यति देवदत्त इति ॥

धनगणं लब्धा ॥ ८४ ॥

तदित्येव । धनगणशब्दाभ्यां द्वितीयासमर्थाभ्यां लब्धेत्येतस्मिन्नर्थे यत् प्रत्ययो भवति । धन्यः । गण्यः । लब्धेति तृचन्तं, तेन द्वितीया समर्था विभक्तिर्युज्यते ॥

अन्नाण्णः ॥ ८५ ॥

अन्नशब्दात्तदितिद्वितीयासमर्थाल्लब्धेत्येतस्मिन्नर्थे णः प्रत्ययो भवति । अन्नं लब्धा, आन्नः ॥

वशं गतः ॥ ८६ ॥

वशशब्दात्तदिति द्वितीयासमर्थाद्गत इत्येतस्मिन्नर्थे यत्प्रत्ययो भवति । वशं गतः, वश्यः । कामप्राप्तो विधेय इत्यर्थः ॥

पदमस्मिन् दृश्यम् ॥ ८७ ॥

निर्देशादेव प्रथमा समर्थविभक्तिः । पदशब्दात्प्रथमासमर्थाद् दृश्यार्थोपाधिकादस्मिन्निति सप्तम्यर्थे यत्प्रत्ययो भवति । पदं दृश्यमस्मिन्, पद्यः कर्दमः । पद्याः पांसवः । शक्यार्थे कृत्यः । शक्यते यस्मिन् पदं द्रष्टुं प्रतिमुद्रोत्पादनेन स पद्यः कर्दमः । कर्दमस्यावस्थोच्यते नातिद्रवो नातिशुष्क इति ॥

मूलमस्याबर्हि ॥ ८८ ॥

मूलशब्दात्प्रथमासमर्थादाबर्हीत्येवमुपाधिकादस्येति षष्ठ्यर्थे यत्प्रत्ययो भवति । मूलमेषामाबर्हि, मूल्या माषाः । मूल्या मुद्गाः । बृहउद्यमे, येषां मूलमाबृह्यते उत्पाट्यते ते मूल्याः । सुष्ठु निष्पन्नाः । मूलोत्पाटनेन विना ग्रहीतुं न शक्यन्ते इत्यर्थः ॥

संज्ञायां धेनुष्या ॥ ८९ ॥

धेनुष्येति निपात्यते संज्ञायां विषये । संज्ञाग्रहणमभिधेयनियमार्थम् । धेनोः षुगागमो यश्च पत्ययः । अन्तोदात्तोपि त्वयमिष्यते । या धेनुरुत्तमर्णायाधमर्णप्रदानाद्दोहनार्थं दीयते सा धेनुष्या । पीतदुग्धेति यस्याः प्रसिद्धिः । धेनुष्यां भवते ददामि ॥

गृहपतिना संयुक्ते ञ्यः ॥ ९० ॥

निर्देशादेव तृतीया समर्थविभक्तिः । गृहपतिशब्दात्तृतीयासमर्थात्संयुक्त इत्येतस्मिन्नर्थे ञ्यः प्रत्ययो भवति । गृहपतिना संयुक्तः, गार्हपत्योऽग्निः । अन्यस्यापि गृहपतिना संयोगोऽस्ति तत्र संज्ञाधिकारादतिप्रसङ्गनिवृत्तिः ॥

नौवयोधर्मविषमूलमूलसीतातुलाभ्यस्तार्यतुल्यप्राप्यवध्यानाम्यसमसमितसम्मितेषु ॥ ९१ ॥

नावादिभ्योऽष्टभ्यः शब्देभ्योऽष्टस्वेव तार्यादिष्वर्थेषु यथासंख्यं यत्प्रत्ययो भवति । प्रत्ययार्थद्वारेण तृतीया समर्थविभक्तिर्लभ्यते । नावा तार्यं, नाव्यमुदकम् । नाव्या नदी । शक्यार्थे कृत्यः । वयसा तुल्यो, वयस्यः सखा । संज्ञाधिकारोऽभिधेयनियमार्थः । तेन वयसा तुल्ये शत्रौ न भवति । धर्मेण प्राप्यं, धर्म्यम् । ननु च धर्मादनपेतइति वक्ष्यमाणेनैव सिद्धम् । नैतदस्ति । धर्मं यदनुवर्त्तते तद्धर्मादनपेतमित्युच्यते । फलं तु धर्मादपेत्येव कार्यविरोधित्वाद्धर्मस्य । विषेण वध्यो, विष्यः । विषेण वधमर्हतीत्यर्थः । मूलेनानाम्यं, मूल्यम् । आनाम्यमभिभवनीयम् । पटादीनामुत्पत्तिकारणं मूलं तेन तदभिभूयते शेषी क्रियते । मूल्यं हि सगुणं मूलं करोति । पोरदुपधादिति यति प्राप्ते आनाम्यमिति निपातनाद् ण्यत् । मूलेन समो, मूल्यः पटः । उपादानेन समानफल इत्यर्थः । सीतया समितं, सीत्यं क्षेत्रम् । समितं संगतमित्यर्थः ॥ रथसीताहलेभ्यो यद्विधाविति तदन्तविधिरपीष्यते ॥ परमसीत्यम् । उत्तमसीत्यम् । द्विसीत्यम् । त्रिसीत्यम् । तुलया संमितं, तुल्यम् । संमितं समानं सदृशमित्यर्थः । यथा तुला परिच्छिनत्ति परमेवं तदपीति ॥

धर्मपथ्यर्थन्यायादनपेते ॥ ९२ ॥

निर्देशादेव पञ्चमी समर्थविभक्तिः । धर्मादिभ्यः पञ्चमीसमर्थेभ्योऽनपेत इत्येतस्मिन्नर्थे यत्प्रत्ययो भवति । धर्मादनपेतं, धर्म्यम् । पथ्यम् । अर्थ्यम् । न्याय्यम् । संज्ञाधिकारादभिधेयनियमः ॥

छन्दसो निर्मिते ॥ ९३ ॥

प्रत्ययार्थसामर्थ्यलभ्या समर्थविभक्तिः । छन्दःशब्दात्तृतीयासमर्थान्निर्मितइत्येतस्मिन्नर्थे यत्प्रत्ययो भवति । निर्मित उत्पादितः । छन्दसा निर्मित,श्छन्दस्यः । छन्दसा कृत इत्यर्थः । इच्छापर्यायश्छन्दःशब्द इह गृह्यते ॥

उरसोऽण् च ॥ ९४ ॥

उरःशब्दात्तृतीयासमर्थान्निर्मित इत्येतस्मिन्नर्थेऽण् प्रत्य-

Digitized by Google

यो भवति चकाराड्ढञ्च । उरसा निर्मित, औरसः पुत्रः । उरस्यः पुत्रः । संज्ञाधिकारादभिधेयनियमः ॥

हृदयस्य प्रियः ॥ ९५ ॥

निर्देशादेव समर्थविभक्तिः । हृदयशब्दात्षष्ठीसमर्थात् प्रिय इत्येतस्मिन्नर्थे यत्प्रत्ययो भवति । हृदयस्य प्रियो, हृद्यो देशः । हृद्यं वनम् । संज्ञाधिकारादभिधेयनियमः । इह न भवति हृदयस्य प्रियः पुत्र इति ॥

बन्धने चर्षौ ॥ ९६ ॥

हृदयस्येत्येव । बन्धनमिति प्रत्ययार्थः । तद्विशेषणमृषिग्रहणम् । बध्यते येन तद्बन्धनम् । हृदयशब्दात्षष्ठीसमर्थाद्बन्धने ऋषावभिधेये यत् प्रत्ययो भवति । ऋषिर्वेदो गृह्यते । हृदयस्य बन्धनमृषिः, हृद्यः । परहृदयं येन बध्यते वशीक्रियते स वशीकरणमन्त्रो हृद्य इत्युच्यते ॥

मतजनहलात् करणजल्पकर्षेषु ॥ ९७ ॥

मतादिभ्यस्त्रिभ्यः शब्देभ्यस्त्रिष्वेव करणादिष्वर्थेषु यथासंख्यं यत्प्रत्ययो भवति । प्रत्ययार्थसामर्थ्याल्लब्धा षष्ठी समर्थविभक्तिः । मतं ज्ञानं तस्य करणं, मत्यम् । भावसाधनं वा । जनस्य जल्पो, जन्यः । हलस्य कर्षो, हल्यः । द्विहल्यः । त्रिहल्यः । कर्षणं कर्षः । भावसाधनं वा ॥

तत्र साधुः ॥ ९८ ॥

तत्रेति सप्तमीसमर्थात्साधुरित्येतस्मिन्नर्थे यत्प्रत्ययो भवति । सामसु साधुः, सामन्यः । वेमन्यः । कर्मण्यः । शरण्यः । साधुरिह प्रवीणो योग्यो वा गृह्यते नोपकारकः । तत्र हि परत्वात्तस्मै हितमित्यनेन विधिना भवितव्यम् ॥

प्रतिजनादिभ्यः खञ् ॥ ९९ ॥

प्रतिजनादिभ्यः शब्देभ्यः खञ् प्रत्ययो भवति तत्र साधुरित्येतस्मिन्नर्थे । यतोपवादः । प्रतिजने साधुः, प्रातिजनीनः । जनेजने साधुरित्यर्थः । ऐदंयुगीनः । सांयुगीनः । प्रतिजन । इदंयुग । संयुग । समयुग । परयुग । परकुल । परस्यकुल । अमुष्यकुल । सर्वजन । विश्वजन । पञ्चजन । महाजन । यत्र हितार्थ एव साध्वर्थस्तत्र वचनात्प्राक्क्रीतीया बाध्यन्ते ॥

भक्ताणः ॥ १०० ॥

भक्तशब्दाद् णः प्रत्ययो भवति तत्र साधुरित्येतस्मिन्विषये । यतोपवादः । भक्ते साधुः, भाक्तः शालिः । भाक्तास्तण्डुलाः ॥

परिषदो ण्यः ॥ १०१ ॥

परिषद्शब्दाद् ण्यः प्रत्ययो भवति तत्र साधुरित्येतस्मिन्विषये । यतोपवादः । परिषदि साधुः, पारिषद्यः । णप्रत्ययोप्यत्रेष्यते । तदर्थं योगविभागः क्रियते । परिषदो णो भवति । परिषदि साधुः, पारिषदः ॥

कथादिभ्यष्ठक् ॥ १०२ ॥

कथादिभ्यः शब्देभ्यष्ठक् प्रत्ययो भवति तत्र साधुरित्येतस्मिन्विषये । यतोपवादः । कथायां साधुः, काथिकः । वैकथिकः । कथा । विकथा । वितण्डा । कुष्टचित् । जनवाद । जनेवाद । वृत्ति । सङ्गृह । गुण । गण । आयुर्वेद । कथादिः ॥

गुडादिभ्यष्ठञ् ॥ १०३ ॥

गुडादिभ्यः शब्देभ्यष्ठञ् प्रत्ययो भवति तत्र साधुरित्येतस्मिन्विषये । यतोपवादः । गुडे साधुः, गौडिक इक्षुः । कौल्माषिको मुद्गः । साक्तुको यवः । गुड । कुल्माष । सक्तु । अपूप । मांसौदन । इक्षु । वेणु । संग्राम । संघात । प्रवास । निवास । उपवास ॥

पथ्यतिथिवसतिस्वपतेर्ढञ् ॥ १०४ ॥

पथ्यादिभ्यः शब्देभ्यो ढञ् प्रत्ययो भवति तत्र साधुरित्येतस्मिन्विषये । यतोपवादः । पथि साधु, पाथेयम् । आतिथेयम् । वासतेयम् । स्वापतेयम् ॥

सभाया यः ॥ १०५ ॥

सभाशब्दाद्यः प्रत्ययो भवति तत्र साधुरित्येतस्मिन्विषये । यतोपवादः । स्वरे विशेषः । सभायां साधुः, सभ्यः ॥

ढश्छन्दसि ॥ १०६ ॥

सभाशब्दाड्ढः प्रत्ययो भवति तत्र साधुरित्येतस्मिन्विषये छन्दसि । यस्यापवादः । सभेयोस्य युवा यजमानस्य वीरो जायताम् ॥

समानतीर्थे वासी ॥ १०७ ॥

साधुरिति निवृत्तम् । वासीति प्रत्ययार्थः । समानतीर्थशब्दात्तत्रेति सप्तमीसमर्थाद्वासीत्येतस्मिन्नर्थे यत्प्रत्ययो भवति । समाने तीर्थे वासीति, सतीर्थ्यः । समानोपाध्याय इत्यर्थः * ॥

समानोदरे शयित ओ चोदात्तः ॥ १०८ ॥

समानोदरशब्दात्सप्तमीसमर्थाच्छयित इत्येतस्मिन्नर्थे यत्प्रत्ययो भवति ओकारश्चोदात्तः । शयितः स्थित इत्यर्थः । समानोदरे शयितः, समानोदर्यो भ्राता ॥

सोदराद्यः ॥ १०९ ॥

सोदरशब्दात्सप्तमीसमर्थात् शयित इत्येतस्मिन्नर्थे यः प्रत्ययो भवति । विभाषोदर इति सूत्रेण यकारादौ प्रत्यये वि-

* 'तीर्थशब्देनेह गुरुरुच्यते । समानस्य सभावस्तीर्थे य इति' । इत्यधिकं पुस्तकान्तरे ।

Digitized by Google

वर्त्तते प्रागेव समानस्य सभावः । समानोदरे शयितः, सोदर्यो भ्राता । ओ चोदात्त इति नानुवर्त्तते । यकारे स्वरः ॥

भवे छन्दसि ॥ ११० ॥

तत्रेत्येव । सप्तमीसमर्थाद्भव इत्येतस्मिन्नर्थे छन्दसि विषये यत्प्रत्ययो भवति । अणादीनां घादीनां चापवादः । सति दर्शने ते ऽपि भवन्ति सर्वविधीनां छन्दसि व्यभिचारात् । मेघ्याय च विद्युत्याय च नमः । आ पादपरिसमाप्तेश्छन्दोधिकारो भवाधिकारश्च समुद्राभ्राद्घ इति यावत् ॥

पाथोनदीभ्यां ड्यण् ॥ १११ ॥

पाथशब्दान्नदीशब्दाच्च ड्यण् प्रत्ययो भवति । तत्र भव इत्येतस्मिन्नर्थे । यतोपवादः । पाथसि भवः, पाथ्यो वृषा । नाद्यो गिरो मे प्रयच्छति । पाथो ऽन्तरिक्षम् ॥

वेशन्तहिमवद्भ्यामण् ॥ ११२ ॥

वेशन्तशब्दाद्धिमवच्छब्दाच्चाण् प्रत्ययो भवति तत्र भव इत्येतस्मिन्विषये । यतोपवादः । वैशन्तीभ्यः स्वाहा । हैमवतीभ्यः स्वाहा ॥

स्रोतसो विभाषा ड्यड्ड्यौ ॥ ११३ ॥

स्रोतस्शब्दाद्विभाषा ड्यत् ड्य इत्येतौ प्रत्ययौ भवतस्तत्र भव इत्येतस्मिन्विषये । यतोपवादः । पक्षे सोपि भवति । स्रोतसि भवः, स्रोत्यः । स्रोतस्यः । ड्यड्ड्ययोः स्वरे विशेषः ॥

सगर्भसयूथसनुताद्यन् ॥ ११४ ॥

सगर्भसयूथसनुतशब्देभ्यो यन् प्रत्ययो भवति तत्र भव इत्येतस्मिन्विषये । यतोपवादः । स्वरे विशेषः । अनुभ्राता सगर्भ्यः । अनुसखा सयूथ्यः । यो नः सनुत्यः । सर्वत्र समानस्य छन्दसीति सभावः ॥

तुग्राद् घन् ॥ ११५ ॥

तुग्रशब्दाद्घन् प्रत्ययो भवति तत्र भव इत्येतस्मिन्विषये । यतोपवादः । त्वमग्ने वृषभस्तुग्रियाणाम् । अबाकाशयज्ञवरिष्ठेषु तुग्रशब्दः ॥

अग्राद्यत् ॥ ११६ ॥

अग्रशब्दाद्यत् प्रत्ययो भवति तत्र भव इत्येतस्मिन्विषये । अग्रे भव, अग्र्यम् । किमर्थमिदं यावता सामान्येन यद्विहित एव । घच्छौ चेति वक्ष्यति ताभ्यां बाधा मा भूदिति पुनर्विधीयते ॥

घच्छौ च ॥ ११७ ॥

अग्रशब्दाद्यत् घच्छौ प्रत्ययौ भवतस्तत्र भव इत्येतस्मिन्विषये । अग्र्यम् । अग्रियम् । अग्रीयम् । चकारस्तुग्राद्घनित्यस्यानुकर्षणार्थः । अग्रियम् । स्वरे विशेषः ॥

समुद्राभ्राद् घः ॥ ११८ ॥

समुद्रशब्दादभ्रशब्दाच्च घः प्रत्ययो भवति तत्र भव इत्येतस्मिन्नर्थे । यतोपवादः । समुद्रियाणां नदीनाम् । अभ्रियस्येव घोषः । अभ्रशब्दस्यापूर्वनिपातस्तस्य लक्षणस्य व्यभिचारित्वात् ॥

बर्हिषि दत्तम् ॥ ११९ ॥

भव इति निवृत्तम् । बर्हिःशब्दात्सप्तमीसमर्थाद्दत्तमित्येतस्मिन्नर्थे यत् प्रत्ययो भवति । बर्हिष्येषु निधिषु प्रियेषु ॥

दूतस्य भागकर्मणी ॥ १२० ॥

निर्देशादेव समर्थविभक्तिः । दूतशब्दात् षष्ठीसमर्थाद्भागे कर्मणि चाभिधेये यत्प्रत्ययो भवति । भागो ऽंशः । कर्म क्रिया । यत्ते अग्ने दूत्यम् । दूतभागः, दूतकर्म वा ॥

रक्षोयातूनां हननी ॥ १२१ ॥

निर्देशादेव समर्थविभक्तिः । रक्षःशब्दाद्यातुशब्दाच्च षष्ठीसमर्थाद्धननीत्येतस्मिन्नर्थे यत्प्रत्ययो भवति । हन्यते ऽनयेति हननी । याते अग्ने रक्षस्या तनूः । रक्षसां हननी । यातव्या यातूनां हननी । बहुवचनं स्तुतिवैशिष्ट्यज्ञापनार्थम् । बहूनां रक्षसां हननेन तनूस्स्तूयते ॥

रेवतीजगतीहविष्याभ्यः प्रशस्ये ॥ १२२ ॥

रेवत्यादिभ्यः षष्ठीसमर्थेभ्यः प्रशस्ये वाच्ये यत्प्रत्ययो भवति । प्रशंसनं प्रशस्यम् । भावे क्यप्प्रत्ययो भवति । यद्वा रेवती रेवत्यम् । यद्वा जगती जगत्यम् । यद्वा हविष्या हविष्यम् । हविषे हिता हविष्यास्तासां प्रशंसनं हविष्यम् । यस्येति लोपे कृते हलो यमां यमीति लोपः ॥

असुरस्य स्वम् ॥ १२३ ॥

असुरशब्दात्षष्ठीसमर्थात्स्वमित्येतस्मिन्नर्थे यत्प्रत्ययो भवति । अणोपवादः । असुर्यं वा एतत्पात्रं यच्चक्रधृतं कुलालकृतम् ॥

मायायामण् ॥ १२४ ॥

असुरशब्दात्षष्ठीसमर्थान्मायायां स्वविशेषे ऽण् प्रत्ययो भवति । पूर्वस्य यतोपवादः । आसुरी माया स्वधया कृतासि ॥

तद्वानासामुपधानो मन्त्र इतीष्टकासु लुक् च मतोः ॥ १२५ ॥

तद्वानिति निर्देशादेव समर्थविभक्तिः । मतुबन्तात्प्रातिपदिकात्प्रथमासमर्थादासामिति षष्ठ्यर्थे यत्प्रत्ययो भवति । यत्प्रथमासमर्थमुपधानो मन्त्रश्चेत्स भवति । यत्तदासामिति निर्दिष्टमिष्टकाश्चेत्ता भवन्ति । लुक्च मतोरिति प्रकृतिनि-

Digitized by Google

ह्रासः । इतिकरणस्ततश्चेद्विवक्षा । तद्वानित्यवयवेन समुदायो व्यपदिश्यते । वर्चःशब्दो यस्मिन्मन्त्रे ऽस्ति स वर्चस्वान् । उपधीयते येन स उपधानः । चयनवचन इत्यर्थः । वर्चस्वानुपधानमन्त्र आसामिष्टकानामिति विगृह्य यति विहिते मतोर्लुकि कृते वर्चस्या उपदधाति तेजस्या उपदधाति । पयस्याः । रेतस्याः । तद्वानिति किम् । मन्त्रसमुदायादेव मा भूत् । उपधान इति किम् । वर्चस्वानुपस्थानमन्त्र आसामित्यत्र मा भूत् । मन्त्रइति किम् । अङ्गुलिमानुपधानो हस्त आसामित्यत्र मा भूत् । इष्टकास्विति किम् । वर्चस्वानुपधानो मन्त्र एषां कपालानामित्यत्र मा भूत् । इतिकरणो नियमार्थः । अनेकपदसंभवेपि केन चिदेव पदेन तद्वान्मन्त्रो गृह्यते न सर्वेण ॥

अश्विमानण् ॥ १२६ ॥

अश्विशब्दो यस्मिन्मन्त्रे ऽस्ति सोऽश्विमान् । अश्विमच्छब्दादण् प्रत्ययो भवति । पूर्वस्य यतोपवादः । अश्विमानुपधानो मन्त्र आसामिष्टकानामिति विगृह्याणिवधीयते तत्र मतुपो लुकि कृते इनण्यनपत्यइति प्रकृतिभावः । आश्विनीरुपदधाति ॥

वयस्यासु मूर्ध्नो मतुप् ॥ १२७ ॥

वयस्वानुपधानो मन्त्रो यासां ता वयस्यास्तास्वभिधेयासु मूर्ध्नो मतुप् प्रत्ययो भवति । पूर्वस्य यतोपवादः । यस्मिन्मन्त्रे वयः शब्दो मूर्द्धन्शब्दश्च विद्यते स वयस्वानपि भवति मूर्द्धन्वानपि । यथा मूर्द्धा वयः प्रजापतिश्छन्द इति । तत्र वयस्वच्छब्दादिव मूर्द्धन्वच्छब्दादपि यति प्राप्ते मतुब् विधीयते । मूर्द्धन्वतीरुपदधाति । वयस्या एव मूर्द्धन्वत्यः । वयस्यास्विति किम् । यत्र मूर्द्धशब्द एव केवलो न वयःशब्दस्तत्र मा भूत् । मूर्द्धवत इति वक्तव्ये मूर्ध्न इत्युक्तं मतुपो लुकं भाविनं चित्ते कृत्वा ॥

मत्वर्थे मासतन्वोः ॥ १२८ ॥

यस्मिन्नर्थे मतुब्विहितस्तस्मिंश्छन्दसि विषये यत्प्रत्ययो भवति मासतन्वोः प्रत्ययार्थविशेषणयोः । प्रथमासमर्थादस्त्युपाधिकात्षष्ठ्यर्थे सप्तम्यर्थे च यत्प्रत्ययो भवति । मत्वर्थीयानामपवादः । नभांसि विद्यन्ते यस्मिन्मासे नभस्यो मासः । सहस्यः । तपस्यः । मधव्यः । नभःशब्दो ऽभ्रेषु वर्त्तते । तन्वां खल्वपि । ओजोस्यां विद्यते । ओजस्या तनू रत्नस्या । मासतन्वोरिति किम् । मधुमता पात्रेण चरति । मासतन्वोरनन्तरार्थे वा । मध्वस्मिन्नस्ति मध्वस्मिन्ननन्तरमिति वा मधव्यो मासः ॥ लुगकारेकाररेफाश्च वक्तव्याः ॥ * ॥ लुक्तावत् । तपश्च तपस्यश्च । नभश्च नभस्यश्च । सहश्च सहस्यश्च । नपुंसकलिङ्गं छान्दसत्वात् । अकारः । इषो मासः । ऊर्जो मासः । इकारः । शुचिर्मासः । रेफः । शुक्रो मासः ॥

मधोर्ञ च ॥ १२९ ॥

मधुशब्दान्मत्वर्थे ञः प्रत्ययो भवति चकाराद्यच्च । उपसंख्यानाल्लुक्च । माधवः । मधव्यः । मधुः । तन्वां खल्वपि । माधवा । मधव्या । मधुः । तनूः ॥

ओजसो ऽहनि यत्खौ ॥ १३० ॥

मत्वर्थइत्येव । ओजःशब्दान्मत्वर्थे यत्खौ प्रत्ययौ भवतो ऽहन्यभिधेये । ओजस्यमहः । ओजसीनमहः ॥

वेशोयशआदेर्भगाद्यल् ॥ १३१ ॥

मत्वर्थइत्येव । वेशोयशसी आदी यस्य प्रातिपदिकस्य तस्माद्वेशोयशआदेर्भगान्तात्प्रातिपदिकान्मत्वर्थे यल् प्रत्ययो भवति । लकारः स्वरार्थः । वेशोभगो विद्यते यस्य स, वेशोभग्यः । यशोभग्यः । वेश इति बलमुच्यते । श्रीकामप्रयत्नमाहात्म्यवीर्ययशस्सु भगशब्दः । वेशश्चासौ भगश्च श्रीप्रभृतिर्वेशोभगः, सोस्यास्तीति वेशोभग्यः ॥

ख च ॥ १३२ ॥

वेशोयशआदेर्भगान्तात्प्रातिपदिकान्मत्वर्थे खः प्रत्ययो भवति । योगविभागो यथासंख्यनिरासार्थ उत्तरार्थश्च । चकाराद्यल् । वेशोभग्यः । वेशोभगीनः । यशोभग्यः । यशोभगीनः ॥

पूर्वैः कृतमिनयौ च ॥ १३३ ॥

मत्वर्थइति निवृत्तम् । निर्देशादेव समर्थविभक्तिः । पूर्वशब्दात्तृतीयासमर्थात्कृतमित्येतस्मिन्नर्थे इन य इत्येतौ प्रत्ययौ भवतः । चकारात्ख च । पथिभिः पूर्विणैः । पूर्व्यैः । पूर्विणैः पूर्व्यैरिति बहुवचनान्तेन पूर्वपुरुषा उच्यन्ते । तत्कृताः पन्थानः प्रशस्ता इति येषां प्रशंसा ॥

अद्भिः संस्कृतम् ॥ १३४ ॥

निर्देशादेव समर्थविभक्तिः । अप्शब्दात्तृतीयासमर्थात्संस्कृतमित्येतस्मिन्नर्थे यत्प्रत्ययो भवति । यस्येदमप्यं हविः । अद्भिः संस्कृतमिति ॥

सहस्रेण संमितौ घः ॥ १३५ ॥

निर्देशादेव समर्थविभक्तिः । सहस्रशब्दात्तृतीयासमर्थात्संम्मितइत्येतस्मिन्नर्थे घः प्रत्ययो भवति । सम्मितस्तुल्यः सदृशः । अयमग्निः सहस्रियः । सहस्रतुल्य इत्यर्थः । के चित्तु समिताविति पठन्ति । तत्रापि समित्या सम्मित एव लक्षयितव्यः । तत्र छन्दसि प्रयोगदर्शनात् ॥

मतौ च ॥ १३६ ॥

मत्वर्थे च सहस्रशब्दाद् घः प्रत्ययो भवति । सहस्रमस्य विद्यते, सहस्रियः । तपःसहस्राभ्यां विनीनी, अण् चेत्यस्यापवादः ॥

सोममर्हति यः ॥ १३७ ॥

निर्देशादेव समर्थविभक्तिः । सोमशब्दाद् द्वितीयासमर्थादर्हतीत्येतस्मिन्नर्थे यः प्रत्ययो भवति । सोममर्हन्ति, सोम्या ब्राह्मणाः । यज्ञार्हा इत्यर्थः । यति प्रकृते यग्रहणं स्वरे विशेषः ॥

मये च ॥ १३८ ॥

सोमग्रहणं, यश्चानुवर्त्तते मय इति मयडर्थो लक्ष्यते । सोमशब्दान्मयडर्थे यः प्रत्ययो भवति । आगतविकारावयवप्रकृता मयडर्थाः । हेतुमनुष्येभ्यो ऽन्यतरस्यां रूप्यः । मयट् च । मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः । तत्प्रकृतवचने मयडिति । तत्र यथायोगं समर्थविभक्तिः । सोम्यं मधु पिबन्ति । सोममयमित्यर्थः ॥

मधोः ॥ १३९ ॥

यशब्दो निवृत्तः । मधुशब्दान्मयडर्थे यत्प्रत्ययो भवति । मधव्यान् स्तोकान् । मधुमयानित्यर्थः ॥

वसोः समूहे च ॥ १४० ॥

वसुशब्दात्समूहे वाच्ये यत्प्रत्ययो भवति चकारान्मयडर्थे च । यथायोगं समर्थविभक्तिः । वसव्यः समूहः । मयडर्थो वा ॥ अक्षरसमूहे छन्दसः स्वार्थउपसंख्यानम् ॥ * ॥ ओश्रावयेति चतुरक्षरम् । अस्तु श्रौषडिति चतुरक्षरम् । यजेति द्व्यक्षरम् । ये यजामहइति पञ्चाक्षरम् । द्व्यक्षरो वषट्कारः । एष वै सप्तदशाक्षरश्छन्दस्यः प्रजापतिर्यज्ञो मन्त्रे विहितः । सप्तदशाक्षराख्येव छन्दस्य इत्यर्थः । छन्दःशब्दादक्षरसमूहे वर्त्तमानात्स्वार्थे यत्प्रत्ययः ॥ वसुशब्दादपि यद्वक्तव्यः ॥ * ॥ हस्तौ पृणस्व बहुभिर्वसव्यैः । वसुभिरित्यर्थः । अग्निरीशे वसव्यस्य । वसोरित्यर्थः ॥

नक्षत्राद् घः ॥ १४१ ॥

नक्षत्रशब्दाद्घः प्रत्ययो भवति स्वार्थे । समूहइति नानुवर्त्तते । नक्षत्रियेभ्यः स्वाहा ॥

सर्वदेवात्तातिल् ॥ १४२ ॥

सर्वदेवशब्दाभ्यां तातिल् प्रत्ययो भवति छन्दसि विषये स्वार्थिकः । सर्वतातिः । देवतातिः ॥

शिवशमरिष्टस्य करे ॥ १४३ ॥

करोतीति करः प्रत्ययार्थः । तत्सामर्थ्यलभ्या षष्ठी समर्थविभक्तिः । शिवादिभ्यः शब्देभ्यः षष्ठीसमर्थेभ्यः कर इत्येतस्मिन्नर्थे तातिल् प्रत्ययो भवति । शिवं करोतीति, शिवतातिः । शंतातिः । अरिष्टतातिः ॥

भावे च ॥ १४४ ॥

भावे चार्थे छन्दसि विषये शिवादिभ्यस्तातिल् प्रत्ययो भवति । शिवस्य भावः, शिवतातिः । शंतातिः । अरिष्टतातिः । यतः पूर्वोऽवधिरतः परमन्यः प्रत्ययो ऽधिक्रियते ॥

इति श्रीजयादित्यविरचितायां काशिकायां वृत्तौ चतुर्थाध्यायस्य चतुर्थः पादः ॥ समाप्तश्च चतुर्थो ऽध्यायः ॥ शुभम् ॥ :: :: :: ॥

॥ आनन्दवृन्दावनचम्पूकाव्यस्य ॥

॥ अष्टमस्तबकावशेषः ॥

एवं मातृणामनुपदीनाः स्वभावपतिभावभावनासुरभिमनसो मनसो महोत्सवमिव तं दिनं दिनं प्रेक्षमाणा अपि तत्र महोत्सवे सविशेषसौन्दर्यदर्यवगाहनेन तदेकप्रथममिव दृश्यमानं दृश्यमानन्दितनिखिलजनं पतिभावकर्पूरपूरभावितैर्मनस्सुमनस्सुसम्भारैः स्वयं वव्रिर इव कन्या धन्यादिकाः ॥ १५० ॥

तं श्रीकृष्णं दिनं दिनं व्याप्य प्रतिदिनं प्रेक्षमाणा इत्यर्थः । "हेमन्तप्रथमे मासि नन्दव्रजकुमारिका" इत्यत्र कन्यागणस्य तन्मूलनमरोत्पन्नत्वान्मूलत एव कृष्णेन सह परिचयो ऽस्तीति वैष्णवतोषिण्या व्याख्यानात् । सौन्दर्यदरी सौन्दर्यकन्दरा तस्या अवगाहनेनालोचनद्वारा मनसैवेति भावः । दृश्यं दृग्भ्यां हितं दृश्यमानं प्रत्यक्षीक्रियमाणं पतिभावेन कर्पूरपूरेण भावितैर्वासितैर्मनांस्येव सुमनांसि पुष्पाणि तान्येव शोभनाः सम्भारास्तैः ॥ १५० ॥

एवञ्च सति समसमवधानसंगोपितसकलाकारविकारविशेषतया विशेषेणालक्ष्यमाणासूक्ष्यमाणासूत्तमेन मन्दाक्षेण सकलास्वेव नवगोकुलकुलललनासु ॥ १५१ ॥

अथात्र सामयिकीं श्रीकृष्णाकाङ्क्षितसुखसाधकतावैदग्धीं शुकस्याह । एवं सतीति । सकलास्वेव गोकुलवधूषु मध्ये वार्षभानव्यां राधाया मधुमथनो नव्यां पङ्कजस्रजमिव दृष्टिं नोदयाञ्चक्रे इत्यन्वयः । सकलासु तासु कीदृशीषु समं तुल्यमेव यत् सम्यगवधानं यथा द्रष्टुः श्रीकृष्णस्य तद्दर्शनार्थमवधानं तथैव दृश्यमानानां तासां तद्दृष्टिवारणार्थं यदवधानमित्यर्थः । तेन सम्यक् गोपितः सकल आकारो विकारविशेषश्च रोमाञ्चादिर्याभिस्तासां भावस्तत्ता तया हेतुना

विशेषेण अलक्ष्यमाणासु परिचेतुमशक्यास्वित्यर्थः । तत्र हेतुः । उत्तमेन मन्दाक्षेण लज्जया उद्यमाणासु आर्द्रीक्रियमाणासु । उन्द सेचने धातुः । "मन्दाक्षं ह्रीस्त्रपे"त्यमरः ॥ १५१ ॥

चिरोपसत्तिसत्तिमितहृदयतयायतया व्रजराजकुमारसमीपतोऽपतोदमुत्पत्य चरणकमलोपरि परिपतति पतति तस्मिन्नेव ससंभ्रमं तदीयत्वेनाधीयमानबहुमानबहुलमुपसर्पन्त्यां वार्षभानव्यां नव्यां पङ्कजस्रजमिव सैवेयमिति विभाव्य दृष्टिमदृष्टिमधुरां मधुमथनोऽथ नोदयाञ्चक्रे दयाञ्चक्रे च मनोवृत्त्या ॥ १५२ ॥

वार्षभानव्यां कीदृश्यां तस्मिन्नेव प्रसिद्ध एव पतति शुके पत्त्रिणि। "पतत्पत्त्ररथाण्डजा" इत्यमरः। अपतोदं गतव्यथं यथा स्यात्तथा उत्पत्य उड्डीय चरणकमलोपरि पतति सति तदीयत्वेन कृष्णसंबन्धिताप्राप्तत्वेन हेतुना आधीयमानात् तत्राप्यमाणात् बहुमानात् प्रचुरसंमानात् हेतोर्बहुलं यथा स्यात्तथा ससंभ्रममुपसर्पन्त्यां । तस्य शुकस्य तस्या एव चरणकमलपतने को हेतुरित्यपेक्षायामाह । चिरोपसत्तिश्चिरकालं तन्निकटवासस्तत एव हेतोः सत् शोभनं तिमितं प्रेमार्द्रं च हृदयं यस्य तत्तया, आयतया विस्तृतया न तु सा तस्याल्पा इत्यर्थः । तेन महाधीरस्यापि तस्य धृतिलोपो नासमञ्जस इति भावः । ततश्च सैव वलभीतले दृष्टचरी शुकस्वामिनी प्रसिद्धा राधेयमिति विभाव्य दृष्टिं नेत्रं प्रेरयामास । कीदृशी, मदृष्ट्या अदर्शनेन मधुरां सांमुख्याभावाददर्शनमेव तत् श्वश्रूजनादीन् प्रति व्यज्य निभृतं नीचैर्नेत्रेण स्वकर्तृकदर्शनमाधुर्यं तु तां ज्ञापयामासैवेत्यर्थः । दयाञ्चक्र इति तदङ्गानां पूर्वरागजनितकार्श्याद्यनुसन्धानेन ॥ १५२ ॥

अथ निखिलसौभाग्यशोभार्या भार्या व्रजपुरपुरन्दरस्य दरस्यन्दमानहसितमाध्वीका साध्वी कासारजमुखीस्ताः सकलाः सुतसमीपतः स्वयमानीय यथायथमुपपादितेषु भोजनस्थलेषु निवेशयामास ॥ १५३ ॥

सौभाग्यशोभया आर्या मुख्या, दर ईषत् स्यन्दमानं हसितमेव माध्वीकं यस्यां सा, ताभिर्वेष्टितस्य पुत्रस्य विद्युन्मण्डलमध्यवर्त्तिनो मेघस्येव शोभामालक्ष्य यत् पुत्रवध्व एता एव भवितुमनुरूपा इति निरुपाधिनैवाकस्मादुद्गतेन तासु वधूभावेन सा मन्दं जहासेति भावः । कासारजं कमलम् ॥ १५३ ॥

तस्मिन्नेव समये निरुपमगन्धमाल्यादिभिर्नैचिकीनिचयमभ्यर्च्य मणिप्रघने प्रघने सर्वतोभद्रासर्वतोभद्रासने निवेश्य धावितचरणान् कनकमयपात्रपात्रसात्करणयोग्यानत एव तथाविधपानभोजनाचमनादिभाजनैर्विरचितोपचारान् द्विजवृषभानर्घ्यादिनाभ्यर्च्य सनन्दोपनन्दभार्याभ्यां भार्याभ्यां रोहिण्या च परिवेषितान्यन्नपानादीन्याशयित्वा स्रगन्धताम्बूलवासोऽलङ्कारादिना चोपचर्य ॥ १५४ ॥

मणिभिः प्रघने प्रकृष्टनिबिडे, प्रघने अलिन्दे सर्वतोभद्रायाः गम्भार्याः सर्वतो मङ्गलं यत् आसनं तत्र । "गम्भारी सर्वतोभद्रे"त्यमरः । भा कान्तिस्तया आर्याभ्यां, आशयित्वा भोजयित्वा ॥ १५४ ॥

जननयनतापसंकर्षणेन संकर्षणेन सह सर्वानेव दशमिनः शमिनस्तरुणानपि शिशूनपि वल्लवानयेकृत्य रोहिण्या परिवेषितमन्नमशितुं व्रजराजो यदा प्रववृते ॥ १५५ ॥

दशमिनः वृद्धान्, अत एव शमिनः शान्तिमतः । "वर्षीन् दशमी ज्यायान"त्यमरः ॥ १५५ ॥

तदैव प्रसृमरमरकतभवनमध्यमध्यवस्थापितेषु सवसनेष्वासनेष्वारोप्यमाणानामसामान्यानां मान्यानां पार्श्वद्युतो मुख्याक्रमेण समुपवेशितानां वधूनां कुमारिकाणां च प्रत्येकं स्वयमेव परिवेषणमाचरन्ती चरन्तीव सुखसमुद्रे समुद्रीयमाणस्मितसुधाकणमयि न त्रपात्र पालनीयेति प्रतिजनमाभाषमाणा यथाजोषमाशयित्वा प्रत्येकममलतरवसनमणिमयालङ्कारमालानुलेपनसिन्दूरताम्बूलादिभिर्यथायथं संपूज्य पूज्यचरणासौ भगवती सौभगवतीनां मूर्द्धन्या धन्या श्रीकृष्णजननी जननीत्या ताः समस्ताः प्रत्येकमालिङ्ग्य भवनं प्रेषयामास ॥ १५६ ॥

समुत् सानन्दं रीयमाणाः अतिशयेन स्रवत् स्मितसुधायाः कणो यत्र तथाभूतं यथा स्यात्तथा । अयि पुत्र्यः अत्र त्रपा लज्जा न पालनीया स्वच्छन्दं भुज्यतामित्यर्थः । यथाजोषं प्रीत्यनुसारेण आशयित्वा भोजयित्वा । भगवती श्रीमती ॥ १५६ ॥

अनन्तरमवशिष्टमतिमोदनमोदनमापामरमखिलनगरवासिभ्यो निरलसलसन्मुखमेव विभज्य दत्वा नटनर्तकीवाद्यपूरकचारणमागधादिभ्यो व्रजराजेन पृथक् परितोषितेभ्योऽपि स्वयमपि पृथगमीषामतिसंकल्पकल्पनं दत्तवतीति । यदि विश्रान्तो महोत्सवस्तदा नित्यमेवमेव चेद्भवति तदैव निर्वृतिरिति मनसि विभाव्य क्षणं तदुपरमपरमदुःखानुभवमाससाद स दयालुः ॥ १५७ ॥

अतिमोदनमतिसुखदायिनमोदनमन्नं, चारणा नाटकाद्यभिनयकारिणः, मागधा वंशशंसकाः । दयालुरिति सकलजनसम्पूर्णतृष्णाकाङ्क्षया । धन्योऽसि भद्रपदमास समस्तकालभद्रं

Digitized by Google

पदे तव यदद्य मयानुभूतं । त्वां यो न योजयति हा प्रतिमासमेव धिक् तं विधातारमिति प्रजगाद राधा ॥ १५७ ॥

अथ परेद्यवि कुर्वन् धेनूनामवनं वनं गतो व्रजराजकुमारः कुमारयन् सह सहचरैः कुसुमकन्दुकखेलामाततान ॥ १५८ ॥

परेद्यवि परदिवसे । "परेद्यव्यद्यपूर्वेद्युरि"त्यादिनिपातनात् सिद्धं । कुमारयन् क्रीडयन् ॥ १५८ ॥

तत्र सहचरकरावचितकुसुमनिकरनिर्मितैरतिरुचिरविलाससरसोपयोगिभिरिन्दुपललपिण्डैरिव कुन्दकन्दुकैरितरेतरतरलतापन्नसंपन्नसंहननसंहननकौतुकेन केनचिदतिसंमोदमोदमानः, कदाचिदूर्द्धोद्धूननेन द्युरमणीरमणीयभावभावनामिव जनयन्, कदाचन तिर्यगसनेन दिग्वधूवृन्दस्य कर्णपूररचनामिव विदधानोऽनुचरैः सह धावमानो मानोन्नतमना मनागपि न विशश्राम ॥ १५६ ॥

इन्दुपललपिण्डैश्चन्द्रस्य मांसपिण्डैरिव कुन्दकुसुमकन्दुकैः इतरेतरं परस्परं तरलतापन्ने तारल्यं प्राप्ते संपन्ने शोभासंपत्तियुक्ते संहनने शरीरे यत् सम्यक् हननं क्षेपणाघातस्तेन कौतुकेन । "संहननं शरीरं वर्ष्म विग्रह" इत्यमरः । द्युरमणीनां स्वर्गाङ्गनानां रमणीयभावस्य भावनामस्माभिः सह विजिहीर्षुरेव अस्मान् प्रति कन्दुकं क्षिपतीत्येवंलक्षणां । तिर्यगसनेन तिर्यक्क्षेपणेन । असु क्षेपणे त्युडन्तः । मानः क्रीडाचातुर्यं,मन ज्ञान इत्यस्य घञन्तत्वात् । क्रीडागर्वो वा तेन उन्नतं मनो यस्य ॥ १५९ ॥

कदाचिच्च ।

धावन् कूणितकोणशोणनयनं घर्मद्युतेः शङ्कया
हेलाखेलनकौतुकी विजयते लोलालकैर्बालकैः ।
उद्धोद्धूनितकन्दुकग्रहवशादुद्वक्रमर्द्धस्खल-
च्चाहूष्णीषनिवेशितोत्तरकरं प्रोन्नीतपाण्यन्तरम् ॥ १६० ॥

ऊर्द्धमुत्कर्षेण धूनितं चालितं कन्दुकं तस्य ग्रहणवशात् उद्वक्रं यथा स्यात् तथा,अर्द्धस्खलति चाहणि उष्णीषे निवेशित उत्तरको वामपाणिर्यत्र तद्यथा स्यात् तथा,प्रकर्षेण उन्नीतमुत्क्षेपणावशात् पाण्यन्तरं दक्षिणपाणिर्यत्र तद्यथा स्यात् तथा, घर्मद्युतेः सूर्यस्य किरणनिपातशङ्कया कूणितौ संकुचितीकृतौ कोणौ ययोस्तथा भूते शोणे नयने यत्र तद्यथा स्यात् तथा, खेलनकौतुकी धावन् सन् विजयते ॥ १६० ॥

एवं गृहीत्वा कन्दुकं दुरवगाहचरिते तस्मिंश्चिरं विलस्य श्रमजलकणभरभरिततमुक्ताभिः खचितं शरदमलपूर्णसुधाकरबिम्बमिव वदनमण्डलं दधाने विश्रमणाय कस्यचन तरुतरुणस्य मूलमालम्बमाने लम्बमानेन लतापल्लवेन केनापि वीज्यमाने केनापि निजांसिचयाञ्चलेन कल्पितं तल्पमधिशयाने केनापि संवाहितचरणे सति चरणमनुचराः सर्वे एव तं परिचेरुः ॥ १६१ ॥

तस्मिन् श्रीकृष्णे ॥ १६१ ॥

इत्यखिलात्मना श्रीकृष्णेन सह परमदयिता मदयितारः सकलरसवन्तोऽवन्तो नैचिकीनिचयं दिनानि कियन्ति गमयाम्बभूवुरमी सुकृतिनः कृतिनः सर्वे ॥ १६२ ॥

अखिलानामात्मना प्रेमास्पदत्वादात्मभूतेन । मदयितारः, मदी हर्षे इत्यस्मात् णयन्तात् । कृष्णं हर्षयन्त इत्यर्थः । सकलरसवन्त इति । बलभद्रमण्डलीभद्रादीनां सख्यवात्सल्यदास्यानि रसाः, सुबलोज्ज्वलादीनां सख्यशृङ्गारोचितदास्ये रसौ, श्रीदामादीनां केवलसख्यं रसः, रक्तकादीनां तु केवलदास्यमिति ॥ १६२ ॥

परेद्यवि द्यवि चरत्सु वृन्दारकनिकरेषु पश्यत्सु श्यत्सु च नयनतापं जातकुतूहला हलायुधानुजेन साग्रजेन साग्रप्रमोदेन सह सहचराः पूर्वपूर्वदिनवच्चारयन्तो रयं तोषस्य गतवद्गवां निकुरम्बकं श्रीकृष्णेन तेनैव वृन्दावनतरुलताखगमृगमधुव्रतव्रातसौभाग्यं स्वनिष्ठमपि पूर्वजं व्यपदिश्य दिश्यमानं शृण्वन्तो विहरन्तश्च हरन्तश्च नयनवतां नयनसंतापं गगनमध्यमध्यवस्थिते मयूखमालिनि रुचिरुचिरवनविहारजातश्रमौ श्रमजलकणकमनीयकपोलमण्डलौ सहोदरावदरावरुद्धालस्यलस्यमानौ पूर्ववदतिघनप्रच्छायतरुमूलमालम्बमानौ श्रमापनोदविनोदविविधोपचारैरुपचरितवन्तो हसन्तो हासयन्तश्च मधुरतरकथाभिरथाभिनिन्युः प्रणयडाम्बर्यम् ॥ १६३ ॥

द्यवि आकाशे, वृन्दारकनिकरेषु देवसमूहेषु, श्यत्सु तूरीकुर्वत्सु । शो तनूकरणे शत्रन्तः । अग्रेण सह वर्तमानः साग्रः समग्रः संपूर्णः प्रमोदो यस्य तेन । वृन्दावनतरुलतेति । "अहो अमी देववरामरार्चितमि"त्याद्युक्तं । पूर्वजं बलदेवं । सहोदरौ रामकृष्णौ । अदरमनल्पमवरुद्धं यदालस्यं तेन लस्यमानौ श्लिष्यमाणौ, लस क्रीडायामित्यस्य श्लेषार्थकत्वमपि बोपदेवे दृष्टं, प्रणयडाम्बर्यं प्रेमोद्रेकम् ॥ १६३ ॥

श्रीकृष्णोऽपि चणं विश्रम्य सहसा सहसाध्वसप्रणयमग्रजस्य चरणकमलसंवाहनादिना दिततदीयखेदः सहेलखेलोल्लसितहसितह[illegible]सहचरचरमश्रमो मध्याह्नत-

Digitized by Google

पनतापमवधूय धेनुगणानुसरणकुतूहलिना हलिना सह सहजप्रणयमधुरो वनभुवि विहरमाणः क्षणं क्षणं वितनुते स्म ॥ १६४ ॥

सहसाध्वसप्रणयं ससंभ्रमगौरवस्य साध्वसगन्धित्वानपगमात् संवाहनक्रियाया विशेषणमिदं । दितः खण्डितः तदीयः खेदो येन सः । क्षणं व्याप्य । क्षणमुत्सवम् ॥ १६४ ॥

तस्मिन्नेवावसरे स रेरीयमाणमधुमधुरं सकलकलाकलापकौशलशलन्मधुरिमा धुरि मानभृतां मूर्द्धन्यो धन्योदारचरितः सबलो बलोर्जितः श्रीकृष्णः सखिभिरभ्यूचे ॥ १६५ ॥

सः श्रीकृष्णः । रेरीयमाणमतिशयास्वादि मध्विव मधुरं यथा भवत्येवं सखिभिरभ्यूचे उच्यते स्म । तत्र हेतुः । सकले कलाकलापे क्रीडाशिल्पसमूहे यत् कौशलं नैपुण्यं तेनैव शलन् प्राप्नुवन् मधुरिमा यं । शल हुल गतौ । इदं दुर्लभतालफलभक्षणमप्येकं क्रीडाकौतुकमिति भावः । मानभृतां संमानधारिणां धुरि गणनायां मूर्द्धन्य इति तादृशे प्रार्थनापि न लाघवायेति भावः । उदारचरित इति । बकाघाद्यसुरानिव धेनुकमपि हन्तुं समर्थ इति भावः ॥ १६५ ॥

भो भो राम ! भो भोः कृष्ण ! महाप्रभाव प्रभावधूतनिविडतमस्काण्डप्रकाण्ड बुभुक्षयाक्षयाजनि नो जठरयातना या तनावपि नो माति ॥ १६६ ॥

अत्र राम इति रमयसीति राम इत्युच्यसे तदस्मान् सखीन् रञ्जयित्वा स्वनाम्नैव सार्थकं कुर्वेति भावः । प्रभया कान्त्या अवधूतं निविडं तमस्काण्डं तमस्समूहो येन स चासौ प्रकाण्डं चेति "प्रशंसावचनैश्चे"ति समासः । न केवलमेतावदेवेत्याहुः किन्तु महाप्रभावेति । तेनाङ्गानां कान्त्या तमांसि बलेन तु तामसान् निर्धुनोष्येवेति प्रोत्साहयन्ति । बुभुक्षयेति प्रस्तुतकार्यसिद्ध्यर्थं खेदं जनयन्ति । नोऽस्माकं तनौ देहेऽपि न माति ॥ १६६ ॥

मातिदूरे दूरे सरीसृप्यमाणैः सौरभ्यैरभ्येधितघ्राणामोदमतिपाकमेदुरदुरवापफलानां मोदं जनयति नस्तालवनं । लवनं विनापि केवलान्दोलेनैव फलानि निपतिष्यन्ति ॥ १६७ ॥

तर्हि किमर्थयध्वे तत्राहुः । मातिदूरे निकट एव तालवनं नोऽस्माकं मोदं जनयति । अतिपाकेन मेदुराणां स्निग्धानां दुर्लभानां फलानां सौरभ्यैः सरीसृप्यमाणैः कुटिलवायुगत्या कुटिलं निस्सरद्भिः । अभि सर्वतोभावेन एधितो वर्द्धितो घ्राणामोदो येन तथाभूतं । लवनं छेदनं विनैवेत्यायासाभावोऽपि व्यञ्जितः ॥ १६७ ॥

तैरस्मानाप्याययितुमर्हतो भवन्ताविति गदितौ दितोत्कण्ठान् विधातुमेतान् समेतान् लालसया तद्धेनुकक्रूतात्रनं वनं समुपव्रज्य तच्छोभालोभालोलनयनौ नयनोत्कण्ठमवतारयामासतुः ॥ १६८ ॥

दितोत्कण्ठान् खण्डितोत्कण्ठान् कर्तुं । तत्तालप्रदानेनैव नान्यथेत्याह । लालसया समेतान् युक्तान् । धेनुकेन क्रूतमवनं रक्षणं यस्य तत् वनं । नयने फलग्रहणे चोत्कण्ठमुत्कण्ठामवतारयामासतुः प्रादुर्भावयामासतुः फलपातनार्थमुत्कण्ठां चक्रतुरित्यर्थः ॥ १६८ ॥

परिपाकपिङ्गलतागलता फलतादवस्थ्येन स्थविष्ठस्कन्धदेशा देशावच्छेदच्छेदरहिता हितालोका लोकाभिरामा रामानुजेन ते घनमेदुरा दुरासदाः सदाफलाः फलामोदमोदमानभुवनजनाजनागोचराश्चराचरगुरुणागुरुणा पवमानेन सटसटायमानदलदलद्द्रावद्रावकारिणा चोरितफलगन्धास्तालविटपिनो ददृशिरे दृशि रेचितविभ्रमेण ॥ १६९ ॥

रामानुजेन कृष्णेन ते तालविटपिनस्तालवृक्षा ददृशिरे दृष्टाः । कीदृशेन दृशि दृष्टौ रेचितः संपृक्तो विभ्रमो विलासो यस्य सोल्लासनेत्रेणेत्यर्थः । तालविटपिनः कीदृशाः परिपाकेन पिङ्गलतायां पिङ्गलवर्णतायां सत्यामपि अगलता अनपगच्छता फलनां तादवस्थ्येन तदवस्थत्वेन हेतुना स्थविष्टा अतिस्थूलाः स्कन्धदेशा येषां ते । अत एव तत्र देशावच्छेदे यश्छेदः विरलत्वेन छिद्रत्वलक्षणोऽवकाशस्तद्रहिताः स्कन्धदेशेऽतिस्थौल्यात् परस्परमिलनेनातिनिविडा एकीभूता इवेत्यर्थः । हितः सुखदत्वादालोकोऽपि येषां ते । घनेभ्यो मेघेभ्योऽपि मेदुराः स्निग्धाः । दुरासदा दुःखेनासाद्यन्त इति तथाभूताः । तथावर्णितगुणत्वं तेषामुत्प्रेक्षयापि व्यञ्जयति । चराचराणां जङ्गमस्थावराणां प्राणतया इन्द्रियशक्त्युपदेशकत्वेन गरुणापि पवमानेन वायुना श्लेषेण गुरुत्वात् अन्यमपि पवित्रीकुर्वतापि अगुरुणा भवता चौर्यसंकोचान्मन्दीभूतेन सता चोरितः फलगन्धो येषां तथाभूताः । कीदृशेन सटसटायमानानां दलानां पत्राणां दलद्भिः प्रस्फुरद्भिः रावैः फूत्कारशब्दैरिव द्रावं पलायनं कर्तुं शीलं यस्य तथाभूतेन । येषां गन्धमपि चराचरगुरुरपि लोभात् तथा तथा भवंश्चोरयति तेषां फलानां लोभ्यत्वं किं वर्णनीयमिति भावः ॥ १६९ ॥

तेन पातयध्वं पातयध्वमिति निगदितैस्तैः पुष्टलोष्टलोलकरतलैः पात्यमानानां फलानामाकर्ण्य ध्वनिमध्वनि

मन्दखुरखुरप्रखुरधरणिधूलिधोरणिभिरन्धकारीकृत्य दश दिश: प्रखरखरकाय: पश्चात्तनचरणयुगलक्षेपेण नाटयन्निव भुवस्तटमूर्जोत्स्फूर्जद्गर्जनेन तर्जयन्निव निर्जरानपि जर्जरीकृतपर्जन्यघोषो घोषोद्भवान् बालकानुपेत्य रामकृष्णावेव हन्तुकाम: काममभिससार सारवान् धेनुको नाम दैतेय: ॥ १७० ॥

तेन रामानुजेन निगदितैस्तैः सखिभिः । खुरा एव खुरप्राः खुरपा इति ख्याता अस्त्रविशेषास्तैः तुण्णाया धरणेर्धूलिधोरणिभिर्धूलिश्रेणिभिः । निर्जरान् देवान् । सारवान् बलवान् ॥ १७० ॥

तमापतन्तं पतन्तं पतङ्गमग्नाविव भूरिबलो बलोऽवहेलया हननाय क्षिप्यमाणे पश्चात्तनाबङ्घ्री वामकराग्रेणाधृत्य नभसि घूर्णयित्वा समुत्तालतालतरौ निक्षिप्य तेनैव तद्द्रुमाणामायासेनैव फलानि पातयन् घातयामास ॥ १७१ ॥

सम्यगुद्गतस्तार उच्चध्वनिर्यत्र स चासौ तालतरुश्चेति तस्मिन् । रलयोरैक्यात् । यद्वा । समुत्ताले सम्यगुत्कटे । "उत्तालो हेमकुण्डे स्याद्दर्भे चोत्ताल उत्कटे" इति विश्वः ॥ १७१ ॥

अथ समेतानिह निहतेऽस्यैवानुगामिनः कियतो यतोद्यमान् सहोदरावेव सहोऽदरावेवमाजघ्नतुः ॥ १७२ ॥

इह अस्मिन् धेनुके निहते सति समेतान् सहोदरावेव भ्रातरौ द्वावेव । कीदृशौ सहसा बलेन अदरौ अनल्पौ निर्भयाविति वा । एवमनेन प्रकारेण ॥ १७२ ॥

अथ निविडनिपातविशीर्य्यमाणपरिपक्वफलरसकर्द्दमदमदमायमाने भुवस्तलेऽशीर्य्यमाणान्यापक्वानि फलानि यथाकाममवचित्यावचित्य कौतुकतः कन्दुकखेलामेव चक्रुर्नतु बुभुजिरेऽजिरे तद्वनस्य रुरुधिरे रुधिरेण तेषां तानि फलानीति नीतिविद: ॥ १७३ ॥

आपक्वानि ईषत्पक्वानि । अत एव अशीर्य्यमाणानि स्कन्धवृन्तादगलन्ति नतु बुभुजिरे इत्यत्र हेतुः तस्य वनस्य अजिरे प्राङ्गणे अवकाश इति यावत् तानि फलानि सर्वाणि रुधिरेण गर्दभरक्तेन रुरुधिरे रुद्धानीति अपावित्र्यादिति नीतिविदो धर्मशास्त्रनीतिज्ञा रामकृष्णादयः । अत एवाधुनिका अपि तदीयभक्तास्तां नीतिं तालमात्राभक्षणादनुसरन्तीति ज्ञेयं ' अत एव मूलेऽपि "अथ तालफलान्यादन् मनुष्या गतसाध्वसा" इत्यत्र मनुष्यास्तत्रत्याः पर्वतवासिनः पुलिन्दाद्या हीनजातय एव नतु रामकृष्णाद्या इति व्याख्येयम् ॥ १७३ ॥

एवं तालफलानास्वादाजातसौहित्यैस्तद्गन्धबान्धव्यबन्धुरनासापुटैस्तैः सह सरामो धेनूरवहार्यानाहार्यानागाह्यमधुरिमा धुरि मानभृतामाद्यो माद्योतितभुवनतलो नतलोकशोकहानोकहानोर्जस्विनो वृन्दावनस्य प्रत्येकमवलोक्याभिनन्दन्नपराह्णमालोक्य व्रजाभिमुखो मुखोद्गीरितमुरलीकोऽलीकोन्नीतमानुषभावो महानुभावो महानुत्तम: ॥ १७४ ॥

तालफलानामनास्वादेन हेतुना न जातं सौहित्यं तृप्तिर्येषां तैः । तेषां गन्धस्यैव बान्धव्येन ग्राहकत्वाद्बान्धवतया बन्धुरं सुन्दरं नासापुटं येषां तैः । "बन्धुरं सुन्दरेऽपि" चेति विश्वः । अनाहार्यः न कुतश्चिदाहरणीयः किन्तु स्वाभाविक एव अनागाह्यः अतलस्पर्शः मधुरिमा माधुर्यमुद्रा यस्य सः । मानभृतां संमानधारिणां धुरि गणनायामाद्यः मूलभूतः । मा शोभा तया द्योतितं भुवनतलं येन सः । अनोकहान् वृक्षान् । अभिनन्दन्निति । पत्रपुष्पफलच्छायादिभिः प्रीतिदायित्वात् तालानेव तद्वैपरीत्येन दुर्भगत्वाच्चिदन्निति भावः । अलीकोन्नीतमानुषभाव इति । मानुषशब्दोऽयं रूढवृत्त्या प्राकृतजीवविशेषवाची । महेन उत्सवेन न विद्यते उत्तमो यस्मात् सः ॥ १७४ ॥

मानसगङ्गाया अनुकूलमनुकूलमरुता पुरः पुरः प्रतिनीयमानेषु धेनुखुरखुरलिकोद्धूतधूलिनिकरेष्वनुषक्तानुषक्ताकारतया लग्नेन कियता गोखुरपांशुना चोचुम्ब्यमानचलद्दलकचारूष्णीषं वदनबिम्बं प्रियजननयने निदधानो मुरलीकलेन कलेन व्रजनगरनागरीगरीयो मनोमाणिक्यचौर्य्यैस्ताभिरभितोऽधिरूढवलभीतलाभिरनिमिषनयनपुटकिनीकुसुमदलपुटकेन पेपीयमानवदनो भवनमाविवेश श्रीकृष्ण: ॥ १७५ ॥

अनुकूलं कूले कूले । पुरोऽग्रतः । पुर इति द्वितीयाबहुवचनं पुरीः प्रतीत्यर्थः । खुरलिका अभ्यासः । अनुषक्तात् अनुषङ्गात् हेतोरनुषक्तः अनुबद्ध आकारो यस्य तत्तया हेतुना लग्नेन । चोचुम्ब्यमाना अतिशयेन युज्यमानाश्चलन्तोऽलकाश्चूर्णकुन्तलाश्चारु उष्णीषं च यत्र तत् । मुरलीकलेन कीदृशेन कलेन कं सुखं लाति ददातीति तेन । नयनमेव पुटकिनीकुसुमं कमलपुष्पं तदेव दलपुटकं पत्रपुटकं । यद्वा । तस्यैव दलं पत्रं नेत्रैकदेशस्तदेव पुटकं तेन ॥ १७५ ॥

तदनु जननीभ्यामुत्सारितरजस्कमभिमार्जिततनूधावनानन्तरमभ्यक्तोद्वर्तितस्नपितपरिधापितभूषितभोजितपायितौ सुखं सुषुपतुः श्रीरामदामोदरौ ॥

Digitized by Google

इत्यानन्दवृन्दावने बाल्यलीलालताविस्तारे पूर्वरागपरभागो नामाष्टमःस्तबकः ॥ ८ ॥

इत्यानन्दवृन्दावनटीकायां सुवर्णवर्त्यामष्टमस्तबकसंगमनम् ॥ ८ ॥

॥ अथानन्दवृन्दावनचम्पूकाव्यस्य ॥

॥ नवमस्तबकारम्भः ॥

अथैकस्मिन्नहनि विना रामेण वनमागते वनमालिनि चारयति च नैचिकीनिचयं किमपि जातमाश्चर्यम् ॥ १ ॥

व्रजव्याकुलता नागफणे नाट्यं तदानतिः । बन्धुभिर्मिलनं नागमोचनं नवमे क्रमात् ॥ विना रामेण, तस्मिन्नहनि मासिकतदीयजन्मनक्षत्रप्राप्तौ तन्मात्रा तस्य मङ्गलस्नपनार्थं गृह एव रक्षितत्वात् ॥ १ ॥

तथाहि । अहो अहोनाथदुहितुरचिकित्स्यो हृद्रोग इव ॥ २ ॥

तत्रैव कालियफणाङ्गनसाङ्गनटनलक्षणमाश्चर्यं वर्णयिष्यन् प्रथमं दुर्दमताभिव्यञ्जनाय सपरिकरं तमेव कालियमुत्प्रेक्षते । अहो इत्यादिना । अहो इत्याश्चर्यं । अहोनाथस्य सूर्यस्यापि दुहितुरिति 'आरोग्यं भास्करादिच्छेदि"ति स्मृतेः सर्वरोगनिहन्तुरपि कन्याया यमुनाया हृद्रोगः ॥ २ ॥

त्रिलोकलोकसंहारशक्तिनिक्षेपस्थलमिव कालाग्निरुद्रस्य ॥ ३ ॥

किञ्च । रोगः स्वाश्रयमेव हिनस्ति अयन्तु सर्वमेवेत्यतः पुनरुत्प्रेक्षते । त्रिलोकस्य त्रिभुवनस्य लोकानां जनानां संहारे या शक्तिस्तस्या निक्षेपस्थानमिव, सा शक्तिरस्मिन् कालिय एव कालाग्निरुद्रेण निक्षिप्ता वर्तते इत्यर्थः । 'लोकस्तु भुवने जन" इत्यमरः ॥ ३ ॥

उत्पत्तिभूमिरिव भयानकरसस्य ॥ ४ ॥

किञ्च । सा संहारिका शक्तिरपि सर्वेषां न सर्वदा भयप्रदा किन्तु स्वसमये संहरतिमात्रमतस्ततोऽप्यधिकतीक्ष्णत्वेनोत्प्रेक्षते । उत्पत्तीति ॥ ४ ॥

अनियोजितसाहाय्यकारी सुहृदिव मृत्योः कोऽपि कालियो नाम काद्रवेयः पन्नगवैरिणो भियाभियातस्तस्या अन्तर्हृदमध्यास्ते ॥ ५ ॥

न केवलमतिभयप्रद एव किन्तु अनियोजितः सन्नपि साहाय्यकारी मृत्योरिति प्रतिदिनमेव प्राणिनो हिनस्त्ययं सर्वतोऽपि विलक्षण इत्यर्थः । पन्नगवैरिणो गरुडस्य भिया भयेनाभिगतः । तस्या अहोनाथदुहितुर्ह्रदमध्यमध्यास्त इति वर्तमानप्रयोगोऽत्र कवेरन्तरनुभवसाक्षात्कारावेशेनैवेति ज्ञेयम् ॥ ५ ॥

यस्य सलिलान्तरितस्यापि विषस्योष्मणा तप्यमानं विहायो विहायोड्डीयन्ते विहगाः[1], यदुपरि परितश्च निजतनुभस्मीभावभयेन गन्धवाहोऽपि न वहति ॥ ६ ॥

[1] खैरेति पाठान्तरम् ।

तप्यमानं दह्यमानं विहाय आकाशं विहाय वामतो दक्षिणतो वा त्यक्त्वा । न वहतीति ऊर्द्धमुत्थितो यो विषोष्मवेगस्तेन प्राप्ताघातत्वाद्वहनाशक्तिरेव तयोत्प्रेक्षिता । "वियद्विष्णुपदं वा तु पुंस्याकाशविहायसी" त्यमरः । गन्धवाहः पवनः ॥ ६ ॥

नवहतिकरं यमस्वसा यमस्वसाधारणं जठरपिठरपिधायकं पित्तगुल्ममिव महादाहावहं वहन्ती यदीयनिश्वसनश्वसनमहावेगवेगवत्तरतरङ्गायजायत्सम्पाकसम्पाककुसुमसंकाशविषविषमज्वालाजालेन लवणमहोर्मिमालिनो महोर्मिमालाशालिनिशाकालीनलवणकान्तिविशेषचाक्चिक्यशक्योपमं पित्तमिव सन्ततं वमति ॥ ७ ॥

यमस्यापि स्वसा भगिनी स्वयं यमुना यं नवहतिकरं नित्यनवीनपीडाकरमस्वसाधारणं न विद्यते स्वस्य साधारणः समानो यस्य तथाभूतं कालियं । जठरमेव पिठरः पात्रभेदस्तस्य पिधायकं तदवकाशाच्छादकं पित्तगुल्ममिव वहन्ती सती यदीयानि निश्वसनानि निश्वासा एव श्वसनाः पवनास्तेषां महता वेगेन वेगवत्तरेषु तरङ्गेषु जायत् प्रकटद्युतियुक्तं सम्यक् पाकः परिपाको यस्य स तथाभूतस्य संपाककुसुमस्य शोणालुरिति ख्यातपुष्पस्य संकाशं सदृशं यद्विषं तस्य विषमेण ज्वालाजालेन अर्चिषां समूहेन लवणमहोर्मिमालिनो लवणसमुद्रस्य ऊर्मिमाला तरङ्गश्रेणी शालितुं प्राप्तुं शीलं यस्य तथाभूतस्य निशाकालीनस्य लवणकान्तिविशेषस्य यच्चाक्चिक्यं तेन शक्या उपमा यस्य तथाभूतं पित्तमिव संततं सदा वमति । "आरग्वधे राजवृक्षसंपाकचतुरङ्गुला" इत्यमरः । शल हुल पत्ल गतौ ॥ ७ ॥

स च महाह्रदो जलपटलमपिधाय समुद्गताभिर्यदीयनिश्वासधूमधोरणिभिन्तरनुमीयमाने विषवह्निमत्तया जलह्रदो वह्निमान् धूमादित्यसदनुमानमपि सदनुमानतया प्रमाणयति ॥ ८ ॥

अपिधाय आच्छाद्य । सम्यगुद्गताभिरुद्गताभिः चलिताभिः धूमधोरणिभिर्धूमश्रेणिभिर्हेतुभिः । असदनुमानमिति । वह्न्यनुमाने सर्वत्र जलह्रदस्य विपक्षत्वेनैव प्रसिद्धेः । सदनुमानतयेति । जलह्रदस्य पक्षत्वमेव तावदबाधितं पर्वतस्य वा पक्षत्वे जलह्रदस्य वा विपक्षता वा कथं घटतामुभयोरेव साध्यत्वात् । ततश्च सर्वत्र वह्न्यनुमानवाक्ये गङ्गाप्रवाहस्येव विपक्षत्वं कल्प्यमिति भावः ॥ ८ ॥

यस्य विषज्वालयालयाय नेशते शतेनानृज्वराणां ज्वराणां यादांसि विना तदीयादारदारतनयादि ॥ ९ ॥

यस्य कालियस्य विषज्वालया ज्वराणां शतेन हेतुना आलयाय निवासाय नेशते न शक्नुवन्ति । ज्वराणां कीदृशानामनृजुः कुटिलोऽरो वेगो येषां तेषां । "यादांसि जलजन्तव" इत्यमरः ॥ ९ ॥

तन्निवासभूतभूतद्रोहसत्त्वमहानलकुण्डकल्पकालपुरुषनाभिह्रददेशीयह्रददेशीयसीम्नि यदैव दैववशतो गता उदन्यायोगादन्यायोगान्यम्भांसि गावो गोपाश्च पिबन्ति स्म ॥ १० ॥

तन्निवासभूतं भूतद्रोहसत्त्वरूपं यन्महानलकुण्डं तत्कल्पस्तत्तुल्यो यः कल्पकालपुरुषस्य प्रलयकालसम्बन्धिपुरुषस्य नाभिह्रदस्तद्देशीयस्तत्सदृशो यो ह्रदस्तद्देशीयसीम्नि तद्देशसम्बन्धिसीमायां । "ईषदसमाप्तौ कल्पब्देश्यदेशीयर" इति कल्पदेशीयौ तद्धितप्रत्ययौ । द्वितीयः कल्पः प्रलयवाची "संवर्तः प्रलयः कल्प" इत्यभिधानात् । द्वितीयो देशीय इति देशसम्बन्धिवाची शैषिकच्छप्रत्ययान्तत्वात् । उदन्या पिपासा तद्योगात् । "उदन्या तु पिपासा स्यादि"त्यमरः । अम्भांसि कीदृशानि अन्यायोगानि अन्यस्य कालियनागभिन्नस्य नास्ति योगो यत्र तानि ॥ १० ॥

तदैव श्रीकृष्णोच्छातोऽच्छातोदया अप्यप्राकृतदेहतयाहतयापि गततद्याथातथ्येन सर्वे विपद्यन्ते स्मैव ॥ ११ ॥

अच्छातो न छिन्न उदयो येषां तथाभूता अपि । छो छेदने इत्यस्य निष्ठायां रूपं । अत्र हेतुभूतया अप्राकृतदेहतया चिदानन्दमूर्तितया अत एव अहतयापि अनपास्तयापि श्रीकृष्णस्येच्छाशक्त्या तेन लीलावेशादनियुक्तयापि तेषां श्रीकृष्णविषयप्रेमवर्द्धनार्थं विस्मयरसाढ्यर्थं च स्वयमेवोद्गतया हेतुना गतमन्तर्हितं तस्या अप्राकृतदेहताया यद्याथातथ्यं यथोचितस्वभावत्वं तेन विपद्यन्ते स्म इवेत्यवास्तवत्वव्यञ्जकम् ॥ ११ ॥

तदनु दनुजदमनो मनोव्यथामासाद्य सहसामृतरसनिस्यन्दिना नयनकमलकोणेन जीवयामासैव । जीविताः सन्तस्ततो विस्मिताः स्मितामृतमुचः परस्परपरमप्रणयतयातयया परस्परमालिङ्गन्तोऽगं तोषमयमिव विन्दन्तो मिथः समूचिरे ॥ १२ ॥

सहसा अकस्मादेव अमृतरसक्षरणशीलेनेवेति पूर्ववत् । आयतया विस्तृतया । अगं पर्वतं । तोषमयं सुखमयं । विन्दन्तो लभमानाः मिथः परस्परमूचिरे उक्ताः कर्मभूताः प्रथमान्ताः ॥ १२ ॥

अचिरेण जीविता वयममुनातो यमुनातोयपानतो मृताः पूर्वं यथानघानघासुरजठरवर्तिनोऽस्मान् जीवयामास । तदयं मृतसंजीवनः कोऽपि पदार्थ इति सस्पृहं श्रीकृष्णमालोकयामासुः सख्यायः ॥ १३ ॥

अनघानघरहितान् तथाप्यघासुरजठरवर्तिनः ॥ १३ ॥

श्रीकृष्णोऽपि स्वनाम्ना मित्रभूतायः कृष्णाया हृच्छोधनार्थमिव तस्य काद्रवेयस्य द्रवे यस्यन् आकाशमुखचुम्बनार्थेलम्बमानलालसयेव तुङ्गिमानमानयन्तमविकलदलकदम्बं कदम्बं समारुह्य ॥ १४ ॥

श्रीकृष्णोऽपि कृष्णाया यमुनायाः अम्भसि निपपातेत्यन्वयः । किं कर्तुं काद्रवेयस्य द्रवे विद्रवनिमित्तं दूरीकरणेइत्यर्थः । यस्यन् यत्नं कुर्वन् । यसु प्रयत्ने दिवादिः । कदम्बं समारुह्य । कीदृशमाकाशस्य मुखचुम्बनार्थमिव अग्रदेशस्यं शीर्षमिव लम्बमाना अतिदीर्घा या लालसा तया इव तुङ्गिमानं तुङ्गत्वमानयन्तमासम्यक् प्राप्नुवन्तमविकलं तादृशविषज्वालया प्रम्लानं दलकदम्बं यस्य तं । भाविभगवच्चरणस्पर्शसौभाग्यप्रभावात् अमृतमाहरता गरुत्मता आक्रान्तत्वाद्वा स एकस्तत्तीरेऽपि न शुष्क इति श्रीधरस्वामिचरणाः ॥ १४ ॥

कुटिलमलकनिकरं समूह्यासमूह्यातुलमहिमालमहिमानभङ्गाय दृढतरनिबद्धपरिकरः करकमलतलेनोल्लास्य पुनरपुनरवस्रंसमुष्णीषपटमाबध्य ॥ १५ ॥

समूह्य सबह्य एकीकृत्य बद्धेत्यर्थः । नसम्यगूह्यः तर्कगम्योऽतुलो महिमा यस्य सः । अलमतिशयेन अहेः कालियस्य मानभङ्गार्थं गर्वनाशाय न पुनरवस्रंसः स्खलनं यस्मात् तथा स्यादेवं निबध्य ॥ १५ ॥

माबध्यमानमाधुर्यो धुर्योऽखिलसौभगधुरन्धराणाम् ॥ १६ ॥

तत्र सनेत्रचमत्कारमाह । मा शोभा तया बध्यमानं सर्वतः समाहृत्य निरुह्यमानं माधुर्यं यत्र सः । तथाभूतस्य तस्य तादृशव्यवसायेन व्याकुलीकृतं स्वमनः स्वयमेवाश्वासयत्राह । अखिलसौभगधुरन्धराणां धुर्यः । सौभगमत्र महापराक्रमः सुकीर्तिर्वा "भगं श्रीकाममाहात्म्यवीर्ययत्नार्ककीर्तिष्वि" त्यभिधानात् । ततश्च पराक्रमभाग्वतां महाकीर्तिमतां वा मध्ये धुर्योऽग्रिमुख्य इत्यर्थः । तादृशकालियमर्दनमप्यस्य ईषत्करमेव का चिन्तेति भावः ॥ १६ ॥

धुरं धराणां स्थेम्न आवहन् प्रथमकैशोरसुभगवयस्तयायस्तया मृदुभावपुषि वपुषि परिच्छिन्ने ॥ १७ ॥

सविस्मयमीत्कारमाह । प्रथमकैशोरमेव सुभगं वयो यस्य तस्य भावस्तत्ता तया परिच्छिन्ने वपुषि धराणां पर्वतानां स्थेम्नः स्थैर्यस्य धुरं भारमावहन् सम्यग् धारयन् । तादृशवयस्तया कीदृश्या आयस्तया आयासवत्या । प्रथमकैशोरे हि विविधकौतुकमयचेष्टितोद्गमः स्वभावादेव भवतीत्यर्थः । यसु प्रयत्ने कर्तृनिष्ठान्तः । वपुषि कीदृशे दुमृभावं सौकुमार्यं पुष्णातीति तस्मिन् । "कोमलं मृदुलं मृदु" इत्यमरः ॥ १७ ॥

परिच्छिन्नेतरगरिमानगरिमानमर्दनमाधातुकामो हर्षोत्कर्षोत्कमना मनागनुचरनिकरमालोक्य ॥ १८ ॥

अत एव परि सर्वतोभावेन छिन्न इतरेषां गरिमा गौरवं येन सः । न अञ्चति गच्छतीत्यनक् अरिः शत्रुः कालियस्तस्य मानमर्दनं गर्वचूर्णनम् ॥ १८ ॥

Digitized by Google

मा भेतव्यमाभेतव्ययमिहैव धेनुसंभालनया स्थातव्यमिति हसितसितदशनरुचिरुचिराधरमाभाष्य ॥ १६ ॥

मा भेतव्यं । किंच । आभाया: प्रभाया इतो गतो व्ययो यत्र तथाभूतं यथा स्यादेवं स्थातव्यं यत्र स्थितिक्रियायां प्रभाव्ययो नास्तीत्यर्थः । मत्कृते शोको न कार्य इति भावः । हसितेति स्वक्लेशलेशमात्राभावज्ञापनार्थः ॥ १९ ॥

माभाष्यमाणप्रभावो भावोन्नतधीरधीरतिविषमविषमहानलपच्यमानकीलालं कीलालङ्घितखचरभूचरभूतनिकरं तं महाहृदमतिगभीरमभीरमलपराक्रमपराक्रमणकुशलतया कुशतया सुरुचिरचिरपल्लुलशकलमिव मन्यमानोऽन्यमानोत्कर्षहारी ॥ २० ॥

माभाष्यमाणो नवाग्गोचरः प्रभावो यस्य सः अकथ्यप्रभाव इत्यर्थः। भावेन शौर्येण उन्नता धीरा निष्कम्पा धीर्यस्य सः । अत एव तं महाद्रमतिगभीरमपि अभीर्भयरहितः अमलेन पराक्रमेण परस्य शत्रोर्यत् आक्रमणं तत्र कुशलतया दक्षतया कुशं जलं तत्सम्बन्धिन्या लतया शैवालेन सुरुचिरं चिरपल्लुलशकलं चिरकालीनक्षुद्रसरःखण्डं मन्यमानः । "कुशमप्सु" त्यमरः । अत्र कुशलतात्वेन कालिय उत्प्रेक्षितः । अन्यस्य मानोत्कर्षं हरतीति सः । महाहृदं कीदृशमपि अतिविषमं विषमेव महानलस्तेन पच्यमानं कीलालं जलं यत्र तं । कीलाभिर्ज्वालाभिर्लङ्घितो मारणार्थं स्वजले वेगेन पातितः खचराणां पक्षिणां भूचराणां तटे मृगादीनां च निकरो येन तं । "द्वयोर्ज्वालकीलावित्यमरः ॥ २० ॥

दूरतरमुड्डीय झषं जिघृक्षन्नतितरस्वी मत्स्यरङ्क इव तरसा रसादम्भसि निपपात ॥ २१ ॥

अतितरस्वी वेगवत्तरः । मत्स्यरङ्को माछराङा इति ख्यातः पक्षिविशेषः । दृष्टान्तोऽयं निर्भयतया ग्रहणमात्रांशे एव ज्ञेयः । रसात् अत्युत्साहवशादित्यर्थः ॥ २१ ॥

ततश्च ।

निष्पातावेगविघ्नद्विगुणितलहरीजालमूर्द्धोर्द्ध्ववृद्धि-
प्रस्फारस्फेम फेणस्फुरदुरुगरलस्फीतविस्फायिताम्भः ।
आमूलस्थूलकूलङ्कषतरलसमुत्तुङ्गभङ्गप्रसङ्ग-
त्रासाद्दूरेऽपसर्पत्पशुपशुपशिशुक्षुब्धतासीद्ध्रुदस्य ॥ २२ ॥

ततो ह्रदस्य क्षुब्धता क्षोभ आसीत् बभूव । कीदृशं यथा स्यात् निष्पातस्यावेगेन सम्यग्वेगेन विघ्नं विकलीकृतं द्विगुणितं च लहरीजालं तरङ्गसमूहो यस्मात् तत् । तथा ऊर्द्धोर्द्धमुपर्युपरि वृद्धेः प्रस्फारो विस्तारस्तस्य स्फेमा बहुत्वं यत्र तत्, उपर्युपरि क्रमेण क्षोभस्य वृद्धिरपि बहुविस्तृतासीदित्यर्थः । फेणैस्तथा तदानीन्तनैः स्फुरद्भिरुरुगरलैश्च क्रमेण स्फीतानि वृद्धानि विस्फायितानि वर्द्धितानि च अम्भांसि यस्मात् तत् । तथा आमूलं मूलमभिव्याप्य स्थूलानां कूलङ्कषाणां कूलकर्त्तनकारिणां तरलानां च समुत्तुङ्गानामत्युच्चानां भङ्गानां तरङ्गाणां प्रसङ्गात् प्रसक्तेस्त्रासात् दूरे तटादपि दूरेऽपसर्पन्तः पशवो गवाद्याः पशुपशिशवः कृष्णसखाश्च यतस्तत् । सर्वमेतत् क्षोभक्रियाविशेषणं । तेषां तत्तच्छब्देनोक्तिः स्वभावभीरुत्वव्यञ्जिका ॥ २२ ॥

किंच ।

पातालोदरदरणेच्छयेव मज्जन्
मज्जानं स्फुटमिव कम्पयन्नहीनाम् ।
आन्दोलं व्यतनुत बाहुमण्डलाभ्यां
प्रेङ्खोलद्गरलशिखाभृतो ह्रदस्य ॥ २३ ॥

दरणं विदारणं रलयोरैक्यात् । प्रेङ्खोलन्तीं चलन्तीं गरलशिखां बिभर्तीति तस्य ॥ २३ ॥

ततश्च ।

कुतोऽकस्मादस्मादृगपरिचितोऽयं ह्रदपयः-
समान्दोलो दोलल्लहरिभरभीमः समजनि ।
इति स्फायत्तर्कस्मयरसभृता तेन फणिना
फणीन्द्राणां तेजोहर इव मणीन्द्रः स ददृशे ॥ २४ ॥

स्फायन् वृद्धिं गच्छन् तर्को यत्र तथाभूतं स्मयरसं बिभर्तीति तेन कालियेन फणिना स श्रीकृष्णो मणीन्द्र इन्द्रनीलाख्यः तत्राद्भुतत्वं फणीन्द्राणां स्वेषां तेजोहर इव । यद्वा । जात्यैव फणीन्द्रतेजोहरणशीलः कश्चिन्मणीन्द्र इति ॥ २४ ॥

तमालोच्य तमालोच्यमानसादृश्यं दृश्यं निरातङ्कं तं कञ्चन परममनोहरं हरन्तमिव दर्पं कन्दर्पं कंसयन्तमिव माधुर्येण माधुर्येण ॥ २५ ॥

तं श्रीकृष्णमालोच्य स कालियः भोगेन स्वशरीरेण समवेष्टयदित्यन्वयः । तं कीदृशं तमालेन सह उच्यमानं वर्ण्यमानं सादृश्यं यस्य तं । दृश्यं दृग्भ्यां हितं वस्तु शक्तिस्वाभाव्येनापि समस्तदुरितनाशात् । निरातङ्कं । निश्शङ्कं । तं बहुकालतोऽपि प्रसिद्धं कञ्चन अनिर्वचनीयं दर्पं हरन्तं संहरन्तमिव कन्दर्पं कामदेवमपि माधुर्येण कंसयन्तं धिक्कुर्वन्तं "कसि हिंसायां" चुरादिः । माधुर्येण कीदृशेन मा शोभा तस्या धुर्येण । अत्र तमालेति, दृश्येति, परमेति, कन्दर्पेति, विशेषणचतुष्टयेन तादृशमाधुर्यशालिनमपि नृशंसः कालियो हिं-

Digitized by Google

सार्धे तथाकरोदिति, तथानिरानर्छामिति, दर्पे हरन्तमिति विशेषणाभ्यां तादृशप्रभावशालित्वेनानुभूयमानमपि तं तथाकरोत् स महामूर्ख इति, विरोधो ध्वनितः ॥ २५ ॥

सप्रकोपरुषा परुषायितमनाः प्रौढाभोगेन भोगेन च कालीयः कालीयकसुरभिशरीरं समवेष्टयत् ॥ २६ ॥

तत्र समाधत्ते सप्रकोपेति । प्रकोपो वृद्धिः यथा पित्तप्रकोपो ज्वरप्रकोप इति सप्रकोपया वर्द्धमानया रुषा परुषायितमनाः कटूकृतचित्तः । प्रौढ आभोगो यस्य तेन । "आभोगः परिपूर्णते"त्यमरः । कालीयो दीर्घमध्योऽपि । कालीयकं कालेयक इति ख्यातं सुगन्धिकाष्ठम् ॥ २६ ॥

भगवानपि नपिहितैश्वर्यः प्रजगल्भे ॥ २७ ॥

प्रजगल्भे प्रागल्भ्यमकरोत् ॥ २७ ॥

शेषमग्रे ।

THE

ŚULVASÚTRA OF BAUDHÁYANA,

WITH THE COMMENTARY BY DVÁRAKÁNÁTHAYAJVAN

(*Continued from page* 170.)

SECOND ADHYÁYA.

एवं सारत्निप्रादेशः सप्तविधः संपद्यते । २३

Thus the sevenfold agni together with the two aratnis and the prádeśa (i. e. the agni of $7\frac{1}{2}$ square purushas) is brought about.

आत्मा चत्वारः पुरुषाः । पक्षपुच्छास्त्रयः पुरुषाः । पक्षयोररत्निभ्यां पुच्छे प्रादेशेन पुरुषायाममर्धपुरुषव्यासमर्धपुरुषत्वं संभवति । एवं सप्तविधः सार्धाष्टमविधो ऽग्निः संपद्यते । अत्र कल्पे अरत्निना वा पक्षौ द्राघीयांसौ भवत इति प्रादेशवृद्धेर्वैकल्पिकत्वमुक्तम् । तच्छाखान्तर एवमप्यस्तीति ज्ञापनार्थम्[1] । तस्मिन्पक्षे[2] क्वचिदपि प्रयोगानुपदेशात् । अथ वेणुना मानमुच्यते । यूपावटीयाच्छङ्कोरर्धप्रक्रममवशिष्यानुपृष्ठ्यं वेणुं निधाय छिद्रेषु शङ्कून्निहत्योन्मुच्यापराभ्यां दक्षिणाप्राक् परिलिखेदान्तात् । अथ चतुर्निमिताच्चतुरस्रपूर्वान्तात् । उन्मुच्य पूर्वस्मादपरस्मिन्प्रतिमुच्य दक्षिणाप्रत्यक् परिलिखेदान्तात् । उन्मुच्य वेणुं मध्यमे शङ्कावन्त्यं वेणोश्छिद्रं प्रतिमुच्योपर्युपरिलेखासमरं दक्षिणा वेणुं निधायान्त्ये छिद्रे शङ्कुं निहत्य तस्मिन् मध्यमं वेणोश्छिद्रं प्रतिमुच्य । पूर्वापरे छिद्रे लेखान्तयोर्येव निदध्यात्तस्तत्र प्रतिष्ठाप्य छिद्रयोः शङ्कू निहन्ति स पुरुषश्चतुरस्रः । एवं प्रदक्षिणं चतुर आत्मनि पुरुषानभिमीते । पृष्ठ्यायां पूर्वयोश्चतुरस्रयोः पश्चाच्छङ्कुः । अपरयोः पौरस्त्यम् । पुरुषं दक्षिणे पक्षे । दाक्षिणात्यानां पञ्चानां मध्यमेषु त्रिषु वेणुं प्रतिमुच्योन्मुच्यापराभ्यामित्यादि । पुरुषं पुच्छे । पाश्चात्यानां चयानां दक्षिणयोरन्त्ये छिद्रे प्रतिमुच्य मध्यमे छिद्रे शङ्कुं निहन्यात् । एवमुत्तरयोः । एवं स्थितानां पञ्चानां मध्यमेषु त्रिषु तिर्यञ्चं वेणुं प्रतत्योन्मुच्योत्तराभ्यामिति द्रष्टव्यम् । पुरुषमुत्तरे पक्षे । दक्षिणपक्षवत् । वेणोः पञ्चमे लवणं कृत्वा तेन पक्षौ वर्धयेत् । एवं दशमे लवणं कृत्वा पुच्छम् ।

The above description of the measuring of the agni-kshetra is taken from the III. patala of Ápastamba's Śulvasutra; the manuscripts of the latter exhibit however different readings at several places.

उपधाने पक्षाग्रादुत्तरतः पुरुषतृतीयवेलायाम् । २४

When placing the bricks (on the agni-kshetra described in the preceding), at the distance of a third of a purusha towards the north from the end of the (southern) wing

चतस्रः पञ्चम्यः । पक्षाग्रादुत्तरत उपधानम् । दक्षिणान्तादुत्तरतः पुरुषतृतीयवेलायां । चत्वारिंशदङ्गुलप्रमाणवेलायामतीतायामित्यर्थः । अन्यथोत्तरत्र पूरणासंभवात् ।

चतस्रः पञ्चम्यस्तासामभितो द्वे द्वे पादेष्टके । २५

—there are to be placed four bricks, the side of which is equal to the fifth of a purusha and on each side of these two quarter-bricks (i. e. bricks the area of which is a quarter of the area of the pañchamís; their sides are ten aṅgulis long).

पश्चात्पुरस्ताच्च प्रादेशमवशिष्य मध्ये पूर्वापराश्चतस्रः पञ्चम्यः । तासां पञ्चमीनां पश्चात्पुरस्ताच्चावशिष्टेषु द्वे द्वे दशम्यावित्यर्थः ।

ततो ऽष्टौ चतुर्थ्यः । २६

Then eight bricks the sides of which are equal to the fourth part of a purusha = 30 aṅgulis.

These bricks are placed in two rows to the north from the bricks mentioned in S. 25.

उत्तरत इत्यनुवर्तते । पञ्चमीरीत्या उत्तरतस्तृतीयेन पूर्वापरा अष्टौ चतुर्थ्य इत्यर्थः । अष्टौ चतुर्थ्य उपदध्यात् । चतसृभिश्चतसृभिरेकैका रीतिः ।

[1] A. adds on the margin: नानुष्ठानार्थम् ।

[2] A. first hand, B. C. तत्कर्मपक्षे

Digitized by Google

पक्षशेषं षड्भागीयाभिः प्रच्छादयेत् । २७

The remainder of the wing is to be covered with bricks, the side of which is equal to the sixth part of a purusha.

There is room for twelve such bricks arranged in two rows at the southern end of the wing and for six bricks at the northern end.

अनुपहितं क्षेत्रं षड्भागीयाभिः षष्ठेनेत्युक्तेः । तत्र पञ्चमीभ्यो दक्षिणतो द्वादश । चतुर्थीभ्य उत्तरतः षड्भिरेकारीतिः । एवमष्टादश । एवं पक्षे चतुस्त्रिंशदिष्टकाः ।

एतेनोत्तरः पक्षो व्याख्यातः । २८

Thereby the northern wing is explained (i. e. it is to be covered with bricks in the same way as the southern wing.)

एतेनोपधानप्रकारेण । पक्षाग्राद्दक्षिणतः पुरुषतृतीयवेलायामित्याद्यूहनीयम् ।

पूर्वापरयोः पुच्छपार्श्वयोश्चतुर्भागीया उपदध्यात् । २९

On the eastern and the western side of the tail bricks are to be placed the side of which is equal to the fourth part of a purusha = 30 angulis.

They form two rows of four bricks each.

पुच्छस्य पूर्वपश्चिमान्तयोश्चतस्रश्चतस्रः ।

दक्षिणोत्तरयोः पादेष्टकाः । ३०

On the southern and the northern side (two rows of) quarter-bricks are to be placed (six bricks in each row).

पार्श्वयोरित्येव सामर्थ्यात् षड्भिः षड्भिः ।

शेषमग्निं पञ्चमभागीयाभिः प्रच्छादयेत् । ३१

The remainder of the agni is to be covered with bricks the side of which is equal to the fifth of a purusha.

The remainder of the agni, that part for which the bricks have not yet been mentioned, comprises the middle part of the tail and the whole átman. The latter requires one hundred panchamís, the former is covered with twelve.

पुच्छस्य मध्यमो भाग आत्मा च शेषः ।

एष द्विशतः प्रस्तारः । ३२

This is one layer of two hundred bricks.

Thirty-four in each wing, hundred in the átman, thirty-two in the tail.

सिद्धस्य पुनर्वचनेन पञ्चमायां वा चितौ संख्यां पूरयेदित्यत्रापि द्विशतोऽस्तीति सूचयति । एवं पक्षयोरष्टषष्टिः । पुच्छे द्वात्रिंशत् । आत्मनि शतम् । चतुर्थ्यश्चतुर्विंशतिः । पञ्चम्यो त्रिंशत्यधिकं शतम् । षष्ठ्यः षट्त्रिंशत् । दशम्यो विंशतिः ।



I.

Chaturasraśyenachit.

I. kind.

I. prastára.

Digitized by Google

अपरस्मिन्प्रस्तारे । ३३

In the second layer—

विशेषो वक्ष्यत इति शेषः ।

पक्षाग्रादुत्तरतोऽर्धव्यायामवेलायां तिस्रस्तिस्रः षष्ठ्यो द्वे द्वे द्विपदे इति विपर्यासमुपदध्यात् । ३४

One is to place at the distance of half a vyáyáma = 48 angulis towards the north from the (southern) end of the (southern) wing by turns three bricks the side of which is equal to the sixth of a purusha = 20 angulis and two bricks, the side of which is two padas = 30 angulis long.

The bricks are arranged in five rows; rows 1, 3, 5 consisting of three shashṭhís, rows 2, 4 of two dvipadás or chaturthís.

पक्षदक्षिणान्तादारभ्योत्तरतोऽरत्निद्वयेऽतीते पक्षपश्चिमपार्श्वं उदीच्यस्तिस्रः षष्ठ्यस्ततः पुरस्ताद्दक्षिणोत्तरे द्वे द्वे द्विपदे चतुर्थ्यौ । ततस्तिस्रः षष्ठ्यः । ततो द्वे द्विपदे । ततः पूर्वपार्श्वे तिस्रः षष्ठ्यः । इतिरेवमित्यर्थे । एवमेता विपर्यस्योपदध्यादित्यर्थः ।

तथोत्तरे । ३५

In the same way the bricks are to be placed in the northern wing.

पक्ष उपदध्यादिति शेषः ।

दक्षिणस्यां श्रोण्यां नव षष्ठ्यश्चतुरस्रकृताः । ३६

In the south-west corner of the átman nine shashṭhís are placed, arranged in a square.

आत्मनो दक्षिणस्यां श्रोण्यां षष्ट्यङ्गुलपरिमितं समचतुरस्रं क्षेत्रं परिगृह्य तत्र नव षष्ठ्य उपधेयाः ।

तथोत्तरस्याम् । ३७

The same is to be done in the north-west corner of the átman.

आत्मश्रोण्यां नव षष्ठ्यश्चतुरस्रकृता इत्यर्थः ।

नव नव षष्ठ्यो द्वे द्वे द्विपदे इति दक्षिणादंसादो-त्तरादंसाद्विपर्यासमुपदध्यात् । ३८

Place nine shashṭhís and two dvipadás (chaturthís) by turns, beginning from the south-east corner of the átman, until you have reached the north-east corner.

Two squares of nine shasṭhís each, corresponding to the squares in the śroṇís, cover the two east corners; at the southside of the north-east square and the north-side of the south-eastern square, two chaturthís are placed and between these chaturthís again a square of nine shashṭhís.

आत्मनि दक्षिणांसे षष्ट्यङ्गुलपरिमितं समचतुरस्रं क्षेत्रं परिगृह्य तत्र नव षष्ठ्यः । तत उत्तरेण पूर्वापरे द्वे द्विपदे । तत उत्तरेण पूर्ववन्नव षष्ठ्यः । ततो द्वे द्विपदे । तत उत्तरांसे नव षष्ठ्यः । इतिरेवमित्यर्थे । एवं दक्षिणांसादारभ्योत्तरांसाद्विपर्यस्योपदध्यात् ।

शेषमग्निं पञ्चमभागीयाभिः प्रच्छादयेत् । ३९

The remainder of the agni is to be covered with bricks the side of which is equal to the fifth of a purusha.

The remainder consists in this case of the middle part of the átman, both ends of both wings and the tail, all of which together require one hundred and twenty-five panchamís.

एष द्विशतः प्रस्तारो व्यत्यासं चिनुयाद्यावतः प्रस्तारांश्चिकीर्षेत्

This is again a layer of two hundred bricks; employ in the construction of the agni the two described layers by turns for as many layers as you wish to make.

The third layer is arranged in the same manner as the first, the fourth in the same manner as the second and so on. A comparison of the sketches of the two layers will show that the bricks of the second prastára cover the interstices between the bricks of the first prastára throughout and that the "bhedas" are thus avoided.

साहस्रे प्रथमः प्रस्तारस्त्रिरावर्तते । द्विसाहस्रे प्रथमद्वितीयौ पञ्च पञ्च । त्रिसाहस्रे प्रथमः प्रस्तार अष्टकृत्वः ।



II.

Chaturasraśyenachit.
I. kind.
II. prastára.

अथापरः । ४१

Now another kind (of the chaturasraśyenachit) will be described.

चतुरस्रश्येनचितो ऽपरः प्रकार उच्यत इति शेषः । अस्मद्व्याख्यातलिङ्गानुसारेणानियतद्रूपाश्चयनप्रकारा वक्ष्यन्त इत्यर्थः । तत्र करणानि ।

पुरुषस्य पञ्चम्यः । ४२

Bricks are to be made the side of which is equal in length to the fifth part of a purusha = one aratni = twenty-four angulis.

सर्वतो ऽरत्निमात्राः ।

ता एवैकतो ऽध्यर्धाः । ४३

Then bricks which are longer on one side by a half (i. e. oblong bricks of thirty-six angulis by twenty-four angulís).

उक्ता एव पञ्चम्यः । एकतः एकपार्श्वतः । अरत्नितिर्यङ्मानीकास्त्रिःप्रादेशपार्श्वमानीका इति यावत् ।

तासामर्ध्याः । ४४

Then bricks equal to the half of the pañchamís (i. e. oblongs of twenty-four angulis by twelve angulis)

तासां पञ्चमीनां । द्वादशाङ्गुलव्यासाः । अरत्निदीर्घाः ।

पाद्याश्च । ४५

And bricks which are equal to a quarter of a pañchamí (squares of twelve by twelve).

सर्वतः प्रादेशाः । एवं चत्वारि करणानि । प्रथमेन दशाधिकमष्टशतमिष्टकाः । द्वितीयेन षट्त्रिंशत् । तृतीयेन चत्वारिंशच्छतम् । चतुर्थेन चतुर्दश । एवं सहस्रम् । तत्र षोडशानामकपद अष्टौ पञ्चम्यो द्वे अर्धेष्टके ।

उपधाने । ४६

When the bricks are placed—

अग्निमानव्यापार इत्यर्थः ।

पूर्वापरयोः पक्षपार्श्वयोरर्धेष्टका उदीचीरुपदध्यात् । ४७

—half-bricks (S. 44) turned towards the north are to be placed on the east and west side of the southern wing.

Twelve such bricks are required, six for the east side of the wing, six for the west side.

उभयत्र षट् षडुदीचीः उदगायताः ।

तथोत्तरे । ४८

The same is to be done in the northern wing.

एवं द्वादशोपदध्यात् ।

Digitized by Google

दक्षिणोत्तरयोः पुच्छपार्श्वयोश्चतस्रश्चतस्र अध्यर्धा उदीचीः । ४९

On the southern and on the northern side of the tail four adhyardhás turned towards the north.— The first of these bricks (beginning from the east) is situated at a distance of twenty-four aṅgulis from the átman, the last at a distance of twelve aṅgulis from the western end of the tail.

पश्चात्प्रादेशमवशिष्य पुरस्तादरत्निं चावशिष्य मध्य उदगायताः ।

पुच्छस्यावस्ताच्चतस्रो ऽर्धेष्टका उदीचीः । ५०

On the western side of the tail four half-bricks turned towards the north.

पार्श्वयोरुभयश्च प्रादेशमवशिष्य मध्य उदगायताः ।

तासामभितो द्वे पादेष्टके । ५१

On both sides of these (in the two western corners of the tail) two quarter-bricks.

पुच्छश्रोण्योरित्यर्थः । दक्षिणस्यामेकामुत्तरस्यामेकाम् ।

जघनेन पुच्छाप्यययोरेकैकामर्धेष्टकां प्राचीम् । ५२

At the two places where the tail is joined with the hind part (western part) of the átman (in the two eastern corners of the tail) a half-brick is to be placed turned towards the east.

पूर्वपुच्छपार्श्वयोरुपहिताध्यर्धाभ्यः पुरस्तात् । दक्षिणोत्तरपार्श्वयोरध्यर्धामूलसंहिते प्रागायते ।

शेषमग्निं पञ्चमभागीयाभिः प्रच्छादयेत् । ५३

The remainder of the agni is to be covered with pañchamís.

The two wings together require forty-eight, the tail twelve, the átman one hundred.

पक्षशेषयोरष्टाचत्वारिंशत् । पुच्छशेषे द्वादश । आत्मनि शतम् ।

एष द्विशतः प्रस्तारः । ५४

This is one layer composed of two hundred bricks.

तत्र पक्षयोर्द्विसप्ततिः । अष्टाविंशतिः पुच्छे । आत्मनि शतम् । अस्मिन्प्रस्तारे षष्टिः शतं पञ्चम्यः । अष्टावध्यर्धाः । त्रिंशदर्ध्याः । द्वे पादेष्टके ।



III.

Chaturasraśyenachit.
II. kind.
II. prastára.

Digitized by Google

अपरस्मिन्प्रस्तार आत्मस्रक्तिषु पादेष्टका उपदध्यात् । ५५

In the second layer one quarter-brick is to be placed in each of the four corners of the átman.

आत्मश्रोण्यंसयोः ।

तासामभितो द्वे द्वे अर्धेष्टके । ५६

On the two sides of each of these four quarter-bricks, two half-bricks are to be placed (altogether sixteen).

दक्षिणांसप्रभृति प्रदक्षिणमुत्तरतः पश्चात् पुरस्तादुत्तरतः दक्षिणतः पुरस्तात् पश्चाद्दक्षिणत इति । एवं षोडश ।

पूर्वस्मिन्ननीके पञ्च । ५७

Five half-bricks are to be placed on the eastern front of the átman.

आत्मपूर्वान्ते पूर्वापह्नितान्तराले पञ्चार्धेष्टका उदीचीः ।

पक्षाग्रयोस्तिस्रस्तिस्रो ऽध्यर्धा उदीचीः । ५८

Three adhyardhá-bricks are to be placed in the end of each wing, turned towards the north.

In the southern wing one of these three bricks lies in the south-east corner, another in the south-west corner, the third in the middle of the space between the two first.

मध्ये पार्श्वयोरुदगायताः ।

तासामन्तरालेष्वेकैकामर्धेष्टकां प्राचीम् । ५९

In each of the interstices between the three adhyardhá-bricks one half-brick is placed, turned towards the east.

एकैकस्मिन्पक्षे द्वे द्वे पक्षाग्रसंगते प्रागायते ।

शेषमग्निं पञ्चमभागीयाभिः प्रच्छादयेत् । ६०

The rest of the agni is to be covered with pañchamí-bricks (of which one hundred and sixty-five are required).

पक्षसंधिरीतिभ्यां सह पक्षयोश्चतुःपञ्चाशत्पञ्चम्यः । पुच्छेन सहात्मनि मध्यतः पञ्चसप्ततिः । आत्मपार्श्वयोरष्टादशाष्टादश । एवं पक्षयोश्चतुःषष्टिः । पुच्छे त्रिंशत् । षट्शतमात्मनि । अस्मिन्प्रस्तारे पञ्चषष्टिः शतं पञ्चम्यः । षडध्यर्धाः । पञ्चविंशतिरर्ध्याः । चतस्रः पाद्याः ।

एष द्विशतः प्रस्तारो व्यत्यासं चिनुयाद्यावतः प्रस्तारांश्चिकीर्षेत् । ६१

This is a layer of two hundred bricks, etc.



IV.

Chaturasraśyenachit.

II. kind.

II. prastára.

अथ वक्रपक्षो व्यस्तपुच्छः । ६२

Now follows the construction in the shape of a falcon with curved wings and outspread tail.

चतुरस्रः श्येनचिदुक्तः । श्येनाकृतिर्द्विरूपः । तयोरेक उच्यते । वक्रौ कुटिलौ पक्षौ यस्य स वक्रपक्षः । विस्तीर्णं पुच्छं यस्य स व्यस्तपुच्छः । एतत्सर्वं चतुरस्रश्येनचिदपेक्षया ।

तस्येष्टकाः कारयेत्पुरुषस्य चतुर्थ्यः । ६३

For this construction bricks are to be made equal to the fourth part of a purusha (squares of thirty aṅgulis).

द्वितीयार्धे प्रथमा । सर्वतस्त्रिंशदङ्गुलाः कारयेत् ।

तासामर्ध्याः पाद्याश्च । ६४

Then bricks equal to a half of the chaturthís and other bricks forming a quarter of a chaturthí.

By the following sútra we are directed to form these two classes of bricks by drawing the diagonals of the chaturthí. Consequently the ardhyás are rectangular triangles with two sides = 30 aṅgulis, the third = $\sqrt{1{,}800}$ aṅg.; the pádyás are rectangular triangles with one side = 30 aṅgulis and two sides = $\frac{\sqrt{1{,}800}}{2}$.

नित्यमक्ष्णयापच्छेदनमनादेश इति वक्ष्यति । तथार्ध्यास्त्र्यस्राः । तासां त्रिंशदङ्गुले द्वे पार्श्वे सचतुर्दशतिलद्विचत्वारिंशदङ्गुलमन्यत्पार्श्वम् । पाद्याश्चापि त्रिकोणाः । तासां त्रिंशदङ्गुलमेकं पार्श्वम् इतरे ससप्ततिलैकविंशत्यङ्गुले ।

नित्यमक्ष्णयापच्छेदनमनादेशे । ६५

(If there are mentioned half-bricks, quarter-bricks, etc.) the division (of the original briek) is always to be made following the diagonals in case there is no special direction given.

तासामर्ध्यास्तिर्यग्भेदा इत्येवमादिवचनाभावे नित्यं सर्वदा कर्णरूपेणापच्छेदनम् ।

पादेष्टकाश्चतुर्भिः परिगृह्णीयात् । ६६

Then quarter-bricks are to be inclosed by four sides, (i. e. bricks are to be made which have four sides and the area of which is at the same time equal to the fourth part of a chaturthí).

पाद्याश्चेत्युक्तानामेवाकृत्यन्तरविधानम् । चतुर्भिः प्रमाणैः परिगृह्णीयात् स्वीकुर्यात् । कथम् ।

अर्धपदेन पदेनाध्यर्धपदेन पदसविशेषेणेति । ६७

With half a pada = 7½ aṅg., a pada = 15 aṅg., one pada and a half = 22½ aṅg., and the "saviśesha" of a pada (the saviśesha of a pada is according to the rule given in the first adhyáya = $15 + 5 + \frac{5}{4} - \frac{5}{4 \cdot 34}$ aṅgulis or about 21 aṅg. 7 tilas; the exact expression of its value would be = $\sqrt{450}$).

It will be easily seen that a brick of the stated dimensions is equal to the fourth part of a chaturthí; it has the form of a trapezium, which may be divided into an oblong of 15 by 7½ (= the eighth part of a chaturthí) and a rectangular triangle of 15, 15, $\sqrt{450}$ (= the eighth part of a chaturthí.)

दक्षिणत आरभ्य प्रागपवर्गमर्धाष्टमाङ्गुलेन पञ्चदशाङ्गुलेनार्धचयोविंशाङ्गुलेन ससप्ततिलैकविंशत्यङ्गुलेनेति । तस्याश्चतुरस्रपाद्येति संज्ञा ।

ते द्वे यथा दीर्घसंश्लिष्टे स्यातां तथार्धेष्टकां कारयेत् । ६८

Then a half-brick is to be formed by putting together two of these four-cornered quarter-bricks with their longs sides.

i. e. with those sides which are 22½ aṅgulis long. Thus we get an irregular pentagon, the area of which is equal to the half of a chaturthí. Bricks of this kind are called haṅsamukhís.

इदमपि तासामर्ध्या इत्युक्तानामेवाकृत्यन्तरविधानम् । ते पूर्वोक्ते चतुरस्रपाद्ये यथाध्यर्धपदपार्श्वेन संश्लिष्टे स्यातां तथा कारयेत् । पञ्चकोणेयम् । अस्या हंसमुखीति संज्ञा । एवं पञ्च करणानि । प्रथमेन चतुश्चत्वारिंशत्त्रिशतम् । द्वितीयेन षट्पञ्चाशत्त्रिशतम् । तृतीयेनाष्टषष्ट्यधिकं शतद्वयम् । चतुर्थेनाष्टादश । पञ्चमेन पञ्चदश । तत्र षोडशानामेकपद अष्टौ पाद्या द्वे अर्ध्ये । एवं सहस्रमिष्टकाः ।

अथाग्निं विमिमीते । आत्मा द्विपुरुषायामो दशपदव्यासः । ६९

Then the agni is measured out. The átman (of the falcon) is two purushas = 240 aṅgulis long, ten padas = 150 aṅg. broad.

एवं चत्वारिंशत्षोडश्यो भवन्ति ।

The term "shoḍaśí" employed by the commentator means the same as "chaturthí", the area of a brick, the side of which is equal to the fourth part of a purusha, amounting to the sixteenth part of a square purusha.

Digitized by Google

तस्य दक्षिणादंसादुत्तरतोऽध्यर्धप्रक्रमे लक्षणं करोति । ७०

At the distance of one and a half prakrama = 45 aṅgulis towards the north from the south-east corner of the (oblong representing the) átman a mark is to be made.

दक्षिणादंसादारभ्योत्तरत अध्यर्धप्रक्रमे लक्षणं करोति ।

एवमपरतः । ७१

The same is to be done on the western side (a mark is to be made at the distance of 45 aṅg. from the south-east corner towards the west).

दक्षिणादंसादेवारभ्य पश्चादप्यर्धप्रक्रमे लक्षणम् ।

तयोरुपरिष्टात्स्पन्द्यां नियम्यांऽसमपच्छिन्द्यात् । ७२

Having stretched a cord over these two marks he is to cut off the corner.

A cord is stretched between two poles fixed on the marks and the triangle lying to the south-east of this cord to be cut off from the area of the agni.

तयोः शङ्क्वोरुपरिष्टात् स्पन्द्यां नियम्यानुस्पन्द्यमंसमपच्छिन्द्यात् । एवं सार्धपादा चतुर्थी निरस्ता भवति ।

एतेनेतरासां स्रक्तीनामपच्छेदा व्याख्याताः । ७३

Thereby the cutting off of the other corners is explained.

A triangle of the same dimensions is cut off from the three other corners of the átman.

एतेनापच्छेदनप्रकारेणेतरासामात्मनः श्रोण्यंसानामपच्छेदा व्याख्याताः ।

स आत्मा । ७४

This is the átman.

The area of the átman is thereby reduced from 40 chaturthís to 35½ chaturthís.

एवमात्मनः श्रोण्यंसेष्वर्धपञ्चमाश्चतुर्थ्यो निरस्ता भवन्ति । अथ शिष्टा अर्धषष्ठास्त्रिंशच्चतुर्थ्यो भवन्ति ।

शिरोऽर्धषष्ठपदायाममर्धपुरुषव्यासं तस्यांऽसौ प्रक्रमेण प्रक्रमेणापच्छिन्द्यात् । ७५

The head is five and a half padas = 82½ aṅg. long and half a purusha broad; the two eastern corners are to be cut off with one prakrama = 30 aṅg. each.

Marks are to be made at the distance of 30 aṅgulis from the two east corners, cords stretched to join the marks and the triangles, formed by the cords and the corners, cut off.

तस्य शिरस अयमच प्रकारः । पूर्वस्याः करण्या मध्ये शङ्कुं निहत्य दक्षिणोत्तरयोः करण्योः पूर्वभागे प्रक्रमप्रमाणेन लक्षणं कृत्वा स्पन्द्यां नियम्य बहिःस्थमपच्छिन्द्यात् । एवमपच्छेदेनैका चतुर्थी निरस्ता भवति । इतरा अर्धपञ्चमाः शिरो भवन्ति ।

पुच्छस्य षट्पदा प्राची द्विपुरुषोदीची । ७६

The east line, i.e. the length from the east to the west of the tail is six padas = 90 aṅgulis, the north line, i.e. the breadth from the north towards the south is two purushas = 240 aṅgulis.

An oblong of the stated dimensions is drawn to the west of the átman.

आत्मपश्चिमपार्श्वेन सह । एवं चतुर्विंशतिश्चतुर्भागीयाः ।

तस्य पूर्वे स्रक्ती त्रिभिस्त्रिभिः प्रक्रमैरपच्छिन्द्यात् । ७७

The two eastern corners of this (oblong) are to be cut off with three prakramas, = 90 aṅgulis each.

A mark is made 90 aṅgulis north from the south-east corner of the oblong and another mark 90 aṅgulis south from its north-east corner. From the first mark a cord is stretched to the south-west corner, from the second to the north-west corner and the triangles formed by the cords etc. cut off.

दक्षिणादंसादुत्तरतः प्रक्रमत्रये ऽन्तोते लक्षणम् । एवमुत्तरांसाद्दक्षिणतः । तयोः स्पन्द्यां नियम्य श्रोण्योर्निपातयेत् । एवं नव चतुर्थ्यो निरस्ता भवन्ति । पुच्छशेषे पञ्चदश परिशिष्टा भवन्ति ।

पक्षो द्वादशपदायामो दशपदव्यासः । ७८

The (southern) wing has the length of twelve padas = 180 aṅgulis (from the north towards the south) and the breadth of ten padas = 150 aṅgulis (from the east towards the west).

An oblong of the stated dimensions is drawn touching the southern side of the átman; as in the case of átman, head and tail, it is only preparatory to the final shape of the wing.

आत्मदक्षिणपार्श्वमध्यसंगत उदगायतः । एवं विंशच्चतुर्थ्यो भवन्ति । पक्षमध्यनमनमाह ।

Digitized by Google

तस्य मध्यात् प्राङ् षट्पदानि प्रक्रम्य शङ्कुं निहन्यात् । ७९

Then one steps from its middle (from the middle of the western side of the oblong representing the wing) six padas towards the east and fixes there a pole.

पक्षापरान्तमध्यादारभ्य प्राञ्चं षट्पदानि प्रक्रम्य शङ्कुं निहन्यात् ।

श्रोण्योरेकैकम् । ८०

Then on each of the two western corners of the oblong a pole is fixed.

पक्षापरश्रोण्योरित्यर्थः ।

अथैनाꣳ स्पन्द्यया परिचिनुयात् । ८१

Then he encloses it (i. e. the triangular area the corners of which are marked by the three poles) with a cord.

एनां चिह्नान्तरालभूमिं सर्वेत्र स्पन्द्यया वेष्टयेत् ।

अन्तःस्पन्द्यमपच्छिद्य तत्पुरस्तात्प्राञ्चं दध्यात् । ८२

Having cut out that which (i. e. the triangle which) is enclosed by the cord it is to be placed to the east (of the oblong) turned towards the east.

A triangle of the same dimensions as that which has been cut out from the oblong is to be added to it on the eastside.

अन्तःस्पन्द्यं स्पन्द्यान्तर्गतं क्षेत्रमथोद्धृत्य पक्षस्य पुरस्तात्प्राञ्चं प्रागग्रमुपदध्यात् । एतदुक्तं भवति । पक्षपूर्वान्तमध्यादारभ्य प्राञ्चं षट्पदं प्रक्रम्य लक्षणं कृत्वा तस्मिन्पाशौ प्रतिमुच्य पक्षपूर्वश्रोण्योर्निपातयेदित्यर्थः ।

स निर्णामः । ८३

This is the "bending" of the wing.

य एष उक्तः स निर्णामः निर्णमनम् । अर्थनिर्देशोऽयं न संज्ञा । अपनाम इत्युत्तरत्र वक्ष्यमाणत्वात् ।

एतेनोत्तरस्य पक्षस्य निर्णामो व्याख्यातः । ८४

Thereby the bending of the northern wing is explained.

निर्णाम इत्यस्य प्रदर्शनार्थत्वात् । दक्षिणस्य पक्षस्य यदुक्तं द्वादशपदायाम इत्यादि तत्सर्वं परिगृह्यते । अन्यथासंभवात् ।

पक्षाग्रयोः प्रक्रमप्रमाणानि पञ्च पञ्च चतुरश्राण्यनूचीनानि कृत्वा सर्वाण्यक्ष्णयापच्छिन्द्यादर्धान्युद्धरेत् । ८५

Then at the end of each wing five squares of the measure of a prakrama = 30 angulis are to be drawn touching each other ; all these squares are to be divided in a downward direction by the diagonal and half of each removed.

At the south end of the southern wing, an oblong of 150 angulis by 30 angulis is drawn and then divided into five squares of 30 angulis.

In each square the diagonal from the north-east corner to the south-west corner is drawn and of the triangles formed in that way those which are situated to the right of the diagonals are removed. The five remaining triangles are meant to represent the pattras, the feathers of the wing.

पक्षाग्रयोर्दक्षिणत उत्तरतस्ताभ्यां संश्लिष्टानि सर्वतस्त्रिंशदङ्गुलानि पञ्च चतुरश्राणि प्रागपवर्गाणि कृत्वाग्राञ्चं यथा भवति तथाक्ष्णयापच्छिन्द्यादर्धान्युद्धरेत् । एवमुभयत्र पञ्च चतुर्थ्यो भवन्ति ।

एवꣳ सारत्निप्रादेशः सप्तविधः संपद्यते । ८६

Thus the seven-fold agni with the two aratnis and the prádeśa is brought about.

The area of the falconchiti described in the preceding amounts indeed again to 7½ square-purushas. It is impossible to retrace in all cases the steps by which the adhvaryus arrived at their results, which were most likely oftener obtained by repeated trying than by calculation. The commentator expresses in this case the area of the agni throughout by chaturthí-bricks and it is possible that the priests really took as many chaturthís as there are contained in thc chaturasraśyena-chiti and tried to form with them new figures.

एवं पक्षात्मशिरःपुच्छेषु विभक्तेष्वरत्निद्वयाभ्यां प्रादेशद्वयेन सह सप्तविधः पुरुषः संपद्यते । अर्धाष्टमपुरुषोऽग्निर्भवतीत्यर्थः । एवं सर्वत्र । अत्रात्मनि सार्धपञ्चाशच्चतुर्थ्यः । शिरस्यर्धपञ्चमाः । पुच्छे पञ्चदश । दशसु पक्षेषु पञ्च । पक्षयोः षष्टिः । एवं विंशत्यधिकं शतं षोडश्यः । पुरुषक्षेत्रे षोडश षोडश्यः शेरते । एवं सर्वत्र द्रष्टव्यम् ।

G. Th.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO, AT THE MEDICAL HALL PRESS, BENARES.

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 117. Benares, February 1st, 1876. Vol. X.

॥ काशिकायाः ॥

॥ पञ्चमाध्यायस्य प्रथमः पादः ॥

प्राक् क्रीताच्छः ॥ १ ॥

तेन क्रीतमिति वक्ष्यति, प्रागेतस्मात्क्रीतसंशब्दनाद्यानित ऊर्ध्वमनुक्रमिष्यामः छप्रत्ययस्तेष्वधिकृतो वेदितव्यः । वक्ष्यति । तस्मै हितमिति । वत्सेभ्यो हितो, वत्सीयो गोधुक् । करभीय उष्ट्रः । अकरभीयः । अवत्सीयः । अर्थावधित्वेन इहोक्तः, न प्रत्ययः । तेन प्राक् ठञः छ इति नोक्तम् ॥

उगवादिभ्यो यत् ॥ २ ॥

प्राक्क्रीतादित्येव । उवर्णान्तात्प्रातिपदिकाद्गवादिभ्यश्च यत्प्रत्ययो भवति । प्राक्क्रीतीयेष्वर्थेषु । छस्यापवादः । शङ्कव्यं दारु । पिचव्यः कार्पासः । कमण्डलव्या मृत्तिका * । गवादिभ्यः खल्वपि । गव्यं हविष्यम् । सनङ्गुर्नाम चर्मविकारः । ततः परत्वाच्चर्मणोऽञित्येष विधिः प्राप्नोति । तथा चरुर्नाम हविः । सक्तुरन्नविकारः । अपूपादिष्वन्नविकारेभ्यश्चेति पठ्यते । ततो विभाषा हविरपूपादिभ्यश्चेत्येष विधिः प्राप्नोति । तत्र पूर्वविप्रतिषेधेन यत्प्रत्यय एवेष्यते । सनङ्गव्यं चर्म । चरव्यास्तण्डुलाः । सक्तव्या धाना इति । गवादिषु नाभि नभं चेति पठ्यते । तस्यायमर्थः । नाभिशब्दो यत्प्रत्ययमुत्पादयति नभं चादेशमापद्यतइति । नाभये हितः नभ्योऽक्षः । नभ्यमञ्जनम् । यस्तु शरीरावयवो नाभिशब्दः ततः शरीरावयवादिति यति कृते नाभये हितं नाभ्यं तैलमिति भवितव्यम् । गवादिषु यतः संनियुक्तो नभभावोऽत्र न भवति । गो । हविस् । बर्हिष् । खट । अष्टका । युग । मेधा । स्रुक् ॥ नाभि नभं च ॥ शुनः संप्रसारणं वा च दीर्घत्वं तत्संनियोगेन चान्तोदात्तत्वम् ॥ शुन्यम् । शून्यम् । चकारस्यानुक्तसमुच्चयार्थत्वाद्यस्तद्धितइति लोपो न स्यात् ॥ ऊधसोऽनङ्च ॥ ऊधन्यः कूपः । उदर । खर । खद्र । अक्षर । विष * । गवादिः ॥

कम्बलाच्च संज्ञायाम् ॥ ३ ॥

कम्बलात्प्राक्क्रीतीयेष्वर्थेषु यत्प्रत्ययो भवति छस्यापवादः संज्ञायां विषये । कम्बल्यमूर्णापलशतम् । संज्ञायामिति किम् । कम्बलीया ऊर्णा ॥

विभाषा हविरपूपादिभ्यः ॥ ४ ॥

हविर्विशेषवाचिभ्योऽपूपादिभ्यश्च प्रातिपदिकेभ्यः प्राक्क्रीतीयेष्वर्थेषु विभाषा यत् प्रत्ययो भवति । आमिक्ष्यं दधि । आमिक्षीयं दधि । पुरोडाश्यास्तण्डुलाः । पुरोडाशीयाः । हविश्शब्दात्तु गवादिपाठान्नित्यमेव भवति । अपूपादिभ्यः । अपूप्यम् । अपूपीयम् । तण्डुल्यम् । तण्डुलीयम् । अपूप । तण्डुल । अभ्यूष । अभ्योष । पृथुक । अभ्येष । अर्गल । मुसल । सूप । कटक । कर्णवेष्टक । किण्व ॥ अन्न विकारेभ्यश्च ॥ यूप । स्थूणा । पीप । अश्व । पत्र † । अपूपादिः ॥

तस्मै हितम् ॥ ५ ॥

* कमण्डलव्या मृत्तिकेति पुस्तकान्तरे नास्ति ।

* स्कन्द । अध्वा । एतावत्र गणे पुस्तकान्तरे ऽधिकौ ।

† कट । अयः स्थूणा । ओदन । अवोष । प्रदीप । एते शब्दाः पुस्तकान्तरे ऽत्र गणे ऽधिकाः ।

Digitized by Google

तस्मादिति चतुर्थीसमर्थाद्धितमित्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति। वत्सेभ्यो हितो गोधुक्, वत्सीयः। अवत्सीयः। पटव्यम्। गव्यम्। हविष्यम्। अपूप्यम्। अपूपीयम्॥

शरीरावयवाद्यत्॥ ६॥

शरीरं प्राणिकायः। शरीरावयववाचिनः प्रातिपदिकाद्यत् प्रत्ययो भवति तस्मै हितमित्येतस्मिन्विषये। छस्यापवादः। दन्त्यम्। कण्ठ्यम्। ओष्ठ्यम्। नाभ्यम्। नस्यम्॥

खलयवमाषतिलवृषब्रह्मणाश्च॥ ७॥

खलादिभ्यो यत्प्रत्ययो भवति तस्मै हितमित्येतस्मिन्विषये। छस्यापवादः। खलाय हितं, खल्यम्। यव्यम्। माष्यम्। तिल्यम्। वृष्यम्। ब्रह्मण्यम्। वृष्णे हितम्, ब्राह्मणेभ्यो हितमिति वाक्यमेव भवति। छप्रत्ययोपि न भवति। अनभिधानात्। चकारोनुक्तसमुच्चयार्थः। रथाय हिता, रथ्या॥

अजाविभ्यां थ्यन्॥ ८॥

अज अवि इत्येताभ्यां थ्यन् प्रत्ययो भवति तस्मै हितमित्येतस्मिन्विषये। छस्यापवादः। अजथ्या यूथिः। अविथ्या॥

आत्मन्विश्वजनभोगोत्तरपदात् खः॥ ९॥

आत्मन्विश्वजन इत्येताभ्यां भोगोत्तरपदाच्च प्रातिपदिकात्खः प्रत्ययो भवति तस्मै हितमित्येतस्मिन्विषये। छस्यापवादः। आत्मन्विति नलोपो न कृतः प्रकृतिपरिमाणज्ञापनार्थम्। तेनोत्तरपदग्रहणं भोगशब्देनैव संबध्यते, न तु प्रत्येकम्। आत्मने हितम्, आत्मनीनम्। आत्माध्वानौ ख इति प्रकृतिभावः। विश्वजनेभ्यो हितं, विश्वजनीनम्॥ कर्मधारयादिष्यते॥ षष्ठीसमासाद्बहुव्रीहेश्छ एव भवति। विश्वजनाय हितं, विश्वजनीयम्॥ पञ्चजनादुपसंख्यानम्॥ *॥ पञ्चजनाच्च खः। अत्रापि कर्मधारयादिष्यते। पञ्चजनीनम्। अन्यत्र पञ्चजनीयम्॥ सर्वजनाट्ठञ् खश्च॥ *॥* सार्वजनिकम्। सर्वजनीनम्। अत्रापि कर्मधारयादेव। सर्वजनीयमन्यत्॥ महाजनान्नित्यं ठञ्वक्तव्यः॥ *॥ महाजनाय हितं, माहाजनिकम्। तत्पुरुषादेव। बहुव्रीहेस्तु छ एव भवति। महाजनीयम्। भोगोत्तरपदात्खल्वपि। मातृभोगीणः। पितृभोगीणः। भोगशब्दः शरीरवाची। केवलेभ्यो मात्रादिभ्यः छ एव भवति। मात्रीयः। पित्रीयः। राजाचार्याभ्यां तु नित्यम्। भोगोत्तरपदाभ्यामेव खः प्रत्यय इष्यते, न केवलाभ्याम्। राजभोगीनः। आचार्यभोगीनः॥ आचार्यादणत्वं च॥ *॥ केवलाभ्यां वाक्यमेव भवति। राज्ञे हितम्। आचार्याय हितमिति॥

* सर्वजनाट्ठञ् च। चकारात्खश्चेति पा० २।

सर्वपुरुषाभ्यां णढञौ॥ १०॥

सर्वपुरुषाभ्यां यथासंख्यं णढञौ प्रत्ययौ भवतः तस्मै हितमित्येतस्मिन्विषये। छस्यापवादः। सर्वस्मै हितं, सार्वम्। पौरुषेयम्॥ सर्वाण्णस्य वा वचनम्॥ *॥ सर्वीयम्॥ पुरुषाद्वधविकारसमूहतेनकृतेष्विति वक्तव्यम्॥ *॥ पौरुषेयो वधः विकारः समूहो वा। तेन कृते। पौरुषेयो ग्रन्थः॥

माणवचरकाभ्यां खञ्॥ ११॥

माणवचरकशब्दाभ्यां खञ् प्रत्ययो भवति तस्मै हितमित्येतस्मिन्विषये। छस्यापवादः। माणवाय हितं, माणवीनम्। चारकीणम्॥

तदर्थं विकृतेः प्रकृतौ॥ १२॥

प्रकृतिरुपादानकारणं, तस्यैव उत्तरमवस्थान्तरं विकृतिः। विकृतिवाचिनः प्रातिपदिकात्प्रकृतावभिधेयायां यथाविहितं प्रत्ययो भवति। तदर्थमिति प्रत्ययार्थविशेषणम्। तदिति सर्वनाम्ना विकृतिः परामृश्यते। विकृत्यर्थायां प्रकृतौ प्रत्ययः। तदर्थग्रहणेन प्रकृतेरनन्यार्थताख्यायते। न प्रकृतिविकारसंभवमात्रे प्रत्ययः। किं तर्हि प्रकृतेरनन्यार्थत्वे विवक्षिते। प्रत्ययार्थस्य च तदर्थत्वे सति सामर्थ्याल्लभ्या चतुर्थी समर्थविभक्तिः। केचित्तु तस्मै हितमित्यनुवर्त्तयन्ति। अङ्गारेभ्यो हितानि एतानि काष्ठानि, अङ्गारीयाणि काष्ठानि। प्राकारीया इष्टकाः। शङ्कव्यं दारु। पिचव्यः कार्पासः। तदर्थमिति किम्। यवानां धानाः। धानानां सक्तवः। प्रकृत्यन्तरनिर्वृत्तिरत्र विवक्षिता। न तादर्थ्यम्। धानानां सक्तवो न लाजानामिति। विकृतेरिति किम्। उदकार्थः कूपः। विकृतिग्रहणे अक्रियमाणे या का चित्प्रकृतिर्गृह्यते नोपादानकारणमेव। भवति च कूप उदकस्य प्रकृतिः। तत्रोत्पादनात्। न तु उदकं तस्य विकृतिः। अत्यन्तभेदात्। प्रकृताविति किम्। असेरर्था कोशी। असिरयसो विकृतिर्भवति। न तु कोशी तस्य प्रकृतिर्भवति। द्वयोरपि प्रकृतिविकृत्योर्ग्रहणे विवक्षितः प्रकृतिविकारभावो लभ्यते॥

छदिरुपधिबलेर्ढञ्॥ १३॥

छदिरादिभ्यः शब्देभ्यो ढञ् प्रत्ययो भवति तदर्थे विकृतेः प्रकृतावित्येतस्मिन्विषये। छस्यापवादः। छादिषेयाणि तृणानि। औपधेयं दारु। बालेयास्तण्डुलाः। उपधिशब्दात्स्वार्थे प्रत्ययः। उपधीयत इत्युपधिः रथाङ्गम्। औपधेयमपि तदेव दारु॥

ऋषभोपानहोर्ञ्यः॥ १४॥

ऋषभ उपानह् इत्येताभ्यां ञ्यः प्रत्ययो भवति तदर्थे विकृतेः प्रकृतावित्येतस्मिन्विषये। छस्यापवादः। आर्षभ्यो

वत्सः । चौपानह्यो मुञ्जः ॥ चर्मण्यपि प्रकृतित्वेन विवक्षिते पूर्व्वविप्रतिषेधादयमेवेष्यते ॥ चौपानह्यं चर्म ॥

चर्म्मणोऽञ् ॥ १५ ॥

चर्मण इति षष्ठी । चर्मणो या विकृतिः तद्वाचिनः प्रातिपदिकादञ् प्रत्ययो भवति तदर्थं विकृतेः प्रकृतावित्येतस्मिन्विषये । छस्यापवादः । वार्ध्रं चर्म । वारत्रं चर्म ॥

तदस्य तदस्मिन्स्यादिति ॥ १६ ॥

तदिति प्रथमा समर्थविभक्तिः, अस्येति प्रत्ययार्थः, स्यादिति प्रकृतिविशेषणम् । इतिकरणो विवक्षार्थः । एवं द्वितीयेपि वाक्ये । सप्तम्यर्थे तु प्रत्यय इत्येतावान्विशेषः । प्रथमासमर्थात्षष्ठ्यर्थे सप्तम्यर्थे च यथाविहितं प्रत्ययो भवति । यत्तत्प्रथमासमर्थं स्याच्चेत्तद्भवति । इतिकरणस्ततश्चेद्विवक्षा । प्राकार आसामिष्टकानां स्यात्, प्राकारीया इष्टकाः । प्रासादीयं दारु । सप्तम्यर्थे खल्वपि । प्राकारोऽस्मिन्देशे स्यात्, प्राकारीयो देशः । प्रासादीया भूमिः । स्यादिति संभावनायां लिङ् संभावने ऽलमिति चेदित्यादिना, इष्टकानां बहुत्वेन तत्संभाव्यते । प्राकार आसामिष्टकानां स्यादिति । देशस्य च गुणेन संभाव्यते । प्रासादोऽस्मिन्देशे स्यादिति । प्रकृतिविकारभावस्तादर्थ्यं चेह न विवक्षितम् । किं तर्हि योग्यतामात्रं तेन पूर्वस्यायमविषयः । द्विस्तद्ग्रहणं न्यायप्रदर्शनार्थम् । अनेकस्मिन्प्रत्ययार्थे प्रत्येकं समर्थविभक्तिः संबन्धनीयेति । अथेह कस्माच्च भवति । प्रासादो देवदत्तस्य स्यादिति । गुणवानयं संभाव्यते, प्रासादलाभोस्येति । इतिकरणो विवक्षार्थ इत्युक्तम् ॥

परिखाया ढञ् ॥ १७ ॥

परिखाशब्दात् ढञ् प्रत्ययो भवति तदस्य तदस्मिन्स्यादित्येतस्मिन्नर्थे । छस्यापवादः । पारिखेयी भूमिः ॥ छयतोः पूर्णोवधिः ॥ इतः परमन्यः प्रत्ययो विधीयते ॥

प्राग्वतेष्ठञ् ॥ १८ ॥

तेन तुल्यं क्रिया चेद्वतिरिति वक्ष्यति । प्रागेतस्माद्वतिसंशब्दानाद्यानित उर्ध्वमनुक्रमिष्यामः ठञ् प्रत्ययस्तेष्वधिकृतो वेदितव्यः । वक्ष्यति, पारायणतुरायणचान्द्रायणं वर्त्तयति । पारायणिकः । तैरायणिकः । चान्द्रायणिकः ॥

आर्हादगोपुच्छसंख्यापरिमाणाट्ठक् ॥ १९ ॥

तदर्हतीति वक्ष्यति आ एतस्मादर्हसशब्दनाद्यानित उर्ध्वमनुक्रमिष्यामः ठक् प्रत्ययस्तेष्वधिकृतो वेदितव्यः गोपुच्छादीन्वर्जयित्वा । अभिविधावयमाकारः, तेनार्हत्यर्थेपि ठक् भवत्येव । ठञधिकारमध्ये तदपवादः ठञ्विधीयते, वक्ष्यति । तेन क्रीतं । नैष्किकम् । पाणिकम् । अगोपुच्छसंख्यापरिमाणादिति किम् । गोपुच्छेन क्रीतं, गौपुच्छिकम् । संख्या । षाष्टिकम् । परिमाण । प्रास्थिकम् । कौडविकम् । ठञ् प्रत्युदाह्रियते । संख्यापरिमाणयोः को विशेषः । भेदगणनसंख्या एकत्वादिः । गुरुत्वमानमुन्मानं पलादिः । आयाममानं प्रमाणं वितस्त्यादिः । आरोहपरिणाहमानं परिमाणं प्रस्थादि ॥

ऊर्ध्वमानं किलोन्मानं परिमाणं तु सर्वतः ।
आयामस्तु प्रमाणं स्यात्संख्या बाह्या तु सर्वतः ॥

असमासे निष्कादिभ्यः ॥ २० ॥

आर्हादित्येव । निष्कादिभ्यः शब्देभ्यो ऽसमासे ठक् प्रत्ययो भवति आर्हीयेष्वर्थेषु । ठञोपवादः । नैष्किकम् । पाणिकम् । पादिकम् । माषिकम् । असमासइति किम् । परमनैष्किकम् । उत्तमनैष्किकम् । ठञेव भवति, परिमाणान्तस्येत्युत्तरपदवृद्धिः । अथ किमर्थमसमासइत्युच्यते यावता ग्रहणवता प्रातिपदिकेन तदन्तविधिः प्रतिषिध्यते । निष्कादिष्वसमासग्रहणं ज्ञापकं पूर्वत्र तदन्ताप्रतिषेधस्य । उगवादिभ्यो यत् । गव्यम् । सुगव्यम् । अतिसुगव्यम् । विभाषा हविरपूपादिभ्यः । अपूप्यम् । अपूपीयम् । यवापूप्यम् । यवापूपीयम् । शरीरावयवाद्यत् । दन्त्यम् । राजदन्त्यमित्येवमादि सिद्धं भवति ॥ इत उत्तरं च संख्यापूर्वपदानां तदन्तविधिरिष्यते ॥ पारायणतुरायणचान्द्रायणं वर्तयति । द्वैपारायणिकः । त्रैपारायणिकः ॥ लुगन्तायास्तु प्रकृतेर्नेष्यते ॥ द्वाभ्यां शूर्पाभ्यां क्रीतं द्विशूर्पम् । त्रिशूर्पम् । द्विशूर्पेण क्रीतमिति तदन्तविधिप्रतिषेधात् शूर्पादञन्यतरस्यामित्यञ् न भवति । सामान्यविहितष्ठञेव भवति । द्विशौर्पिकम् । ठञो द्विगुं प्रत्यनिमित्तात्लुगभावः * । तथाचोक्तम्, प्राग्वतेः संख्यापूर्वपदानां तदन्तग्रहणमलुकीति । निष्क । पण । पाद । माष । वाहद्रोण । षष्टि । निष्कादिः ॥

शताच्च ठन्यतावशते ॥ २१ ॥

आर्हाद् इत्येव । शतशब्दात् ठन्यतौ प्रत्ययौ भवतः अशते ऽभिधेये । आर्हीयेष्वर्थेषु । कनोपवादः । शतेन क्रीतं, शत्यम् । शतिकम् । अशतइति किम् । शतं परिमाणमस्य, शतकं निदानम् । प्रत्ययार्थोत्र संघः शतमेव वस्तुतः प्रकृत्यर्थाच्च भिद्यते । इह तु न भवति । शतेन क्रीतं, शत्यं शाटकशतम् । शतिकं शाटकशतमिति, वाक्येन ह्यत्र प्रत्ययार्थस्य तत्त्वं गम्यते न श्रुत्या । तथा चोक्तम् । शतप्रतिषेधे ऽन्यशतत्वे ऽप्रतिषेध इति । चकारो ऽसमासइत्यनुकर्षणार्थः । द्वौ च शतं च द्विशतं, द्विशतेन क्रीतं, द्विशतकम् । त्रिशतकम् । प्राग्वतेः संख्यापूर्वपदानां तदन्तग्रहणमलुकीत्यनया इष्ट्या समासादपि प्राप्नोति ॥

---

* ठञो द्विगुं प्रतीत्येष ग्रन्थः पुस्तकान्तरे नास्ति ।

Digitized by Google

संख्याया अतिशदन्तायाः कन् ॥ २२ ॥

आर्हादित्येव । संख्याया अत्यन्ताया अशदन्तायाश्च कन् प्रत्ययो भवति आर्हीयेष्वर्थेषु । ठञोऽपवादः । पञ्चभिः क्रीतः, पञ्चकः । बहुकः । गणकः । अतिशदन्ताया इति किम् । साप्ततिकः । चात्वारिंशत्कः । अर्थवतस्तिशब्दस्य ग्रहणाड्डतेः पर्युदासो न भवति । कतिकः ॥

वतोरिड् वा ॥ २३ ॥

वत्वन्तस्य संख्यात्वात् कन् सिद्ध एव तस्य त्वनेन वा इडागमो विधीयते । वतोः परस्य कनो वा इडागमो भवति आर्हीयेष्वर्थेषु । तावतिकः । तावत्कः । यावतिकः । यावत्कः ॥

विंशतित्रिंशद्भ्यां ड्वुनसंज्ञायाम् ॥ २४ ॥

विंशतित्रिंशद्भ्यां ड्वुन् प्रत्ययो भवति असंज्ञायां विषये आर्हीयेष्वर्थेषु । विंशकः । त्रिंशकः । ति विंशतेर्डितीति तिलोपः । असंज्ञायामिति किम् । विंशतिकः । त्रिंशत्कः । कथं पुनरत्र कन् यावता अतिशदन्ताया इति पर्युदासेन भवितव्यम् । योगविभागः करिष्यते । विंशतित्रिंशद्भ्यां कन्प्रत्ययो भवति । ततो ड्वुनसंज्ञायामिति ॥

कंसाट्टिठन् ॥ २५ ॥

कंसाट्टिठन् प्रत्ययो भवति आर्हीयेष्वर्थेषु । ठञोऽपवादः । टकारो ङीबर्थः । इकार उच्चारणार्थः । नकारः स्वरार्थः । कंसिकः । कंसिकी ॥ अर्द्धाच्चेति वक्तव्यम् ॥ * ॥ अर्द्धिकः । अर्द्धिकी ॥ कार्षापणाट्टिठन्वक्तव्यः ॥ * ॥ कार्षापणिकः । कार्षापणिकी ॥ प्रतिशब्दश्चास्यादेशो वा वक्तव्यः ॥ * ॥ प्रतिकः । प्रतिकी ॥

शूर्पादञन्यतरस्याम् ॥ २६ ॥

शूर्पशब्दादन्यतरस्यामञ् प्रत्ययो भवति आर्हीयेष्वर्थेषु । ठञोऽपवादः । पक्षे सोऽपि भवति । शूर्पेण क्रीतं, शौर्पम् । शौर्पिकम् ॥

शतमानविंशतिकसहस्रवसनादण् ॥ २७ ॥

शतमानादिभ्यः शब्देभ्योऽण् प्रत्ययो भवति आर्हीयेष्वर्थेषु । ठक्ठञ्कनामपवादः । शतमानेन क्रीतं, शातमानं शतम् । वैंशतिकम् । साहस्रम् । वासनम् ॥

अध्यर्द्धपूर्वद्विगोर्लुगसंज्ञायाम् ॥ २८ ॥

आर्हादित्येव । अध्यर्धशब्दः पूर्वो यस्मिन्तस्मादध्यर्द्धपूर्वात्प्रातिपदिकाद् द्विगोश्च परस्य आर्हीयस्य लुग् भवति असंज्ञायां विषये । अध्यर्द्धकंसम् । द्विकंसम् । त्रिकंसम् । अध्यर्द्धशूर्पम् । द्विशूर्पम् । त्रिशूर्पम् । असंज्ञायामिति किम् । पाञ्चलोहितिकम् । पाञ्चकलायिकम् । लोहिनीशब्दस्य भस्याढे तद्धितइति पुंवद्भावः * । प्रत्ययान्तस्य विशेषणमसंज्ञायहणं न चेत्प्रत्ययान्तं संज्ञेति । अध्यर्द्धशब्दः संख्यैव । किमर्थं भेदेनोपादीयते । ज्ञापकार्थं क्वचिदस्य संख्याकार्यं न भवति । संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुजिति ॥

विभाषा कार्षापणसहस्राभ्याम् ॥ २९ ॥

अध्यर्द्धपूर्वाद् द्विगोश्च कार्षापणसहस्रान्तादुत्तरस्यार्हीयप्रत्ययस्य विभाषा लुग्भवति । पूर्वेण लुकि नित्ये प्राप्ते विकल्प्यते । अध्यर्धकार्षापणम् । अध्यर्द्धकार्षापणिकम् । द्विकार्षापणम् । द्विकार्षापणिकम् । प्रोपसंख्यानिकस्य टिठनो लुक् । अलुक्पक्षे च प्रतिरादेशो विकल्पितः । अध्यर्द्धप्रतिकम् । द्विप्रतिकम् । त्रिप्रतिकम् । सहस्रात् । अध्यर्धसहस्रम् । अध्यर्धसाहस्रम् । द्विसहस्रम् । द्विसाहस्रम् । अलुक्पक्षे संख्यायाः संवत्सरसंख्यस्य चेत्युत्तरपदवृद्धिः ॥ सुवर्णशतमानयोरुपसंख्यानम् ॥ * ॥ अध्यर्धसुवर्णम् । अध्यर्द्धसौवर्णिकम् । द्विसुवर्णम् । द्विसौवर्णिकम् । अध्यर्धशतमानम् । अध्यर्धशातमानम् । द्विशतमानम् । द्विशातमानम् । परिमाणान्तस्येत्युत्तरपदवृद्धिः ॥

द्वित्रिपूर्वान्निष्कात् ॥ ३० ॥

द्विगोरित्येव । द्वित्रिपूर्वाद्द्विगोर्निष्कान्तादार्हीयप्रत्ययस्य विभाषा लुग्भवति । द्विनिष्कम् । द्विनैष्किकम् । त्रिनिष्कम् । त्रिनैष्किकम् ॥ बहुपूर्वाच्चेति वक्तव्यम् ॥ * ॥ बहुनिष्कम् । बहुनैष्किकम् । परिमाणान्तस्येत्युत्तरपदवृद्धिः ॥

बिस्ताच्च ॥ ३१ ॥

द्वित्रिपूर्वादिति चकारेणानुकृष्यते, द्वित्रिपूर्वाद्बिस्तान्ताद्द्विगोः परस्यार्हीयप्रत्ययस्य विभाषा लुग्भवति । द्विबिस्तम् । द्विबैस्तिकम् । त्रिबिस्तम् । त्रिबैस्तिकम् । बहुबिस्तम् । बहुबैस्तिकम् † ॥

विंशतिकात्खः ॥ ३२ ॥

अध्यर्धपूर्वात्प्रातिपदिकाद्द्विगोश्च विंशतिकशब्दान्तादार्हीयेष्वर्थेषु खः प्रत्ययो भवति । अध्यर्धविंशतिकीनम् । द्विविंशतिकीनम् । त्रिविंशतिकीनम् । विधानसामर्थ्याल्लुङ्न भवति ॥

खार्या ईकन् ॥ ३३ ॥

अध्यर्धपूर्वाद् द्विगोरित्येव । अध्यर्द्धपूर्वात्प्रातिपदिकाद्द्विगोश्च खारीशब्दान्तादार्हीयेष्वर्थेषु ईकन् प्रत्ययो भवति । अध्यर्द्धखारीकम् । द्विखारीकम् ॥ केवलाच्चेति वक्तव्यम् ॥ * ॥ खारीकम् ॥ काकिण्याश्चोपसंख्यानम् ॥ * ॥ अध्यर्धकाकिणीकम् । द्विकाकिणीकम् । त्रिकाकिणीकम् ॥ केवलायाश्च ॥ * ॥ काकिणीकम् ॥

---

* लोहिनीशब्दस्येत्यारभ्य पुंवद्भाव इत्यन्तो ग्रन्थः प्रक्षिप्तोऽत्र मूले । पदमञ्जर्यामदर्शनात् ।

† योगविभाग उत्तरार्थ इत्यधिकं पुस्तकान्तरे ।

Digitized by Google

पणपादमाषशताद्यत् ॥ ३४ ॥

अध्यर्धपूर्वाद्द्विगोरित्येव । अध्यर्धपूर्वाद्द्विगोश्च पणपादमाषशतशब्दान्तादार्हीयेष्वर्थेषु यत् प्रत्ययो भवति । अध्यर्धपण्यम् । द्विपण्यम् । त्रिपण्यम् । अध्यर्धपाद्यम् । द्विपाद्यम् । त्रिपाद्यम् । पद्भावो न भवति यत्यतदर्थे इति । प्राण्यङ्गस्य स इष्यते । इदं तु परिमाणम् । माष । अध्यर्धमाष्यम् । द्विमाष्यम् । त्रिमाष्यम् । शत । अध्यर्धशत्यम् । द्विशत्यम् । त्रिशत्यम् ॥

शाणाद्वा ॥ ३५ ॥

अध्यर्धपूर्वाद्द्विगोरित्येव । शाणशब्दादध्यर्धपूर्वाद् द्विगोरार्हीयेष्वर्थेषु वा यत् प्रत्ययो भवति । ठञोपवादः । पक्षे सोपि भवति । तस्य च लुक् । अध्यर्धशाण्यम् । अध्यर्धशाणम् । द्विशाण्यम् । द्विशाणम् । त्रिशाण्यम् । त्रिशाणम् ॥ शताच्चेति वक्तव्यम् ॥ * ॥ अध्यर्धशत्यम् । अध्यर्धशतम् । द्विशत्यम् । द्विशतम् । त्रिशत्यम् । त्रिशतम् ॥

द्वित्रिपूर्वादण्च ॥ ३६ ॥

शाणाद्वेत्येव, द्वित्रिपूर्वाच्छाणान्तात्प्रातिपदिकादार्हीयेष्वर्थेषु अण् प्रत्ययो भवति, चकाराद्यच्च वा । तेन त्रैरूप्यं भवति । द्विशाण्यम् । द्वैशाणम् । द्विशाणम् । त्रिशाण्यम् । त्रैशाणम् । त्रिशाणम् । परिमाणान्तस्यासंज्ञाशाणयोरिति पर्युदासादादिवृद्धिरेव भवति ॥

तेन क्रीतम् ॥ ३७ ॥

ठञादयस्त्रयोदश प्रत्ययाः प्रकृताः तेषामितः प्रभृति समर्थविभक्तयः प्रत्ययार्थाश्च निर्दिश्यन्ते । तेनेति तृतीयासमर्थात् क्रीतमित्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति । सप्तत्या क्रीतं, साप्ततिकम् । आशीतिकम् । नैष्किकम् । पाणिकम् । पादिकम् । माषिकम् । शत्यम् । शतिकम् । द्विकम् । त्रिकम् । तेनेति मूल्यात्करणे तृतीया समर्थविभक्तिः । अन्यत्रानभिधानान्न भवति । देवदत्तेन क्रीतं, पाणिना क्रीतमिति । द्विवचनबहुवचनान्तात्प्रत्ययो न भवति । प्रस्थाभ्यां क्रीतं, प्रस्थैः क्रीतमिति, अनभिधानादेव । यत्र तु प्रकृत्यर्थस्य संख्याभेदावगमे प्रमाणमस्ति तत्र द्विवचनबहुवचनान्तादपि प्रत्ययो भवति । द्वाभ्यां क्रीतं, द्विकम् । त्रिकम् । पञ्चकम् । तथा मुद्गैः क्रीतं मौद्गिकम् । माषिकम् । नह्येकेन मुद्गेन क्रयः संभवति ॥

तस्य निमित्तं संयोगोत्पातौ ॥ ३८ ॥

तस्येति षष्ठीसमर्थान्निमित्तमित्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति, यत्तन्निमित्तं संयोगश्चेत्स भवति उत्पातो वा । संयोगः संबन्धः प्राणिनां शुभाशुभसूचकः । महाभूतपरिणाम उत्पातः । शतस्य निमित्तं धनपतिना संयोगः, शत्यः । शतिकः । साहस्रः । उत्पातः खल्वपि । शतस्य निमित्तमुत्पातो दक्षिणाक्षिस्पन्दनम्, शत्यम् । शतिकम् । साहस्रम् ॥ तस्य निमित्तप्रकरणे वातपित्तश्लेष्मभ्यः शमनकोपनयोरुपसंख्यानम् ॥ * ॥ वातस्य शमनं कोपनं वा, वातिकम् । पैत्तिकम् । श्लैष्मिकम् ॥ सन्निपाताच्चेति वक्तव्यम् ॥ * ॥ सान्निपातिकम् ॥

गोद्व्यचोसंख्यापरिमाणाश्वादेर्यत् ॥ ३९ ॥

गोशब्दाद् द्व्यचश्च प्रातिपदिकात्संख्यापरिमाणाश्वादिविवर्जिताद्यत् प्रत्ययो भवति तस्य निमित्तं संयोगोत्पातावित्येतस्मिन्नर्थे । ठञादीनामपवादः । गोर्निमित्तं संयोग उत्पातो वा, गव्यः । द्व्यचः खल्वपि । धन्यम् । स्वर्ग्यम् । यशस्यम् । आयुष्यम् । असंख्यापरिमाणाश्वादेरिति किम् । पञ्चानां निमित्तं पञ्चकम् । सप्तकम् । अष्टकम् । परिमाण । प्रास्थिकम् । खारीकम् । अश्वादिः । आश्विकः ॥ ब्रह्मवर्चसादुपसंख्यानम् ॥ * ॥ ब्रह्मवर्चसस्य निमित्तं गुरुणा संयोगः, ब्रह्मवर्चस्यम् । अश्व । अश्मन् । गण । ऊर्णा । उमा । वसु । वर्ष । भङ्ग । अश्वादिः ॥

पुत्राच्छ च ॥ ४० ॥

पुत्रशब्दाच्छः प्रत्ययो भवति चकाराद्यच्च तस्य निमित्तं संयोगोत्पातावित्येतस्मिन्विषये । द्व्यच इति नित्ये यति प्राप्ते वचनम् । पुत्रस्य निमित्तं संयोग उत्पातो वा, पुत्रीयम् । पुत्र्यम् ॥

सर्वभूमिपृथिवीभ्यामणञौ ॥ ४१ ॥

सर्वभूमिपृथिवीशब्दाभ्यां यथासंख्यमणञौ प्रत्ययौ भवतः तस्य निमित्तं संयोगोत्पातावित्येतस्मिन्विषये । ठञोपवादौ । सर्वभूमेर्निमित्तं संयोग उत्पातो वा, सार्वभौमः । पार्थिवः । सर्वभूमेरनुशतिकादिपाठादुभयपदवृद्धिः ॥

तस्येश्वरः ॥ ४२ ॥

तस्येति षष्ठीसमर्थाभ्यां सर्वभूमिपृथिवीशब्दाभ्यामणञौ प्रत्ययौ भवत ईश्वर इत्येतस्मिन्विषये । सर्वभूमेरीश्वरः, सार्वभौमः । पार्थिवः । षष्ठीप्रकरणे पुनः षष्ठीसमर्थविभक्तिनिर्देशः प्रत्ययार्थस्य निवृत्तये । अन्यथा संयोगोत्पाताविव ईश्वरोपि प्रत्ययार्थस्य निमित्तस्य विशेषणं संभाव्येत ॥

तत्र विदित इति च ॥ ४३ ॥

तत्रेति सप्तमीसमर्थाभ्यां सर्वभूमिपृथिवीशब्दाभ्यां यथासंख्यमणञौ प्रत्ययौ भवतः विदित इत्येतस्मिन्नर्थे । विदितो ज्ञातः, प्रकाशित इत्यर्थः । सर्वभूमौ विदितः, सार्वभौमः । पार्थिवः ॥

Digitized by Google

लोकसर्वलोकाट्ठञ् ॥ ४४ ॥

लोकसर्वलोकशब्दाभ्यां तत्रेति सप्तमीसमर्थाभ्यां विदित इत्येतस्मिन्विषये ठञ् प्रत्ययो भवति । लोके विदितः, लौकिकः । सार्वलौकिकः । अनुशतिकादित्वादुभयपदवृद्धिः ॥

तस्य वापः ॥ ४५ ॥

तस्येति षष्ठीसमर्थाद्वाप इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति । उप्यते ऽस्मिन्वापः । क्षेत्रमुच्यते । प्रस्थस्य वापः क्षेत्रं, प्रास्थिकम् । द्रौणिकम् । खारीकम् ॥

पात्रात्ष्ठन् ॥ ४६ ॥

पात्रशब्दात् ष्ठन् प्रत्ययो भवति तस्य वाप इत्येतस्मिन्विषये । ठञोपवादः । नकारः स्वरार्थः । षकारो ङीषर्थः । पात्रशब्दः परिमाणवाची । पात्रस्य वापः, पात्रिकं क्षेत्रम् । पात्रिकी क्षेत्रभक्तिः ॥

तदस्मिन्वृद्ध्यायलाभशुल्कोपदा दीयते ॥ ४७ ॥

तदिति प्रथमासमर्थादस्मिन्निति सप्तम्यर्थे यथाविहितं प्रत्ययो भवति यत्तत्प्रथमासमर्थं वृद्ध्यादि चेत्तद्दीयते । दीयते इत्येकवचनान्तं वृद्ध्यादिभिः प्रत्येकमभिसंबध्यते । तत्र यदधमर्णेन उत्तमर्णाय मूलधनातिरिक्तं देयं तद् वृद्धिः । ग्रामादिषु स्वामिग्राह्यो भाग आयः । पटादीनामुपादानमूलादतिरिक्तं द्रव्यं लाभः । रक्षानिर्वेशो राजभागः शुल्कः । उत्कोच उपदा । पञ्चास्मिन्वृद्धिर्वा आयो वा लाभो वा शुल्को वा उपदा वा दीयते, पञ्चकः । सप्तकः । शत्यः । शतिकः । साहस्रः ॥ चतुर्थ्यर्थ उपसंख्यानम् ॥ * ॥ पञ्चास्मै वृद्धिर्वा आयो वा लाभो वा उपदा वा दीयते, पञ्चको देवदत्तः । सिद्धं त्वधिकरणत्वेन विवक्षितत्वात् । समम्ब्राह्मणे दानमिति यथा ॥

पूरणार्द्धाट्ठन् ॥ ४८ ॥

पूरणवाचिनः शब्दादर्द्धशब्दाच्च ठन् प्रत्ययो भवति तदस्मिन्वृद्ध्यायलाभशुल्कोपदा दीयत इत्येतस्मिन्नर्थे । यथायथं ठक्ठिठनोरपवादः । द्वितीयो वृद्ध्यादिरस्मिन्दीयते, द्वितीयिकः । तृतीयिकः । पञ्चमिकः । सप्तमिकः । आर्द्धिकः । अर्द्धशब्दो रूपकार्द्धस्य रूढिः ॥

भागाद्यच्च ॥ ४९ ॥

भागशब्दाद्यत् प्रत्ययो भवति । चकाराट्ठंश्च । तदस्मिन्वृद्ध्यायलाभशुल्कोपदा दीयत इत्येतस्मिन्नर्थे । ठञोपवादः । भागो वृद्ध्यादिरस्मिन्दीयते, भाग्यं, भागिकं शतम् । भाग्या भागिका विंशतिः । भागशब्दोपि रूपकार्द्धस्य वाचकः ॥

तद्धरति वहत्यावहति भाराद्वंशादिभ्यः ॥ ५० ॥

तदिति द्वितीयासमर्थाद्धरत्यादिष्वर्थेषु यथाविहितं प्रत्ययो भवति । प्रकृतिविशेषणं भाराद्वंशादिभ्य इति । वंशादिभ्यः परो यो भारशब्दस्तदन्तात्प्रातिपदिकादिति । वंशभारं हरति वहत्यावहति वा, वांशभारिकः । कौटजभारिकः । बाल्वजभारिकः । भारादिति किम् । वंशं हरति । वंशादिभ्य इति किम् । व्रीहिभारं हरति । अपरा वृत्तिः । भाराद्वंशादिभ्य इति, भारभूतेभ्यो वंशादिभ्य इत्यर्थः । भारशब्दोर्थद्वारेण वंशादीनां विशेषणम् । भारभूतान्वंशान् हरति, वांशिकः । कौटजिकः । बाल्वजिकः । भारादिति किम् । वंशं हरति । वंशादिभ्य इति किम् । भारभूतान्व्रीहीन्वहति । सूत्रार्थद्वयमपि चैतदाचार्येण शिष्याः प्रतिपादिताः । तदुभयमपि ग्राह्यम् । हरति देशान्तरं प्रापयति चोरयति वा । वहत्युत्क्षिप्य धारयतीत्यर्थः । आवहति उत्पादयतीत्यर्थः । वंश । कुटज । बल्वज । मूल । अक्ष । स्थूणा । अश्मन् । अश्व । इक्षु । खट्वा । वंशादिः ॥

वस्नद्रव्याभ्यां ठन्कनौ ॥ ५१ ॥

वस्नद्रव्यशब्दाभ्यां द्वितीयासमर्थाभ्यां यथासंख्यं ठन् कन् इत्येतौ प्रत्ययौ भवतो हरत्यादिष्वर्थेषु । वस्नं हरति वहति वा, वस्निकः । द्रव्यकः ॥

संभवत्यवहरति पचति ॥ ५२ ॥

तदिति द्वितीया समर्थविभक्तिरनुवर्त्तते । तदिति द्वितीयासमर्थात्संभवत्यादिष्वर्थेषु यथाविहितं प्रत्ययो भवति । तत्राधेयस्य प्रमाणानतिरेकः संभवः । उपसंहरणमवहारः । विक्लेदनं पाकः । प्रस्थं संभवति अवहरति पचति वा, प्रास्थिकः । कौडविकः । खारीकः । ननु च पाके च संभवोस्ति । नास्त्यत्र नियोगः । प्रस्थं पचति ब्राह्मणी, प्रास्थिकी ॥ तत्पचतीति द्रोणादण्च ॥ * ॥ द्रोणं पचति, द्रौणी । द्रौणिकी ॥

आढकाचितपात्रात्खोन्यतरस्याम् ॥ ५३ ॥

आढकाचितपात्रशब्देभ्यो द्वितीयासमर्थेभ्यो ऽन्यतरस्यां संभवादिष्वर्थेषु खः प्रत्ययो भवति । ठञोपवादः । पक्षे सोपि भवति । आढकं संभवत्यवहरति पचति वा, आढकीना । आढकिकी । आचितीना । आचितिकी । पात्रीणा । पात्रिकी ॥

द्विगोष्ठंश्च ॥ ५४ ॥

आढकाचितपात्रादित्येव । आढकाचितपात्रान्ताद् द्विगोः संभवत्यादिष्वर्थेषु ष्ठन् प्रत्ययो भवति, चकारात्खः, अन्यतरस्याम् । विधानसामर्थ्यादेवानयोर्लुङ् भवति । ठञस्तु पक्षे ऽनुज्ञातस्याद्ध्यर्धपूर्वद्विगोरिति लुग्भवत्येव । नकारः स्वरार्थः । षकारो ङीषर्थः । द्व्याढकिकी । द्व्याढकीना । द्व्याढकी । द्व्याचितिकी । द्व्याचितीना । द्व्याचिता । अपरिमाणबिस्ता-

Digitized by Google

चितेति ङीपः प्रतिषेधः । द्विपाञ्चिकी । द्विपाञ्चीणा । द्विपाञ्ची ॥

कुलिजाल्लुक्खौ च ॥ ५५ ॥

द्विगोरित्येव । कुलिजशब्दान्ताद् द्विगोः संभवत्यादिष्वर्थेषु लुक्खौ भवतः । चकारात्ष्ठंश्च । अन्यतरस्यांग्रहणानुवृत्त्या लुगपि विकल्प्यते । ठञः पक्षे श्रवणं भवति । तेन चातूरूप्यं संपद्यते । द्वे कुलिजे संभवत्यवहरति पचति वा, द्विकुलिजिकी । द्विकुलिजीना । द्विकुलिजा । द्वैकुलिजिकी । परिमाणान्तस्यासंज्ञाशाणयोरित्यत्र कुलिजग्रहणमपीष्यते । तेनोत्तरपदवृद्धिरपि न भवति ॥

सोऽस्यांशवस्नभृतयः ॥ ५६ ॥

स इति प्रथमासमर्थादस्येति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति यत्तत् प्रथमासमर्थमंशवस्नभृतयश्चेत्ता भवन्ति । अंशो भागः । वस्नं मूल्यम् । भृतिर्वेतनम् । पञ्च अंशो वस्नो वा भृतिर्वास्य, पञ्चकः । सप्तकः । साहस्रः ॥

तदस्य परिमाणम् ॥ ५७ ॥

तदिति प्रथमासमर्थादस्येति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति यत् प्रथमासमर्थं परिमाणं चेत्तद्भवति । प्रस्थः परिमाणमस्य, प्रास्थिको राशिः । खारीकः । शत्यः । शतिकः । साहस्रः । द्रौणिकः । कौडविकः । वर्षशतं परिमाणमस्य, वार्षशतिकः । वार्षसहस्रिकः । षष्टिर्जीवितपरिमाणमस्येति, षाष्टिकः । द्विसाप्ततिकः । समर्थविभक्तिः प्रत्ययार्थश्च पूर्वसूत्रादेवानुवर्त्तिष्यते किमर्थं पुनरनयोरुपादानम् । पुनर्विधानार्थम् । द्वे षष्टी जीवितपरिमाणमस्य द्विषाष्टिकः । द्विसाप्ततिकः । पुनर्विधानसामर्थ्यादध्यर्द्धपूर्वद्विगोर्लुङ्न भवति ॥

संख्यायाः संज्ञासंघसूत्राध्ययनेषु ॥ ५८ ॥

तदस्य परिमाणमिति वर्त्तते । संख्यावाचिनः प्रातिपदिकात्परिमाणोपाधिकात्प्रथमासमर्थादस्येति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति । संज्ञासंघसूत्राध्ययनेष्विति प्रत्ययार्थविशेषणम् । तत्र संज्ञायां स्वार्थे प्रत्ययो वाच्यः । पञ्चैव पञ्चकाः शकुनयः । त्रिकाः शालङ्कायनाः । संघ । पञ्च परिमाणमस्य, पञ्चकः संघः । अष्टकः । सूत्र । अष्टावध्यायाः परिमाणमस्य सूत्रस्य, अष्टकं पाणिनीयम् । दशकं वैयाघ्रपदीयम् । त्रिकं काशकृत्स्नम् । ननु चाध्यायसमूहः सूत्रसंघ एव भवति । नैतदस्ति । प्राणिसमूहे संघशब्दो रूढः । अध्ययने । पञ्चकोऽधीतः । सप्तकोऽधीतः । अष्टकः । नवकः । अधीतिरध्ययनम् । तस्य संख्यापरिमाणं पञ्चावृत्तयः पञ्चवाराः पञ्चरूपाण्यस्याध्ययनस्य, पञ्चकमध्ययनम् ॥ स्तोमे डविधिः पञ्चदशाद्यर्थः ॥ * ॥ पञ्चदश मन्त्राः परिमाणमस्य, पञ्चदशः स्तोमः । सप्तदशः । एकविंशः ॥ शन्शतोर्डिनिश्छन्दसि ॥ * ॥ पञ्चदशिनोर्द्धमासाः । त्रिंशिनो मासाः ॥ विंशतेश्चेति वक्तव्यम् ॥ * ॥ विंशिनोऽङ्गिरसः ॥

पङ्क्तिविंशतित्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशीतिनवतिशतम् ॥ ५९ ॥

तदस्य परिमाणमिति वर्त्तते । पङ्क्त्यादयः शब्दा निपात्यन्ते । यदिह लक्षणेनानुपपन्नं तत्सर्वं निपातनात्सिद्धम् । पञ्चानां टिलोपः, तिः प्रत्ययः । पञ्च परिमाणमस्य, पङ्क्तिश्छन्दः । द्वयोर्दशतोर्विन्भावः शतिच् प्रत्ययः । द्वौ दशतौ परिमाणमस्य संघस्य, विंशतिः । त्रयाणां दशतां त्रिन्भावः शच्च प्रत्ययः । त्रयो दशतः परिमाणमस्य, त्रिंशत् । चतुर्णां दशतां चत्वारिन्भावः शच्च प्रत्ययः । चत्वारो दशतः परिमाणमस्य, चत्वारिंशत् । पञ्चानां दशतां पञ्चाभावः शच्च प्रत्ययः । पञ्च दशतः परिमाणमस्य, पञ्चाशत् । षण्णां दशतां षड्भावस्तिः प्रत्ययः अपदत्वं च । षड् दशतः परिमाणमस्य, षष्टिः । सप्तानां दशतां सप्तभावः तिः प्रत्ययः । सप्त दशतः परिमाणमस्य, सप्ततिः । अष्टानां दशतामशीभावस्तिः प्रत्ययश्च । अष्टौ दशतः परिमाणमस्य, अशीतिः । नवानां दशतां नवभावस्तिः प्रत्ययः । नव दशतः परिमाणमस्य, नवतिः । दशानां दशतां शभावः तश्च प्रत्ययः । दश दशतः परिमाणमस्य संघस्य, शतम् । विंशत्यादयो गुणशब्दास्ते यथाकथंचिद्व्युत्पाद्याः । नात्रावयवार्थेभिनिवेष्टव्यम् । तथाहि । पङ्क्तिरिति क्रमसन्निवेशेपि वर्त्तते । ब्राह्मणपङ्क्तिः । पिपीलिकापङ्क्तिरिति । न चात्रावयवार्थः कश्चिदस्ति । या चैषां विषयभेदेन गुणमात्रे गुणिनि च वृत्तिस्स्वलिङ्गसंख्यानुविधानं च । एतदपि सर्वं स्वाभाविकमेव । सहस्रादयोप्येवंजातीयकास्तद्वदेव द्रष्टव्याः । उदाहरणमात्रमेतदिति ॥

पञ्चद्दशतौ वर्गे वा ॥ ६० ॥

पञ्चत् दशत् इत्येतौ निपात्येते तदस्य परिमाणमित्यस्मिन्विषये वर्गेभिधेये । संख्याया इति कनि प्राप्ते डतिर्निपात्यते । वावचनात्पक्षे सोपि भवति । पञ्च परिमाणमस्य, पञ्चद्वर्गः, दशद्वर्गः । पञ्चको वर्गः, दशको वर्गः ॥

सप्तनोऽञ् छन्दसि ॥ ६१ ॥

वर्ग इत्येव । तदस्य परिमाणमिति च । सप्तन्शब्दाच्छन्दसि विषये अञ् प्रत्ययो भवति वर्गेभिधेये । सप्त साप्तान्यसृजन् ॥

त्रिंशच्चत्वारिंशतोर्ब्राह्मणे संज्ञायां डण् ॥ ६२ ॥

तदस्य परिमाणमित्येव । वर्ग इति निवृत्तम् । त्रिंशच्चत्वा-

िंशच्छब्दाभ्यां संज्ञायां विषये डण् प्रत्ययो भवति तदस्य परिमाणमित्येतस्मिन्विषये ब्राह्मणेभिधेये । अभिधेयसप्तम्येषा न विषयसप्तमी । तेन मन्त्रभाषयोरपि भवति । त्रिंशदध्यायाः परिमाणमेषां ब्राह्मणानां, त्रैंशानि ब्राह्मणानि । चात्वारिंशानि ब्राह्मणानि । कानि चिदेव ब्राह्मणान्युच्यन्ते ॥

तदर्हति ॥ ६३ ॥

तदिति द्वितीयासमर्थादर्हतीत्यस्मिन्नर्थे यथाविहितं प्रत्ययो भवति । श्वेतच्छत्रमर्हति, श्वेतच्छत्रिकः । वास्त्रयुग्मिकः । शत्यः । शतिकः । साहस्रः ॥

छेदादिभ्यो नित्यम् ॥ ६४ ॥

नित्यग्रहणं प्रत्ययार्थविशेषणम् । छेदादिभ्यो द्वितीयासमर्थेभ्यो नित्यमर्हतीत्यस्मिन्नर्थे यथाविहितं प्रत्ययो भवति । छेदं नित्यमर्हति, छैदिकः । भैदिकः । छेद । भेद । द्रोह । दोह । वर्त्त । कर्ष । संप्रयोग । विप्रयोग । प्रेषण । संप्रश्न । विप्रकर्ष ॥ विराग विरङ्गं च ॥ वैरङ्गिकः ॥

शीर्षच्छेदाद्यच्च ॥ ६५ ॥

शीर्षच्छेदशब्दाद् द्वितीयासमर्थान्नित्यमर्हतीत्यस्मिन्नर्थे यत् प्रत्ययो भवति चकाराद्यथाविहितश्च । शिरश्छेदं नित्यमर्हति, शीर्षच्छेद्यः । शैर्षच्छेदिकः । प्रत्ययसन्नियोगेन शिरसः शीर्षभावो निपात्यते ॥

दण्डादिभ्यो यः * ॥ ६६ ॥

नित्यमिति निवृत्तम् । दण्डादिभ्यो द्वितीयासमर्थेभ्योऽर्हतीत्यस्मिन्नर्थे यः प्रत्ययो भवति । ठकोपवादः । दण्डमर्हति, दण्ड्यः । मुसल्यः । दण्ड । मुसल । मधुपर्क । कशा । अर्घ । मेधा । मेघ । युग । उदक । वध । गुहा । भाग । इभ । दण्डादिः ॥

छन्दसि च ॥ ६७ ॥

प्रातिपदिकमात्राच्छन्दसि विषये तदर्हतीत्यस्मिन्नर्थे यत् प्रत्ययो भवति । ठञादीनामपवादः । उदक्या वृत्तयः । यूप्यः पलाशः । गर्त्या देशः ॥

पात्राद् घंश्च ॥ ६८ ॥

पात्रशब्दाद् घन् प्रत्ययो भवति चकाराद्यच्च, तदर्हतीत्यस्मिन्नर्थे । ठक्ठञोरपवादः । पात्रं परिमाणमप्यस्ति । पात्रमर्हति, पात्र्यः । पात्रियः ॥

* दण्डादिभ्य इत्येव सूत्रम् । अनन्तरश्च यत्प्रत्ययो विधीयते । तथा च वध्यशब्दव्युत्पादनाय अघ्न्यविधावुक्तं, हनो वध च तद्धितो वेति । यदि चात्र यद्विधीयते तत एव तदुपपद्यते तद्धितो वेति, कथम् । वध्याद्युदात्तत्वं, यत्यपि यतो नाव इत्याद्युदात्तत्वं, यदि त्वत्र यो विधीयेत ततः स्वरे विशेषादनुपपन्नमेतत्स्यादिति पदमञ्जरी । दीक्षितनागेशयोरप्येतदेव संमतम् ।

कडङ्करदक्षिणाच्छ च ॥ ६९ ॥

कडङ्करदक्षिणाशब्दाभ्यां छः प्रत्ययो भवति, चकाराद्यच्च तदर्हतीत्यस्मिन्विषये । ठकोपवादः । कडङ्करमर्हति, कडङ्करीयो गौः । कडङ्कर्यः । दक्षिणामर्हति, दक्षिणीयो भिक्षुः । दक्षिण्यो ब्राह्मणः । दक्षिणाशब्दस्याल्पाच्तरस्य पूर्वनिपातेन लक्षणव्यभिचारचिह्नेन यथासंख्याभावं सूचयति ॥

स्थालीबिलात् ॥ ७० ॥

छयतावनुवर्त्तेते । स्थालीबिलशब्दाच्छयतौ प्रत्ययौ भवतः तदर्हतीत्यस्मिन्नर्थे । ठकोपवादौ । स्थालीबिलमर्हन्ति, स्थालीबिलीयास्तण्डुलाः । स्थालीबिल्याः । पाकयोग्या इत्यर्थः ॥

यज्ञर्त्विग्भ्यां घखञौ ॥ ७१ ॥

यज्ञशब्दादृत्विक्शब्दाच्च यथासंख्यं घखञौ प्रत्ययौ भवतः तदर्हतीत्यस्मिन्विषये । ठकोपवादौ । यज्ञियो ब्राह्मणः । आर्त्विजीनो ब्राह्मणः ॥ यज्ञर्त्विग्भ्यां तत्कर्मार्हतीत्युपसंख्यानम् ॥ * ॥ यज्ञकर्मार्हति, यज्ञियो देशः । ऋत्विक्कर्मार्हति, आर्त्विजीनं ब्राह्मणकुलम् । आर्हीयाणां ठगादीनां पूर्णोऽवधिः ॥ अतः परं प्राग्वतीयष्ठञेव भवति ॥

॥ अथानन्दवृन्दावनचम्पूकाव्यस्य ॥

॥ नवमस्तबकावशेषः ॥

तमथमथमघस्य प्रांशुप्रांशुभरेण तेनैव कैशोरोत्सवपुषा वपुषा स्तोकमपि महायाममिव मान्यमानो मानोद्धुतः स भोगी भोगकाण्डेन प्रवेष्टयन्नपर्याप्तमन्वभूत् ॥ २८ ॥

तं भगवन्तं प्रांशुरुन्नतः प्रकृष्टोंऽशुभरो यत्र तेन । "उच्चप्रांशून्नतोदग्र"इत्यमरः । महायामं महाविस्तारं मानोद्धुतः गर्वोद्धुः यतो भोगी फणी विषयभोगवांश्च ॥ २८ ॥

एवमिच्छयाच्छयापन्नपन्नगबन्धलोलो भद्रश्रीतरुहरिवासावशोभो वक्षोभोन्मिश्रयितव्यनव्यकौस्तुभस्तु भगवान् तावदेव व्यलम्बिष्ट ॥ २९ ॥

अच्छया निर्मलया नात्र कुयुक्तिः कल्पनीयेतिभावः । प्राप्तसर्पबन्धलीलः भद्रश्रीतरुश्चन्दनवृक्षः अवोभः । सच कालियदमनलीलायां प्रयोजनान्तरमपि निगूढमस्तीत्याह । वक्षसो भा कान्तिस्तया उत्कर्षेण मिश्रयिष्यमाणो नव्यः कौस्तुभो येन स्तुत्यनन्तरं कालियपत्नीभिः कौस्तुभरत्नस्य उपहारीकरिष्यमाणत्वात् ॥ २९ ॥

Digitized by Google

यावत्कर्तव्यफणिवरफणामण्डलताण्डवालोको लोकोत्तरचमत्कारी भवति अन्यकामखिलानामखिलानामेव व्रजवासिनामिति ॥ ३० ॥

यावति यत्परिमाणके कर्तव्ये करिष्यमाणे फणिवरस्य फणामण्डले ताण्डवस्य आलोको लोकोत्तरचमत्कारी भवति तावत् तत्परिमाणकं व्यलम्बिष्ट लम्बमानो बभूव इत्यन्वयः। कृष्णस्य तुङ्गतानुसारेण तेन स्वतुङ्गताविष्कारात्। केषां चमत्कारी अन्यकामेषु कृष्णाभिन्नवस्तुकामनायां खिलानां न्यूनानां रहितानामिति यावत्। अखिलानां समस्तानामिति हेतोः ॥ ३० ॥

अनन्यदेवतेषामन्यदेव-तेषामग्रप्रेम वर्द्धयितुं च धैर्यत्वरागमनाय रागमनायत्तं च विलोकयितुमातङ्कपिशुनामाशुनामारिष्टकल्पनां व्रजे कारयामास ॥ ३१ ॥

अखिलानामित्युक्तं तत्र तेषां नगरस्थानां नन्दादीनां सर्वेषां कथमागमनं संभवेदिति तदानीन्तनतादृशेच्छाशक्त्या एव दुर्लक्षणं प्रदर्श्य व्रजाविष्कारस्य सर्व एव ते स्वयमानयामासिरे शीघ्रमेवेत्याह। अनन्येति। न अन्यां देवतामपि इच्छन्तीति क्विप्। तेषां देवतापि यदि पुत्रादिरूपेण स्वयमागत्य तिष्ठेत्तामपि कृष्णं विना नेच्छन्तीत्यर्थः। ननु तर्ह्येवंभूतानपि तान् विपद्ग्रस्थं स्वं दर्शयित्वा दुःखयिष्यत्येव केवलमित्यत्र नहि नहीत्याह। अन्यदेव सर्वविलक्षणं प्रेम वर्द्धयितुमापत्स्यां स्वप्राप्त्या तेषां परमानन्दाम्भोधौ मज्जयिष्यमाणत्वात्। अत एव धैर्यं वर्द्धयितुं छेत्तुं। वर्द्ध छेदने चौरादिकः। रागमनुरागमनायत्तमपराधीनमातङ्कपिशुनां भयसूचिकामाशु शीघ्रं नाम प्राकाश्ये अरिष्टस्य कल्पनामित्यनेन तस्याभासत्वं व्यञ्जितम्। अघबकादिवधलीलायामिवात्रापि कृष्णस्य सर्वथा स्वस्तिमत्त्वेन स्थितेः ॥ ३१ ॥

तावदेवमनुकूलमनुकूलविपर्यस्तं प्राणेशश्रीकृष्णोत्थानविलम्बलम्बमानमाभीलमाभीलमालम्बमानाः पशवः शिशवश्च ॥ ३२ ॥

तावत् एवमनेन प्रकारेण कूलमनु तटं लक्षीकृत्य अनुकूलस्य विपर्यस्तं प्रतिकूलं प्राणेशस्य श्रीकृष्णस्य उत्थानविलम्बेन लम्बमानं दीर्घीभवत्, आभीलं कष्टमालम्बमाना आश्रयन्तः, कीदृशमा सम्यक्प्रकारेण भियं लाति ददातीति तत् ॥३२॥

शिथिलजीवना विहायसि च विहाय सिचयकचप्रचयादिसंवरणं गीर्वाणा बाणाहता इव मर्मव्यथापन्ना हा हेति स्रवदस्रवदनधावना धावनासमर्थाः ॥ ३३ ॥

विहायसि आकाशे इत्यनुसन्धानाभावव्यञ्जकम्। गीर्वाणा देवाः। स्रवता अस्रेण वदनानां धावनं प्रक्षालनं येषां ते ॥ ३३ ॥

निधाय करयुगलं मूर्द्धनि मुक्तकण्ठमुभये भयेन शोकेन केनचिदार्ताः कष्टं भोः कष्टं हा हता हा हताः स्म इति निरालोकं लोकं सकलमेव वीक्षमाणा यावदासादितमूर्च्छा मूर्च्छां प्राप्नुवन्ति स्म ॥ ३४ ॥

उभये पशवः शिशवश्च। आसादिता प्राप्ता मूर्च्छा समुच्छ्रायो यया तामतिमहतीं मूर्च्छामित्यर्थः। "मूर्च्छा मोहसमुच्छ्राययो"रिति धातुपाठः ॥ ३४ ॥

तावदेव व्रजनगरजनेषु गरलसमुद्रेणेवातिकष्टेनारिष्टेनाविकृतिविकृतिविभावकेनेवाभावि ॥ ३५ ॥

व्रजनगरस्थजनेषु गरलसमुद्रेण इव अरिष्टेन अभावि अभूयत। कीदृशेन अविकृतिर्विशेषेणैव क्रियाराहित्यं निश्चेष्टत्वं प्रलय इति यावत्। सैव विकृतिः सात्त्विकविकारोऽष्टमस्तद्विभावकेन तज्जनकेनेव ॥ ३५ ॥

यथा दिनकरमुखाभिमुखमुखमुखरताखरतारध्वनिध्वनिताशिवाभिः शिवाभिः ॥ ३६ ॥

दिनकरस्य सूर्यस्य मुखाभिमुखाये कृतानि मुखानि तेषां मुखरतया मौखर्येण हेतुना यः खरस्तार उच्चतरध्वनिस्तेन ध्वनितं व्यञ्जितमशिवमशुभं याभिस्तथाभूताभिः सतीभिः शिवाभिः शृगालैर्भूवे अभूयत ॥ ३६ ॥

निर्धूलीधूलीढाभिरपि धूमधूमलतया मलीमसतया संवादिगवलाभिर्दिगवलाभिः ॥ ३७ ॥

धूलीनां धूः कम्पनं वायुगत्या चलनं तया या रीढा निन्द्यत्वेनावज्ञास्ताभ्यो निर्गताभिरपि "रीढावमाननावज्ञा" इत्यमरः। रलयोरैक्यं। संवादि सादृश्यधारि गवलं माहिषं शृङ्गं यासां ताभिः, दिग्भिरेव अबलाभिः स्त्रीभिः ॥ ३७ ॥

विडम्बितनिर्महोमणिनाहोमणिना ॥ ३८ ॥

अहोमणिना सूर्येण। कीदृशेन विडम्बितोऽनुकृतो निर्महा निस्तेजस्को मणिर्येन तथाभूतेन बभूवे ॥ ३८ ॥

खरतरस्पर्शनेन स्पर्शनेन ॥ ३९ ॥

स्पर्शनेन पवनेन ॥ ३९ ॥

बभूवे भूवेपथुना पृथुना पृथगेव ॥ ४० ॥

भूवेपथुना भूकम्पेन। पृथगेवेति सर्वतोऽप्याधिक्यद्योतनाय ॥ ४० ॥

पस्पन्दे वामनयनावामनयनादि पुंसां तु वामनयनादि ॥ ४१ ॥

Digitized by Google

वामनयनानां नारीणामवामनयनादि दक्षिणनयनभुजोरु। पुरुषाणां तु तद्विपर्ययेण वामनयनभुजोरु ॥ ४१ ॥

उभयेषामेव व्ययमानमानसत्वं न सत्त्वं तावत् कमप्यनुद्वेगमाशिश्राय ॥ ४२ ॥

उभयेषां पुंसां स्त्रीणां च सत्त्वं प्राणाः कमप्यनुद्वेगं न आशिश्राय न प्राप किंतु सर्वमेवोद्वेगमित्यर्थः। "सत्त्वं भावे स्वभावे च व्यवसायप्रभावयोः पिशाचादौ गुणे प्राणे बले जन्तौ च चेतसी"त्यमरमाला ॥ ४२ ॥

इत्येवंविधविविधविरुद्धाभावुकभावुकमहातङ्कपङ्कपङ्किलहृदः सर्वे एव घोषा घोषाधिराजेन समं समन्तत उद्भूतभूतविप्लवमिव मन्यमाना मानातीतं कृष्णानुभावं ह्यनुभावं भावं च नानुभवन्त इति तं प्रति शशङ्किरे ॥ ४३ ॥

एवंविधं विविधं विरुद्धं यदभावुकमकुशलं तस्य भा कान्तिस्तस्या आवुकेन जनकेन महातङ्करूपपङ्केन पङ्किलं हृद् येषां ते। "अथावुको जनक" इत्यमरः। घोषा गोपाः, मानातीतं संख्यातीतं कृष्णस्यानुभावं भावमनुभावं भावं च अनुभूयानुभूयापि नानुभवन्तः। अत्रादौ धातुः साधनेन युज्यते पश्चादुपसर्गेणेतिमते णमुलन्तस्य द्वित्वानन्तरमुपसर्गयोग इति। तं प्रति श्रीकृष्णं प्रति ॥ ४३ ॥

अहो! अद्य महाबुद्धिबलेन बलेन विना वनं गतवानेकोऽनेकोपद्रवकरावकरारिघोरं निरघोऽरं निरवधानैः शिशुभिः पशुभिः पथि नाभिज्ञैः सह हता स्मो न विद्मः शिव शिव! किं कष्टं समजनीति नीतिमन्तः ॥ ४४ ॥

बलेन बलदेवेन। वनं कीदृशमनेकोपद्रवकरोऽवकरो दोषो येषां तैररिभिः शत्रुभिर्घोरं। स कृष्णस्तु निरघः कस्याप्यपराधं न करोति तथापीत्यर्थः ॥ ४४ ॥

त्वरितमेव यथावस्थितमवस्थितमपहाय हायनोर्द्धमपि बालकमारभ्य सकला एव विकला एव विवृद्धशोककृष्णवर्त्मना कृष्णवर्त्मनामुद्दिशेन कुलवधूसमेतपुरपुरन्ध्रीभिः समं व्रजेश्वरी बालवृद्धतरुणाभीरैः सह सहसंकर्षणो व्रजेश्वरश्च त्रिभुवनविलक्षणलक्षणभगवच्चरणकमललक्ष्मानुसारेण कातरमनसो मनसोऽग्रत एव तं देशमासेदुः ॥ ४५ ॥

अवस्थितं भोजनपानाद्यवस्थां तत्तच्चेष्टामित्यर्थः। तत्रापि यथावस्थं तत्तच्चेष्टामपि तथा तथाभावमनतिक्रम्य समाप्तिमनपेक्ष्य मध्य एव विहायेत्यर्थः। शोककृष्णवर्त्मना शोकाग्निना। "कृष्णवर्त्मा शोचिष्केश उषर्बुध" इत्यमरः। तं देशं कालियहृदतटम् ॥ ४५ ॥

केवलं स्थावरतयावरतया शोचन्तोवात्मानमनिशान्तानि निशान्तानि स्थितानि ॥ ४६ ॥

स्थावरतयात्मानमवरतया अवरत्वेन निकृष्टत्वेन गमनासामर्थ्येन शोचन्ति इव अत एव अनिशान्तानि न नितरां शान्तानि दुःखशान्तिमप्राप्तानीत्यर्थः। निशान्तानि गृहाणि "निशान्तवस्त्यसदन"मित्यमरः ॥ ४६ ॥

एवमागताश्च ते तं देशं तद्देशं तमन्तरे हृदतः शिशूनपि परमशोकातुरानवलोक्य प्रश्नमन्तरेणैवमन्तरेणैव निवेदितमवगत्य श्रीकृष्णस्य विषहृदाप्लवनं विषहृदाप्लवनकृतवन्तमिवात्मानं तटस्था एव जानन्ति स्म ॥ ४७ ॥

तदा तस्मिन् काले ईशं श्रीकृष्णं तमन्तरेण विना हृदतः अत एव क्व स भवतां प्राणबन्धुरिति प्रश्नमन्तरेण एवं हा हन्त विषहृदे स प्रविष्ट इति तैर्निवेदितमप्यन्तरेण विनैव अवगत्य ज्ञात्वा तटस्थाः कूलस्था अपि ॥ ४७ ॥

आपादाग्रशिरोविषानलमहोमाहात्म्यदग्धा इव
ज्वालाजालकरालभस्मितहृदः सर्वे निपेतुर्भुवि ।
वात्यावर्तविपादिता इव लता नार्यो नराश्च क्षणा-
न्मूलच्छेदधुता द्रुमा इव हृदप्रान्तस्थलीं तस्तरुः ॥ ४८ ॥

करालं यथा स्यात्तथा भस्मितं हृद् येषां। तस्तरुराच्छादितवन्तः ॥ ४८ ॥

हा तात तातवत्सल! किं कृतमतिसाहसं सहसा इति वाष्परुद्धकण्ठं रुदन्मुमूर्च्छ व्रजाधीशः।

व्रजजनप्रिय वत्स! विपद्यते
व्रजजनस्तव दर्शय सन्निधिम् ।
अहह हा बत हेत्यनुलापिन-
स्तमभितः पतिता भुवि गोदुहः ॥ ४९ ॥

हे व्रजजनस्य प्रिय बहुव्रीहिर्वा तव व्रजजनो विपद्यते म्रियते। तं नन्दमभितो गोदुहो व्रजराजसखाः ॥ ४९ ॥

समदुःखसुखा व्रजेशभार्या
परितस्तां पतिताः सहैव गोप्यः ।
कुररीमिव शोककर्षिताङ्गीं
विलपन्तीं करुणस्वरं विलेपुः ॥ ५० ॥

गोप्यः व्रजेश्वर्याः सख्यः। समदुःखसुखाः तस्याः सुखेन सुखिन्यः तस्या दुःखेन दुःखिन्य इत्यर्थः। "अभितः परितः समया निकषा हायोगेष्वपि दृश्यत" इति द्वितीया ॥ ५० ॥

Digitized by Google

नवमुग्धदृशः कुमारिकाश्च
प्रथमानप्रथमानुरागभाजः ।
स्खलिता भुवि मूर्च्छयैव सख्या
कृतसान्त्वा इव नो तदा विलेपुः ॥ ५१ ॥

नवमुग्धदृशो वध्वः । यद्वा तथाभूता भवन्त्यः कुमारिकाश्चेति चकाराल्लब्धानां वधूनामेवात्र प्राधान्यमायातम् ॥ ५१ ॥

एवं तदा तदाकाराकारितमनस्तयानस्तयाप्राकृततयाततया च तथाविधेऽपि शोके जीवितानि वितानितस्थेमानि न परं यदि बहिरभूवंस्तदा करुणविलापशब्दगुणं गगनमश्रुनिर्झरमयो हृदतटः निस्सहनिपतितैः कलेवरैः छिन्नलताद्रुममयीव धरणी शोकमयः समय इति स्थिते ॥ ५२ ॥

तदा तस्मिन् काले तस्य श्रीकृष्णस्य आकारेण आकृत्या आकारितानि आहूतानि मनांसि येषां तेषां भावस्तत्ता तया अत एव अनस्तया न अस्तंगतया । तत्र हेतुः । अप्राकृतया सापि नैकांशेन किंतु सर्वांशेनैवेत्याह । आततया संपूर्णया हेतुना । तथाविधेऽपि शोके जीवितानि प्राणाः, कीदृशानि वितानितो विस्तारितः स्थेमा स्थैर्यं यैस्तानि । निस्सहं यथा स्यात्तथा निपतितैः ॥ ५२ ॥

कृष्णानुभावभावनाकुतूहलिना हलिना किञ्चिदूचे ॥ ५३ ॥

कृष्णस्यानुभावस्य प्रभावस्य भावनानुसन्धानं तेनैव कुतूहलवतेति तस्य प्रगाढप्रेमावेशेन तिरोहितैश्वर्यज्ञानत्वेऽपि तदानीमैश्वर्यशक्त्या मनसि स्वयमेव स्फुरितं नन्दादीनां सर्वेषां किञ्चित्सन्धुक्षणप्रापणार्थमिति ज्ञेयम् ॥ ५३ ॥

हंहो तात ! तातप्यमानमानसतया समेधमानेन मानेन शोकेन स्वदेहः खेदयितव्यो दयितव्योऽयं कृष्णस्य ॥ ५४ ॥

तातप्यमानमतिशयेन तप्तं भवति मानसं यस्मात् तस्य भावस्तत्ता तया समेधमानेन वर्द्धमानेन शोकेन स्वदेहो न खेदयितव्यः यतोऽयं कृष्णस्य दयितव्यः कृष्णेनानुकम्पनीयः ॥ ५४ ॥

भो मातर्मातः परं विलप, लपनं मे निर्धारय, धारय धृतिं, भो भोः पौरजानपदा विपदाविष्करणेन मापरं परं संतापमाप्तुमर्हत ॥ ५५ ॥

लपनं वचनम् ॥ ५५ ॥

अस्य हि मदवरजस्य मदवरजस्य शौर्यस्य महिमानं हि मानन्दवर्द्धनं भवन्तो जानन्ति, जानाम्यहमेव केवलं, केऽवलम्बन्ताममरपरिवृढा अपि यल्लवावबोधम् ॥ ५६ ॥

मदवरजस्य मत्कनिष्ठस्य शौर्यस्य महिमानं भवन्तो हि निश्चितं मा जानन्ति न जानन्ति । कीदृशमानन्दवर्द्धनं । शौर्यस्य कीदृशस्य मदवरान्महाहङ्काराज्जातस्य अस्याग्रे को वराकः कालिय इति भावः । अमरपरिवृढा देवश्रेष्ठा अपि के तावत्, यस्य महिम्नो लवस्याप्यवबोधं ज्ञानमवलम्बन्तां प्राप्नुवन्तु ॥ ५६ ॥

बोधं प्राप्नुत, ईषत्करः खल्वयमनेन पुन्नागेन नागेन पराभवः ॥ ५७ ॥

पुन्नागेन पुरुषकुञ्जरेण श्रीकृष्णेन । नागेनस्य नागानामिनस्य मुख्यस्य कालियस्य पराभवः ॥ ५७ ॥

नागेनपराभवः पवनेन कर्तुं न शक्यते ॥ ५८ ॥

ननु कालियोऽपि महाशौर्यवानतिक्रूरश्च, सत्यं तथापि श्रीकृष्णं पराभवितुमसौ न शक्नोतीति सदृष्टान्तमाह । नागेनस्य न अगेनस्य पर्वतमुख्यस्य पराभवः । "शैलवृक्षौ नगावगावि"त्यमरः ॥ ५८ ॥

न मयूखमालिमालिन्यं तमसा कर्तुं प्रभूयते ॥ ५९ ॥

न केवलं पराभवाशक्तिरेव किंतु महातेजस्विनः सान्निध्यमात्रेणैव तत्प्रतिकूलस्य नाश एव स्यादित्यत आह । नमयूखेति । मयूखमाली सूर्यः ॥ ५९ ॥

न च समूहो महानलस्य नलस्य वनेन निर्वाप्यते ॥ ६० ॥

न च नाशमात्र एव विश्रान्तिः प्रत्युत तत एव तेजसामप्युपचय एव महान् स्यादित्याह । न च समूहेति । न च निर्वाप्यते प्रत्युत स्वं भस्मीकारयितुमतिवर्द्धिष्णुः क्रियत इति भावः ॥ ६० ॥

किमस्य मकरकुण्डलिनः कुण्डलिनः क्षुद्रतमाद्भयसंभावनं, तदधुना सन्तापमुपश्यत पश्यत भुजगापसदममुममुक्तशौर्यो मुक्तप्राणमिव कृत्वा समुत्थितप्रायोऽयमभिप्रायोऽयमभिमतो मम निश्चीयताम् ॥ ६१ ॥

मकरकुण्डिनः कृष्णस्य । कुण्डिनः सर्पात् । उपश्यत दूरीकुरुत । "शो तनूकरणे" इत्यस्य रूपम् ॥ ६१ ॥

इत्युक्तवति भगवति भगणपतिधवले बले सपरिजनजनकजननीजननीरन्ध्रशोकक्कातरतामनुमाय मायया संमोहितसकलसुरासुरादिलोको लोकोत्तरगुरुतरप्रभावो भावो-

धोज्ज्वलः प्रकटितपुरुपराक्रमः क्रमवरीवृद्धमानवेगो मत्तकुण्डलिकुण्डलितस्तिमिरतरुकाण्डगतश्चन्द्रमा इव हृदोदरतोऽदरतोषपेशलस्मितमुन्ममज्ज नमज्जनसुखाकरः श्रीकृष्णः ॥ ६२ ॥

भं नक्षत्रं तद्गणपतिश्चन्द्रः । तथाविधेऽपि तस्मिन् कालियस्य तदानीन्तनस्वदौरात्म्यप्रकटने हेतुः । मायया संमोहितेति । तदानीं श्रीबलस्य बन्धुजनाश्वासनयोग्यतायां हेतुर्लोकोत्तरेति । बकाघाद्यसुरवधसूचितं महाप्रभावं तस्य तदा तान् स्मारयामासेति भावः । भा देहकान्तिः बोधः स्वविक्रमानुभवः ताभ्यामुज्ज्वलः बहिरन्तः प्रफुल्ल इत्यर्थः । अत्र प्रकटितपुरुपराक्रमः, भाबोधोज्ज्वलः, क्रमवरीवृद्धमानवेग, इति विशेषणत्रयेण पर्वतमयूखमालिमहाचलेतिदृष्टान्तत्रयधर्माः क्रमेण विवृताः । मत्तस्य कुण्डलिनः कालियनागस्य कुण्डलितं कुण्डलाकृतिवेष्टनं यत्र सः । अदर अनल्पेन तोषेण हर्षेण पेशलं सुन्दरं स्मितं यत्र तद्यथा स्यात्तथा उन्ममज्ज उत्थितवान् । नमतां भक्तानां जनानां सुखाकरः ॥ ६२ ॥

अथ तदेव देवतसदसि
भं भं भं भमिति बभूव शङ्खघोषो
दुं दुं दुं दुमिति च दुन्दुभिप्रणादः ।
गीर्वाणा गरिमगभीरभूरिभेरी-
भाङ्कारैः श्रुतिपथपोथिनो बभूवुः ॥ ६३ ॥

गरिम्णा गभीरैर्भूरिभेरीणां भाङ्कारैः श्रुतिपथस्य पोथिनः कुन्थनवन्तः । "पुथि कुन्थने" इति वोपदेवः ॥ ६३ ॥

ततस्ततेन प्रमोदनादेन नादेन सह सहसा समकालमेव लब्धजीविता इव विपन्नाः प्रमोदेनेव करग्राहमुत्थापिताः पितामहादिभिरभिनन्द्यसौभाग्या भाग्यातिरेकभाजो व्रजराजादयः ॥ ६४ ॥

ततेन विस्तृतेन प्रमोदनं ददातीति तेन नादेन सह समकालमेव लब्धजीविता इति तादृशनादोऽपि पूर्वं नष्ट इवासीदिति भावः । व्रजराजादयस्तमतिमदं कालियनागमालोक्य पुनरपि समुपसन्नां प्रमोहावस्थामालम्बितुं यदैव प्रववृतिरे तदैव संकर्षणेन किमपि निगदता अवरजः कृष्णो दर्शयाम्बभूवे इत्यन्वयः ॥ ६४ ॥

तमतितीक्ष्णतीक्ष्णककालं करालतरफणफणाद्विषफेणफेणिलमुखविवरज्वलज्ज्वालाजालद्युस्फुलिङ्गलिङ्गकमहाभयम् ॥ ६५ ॥

कीदृशमतितीक्ष्णं तीक्ष्णकं लोहविशेषमिव कालं कालवर्णम् । "विषाभिमरलोहेषु तीक्ष्ण"मित्यमरः । करालतरेभ्योऽतिभीषणेभ्यः फणेभ्यः फणतां निर्गच्छतां विषाणां फेनैः फेणिलानि यानि मुखानि तेषां विवरेषु ज्वलतो ज्वालाजालाज्जाता अलघवः स्फुलिङ्गा एव लिङ्गानि ज्ञापका यस्य तथाभूतं महाभयं यत्र यस्माद्वा तं तादृशमहाभयरूपमिति वा । फणादिति "फण गतौ" शत्रन्तः ॥ ६५ ॥

शतमूर्धानमूर्ध्वानद्धमणिशतमयूखनिचयखमिचयनचतुरमधोमुखतप्ततराम्बरीषनिवरीषनिर्ज्ञातजातवेदःकणसदृशदृशमवदोधूयमानायतयतनद्विशतरसनासनाथमुखोदरम् ॥ ६६ ॥

शतमूर्द्धानं शतसंख्यमस्तकं, एतच्च प्राधान्यापेक्षया । यथोक्तं । "यश्चाच्छिरो न नमतेऽङ्ग शतैकशीर्ष्णः" इति, वस्तुतस्तु सहस्रफण एवासौ । यथोक्तं । "तच्चित्रताण्डवविरुग्णफणासहस्र"इति । ऊर्द्धदेशे आसम्यक् प्रकारेण नद्धस्य मणिशतस्य मयूखनिचयैः किरणसमूहैरेव खस्य आकाशस्य नितरां चयने आच्छाद्य ग्रहणे चतुरं । अधः स्थितानि मुखान्येव तप्ततराण्यम्बरीषाणि भर्जनपात्राणि तेभ्यो निवरीषं निविडं यथा स्यात्तथा निर्ज्ञातस्य निःसंशयं ज्ञातस्य जातवेदसो वह्नेः कणैरिव सदृश्यौ दृशौ नेत्राणि यस्य तं । दोधूयमाना अतिशयेन चलन्त्य आयता दीर्घा यतना दंशनार्थं कृतयत्ना द्विशतरसना एकैकमुखे द्वे द्वे जिह्वे इति नियमेन या द्विशतसंख्या जिह्वास्ताभिः सनाथानि मुखानामुदराणि विवराणि यस्य तम् ॥ ६६ ॥

खोदरं लेलिहानमिवातिमदं कालियनागमालोक्य जातमात्रमानन्दकन्दलं दलन्तमपि भूयो भूयोभिर्भयैः शोषयन्तो हृदयं च ॥ ६७ ॥

खस्य आकाशस्य उदरं मध्यं लेलिहानं पुनः पुनर्लिहन्तं । जातमात्रं श्रीकृष्णमुखशोभादर्शनादानन्दकन्दलमानन्दाङ्कुरं । "कन्दलं तु कपोले स्यादुपरागे नवाङ्कुर"इति विश्वः । दलन्तं प्रस्फुटन्तमपि भूयः पुनः कालियनागालोकनाद् भूयोभिर्बहुतरैर्भयैः शोषयन्तः शुष्कीकुर्वन्तः ॥ ६७ ॥

जीविताश्वासबलदे बलदेवस्य वचस्यपि न विश्वसन्तो निश्वसन्तो नितान्तं दीर्घमुष्णं मुष्णन्त इव स्वयं स्वयमेव धैर्यं पुनरपि समुपसन्नां प्रमोहावस्थामनवस्थामनवधीरयन्तीमालम्बितुं यदैव प्रववृतिरे ॥ ६८ ॥

जीवितस्य जीवनस्य आश्वासरूपं बलं ददातीति तस्मिन् । प्रमोहावस्थां मूर्च्छां, कीदृशीमनवस्थामनवस्थानमनवधीरयन्तीं न अवजानन्तीं पुष्यन्तीमित्यर्थः । यद्वा । अनवधि अवधिशून्यं यथा स्यात्तथा अनवस्थामीरयन्तीम् ॥ ६८ ॥

॥ शेषमग्रे ॥

SARVA-DARS'ANA-SANGRAHA.

CHAPTER V.

THE SYSTEM OF PURṆA-PRAJṆA.

(Continued from page 139.)

A'nanda-tírtha (Pūrṇa-prajña, or Madhva) rejected this same Rámánuja system because,—though like his own views it teaches the atomic size of the soul, the servitude of the soul, the existence of the Veda without any personal author, the authenticity of the Veda, the self-evidence of the instruments of knowledge, the triad of evidences, dependency upon the Pañcha-rātra, the reality of plurality in the universe, and so forth,—yet in accepting three hypotheses as to reciprocally contradictory divisions, &c., it coincides with the tenets of the Jainas. Shewing that He is soul, That art thou, and a number of other texts of the Upanishads bear a different import under a different explanation, he set up a new system under the guise of a new explication of the Brahma-mīmāṇsā (or Vedānta).

For in his doctrine ultimate principles are dichotomised into independent, and dependent; as it is stated in the Tattva-viveka:—

> "Independent and dependent, two principles are received,
> The independent is Vishṇu the Lord, exempt from imperfections, and of inexhaustible excellences."

Here it will be urged (by the Advaita-vādins): Why predicate of the absolute these inexhaustible excellences, in the teeth of the Upanishads which lay down that the absolute principle is void of homogeneity and heterogeneity and of all plurality in itself? To this be it replied: Not so, for these texts of the Upanishads as contradictory of many proofs positive of duality, cannot afford proof of universal unity; perception, for example, in the consciousness This is different from that, pronounces a difference between things blue and yellow and so forth. The opponent will rejoin: Do you hold that perception is cognisant of a perceptible difference, or of a difference constituted by the thing and its opposite? The former alternative will not hold: for without a cognition of the thing and its opposite the recognition of the difference, which presupposes such a cognition, will be impossible. On the latter alternative it must be asked, Is the apprehension of the difference preceded by an apprehension of the thing and its contrary, or are all the three (the thing, its contrary, and the contrariety) simultaneously apprehended? It cannot be thus preceded, for the operation of the intellect is without delay (or without successive steps), and there would also result a logical seesaw (apprehension of the difference presupposing apprehension of the thing and its contrary, and apprehension of the thing and its contrary presupposing apprehension of the difference). Nor can there be a simultaneous apprehension (of the thing, its contrary, and the difference); for cognitions related as cause and effect cannot be simultaneous, and the cognition of the thing is the cause of the recognition of the difference; the causal relation between the two being recognised by a concomitance and non-concomitance (mutual exclusion), the difference not being cognised even when the thing is present, without a cognition of its absent contrary. The perception of difference therefore (the opponent concludes) is not easily admissible. To this let the reply be as follows. Are these objections proclaimed against one who maintains a difference identical with the things themselves, or against one who maintains a difference between things as the subjects of attributes? In the former case, you will be, as the saying runs, punishing a respectable Bráhman for the offence of a thief, the objections you adduce being irrelevant. If it be urged that if it is the essence of the thing

॥ सर्वदर्शनसङ्ग्रहः ॥

तदेतद्रामानुजमतं जीवाणुत्वदासत्ववेदापौरुषेयत्वसिद्धार्थबोधकत्वस्वतःप्रमाणत्वप्रमाणत्रित्वपाञ्चरात्रोपजीव्यत्वप्रपञ्चभेदसत्यत्वादिसाम्येऽपि परस्परविरुद्धभेदादिपक्षत्रयकक्षीकारेण क्षपणकपक्षनिक्षिप्तमित्युपेक्षमाणः स आत्मा तत्त्वमसीत्यादेर्वेदान्तवाक्यजातस्य भङ्ग्यन्तरेणार्थान्तरपरत्वमुपपाद्य ब्रह्ममीमांसाविवरणव्याजेनानन्दतीर्थः प्रस्थानान्तरमास्थितः। तन्मते हि द्विविधं तत्त्वं स्वतन्त्रास्वतन्त्रभेदात्। तदुक्तं तत्त्वविवेके

> स्वतन्त्रमस्वतन्त्रञ्च द्विविधं तत्त्वमिष्यते।
> स्वतन्त्रो भगवान् विष्णुर्निर्दोषोऽशेषसद्गुण इति॥

ननु सजातीयविजातीयस्वगतनानात्वशून्यं ब्रह्मतत्त्वमिति प्रतिपादकेषु वेदान्तेषु जागरूकेषु कथमशेषसद्गुणत्वं तस्य कथ्यत इति चेन्मैवं भेदप्रमापकबहुप्रमाणविरोधेन तेषां तत्र प्रामाण्यानुपपत्तेः तथाहि प्रत्यक्षं तावदिदमस्माद्भिन्नमिति नीलपीतादेर्भेदमध्यक्षयति। अथ मन्येथाः किं प्रत्यक्षभेदमेवावगाहते किं वा धर्म्मिप्रतियोगिघटितम्। न प्रथमः धर्म्मिप्रतियोगिप्रतिपत्तिमन्तरेण तत् सापेक्षस्य भेदस्याशक्याध्यवसायत्वात्। द्वितीयोऽपि धर्म्मिप्रतियोगिग्रहणपुरःसरं भेदग्रहणमथवा युगपत् तत् सर्व्वग्रहणम्। न पूर्व्वः बुद्धेर्विरम्य व्यापाराभावात् अन्योन्याश्रयप्रसङ्गाच्च। नापि चरमः कार्य्यकारणबुद्ध्योर्यौगपद्याभावात् धर्म्मिप्रतीतिर्हि भेदप्रत्ययस्य कारणं सन्निहितेऽपि धर्म्मिणि व्यवहितप्रतियोगिज्ञानमन्तरेण भेदस्याज्ञातत्वेनान्वयव्यतिरेकाभ्यां कार्य्यकारणभावावगमात्। तस्माच्च भेदप्रत्यक्षं सुप्रसरमिति चेत् किं वस्तुस्वरूपभेदवादिनं प्रति इमानि दूषणान्युद्घुष्यन्ते किं धर्म्मिभेदवादिनं प्रति। प्रथमे चोरापराधान्माण्डव्यनिग्रहन्यायापातः

that is the difference, then it will no longer require a contrary counterpart; but if difference presuppose a contrary counterpart it will exist everywhere; this statement must be disallowed, for while the essence of a thing is first known as different from everything else, the determinate usage (name and notion) may be shown to depend upon a contrary counterpart; for example, the essence of a thing so far as constituted by its dimensions is first cognised, and afterwards it becomes the object of some determinate judgment as long or short in relation to some particular counterpart (or contrasted object). Accordingly it is said in the Vishṇu-tattva-nirṇaya: "Difference is not proved to exist by the relation of determinant and determinate; for this relation of determinant and determinate (or predicate and subject) presupposes difference; and if difference were proved to depend upon the thing and its counterpart and the thing and its counterpart to presuppose difference, difference as involving a logical circle could not be accounted for; but difference is itself a real predicament (or ultimate entity). For this reason (viz. because difference is a *thing*) it is that men in quest of a cow do not act (as if they had found her) when they see a gayal, and do not recall the word *cow*. Nor let it be objected that (if difference be a real entity and as such perceived) on seeing a mixture of milk and water, there would be a presentation of difference; for the absence of any manifestation of, and judgment about, the difference, may be accounted for by the force of (the same) obstructives (as hinder the perception of other things), viz. aggregation of similars and the rest. Thus it has been said (in the Sāṅkhya-kārikā, v. vii.):

"From too great remoteness, from too great nearness, from defect in the organs, from instability of the common sensory,
"From subtilty, from interposition, from being overpowered, and from aggregation of similars."

There is no perception respectively of a tree and the like on the peak of a mountain because of its too great remoteness; of collyrium applied to the eyes, and so forth, because of too great proximity; of lightning and the like, because of a defect in the organs; of a jar or the like in broad daylight by one whose common sensory is bewildered by lust and other passions, because of instability of the common sensory; of an atom and the like, because of their subtility; of things behind a wall and so forth, because of interposition; of the light of a lamp and the like in the day-time, because of its being overpowered; of milk and water, because of the aggregation of similars.

Or let the hypothesis of difference in qualities be granted, and no harm is done: for given the apprehension of a subject of attributes and of its contrary, the presentation of difference in their modes is possible. Nor let it be supposed that on the hypothesis of difference in the modes of things, as each difference must be different from some ulterior difference, there will result an embarrassing regression to infinity, there being no occasion for the occurrence of the said ulterior difference, inasmuch as we do not observe that men think and say that two things are different as differenced from the different. Nor can an ulterior difference be inferred from the first difference, for there being no difference to serve as the example in such inference, there cannot but be a non-occurrence of inference. And thus it must be allowed that in raising the objection you have begged for a little oil-cake, and have had to give us

भवदभिधीयमानदूषणानां तदविषयत्वात् । ननु वस्तुस्वरूपस्यैव भेदत्वे प्रतियोगिसापेक्षत्वं न घटते घटवत् प्रतियोगिसापेक्ष एव सर्व्वत्र भेदः प्रथत इति चेन्न प्रथमं सर्व्वतोविलक्षणतया वस्तुस्वरूपे ज्ञायमाने प्रतियोग्यपेक्षया विशिष्टव्यवहारोपपत्तेः तथाहि परिमाणघटितं वस्तुस्वरूपं प्रथममवगम्यते पश्चात् प्रतियोगिविशेषापेक्षया ह्रस्वं दीर्घमिति तदेव विशिष्य व्यवहारभाजनं भवति । तदुक्तं विष्णुतत्त्वनिर्णये न च विशेषणविशेष्यतया भेदसिद्धिः विशेषणविशेष्यतया भेदसिद्धिः विशेषणविशेष्यभावश्च भेदापेक्षः धर्म्मिप्रतियोग्यपेक्षया भेदसिद्धिः भेदापेक्षञ्च धर्म्मिप्रतियोगित्वमित्यन्योन्याश्रयतया भेदस्यायुक्तिः पदार्थस्वरूपत्वाद्भेदस्येत्यादिना । अत एव गवार्थिनो गवयदर्शनान्न प्रवर्त्तन्ते गोशब्दञ्च न स्मरन्ति । न च नीरक्षीरादौ स्वरूपे गृह्यमाणे भेदप्रतिभासोऽपि स्यादिति भणनीयं समानाभिहारादिप्रतिबन्धकबलाद्भेदभानव्यवहाराभावोपपत्तेः । तदुक्तम्

अतिदूरात् सामीप्यादिन्द्रियघातान्मनोऽनवस्थानात् ।
सौक्ष्म्याद्व्यवधानादभिभवात् समानाभिहाराच्चेति ॥

अतिदूराद् गिरिशिखरवर्त्तितर्वादौ अतिसामीप्याल्लोचनाञ्जनादौ इन्द्रियघाताद्विद्युदादौ मनोऽनवस्थानात् कामाद्युपप्लुतमनस्कस्य स्फीतालोकवर्त्तिनि घटादौ सौक्ष्म्यात् परमाण्वादौ व्यवधानात् कुड्याद्यन्तर्हिते अभिभवात् दिवा प्रदीपप्रभादौ समानाभिहारात् नीरक्षीरादौ यथावद्ग्रहणं नास्तीत्यर्थः । भवतु वा धर्म्मभेदवादस्तथापि न कश्चिद्दोषः धर्म्मिप्रतियोगिग्रहणे सति धर्म्मभेदभानसम्भवात् । न च धर्म्मभेदवादे तस्य तस्य भेदस्य भेदान्तरभेद्यत्वेनानवस्था दुरवस्था स्यादित्यास्थेयं भेदान्तरप्रसक्तौ मूलाभावात् भेदभेदिना भिन्नाविति व्यवहारादर्शनात् । न चैकभेदबलेनान्यभेदानुमानं दृष्टान्तभेदाविघातेनोत्थानदोषाभावात् । सोऽयं पिण्याकयाचनार्थं गतस्य खारिकातैलदातृत्वाभ्युपगम इव । दृष्टान्तभेदविमर्द्दे त्वनुत्थानमेव । नहि वरविघाताय कन्योद्वाहः । तस्मान्मूलक्षयाभावादनवस्था न दोषाय । अ-

Digitized by Google

gallons of oil. If there be no difference for the example the inference cannot emerge. The bride is not married for the destruction of the bridegroom. There being, then, no fundamental difficulty, the infinite regression is no vice.

Difference (duality) is also ascertained by inference, Thus, the Supreme Lord differs from the individual soul, as the object of its obedience; and he who is to be obeyed by any person, differs from that person, a king, for instance, from his attendant. For men, desiring as they do the end of man, Let me have pleasure, let me not have the slightest pain, if they covet the position of their lord, do not become objects of his favour, nay rather they become recipients of all kinds of evil. He who asserts his own inferiority and the excellence of his superior, he it is who is to be commended; and the gratified superior grants his eulogist his desire. Therefore it has been said :—

"Kings destroy those who assert themselves to be kings;
And grant to those who proclaim their kingly preëminence all that they desire."

Thus the statement of those (Advaita-vādins) in their thirst to be one with the Supreme Lord, that the supreme excellence of Vishṇu is like a mirage, is as if they were to cut off their tongues in trying to get a fine plantain, since it results that through offending this supreme Vishṇu they must enter into the hell of blind darkness *(andha-tamasa)*. The same thing is laid down by Madhya-mandira in the Mahābhārata-tātparya-nirṇaya:

"O Daityas, enemies of the eternal; Vishṇu's anger is waxed great,
He hurls the Daityas into the blind darkness, because they decide blindly." *A. E. G.*

नुमानेनापि भेदोऽवसीयते परमेश्वरो जीवाद्भिन्नः तं प्रति सेव्यत्वात् यो यं प्रति सेव्यः स तस्माद्भिन्नः यथा भृत्याद्राजा नहि सुखं मे स्यात् दुःखं मे न मनागपि इति पुरुषार्थमर्थयमानाः पुरुषाः स्वपतिपदं कामयमानाः सत्कारभाजो भवेयुः प्रत्युत सर्व्वानर्थभाजनं भवन्ति । यः स्वस्यात्मनो हीनत्वं परस्य गुणोत्कर्षञ्च कथयति स स्तुत्यः प्रीतः स्तावकस्य तस्याभीष्टं प्रयच्छति । तदाह ।

घातयन्ति हि राजानो राजाहमिति वादिनः ।
ददत्यखिलमिष्टञ्च स्वगुणोत्कर्षवादिनामिति ॥

एवञ्च परमेश्वराभेदतृष्णया विष्णोर्गुणोत्कर्षस्य मृगतृष्णिकासमत्वाभिधानं विपुलकदलीफललिप्सया जिह्वाच्छेदेन हरति एतादृशविष्णुविद्वेषणादन्धतमसप्रवेशप्रसङ्गात् । तदेतत् प्रतिपादितं मध्यमन्दिरेण महाभारततात्पर्य्यनिर्णये

अनादिद्विषतो दैत्या विष्णोर्द्वेषो विवर्द्धितः ।
तमस्यन्धे पातयति दैत्यानन्धे विनिश्चयादिति ॥

THE

ŚULVASÚTRA OF BAUDHÁYANA,

WITH THE COMMENTARY BY DVÁRAKÁNÁTHAYAJVAN

(Continued from page 194.)

THIRD ADHYÁYA.

उपधाने शिरसो ऽप्यये चतुर्थीमुपदध्यात् । ८७

When placing the bricks a chaturthí is to be placed there where the head is joined (to the átman).

A square-brick, the side of which = 30 aṅgulis, is placed in the centre of the western part of the head so as to touch with its western side the line in which head and átman join.

सर्वेषाप्ययशब्देन पक्षपुच्छशिरसामात्मसंगतः प्रदेशो विधीयते । शिरसो ऽप्यये मूलप्रदेश इत्यर्थः । अविशेषान्मध्ये पार्श्वयोरुभयच पञ्चदशाङ्गुलमवशिष्य ।

हंसमुखीं पुरस्तात् । ८८

To the east (of the chaturthí) a hansamukhí is to be placed.

One of the five-cornered bricks described in S. 68

पुरस्तात् चतुर्थ्याः पुरस्तात् प्रागग्रां हंसमुखीमुपदध्यात् ।

पादेष्टके अभितः । ८९

On both sides (of the hansamukhí) a quarter-brick. is placed.

On those two sides of the hansamukhí which are turned towards the south-east and the north-east one of the triangular bricks described in S. 64 is placed.

हंसमुख्या अभितः प्रत्यगग्रे । अग्रप्रदेशेन संश्लिष्य दीर्घपार्श्वे पादेष्टके उपदध्यात् ।

तयोरवस्तादभितस्तिस्रस्तिस्रश्चतुरस्रपाद्याः । ९०

To the west of these two (triangular quarter-bricks) three four-cornered quarter-bricks are to be placed on both sides (of the chaturthí and the hansamukhí).

तयोरुपहितयोः पादेष्टकयोरवस्तात् पश्चात् । अभितः चतुर्थीहंसमुख्योरभितः । तिस्रस्तिस्रश्चतुरस्रपाद्या उपदध्यात् । उभयच हंसमुखीपश्चिमान्तेन तुल्यां बहिर्दीर्घपार्श्वां प्रागग्रामेकैकामुपधाय तयोः पश्चात्पञ्चदशाङ्गुलव्यासत्रिंशदङ्गुलदैर्घ्ये द्वे द्वे यथायोगमुपदध्यात् ।

शेषे पादेष्टकाः । ९१

In the remainder (of the head) quarter-bricks are to be placed.

The triangle forming the top of the head has been left uncovered up to the present; four triangular quarter-bricks are required to cover it.

Digitized by Google

शिरसः शेषे पादेष्टकाः । सामर्थ्याच्चतस्र इत्यर्थः । तत्र शिरोऽग्रहंसमुख्यग्रयोर्मध्ये प्रागग्रप्रत्यगग्रे (द्वे?) । प्रत्यगग्रपाद्याभितः प्रागग्रे द्वे । एवं चतुर्दशेष्टकाः शिरस्युपहिता भवन्ति ।

अपि वा शिरसोऽग्रे हंसमुखीमुपदध्यात्तस्या अवस्ताच्चतुर्थीमुपदध्यात्पादेष्टके अभितस्तयोरवस्तादभितस्तिस्रस्तिस्रश्चतुरस्रपाद्याः शेषे पादेष्टकाः । ९२

Or else a hansamukhí-brick is placed in the top of the head, a chaturthí to the west of it, a (triangular) quarter-brick on each side, to the west of each of those (triangular quarter-bricks) three four-cornered quarter-bricks ; the remainder is to be covered with (triangular) quarter-bricks.

The remainder is in this case a square of 30 aṅgulis to the west of the chaturthí, which is covered with four triangular quarter-bricks.

शिरसोऽग्रे हंसमुखीमुपधाय तस्याः पश्चाच्चतुर्थीमुपधाय तयोरभितः पादेष्टके दक्षिणोत्तराग्रे अभ्यन्तरदीर्घपार्श्वे उपधाय तयोः पश्चात्पश्चिमान्तसंगते चतुरस्रपाद्ये बहिर्दीर्घपार्श्वे प्रागग्रे उभयत उपधाय तयोः पश्चात्पदव्यासप्रक्रमदीर्घपूर्वापरचतुरस्रक्षेत्रे द्वे द्वे चतुरस्रपाद्ये उपधाय तयोर्युगलयोर्मध्ये ऽवशिष्टचतुर्भागीयाक्षेत्रे चतस्रः पादेष्टका इति । अयमपर उपधानकल्पः । अत्रापि शिरसि चतुर्दश ।

By the "agra" of rectangular triangles the right angle is meant.

शिरसोऽवस्तात्पञ्च पादेष्टका व्यतिषक्ता उपदध्यात् । ९३

To the west of the head, five triangular quarter-bricks are to be placed mutually joined with each other.

Three of them are turned towards the east, two towards the west.

व्यतिषक्ता व्यत्यस्ता दक्षिणोत्तराभिः । द्वितीयाचतुर्थ्यौ प्रत्यगग्रे । इतराः प्रागग्राः ।

तथा पुच्छस्य पुरस्तात् । ९४

The same is to be done at the east side of the tail (there too five triangular quarter-bricks are to be placed).

पादेष्टका पञ्च व्यतिषक्ताः । अत्र द्वितीयाचतुर्थ्यौ प्रागग्रे । इतराः प्रत्यगग्राः ।

यद्यदपच्छिन्नं तस्मिन्नर्धेष्टकाः पादेष्टकाश्चोपदध्यात् । ९५

Wherever something has been cut off, there half-bricks and quarter-bricks are to be placed.

This rule refers to those sides of the agnikshetra, which had been formed by cutting off the corners of oblongs (átman and tail) or by cutting out pieces (wings and pattras of the wings). Thus it refers in fact to the whole outline of the chiti with the only exception of the western side of the tail and northern and southern sides of the head. It will appear from the commentary and from the sketch of the chiti where half-bricks are to be placed and where quarter-bricks.

अपच्छेदेष्वन्यासामसंभवात् । सिद्धस्य वचनमर्ध्याभिश्चाभिः पाद्याभिरुपधानार्थम् । तत्र शिरसि आत्मपूर्वापरान्ते पूर्वमेवोपहिताः पादेष्टकाः । अनेन सूत्रेण पुच्छपूर्वान्ते पार्श्वयोर्द्वे द्वे पादेष्टके । निर्णामान्तयोरपच्छेदेषु चतस्रश्चतस्रः पाद्याः । अन्यत्रार्धेष्टकाः ।

शेषमग्निं चतुर्भागीयाभिः प्रच्छादयेत् । ९६

The remainder of the agni is to be covered with chaturthí-bricks.

अत्र चतुर्भागीयाभिरेवेति न नियम्यते । ताभिः पूरयितुमशक्यत्वात् ।

पाद्याभिः सार्ध्याभिः संख्यां पूरयेत् । ९७

Finally the number of two hundred bricks is to be made full with quarter-bricks and half-bricks.

When we have placed the bricks mentioned in the sútras preceding to S. 95, which amount altogether to sixty-eight (14 in the head, 5 on the eastern and 5 on on the western margin of the átman and 44 situated on the periphery of the agni), there is room left for ninety-one chaturthís. As however 68 + 91 is only 159 and as two hundred bricks are required, ardhyás and pádyás must be substituted to a certain number of chaturthís. Thus instead of four chaturthís in the tail, sixteen pádyás are employed, seven chaturthís in each wing are replaced by twenty-eight ardhyás, four chaturthís by sixteen pádyás, two ardhyás in the tail by four pádyas and lastly the chaturthí in the centre of the chiti by two ardhyás. Thereby the number of the bricks is raised to two hundred. The exact places where these substitutions had to be made are given by the commentary and may be seen in the diagram of the chiti.

चतुर्थीभिः प्रच्छादिते द्विशतसंख्या न पूर्यते । तत्रार्ध्यासहिताभिः पाद्याभिः संख्यां द्विशतसंख्यां पूरयेत् । तत्रैवमुपधानम् । शिरोवर्जं पुच्छेन सहात्मन्युदीच्यो द्वादश रीतयः । तत्र पुच्छाग्रे मध्यतः षट् चतुर्थ्यः पार्श्वयोरर्ध्ये । द्वितीयरीत्यां पार्श्वयोरर्ध्ये मध्ये षोडश पाद्याः । तृतीयस्यां मध्ये द्वे चतुर्थ्यौ

पार्श्वयोर्द्वे द्वे पादे । चतुर्थ्यां पञ्च पाद्याः पूर्वोक्ताः । पञ्चम्यां पार्श्वयोरर्ध्ये मध्ये तिस्रश्चतुर्थ्यः । ततः पञ्चसु पञ्च पञ्च चतुर्थ्यः । तत्राष्टम्यां मध्यामुद्धृत्य द्वे अर्ध्ये । पञ्चमीवदेकादशी । ततः पूर्वोक्ताः पञ्च पाद्याः । शिरसि चतुर्दश पूर्वमेवोक्ताः । पक्षयोः पत्राणि पञ्चार्ध्याः । तत्र दक्षिणपक्षस्थाः प्रागुत्तरविशेषाः । विपरीता इतराः । तत्र पक्षयोः प्राच्यः षट् षड् रीतयः । तत्र दक्षिणे पक्षे दक्षिणादारभ्य मध्ये चतस्रश्चतुर्थ्यः पश्चात्पुरस्ताच्चार्ध्ये । एवं द्वितीया । तृतीयस्यामादितः सप्तार्ध्या उपधाय ततो दक्षिणपूर्वकर्णामर्ध्यामेकामुपधाय ततश्चतस्रः पाद्याः संहिताया उपदध्यात् । एवं चतुर्थी रीतिः । पञ्चम्यामादितोऽर्ध्या ततस्तिस्रश्चतुर्थ्यस्ततोऽर्ध्याद्वयम् । दक्षिणारीतिवत् षष्ठी रीतिः । एवमुत्तरः पक्षः । एवं षट्चत्वारिंशदात्मनि । शिरसि चतुर्दश । द्वात्रिंशत्पुच्छे । पक्षयोरष्टशतम् । अस्मिन्प्रस्तारे नवषष्टिश्चतुर्थ्यः । अर्ध्या द्वासप्ततिः । पाद्या द्विपञ्चाशत् । षट् चतुरस्रपाद्याः । एका हंसमुखी । एष द्वितीयः प्रस्तारः ।

अपरस्मिन्प्रस्तारे हंसमुखीश्चतस्रश्चतसृभिः पादेष्टकाभिः संयोजयेद्यथा दीर्घचतुरस्रं संपद्यते तत्तिर्यक् स्वयमातृण्णावकाश उपदध्यात् । ९८

In the second layer four hansamukhís are to be combined with four triangular quarter-bricks in that way that they form together an oblong; this oblong is to be placed sideways on the spot of the svayamáṭrinná.

एवं कृत्वोपदध्यादिति विवक्षितम् । ईदृग्रूपा इष्टका उपदध्यादित्यर्थः । तत्रैवमुपधानम् । स्वयमातृण्णावकाशमध्यं गृहीत्वा पदत्रयव्यासं प्रक्रमद्वयदीर्घं दीर्घचतुरस्रं दक्षिणोत्तरं बुद्ध्या परिकल्प्य चतुरस्रपूर्वपार्श्वे प्रत्यगग्रे द्वे हंसमुख्यौ पश्चिमपार्श्वे प्रागग्रे द्वे हंसमुख्यौ । तासां मध्ये दक्षिणोत्तराग्रे अन्तर्दीर्घपार्श्वे पादेष्टके । चतुरस्रदक्षिणोत्तरपार्श्वयोर्मध्यभूतान्तरालयोर्बहिर्दीर्घपार्श्वे दक्षिणोत्तराग्रे द्वे पादेष्टके । एवमष्टेष्टकं दीर्घचतुरस्रं भवति ।

हंसमुख्यौ प्रतीच्यौ पुच्छाप्यये ऽर्धपदेनात्मनि विशये । ९९

Two hansamukhís turned towards the west are to be placed there where átman and tail are joined, in that way that the half pada is situated in the átman.



Vakrapakshaśyenachit.
I. kind.
I. prastára.

A hansamukhí may be supposed divided into two parts, a triangle and an oblong of 30 angulis by $7\frac{1}{2}$ angulis ($= \frac{1}{2}$ pada). The triangular part of the two hansamukhís mentioned in the sútra lies in the tail, the oblong part in the átman.

पुच्छात्मसंधौ द्वे हंसमुख्यौ प्रत्यगग्रे । अर्धपदमात्रेणोपलक्षितो योऽवयवः स आत्मनि यथा भवति तथोपदध्यात् । विशयशब्दार्थमाहापस्तम्बः । अर्धमात्मन्यर्धं पक्ष इति । तत्रार्धशब्दस्योभयत्रस्थित्युपलक्षणत्वादेकदेशोऽपि गृह्यते[1] ।

तयोरवस्तादभितस्तिस्रः पादेष्टकाः प्राङ्मुखीरुपदध्यात् । १००

To the west and on both sides of these two hansamukhís three triangular quarter-bricks are to be placed, their tops (right angles) turned towards the east.

तयोर्हंसमुख्योः पश्चादभितो दक्षिणतश्चोत्तरतश्च प्रागग्राः पादेष्टकास्तिस्र उपदध्यात् । हंसमुख्योः पश्चात्प्रत्यग्दीर्घपार्श्वाः प्रागग्राः । हंसमुख्योरग्राभ्यां संहिता उपदध्यादित्यर्थः ।

पुच्छस्यावस्तात्पञ्चदश पादेष्टका व्यतिषक्ता उपदध्यात् । १०१

At the west side of the tail, fifteen triangular quarter-bricks joined with each other, are to be placed.

The tops of eight of them are turned towards the east, those of seven towards the west.

पुच्छाग्रे पञ्चदश पादेष्टकाभिरेका रीतिः । तत्र प्रागग्रा अष्टौ पादेष्टकाः । प्रत्यगग्राः सप्त ।

पादेष्टके अर्धेष्टकेति पक्षपत्त्राणां प्राचीर्व्यत्यासं चिनुयात् । १०२

In the pattras of the wings by turns two triangular quarter-bricks and one half-brick are to be placed, from the west towards the east.

द्वे पादेष्टके । एकार्धेष्टका । एवं यावन्ति पत्त्राणि व्यत्यस्य पुनरपि पादेष्टके इत्यादिनोपदध्यात् । तत्र प्रथमपश्चिमपत्त्राग्रे प्रागग्रा पाद्या तस्या उत्तरतः प्रत्यगग्रा पाद्या तस्याः पुरस्तादुत्तरपूर्वदीर्घबाह्यकर्णां पादेष्टकादीर्घपार्श्वेन प्रक्रमेण संगतामर्धेष्टकामुपदध्यात् । एवं पञ्च पत्त्रेषूपधानम् ।

विशये यदपच्छिन्नं तस्मिन्नर्धेष्टकाः पादेष्टकाश्चोपदध्यात् । १०३

[1] A. on the margin: पक्षशब्दो ऽप्युपलक्षणमेव ।

At the places where the átman is joined to the wings and at those places, where something has been cut off, half-bricks and quarter-bricks are to be placed.

विशये पक्षात्मसंधिषु निर्णामाद्यन्तेषु यदपच्छिन्नं शेषं तस्मिन्नर्धेष्टकाः पादेष्टकाश्च यथासंभवमुपदध्यात् । विशय उक्तार्थः ।

शेषमग्निं चतुर्भागीयाभिः प्रच्छादयेत्पाद्याभिः साध्याभिः संख्यां पूरयेत् । १०४

The rest of the agni is to be covered with chaturthís and then the number to be made full with quarter-bricks and half-bricks.

पूर्वमेव व्याख्यातः । तत्रैवमुपधानम् । पुच्छे विशयस्थरीत्या सहोदीच्यश्चतस्रो रीतयः । तत्र प्रथमं पुच्छाग्रे पञ्चदश पादेष्टकाः पूर्वमुक्ताः । ततः पूर्वस्यां मध्ये पञ्च चतुर्थ्यः पार्श्वयोरर्ध्ये । तृतीयस्यां मध्ये तिस्रश्चतुर्थ्यः पार्श्वयोरर्ध्ये । संधिरीत्यां प्रागग्रास्तिस्रः पादेष्टकाः । तासां पुरस्तात्प्रत्यगग्रं हंसमुखीद्वयं व्यतिषक्तमुपदध्यात् । एवं पञ्चेष्टका संधिरीतिः । तत्रात्मनि पक्षयोश्च प्रागायता अष्टादश रीतयः । तत्रात्ममध्यमे रीती शिरसा सह । तत्रात्ममध्यमरीत्योर्दक्षिणोच्यते । पूर्वं पुच्छात्मसंधिरीत्यां दक्षिणतः प्रत्यगग्रमुपहितायां हंसमुख्याः पुरस्तात् तिस्रश्चतुर्थ्यः । ततः प्रागग्रा हंसमुखी[1] पूर्वहंसमुख्या अग्रेणाग्रसंगता । तयोर्मध्ये दक्षिणत उत्तरतश्चोदग्दक्षिणाग्रे पादेष्टके । एवमुपहितचतुष्टयस्य पुरस्तात्तिस्रश्चतुर्थ्यः । ततः पञ्चार्धेष्टकाः । एवं पञ्चदशेष्टका रीतिः । ततो दक्षिणस्यां चतुर्दशार्धेष्टकाः । ततः पक्षात्मविशयरीत्यां पश्चादर्धेष्टका । ततश्चतस्रश्चतुर्थ्यः । ततः संधौ मध्यतः प्रागग्रा पाद्या । पार्श्वयोर्दक्षिणोत्तराग्रे द्वे पादेष्टके । एवं पाद्यात्रयमग्रेण संगतं भवति । एवमष्टेष्टका संधिरीतिः । तस्या दक्षिणतो रीतिद्वयेनाष्टौ चतुर्थ्यः । पार्श्वयोश्चतस्र अर्धेष्टकाः । निर्णामरीत्यामादौ मध्यतः प्रत्यगग्रा पादेष्टका । तस्या दक्षिणत उत्तरतश्चोदग्दक्षिणाग्रे द्वे पादेष्टके । एवं पाद्यात्रयमग्रसंगतं भवति । ततश्चतस्रश्चतुर्थ्यः । तत एका पाद्या प्रागग्रा । एवमष्टेष्टका रीतिः । ततो रीतिद्वयेनाष्टौ चतुर्थ्यः । पार्श्वयोश्चतस्र अर्ध्याः । तयोर्दक्षिणा रीतिः पत्त्रैः सह पूर्वमेवोक्ता पञ्च-

[1] Some words are no doubt wanting after हंसमुखी I supply तस्याः पुरस्तात्प्रत्यगग्रा हंसमुखी ।

दशेष्टकात्मिका । उत्तरपार्श्वेस्याप्येवमुपधानम् । एवं पुच्छे द्वात्रिंशदिष्टकाः । अष्टपञ्चाशदात्मशिरसोः । पक्षयोर्द्विशतम् । अस्मिन्प्रस्तारे ऽष्टषष्टिश्चतुर्थ्यः । अर्धेष्टकाः सप्ततिः । षट्पञ्चाशत्पादेष्टकाः । हंसमुख्यः षट् ।

The sketch of the prastára will be the best illustration of the commentary. According to sútras 98 — 102, fifty-eight bricks had been placed. S. 103 directs us to place ardhyás and pádyás on the outer circumference of the agni, there where something had been cut off; accordingly two ardhyás are required for the top of the head, four ardhyás for the north and south-side of the tail, twenty-six ardhyás and six pádyás for wings and átman together (by employing pádyás only there where they are absolutely necessary). After which there is room left for eighty-four chaturthís. But as these together with the before-mentioned ninety-six bricks give only one hundred and eighty, sixteen chaturthís are divided into thirty-two ardhyás (180 — 16 + 32 = 196) and the number finally made full by replacing four ardhyás by eight pádyás (196 — 4 + 8 = 200).

These pádyás are situated at the west end of the two "pakshanirṇamarítí" and the east end of the two "átmapakshasandhirítí."

अथोक्तमेव श्येनचितं प्रकारान्तरेणाह ।

अथापरः । १०५

Now another (kind of the falcon-chiti will be described).

अथशब्दः पूर्वेण संबन्धार्थः ये पूर्वस्योक्ता धर्मा अंसापच्छेदनादय अस्यापि ते भवन्तीति । अपरः । प्रकारः । श्येनाकृतेरपरः प्रकारो वक्ष्यत इत्यर्थः ।

पुरुषस्य पञ्चमीभिः शतमशीतिः सप्तार्धे च सारत्निप्रादेशः सप्तविधः संपद्यते । १०६

One hundred eighty-seven and a half (square-bricks) the side of which is equal to the fifth part of a purusha = 24 aṅgulis, compose the seven-fold agni together with the two aratnis and the prádeśa.

One square purusha contains twenty-five such bricks, therefore 7½ square purushas = 187½ pańchamís.

षष्ठ्यर्थे तृतीया । पुरुषस्य पञ्चमीनामिष्टकानां शतमशीतिश्च सप्त चार्धेष्टका च सारत्निप्रादेशः सप्तविधः संपद्यते । पुरुषक्षेत्रे पञ्चविंशतिः पञ्चम्यः शेरते । अर्धपुरुषक्षेत्रे ऽर्धत्रयोदश । एवं सारत्निः । ताभिरिष्टकाभिरात्मपक्षपुच्छशिरसां मानमाह ।

तासां पञ्चाशद् द्वे चात्मनि । १०७



Vakrapakshaśyenachit.
I. kind.
II. prastára.

Fifty-two of these bricks lie in the átman.

That means: the preliminary area of the átman of this second kind of the śyena-chiti has to be made equal to the area of 52 pañchamís; there are no real pañchamís employed for the construction of the agni. (The same remark applies to the following sútras.) The átman is drawn at first in the form of an oblong of 240 aṅgulis length (from the east towards the west) by 144 aṅgulis breadth.

उपदध्यादिति शेषः । एवं सर्वेष । सामर्थ्यादात्मैवं षडरत्निविस्तारं द्विपुरुषायामं दीर्घचतुरश्रं भवति । तत्र षष्टिः पञ्चम्यः शेरते । अर्धव्यायामेन स्रक्तीनामपच्छेद इति वक्ष्यते । एवं श्रोण्यंसेषु द्वाभ्यां द्वाभ्यामरत्निभ्याम- पच्छेदने कृते ऽरत्न्यष्टकं निरस्तं भवति । शेषाः पञ्चाशद् द्वे च भवन्ति ।

अर्धचतुर्थ्यः शिरसि । १०८

Three and a half (pañchamís) are situated in the head.

As in the first kind of the vakrapaksha śyena, an oblong of 54 aṅgulis by 48 aṅgulis is drawn for the head.

पूर्ववच्छिरःस्थाने ऽरत्निद्वयव्यासं चतुःपञ्चाशदङ्गुलायामं दीर्घचतुरश्रं विहृत्याकृतिः शिरसो नित्येति वक्ष्यमाणत्वादिहारत्नौ पूर्वश्येनवत्प्रक्रमभक्तिं कृत्वा पूर्वस्याः करण्या मध्याद्दक्षिणोत्तरयोररत्निमात्रे पूर्वभागे निपातयेत् । एवमर्धचतुर्थ्यः पञ्चम्यो भवन्ति ।

पञ्चदश पुच्छे । १०९

Fifteen in the tail.

त्र्यरत्निविस्तारमष्टारत्निदीर्घमुदगायतं चतुरश्रं कृत्वा पूर्वश्येनवत्प्रक्रमस्थाने त्रिभिस्त्रिभिररत्निभिरपच्छिन्द्यात् । पञ्चदश पञ्चम्यः शेरते ।

अष्टपञ्चाशत्साध्या दक्षिणे पक्ष उपदध्यात् । ११०

Fifty-eight and a half pañchamís are to be placed in the southern wing.

An oblong of 216 aṅgulis (from the north towards the south) by 144 aṅgulis is drawn on the southern side of the agni; this represents the wing before it is bent and before the pattras have been added and comprises fifty-four pañchamís.

पक्षस्थाने षडरत्निविस्तारं नवारत्न्यायाममुदगायतं दीर्घचतुरश्रं विहृत्य पक्षयोस्त्रिभिस्त्रिभिररत्निभिरपनाम इति वक्ष्यमाणत्वात्त्रिभिररत्निभिः पक्षनमनम् । चतुःपञ्चाशत्पञ्चम्यः शेरते । अध्यर्धार्धाभिः षट् षट् पत्त्राणि कुर्यादिति वक्ष्यमाणत्वात् पक्षाग्रे ऽध्यर्धाभिः षट् चतुरश्राणि कृत्वा पूर्ववदक्ष्णयापच्छिन्द्यात् । एवं पत्त्रेष्वर्धपञ्चमाः पञ्चम्यः शेरते । एवमष्टपञ्चाशत्साध्या दक्षिणे पक्ष उपदध्यात् ।

तथोत्तरे । १११

In the same way in the northern wing (fifty-eight pañchamís are to be placed).

अष्टपञ्चाशदित्यनुवर्तते ।

अर्धव्यायामेन स्रक्तीनामपच्छेदः । ११२

The corners of the átman are cut off with a half vyáyáma = 48 aṅgulis.

उक्तार्थं ।

संनतं पुच्छम् । ११३

The tail is narrowed.

There had been drawn at the place of the tail, an oblong of eight aratnis = 192 aṅgulis length (from the north towards the south) by three aratnis = 72 aṅgulis breadth. The two east corners being cut off with three aratnis, the area of the tail is reduced so far as to contain the fifteen pañchamís mentioned in S. 109.

पुच्छपूर्वान्तस्य द्व्यरत्नित्वात्पूर्वस्मात्संनतं संकुचितम् । विस्पष्टार्थं सिद्धस्य पुनर्वचनम् ।

पक्षयोस्त्रिभिस्त्रिभिररत्निभिरपनामः । ११४

On both wings the bending is done with three aratnis = 72 aṅgulis.

i.e. At the distance of 72 aṅgulis towards the east from the centre of the west side of the wing a mark is made, the triangle cut out, etc., in the same way as it is done in the first kind of the vakrapaksha śyena.

निर्णाम इत्यर्थः । पूर्वश्येने त्रिभिः प्रक्रमैरुक्तमिहारत्निभिरित्यर्थः ।

अध्यर्धार्धाभिः षट् षट् पत्त्राणि कुर्यात् । ११५

With halfs of adhyardhá-bricks six feathers are to be made at the end of each wing.

The adhyardhá-bricks will be described in S. 118; their halves are obtained by drawing a diagonal. By adding the pattras the area of each wing is made equal to that of fifty-eight and a half pañchamís.

व्याख्यातप्रायमेतत् ।

आकृतिः शिरसो नित्या । ११६

The form of the head is the same.

i.e. As in the first kind of the vakrapaksha śyena the two east-corners of the head are cut off, only this time with an aratni instead of a prakrama.

तस्यांसौ प्रक्रमेणेत्यनेन प्रकारेणोक्तेत्यर्थः इहारत्निनेति विशेषः ।

अथेष्टकानां विकाराः । ११७

Now follows the description of the changes (in the size and shape) of the bricks.

अथशब्दः संबन्धार्थः । एतस्येत्यर्थः ।

पुरुषस्य पञ्चम्यस्ता एवैकतो ऽध्यर्धाः । ११८

Bricks the side of which is equal to the fifth part of a purusha = 24 aṅgulis and bricks which are longer on one side by a half (i. e. oblong bricks of 24 aṅgulis by 36 aṅgulis).

ता एव पञ्चम्यः । एकपार्श्वतो ऽध्यर्धाः । अरत्निव्यासाः । त्रिप्रादेशदीर्घा इत्यर्थः ।

ता एवैकतः सपादाः । ११९

Pañchamís which are longer on one side by a quarter (i.e. oblongs of 30 aṅgulis by 24).

अरत्निव्यासास्त्रिंशदङ्गुलायामाः । एवं त्रीणि प्रधानानि करणानि ।

पञ्चमभागीयायाः सार्ध्याः पाद्याः । १२०

Bricks equal to the fourth part of a pañchamí together with bricks equal to the half of a pañchamí.

As usual, they are formed by the diagonals of the pañchamí.

नित्यमक्ष्णयापच्छेदनमनादेश इत्युक्तत्वात् । पञ्चमीमक्ष्णया भिन्द्यात् । तस्या द्वे पार्श्वे चतुर्विंशत्यङ्गुले । तृतीयं तिलद्वयोनं चतुस्त्रिंशदङ्गुलम् । पाद्यायास्तिलद्वयोनसप्तदशाङ्गुले द्वे फलके । चतुर्विंशत्यङ्गुलमेकम् ।

तथाध्यर्धायाः । १२१

In the same way (bricks are made which are equal to the half and to the fourth part) of an adhyardhá-brick.

अध्यर्धाया अपि पाद्याः सार्ध्याः । तत्राध्यर्धाया अरत्निप्रमाणमेकम् । त्रिप्रादेशमपरम् । नवतिलसहितचत्वारिंशदङ्गुलं तृतीयं कर्णरूपम् । अध्यर्धाया पाद्यासु विशेषः । अध्यर्धां भूमौ लिखित्वाक्ष्णयोभयतो भिन्द्यात् । एवं कृते तिर्यङ्मानोप्रदेशस्था पाद्या शूलपाद्येति संज्ञिता । तस्याद्वे फलके सैकविंशतितिले एकविंशत्यङ्गुले । इतरदरत्निप्रमाणम् । पार्श्वमानोप्रदेशस्था पाद्या दीर्घपाद्येति संज्ञिता । तस्या अपि द्वे फलके सैकविंशतितिले एकविंशत्यङ्गुले । त्रिप्रादेशमितरत् ।

As the adhyardhá-brick is not a square but an oblong, it is divided by its two diagonals into four triangles of which two and two are equal to each other. The technical names of these two different kinds of triangular bricks are dírghapádyá and súlapádyá.

तयोश्चाष्टमभागौ तथा श्लेषयेद्यथा तिस्रः स्रक्तयो भवन्ति । १२२

Then the eighth parts of a pañchamí and of an adhyardhá have to be combined in that manner that three corners (i.e. a triangle) are the result.

For this purpose the pádyá of a pañchamí is divided by a line drawn from the apex to the middle of the base; the result is a rectangular triangle, the sides of which are 12 aṅgulis, 12 aṅgulis, 16 aṅgulis 33 tilas. This is the eighth part of the pañchamí.

In the same way the dírghapádyá of an adhyardhá-brick is divided; the result is the nominally eighth part of the adhyardhá, a rectangular triangle the sides of which = 12 aṅgulis 18 aṅgulis and 21 aṅgulis 21 tilas. By putting together the equal sides of these two triangles, we get a scalene triangle, the sides of which = 16 aṅgulis 33 tilas, 21 aṅgulis 21 tilas, 30 aṅgulis. The name of a brick of this kind is ubhayí.

तयोः पञ्चमभागीयाध्यर्धयोरष्टमभागौ पादेष्टकयोरर्ध्यौ तथा श्लेषयेद्यथा श्लिष्टे तिस्रः स्रक्तयो भवन्ति । तत्र त्रीणि फलकानि । त्रिंशदङ्गुलमेकम् । तिलोनसप्तदशाङ्गुलमपरम् । सैकविंशतितिलमेकविंशत्यङ्गुलं तृतीयम् । अस्या उभयतीति[1] संज्ञा । उभयावयवनिर्मितत्वात् ।

पञ्चमभागीयायाश्चाष्टम्यः । १२३

And bricks which are equal to the eighth part of a pañchamí. — The way of forming these bricks has been described under the preceding sútra.

अष्टमीनां द्वादशाङ्गुले द्वे प्रमाणे । तिलोनसप्तदशाङ्गुलमेकं प्रमाणम् ।

तानि दश । १२४

These are altogether ten different classes of bricks.

The commentator observes that this seemingly unnecessary sútra has the purpose of intimating that there are two different kinds of pádyás of the adhyardhá-bricks.

अध्यार्धापाद्यानां प्रकारद्वयसूचनमिदं संख्यावचनम् । तत्र पञ्चम्यश्चतुरशीतिशतम् । तदर्ध्या अष्टशतम् । तत्पाद्या द्वाविंशतिः । चतस्रो ऽष्टम्यः । अष्टाचत्वारिंशत्सपादाः । षोडशोभय्यः । चतुःपञ्चाशच्छतद्वयमध्यर्धाः ।

[1] In all other places उभयी is given as the name of this class of bricks.

Digitized by Google

तदर्ध्याः पक्षावनिघातद्वयम् । षट्पञ्चाशद् दीर्घपाद्याः । द्वादश शूलपाद्याः । षोडानाकसदश्चतस्रः पञ्चम्यः द्वे तदर्ध्ये चतस्रो ऽध्यर्धाः । एवं पञ्चसहस्रमिष्टकाः । अथोपधानम् ।

आत्मनि पञ्चभागीयाः सार्ध्या उपदध्यात् । १२५

In the átman are to be placed pañchamís and half-bricks.

Ardhyás at those places where something had been cut off, pañchamís in the rest.

पञ्चमभागीयास्तदर्ध्याश्चोपदध्यात् । न पाद्या नाप्यध्यर्धा इत्यर्थः ।

तथा पुच्छे । १२६

The same is to be done in the tail i.e. it is to be covered with pañchamís and their ardhyás.

पञ्चमभागीयाः सार्ध्या इत्येव ।

पक्षयोश्चाध्यर्धाः सार्ध्याः । १२७

In both wings adhyardhá-bricks and their ardhyás are to be placed.

पूर्वैव व्याख्यातम् ।

शिरसि याः संभवन्ति । १२८

In the head those bricks are to be placed which fit into it, (two ardhyás and two sapádás).

द्वे अर्ध्ये द्वे सपादे इत्यर्थः । एवं सामान्येनोपधानमुक्तम् । अथैवमुपधानम् । पुच्छात्मशिरसामुदीच्यः पञ्चदश रीतयः । तत्र पुच्छाग्रे मध्यतः षट्पञ्चम्यः । पार्श्वयोर्द्वे तदर्ध्ये । पूर्वस्यां मध्यतश्चतस्रः पञ्चम्यः पार्श्वयोर्द्वे तदर्ध्ये । तृतीयस्यां षडर्ध्याः । एवं चतुर्थी रीतिः । पञ्चमीपार्श्वयोरर्ध्ये मध्यतश्चतस्रः पञ्चम्यः । ततः षड्भिः षड्भिः पञ्चमीभिः षड् रीतयः । पञ्चमीवद् द्वादशी । चतुर्थीवत् त्रयोदशी । शिरसि चतुर्दश्यां प्रागायते द्वे सपादे । पञ्चदश्यां शिरसो ऽग्रे द्वे अर्ध्ये बहिर्विशेषे । पक्षे पत्त्रवर्जाः षड् रीतयः प्राच्यः । तत्र पक्षमूलरीत्यां मध्ये पञ्च तिरश्च्यो ऽध्यर्धाः । पश्चात्पुरस्ताच्च द्वे अध्यर्धार्ध्ये । तस्या दक्षिणतो ऽप्येवम् । तस्या दक्षिणतो निर्णामसमीपरीत्यां द्वादशाध्यर्धार्ध्याः । निर्णामदक्षिणरीत्यामप्येवम् । ततो दक्षिणतो द्वे रीती पक्षमूलरीतिद्वयवत् । पक्षपत्त्रेषु षडध्यर्धार्ध्या उदीच्यः । एवमुत्तरः पक्षः । आत्मनि षष्टिरिष्टकाः । विंशतिः पुच्छे । चतस्रः शिरसि । पक्षयोः षोडशशतम् । अस्मिन्प्रस्तारे चतुःपञ्चाशत्पञ्चम्यः । अष्टाविंशतिरर्ध्याः । द्वे सपादे । चत्वारिंशदध्यर्धाः । षट्सप्ततिरध्यर्धार्ध्याः ।



Vakrapakshaśyenachit.
II. kind.
I. prastára.

अपरस्मिन्प्रस्तारे पूर्वयोः पक्षाप्यययोरेकैकामुभयीमुपदध्यात् । १२९

In the second prastára one ubhayí-brick (see S. 122.) is to be placed on the eastern end of the two lines in which the wings are joined with the átman.

पूर्वयोः पक्षात्मसंध्योरेकैकामुभयीं प्रागग्रां प्रत्यग्दीर्घपार्श्वां पक्षस्याध्यर्धाष्टमभागीयामुपदध्यात् । दीर्घपार्श्वमाष्टाङ्गुलेन पक्षं प्राप्तामित्यर्थः ।

एकैकामपरयोः । १३०

Likewise one ubhayí-brick is to be placed on the western end of the two apyayas (its apex turned towards the west).

अपरयोः पक्षात्मसंध्योरेकैकामुभयीं प्रत्यगग्रामध्यर्धाष्टमभागेन पक्षं प्राप्तामुपदध्यात् ।

द्वे द्वे शिरसः पार्श्वयोः । १३१

Two ubhayí-bricks are to be placed on each side of the head.

दक्षिणोत्तरपार्श्वयोर्दक्षिणोदगग्रे अन्तर्दीर्घपार्श्वे शिरसो ऽपच्छेदप्रक्तिगताग्रे एकैकामुभयीं तयोः पश्चाद् बाह्यदीर्घपार्श्वे दक्षिणोदगग्रे ताभ्यां संश्लिष्टे उपदध्यात् ।

पुच्छस्यावस्तादध्यर्धाः प्राचीर्यथावकाशम् । १३२

On the west side of the tail adhyardhá-bricks are to be placed, turned towards the east, as many as there is room for.

There is room for five of them.

पुच्छस्य पश्चिमान्ते पार्श्वयोरुभयतः प्रादेशद्वयमवशिष्य मध्ये पञ्चाध्यर्धाः प्रागायता उपदध्यात् ।

पार्श्वयोः पाद्याः साष्टभागाः । १३३

On both sides (of the five adhyardhás) pádyás and bricks equal to the eighth part of a pañchamí are to be placed.

One pádyá is placed in each of the two corners and the empty places between these pádyás and the pañchamís filled on each side with one pádyá and one ashṭabhágá.

उपहितानामध्यर्धानां पार्श्वयोः पञ्चमीपाद्याः पञ्चम्यष्टमभागसहिताः । तत्र पुच्छश्रोण्योः प्रागग्रे पश्चिमदीर्घपार्श्वे द्वे पादेष्टके । तयोर्दक्षिणत उत्तरतश्च प्रत्यगग्रे द्वे । एवं चतस्रः पाद्याः । उभयत्र पाद्याद्वन्द्वस्य दक्षिणत उत्तरतश्चाध्यर्धामूलसंहितामेकैकामष्टमीमुपदध्यात् । उभयोपहितत्रिकस्य पुरस्तादध्यर्धासमीपे पञ्चम्यर्ध्यावेवं परिशिष्टं भवति ।

पक्षयोश्चाध्यर्धाः सावयवाः । १३४

In both wings adhyardhá-bricks together with their parts (i.e. pádyás).

अवयवशब्देन दीर्घशूलपाद्ये उच्येते । नियमार्थं वचनम् ।

शेषं यथायोगं यथासंख्यं यथाधर्मं चोपदध्यात् । १३५

The rest of the agni is to be covered with bricks as it fits, as the prescribed number requires, as the nature of the agni requires.

The bricks employed for the rest of the agni must be of such a size and such a shape as to fit into the agnikshetra; their number must make the number of 200 full and they must be placed in such a way as to cover the interstices between the bricks of the first layer and not to injure the symmetrical appearance of the agni.

अनुपहितशेषं यथायथं युज्यते । तथा यथासंख्यं । यथा द्विशतपूर्तिः । तथा यथाधर्मं । यथाग्निधर्मं रूपं पक्षुधर्मं भेदवर्जनाद्यविनाशयन्नुपदध्यात् । भेदपरिहारेण पक्षुधर्मं इत्यपरिग्रहेण यत्र या इष्टकाः संभवन्ति तथोपदध्यादित्यर्थः । तत्रैवमुपधानम् । संधिरीत्या सह पुच्छ उदीच्यस्तिस्रो रीतयः तत्र पुच्छाप्ययरीत्यां दक्षिणान्ते प्रागग्रा प्रत्यग्दीर्घपार्श्वा पञ्चमीपाद्या । तस्या उत्तरतो विपरीता । तयोरुत्तरतो ऽष्टमी प्रागुत्तरविशेषिका । एवमुपहितस्य त्रिकस्य पुरस्ताद् बाह्यविशेषा पञ्चम्यर्ध्या । एवमस्मिन् क्षेत्रे चतस्र इष्टकाः तासामुत्तरेण पञ्चाध्यर्धाः प्रागायताः । ततो दक्षिणक्षेत्रवदुत्तरश्रोणिक्षेत्रोपधानम् । एवं चयोदशेष्टका रीतिः । द्वितीयस्यां मध्ये तिस्रः पञ्चम्यः । पार्श्वयोस्तदर्ध्ये । संधिरीत्यां मध्ये पञ्चम्येका । अभितस्तदर्ध्ये बाह्यविशेषे प्रत्यगरत्निपार्श्वे । तस्यामेव रीत्यामात्मनि दक्षिणत उत्तरतश्च प्रत्यगग्रं पादिकाद्वयम् । एवं पञ्चेष्टका संधिरीतिः । ततः पुरस्तादात्मनि पार्श्वयोरुभयतः प्रादेशमवशिष्य शिरसो ऽप्ययरीत्या सहाष्टावुदीच्यः । तत्र पुच्छाप्ययरीत्याः पुरस्तान्मध्ये तिस्रः पञ्चम्यः । पार्श्वयोस्तदर्ध्ये । ततः पूर्वस्यां पञ्च सपादाः प्रागायताः । ततो ऽध्यर्धापञ्चकेन प्रागायतैका रीतिः । ततः स्वयमातृण्णावकाशे प्राक्प्रत्यगयके शूलपादे ।

दक्षिणत उत्तरतश्चोदग्दक्षिणाये दीर्घपाद्ये। एवमुपहितस्य चतुष्टयस्याभितो द्वे द्वे अध्यर्धार्ध्ये तयोरभितो द्वे अध्यर्धे। एवं दशेष्टका रीतिः। तस्याः पुरस्तात्तिस्रो रीतयः पश्चिमभागवत्। शिरोऽप्ययरीत्यां मध्ये पञ्चमी। अभितस्तदर्ध्ये बाह्यविशेषे प्रत्यगरत्निपार्श्वे। ततः पुरस्तादप्ययस्य पञ्चम्या संगता प्रागायतैका सपादा। तस्या अभितः सपादापार्श्वसंहितामन्तस्त्रिंशदङ्गुलपार्श्वौ पूर्वभागस्थपञ्चम्यष्टमांशामेकैकामुभयीमुपदध्यात्। तयोः पश्चाद्विपरीतामेकैकामुभयीम्। शिरसोऽग्ये पञ्चमीपाद्यैका। दक्षिणपक्षसंधिरीत्यामादितः प्रत्यगग्रा उभयी सा च पञ्चम्यष्टमांशेनात्मानं प्राप्ता। तस्याः पश्चादात्मांश एका पञ्चमीपाद्या। तयोः पुरस्तात्पञ्च सपादा उदगायता आत्मानं प्रादेशेन प्राप्ताः। तासां पुरस्तादात्मभागस्थपञ्चम्यष्टमांशा प्रागग्रैकोभयी। तस्याः पुरस्तादात्मभाग एका पञ्चमीपाद्या दक्षिणाग्रा। दक्षिणांश एका शूलपाद्योदग्ग्रा। एवं दशेष्टका रीतिः। तस्या दक्षिणतः प्राच्यौ द्वे रीती। तयोर्मध्ये पञ्च पञ्च तिरश्च्योऽध्यर्धाः। पार्श्वयोश्चतस्रस्तदर्धाः। निर्णामरीत्यग्रे प्रागग्रा प्रत्यक्षट्त्रिंशदङ्गुला दीर्घपाद्या। तस्याः पश्चात्पञ्चाध्यर्धा उदगायताः। तासां पश्चादध्यर्धासंगतषट्त्रिंशत्पार्श्वौ बाह्यपश्चिमोत्तरदीर्घकर्णामुदक्स्थारत्निपार्श्वामेकामध्यर्धार्ध्यामुपदध्यात्।[1] निर्णामादौ दक्षिणत उदगग्रा शूलपाद्या। एवमष्टेष्टका रीतिः। तस्या दक्षिणत उत्तरपार्श्ववद्रीतिद्वयम्। पञ्चरीत्यां पश्चिमपक्षाग्रे प्रत्यग्दीर्घपार्श्वा दीर्घपाद्या। तस्या उत्तरतः प्राग्दीर्घपार्श्वा प्रत्यगग्रैका। तस्याः पुरस्तात्प्रत्यक्षट्त्रिंशदङ्गुलोदक्स्थारत्निका प्रागुदग्दीर्घकर्णैकाध्यर्धार्ध्या। एवं पञ्चपत्रेषु। एवमुत्तरः पक्षः। शिरसि नवेष्टकाः। द्विषष्टिरात्मनि। एकविंशतिः पुच्छे। पक्षयोरष्टशतम्। अस्मिन्प्रस्तार एकादश पञ्चम्यः। द्वादश तदर्ध्याः। एकादश तत्पाद्याः। द्वे अष्टम्यौ। एकत्रिंशतिः सपादाः। उभय्योऽष्टौ। सप्तषष्टिरध्यर्धाः। चतुस्त्रिंशदर्ध्याः। अष्टाविंशतिर्दीर्घपाद्याः। षट् शूलपाद्याः।

G. Th.

[1] There seems something wrong in the text; the hypotenuse of the adhyardhárdhyá runs from the west towards the south, not towards the north and we expect therefore: ° पश्चिमदक्षिणदीर्घ ° It is true that the brick might be placed in such a way as to suit the words of the text, but then the śúlapádyá which is mentioned next, would have to be placed to the north, not to the south, of the adhyardhárdhyá and we should have to read: निर्णामादावुत्तरतः

See the Diagram.



Vakrapakshaśyenachit.
II. kind.
II. prastára.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

Digitized by Google

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 118. Benares, March 1st, 1876. Vol. X.

काशिकायाः

॥ पञ्चमाध्यायस्य प्रथमः पादः ॥

पारायणतुरायणचान्द्रायणं वर्त्तयति ॥ ७२ ॥

समर्थविभक्तिरनुवर्त्तते । अर्हतीति निवृत्तम् । पारायणादिभ्यो द्वितीयासमर्थेभ्यो वर्त्तयतीत्यस्मिन्नर्थे ठञ् प्रत्ययो भवति । पारायणं वर्त्तयत्यधीते पारायणिकश्छात्रः । तौरायणिको यजमानः । चान्द्रायणिकस्तपस्वी ॥

संशयमापन्नः ॥ ७३ ॥

संशयशब्दाद्द्वितीयासमर्थादापन्न इत्येतस्मिन्नर्थे ठञ् प्रत्ययो भवति । संशयमापन्नः प्राप्तः सांशयिकः स्थाणुः ॥

योजनं गच्छति ॥ ७४ ॥

योजनशब्दाद्द्वितीयासमर्थाद्गच्छतीत्यस्मिन्नर्थे ठञ् प्रत्ययो भवति । योजनं गच्छति यौजनिकः ॥ क्रोशशतयोजनशतयोरुपसंख्यानम् ॥ * ॥ क्रोशशतं गच्छति क्रौशशतिकः । यौजनशतिकः ॥ ततोऽभिगमनमर्हतीति च क्रोशशतयोजनशतयोरुपसंख्यानम् ॥ * ॥ क्रोशशतादभिगमनमर्हति, क्रौशशतिको भिक्षुः । यौजनशतिक आचार्यः ॥

पथः ष्कन् ॥ ७५ ॥

पथिन्शब्दाद् द्वितीयासमर्थाद्गच्छतीत्यस्मिन्नर्थे ष्कन्प्रत्ययो भवति । नकारः स्वरार्थः । षकारो ङीषर्थः । पन्थानं गच्छति पथिकः । पथिकी ॥

पन्थो ण नित्यम् ॥ ७६ ॥

नित्यग्रहणं प्रत्ययार्थविशेषणम् । पथः पन्थ इत्ययमादेशो भवति णश्च प्रत्ययो नित्यं गच्छतीत्यस्मिन्विषये । पन्थानं नित्यं गच्छति, पान्थो भिक्षां याचते । नित्यमिति किम् । पथिकः ॥

उत्तरपथेनाहृतं च ॥ ७७ ॥

निर्देशादेव समर्थविभक्तिः । उत्तरपथशब्दात्तृतीयासमर्थादाहृतमित्येतस्मिन्विषये ठञ् प्रत्ययो भवति । चकारः प्रत्ययार्थसमुच्चये, गच्छतीति च । अत्रापि तृतीयैव समर्थविभक्तिः । उत्तरपथेनाहृत,मौत्तरपथिकम् । उत्तरपथेन गच्छति, औत्तरपथिकः ॥ आहृतप्रकरणे वारिजङ्गलस्थलकान्तारपूर्वपदादुपसंख्यानम् ॥ * ॥ वारिपथेनाहृतं, वारिपथिकम् । वारिपथेन गच्छति, वारिपथिकः । जङ्गलपथेनाहृतं, जाङ्गलपथिकम् । जङ्गलपथेन गच्छति, जाङ्गलपथिकः । स्थलपथेनाहृतं, स्थालपथिकम् । स्थलपथेन गच्छति, स्थालपथिकः । कान्तारपथेनाहृतं, कान्तारपथिकम् । कान्तारपथेन गच्छति, कान्तारपथिकः ॥ अजपथशङ्कुपथाभ्यां चोपसंख्यानम् ॥ * ॥ अजपथेनाहृतं,गच्छति वा, आजपथिकः । शङ्कुपथेनाहृतं, गच्छति वा, शाङ्कुपथिकः ॥ मधुकमरिचयोरण् स्थलात् ॥ * ॥ स्थलपथेनाहृतं स्थालपथं मधुकम् । स्थालपथं मरिचम् ॥

कालात् ॥ ७८ ॥

कालादित्यधिकारः । यदित ऊर्ध्वमनुक्रमिष्यामः कालादित्येवं तद्वेदितव्यम् । वक्ष्यति । तेन निर्वृत्तम् । मासेन निर्वृत्तं, मासिकम् । आर्द्धमासिकम् । सांवत्सरिकम् । कालादित्यधिकारो व्युष्टादिभ्योऽणिति यावत् ॥

तेन निर्वृत्तम् ॥ ७९ ॥

तेनेति तृतीयासमर्थात्कालवाचिनः प्रातिपदिकान्निर्वृत्तमित्यस्मिन्नर्थे ठञ् प्रत्ययो भवति । अह्ना निर्वृत्त,माह्निकम् । आर्द्धमासिकम् । सांवत्सरिकम् ॥

तमधीष्टो भृतो भूतो भावी ॥ ८० ॥

तमिति द्वितीयासमर्थात्कालवाचिनः प्रातिपदिकादधीष्टो भृतो भूतो वा भावीत्यस्मिन्नर्थे यथाविहितं प्रत्ययो भवति । अधीष्टः सत्कृत्य व्यापारितः । भृतो वेतनेन क्रीतः । भूतः स्वसत्तया व्याप्तकालः । भावी तादृश एवानागतः । कालाध्वनोरिति द्वितीया । मासमधीष्टो, मासिको ऽध्यापकः । मासं भृतो मासिकः कर्मकरः । मासं भूतो, मासिको व्याधिः । मासं भावी, मासिक उत्सवः । ननु चाध्येषणं भरणं च मुहूर्त्ते क्रियते तेन कथं मासो व्याप्यते । अध्येषणाभरणे क्रियार्थे, तत्र फलभूतया क्रियया मासो व्याप्यमानस्ताभ्यामेव व्याप्त इत्युच्यते ॥

मासाद्वयसि यत्खञौ ॥ ८१ ॥

मासशब्दाद्वयस्यभिधेये यत्खञौ प्रत्ययौ भवतः । ठञो ऽपवादौ । अधीष्टादीनां चतुर्णामधिकारेऽपि सामर्थ्याद्भूत इत्येतदभिसंबध्यते । मासं भूतो, मास्यो, मासीनः । वयसीति किम् । मासिकम् ॥

द्विगोर्यप् ॥ ८२ ॥

मासाद्वयसीति वर्त्तते । मासान्ताद् द्विगोर्यप् प्रत्ययो भवति वयस्यभिधेये । द्वौ मासौ भूतः, द्विमास्यः । त्रिमास्यः ॥

षण्मासाण्ण्यच्च ॥ ८३ ॥

वयसीत्येव । षण्मासशब्दाद्वयस्यभिधेये ण्यत् प्रत्ययो भवति, यप् च । औत्सर्गिकष्ठञपीष्यते, स चकारेण समुच्चेतव्यः । स्वरितत्वाच्चानन्तरो ऽनुवर्त्तिष्यते । तेन त्रैरूप्यं भवति । षाण्मास्यः । षण्मास्यः । षाण्मासिकः ॥

अवयसि ठंश्च ॥ ८४ ॥

षण्मासशब्दादवयस्यभिधेये ठन् प्रत्ययो भवति । चकारेणानन्तरण्यस्य समुच्चयः क्रियते * । षण्मासिको रोगः । षाण्मास्यः ॥

समायाः खः ॥ ८५ ॥

अधीष्टादयश्चत्वारो ऽर्था अनुवर्त्तन्ते । समाशब्दाद् द्वितीयासमर्थाद् अधीष्टादिष्वर्थेषु खः प्रत्ययो भवति । ठञोऽपवादः । समामधीष्टो भृतो भूतो भावी वा, समीनः । केचित्तु तेन निर्वृत्तमिति सर्वेत्रानुवर्त्तयन्ति । समया निर्वृत्तः, समीनः ॥

* चकारो ऽनन्तरस्य ण्यतः समुच्चयार्थः । पा० २ ।

द्विगोर्वा ॥ ८६ ॥

समायाः ख इत्येव । समाशब्दान्ताद् द्विगोर्निर्वृत्तादिष्वर्थेषु पञ्चसु वा खः प्रत्ययो भवति । पूर्वेण नित्यः प्राप्तो विकल्प्यते । प्राग्वतेः संख्यापूर्वपदानां तदन्तग्रहणमलुकीति प्राप्तिरस्त्येव । खेन मुक्ते पक्षे ठञपि भवति । द्विसमीनः । द्वैसमिकः । त्रिसमीनः । त्रैसमिकः ॥

राज्यहस्संवत्सराच्च ॥ ८७ ॥

*रात्रि अहः संवत्सर इत्येवमन्ताद् द्विगोर्निर्वृत्तादिष्वर्थेषु वा खः प्रत्ययो भवति । खेन मुक्ते पक्षे ठञपि भवति । द्विरात्रीणः । द्वैरात्रिकः । त्रिरात्रीणः । त्रैरात्रिकः । द्व्यहीनो, द्वैयह्निकः । त्र्यहीणः । त्रैयह्निकः । द्विसंवत्सरीणः । द्विसांवत्सरिकः । त्रिसंवत्सरीणः । त्रिसांवत्सरिकः । संख्यायाः संवत्सरसंख्यस्य चेत्युत्तरपदवृद्धिः ॥

वर्षाल्लुक् च ॥ ८८ ॥

द्विगोरित्येव । वर्षान्ताद् द्विगोर्निर्वृत्तादिष्वर्थेषु वा खः प्रत्ययो भवति । पक्षे ठञ् । तयोश्च वा लुग्भवति । एवं त्रीणि रूपाणि भवन्ति । द्विवर्षीणो व्याधिः । द्विवार्षिकः । द्विवर्षः । त्रिवर्षीणः । त्रिवार्षिकः । त्रिवर्षः । वर्षस्याभविष्यतीत्युत्तरपदवृद्धिः । भाविनि तु त्रैवर्षिकः ॥

चित्तवति नित्यम् ॥ ८९ ॥

चित्तवति प्रत्ययार्थे ऽभिधेये वर्षशब्दान्ताद् द्विगोर्निर्वृत्तादिष्वर्थेषूत्पन्नस्य प्रत्ययस्य † नित्यं लुग्भवति । पूर्वेण विकल्पे प्राप्ते वचनम् । द्विवर्षो दारकः । चित्तवतीति किम् । द्विवर्षीणो व्याधिः ॥

षष्टिकाः षष्टिरात्रेण पच्यन्ते ॥ ९० ॥

षष्टिकशब्दो निपात्यते, बहुवचनमतन्त्रम् । षष्टिरात्रशब्दात्तृतीयासमर्थात्कन् प्रत्ययो निपात्यते पच्यन्त इत्येतस्मिन्नर्थे, रात्रिशब्दस्य च लोपः । षष्टिरात्रेण पच्यन्ते षष्टिकाः । संज्ञैषा धान्यविशेषस्य । तेन मुद्गादिष्वतिप्रसङ्गो न भवति ॥

वत्सरान्ताच्छश्छन्दसि ॥ ९१ ॥

वत्सरान्तात्प्रातिपदिकान्निर्वृत्तादिष्वर्थेषु छन्दसि विषये छः प्रत्ययो भवति । ठञोऽपवादः । इद्वत्सरीयः । इदावत्सरीयः ॥

संपरिपूर्वात्ख च ॥ ९२ ॥

संपरिपूर्वाद्वत्सरान्तात्प्रातिपदिकाच्छन्दसि विषये निर्वृत्तादिष्वर्थेषु खः प्रत्ययो भवति, चकाराच्छश्च । संवत्सरीणः । परिवत्सरीणः । संवत्सरीयः । परिवत्सरीयः ॥

* द्विगोरित्येवेत्यधिकं बहुषु पुस्तकेषु ।

† निर्वृत्तादिष्वर्थेषूत्पन्नस्य प्रत्ययस्येति बहुषु पुस्तकेषु नास्ति ।

Digitized by Google

तेन परिजय्यलभ्यकार्यसुकरम् ॥ ९३ ॥

तेनेति तृतीयासमर्थात्कालवाचिनः प्रातिपदिकात्परिजय्य लभ्य कार्य्य सुकर इत्येतेष्वर्थेषु ठञ् प्रत्ययो भवति । मासेन परिजय्यः, शक्यते जेतुं, मासिको व्याधिः । सांवत्सरिकः । मासेन लभ्यः, मासिकः पटः । मासेन कार्यं, मासिकं चान्द्रायणम् । मासेन सुकरो, मासिकः प्रासादः ॥

तदस्य ब्रह्मचर्यम् ॥ ९४ ॥

तदिति द्वितीया समर्थविभक्तिः । सा चात्यन्तसंयोगे । अस्येति प्रत्ययार्थः । ब्रह्मचर्यमिति द्वाभ्यामपि संबध्यते । कालस्य व्यापकं, प्रत्ययार्थस्य च स्वमिति । तदिति द्वितीयासमर्थात्कालवाचिनः प्रातिपदिकादस्येति षष्ठ्यर्थे ठञ् प्रत्ययो भवति ब्रह्मचर्य्यं चेद्गम्यते । मासं ब्रह्मचर्यमस्य, मासिको ब्रह्मचारी । आर्द्धमासिकः । सांवत्सरिकः । अपरा वृत्तिः । तदिति प्रथमासमर्थादस्येति षष्ठ्यर्थे ठञ् प्रत्ययो भवति, यत्तदस्येति निर्दिष्टं ब्रह्मचर्यं चेद्भवति । मासोऽस्य ब्रह्मचर्यस्य मासिकं ब्रह्मचर्यम् । आर्द्धमासिकम् । सांवत्सरिकम् । पूर्वत्र ब्रह्मचारी प्रत्ययार्थं, उत्तरत्र ब्रह्मचर्यमेव । उभयमपि प्रमाणमुभयथा सूत्रप्रणयनात् ॥ महानाम्न्यादिभ्यः षष्ठीसमर्थेभ्य उपसंख्यानम् ॥ * ॥ माहानामिकम् । गौदानिकम् । आदित्यव्रतिकम् ॥ तच्चरतीति च ॥ * ॥ * महानाम्न्य ऋचः, तत्सहचरितं व्रतं तच्छब्देनोच्यते । महानाम्नीश्चरति माहानामिकः । आदित्यव्रतिको, गौदानिकः । भस्याढ इति पुंवद्भावेन ङीपि निवृत्ते नस्तद्धित इति टिलोपः † ॥ अवान्तरदीक्षादिभ्यो डिनिर्वक्तव्यः ॥ * ॥ अवान्तरदीक्षां चरति, अवान्तरदीक्षी । तिलव्रती ॥ अष्टाचत्वारिंशतो ड्वुंश्च डिनिश्च वक्तव्यः ॥ * ॥ अष्टाचत्वारिंशद्वर्षाणि व्रतं चरति, अष्टाचत्वारिंशकः । अष्टाचत्वारिंशी ॥ चातुर्मास्यानां यलोपश्च ड्वुंश्च डिनिश्च वक्तव्यः ॥ * ॥ चातुर्मास्यानि चरति, चातुर्मासकः । चातुर्मासी ॥ चतुर्मासाद् ण्यो यज्ञे ॥ * ॥ तत्र भवे । चतुर्षु मासेषु भवानि, चातुर्मास्यानि ॥ संज्ञायामण्वक्तव्यः ॥ * ॥ चतुर्षु मासेषु भवा, चातुर्मासी पौर्णमासी । आषाढी । कार्त्तिकी । फाल्गुनी ॥

तस्य च दक्षिणा यज्ञाख्येभ्यः ॥ ९५ ॥

तस्येति षष्ठीसमर्थेभ्यो यज्ञाख्येभ्यो दक्षिणेत्येतस्मिन्नर्थे ठञ् प्रत्ययो भवति । अग्निष्टोमस्य दक्षिणा, आग्निष्टोमिकी । वाजपेयिकी । राजसूयिकी । आख्याग्रहणमकालादपि यज्ञवाचिनो यथा स्यादिति । इतरथा हि कालाधिकारादेकाहद्वादशाहप्रभृतय एव यज्ञा गृह्येरन् । प्राग्वतेः संख्यापूर्वपदानां तदन्तग्रहणमलुकीति कालाधिकारेऽपि द्वादशाहादिष्वस्ति प्राप्तिः ॥

तत्र च दीयते कार्यं भववत् ॥ ९६ ॥

तत्रेति सप्तमीसमर्थात्कालवाचिनः प्रातिपदिकाद्दीयते कार्यमित्येतयोरर्थयोर्भववत्प्रत्ययो भवति । यथा । मासे भवं, मासिकम् । सांवत्सरिकम् । प्रावृषेण्यम् । वासन्तिकम् । वासन्तम् । हैमनम् । हैमन्तम् । हैमन्तिकम् । शारदम् । वतिः सर्वसादृश्यार्थः । योगविभागश्चात्र कर्त्तव्यः । तत्र च दीयते, यज्ञाख्येभ्य इति । आग्निष्टोमिकं भक्तम् । राजसूयिकम् । वाजपेयिकम् । कालाधिकारस्य पूर्णो ऽवधिः ॥ अतः परं सामान्येन प्रत्ययविधानम् ॥

व्युष्टादिभ्यो ऽण् ॥ ९७ ॥

तत्रेति सप्तमीसमर्थेभ्यो व्युष्टादिभ्यो दीयते कार्यमित्येतयोरण् प्रत्ययो भवति । व्युष्टे दीयते कार्यं वा, वैयुष्टम् । नैत्यम् ॥ अण्प्रकरणे ऽग्निपदादिभ्य उपसंख्यानम् ॥ * ॥ * अत्रैव ते पठितव्याः । व्युष्ट । नित्य । निष्क्रमण । प्रवेशन । तीर्थ । संभ्रम । आस्तरण । संग्राम । संघात । अग्निपद । पीलुमूल । प्रवास । उपसंक्रमण । † व्युष्टादिः ॥

तेन यथाकथाचहस्ताभ्यां णयतौ ॥ ९८ ॥

दीयते कार्यमिति वर्त्तते । तेनेति तृतीयासमर्थाभ्यां यथाकथाचहस्तशब्दाभ्यां यथासंख्यं णयतौ प्रत्ययौ भवतः । दीयते कार्यमित्येतयोरर्थयोः प्रत्येकमभिसंबन्धो, यथासंख्यं नेष्यते । यथाकथाचशब्दो ऽव्ययसमुदायो ऽनादरे वर्त्तते । तृतीयार्थमात्रं चात्र संभवति, न तु तृतीया समर्थविभक्तिः । यथाकथाच दीयते कार्यं वा, याथाकथाचम् । हस्तेन दीयते कार्यं वा, हस्त्यम् ॥

संपादिनि ॥ ९९ ॥

तेनेत्येव । तृतीयासमर्थात्संपादिन्यभिधेये ठञ् प्रत्ययो भवति । गुणोत्कर्षः संपत्तिः । आवश्यके णिनिः । कर्णवेष्टकाभ्यां संपादि मुखं, कार्णवेष्टकिकं मुखम् । वास्त्रयुगिकं शरीरम् । वस्त्रयुगेन विशेषतः शोभत इत्यर्थः ॥

कर्मवेषाद्यत् ॥ १०० ॥

कर्मवेषशब्दाभ्यां तृतीयासमर्थाभ्यां यत्प्रत्ययो भवति संपादिनीत्येतस्मिन्विषये । ठञोऽपवादः । कर्मणा संपद्यते, कर्मण्यं शरीरम् । वेषेण संपद्यते, वेष्यो नटः ॥

---

* तच्चरतीति महानाम्न्यादिभ्य उपसंख्यानम् । पा० २ ।

† भस्याढ इति पुंवद्भावेन ङीपि निवृत्ते नस्तद्धित इति टिलोप इत्यधिकमत्र । परं त्वयमपपाठः । पदमञ्जर्यां दर्शनात् ।

* उपसंख्यानमित्यस्याग्रे आग्निपदम् । पैलुमूलम् । किं वक्तव्यम् । न वक्तव्यमित्यधिकं बहुषु पुस्तकेषु ।

† दीर्घ । उपवास । इत्येतौ शब्दावत्र गणे ऽधिकौ कुत्र चित् ।

तस्मै प्रभवति संतापादिभ्यः ॥ १०१ ॥

तस्मादिति चतुर्थीसमर्थेभ्यः संतापादिभ्यः प्रभवतीत्यस्मिन्विषये ठञ् प्रत्ययो भवति । समर्थः शक्तः प्रभवतीत्युच्यते । अलमर्थे चतुर्थी । संतापाय प्रभवति, सांतापिकः । सान्नाहिकः । संताप । संनाह । संग्राम । संयोग । संपराय । संपेष । निष्पेष । निसर्ग । अपसर्ग । विसर्ग । उपसर्ग । उपवास । प्रवास । संघात । संमोदन । सक्तु ॥ मांसौदनाद्विगृहीतादपि * ॥

योगाद्यच्च ॥ १०२ ॥

योगशब्दाद्यत्प्रत्ययो भवति, चकाराद् ठञ्, तस्मै प्रभवतीत्यस्मिन्विषये । योगाय प्रभवति, योग्यः । यौगिकः ॥

कर्मण उकञ् ॥ १०३ ॥

कर्मशब्दादुकञ् प्रत्ययो भवति तस्मै प्रभवतीत्येतस्मिन्नर्थे । ठञोऽपवादः । कर्मणे प्रभवति, कार्मुकं धनुः । धनुषोऽन्यत्र न भवति, अनभिधानात् † ॥

समयस्तदस्य प्राप्तम् ॥ १०४ ॥

समयशब्दात् तदिति प्रथमासमर्थाद् अस्येति षष्ठ्यर्थे ठञ् प्रत्ययो भवति यत्तत्प्रथमासमर्थं प्राप्तं चेद्भवति । समयः प्राप्तोऽस्य, सामयिकं कार्यम् । उपनतकालमित्यर्थः । समर्थविभक्तिनिर्देश उत्तरार्थः ॥

ऋतोरण् ॥ १०५ ॥

तदस्य प्राप्तमित्यनुवर्त्तते । ऋतुशब्दात्तदिति प्रथमासमर्थाद् अस्येति षष्ठ्यर्थे ऽण् प्रत्ययो भवति तदस्य प्राप्तमित्येतस्मिन् विषये ‡ । ऋतुः प्राप्तोऽस्य, आर्त्तवं पुष्पम् ॥ तदस्य प्रकरणे उपवस्त्रादिभ्य उपसंख्यानम् ॥ * ॥ उपवस्ता प्राप्तोऽस्य औपवस्त्रम् । प्राशिता प्राप्तोऽस्य प्राशित्रम् ॥

छन्दसि घस् ॥ १०६ ॥

ऋतुशब्दाच्छन्दसि विषये घस् प्रत्ययो भवति तदस्य प्राप्तमित्यस्मिन्विषये । अणोऽपवादः । अयं ते योनिर्ऋत्वियः ॥

कालाद्यत् ॥ १०७ ॥

कालशब्दाद्यत्प्रत्ययो भवति तदस्य प्राप्तमित्यस्मिन्विषये । कालः प्राप्तोऽस्य काल्यस्तापः । काल्यं शीतम् § ॥

* निर्घोष । सर्ग । संपात । संवाद । संवेशन । इत्येते शब्दा अत्र गणेऽधिका बहुषु पुस्तकेषु । तत्रैकस्मिन्पुस्तके संवेशनेत्यत्र संवेशेति पा० २ ।

† धनुषोऽन्येत्यारभ्य अनभिधानादित्यन्तो ग्रन्थो बहुषु पुस्तकेषु नास्ति । अपपाठः, पदमञ्जर्यां दर्शनात् ।

‡ ऋतुशब्दात्प्रथमासमर्थात्प्राप्तोपाधिकादस्येति षष्ठ्यर्थे अण् प्रत्ययो भवति । पा॰ २ अयमेव च पाठो युक्तः ।

§ शीतम् । पा॰ २ ।

प्रकृष्टे ठञ् ॥ १०८ ॥

कालादित्येव,तदस्येति च । प्राप्तमिति निवृत्तम् । प्रकर्षेण कालो विशेष्यते । प्रकर्षे वर्तमानात्कालात्प्रथमासमर्थादस्येति षष्ठ्यर्थे ठञ् प्रत्ययो भवति । प्रकृष्टो दीर्घः कालोऽस्य, कालिकमृणम् । कालिकं वैरम् । ठञ्ग्रहणं विस्पष्टार्थम् ॥

प्रयोजनम् ॥ १०९ ॥

तदस्येत्येव । तदिति प्रथमासमर्थादस्येति षष्ठ्यर्थे ठञ् प्रत्ययो भवति यत्तत्प्रथमासमर्थं प्रयोजनं चेत्तद्भवति । इन्द्रमहः प्रयोजनमस्य, ऐन्द्रमहिकम् । गाङ्गामहिकम् ॥

विशाखाषाढादण्मन्थदण्डयोः ॥ ११० ॥

विशाखाषाढाशब्दाभ्यामण् प्रत्ययो भवति तदस्य प्रयोजनमित्येतस्मिन्विषये यथासंख्यं मन्थदण्डयोरभिधेययोः । विशाखा प्रयोजनमस्य, वैशाखो मन्थः । आषाढो दण्डः ॥ चूडादिभ्य उपसंख्यानम् ॥ * ॥ चूडा प्रयोजनमस्य चौडम् । श्रद्धा प्रयोजनमस्य, श्राद्धम् ॥

अनुप्रवचनादिभ्यश्छः ॥ १११ ॥

अनुप्रवचनादिभ्यः प्रातिपदिकेभ्यश्छः प्रत्ययो भवति तदस्य प्रयोजनमित्यस्मिन्विषये । ठञोऽपवादः । अनुप्रवचनं प्रयोजनमस्य, अनुप्रवचनीयम् । उत्थापनीयम् ॥ विशिपूरिपतिरुहि*प्रकृतेरनात्सपूर्वपदादुपसंख्यानम् ॥ * ॥ गृहप्रवेशनं प्रयोजनमस्य, गृहप्रवेशनीयम् । प्रपापूरणीयम् । अश्वप्रपतनीयम् । प्रासादारोहणीयम् ॥ स्वर्गादिभ्यो यद्वक्तव्यः ॥ * ॥ स्वर्गः प्रयोजनमस्य, स्वर्ग्यम् । यशस्यम् । आयुष्यम् । काम्यम् । धन्यम् ॥ पुण्याहवाचनादिभ्यो लुग्वक्तव्यः ॥ * ॥ पुण्याहवाचनं प्रयोजनमस्य, पुण्याहवाचनम् । स्वस्तिवाचनम् । शान्तिवाचनम् । अनुप्रवचन । उत्थापन । प्रवेशन । अनुप्रवेशन । उपस्थापन । संवेशन । अनुवेशन । अनुवचन । अनुवादन । अनुवासन । आरम्भण । आरोहण । प्ररोहण । अन्वारोहण । अनुप्रवचनादिः ॥

समापनात्सपूर्वपदात् ॥ ११२ ॥

समापनशब्दात्सपूर्वपदाद्विद्यमानपूर्वपदाच्छः प्रत्ययो भवति तदस्य प्रयोजनमित्येतस्मिन्विषये । ठञोऽपवादः । छन्दस्समापनं प्रयोजनमस्य छन्दःसमापनीयम् । व्याकरणसमापनीयम् । पदग्रहणं बहुच्पूर्वनिरासार्थम् ॥

* रुहीत्यस्याग्रे पदीत्यधिकं, प्रपदनीयमित्युदाहरणं चाधिकमेकस्मिन्पुस्तके । परं तु पदमञ्जर्यसंमतस्तस्य पाठः । भाष्यपुस्तकेषु तु विशिपूरिपदीत्येव पाठ उपलभ्यते ।

Digitized by Google

ऐकागारिकट् चौरे ॥ ११३ ॥

ऐकागारिकट् इति निपात्यते चौरेऽभिधेये । एकागारं प्रयोजनमस्य, ऐकागारिकः चौरः । ऐकागारिकी । किमर्थमिदं निपात्यते । यावता प्रयोजनमित्येव सिद्धष्ठञ् । चौरे नियमार्थं वचनम् । इह मा भूत् । एकागारं प्रयोजनमस्य भिक्षोरिति । टकारः कार्यावधारणार्थः । ङीबेव भवति, न ञित्स्वर इति । अपरे पुनरिकट् प्रत्ययं वृद्धिं च निपातयन्ति ॥

आकालिकडाद्यन्तवचने ॥ ११४ ॥

आकालिकड् इति निपात्यते आद्यन्तवचने । समानकालशब्दस्याकालशब्द आदेशः । आद्यन्तयोश्चैतद्विशेषणम् । इकट् प्रत्ययश्च निपात्यते । समानकालावाद्यन्तावस्य, आकालिकः स्तनयित्नुः । आकालिकी विद्युत् । जन्मना तुल्यकालविनाशा । उत्पत्त्यानन्तरं विनाशीत्यर्थः ॥ आकालाट् ठंश्च, ॥ * ॥ चात् ठञ् च । आकालिका विद्युत् । ठञः पूर्णावधिः ॥

तेन तुल्यं क्रिया चेद्वतिः ॥ ११५ ॥

तेनेति तृतीयासमर्थात्तुल्यमित्यर्थे वतिः प्रत्ययो भवति यत्तुल्यं क्रिया चेत्सा भवति । ब्राह्मणेन तुल्यं वर्त्तते, ब्राह्मणवत् । राजवत् । क्रियाग्रहणं किम् । गुणद्रव्य*तुल्ये मा भूत् । पुत्रेण सह स्थूलः । पुत्रेण तुल्यः पिङ्गलः । पुत्रेण तुल्यो गोमान् † ॥

तत्र तस्येव ॥ ११६ ॥

तत्रेति सप्तमीसमर्थात्तस्येति षष्ठीसमर्थाच्च इवार्थे वतिः प्रत्ययो भवति । मथुरायामिव, मथुरावत् स्रुघ्ने प्राकारः ‡ । पाटलिपुत्रवत्साकेते परिखा । षष्ठीसमर्थात् । देवदत्तस्येव देवदत्तवद् यज्ञदत्तस्य गावः । यज्ञदत्तस्येव देवदत्तस्य दन्ताः यज्ञदत्तवत् § ॥

तदर्हम् ॥ ११७ ॥

तदिति द्वितीयासमर्थादर्हमित्येतस्मिन्नर्थे वतिः प्रत्ययो भवति । राजानमर्हति, राजवत्पालनम् । ब्राह्मणवत् । ऋषिवत् । क्षत्रियवत् ॥

उपसर्गाच्छन्दसि धात्वर्थे ॥ ११८ ॥

उपसर्गात्साधने धात्वर्थे वर्त्तमानात्स्वार्थे वतिः प्रत्ययो भवति छन्दसि विषये । यदुद्वतो निवतो यासि बप्सत्, उद्गतानि निगतानि च ॥

* द्रव्येति बहुषु पुस्तकेषु नास्ति ।

† पुत्रेण तुल्यो गोमानिति बहुषु पुस्तकेषु नास्ति ।

‡ प्रासाद इति पा॰ २ ।

§ देवदत्तवद्यज्ञदत्तस्य दन्ता इति पा॰ २ ।

तस्य भावस्त्वतलौ ॥ ११९ ॥

तस्येति षष्ठीसमर्थाद् भाव इत्येतस्मिन्नर्थे त्वतलौ प्रत्ययौ भवतः । भवतोऽस्मादभिधानप्रत्ययाविति भावः । शब्दस्य प्रवृत्तिनिमित्तं भावशब्देनोच्यते । अश्वस्य भावो, ऽश्वत्वम् । अश्वता । गोत्वम् । गोता ॥

आ च त्वात् ॥ १२० ॥

ब्रह्मणस्त्व इति वक्ष्यति । आ एतस्मात्त्वसंशब्दनाद् यानित ऊर्ध्वमनुक्रमिष्याम,स्तत्र त्वतलौ प्रत्ययावधिकृतौ वेदितव्यौ । वक्ष्यति । पृथ्वादिभ्य इमनिज्वेति । प्रथिमा । पार्थवम् । पृथुत्वम् । पृथुता । म्रदिमा । मार्दवम् । मृदुत्वम् । मृदुता । अपवादैः सह समावेशार्थं वचनम् । कर्मणि च विधानार्थं गुणवचनब्राह्मणादिभ्यः कर्मणि चेति । चकारो नञ्स्नञ्भ्यामपि समावेशार्थः । स्त्रियाः भावः, स्त्रैणम् । स्त्रीत्वम् । स्त्रीता । पुंसो भावः, पुंस्त्वम् । पुंस्ता । पौंस्नम् ॥

न नञ्पूर्वात्तत्पुरुषादचतुरसंगतलवणवटबुधकतरसलसेभ्यः ॥ १२१ ॥

इत उत्तरे ये भावप्रत्ययास्ते नञ्पूर्वात्तत्पुरुषान्न भवन्ति चतुरादीन्वर्जयित्वा । वक्ष्यति । पत्यन्तपुरोहितादिभ्यो यगिति । अपतित्वम् । अपतिता । अपटुत्वम् । अपटुता । अरमणीयत्वम् । अरमणीयता । नञ्पूर्वादिति किम् । बार्हस्पत्यम् । प्राजापत्यम् । तत्पुरुषादिति किम् । नास्य पटवः सन्तीत्यपटुः, तस्य भाव आपटवम् । आलघवम् । अचतुरादिभ्य इति किम् । आचतुर्यम् । आसंगत्यम् । आलवण्यम् । आवट्यम् । आबुध्यम् । आकत्यम् । आरस्यम् । आलस्यम् ॥

पृथ्वादिभ्य इमनिज्वा ॥ १२२ ॥

पृथु इत्येवमादिभ्यः प्रातिपदिकेभ्य इमनिच्प्रत्ययो भवति वा तस्य भाव इत्येतस्मिन्नर्थे । वावचनमणादेः समावेशार्थम् । पृथोर्भावः, प्रथिमा । पार्थवम् । म्रदिमा । मार्दवम् । तुरिष्ठेमेयस्सु टेरिति टिलोपः । र ऋतो हलादेर्लघोरिति रेफादेशः * । त्वतलौ सर्वत्र भवत एव । पृथुत्वम् । पृथुता । मृदुत्वम् । मृदुता । पृथु । मृदु । महत् । पटु । तनु । लघु । बहु । साधु । वेणु । आसु । बहुल । गुरु । दण्ड । ऊरु । खण्ड । चण्ड । बाल । अकिंचन । होड । पाक । वत्स । मन्द । स्वादु । ह्रस्व । दीर्घ । प्रिय । वृष । ऋजु । क्षिप्र । क्षुद्र । पृथ्वादिः ॥

वर्णदृढादिभ्यः ष्यञ् च ॥ १२३ ॥

वर्णविशेषवाचिभ्यः प्रातिपदिकेभ्यो दृढादिभ्यश्च ष्यञ् प्रत्ययो भवति, चकारादिमनिच्च, तस्य भाव इत्येतस्मि-

* तुरिष्ठेमेयस्स्वित्यारभ्य रेफादेश इत्यन्तं बहुषु पुस्तकेषु नास्ति ।

Digitized by Google

न्विषये । शुक्लस्य भावः, शौक्ल्यम् । शुक्लिमा । शुक्लत्वम् । शुक्लता । कार्ष्ण्यम् । कृष्णिमा । कृष्णत्वम् । कृष्णता । दृढादिभ्यः । दार्ढ्यम् । द्रढिमा । दृढत्वम् । दृढता । चकारो ङीषर्थः । औचिती । याथाकामी । दृढ । परिवृढ । भृश । कृश । वक्र । आम्र । लवण । ताम्र । अम्ल । शीत । उष्ण । जड । बधिर । पण्डित । मधुर । मूर्ख । मूक । वेर्यातलाभमतिमनः शारदानाम् ॥ समोमतिमनसोर्जवने * † ॥

गुणवचनब्राह्मणादिभ्यः कर्मणि च ॥ १२४ ॥

गुणमुक्तवन्तो गुणवचनाः । गुणवचनेभ्यो ब्राह्मणादिभ्यश्च तस्येति षष्ठीसमर्थेभ्यः कर्मण्यभिधेये ष्यञ्प्रत्ययो भवति । चकाराद् भावे च । कर्मशब्दः क्रियावचनः । जडस्य भावः कर्म वा, जाड्यम् । ब्राह्मणादिभ्यः खल्वपि । ब्राह्मण्यम् । माणव्यम् । आ पादपरिसमाप्तेर्भावकर्माधिकारः । ब्राह्मणादिराकृतिगणः । आदिशब्दः प्रकारवचनः ॥ चातुर्वर्ण्यादीनां स्वार्थउपसंख्यानम् ॥ * ॥ चत्वार एव वर्णाश्चातुर्वर्ण्यम् । चातुराश्रम्यम् । त्रैलोक्यम् । त्रैस्वर्यम् । षाड्गुण्यम् । सैन्यम् । सान्निध्यम् । सामीप्यम् । औपम्यम् । सौख्यम् । ब्राह्मण । वाडव । माणव । चोर । मूक । आराधय । विराधय । अपराधय । उपराधय । एकभाव । द्विभाव । त्रिभाव । अन्यभाव । समस्थ । विषमस्थ । परमस्थ । मध्यमस्थ । अनीश्वर । कुशल । कपि । चपल । क्षेत्रज्ञ । निपुण ॥ अर्हतो नुम् च ॥ आर्हन्त्यम् । संवादिन् । संवेशिन् । बहुभाषिन् । बालिश । दुष्पुरुष । कापुरुष । दायाद । विशसि । धूर्त्त । राजन् । संभाषिन् । शीर्षपातिन् । अधिपति । अलस । पिशाच । पिशुन । विशाल । गणपति । धनपति । नरपति । गडुल । निव । निधान । विष ॥ सर्ववेदादिभ्यः स्वार्थे ॥ चतुर्वेदस्योभयपदवृद्धिश्च ॥ चातुर्वैद्यम् ‡ ॥

स्तेनाद्यन्नलोपश्च ॥ १२५ ॥

स्तेनशब्दात्षष्ठीसमर्थाद्भावकर्मणोर्यत्प्रत्ययो भवति नशब्दस्य लोपश्च भवति । स्तेनस्य भावः कर्म वा, स्तेयम् ।

* जवन इति बहुषु पुस्तकेषु न दृश्यते ।

† बाल । तरुण । मन्द । स्थिर । बहुल । दीर्घ । मूढ । आकृष्ट । इत्येते शब्दा अत्र गणे ऽधिकाः ।

‡ स्वभाव । निघातिन् । विघातिन् । राजपुरुष । विशस्ति । विशाय । विशात । विजात । नयात । सुहित । दीन । विदग्ध । उचित । समय । शील । तत्पर । इदंपर । यथातथा । पुरस् । पुनःपुनर् । अभीक्ष्ण । तरतम । प्रकाम । यथाकाम । निष्कुल । स्वराज । महाराज । युवराज । सम्राज् । अविदूर । अपिशुन । अनृशंस । अयथातथ । अयथापुर । स्वधर्म । अनुकूल । परिमण्डल । विश्वरूप । ऋत्विज् । उदासीन । ईश्वर । प्रतिभू । साक्षि । मानुष । आस्तिक । नास्तिक । युगपत् । पूर्वापर । उत्तराधर । एते शब्दा अत्र गणे ऽधिकाः पुस्तकान्तरे ।

स्तेनादिति केचिद् योगविभागं कुर्वन्ति । स्तेनात्ष्यञ्भवति । स्तैन्यम् । ततो यन्नलोपश्च, स्तेयम् ॥

सख्युर्यः ॥ १२६ ॥

सखिशब्दाद् यः प्रत्ययो भवति भावकर्मणोरर्थयोः । सख्युर्भावः कर्म वा सख्यम् ॥ दूतवणिग्भ्यां चेति वक्तव्यम् ॥ * ॥ दूत्यम् । वणिज्यम् । कथं वाणिज्यम् । ब्राह्मणादित्वात् ॥

कपिज्ञात्योर्ढक् ॥ १२७ ॥

कपिज्ञातिशब्दाभ्यां ढक् प्रत्ययो भवति भावकर्मणोरर्थयोः । कपेर्भावः कर्म वा, कापेयम् । ज्ञातेयम् । यथासंख्यमर्थयोः सर्वत्रैवात्र प्रकरणे नेष्यते ॥

पत्यन्तपुरोहितादिभ्यो यक् ॥ १२८ ॥

पत्यन्तात्प्रातिपदिकात्पुरोहितादिभ्यश्च यक् प्रत्ययो भवति भावकर्मणोरर्थयोः । सेनापतेर्भावः कर्म वा, सैनापत्यम् । गार्हपत्यम् । प्राजापत्यम् । पौरोहित्यम् । राज्यम् । पुरोहित । राजन् । संग्रामिक । एषिक । वर्मित । खण्डिक । दण्डिक । छत्रिक । मिलिक । पिण्डिक । बाल । मन्द । स्तनिक । चूडितिक । कृषिक । पूतिक । पत्रिक । प्रतिक । अञ्जानिक । सलनिक । सूचिक । राक्षर । सूचक । पत्तिक । सारथिक । जलिक । सूतिक । अञ्जलिक । सूचक * ॥

प्राणभृज्जातिवयोवचनोद्गात्रादिभ्यो ऽञ् ॥ १२९ ॥

प्राणभृज्जातिवाचिभ्यः प्रातिपदिकेभ्यो वयोवचनेभ्य उद्गात्रादिभ्यश्चाञ् प्रत्ययो भवति भावकर्मणोरर्थयोः । अश्वस्य भावः कर्म वा आश्वम् । औष्ट्रम् । वयोवचनेभ्यः । कौमारम् । कैशोरम् । उद्गात्रादिभ्यः । औद्गात्रम् । औन्नेत्रम् । उद्गातृ । उन्नेतृ । प्रतिहर्तृ । रथगणक । पक्षिगणक † । सुष्ठु । दुष्ठु । अध्वर्यु । वधू ॥ सुभगमन्त्रे ‡ ॥

हायनान्तयुवादिभ्यो ऽण् ॥ १३० ॥

हायनान्तेभ्यः प्रातिपदिकेभ्यः युवादिभ्यश्चाण् प्रत्ययो भवति भावकर्मणोरर्थयोः । द्विहायनस्य भावः कर्म वा, द्वैहायनम् । त्रैहायनम् । युवादिभ्यः । यौवनम् । स्थाविरम् ॥ श्रोत्रियस्य यलोपश्च वाच्यः ॥ * ॥ श्रोत्रियस्य भावः कर्म वा श्रौत्रम् । युवन् । स्थविर । होतृ । यजमान । कमण्डलु ॥ पुरुषासे ॥ सुहृत् । यातृ । श्रवण । कुस्त्री । सुस्त्री । सुहृदय । सुभ्रातृ । वृषल । दुर्भ्रातृ ॥ हृदयासे ॥ क्षेत्रज्ञ । कुतक ।

* धार्मिक । चार्मिक । कार्मिक । शौलिक । मूलिक । तिलिका । तिर्यिक । अञ्जतिका । ऋषिक । पुत्रक । पथिका । प्रचिक । प्रविक । परिखक । पूजनिक ॥ राजासे ॥ मूषिक । स्वरिक । चूडिक । एते शब्दा अत्र गणे पुस्तकान्तरे ऽधिकाः ।

† पक्षिगणक । पा० २ ।

‡ प्रशास्तृ । होतृ । पोतृ । कर्तृ । एते ऽत्र गणे ऽधिकाः कुत्र चित् ।

Digitized by Google

परिव्राजक । कुशल । चपल । निपुण । पिशुन । सब्रह्मचारिन् । कुतूहल । अनृशंस । युवादिः * ॥

इगन्ताच्च लघुपूर्वात् ॥ १३१ ॥

इगन्ताच्च लघुपूर्वादण् प्रत्ययो भवति भावकर्मणोः । लघुपूर्वग्रहणेन प्रातिपदिकसमुदायो विशेष्यते । लघुः पूर्वो ऽवयवो ऽस्येति लघुपूर्वः । कुतः पुनरसौ लघुः पूर्वः । इक्संनिधानादिक इति विज्ञायते । लघुः पूर्वो यस्मादिकः तदन्तात्प्रातिपदिकादित्ययमर्थो विवक्षितः । अपरे तत्पुरुषकर्मधारयं वर्णयन्ति । इक्चासावन्तश्चेतीगन्तः । लघुपूर्वग्रहणेन स एव विशेष्यते । पश्चात्तेन प्रातिपदिकस्य तदन्तविधिरिति । अस्मिन्व्याख्याने ऽन्तग्रहणमतिरिच्यते । लघुपूर्वादिक इत्येतावदेव वाच्यं स्यात् । शुचेर्भावः कर्म वा शौचम् । मौनम् । नागरम् । हारीतकम् । पाटवम् । लाघवम् । इगन्तादिति किम् । पटुत्वम् । लघुत्वम् । लघुपूर्वादिति किम् । कण्डूत्वम् । पाण्डुत्वम् । कथं काव्यमिति । ब्राह्मणादिषु कविशब्दो द्रष्टव्यः ॥

योपधाद्गुरूपोत्तमाद्वुञ् ॥ १३२ ॥

त्रिप्रभृतीनामन्त्यस्य समीपमुपोत्तमम् । गुरुरुपोत्तमं यस्य तद्गुरूपोत्तमम् । यकारोपधाद्गुरूपोत्तमाद्वुञ् प्रत्ययो भवति भावकर्मणोः । रमणीयस्य भावः कर्म वा, रामणीयकम् । वासनीयकम् । योपधादिति किम् । विमानत्वम् † । गुरूपोत्तमादिति किम् । क्षत्रियत्वम् ॥ सहायाद्वेति वक्तव्यम् ॥ * ॥ साहायकम् । साहाय्यम् ॥

द्वन्द्वमनोज्ञादिभ्यश्च ॥ १३३ ॥

द्वन्द्वसंज्ञकेभ्यो मनोज्ञादिभ्यश्च वुञ् प्रत्ययो भवति भावकर्मणोः । गोपालपशुपालानां भावः कर्म वा, गोपालपशुपालिका । शैष्योपाध्यायिका । कौत्सकुशिकिका । मनोज्ञादिभ्यः । मानोज्ञकम् । काल्याणकम् । मनोज्ञ । कल्याण । प्रियरूप । छान्दस । छात्र । मेधाविन् । अभिरूप । आढ्य । कुलपुत्र । श्रोत्रिय । चोर । धूर्त्त । वैश्वदेव । युवन् । ग्रामपुत्र । ग्रामखण्ड । ग्रामकुमार ॥ अमुष्यपुत्र । अमुष्यकुल । शतपुत्र । कुशल । मनोज्ञादिः ‡ ॥

गोत्रचरणाच्छ्लाघात्याकारतदवेतेषु ॥ १३४ ॥

गोत्रवाचिनश्चरणवाचिनश्च प्रातिपदिकाद् वुञ् प्रत्ययो भवति प्रत्येकं भावकर्मणोरर्थयोः, श्लाघादिषु विषयभूतेषु । तत्र श्लाघा विकत्थनम् । अत्याकारः पराधिक्षेपः, तदवेतस्तत्प्राप्तस्तज्ज्ञो वा । तदिति गोत्रचरणयोर्भावकर्मणी निर्दिश्येते । तत्प्राप्तस्तदवगतवान् तदवेत इत्युच्यते । श्लाघायां तावत् । गार्गिकया श्लाघते । काठिकया श्लाघते । गार्ग्यत्वेन कठत्वेन विकत्थत इत्यर्थः । अत्याकारे । गार्गिकयात्याकुरुते । काठिकयात्याकुरुते । गार्ग्यत्वेन कठत्वेन परानधिक्षिपतीत्यर्थः । तदवेतः । गार्गिकामवेतः । काठिकामवेतः । गार्ग्यत्वं कठत्वं च प्राप्त इत्यर्थः । तद्वा ऽवगतवानित्यर्थः । श्लाघादिष्विति किम् । गार्ग्यत्वम् । कठत्वम् ॥

होत्राभ्यश्छः ॥ १३५ ॥

होत्राशब्द ऋत्विग्विशेषवचनः । ऋत्विग्विशेषवाचिभ्यश्छः प्रत्ययो भवति भावकर्मणोः । अच्छावाकस्य भावः कर्म वा, ऽच्छावाकीयम् । मित्रावरुणीयम् । ब्राह्मणाच्छंसीयम् । आग्नीध्रम् । प्रतिप्रस्थात्रीयम् । त्वष्ट्रीयम् । पोत्रीयम् । बहुवचनं स्वरूपविधिनिरासार्थम् ॥

ब्रह्मणस्त्वः ॥ १३६ ॥

होत्राभ्य इत्यनुवर्त्तते । ब्रह्मन्शब्दाद्धोत्रावाचिनस्त्वः प्रत्ययो भवति भावकर्मणोः । छस्यापवादः । ब्रह्मणो भावः कर्म वा, ब्रह्मत्वम् । नेति वक्तव्ये त्ववचनं तलो बाधनार्थम् । यस्तु जातिशब्दो ब्राह्मणपर्यायो ब्रह्मन्शब्दस्ततस्त्वतलौ भवत एव । ब्रह्मत्वम् । ब्रह्मता । भवनादधिकयोर्नञ्स्नञोरधिकारः समाप्तः ॥

॥ इति काशिकायां वृत्तौ पञ्चमस्याध्यायस्य प्रथमः पादः ॥

काशिकायाः

पञ्चमाध्यायस्य द्वितीयः पादः ॥

धान्यानां भवने क्षेत्रे खञ् ॥ १ ॥

निर्देशादेव समर्थविभक्तिः । धान्यविशेषवाचिभ्यः षष्ठीसमर्थेभ्यो भवनेऽभिधेये खञ् प्रत्ययो भवति, तच्चेद्भवनं क्षेत्रं भवति । भवनमिति भवन्ति जायन्ते ऽस्मिन्निति भवनम् । मुद्गानां भवनं क्षेत्रं मौद्गीनम् । कौद्रवीणम् । कौलत्थीनम् । धान्यानामिति किम् । तृणानां भवनं क्षेत्रमित्यत्र न भवति । क्षेत्रमिति किम् । मुद्गानां भवनं कुशूलम् । बहुवचनं स्वरूपविधिनिरासार्थम् ॥

व्रीहिशाल्योर्ढक् ॥ २ ॥

व्रीहिशालिशब्दाभ्यां ढक् प्रत्ययो भवति भवने क्षेत्रे ऽभिधेये । खञोऽपवादः । व्रीहीणां भवनं क्षेत्रं व्रैहेयम् । शालेयम् ॥

यवयवकषष्टिकाद्यत् ॥ ३ ॥

यवादिभ्यः शब्देभ्यो यत्प्रत्ययो भवति भवने क्षेत्रे ऽभि-

---

* भाव । कुतुक । कन्दुक । दुःस्त्री । दुर्हृदय । दुर्वृत्त । मिथुन । कुलली । महस् । कतक । कितव । पोत । एते ऽत्र गणे ऽधिकाः पुस्तकान्तरे ।

† कुलीनत्वम् । पा० २ ।

‡ बहुल । अवश्य । अहोपुरुष । एते शब्दा अत्र गणे ऽधिकाः क्वचित् ।

Digitized by Google

धेये । खञोऽपवादः । यवानां भवनं क्षेत्रं यव्यम् । यवक्यम् । षष्टिक्यम् ॥

विभाषा तिलमाषोमाभङ्गाणुभ्यः ॥ ४ ॥

तिल माष उमा भङ्गा अणु इत्येतेभ्यो * विभाषा यत्प्रत्ययो भवति भवने क्षेत्रे ऽभिधेये । खञि प्राप्ते वचनं पक्षे सोऽपि भवति । उमाभङ्गयोरपि धान्यत्वमाश्रितमेव । तिल माष उमा एषां भवनं क्षेत्रं,† तिल्यम् । तैलीनम् । माष्यम् । माषीणम् । उम्यम् । औमीनम् । भङ्ग्यम् । भाङ्गीनम् । अणव्यम् । आणवीनम् ॥

सर्वचर्मणः कृतः खखञौ ॥ ५ ॥

सर्वचर्मन्शब्दात्तृतीयासमर्थात्कृत इत्यस्मिन्नर्थे खखञौ प्रत्ययौ भवतः । सर्वशब्दश्चात्र प्रत्ययार्थेन कृतेन संबध्यते, न चर्मणा । तत्रायमसमर्थसमासो द्रष्टव्यः । सर्वश्चर्मणा कृत इत्येतस्मिन्वाक्यार्थे वृत्तिः । सर्वचर्मीणः । सार्वचर्मीणः ॥

यथामुखसंमुखस्य दर्शनः खः ॥ ६ ॥

यथामुखशब्दात्संमुखशब्दाच्च षष्ठीसमर्थाद्दर्शन इत्येतस्मिन्नर्थे खः प्रत्ययो भवति । दृश्यते ऽस्मिन्निति दर्शनः । आदर्शादिः प्रतिबिम्बाश्रय उच्यते । निपातनात्सादृश्ये ऽव्ययीभावः । यथामुखं दर्शनः, यथामुखीनः । सर्वस्य मुखस्य दर्शनः, सम्मुखीनः ॥

तत्सर्वादेः पथ्यङ्गकर्मपत्रपात्रं व्याप्नोति ॥ ७ ॥

तदिति द्वितीया समर्थविभक्तिः । व्याप्नोतीति प्रत्ययार्थः । परिशिष्टः प्रकृतिविशेषणम् । सर्वादेः प्रातिपदिकात् पथिन् अङ्ग कर्मन् पत्र पात्र इत्येवमन्ताद् द्वितीयासमर्थाद्व्याप्नोतीत्यस्मिन्नर्थे खः प्रत्ययो भवति । सर्वपथं व्याप्नोति, सर्वपथीनो रथः । सर्वाङ्गीणस्तापः । सर्वकर्मीणः पुरुषः । सर्वपत्रीणः सारथिः । सर्वपात्रीण ओदनः ॥

आप्रपदं प्राप्नोति ॥ ८ ॥

प्रपदमिति पादस्याग्रमुच्यते । आङ्मर्यादायां, तयोरव्ययीभावः । आप्रपदशब्दात्तदिति द्वितीयासमर्थात्प्राप्नोतीत्यस्मिन्नर्थे खः प्रत्ययो भवति । आप्रपदं प्राप्नोति, आप्रपदीनः पटः । शरीरेण संबद्धस्यापि पटस्य प्रमाणमाख्यायते ॥

अनुपदसर्वान्नायानयं बद्धाभक्षयतिनेयेषु ॥ ९ ॥

अनुपदादिभ्यः शब्देभ्यस्तदिति द्वितीयासमर्थेभ्यो यथासंख्यं बद्धा भक्षयति नेय इत्येतेष्वर्थेषु खः प्रत्ययो भवति । अनुरायामे सादृश्ये वा । अनुपदं बद्धा ऽनुपदीना उपानत् । पदप्रमाणेत्यर्थः । सर्वान्नानि भक्षयति, सर्वान्नीनो भिक्षुः । अयः प्रदक्षिणं,* अनयः प्रसव्यम् । प्रदक्षिणप्रसव्यगामिनां शाराणां यस्मिन्परशारैः पदानामसमावेशो ऽयानयः । अयानयं नेयो ऽयानयीनः शारः । फलकशिरःस्थित इत्यर्थः ॥

परोवरपरम्परपुत्रपौत्रमनुभवति ॥ १० ॥

परोवर परम्पर पुत्रपौत्र इत्येतेभ्यस्तदिति द्वितीयासमर्थेभ्यो ऽनुभवतीत्यस्मिन्नर्थे खः प्रत्ययो भवति । परोवरेति परस्योत्वं प्रत्ययसंनियोगेन निपात्यते † । परांश्चावरांश्चानुभवति, परोवरीणः । परपरतराणां च परम्परभावो निपात्यते । परांश्च परतरांश्चानुभवति परम्परीणः । पुत्रपौत्राननुभवति, पुत्रपौत्रीणः । परम्परशब्दो विनापि प्रत्ययेन दृश्यते । मन्त्रिपरम्परा मन्त्रं भिनत्तीति । तच्छब्दान्तरमेव द्रष्टव्यम् ॥

अवारपारात्यन्तानुकामं गामी ॥ ११ ॥

अवारपार अत्यन्त अनुकाम इत्येतेभ्यो द्वितीयासमर्थेभ्यो गामीत्येतस्मिन्नर्थे खः प्रत्ययो भवति । गमिष्यतीति गामी । भविष्यति गम्यादय इति । अकेनोर्भविष्यदाधमर्ण्ययोरिति षष्ठीप्रतिषेधः । अवारपारं गामी, अवारपारीणः ॥ विपरीताच्च ॥ * ॥ पारावारीणः ॥ विगृहीतादपीष्यते ॥ अवारीणः । अत्यन्तं गामी अत्यन्तीनः । भृशं गन्तेत्यर्थः । अनुकामं गामी अनुकामीनः । यथेष्टं गन्तेत्यर्थः ॥

समांसमां विजायते ॥ १२ ॥

समांसमामिति वीप्सायां सुबन्तसमुदायः प्रकृतिः । विजायते गर्भं धारयतीति प्रत्ययार्थः । गर्भधारणेन सकलापि समा व्याप्यतइति अत्यन्तसंयोगे द्वितीया । समांसमां विजायते, समांसमीना गौः । समांसमीना वडवा ॥ पूर्वपदे सुपो ऽलुग्वक्तव्यः ॥ * ॥ केचित्तु समायांसमायां विजायतइति विगृह्णन्ति, गर्भमोचने तु विजनिर्वर्त्ततइत्याहुः । तेषां पूर्वपदे यलोपमात्रं निपात्यते परिशिष्टस्यालुग्वक्तव्यः ॥ अनुत्पत्तावुत्तरपदस्य च वा यलोपो वक्तव्यः ॥ * ॥ समांसमां विजायते समायांसमायां विजायतइति वा ॥

अद्यश्वीनावष्टब्धे ॥ १३ ॥

विजायतइति वर्त्तते । अद्यश्वीन इति निपात्यते अवष्टब्धे विजने । आसन्ने प्रसवे । आविदूर्ये हि मूर्धन्यो विधीयते, अवाच्चालम्बनाविदूर्ययोरिति । अद्य वा श्वो वा वि-

---

* तिलादिभ्यः शब्देभ्य इति पा० २ ।

† तिलानां भवनं क्षेत्रमिति पा० २ ।

* प्रदक्षिणगमनमित्यपि कुत्रचित्पाठ उपलभ्यते परं तु स न युक्तः । अयः प्रदक्षिणमिति प्रतीकमुपादाय प्रदक्षिणं गमनमित्यर्थ इति पदमञ्जर्यां विवृतत्वात् ।

† परोवरेति परस्योत्ववचनमिति पा० । अयमेव च पाठो युक्तः । परस्योत्ववचनमिति प्रतीकस्य पदमञ्जर्यां दर्शनात् ।

जायते ऽद्यश्वीना गौः । अद्यश्वीना वडवा । के चित्तु विजायतइति नानुवर्त्तयन्ति अवष्टब्धमात्रे निपातनमित्याहुः । अद्यश्वीनं मरणम् । अद्यश्वीनो वियोग इति ॥

आगवीनः ॥ १४ ॥

आगवीन इति निपात्यते । आङ्पूर्वाद् आ तस्य गोः प्रतिपादनात् कर्मकारिणि खः प्रत्ययो निपात्यते । आगवीनः कर्मकरः । यो गवा भृतः कर्म करोति आ तस्य गोः प्रत्यर्पणात् ॥

अनुगवलंगामी ॥ १५ ॥

गोः पश्चाद् अनुगु । अनुगुशब्दादलंगामीत्यस्मिन्नर्थे खः प्रत्ययो भवति । अनुगु पर्याप्तं गच्छति अनुगवीनो गोपालकः ॥

अध्वनो यत्खौ ॥ १६ ॥

तदिति द्वितीया समर्थविभक्तिरनुवर्त्तते । अलंगामीति च प्रत्ययार्थः । अध्वन्शब्दाद् द्वितीयासमर्थादलंगामीत्येतस्मिन्नर्थे यत्खौ प्रत्ययौ भवतः । अध्वानमलंगामी, अध्वनीनः । अध्वन्यः । ये चाभावकर्मणोः । आत्माध्वानौ खइति प्रकृतिभावः ॥

अभ्यमित्राच्छ च ॥ १७ ॥

अभ्यमित्रशब्दाद्द्वितीयासमर्थादलंगामीत्यस्मिन्नर्थे छः प्रत्ययो भवति । चकाराद्यत्खौ च । अभ्यमित्रमलंगामी, अभ्यमित्रीयः । अभ्यमित्र्यः । अभ्यमित्रीणः । अमित्राभिमुखं सुष्ठु गच्छतीत्यर्थः ॥

गोष्ठात्खञ् भूतपूर्वे ॥ १८ ॥

गावस्तिष्ठन्त्यत्रेति गोष्ठम् । गोष्ठशब्देन सन्निहितगोसमूहो देश उच्यते । भूतपूर्वग्रहणं तस्यैव विशेषणम् । गोष्ठशब्दाद्भूतपूर्वोपाधिकात्स्वार्थे खः प्रत्ययो भवति । गोष्ठो भूतपूर्वः, गोष्ठीनो देशः * । भूतपूर्वग्रहणं किम् । गोष्ठो वर्तते ॥

अश्वस्यैकाहगमः ॥ १९ ॥

निर्देशादेव समर्थविभक्तिः । अश्वशब्दात्षष्ठीसमर्थादेकाहगम इत्येतदर्थे खञ् प्रत्ययो भवति । एकाहेन गम्यतइत्येकाहगमः । अश्वस्यैकाहगमोऽध्वा, आश्वीनः । आश्वीनानि शतं पतित्वा ॥

शालीनकौपीने अधृष्टाकार्ययोः ॥ २० ॥

शालीनकौपीनशब्दौ निपात्येते यथासंख्यमधृष्टेऽकार्ये चाभिधेये । अधृष्टोऽप्रगल्भः । अकार्यमकरणार्हं विरुद्धम् † । शालीनकौपीने अधृष्टाकार्ययोः पर्यायौ यथाकथं चिद् व्युत्पादयितव्यौ । शालाप्रवेशनमर्हति कूपावतारमर्हति इति खञ् प्रत्यय उत्तरपदलोपश्च निपात्येते । शालीनो जडः । कौपीनं पापम् ॥

व्रातेन जीवति ॥ २१ ॥

निर्देशादेव तृतीया समर्थविभक्तिः । व्रातशब्दात्तृतीयासमर्थाज्जीवतीत्यस्मिन्नर्थे खञ् प्रत्ययो भवति । नानाजातीया अनियतवृत्तय उत्सेधजीविनः संघा व्राताः । उत्सेधः शरीरं, तदायासेन ये जीवन्ति ते उत्सेधजीविनः, तेषां कर्म व्रातम् । तेन व्रातेन जीवति व्रातीनः । तेषामेव व्रातानामन्यतम उच्यते । यस्त्वन्यस्तदीयेन जीवति तत्र नेष्यते ॥

साप्तपदीनं सख्यम् ॥ २२ ॥

साप्तपदीनमिति निपात्यते सख्येऽभिधेये । सप्तभिः पदैरवाप्यते साप्तपदीनम् । सख्यं जनाः साप्तपदीनमाहुः । कथं साप्तपदीनः सखा, साप्तपदीनं मित्रमिति । यदा गुणप्रधानः साप्तपदीनशब्दः सखिभावे सत्कर्मणि च वर्त्तते तदा सख्यशब्देन समानाधिकरणो भवति, यदा तु लक्षणया वर्त्तते तदा पुरुषेण सामानाधिकरण्यं भवति ॥

हैयङ्गवीनं संज्ञायाम् ॥ २३ ॥

हैयङ्गवीनं निपात्यते संज्ञायां विषये । ह्योगोदोहस्य हियङ्ग्वादेशः, तस्य विकारे खञ् प्रत्ययो भवति संज्ञायाम् । ह्योगोदोहस्य विकारः, हैयङ्गवीनम् । घृतस्य संज्ञा । तेनेह न भवति, ह्योगोदोहस्य विकार उदश्वित् ॥

तस्य पाकमूले पील्वादिकर्णादिभ्यः कुणब्जाहचौ ॥ २४ ॥

तस्येति षष्ठीसमर्थेभ्यः पील्वादिभ्यः कर्णादिभ्यश्च यथासंख्यं पाकमूलयोरर्थयोः कुणब् जाहच् इत्येतौ प्रत्ययौ भवतः । पीलूनां पाकः, पीलुकुणः । कर्कन्धुकुणः । कर्णादिभ्यः । कर्णस्य मूलं, कर्णजाहम् । पीलु । कर्कन्धु । शमी । करीर । कुवल । बदर । अश्वत्थ । खदिर । पील्वादिः ॥ कर्ण । अक्षि । नख । मुख । मख । केश । पाद । गुल्फ । भ्रूभङ्ग । दन्त । ओष्ठ । पृष्ठ । अङ्गुष्ठ । कर्णादिः ॥

पक्षात्तिः ॥ २५ ॥

तस्येत्येव । तस्येति षष्ठीसमर्थात्पक्षशब्दाद् मूलेऽभिधेये तिः प्रत्ययो भवति । मूलग्रहणमनुवर्त्तते न पाकग्रहणमेकयोगनिर्दिष्टानामप्येकदेशोऽनुवर्त्ततइति । पक्षस्य मूलं, पक्षतिः प्रतिपत् ॥

---

* लिङ्गविशिष्टगत्या गोष्ठीशब्दस्यापि ग्रहणमित्यधिकं कुत्र चित् ।

† विरूपमिति पा० २ ।

Digitized by Google

॥ अथानन्दवृन्दावनचम्पूकाव्यस्य ॥

॥ नवमस्तबकावशेषः ॥

तदैव शोकसंकर्षणेन संकर्षणेन किमपि निगदता सरसतरं स रसतरङ्गतो रङ्गतो भुजङ्गमोत्सङ्गसंगतमात्मानं शिथिलीकृत्य फणफणायमानफणायमानमनाः फणाशतमणिशतकिरणमञ्जरीजरीजृम्भ्यमाणमहामहोवल्लिकाननविजिगाहयिषया समुत्पतन् समुत्पतन्निव फणमण्डलमारोहन्नवरजो वरजोषो दर्शयाम्बभूवे ॥ ६८ ॥

शोकसंकर्षणेन शोकनाशकेन । अवरजः स्वानुजः श्रीकृष्णो दर्शयामासेतान् प्रतीत्यर्थः । सरसतरं यथा स्यात्तथा स कृष्णो रसतरङ्गतो जलतरङ्गाद् रङ्गतो रङ्गेण भुजङ्गमोत्सङ्गे संगतमात्मानं शिलीकृत्य समुत्पतन्, क इव समुत्पतन्निव समुद् हर्षयुक्तः पतन् पक्षीव । "पतत्पत्ररथाण्डजा" इत्यमरः । ततश्च फणफणायमानेषु सहसा वृद्धिशीलेषु फणेषु अयमानं नृत्यार्थं गच्छन्मनो यस्य सः । फणफणीति सहसा वृद्धिप्रफुल्लतानुकरणं । किमर्थं, फणानां शते मणिशतस्य किरणमञ्जरीभिर्जरीजृम्भ्यमाणा अतिशयेन प्रकाशमाना महामहोवल्ल्यो महातेजोमया लतास्तासां काननस्य विगाहनेच्छया वरो मुख्यो जोषः प्रीतिर्यत्र सः ॥ ६९ ॥

भो भो दृश्यतां दृश्यतां गतोऽयमञ्जनस्निग्धो भुजङ्गदशनदशनलग्नविषमविषमहानलस्फुलिङ्गकणचाकचिक्याशक्योपममणिमयसकलालङ्करणोऽलङ्करणोचितविक्रमः ॥ ७० ॥

दृश्यतां दर्शनार्हतां गतः प्राप्तः । भुजङ्गस्य दशनैर्दशने लग्नं विषमं विषमेव महानलस्य स्फुलिङ्गकणास्तस्य चाकचिक्येन अशक्योपमं निरुपमं मणिमयं सकलमलङ्करणमलङ्कारो यस्य सः । अलमतिशयेन करणानां भुजादीनामुचितो विक्रमो यस्य सः । यद्वा । करणे कार्ये विषये युक्तविक्रमः ॥ ७० ॥

क्रमवरीवृद्ध्यमानावमानापहतभुजगमहाभोगभोगवेष्टनशिथिलकचकलापालकनिकरोष्णीषपीतवसनवनमालामालालितविग्रहो विग्रहोपयुक्ततया पुनरपि दृढबद्धपरिकरः ॥ ७१ ॥

क्रमेण वरीवृद्ध्यमानोऽतिशयेन वर्द्धमानोऽवमानस्तिरस्कारस्तेनैव अपहतं दूरीभूतं यद्भुजगस्य महाभोगेन बृहदाभोगेन भोगेन शरीरेण वेष्टनं तेन हेतुना शिथिलाः कचकलापश्च अलकनिकरश्च उष्णीषं च पीताम्बरं च वनमाला च ताभिरेव मा शोभा तया लालितो ललितीकृतो विग्रहो देहो यस्य सः । विग्रहोपयुक्ततया नृत्यमिषेण कालियशिरसि पादप्रहारप्रदानेच्छया दृढं बद्धः परिकरः परिच्छदो येन सः "भवेत् परिकरो वृन्दे परिवारविवेकयोः । आरम्भगात्रिकाबन्धपर्यङ्केषु परिच्छदे" इत्यजयः ॥ ७१ ॥

परिकरसुखदिदृक्षया चयाय फणमणिमहसो महसोषूयमाणमहसो निजकलेवरस्य वरस्य प्रभया भयाक्रान्त्येव निर्वापितेषु फणिफणामहः सु सुखमिदानीं दृश्यतां मद्वचसश्च तत्त्वमनुभूयताम् ॥ ७२ ॥

फणानां मणिमहसो मणितेजसः चयाय च बद्धपरिकरः, अत एव महेन निर्नर्तिषोत्सवेन सोषूयमाणः अतिशयेन प्रादुर्भवन्महः किरणो यस्य तथाभूतस्य कलेवरस्य प्रभया कान्त्या निर्वापितेषु । तत्र हेतुमुत्प्रेक्षते । भयाक्रान्त्ये वेति । कृष्णगात्रतेजसा मणितेजांसि भीतानि जातानि अत एव तेन निर्वापितानीत्यर्थः । वस्तुतस्तु महातेजसोऽग्रे क्षुद्रतेजस्तिरोधत्त एव ॥ ७२ ॥

भूयतां च परमानन्दवत्तया विस्मृतवैकल्यैः कल्यैककल्याणैः ॥ ७३ ॥

अत एव युष्माभिर्विस्मृतवैकल्यैर्भूयतां वैकल्यमपि स्मृतिपथे मा तिष्ठत्वित्यर्थः । कीदृशैः कल्यं समर्थं निरामयं वा एकं मुख्यं कल्याणं भाग्यातिरेको येषां तैः । "कल्यौ सज्जनिरामयावि"त्यमरः ॥ ७३ ॥

इति विस्मयस्मयशबलेन बलेन निगदिता दिताखिलशोकाः सर्व एव घोषजुषो जुषोत्फुल्लनयना नयनानन्दकन्दं श्रीकृष्णमालोकयन्तो लोकयन्तोऽपि भयानकमहीन्द्रं युगपदेव पदे वर्द्धमानमानन्दभययोः शाबल्यं भजन्ते स्म ॥ ७४ ॥

इति विस्मयस्मयाभ्यामद्भुतहास्यरसाभ्यां शबलेन कर्बुरितेन बलदेवेन उक्ताः सन्तः खण्डितसमस्तशोका अत एव जुषा प्रीत्या उत्फुल्लनेत्राः । "जुष प्रीतिसेवनयो"र्भावक्विबन्तः । युगपदेव पदे स्थाने विषये श्रीकृष्णदर्शनेनानन्दो वर्त्तते कालियदर्शनेन भयमिति ॥ ७४ ॥

अथ श्रीकृष्णोऽपि तटस्थानतटस्थानतिममतया मतया तान् करुणापाङ्गेन कृपाङ्गेन कृतार्थीकुर्वन्नखिलसुरकिन्नरनरसिद्धसिद्धसम्मानो मानोन्नतो नतोद्धारकः फणमण्डलरङ्गभुवि निनर्तिषुर्यदि मनः सहचरीचरीकरीति स्म तदैव विबुधा विबुधा गन्धर्वविद्याधराप्सरसां सरसां गोष्ठीमारचय्य मृदुमृदङ्गमुरजपणवपणवकुलनृत्यसाहाय्यसंपादनाय समवतिष्ठन्ते स्म ॥ ७५ ॥

तटस्थान् कूलस्थान् मतया युक्तया अतिममतया अतिशयममत्वेन हेतुना अतटस्थान् अनुदासीनांस्तान् व्रजवासिनः करुणापाङ्गेन करुणेनापाङ्गेन करुणारसमयेन कटाक्षेण इत्यर्थः। कृपा दयैव अङ्कं यत्र तथाभूतेन कृतार्थीकुर्वन् सन् निनर्तिषुर्यदि मन एव सहचरीचरीकरीति स्म नृत्याङ्गानां वाद्यगीतादीनामपेक्षितत्वेऽपि तत्रान्यस्य प्रवेशस्याशक्तेः स्वमानसमेव मार्दङ्गिकादित्वेन स्थापितं तथाभूतमपि सहचरं स्वसङ्गसंगतमतिशयेनाकरोदित्यर्थः। सहचरीति अभूततद्भावे च्विः। नन्वेवमपि कथं नृत्यसिद्धिस्तत्राह। अखिलानां सुरादीनां सिद्ध एव संमानः साधुवादो यत्र सः। तत्र हेतुः। मानेन नाट्यशिल्पज्ञानेन उन्नतः न केवलमेतावत्त्वमेव किंतु नतोद्धारकः नतानां भक्तानां स्वप्रभुं तथाभूतमालोक्य भयविह्वलानां तस्मादुद्धारकर्ता अत एव विबुधा देवा विबुधा विशिष्टपण्डिताः तदानीन्तनव्यवसायोचितज्ञानान्मृदङ्गादिभिः पणवबहुलस्य स्तुतिबहुलस्य नृत्यस्य साहाय्यं संपादयितुम् ॥ ७५ ॥

समनन्तरमनन्तरहसि निखिलकलासीभगवति भगवति कर्कशमार्गरीत्या दाक्षिणात्यप्रबन्धबन्धमनुसरति गन्धर्वादयोऽपि चच्चत्पुटचाचपुटतालौ गुरुलघुप्लुतद्रुतद्रुतार्द्धविरामरामणीयकविदां वरिष्ठैः सशब्दनिःशब्दादिभेदविचारचातुरीगरिष्ठैस्तालधारिभिरुद्घाटयामासुः ॥ ७६ ॥

अनन्तरहसि अपरिमितरहस्ये। "रहोऽतिगुह्ये सुरते" इति विश्वः। यद्वा। अनन्तस्य शेषनागस्यापि रहस्यरूपे अतः कालियफणोपरि नृत्ये को विस्मय इति भावः ॥ ७६ ॥

यथा।

> थेया तथतथथेया थेथेथेया तथेति गन्धर्वाः।
> तालं पाठं वादनमारेभिर उच्चकैर्मुदिताः ॥
> उद्घाटयन्ति शब्दं तालं पाठं च ते यथाविरुदम्।

अयमपि तथैव नृत्यति फणिनः फणतः फणान्तरं गच्छन् ॥ ७७

यथाविरुदं चण्डवृत्तमञ्जर्यादिलक्षणं विरुदमनतिक्रम्य ॥ ७७ ॥

> निजकल्पितया गत्या नृत्यति कृष्णो यथा स्वैरी।
> न तदनुरूपं गातुं वादयितुं पठितुमप्यमी शेकुः ॥ ७८ ॥

अमी गन्धर्वादयः ॥ ७८ ॥

> एको नृत्यन्नथ फणिपतेः शीर्षतः शीर्ष्णि गच्छन्
> स्वेनाकृप्तां वदनविधुनोद्घाटयन् शब्दमालाम्।
> घाते घाते चरणकमलाघातभङ्गान्नमन्तं
> शीर्षं कृत्वा नमयति फणं पण्डितस्ताण्डवेषु ॥ ७९ ॥

घाते घाते प्रतिघातमेव स्वेन वदनविधुना स्वमुखचन्द्रेण ॥ ७९ ॥

> द्रांद्रांद्रां द्रमिद्रमि थोङ्गथोङ्गथोङ्गि-
> त्युत्तालप्रसृमरतालपाठगत्या।
> विन्यस्यन्नदयमुदारपादपद्मं
> बभ्राजे फणिफणरङ्गभङ्गरङ्गी ॥ ८० ॥

अदयं निर्दयं यथा भवत्येवं पादपद्मं विन्यस्यन् सन् बभ्राजे भ्राजते स्म। "शङ्कुशरावघटोपरि परिपाटीभिर्नटन्ति शैलूषाः। इति तानतिचिक्रमिषुः फणिफणमनु नरिनरीत्यसौ कृष्णः" ॥ ८० ॥

अथैवं श्रीकृष्णस्य निजगतिविशेषमनुकर्तुमशक्नुवन्तोऽवन्तो व्रीडामायतमाना यतमाना अपि गन्धर्वा अप्सरसश्च यदि न प्रभवन्ति स्म तदामी हर्षोत्कर्षोत्कमनसः स्वातन्त्र्येणैव ननृतुर्जगुश्च ॥ ८१ ॥

व्रीडामवन्तः पालयन्तः प्राप्नुवन्त इत्यर्थः। अत्र हेतुः, आयतमाना विस्तृतगर्वाः। यतमाना यत्नवन्तोऽपि ॥ ८१ ॥

अथ तुमुलेषु दिवि दुन्दुभिदुङ्कारेषु घनगभीरेषु भेरीभाङ्कारेषु स्वभावसुस्वरेषु मुनिगणस्तवनेषु निपतन्तीषु च नन्दनवनकुसुमवृष्टिषु बहुविधमेधमानेषु च दिविषदां घोषवासिनां च प्रमोदेषु विबुधद्रुहां च वैमनस्येषु ॥ ८२ ॥

विबुधद्रुहामसुराणां वैमनस्येषु एधमानेषु ॥ ८२ ॥

ताण्डवचण्डिमानमारब्धवतः श्रीवनमालिनो निर्दयनिर्भरविन्यस्यमानचरणकमलाघातखेदखिन्नतया प्रतिक्षणं वमदसृग्धारमाभुग्ननयनमतिशीर्यद्भोगमाकुलतया म्रियमाणमिव तमाशीविषपतिं पतिं विलोक्य विषण्णहृदो हृदोपनीयापत्यानि पत्या निधनं गच्छतेव सकातर्यं ममतया निरीक्ष्यमाणास्तेन चातिशयदोदूयमानमानसाः ॥ ८३ ॥

निर्दयं निर्भरं च यथा स्यात्तथा विन्यस्यमानयोश्चरणकमलयोराघातखेदेन खिन्नतया वमन्ति मुखानि असृग्धारां यस्य तं। मुखानीत्यस्य वृत्तावन्तर्भावः। जहत् शब्दः स्वार्थं यत्र सा जहत्स्वार्था लक्षणेतिवत्। आशीविषपतिं सर्पराजं पतिं स्वभर्तारं। कीदृश्यः पत्या कालियेन निधनं मृत्युं प्राप्नुवता निरीक्ष्यमाणाः, तेन हेतुना अतिशयेन दोदूयमानं पुनःपुनरुपतप्यमानं मानसं यासां ताः ॥ ८३ ॥

न साम्प्रतं भगवदनुग्रहमृते मृतेरस्य निरासकं वर्तत इति मनसि विभाव्य भाव्यनुकम्पां भगवतोऽभिकाङ्क्षन्त्यस्तद्वनिता नितान्तशोककर्षितत्वेन त्यक्तसाध्वसं साध्व-

संहितलज्जं भगवत्सविधमभ्यागत्य सशोककातर्यं कलमधुरं स्तुवन्ति स्म ॥ ८४ ॥

भाव्यनुकम्पां भाविनीमनुकम्पां । साधु यथा स्यात्तथा न संहिता न संबद्धा लज्जा यत्र तद्यथा स्यात् ॥ ८४ ॥

जय देव जय देव देवघटामुकुटमहामारकत ॥ ८५ ॥

हे देव जय जय । ननु किमहमिन्द्रचन्द्रादिदेवानामेकतमोऽस्मि तत्र नहि नहीत्याहुः । देवघटेति । सर्वदेवाराध्यो नारायणस्त्वमिति भावः ॥ ८५ ॥

कतमदस्ति भवतः परं परं ब्रह्म ॥ ८६ ॥

ननु केषाञ्चिन्मते परब्रह्मण एव सर्वतः श्रैष्ठ्यं श्रूयते तत्राहुः । भवतः परं त्वत्तोऽन्यभूतं परं ब्रह्म कतमत् त्वमेव परब्रह्मेत्यर्थः ॥ ८६ ॥

ब्रह्मशितिकण्ठकण्ठरत्नायमानगुणरत्नाकर ॥ ८७ ॥

ननु तत्तु निर्गुणत्वेन प्रसिद्धमहं तु सगुण एव तद्विपरीतस्तत्राहुः । ब्रह्मशितिकण्ठयोर्विधिभवयोः कण्ठे रत्नायमानानां गुणरत्नानां गुणमुख्यानामाकर हे रत्नरूप । "रत्नं स्वजातिश्रेष्ठेऽपीत्यमरः" । भवद्गुणानामप्राकृतत्वात्त्वमेव निर्गुणं ब्रह्मेत्यर्थः । प्राकृतत्वे ताभ्यामादरेण कीर्तनीयत्वं न स्यादिति भावः ॥ ८७ ॥

रत्नाकरतनयाकरलालितं तव पदाम्भोजं भोज्यं भोज्यमेव मानसमुखेन सुखेन सुयोगिनः परमहंसा हंसा इव क्षीरनीरयोर्नीरमिव पुरुषार्थसार्थमुख्यमपवर्गमपवर्गयोग्यं कुर्वन्ति ॥ ८८ ॥

तत्र सतां प्रवृत्तिमपि प्रमाणयन्ति । रत्नाकरेति । भोज्यं भोज्यमास्वाद्यमास्वाद्य । मानसं मन एव मुखं तेन । अपवर्गं मोक्षमपि अपवर्गयोग्यं त्यागार्हं कुर्वन्ति । त्वदङ्घ्रिचिन्तनास्वादेन ब्रह्मज्ञानसाध्यस्य मोक्षस्याप्यरोचकत्वे कृते ब्रह्मतोऽपि त्वन्माहात्म्यं प्रत्युताधिकमेवावसीयत इति भावः ॥ ८८ ॥

कुर्वन्तिके श्रवसोरस्मन्निवेदनं वेदनन्तृक ॥ ८९ ॥

अतः श्रवसोः कर्णयोरन्तिके अस्मन्निवेदनं कुरु । वेदोऽपि नन्ता नतिकर्ता यस्य यथा वेदः प्रणम्यैव त्वां स्वतात्पर्यमवधापयति तथा वयमपि निवेदयाम इति भावः ॥ ८९ ॥

सच्चिदानन्दघनविग्रह ॥ ९० ॥

ननु केषाञ्चिन्मते वेदा निराकारपरा एव तत्राहुः । सच्चिदिति । तन्मतेऽपि तवाप्राकृतत्वान्निर्गुण इव निराकारोऽपि त्वमेवेति भावः ॥ ९० ॥

विग्रहमात्रक्षपितसर्वदानव सर्वदा नव ॥ ९१ ॥

कथं तर्हि देवक्यामर्वाचीन इव जातोऽस्मि तत्राहुः । विग्रहमात्रेणैव क्षपिताः संहृताः सर्वे दानवा येन भूभारसंहरणार्थं कृपयैव त्वमाविर्भूतोऽसीत्यतो न त्वमर्वाचीनः किन्तु पुराणपुरुषोत्तम एवेति भावः । किंच विगीतं पुरातनत्वं त्वयि नास्तीत्याहुः । सर्वदा एव नव नवीन नित्यनवीनत्वेनैव तव पुराणत्वमिति भावः ॥ ९१ ॥

नवव्यूहपर ॥ ९२ ॥

तदेव विवृण्वन्ति हे नवव्यूहपर यथोक्तं सात्वततन्त्रे "चत्वारो वासुदेवाद्या नारायणनृसिंहकौ । हयग्रीवो महाक्रोडो ब्रह्मा चेति नवोदिता" इति ॥ ९२ ॥

परमपुरुष रूषमपहर ॥ ९३ ॥

अतो हे परमपुरुष रुषं दुष्टनिग्रहार्थामप्यपहर ॥ ९३ ॥

त्वमभिनवासुदेवो वासुदेवोऽसि त्वमखिलतापसंकर्षणः संकर्षणश्च त्वमखिलघोषवासिनां प्रेमप्रद्युम्नः प्रद्युम्नश्च त्वमात्ममायया निरुद्धोऽसि त्वमखिलदेवतात्मा व्रजवासिनाम् ॥ ९४ ॥

व्यूहानेव मुख्यान् स्पष्टीकुर्वन्ति । अभिनवोऽसूनां प्राणानां देवः प्राणनाथोऽसीत्यर्थः । प्रेमैव प्रकृष्टं द्युम्नं धनं यत्र सः । "द्युम्नमर्थरैविभवा अपी"त्यमरः । आत्ममायया योगमायया निरुद्धः । अन्यैरज्ञेयतत्त्वत्वात् ॥ ९४ ॥

प्रसीद सीदत्ययं फणिपतिः ॥ ९५ ॥

नन्वेवम्भूतोऽस्मि चेन्मम चरणस्पर्शो भाव्यमेव किमिति विषीदथ तत्राहुः । फणिपतिः सर्पमुख्यः, अतितामसजातित्वात् तत्स्वभाव्यानभिज्ञ इति भावः ॥ ९५ ॥

अस्य रस्यतमं सुकृतं कृतं किंयद्वास्ति येन ते सुरासुरकिन्नरनरर्षिदेवर्षिगणवन्द्यमानमात्मारामरामणीकहृतसमाधिदुर्लभं चरणकमलं कमलंकरोति यदिदं तदनायासेनासकौ सकौतुकनटनाटनाहितं प्रतिफणमेवमेव बिभर्ति ॥ ९६ ॥

तत् पुनरस्माभिस्त्वनुभूयत एवेत्याहुः, अस्येति । आत्मारामाणां रामणीयकं रमणीयत्वं यतः इतः सम्यगाधिर्मनोव्यथा यतः स च स च यः समाधिस्तत्रापि दुर्लभं यदिदं कं सुखमलमत्यर्थं करोति, यद्वा कं जनमलंकरोति किंतु न कमपीति पुनर्दुर्लभत्वं । सकौतुकं यन्नटनमटनं च ताभ्यामाहितमर्पितम् । यद्वा । सम्यग्घितम् ॥ ९६ ॥

Digitized by Google

भो अतीतगुणचय गुणचयकृतोऽयं प्रपञ्चः स्वयमेव भवता भवतापहारकेण निखिलमनःशोधनसत्त्वेन सत्त्वेन पाल्यते, अनुकृतकपिकच्छुरजसा रजसा सृज्यते अवधीरितनिबिडतमसा तमसा संह्रियते नाममात्रमत्र महाभुज! गरुडासनकमलासनवृषासनानाम् ॥ ९७ ॥

ननु किमित्येवमाद्रियते दुष्टोऽयं मया निग्रहीतव्य एव तत्र दुष्टताशिष्टतयोस्त्यागोपादाने स्वपरतन्त्राणां जीवानां स्वतो न संभवति इति वक्तुं तस्य निरतिशयैश्वर्यं विवृण्वन्त्य आहुः। भो अतीतेति। भवतापहारकेणापि भवः पाल्यत इति विरोधः। निखिलानां मनःशोधने मनः शोधयितुं सत्त्वं सत्ता यस्य तेन सत्त्वेनानुकृतं सदृशीकृतं कपिकच्छुरजः कण्डूराचूर्णं येन तेन कपिकच्छुः॰ आलकुशीति, पाश्चात्यदेशे कोंच इति ख्याता "कपिकच्छुश्च मर्कटी"त्यमरः ॥ ९७ ॥

किंच निष्किञ्चनप्रिय! गुणतारतम्येन जीवतारतम्येन जीवः स्वगुणगुणदोषौ हातुमर्हति, तेनास्य तमोजनितया तमोजनितया खलतया खलतया तुल्यं सौजन्यं जन्यं तेन कदर्थयति ॥ ९८ ॥

स्वस्य गुणैः सत्त्वादिभिर्गुणदोषौ शिष्टतादुष्टते, तेनास्य कालियस्य तमोजनितया तामसजन्मत्वेन खलतया खलत्वेन हेतुना, कीदृश्या तमोजनितया तमसा क्रोधेनोत्पादितया। खलतया आकाशलतया तुल्यं सौजन्यमसंभवमेवेत्यर्थः। जन्यं जनहितम् ॥ ९८ ॥

तवैवेयं माया मा यापयितुं शक्यते विलोक्यते विलोदवसितानामीदृश्येव रीतिः ॥ ९९ ॥

यदि दण्डेनापि न स्वभावपरित्यागस्ततः किं दण्डेनेत्याहुः। तवैवेति। विलोदवसितानां विवरगृहाणां "गृहं गेहोदवसित"मित्यमरः ॥ ९९ ॥

तेनायं नाराध्यति राध्यतिकरुणारसे प्रभवति भवति भवति क उपेक्ष्यः ॥ १०० ॥

किंच, त्वयि पुनरसावनुकम्प्य एव भवितुमर्हति नतु दण्ड्य इत्याहुः। राधौ सिद्धु एव अतिकरुणारसो यत्र तस्मिन्। न चान्येषामिव कृपायामसामर्थ्यमित्याहुः। प्रभवति प्रभूष्णौ। भवति त्वयि ॥ १०० ॥

समदृशस्तव शस्तबहुलः सम एव सर्वः पन्थाः ॥१०१॥

दण्डानुग्रहयोः प्रतिकूलत्वानुकूलत्वाभ्यां प्रतीतयोरपि स्वत्कर्तृकत्वादत्रापि तुल्यत्वमेव एतादृशदण्डस्यापि शुभोदर्कात्, तथाप्यस्मिन्नतिमूढे कृपापात्र एवोचित इत्याशयेनाहुः। समेति। शस्तबहुलः मङ्गलप्रचुरः सर्वः पन्था दण्डश्च ॥ १०१ ॥

कुरु कृपामरं पामरं जीवममुं जीवनेन न शोचयितुमर्हसि ॥ १०२ ॥

कृपां कुरु। अरं शीघ्रम् ॥ १०२ ॥

यं भगवन्तं भवन्तं भवकमलाकमलासनप्रभृतयोऽपि यतयोऽपि यतमाना हृदापि दापितावधाना न वेदितुमर्हन्ति तमसावतितमसावतिष्ठमानगरिष्ठमानगरिमपुष्टमतिः कथं विदाङ्करोतु ॥ १०३ ॥

मामेव ज्ञापयितुमहमेव प्रभावमाविष्कृत्य दण्डयामीति चेदत आहुः। यमिति। हृदा चित्तेन प्रयोजककर्त्रा दापितमवधानं येभ्यस्ते। तं भवन्तमसौ कालियः। अतितमसा हेतुना॰ अवतिष्ठमानस्य सदा तिष्ठतो गरिष्ठस्य मानस्य दुष्टगर्वस्य गरिम्णा गौरवेण पुष्टा मतिर्यस्य सः। विदाङ्करोतु जानातु ॥ १०३ ॥

तव हेलाकृतनटनटनटनत्कारिवेदनावेदनाभिभूतोऽयं महासारोऽपि रोपितहृन्मर्मव्रण इव श्वासमात्रावशिष्टोऽशिष्टोऽपि महाप्राणो हा प्राणोज्झितो न भवतु ॥ १०४ ॥

कारुण्यमुत्पादयन्त्यः सदैन्यं तर्जन्या दर्शयन्त्य आहुः। हेलया कृतेनापि नटनेन हेतुना या टनटनत्कारिणी वेदना पीडा तस्या वेदनेनानुभवेनाभिभूतोऽयं महासारोऽपि महाबलोऽपि महाप्राणः प्राणित्वांशेन तु महानेवेत्यर्थः। अस्मत्संबन्धेनाप्येष रक्ष्यतामित्याहुः ॥ १०४ ॥

क्षम्यतामयमपराधो मा वैधव्यमस्तु पतिदानं नो विधीयतामिति कातरतरगद्गदगदनपराणामहिमहिलानां तदनुग्रहग्रहणग्रहिलानां कलकोमलमलरहितहितकाकुलपितमाकर्ण्य जातानुग्रहो भगवान् शिथिलीकृतकृतकनिग्रहो विगलितरोषोदयो दयोद्धुरमना मनाग्विहस्य मधुमधुरतरमुवाच ॥ १०५ ॥

मा वैधव्यमस्त्वित्युक्त्वापि पतिदानं नो विधीयतामिति वदन्तीनामयमभिप्रायः, यद्यपि त्वां सदा भजन्तीनामस्माकं त्वद्बहिर्मुखेनानेन पत्या॰ अलमेव तथापि वैधव्येऽपि स्वोत्थादस्वातन्त्र्येणास्माकं पुनः केनापि बलिनान्येन सर्पेणावश्यमाक्रंस्यमानत्वात् त्वद्बहिर्मुखत्वाविशेषात् प्रत्युतोपपत्यजुगुप्सातश्चायमेव त्वच्चरणस्पर्शजनितभाग्यः पतिर्वरं तिष्ठत्विति, अत एव दुष्टस्य पत्युर्भगवत्करिष्यमाणशास्तिमेवेच्छन्तीनां

Digitized by Google

प्रथममनुसर्पणं, संप्रति तु तस्य शरणागतिलक्षणभक्तिं ज्ञातामनुमाय हृष्यन्तीनां तत्र प्रीतिरिति, यदुक्तं "तमरणं शरणं जगामे"ति, भक्तिरसामृतसिन्धावपि दासभक्तप्रस्तावे "शरण्याः कालियजरासंधबद्धनृपादय" इति । अहिमहिलानां सर्पसुन्दरीणां, कृतकर्मनिग्रहः कृत्रिमदण्डः, मनाग्विग्रहस्येति, तासामपि तथा भक्तिनिष्ठानुभवात् ॥ १०५ ॥

मा भैष्ट भो मा भैष्ट, मम विरतोऽयं तोयं लब्ध्वेव महानलो भवतीनां वचनेनानेनानेकोऽपि कोऽपि कोपः ॥१०६॥

अनेकोऽपि प्रचुरोऽपि कोऽपि अनिर्वचनीयः कोपः, श्लेषेण न एको न मुख्यः, कृतकर्मनिग्रह इति पूर्वोक्तेः, "एके मुख्यान्यकेवला" इत्यमरः ॥ १०६ ॥

तदयं पन्नगो न गोचरो भविष्यति मृत्योः, तस्मादयं ममेममाक्रीडमपहाय यत एवागतस्तत्रैव प्रतियातु, यातु मदीयचरणचिह्नचारुलक्ष्मीरस्य रस्यतमोत्तमाङ्गसङ्गिनी, तामालोकयतो गरुडादपि न भयमिति भगवदुक्त्युपरमे ॥ १०७ ॥

आक्रीड्यतेऽत्रेत्याक्रीडं ह्रदं, यद्वा, वृन्दावनम् । उत्तमाङ्गसङ्गिनी शिरोवर्तिनी ॥ १०७ ॥

परमेणाश्वासेन निर्वृतहृदयो हृदयोभारभुग्नमिव यदासीत्, तदतिलघु लघु मन्यमानोऽमानोऽयं फणिपतिः सभयभक्तिश्रद्धमाह ॥ १०८ ॥

अयसां लोहपिण्डानां भारेणेव भुग्नं स्वमृत्युशङ्कया नम्रं यद् हृद् मनस्तत्, अतिलघु भगवदाश्वासेन तद्भारापगमात्, लघु शीघ्रमेव, अमानो गतगर्वः ॥ १०८ ॥

भो भगवन् प्रभवतो भवतो भुवीयमाविर्भूतिर्भूतिकृते साधूनामसाधूनामभिभवाय भवाय भव्यानां भव्यानां भक्तानां चाचन्द्रभास्करं भास्करम्बितमनोविनोदाय विनोदाय च परमाशुभानामाशु भानामुदयाय ॥ १०६ ॥

भूतिकृते संपत्त्यै, भव्यानां मङ्गलानां भवाय उत्पत्त्यै, भव्यानां भाविनां "भव्यगेये"त्यादिना कर्तरि प्रत्ययः, भासा कान्त्या करम्बितानां मनसां विनोदाय आनन्दाय, परमाशुभानामत्यन्तममङ्गलानां विशेषेण नोदाय दूरीकरणाय, अत एव आशु शीघ्रं भानां प्रकाशानामुदयाय उद्गमाय ॥ १०९ ॥

दयायतन! तदुचितोऽयं तोयं ते क्रीडोचितं दूषयतो मम निग्रहोऽनुग्रहश्चानुत्तमश्चातः कोऽपरः, कोपरसतो नृत्यतस्तव सकलमङ्गलास्पदपदकमललक्ष्मलक्ष्मीभरभरिता मे यदमी फणमण्डलाः ॥ ११० ॥

दयायतन हे दयामन्दिर ॥ ११० ॥

तदद्य बलानुजानुजानीहि भवदाज्ञया रमारमण रमणकमेव द्वीपमुपयामि यामिह दुर्दैवतो दैवतोत्तम तव चरणकमलयोरनीतिमकरवं मकरबन्धुरकुण्डल तां क्षमस्वेति ॥१११॥

मकराकृती बन्धुरे सुन्दरे कुण्डले यस्य ॥ १११ ॥

दिव्याम्बरवरमणिगणगणनपिहितस्वरूपहितस्वरूपकौस्तुभमुक्ताहारोपहारोपनयनपुरःसरं कृतप्रणामः सपरिकरो निश्चक्राम ॥ ११२ ॥

दिव्याम्बराणि च वरमणिगणेषु मध्ये गणनेन, यथा अन्ये मणयस्तथायमप्येको मणिरित्येवंलक्षणेन कालियकर्तृकविमर्शेन पिहितमाच्छादितं स्वरूपं यस्य तथाभूतश्चासौ हितस्वरूपश्च हितधनरूपश्च यः कौस्तुभः स च मुक्ताहाराश्च तेषामुपहाराणामुपनयनं समीपे प्रापणमेव पुरःसरं यत्र तद्यथा स्यात् तथा कृतप्रणामः, एतदुपहारीकरणं च कालियस्य स्वप्रेयसीद्वारैव, यदुक्तं गणोद्देशदीपिकायाम् ॥

"कौस्तुभाख्यो मणिर्येन प्रविश्य ह्रदमौरगम् ।
कालियप्रेयसीवृन्दहस्तैरात्मोपहारितः" ॥

इति ॥ ११२ ॥

निष्क्रान्ते च तस्मिन् सद्य एव पीयूषयूषवदतिमधुरसाधुरसा बभूव सा ह्रदपयःपटली पटलीलयावधीरिततडिद्वलयो वलयोज्ज्वलकरः स च व्रजराजकुमारः कूलमुत्तीर्य तीर्यमाणभयकौतुकचमत्कारानन्दशावल्यसमुद्रं समुद्रंहसा पितरं मातरं मान्यानन्यानपि घोषवृद्धानृद्धानृतेन तेन परमादरेण प्रणम्य ॥ ११३ ॥

पटलीलया तदानीं लब्धवस्त्रद्युतिविलासेनावधीरितं तिरस्कृतं विद्युद्वलयं तडिन्मण्डलं येन सः । तीर्यमाणो न पुनस्तीर्णः, बाधितानुवृत्तिन्यायात्, भयादीनां शावल्यरूपः समुद्रो येन तम् । तत्र भयं कालियदर्शनेन, कौतुकं दैववाक्यानुभवेन, चमत्कारः सर्पफणोपरि नृत्यावकलनेन, आनन्दः श्रीमुखप्रफुल्लतानुमिततद्दुःखाभावेन । समुत् सानन्दं यथा स्यात् तथा रंहसा वेगेन, ऋद्धान् समृद्धान्, तेन तत्कालोदितेन, ऋतेन सत्येन निष्कैतवेन ॥ ११३ ॥

मातापितृभ्यां तैरपि व्रजपुरन्ध्रीभिः परमकुतूहलिना हलिना चालिङ्गितः परमानुरागिणीभिर्वधूभिः कन्याभिश्च सानुरागपरभागपरभागधेयमधुरमीक्ष्यमाणश्चैवमाणश्च ताः ॥ ११४ ॥

अनुरागस्य परभागेणोत्कर्षेण हेतुना यत् परं श्रेष्ठं भागधेयं भाग्यं तेन सहितं च तत्, अत एव मधुरं चेति, तथा स्यादेवम् ॥ ११४ ॥

तथैव चिरमभितोऽभितोषवशंवदाभिर्धेनुभिरपि सास्रैरेव नयनपुटैः पीयमान इव प्रफुल्लाभिर्घोणाभिर्घ्रायमाण इव रसज्ञाभी रसज्ञाभी रभसेनालिह्यमान इव कलगद्गदेन हम्बारवेण सप्रणयमनामयं पृच्छ्यमान इव प्रत्येकमेव सखीनालिलिङ्ग ॥ ११५ ॥

रसज्ञाभिर्जिह्वाभिः, रसज्ञाभीरसविज्ञाभिः, रभसेन हर्षेण ॥ ११५ ॥

इत्येवमामोदमानैर्बन्धुभिरामोद्यमाने विश्राम्यति भगवति व्रजवासरमणे वासरमणेरुपराममालोक्य व्रजराजो जराजोषमिव तं वासरस्य मन्यमानो मा नोऽद्य वासगमनं भवितुमर्हतीति विचार्य सर्वानेव निदिदेश देशकालोचितं किमपि ॥ ११६ ॥

आमोदमानैर्हृष्यद्भिः । आमोद्यमाने क्रियमाणानन्दे सति भगवति । कीदृशे । व्रजवासरमणे, व्रजे वासेन रमयतीति तस्मिन् । वासरमणेः सूर्यस्य· उपरमम्· अस्तीभावं वासरस्य दिवसस्य जराजोषमिव जराप्राप्तिमिव तम्·उपरमं मन्यमानः । नोऽस्माकमद्य वासगमनं मा भवितुमर्हति ॥ ११६ ॥

यथा भो भोः समुपसन्नेयं शर्वरी शर्वरीतिरिव विषमदर्शना तमोबहुला· उग्रा च ॥ ११७ ॥

शर्वरी रात्रिः, शर्वस्य रुद्रस्य रीतिरिव ॥ ११७ ॥

तदिहैवाद्य वस्तव्यं स्तव्यं चेदं ह्रदतटमुपपादितं दितं गरलानलज्वलितमनेन कल्याणिना वत्सेन ॥ ११८ ॥

स्तव्यं स्तवनार्हं· यतो गरलानलस्य ज्वलितं ज्वलनं दितं खण्डितम् ॥ ११८ ॥

तदिदं ह्रदकूलमनुकूलमनुसृत्य यामिनीं यापयाम इति तदुदितमाकलय्य सर्व एव मुमुदिरे ॥ ११९ ॥

मुमुदिरे, आनन्दिता बभूवुः ॥ ११९ ॥

मुदिरेन्द्ररुचः कमनीयकिशोरस्य रस्यतमाभिलषणीयतमदर्शनसौलभ्यलभ्यमानमानसविकारकारणोत्कलिकाकण्डूकण्डूलताशमननिर्वापणकृते विशेषतोऽनुरागिण्यो मुग्धरमण्यः कन्यकाश्च ॥ १२० ॥

अनुरागिण्यो विशेषतो मुमुदिरे इत्यनुषङ्गः । कुतः, मुदिरेन्द्ररुचो मेघोत्तमतुल्यवर्णस्य कृष्णस्य रस्यतममतिशयास्वाद्यम्·अभिलषणीयतमं यद्दर्शनं तस्य सौलभ्यं तदानीं वारणाभावात् सुलभत्वं तेन लभ्यमानस्तदैव प्राप्यमाणो मानसो विकार एव कारणं यस्याः सा· उत्कलिका·उत्कण्ठैव कण्डूर्व्याधिविशेषस्तस्या या कण्डूलता तत्कार्यभूतकण्डूया तस्याः शमनमपि निर्वापणकृते । कण्डूलतेति सिध्मादिलजन्तात् तल् ॥ १२० ॥

तदेवं श्रीकृष्णं मध्यमध्यवस्थाप्य तमभितोऽभितो व्रजराजादयः क्वचन सखायः क्वचन व्रजेश्वरीप्रभृतयः क्वचन मातृनिकटस्थाः कुमार्यः क्वचन श्वश्रूनिकटस्था वध्वश्च ॥ १२१ ॥

कुमारीणां वधूनां च प्रथमे मण्डले स्थितिर्व्रजेश्वरीसाहित्यमनुरुन्धतीनां मातॄणां श्वश्रूणां सङ्गानुरोधेन दैवादेव फलिता ॥ १२१ ॥

परितस्तद्बहिरपि चापरास्तद्बहिरपि चापराः ॥ १२२ ॥

तद्बहिर्द्वितीयमण्डले च·अपराः, त्वर्थे चकारः, अपरास्तु गोपा अनुरागागोपीपतिं मन्यादय इत्यर्थः, अपरा इति पूर्वपरावर”त्यादिना सर्वनामसंज्ञाविकल्पात् । तद्बहिरपि तृतीयमण्डले चापं रान्ति गृह्णन्तीति चापरा धनुष्पाणयः, सर्वरक्षका इत्यर्थः ॥ १२२ ॥

तद्बहिरपि धेनवः सविधे नवः स विविधास्त्रधारिणो यासाम् ॥ १२३ ॥

तद्बहिश्चतुर्थे मण्डले धेनवो गावः, यासां सविधे निकटे पञ्चमे मण्डले स महाशौर्येण प्रसिद्धो विविधास्त्रधारिणां गणः समूहः ॥ १२३ ॥

इति मण्डलीं व्यूह्य विविधविचित्रचरित्रचारिमगरिमकालियमर्दनलीलाकथानुकथनेन निशार्धं गमयतामयतामथनि द्रामपि स्त्रीपुंसानां मध्ये दैवोपसादितेन तेन रसमयेन समयेन श्रीकृष्णमुखचन्द्रमबाधमेव सानुरागमनिमेषमीक्षमाणानां वधूनां कुमारिकाणां च चाक्षुषे मानसे च भोगे निर्भरं निर्वहति सति ॥ १२४ ॥

विविधस्य विचित्रचरित्रस्य चारिमा चारुत्वं गरिमा गुरुत्वं ताभ्यां कालियमर्दनस्य लीलाकथाया अनुकथनेन निशार्धं गमयताम्, अथानन्तरं निद्रामयतां गच्छताम्, “इ गतौ” शत्रन्तः, निर्वहति निर्वाहं प्राप्नुवति सति ॥ १२४ ॥

मुख्यानां चन्द्रावलीप्रभृतीनां चातिशयिनि नयनोत्सवे पूर्वमेवाङ्कुरितप्रेममनोरथयोरथ योगमाकस्मिकं त-

Digitized by Google

मासाद्य परस्परदिदृक्षासदृक्षा समुत्कण्ठा समुत्कण्ठा पर्नीपद्यते स्म यदि ॥ १२५ ॥

दर्शनसाम्येऽपि तासां मध्ये चन्द्रावल्यादीनामतिशयिनीति प्रेमतारतम्येनोत्सवतारतम्यात्, त्वर्थे चकारः, तत्रापि तासां मध्ये राधाया असमोर्ध्वप्रेममहिम्ना सर्वातिशयिमनोनेत्रोत्सवं तद्बलादेव स्वमाधुर्येण कृष्णस्यापि तादृशमनोनेत्रोत्सवदायित्वं चाह, पूर्वमेवाङ्कुरितः प्रेम्णा परस्परविषये मनोरथो ययोस्तयोः, अधुना त्वसौ पल्लवितपुष्पितत्वमवाप्य सहसा फलितोऽपीति भावः, परस्परदिदृक्षया सदृक्षा सदृशी अनुरूपा सम्यगुत्कण्ठा यद्वातिशयेन समुत्पन्ना, "नीभ्रन्तुसंस्थि"त्यादिना नीगागमः, कीदृशी, समुत् सहर्षः सम्यगुत्थितो वा कण्ठो यस्यां सा ॥ १२५ ॥

तदैवाकस्मिकमभिमुखीनमुभयोरेव चातुरक्षिकमक्षिकमलखेलनमासीत् ॥ १२६ ॥

चातुरक्षिकम्, चतुर्षु अक्षिष्वेव भवम्, इत्यध्यात्मादित्वाट्ठञ्, अक्षिकमलानामेव खेलनमित्युभयत्रापि निर्धारणम्. अभिमुखीनं संमुखीनम् ॥ १२६ ॥

तद्यथा,

राधालोके प्रसरति हरेर्दोलितो दृष्टिपातः
पुच्छाघातादिव मदिरयोर्वेपिताम्भोजराजी ।
कृष्णालोके सति मुकुलिता राधिकायाः कटाक्षाः
पद्माघातादिव रतिपतेः प्राप्तभङ्गाः पृषत्काः ॥ १२७ ॥

मदिरयोः खञ्जनयोः, पुच्छाघातादित्यनेन प्रथमं राधाकर्तृकालोकोऽपाङ्गाभ्यामेवेति ज्ञापितं, वेपिताम्भोजराजी इति, ततश्च कृष्णलोचनद्वयस्य निरङ्कुशत्वेन समुदितस्यैव युगपदेव बहूनां व्यापाराणामत्योत्सुक्येन जनितानां कमलोपम्यात् । ततश्च तथाभूते कृष्णावलोके सति मुकुलिता इति सहसा लज्जोपगमात्, पृषत्का बाणास्तेऽपि नीलोत्पलरूपा एव, प्राप्तभङ्गा इति तेषां नेत्रप्रान्तमात्रव्यापाररूपत्वेन क्षीणत्वादिवेति पुनरुत्प्रेक्षापि ध्वनिता· इति ॥ १२७ ॥

एवं मुहूर्तं मूर्तं मूर्च्छन्तमिव तमनुत्तममनुरागपटलान्धकारमनुभवतोस्तयोश्चन्द्रावलीप्रभृतिष्वपि कृष्णं वार्षभानव्यां नव्यां रतिमुद्वहन्तमनुमान्तीषु सकलास्वपरासु निद्रामुपगच्छन्तीषु केषुचिदपि मिथः कृष्णकथाकथनेनेव जाग्रत्सु भो भो अत्याहितमत्याहितमित्याहितसूचकः कष्टतरः कोऽपि कलकलः समुल्ललास ॥ १२८ ॥

मुहूर्तं व्याप्य मूर्च्छन्तं विस्तारं प्राप्नुवन्तमिव, "मूर्च्छा मोहसमुच्छ्राययो"रिति धातुः । अनुराग एव सुमनः पुष्पं तस्य परागपटलैरन्धकारं तदानीमानन्दमूर्च्छाया मनोनयनाच्छादनात्, अनुभवतोः सतोस्तयो राधाकृष्णयोः । अनुमान्तीषु· अनुमानं कुर्वतीषु सतीषु । अत्याहितं महाभीतम्, "अत्याहितं महाभीति"रित्यमरः ॥ १२८ ॥

तमाकर्ण्य समाकुलीभूय भूयशः परित्यक्तशयनासूत्कर्णमभितो निरीक्षमाणासु धेनुषु, किं भोः किं किमिति सातङ्कमापृच्छमानेष्वच्छमानेष्वन्योन्यं प्रधानेषु हुं हुमिति निद्रातः समुत्तिष्ठत्सु निद्राणेषु ॥ १२९ ॥

आपृच्छमानेष्विति, "आङि नुप्रच्छ्यो" रित्यात्मनेपदम् । अच्छो निर्मलो मानो ज्ञानं वस्तुपरामर्शो येषां तेषु ॥ १२९ ॥

सचकितं श्रीकृष्णमालोकमानासु कुलवधूषु कुलकन्यासु च, तासां भयविह्वलतामालोक्य, मा भेतव्यं मा भेतव्यमिति प्रणयगाम्भीर्यमाश्वासयति च श्रीव्रजपुरंदरनन्दने, केचिदेवं वितर्कयामासुः ॥ १३० ॥

भयविह्वलता चासां न स्वानिष्टशङ्कया किं त्वस्मत्प्राणकोटिनिर्मञ्छनीयचरणनखाग्रमेतमस्मत्कान्तं बाधिष्यते दवाग्निरिति भावनयैव, एवमग्रेऽपि नन्दादिष्वपि ज्ञेयम् ॥ १३० ॥

किं कालियः पुनरसौ तटवर्त्मनेति
लब्धापमानजनितातिशयप्रकोपः ।
किं नूत्नकैर्मदपयोभरधौतगण्ड-
शैलं कुतोऽपि वनवारणयूथमेति ॥ १३१ ॥

धूमस्य श्यामलिमानमालोक्य प्रथमं संशेरते किं कालिय इति, मदपयसां भरैर्धौतौ गण्डावेव शैलौ यस्य तत् ॥ १३१ ॥

इति वितर्कयत्सु जनचयेषु भो भो निरुपायोऽपायोज्झितोऽयं दवानलो दवानल इति पुनरुद्घुष्टमतिकष्टतरमाकर्ण्य व्रजेश्वरः सत्रासं कालियमर्दनमुपगम्य सहसा गर्गोदितमनुस्मृत्य* भो वत्स परित्रायतां परित्रायतामेष निरुपायापायारण्यमहावह्निस्त्वदेकनाथं समस्तमेव व्रजं दहन्नुपैति ॥ १३२ ॥

निरुपायोऽयं निवारणोपायशून्यः । अपायोज्झितः स्वयं च नाशरहितः । गर्गोदितम्, "अनेन सर्वदुर्गाणि यूयमञ्जस्तरिष्यथे"ति । निरुपायोऽपायो नाशो यस्य तथाभूतोऽरण्यमहावह्निः । तस्यां रात्रौ विषसंसर्गशङ्कया ह्रदतटनिकटं परित्यज्य

* मनुसृत्य इति पाठान्तरम् ।

कुडुमारे इति लोकप्रसिद्धे प्रदेशे विहितस्थितित्वेन यमुनाजलानयनाशक्तेः, तस्य महावह्नेरपि सर्वत आनृत्यैवोत्पतिष्णुत्वेन दृश्यमानत्वात्, निर्गमनाशक्तेश्च ॥ १३२ ॥

नहि भवन्तमन्तरेणास्योपशमः शमन्यथा च न वर्तते विनास्य शमनम् ॥ १३३ ॥

शं कल्याणम् ॥ १३३ ॥

इति सपरिजनजनकजननीप्रभृतिसमस्तबन्धुजनव्याकुलतामालोक्य मा भेतव्यमित्ययत उपसृत्य ॥ १३४ ॥

अयत उपसृत्य माधवो दवदहनं ददर्शेत्यन्वयः ॥ १३४ ॥

यद्यपि वनान्तरवन्नान्तर्वर्तिदवदथु वृन्दावनं तथापि सर्वचमत्कारकारलीलाहेतोः स्वेच्छयेव समापादितमिव ॥ १३५ ॥

अन्तर्वर्ती दवदवथुर्यस्य तथाभूतं वृन्दावनं यद्यपि न भवति ।

फणिमूर्धनि नर्तित्वा जगद्विलक्षणमर्जिज्ञपत् तरणीः ।
स्वस्य प्रभावमतुलं कलासु पाण्डित्यमत्यधिकम् ॥
पत्याख्याचरणाविज्ञसङ्कं दुर्घटममूः परामृशतीः ।
इवशमनेनाकलयद् दुर्घटघटनापटीयसीं शक्तिम् ॥ १३५ ॥

शुष्के सर्वाङ्गलग्नं श्वसति तरुगणे चञ्चटाध्मानघोरं
ग्रोषन्तं पत्रमात्रं तृणततिमभितस्तत्क्षणाद्भस्मयन्तम् ॥
चस्याद्भिन्यङ्कुरङ्कुप्रभृतिमृगकुलैर्वीक्षितं धावमाने-
र्दूरादभ्रंलिहाग्रं दवदहनमथो माधवः संददर्श ॥ १३६ ॥

शुष्के तरुगणे· अथच श्वसति· अन्तर्जीवति पत्रमात्रं ग्रोषन्तं दहन्तं न तु स्कन्धशाखादिकम्, अतिवर्षीयस्त्वेन सारमयत्वादन्तः सरसत्वाच्च । अशुष्के तरुणतरुगणे तु न किंचिदपीति भावः । अभ्रमाकाशं लेढि· अग्रं जिह्वोपमशिखा यस्य तम् ॥ १३६ ॥

संभव्यथ व्यथया बन्धुजनकदनमनेन विनमनेन विहायोलिहा महाधूमधूमध्वजेन ॥ १३७ ॥

संभवीत्यादि श्रीकृष्णस्य स्वगतं वाक्यं, महाधूमेन धूमध्वजेन वह्निना· अनेन, वीन् पक्षिणो नमयति पातयतीति तेन, बन्धुजनकदनं व्यथया संभवत्येवेत्यर्थः ॥ १३७ ॥

निष्पत्त्रा निष्पत्त्राकरोति तरुश्रेणी ॥ १३८ ॥

निष्पत्त्रा भस्मीभूतदला तरुश्रेणी निष्पत्त्राकरोति, कारुण्यात्पादनादतिव्यथयतीत्यर्थः, "सपत्त्रनिष्पत्त्रादतिव्यथन" इति डाच् ॥ १३८ ॥

भयसमुत्कर्णा कर्णाभीलं करोति काकुरवैरियं च धेनुवितति: ॥ १३९ ॥

कर्णाभीलं कर्णयोः कष्टम् ॥ १३९ ॥

विततिरियं च समुड्डीना धूमलेखाभिरन्धीभवति ॥ १४० ॥

वीनां पक्षिणां ततिः श्रेणी ॥ १४० ॥

साध्वसाकुलं कुलं च हरिणानां कांदिशीकं समजनि तत् किं करोमि ॥ १४१ ॥

"कांदिशीको भयद्रुत" इत्यमरः ॥ १४१ ॥

संभाव्या न पयोदवृष्टिरधुना नद्याः पयःसेचनै-
र्नैवास्योपशमो न चापसरणे देशश्च कालश्च नः ।

इत्याचिन्तयतः स्वयं भगवतः प्रादुर्भवन्त्यैश्वरी शक्तिः काचन तं शिखासु कचवद्धृत्वा निमेषात् पपौ ॥१४२॥

तं दवदहनं, शिखासु हेतिषु, कचवत् कचेष्विव, "तत्र तस्येवे"ति वतिः ॥ १४२ ॥

ततश्च दरिद्राणां मनोरथ इव उत्पद्यमान एव प्रणष्टो हतभाग्यानां वैभवोदय इवाभुज्यमान एव तत्कालविगलितो वैद्युतो वह्निरिव न चिरस्थायी ॥ १४३ ॥

मनोरथस्य पुनरुत्पत्तिशङ्कयान्यथोपमिमीते वैभवोदय इति, तत्राप्यतिशैघ्र्येण विगलने दृष्टान्तो वैद्युतो वह्निरिति ॥ १४३ ॥

स्वप्नदृष्ट इव भ्रमोपगत इव· ऐन्द्रजालिकोदीरित इव न दृश्यमानो वनवह्निरखिलजनलज्जनकारी बभूव ॥ १४४ ॥

त्रयाणामप्युक्तदृष्टान्तानां सत्यत्वाद्दार्ष्टान्तिकस्य तु मिथ्यात्वेनैव तैरायत्यामनुभूतत्वादन्यदृष्टान्तत्रयमाह । तत्र स्वप्नस्यापि सिद्धादिषु क्वचित् सत्यत्वमाशङ्क्याह भ्रम इति । भ्रमस्यापि युगपत् सर्वजनगतत्वाभावमाशङ्क्याह·ऐन्द्रजालिक इति । लज्जनं लज्जा ॥ १४४ ॥

किमस्माभिः प्रमत्तैरिवालपितं कुतो वनाग्निरिति ॥ १४५ ॥

अथ भगवद्दृष्टिकारुण्यामृतवृष्ट्येव तृणगुल्मवृक्षादयः पूर्ववदेव सहसैवाभूवन्निति वह्निचिह्नस्य कस्याप्यदर्शनाद्विस्मिता आहुः किमस्माभिरित्यादि ॥ १४५ ॥

अथ विभातायां विभावर्यां वया श्रियं दधानेन बहुविधबहुललीलाधानेन स्वकुलभूषणेन सुधासारेण सारेणेव सर्वसौभाग्यानां स्वचने स्वाह्निततयेन तनयेन सह स ह

व्रजपुरपुरंदरोऽदरोदीर्णप्रमोदः प्रमोदयं प्रमोदयंश्च व्रज-पुरं व्रजपुरवासिभिः समं समुपससाद ॥ १४६ ॥

बहुधा बहुप्रकारेण बहुललीला दधातीति धारयतीति नन्द्यादिल्युः, तेन । सुधाया आसारेण धारासंपातरूपेण । स ह व्रजराजः, ह स्फुटम् । अदरमनल्पमुदीर्णः प्रमोदो यस्य सः । प्रमायाः प्रामाण्यस्योदयो यथा भवत्येवं प्रमोदयन्, गर्गप्रोक्तमाहात्म्याघोषेणेत्यर्थः । यद्वा, प्रमायाः प्रकृष्टशोभाया उदयो यत्र तद् व्रजपुरम् ॥ १४६ ॥

तेनाथ व्रजनगरी नाथव्रजनगरीयसीं रुजमादधाना प्रोषितभर्तृकेव तां रजनीं गमितवती रागमितवती रा-जन्तं पुनरपि पूर्वमिव ॥ १४७ ॥

इत्यानन्दवृन्दावने कैशोरलताविस्तारे कालियद-मनो नाम नवमः स्तबकः ॥ ९ ॥ :: ॥ :: ॥

नाथस्य श्रीनन्दस्य व्रजनेन गरीयसीं गुरुतरां रुजं पीडाम्·आ सम्यगदधाना धारयन्ती । अथ तेन नाथस्यागम-नेन । पुरनपि पूर्वमिव । राजन्तं रागम्· इतवती प्राप्त-वती ॥ १४७ ॥

इत्यानन्दावृन्दावनटीकायां सुखवर्तन्यां नवमस्तबकसंग-मनम् ॥ ९ ॥

SARVA-DARS'ANA-SANGRAHA.

CHAPTER V.

The System of Purṇa-prajna.

(Continued from page 209.)

This service (or obedience of which we have spoken) is trichotomised into (1) stigmatisation, (2) imposition of names, (3) worship.

Of these (1) stigmatisation is (the branding upon oneself) of the weapons of Nārāyaṇa (or Vishṇu) as a memorial of him, and as a means of attaining the end which is needful (emancipation). Thus the sequel of the Sākalya-sanhitā:

"The man who bears branded in him the discus of the immortal Vishṇu, which is the might of the gods,
He shaking off his guilt goes to the heaven (Vaikunṭha) which ascetics, whose desires are past away, enter into:
The discus Sudarśana by which, uplifted in his arm, the gods entered that heaven;
Marked wherewith the Manus projected the emanation of the world, that weapon Brāhmans wear (stamped upon them);
Stigmatised wherewith they go to the supreme sphere of Vishṇu;
Marked with the stigmas of the wide-striding (Vishṇu) let us become beatified."

Again the Taittirīyaka Upanishad says: "He whose body is not branded, is raw, and tastes it not: votaries bearing it attain thereto." "The particular parts to be branded, are specified in the Āgneya-purāṇa:

"On his right hand let the Brāhman wear Sudarśana,
On his left the conch-shell: thus have those who know the Veda declared."

In another passage is given the invocation to be recited on being branded with the discus:

"Sudarśana, brightly blazing, effulgent as ten million suns,
Show unto me, blind with ignorance, the everlasting way of Vishṇu.

॥ सर्वदर्शनसङ्ग्रहः ॥

सा च सेवा अङ्कननामकरणभजनभेदात्त्रिविधा । तत्रा-ङ्कनं नारायणायुधादीनां तद्रूपस्मरणार्थमपेक्षितार्थसिद्ध्यर्थञ्च । तथा च शाकल्यसंहितापरिशिष्टम् ॥

चक्रं बिभर्त्ति पुरुषोऽभितप्तं बलं देवानाममृतस्य विष्णोः ।
स याति नाकं दुरितावधूय विशन्ति यद्यतयो वीतरागाः ।
देवासो येन विधृतेन बाहुना सुदर्शनेन प्रयातास्तमायन् ।
येनाङ्किता मनवो लोकसृष्टिं वितन्वन्ति ब्राह्मणास्तद्वहन्ति ।
तद्विष्णोः परमं पदं येन गच्छन्ति लाञ्छिताः ।
उरुक्रमस्य चिह्नैरङ्किता लोके सुभगा भवाम इति ।

अतप्ततनूर्नतदामो अश्नुते श्रितास इद्वहन्तस्तत् समास-तेतितैत्तिरीयकोपनिषच्च । स्थानविशेषश्चाग्नेयपुराणे दर्शितः

दक्षिणे तु करे विप्रो बिभृयात्तु सुदर्शनम् ।
सव्येन शङ्खं बिभृयादिति ब्रह्मविदो, विदुरिति ॥

अन्यत्र चक्रधारणे मन्त्रविशेषश्च दर्शितः

सुदर्शनं महाज्वालं कोटिसूर्य्यसमप्रभम् ।
अज्ञानान्धस्य मे नित्यं विष्णोर्मार्गं प्रदर्शय ॥

त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे ।
नमितः सर्व्वदेवैश्च पाञ्चजन्य नमोऽस्तु ते इति ॥

नामकरणं पुत्रादीनां केशवादिनाम्ना व्यवहारः सर्व्वदा तन्नामानुस्मरणार्थम् । भजनं दशविधं वाचा सत्यं हितं प्रियं स्वाध्यायः कायेन दानं परित्राणं परिरक्षणं मनसा दया स्पृहा श्रद्धा चेति । अत्रैकैकं निष्पाद्य नारायणे समर्पणं भजनम् । तदुक्तम् ।

Digitized by Google

Thou aforetime sprangest from the sea brandished in the hand of Vishṇu,
Adored by all the gods; O Páñchajanya, to thee be adoration.

(2) Imposition of names is the appellation of sons and others by such names as Keśava, as a continual memorial of the name of the Supreme Lord.

(3) Worship is of ten kinds, viz. with the voice, (1) veracity, (2) usefulness, (3) kindliness, (4) sacred study; with the body, (5) almsgiving, (6) defence, (7) protection; with the common sensory, (8) mercy, (9) longing, and (10) faith. Worship is the dedication to Náráyaṇa of each of these as it is realised. Thus it has been said:

"Stigmatisation, imposition of names, worship; the last is of ten kinds."

Difference (or duality, between the Supreme Being and the universe) may also be inferred from cognisability and other marks, So also difference (or duality) may be understood from revelation, from texts setting out duality in emancipation and beatitude, such as: "All rejoice over truth attained; truthful, and celebrating the gift of the divine Indra, they recount his glory," "Śarva, among those that know the truth, O Bráhman, is in the universe, true spirit; true is individual spirit; truth is duality, truth is duality, in me is illusion, in me illusion, in me illusion."

Again:

"After attaining this knowledge, becoming like unto me,
In creation they are not born again, in retractation they perish not" (Bhagavad-gītā XIV. 2).

According also to such aphorisms as: Excepting cosmical operation, because of occasion, and because of non-proximity."

Nor should doubt be raised that individual spirit must be God in virtue of the text, He that knows the absolute, becomes the absolute; for this text is hyperbolically eulogistic, like the text, Worshipping a Bráhman devoutly a Śūdra becomes a Bráhman, i. e. becomes exalted.

If any one urge that according to the text:—

"If the universe existed it would doubtless come to an end";

This duality is merely illusory, and in reality a unity, and that duality is learnt to be illusorily imagined; it may be replied: What you say is true, but you do not understand its meaning; for the real meaning is If this world had been produced it would without doubt come to an end; therefore this universe is from everlasting, a five-fold dual universe; and it is not non-existent, because it is mere illusion. Illusion is defined to be the will of the Lord, in virtue of the testimony of many such passages as:

"The great illusion, ignorance, necessity, the bewilderment,
The originant, ideation—thus is thy will called, O Infinite.
The originant because it originates greatly; ideation because it produces ideas;
The illusion of Hari who is called *a* is termed (*a-vidyá*) ignorance:
Styled (*máyá*) illusion because it is pre-ëminent, for the name *máyá* is used of the pre-ëminent;
The excellent knowledge of Vishṇu is called, though one only, by these names;
For Hari is excellent knowledge, and this is characterized by spontaneous beatitude."

अङ्कनं नामकरणं भजनं दशधा च तदिति ।

एवं ज्ञेयत्वादिनापि भेदोऽनुमातव्यः तथा श्रुत्यापि भेदोऽपगन्तव्यः सत्यमेतमनुविश्वे मदन्ति रातिं देवस्य गृणतो मघोनः सत्यासो अस्य महिमा गृणे शवो यज्ञेषु विप्रराज्ये सत्य आत्मा सत्यो जीवः सत्यं भिदा सत्यं भिदा मयि वारुण्यो मयि वारुण्यो मयि वारुण्य इति मोक्षानन्दभेदप्रतिपादकश्रुतिभ्यः ।

इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ।
सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च ॥

जगद्व्यापारवर्ज्जं प्रकरणासन्निहितत्वाच्चेत्यादिभ्यश्च । न च ब्रह्म वेद ब्रह्मैव भवतीति श्रुतिबलाज्जीवस्य पारमैश्वर्य्यं शक्यशङ्कं सम्पूज्य ब्राह्मणं भक्त्या शूद्रोऽपि ब्राह्मणो भवेदितिवत् बृंहितो भवतीत्यर्थपरत्वात् । ननु

प्रपञ्चो यदि वर्त्तेत निवर्त्तेत न संशयः ।
मायामात्रमिदं द्वैतमद्वैतं परमार्थतः ॥

इति वचनात् द्वैतस्य कल्पितत्वमवगम्यत इति चेत् सत्यं भावमनभिसन्धायाभिधानात् तथा हि यद्ययमुत्पद्येत तर्हि निवर्त्तेत न संशयः । तस्मादनादिरेवायं प्रकृष्टः पञ्चविधो भेदप्रपञ्चः । न चायमविद्यमानः मायामात्रत्वान्मायेति भगवदिच्छोच्यते ।

महामायेत्यविद्येति नियतिर्मोहिनीति च ।
प्रकृतिर्वासनेत्येव तवेच्छानन्त कथ्यते ॥
प्रकृतिः प्रकृष्टकरणाद्वासना वासयेद्यतः ।
अ इत्युक्तो हरिस्तस्य मायाऽविद्येति संज्ञिता ॥
मायेत्युक्ता प्रकृष्टत्वात् प्रकृष्टे हि मयाभिधा ।
विष्णोः प्रज्ञप्तिरेवैका शब्दैरेतैरुदीर्यते ॥
प्रज्ञप्तिरूपो हि हरिः सा च स्वानन्दलक्षणा ॥

Digitized by Google

That in which this excellent knowledge produces knowledge and effects sustentation thereof, that is pure illusion; as known and sustained, therefore, by the Supreme Lord, duality is not illusorily imagined. For in the Lord illusory imagination of the universe is not possible, illusory imagination arising from non-perception of differences (which as an imperfection is inconsistent with the divine nature).

If it be asked how then that (illusory duality) is predicated, the answer is that in reality there is a non-duality, that is in reality Vishṇu being better than all else has no equal and no superior. Accordingly the grand revelation.

"A difference between soul and the Lord, a difference between the unsentient and the Lord,
A difference among souls, and a difference of the unsentient and the soul each from the other.
Also the difference of unsentient things from one another, the world with its five divisions.
This same is real and from all eternity; if it had had a beginning it would have an end:
Whereas it does not come to an end; and it is not illusorily imagined:
For if it were imagined it would cease, but it never ceases.
That there is no duality is therefore the doctrine of those that lack knowledge;
For this the doctrine of those that have knowledge is known and sustained by Vishṇu."

The purpose then of all revelations is to set out the supreme excellence of Vishṇu. With this in view the Lord declared:

"Two are these persons in the universe, the perishable and the imperishable;
The perishable is all the elements; the imperishable is the unmodified.
The other, the most excellent person, called the Supreme Spirit,
Is the undecaying Lord, who pervading sustains the three worlds.
Since transcending the perishable, I am more excellent than the imperishable (soul),
Hence I am celebrated among men and in the Veda as the best of persons *(Purushottama)*;
He who uninfatuated knows me thus the best of persons, he all-knowing worships me in every wise.
Thus this most mysterious institute is declared, blameless (Arjuna):
Knowing this a man may be wise, and may have done what he has to do, O Bhārata."

(Bhagavad-gītā, XV-16-20).

So in the Mahā-varāha:

"The primary purport of all the Vedas relates to the supreme spouse of Srī;
Its purport regarding the excellence of any other deity must be subordinate."

It is reasonable that the primary purport should regard the supreme excellence of Vishṇu. For emancipation is the highest end of all men, according to the text of the Bhāllaveya Upanishad: While merit, wealth, and enjoyment are transitory, emancipation is eternal; therefore a wise man should strive unceasingly to attain thereto. And emancipation is not won without the grace of Vishṇu, according to the text of the Nārāyaṇa Upanishad: Through whose grace is the highest state, through whose essence he is liberated from transmigration, while inferior men propitiating the divinities are not emancipated; the supreme object of discernment

इत्यादिवचननिचयप्रामाण्यबलात् सैव प्रज्ञा मानत्राणकर्त्री च यस्य तन्मायामात्रं ततश्च परमेश्वरेण ज्ञातत्वाद्रक्षितत्वाच्च न द्वैतं भ्रान्तिकल्पितं न हीश्वरे सर्व्वस्य भ्रान्तिः सम्भवति विशेषादर्शननिबन्धनत्वाद्भ्रान्तेः ।

तर्हि तद्व्यपदेशः कथमित्यत्रोत्तरमद्वैतं परमार्थत इति । परमार्थत इति परमार्थापेक्षया तेन सर्व्वस्मादुत्तमस्य विष्णुतत्वस्य समाभ्यधिकशून्यत्वमुक्तं भवति । तथाच परमा श्रुतिः,

जीवेश्वरभिदा चैव जडेश्वरभिदा तथा ।
जीवभेदो मिथश्चैव जडजीवभिदा तथा ॥
मिथश्च जडभेदो यः प्रपञ्चो भेदपञ्चकः ।
सोऽयं सत्योऽप्यनादिश्च सादिश्चेन्नाशमाप्नुयात् ॥
न च नाशं प्रयात्येष न चासौ भ्रान्तिकल्पितः ।
कल्पितश्चेन्निवर्त्तेत न चासौ विनिवर्त्तते ॥
द्वैतं न विद्यत इति तस्मादज्ञानिनां मतम् ।
मतं हि ज्ञानिनामेतन्मितं त्रातं हि विष्णुना ॥
तस्मान्मात्रमिति प्रोक्तं परमो हरिरेव त्वित्यादि ॥

तस्माद्विष्णोः सर्व्वोत्कर्ष एव तात्पर्य्यं सर्व्वागमानाम् । एतदेवाभिसन्धायाभिहितं भगवता

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
क्षरः सर्व्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥
उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।
यो लोकत्रयमाविश्य बिभर्त्त्यव्यय ईश्वरः ॥
यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः ।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥
यो मामेवमसम्मूढो जानाति पुरुषोत्तमम् ।
स सर्व्वविद्भजति मां सर्व्वभावेन भारत ॥

Digitized by Google

to those who desire to be liberated from this snare of works. According also to the words of the Vishṇu-purāṇa:

"If he be propitiated, what may not here be won? Enough of all wealth, and enjoyments. These are scanty enough. On climbing the tree of the supreme essence without doubt a man attains to the fruit of emancipation."

And it is declared that the grace of Vishṇu is won only through the knowledge of his excellence, not through the knowledge of non-duality. Nor is there in this doctrine any confliction with texts declaratory of the identity (of individual and absolute spirit) such as That art thou, (for this pretended identity) is mere babbling from ignorance of the real purport.

"The word That when undetermined designates
the eternally unknown,
The word Thou designates a knowable entity;
how can these be one?"

And this text (That art thou) indicates similarity (not identity), like the text The sun is the sacrificial post. Thus the grand revelation:

"The ultimate unity of the individual soul is either
similarity of cognition,
Or entrance into the same place, or in relation to
the place of the individual;
Not essential unity, for even when it is emancipated it is different,
The difference being independence and completeness (in the Supreme Spirit), and smallness and dependence (in the individual spirit)."

Or to propose another explanation of the text *Ātmā tat tvam asi* That art thou, it may be divided *ātmā atat tvam asi.* He alone is soul as possessing independence and other attributes, and thou art not-that *(atat)*, as wanting those attributes; and thus the doctrine of unity is utterly expelled. Thus it has been said:

"Or the division may be *Atat tvam,* and thus unity
will be well got rid of."

According, therefore, to the Tattva-vāda-rahasya the words in the nine examples (in the Chhāndogya Upanishad) He like a bird tied with a string, &c., teach unity with the view of giving an example of non-duality. Accordingly the Mahopanishad:

"Like a bird and the string; like the juices of
various trees;
Like rivers and the sea; like fresh and salt
water;
Like a robber and the robbed; like a man and
his energy;
So are soul and the Lord diverse, for ever different.
Nevertheless from subtilty (or imperceptibility),
of form, the supreme Hari
Is not seen by the dim-sighted to be other than
the individual spirit, though he is its actuator;
On knowing their diversity a man is emancipated:
otherwise he is bound."

And again:

"Brahmā, Siva, and the greatest of the gods decay
with the decay of their bodies;
Greater than these is Hari, undecaying, because
his body is for the sustentation of Lakshmī.
By reason of all his attributes, independence,
power, knowledge, pleasure, and the rest,
All they, all the deities, are in unlimited obedience to him."

And again:

"Knowing Vishṇu full of all excellences, the soul
exempted from transmigration,
Rejoices in his presence for ever, enjoying painless
bliss.

इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ ।
एतद्बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारतेति ॥

महावराहे ऽपि ।

मुख्यञ्च सर्व्ववेदानां तात्पर्य्यं श्रीपतौ परे ।
उत्कर्षे तु तदन्यच्च तात्पर्य्यं स्यादवान्तरमिति ॥

युक्तञ्च विष्णोः सर्व्वोत्कर्षे महातात्पर्य्यम् । मोक्षो हि सर्व्वपुरुषार्थोत्तमः धर्म्मार्थकामास्त्वनित्याः मोक्ष एव नित्यः। तस्मान्नित्यं तदर्थाय यतेत मतिमान्नर इति भाल्लवेयश्रुतेः। मोक्षश्च विष्णुप्रसादमन्तरेण न लभ्यते । यस्य प्रसादात् परमा यत्स्वरूपात् तस्मात् संसारान्मुच्यते नापरेसुराराधयन्तो ऽसौ परमो विचिन्त्यो मुमुक्षुभिः कर्म्मपाशादमुष्मादिति नारायणश्रुतेः ।

तस्मिन् प्रसन्ने किमिहास्त्यलभ्यं
सर्व्वार्थकामैरलमल्पकास्ते ।
समाश्रिताद्ब्रह्मतरोरनन्तात्
निःसंशयं मुक्तिफलं प्रयात इति

विष्णुपुराणोक्तेश्च । प्रसादश्च गुणोत्कर्षज्ञानादेव नभेदज्ञानादित्युक्तम् । न च तत्त्वमस्यादितादात्म्यश्रुत्याकोपः, श्रुतितात्पर्य्यापरिज्ञानविजृम्भणात् ।

आह नित्यपरोक्षन्तु तच्छब्दो ह्यविशेषितः ।
त्वंशब्दश्चापरोक्षार्थं तयोरैक्यं कथं भवेत् ॥
आदित्योयूप इतिवत् सादृश्यार्था तु सा श्रुतिरिति ।

तथाच परमा श्रुतिः

जीवस्य परमैक्यञ्च बुद्धिसारूप्यमेव वा ।
एकस्थाननिवेशो वा व्यक्तिस्थानमपेक्ष्य वा ॥
न स्वरूपैकता तस्य मुक्तस्यापि विरूपतः ।
स्वातन्त्र्यपूर्णतेऽल्पत्वपारतन्त्र्ये विरूपतेति ।

Vishnu is the refuge of liberated souls, and their supreme ruler.

"Obedient to him are they for ever; he is the Lord."

That by knowledge of one thing there is knowledge of all things may be evinced from its supremacy and casuality, not from the falsity of all things. For knowledge of the false cannot be brought about by knowledge of real existence. As we see the current assurance and expression that by knowing or not knowing its chief men, a village is known or not known; and as when the father the cause is known, a man knows the son; (so by knowing the supreme, and the cause, the inferior and the effect, is known). Otherwise (on the doctrine of the Advaita-vādins that the world is false and illusory) the words *one* and *lump* in the text By one lump of clay, fair sir, all that is made of clay is recognised, would be used to no purpose, for the text must be completed by supplying the words By reason of clay recognised. For the text Utterance with the voice, modification, name, clay (or other determinate object),—these alone are real, cannot be assumed to impart the falsity of things made; the reality of these being admitted, for what is meant is, that of which utterance with the voice is a modification, is unmodified, eternal; and a name such as clay, such speech is true. Otherwise it would result that the words *name* and *alone* would be otiose. There is no proof anywhere, then, that the world is unreal. Besides (we would ask) is the statement that the world is false itself true or false? If the statement is true, there is a violation of a real non-duality. If the statement is untrue it follows that the world is true.

Perhaps it may be objected that this dilemma is a kind of fallacious reasoning, like the dilemma: Is transitoriness permanent or transitory? There is a difficulty in either case. As it is said by the author of the Nyāya-nirvāṇa: The proof of the permanence of the transitory, as being both permanent and transitory. is a fallacy. And in the Tārkika-rakshā:

> When a mode cannot be evinced to be either such and such, or not such and such,
> The denial of a subject characterised by such a mode is called Nitya-sama.

With the implied mention of this same technical expression it is stated in the Prabodha-siddhi: Equality of characteristic modes results from significancy. If it be said, This then is a valid rejoinder, we reply: This is a mere scaring of the uninstructed, for the source of fallacy has not been pointed out. This is two-fold, general and particular: of these the former is self-destructive, and the latter is of three kinds, defect of a requisite element, excess of an element not requisite, and residence in that which is not the subjicible subject. Of these (two forms of the fallacy) the general form is not suspected, no self-pervasion being observed in the dilemma in question, (viz. Is the statement that the world is unreal, itself true or false? &c.) So likewise the particu-

---

अथवा तत्त्वमसीत्यत्र स एवात्मा स्वातन्त्र्यादिगुणोपेतत्वात्, अतस्त्वमसि त्वं तद्भवसि तद्रहितत्वादित्येकत्वमतिशयेननिराकृतम् । तदाह

अतत्त्वमिति वा च्छेदस्तेनैक्यं सुनिराकृतमिति ।

तस्मात् दृष्टान्तनवकेऽपि स यथा शकुनिः सूत्रेण बद्ध इत्यादिना भेदएव दृष्टान्ताभिधानायायमभेदापदेश इति तत्त्ववादरहस्यम् । तथाच महोपनिषत् ।

यथा पक्षी च सूत्रञ्च नानावृक्षरसा यथा ।
यथा नद्यः समुद्राश्च शुद्धोदलवणे यथा ॥
चोरापहार्य्यौ च यथा यथा पुंविषयावपि ।
तथा जीवेश्वरौ भिन्नौ सर्व्वदैव विलक्षणौ ॥
तथापि सूक्ष्मरूपत्वान्न जीवात् परमो हरिः ।
भेदेन मन्ददृष्टीनां दृश्यते प्रेरकोऽपि सन् ॥
वैलक्षण्यं तयोर्ज्ञात्वा मुच्यते बध्यते ऽन्यथेति ।
ब्रह्मा शिवः सुराद्याश्च शरीरक्षरणात् क्षराः ।
लक्ष्मीरक्षरदेहत्वादक्षरातः परो हरिः ॥
स्वातन्त्र्यशक्तिविज्ञानसुखाद्यैरखिलैर्गुणैः ।
निःसीमत्वेन ते सर्व्वे तद्वशाः सर्व्वदेवता इति ॥
विष्णुं सर्व्वगुणैः पूर्णं ज्ञात्वा संसारवर्ज्जितः ।
निर्दुःखानन्दभुङ्नित्यं तत्समीपे स मोदते ॥
मुक्तानाञ्चाश्रयो विष्णुरधिकाधिपतिस्तथा ।
तद्वशा एव ते सर्व्वे सर्व्वदैव स ईश्वर इति च ॥

एकविज्ञानेन सर्व्वविज्ञानञ्च प्रधानत्वकारणत्वादिना युज्यते न तु सर्व्वमिथ्यात्वेन । न हि सत्याज्ञानेन मिथ्याज्ञानं सम्भवति, यथा प्रधानपुरुषाणां ज्ञानाज्ञानाभ्यां ग्रामो ज्ञातः अज्ञात इत्येवमादिव्यपदेशो दृष्ट एव । यथा च कारणे पितरि ज्ञाते जानात्यस्य पुत्रमिति । अन्यथा सौम्यैकेन मृत्पिण्डेन सर्व्वं मृण्मयं विज्ञातमित्यत्र एकपिण्डशब्दौ वृथा प्रसज्येयातां मृदा विज्ञातयेत्येतावतैव वाक्यस्य पूर्णत्वात् । न च वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमित्येतत् कार्य्यस्य मिथ्यात्वमाचष्टे इत्येष्टव्यं वाचारम्भणं विकारो यस्य तत् अविकृतं नित्यं नामधेयं मृत्तिकेत्यादिकमित्येतद्वचनं सत्यमिति तथ्यस्य स्वीकारात् । अपरथा नामधेयमेवेति शब्दयोर्वैयर्थ्यं प्रसज्येत । अतो न कुत्रापि जगतो मिथ्यात्वसिद्धिः । किञ्च प्रपञ्चो मिथ्येत्यत्र मिथ्यात्वं तथ्यमतथ्यं वा । प्रथमे सत्याद्वैतभङ्गप्रसङ्गः, चरमे प्रपञ्चसत्यत्वापातः । नन्वनित्यत्वं नित्यमनित्यं वा उभयथाप्यनुपपत्तिरित्याक्षेपवद्द्वयमपि नित्यसमजातिभेदः स्यात् । तदुक्तं न्यायनिर्व्वाणवेधसा, नित्यमनित्यभावादनित्ये नित्यत्वोपपत्तेर्नित्यसम इति । तार्किकरक्षायाञ्च ।

lar, for if a water-jar be said to be non-existent the affirmation of its non-existent is equally applicable to the water-jar, as that of its existence.

If you reply: We accept the unreality (or falsity) of the world, not its non-existence; this reply is about as wise as the procedure of the carter who will lose his head rather than pay a hundred pieces of money, but will at once give five score; for falsity and non-existence are synonymous. We dismiss further prolixity.

The meaning of the first aphorism, viz. Then hence the absolute is to be desired to be known, is as follows. The word *then* is allowed to purport auspiciousness, and to designate subsequency to qualification. The word *hence* indicates a reason.

Accordingly it is stated in the Gáruḍa-puráṇa:

"All the aphorisms begin with the words Then and Hence regularly; what then is the reason of this?
And what is the sense of those words, O sage? Why are those the most excellent,
Tell me this, Brahmá, that I may know it truly.
Thus addressed by Nárada, themost excellent Brahmá replied:
The word then is used of subsequency and of competency, and in an auspicious sense,
And the word thence is employed to indicate the reason."

It is laid down that we must institute inquiries about the absolute, because emancipation is not attained without the grace of Náráyana, and his grace is not attained without knowledge. The absolute, about which the inquiry is to be instituted, is described in the words (of the second aphorism): From which the genesis and so forth of this. The meaning of the sentence is that the absolute is that from which results emanation, sustentation, and retractation; according to the words of the Skánda-puráṇa:

"He is Hari the sole ruler, the spirit from whom are emanation, sustentation, retractation, necessity, knowledge, involution (in illusion) and bondage and liberation;

and according to such Vedic texts From which are these. The evidence adducible for this is described (in the third aphorism): Because it has its source from the system. That the absolute should be reached by way of inference is rejected by such texts as He that knows not the Veda cogitates not that mighty one; Him described in the Upanishads. Inference moreover is not by itself authoritative, as is said in the Kaurma-puràna:

"Inference uncompanioned by revelation in no case
Can definitely prove a matter, nor can any other form of evidence;
Whatsoever other form of inference, companioned by revelation and tradition,
Acquires the rank of probation. About this there can be no hesitation."

What a Sástra (or system of sacred institutes) is, it has been stated in the Skānda-purāna:

धर्म्मस्य तदतद्रूपविकल्पानुपपत्तितः ।
धर्म्मिणस्तद्द्विशिष्टत्वभङ्गो नित्यसमो भवेदिति ॥

अस्याः संज्ञायाः उपलक्षणत्वमभिप्रेत्याभिहितं प्रबोधसिद्धौ, अन्वर्थत्वात्तूपरञ्जकधर्म्ममेति । तस्मात् सदुत्तरमेतदिति चेत् । अशिक्षितत्रासनमेतत् । दुष्टत्वमूलानिरूपणात् । तद्द्विविधं, साधारणमसाधारणञ्च, तत्राद्यं स्वव्याघातकं, द्वितीयं त्रिविधं, युक्ताङ्गहीनत्वमयुक्ताङ्गाधिकत्वमविषयवृत्तित्वञ्चेति । तत्र साधारणमसम्भावितमेव उक्तस्याक्षेपस्य स्वात्मव्यापनानुपलम्भात् । एवमसाधारणमपि घटस्य नास्तितायां नास्तितोक्तावस्तित्ववत् प्रकृतेऽप्युपपत्तेः । ननु प्रपञ्चस्य मिथ्यात्वमभ्युपेयते नासत्त्वमिति चेत्तदेतत् सोऽयं शिरश्छेदेऽपि शतं न ददाति विंशतिपञ्चकन्तु प्रयच्छतीति शाकटिकवृत्तान्तमनुहरेत् मिथ्यात्वासत्त्वयोः पर्य्यायत्वादित्यलमतिप्रपञ्चेन ।

तत्राथातो ब्रह्म जिज्ञासेति प्रथमसूत्रस्यायमर्थः । तत्राथशब्दो मङ्गलार्थोऽधिकारानन्तर्य्यार्थश्च स्वीक्रियते । अतःशब्दो हेत्वर्थः तदुक्तं गारुडे

अथातःशब्दपूर्व्वाणि सूत्राणि निखिलान्यपि ।
प्रारभेत नियत्यैव तत्किमत्र नियामकम् ॥
कश्चार्थस्तु तयोर्विद्वान् कथमुत्तमता तयोः ।
एतदाख्याहि मे ब्रह्मन् यथा ज्ञास्यामि तत्त्वतः ॥

एवमुक्तो नारदेन ब्रह्मा प्रोवाच सत्तमः ।
आनन्तर्य्याधिकारे च मङ्गलार्थे तथैव च ॥
अथशब्दस्त्वतःशब्दो हेत्वर्थे समुदीरित इति ।

यतो नारायणप्रसादमन्तरेण न मोक्षो लभ्यते प्रसादश्च ज्ञानमन्तरेण अतो ब्रह्मजिज्ञासा कर्त्तव्येति सिद्धम् । जिज्ञास्यब्रह्मणोलक्षणमुक्तं जन्माद्यस्य यत इति । सृष्टिस्थित्यादि यतो भवति तद् ब्रह्मेति वाक्यार्थः । तथा च स्कान्दं वचः,

उत्पत्तिस्थितिसंहारा नियतिर्ज्ञानमावृतिः ।
बन्धमोक्षौ च पुरुषाद्यस्मात् स हरिरेकराडिति ॥

यतो वा इमानीत्यादिश्रुतिभ्यश्च । तत्र प्रमाणमप्युक्तं शास्त्रयोनित्वादिति । नावेदविन्मनुते तं बृहन्तं तन्त्वौपनिषदमित्यादिश्रुतिभ्यः तस्यानुमानिकत्वं निराक्रियते । न चानुमानस्य स्वातन्त्र्येण प्रामाण्यमस्ति । तदुक्तं कौर्म्मे,

श्रुतिसाहाय्यरहितमनुमानं न कुत्रचित् ।
निश्चयात् साधयेदर्थं प्रमाणान्तरमेव च ॥
श्रुतिस्मृतिसहायं यत् प्रमाणान्तरमुत्तमम् ।
प्रमाणपदवीं गच्छेन्नात्र कार्य्या विचारणेति ॥

शास्त्रस्वरूपमुक्तं स्कान्दे ।

ऋग्यजुःसामाथर्व्वा च भारतं पाञ्चरात्रकम् ।
मूलरामायणञ्चैव शास्त्रमित्यभिधीयते ॥

Digitized by Google

"The Rig-veda, the Yajur-veda, the Sáma-veda, the Atharva-veda, the Mahā-bhārata, the Pancha-rātra, and the original Rāmāyana, are called Śāstras.

That also which is conformable to these is called Śāstra.

Any aggregate of composition other than this is a heterodoxy."

According then to the rule that the sense of the sacred institutes is not to be taken from other sources than these, the Monist view, viz. that the purport of the texts of the Veda relates not to the duality learnt from those but to non-duality, is rejected: for as there is no proof of a God from inference, so there is no proof of the duality between God and other things from inference. Therefore there can be in these texts no mere explanation of such duality, and the texts must be understood to indicate the duality. Hence it is that it has said:

"I ever laud Nārāyaṇa, the one being to be known from genuine revelation, who transcends the perishable and the imperishable, without imperfections, and of inexhaustible, excellences."

It has thus been evinced that the sacred institutes are the evidence of (the existence of) this (ultimate reality, *Brahman*). (The fourth aphorism is:) But that is from the construction. In regard to this the commencement and other elements are stated to be the marks of the construction, in the Bṛihat-samhitā:

"Commencement, conclusion, reiteration, novelty, result, eulogy, and demonstration, are the marks by which the purport is ascertained."

It is thus stated that in accordance with the purport of the Upanishads the absolute is to be apprehended only from the sacred institutes. We have here given merely a general indication. What remains may be sought from the Ánanda-tírtha-bháshya-vyákhyána (or exposition of the Commentary of Ánanda-tírtha). We desist for fear of giving an undue prolixity to our treatise. This mystery was promulgated by Púrna-prajña Madhya-mandira, who esteemed himself the third incarnation of Váyu:

"The first was Hanumat, the second Bhíma,
The third Pūrṇa-prajña, the works of the work of the Lord,"

After expressing the same idea in various passages he has written the following stanza at the conclusion of his work:

"That whereof the three divine forms are declared in the text of the Veda, sufficiently
Has that been set forth; this is the whole majesty in the splendour of the Veda;
The first incarnation of the Wind-god was he that bowed to the words of Ráma (Hanumat); the second was Bhíma;
By this Madhva, who is the third, this book has been composed in regard to Keśava."

The import of this stanza may be learntly considering various Vedic texts.

The purport of this is that Vishṇu is the principle above all others in every system of sacred institutes. Thus all is clear.

A. E. G.

यच्चानुकूलमेतस्य तच्च शास्त्रं प्रकीर्त्तितम् ।
अतोऽन्यो ग्रन्थविस्तारो नैव शास्त्रं कुवर्त्म तदिति ॥

तदनेनानन्यलभ्यः शास्त्रार्थ इति न्यायेन भेदस्य प्राप्तत्वेन तत्र न तात्पर्य्यं किन्त्वद्वैत एव वेदवाक्यानां तात्पर्य्यमिति अद्वैतप्रत्याशा प्रतिक्षिप्ता अनुमानादीश्वरस्य सिद्ध्यभावेन तद्भेदस्यापि ततः सिद्ध्यभावात् । तस्माच्च भेदानुवादकत्वमिति तत्परत्वमवगम्यते । अत एवोक्तम्,

सदागमैकविज्ञेयं समतीतक्षराक्षरम् ।
नारायणं सदा वन्दे निर्दोषाशेषसद्गुणमिति ॥

शास्त्रस्य तत्र प्रामाण्यमुपपादितं तत्तु समन्वयादिति । समन्वय उपक्रमादिलिङ्गम् । उक्तं बृहत्संहितायाम्,

उपक्रमोपसंहारावभ्यासोऽपूर्व्वता फलम् ।
अर्थवादोपपत्ती च लिङ्गं तात्पर्य्यनिर्णय इति ॥

एवं वेदान्ततात्पर्य्यवशात्तदेव ब्रह्म शास्त्रगम्यमित्युक्तं भवति । दिङ्मात्रमत्र प्रादर्शि शिष्टमानन्दतीर्थभाष्यव्याख्यानादौ द्रष्टव्यं ग्रन्थबहुत्वभियोपरम्यत इति । एतच्च रहस्यं पूर्णप्रज्ञेन मध्यमन्दिरेण वायोस्तृतीयावतारम्मन्येन निरूपितमिति ।

प्रथमस्तु हनूमान् स्यात् द्वितीयो भीम एव च ।
पूर्णप्रज्ञस्तृतीयश्च भगवत्कार्य्यसाधक इति ॥

एतदेवाभिप्रेत्य तत्र तत्र ग्रन्थसमाप्ताविदं पद्यं लिख्यते ।

यस्य त्रीण्युदितानि वेदवचने दिव्यानि रूपाण्यलं
ह्येतद्दर्शितमित्थमेतदखिलं वेदस्य गर्भं महः ।
वायो रामवचोनतं प्रथमकं पृक्षो द्वितीयं वपु-
र्मध्वो यत्तु तृतीयमेतदमुना ग्रन्थः कृतः केशवे ॥

एतत्पद्यार्थस्तु बलित्थातद्वपुलियाधि दर्शितं देवस्य भर्गः महो यतोऽज्ञनीत्यादिश्रुतिपर्य्यालोचनयावगम्यत इति । तस्मात् सर्वस्य शास्त्रस्य विष्णुतत्त्वं सर्वोत्तममित्यत्र तात्पर्य्यमिति सर्व्वं निरवद्यम् ॥

इति सर्व्वदर्शनसंग्रहे पूर्णप्रज्ञदर्शनम् ।

UNIVERSITY OF BOMBAY,

WILSON PHILOLOGICAL LECTURESHIP.

The first series of Lectures will be delivered in Bombay in the first, or cold-weather, term of 1876-77. Subject:—Sanskrit and the Prakrit Languages derived from it.

The series will consist of not fewer than six Lectures.

Candidates for the Lectureship are invited to send in their applications to the undersigned, on or before the first day of May next.

D. C. BOYD, M. A.,
University Registrar.

Bombay, 4th March, 1876.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO, AT THE MEDICAL HALL PRESS, BENARES.

Digitized by Google

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 119. Benares, April 1st, 1876. Vol. X.

॥ काशिकायाः ॥

पञ्चमाध्यायस्य द्वितीयः पादः ॥

तेन वित्तश्चुञ्चुप्चणपौ ॥ २६ ॥

तेनेति तृतीयासमर्थाद्वित्त इत्येतस्मिन्नर्थे चुञ्चुप् चणप् इत्येतौ प्रत्ययौ भवतः । वित्तः प्रतीतो ज्ञात इत्यर्थः । विद्यया वित्तः । विद्याचुञ्चुः । केशचणः ॥

विनञ्भ्यां नानाञौ नसह ॥ २७ ॥

वि नञ् इत्येताभ्यां यथासंख्यं ना नाञ् इत्येतौ भवतः । नसहेति प्रकृतिविशेषणम् । असहार्थे पृथग्भावे वर्त्तमानाभ्यां विनञ्भ्यां स्वार्थे नानाञौ प्रत्ययौ भवतः । विना । नाना ॥

वेः शालच्छङ्कटचौ ॥ २८ ॥

विशब्दाच् शालच् शङ्कटच् इत्येतौ भवतः । साधनक्रियावचनादुपसर्गात्स्वार्थे प्रत्ययौ भवतः । विगते शृङ्गे विशाले । विशङ्कटे । तद्योगाद्गोरपि विशालो विशङ्कट इत्युच्यते । परमार्थतस्तु गुणशब्दा एते यथाकथंचिद्व्युत्पाद्यन्ते । नात्र प्रकृतिप्रत्ययार्थयोरभिनिवेशः ॥

संप्रोदश्च कटच् ॥ २९ ॥

सम् प्र उद् इत्येतेभ्यः कटच् प्रत्ययो भवति । चकाराद्वेश्च । संकटम् । प्रकटम् । उत्कटम् । विकटम् ॥ कटच्प्रकरणे ऽलाबूतिलोमाभङ्गाभ्यो रजस्युपसंख्यानम् ॥ * ॥ अलाबूनां रजो ऽलाबूकटम् । तिलकटम् । उमाकटम् । भङ्गाकटम् ॥ गोष्ठादयः स्थानादिषु पशुनामादिभ्य उपसंख्यानम् ॥ * ॥ गवां स्थानं, गोगोष्ठम् । माहिषीगोष्ठम् ॥ संघाते कटच् वक्तव्यः ॥ * ॥ अवीनां संघातः, अविकटम् ॥ विस्तारे पटच् वक्तव्यः ॥ * ॥ अविपटम् ॥ द्वित्वे गोयुगच् ॥ * ॥ उष्ट्रगोयुगम् । अश्वगोयुगम् ॥ प्रकृत्यर्थस्य षट्त्वे षड्गवच् ॥ * ॥ हस्तिषड्गवम् । अश्वषड्गवम् ॥ विकारे स्नेहने तैलच्* ॥ * ॥ एरण्डतैलम् । इङ्गुदीतैलम् । तिलतैलम् ॥ भवने क्षेत्रे इक्ष्वादिभ्यः शाकटशाकिनौ ॥ * ॥ इक्षुशाकटम् । मूलकशाकटम् । इक्षुशाकिनम् । मूलकशाकिनम् ॥

अवात्कुटारच्च ॥ ३० ॥

अवशब्दात् कुटारच् प्रत्ययो भवति । चकारात् कटच् । अवकुटारम् । अवकटम् ॥

नते नासिकायाः संज्ञायां टीटञ्नाटज्भ्रटचः ॥ ३१ ॥

अवादित्येव । नमनं नतम् । नासिकायाः संबन्धिनि नते ऽभिधेये टीटच् नाटच् भ्रटच् इत्येते प्रत्यया भवन्ति संज्ञायां विषये । नासिकाया नत,मवटीटम् । अवनाटम् । अवभ्रटम् । तद्योगान्नासिकापि, पुरुषोपि तथोच्यते । अवटीटः । अवनाटः । अवभ्रट इति ॥

नेर्बिडज्बिरीसचौ ॥ ३२ ॥

नते नासिकाया इत्यनुवर्त्तते, संज्ञायामिति च । निशब्दान्नासिकाया नते ऽभिधेये बिडच् बिरीसच् इत्येतौ प्रत्ययौ भवतः । निबिडम् । निबिरीसम् । तद्योगान्नासिकापि, पुरुषोपि निबिडो, निबिरीसः । कथं निबिडाः केशाः । निबिडं वस्त्रम् । उपमानाद्भविष्यति ॥ †

* स्नेहे तैलच् ॥ पा० २ । अयमेव च पाठः पदमञ्जरीसंमतः ।
† भविष्यतीत्यस्याग्रे घनत्वसाधर्म्यादित्यधिकं कुत्र चित् ।

Digitized by Google

इनच्पिटच्चिक चि च ॥ ३३ ॥

नेरित्येव, नते नासिकाया इति च । निशब्दान्नासिकाया नतेऽभिधेये इनच् पिटच् इत्येतौ प्रत्ययौ भवतस्तत्संनियोगेन च निशब्दस्य यथासंख्यं चिक चि इत्येतावादेशौ भवतः । चिकिनः । चिपिटः ॥ ककारः प्रत्ययो वक्तव्यश्चिकश्च प्रकृत्यादेशः ॥ * ॥ चिक्कः । तथा चोक्तम् ॥ इनच्पिटच्काश्चिकचिचिकादेशाश्च वक्तव्या इति ॥ क्लिन्नस्य चिल् पिल्लश्चास्य चक्षुषी ॥ * ॥ क्लिन्नस्य चिल् पिल् इत्येतावादेशौ भवतो लश्च प्रत्ययोऽस्य चक्षुषी इत्येतस्मिन्नर्थे । क्लिन्ने अस्य चक्षुषी, चिल्लः । पिल्लः ॥ चुलादेशो वक्तव्यः ॥ * ॥ चुल्लः । अस्येत्यनेन नार्थः । चक्षुषोरेवाभिधाने प्रत्यय इष्यते । क्लिन्ने चक्षुषी, चिल्ले । पिल्ले । चुल्ले । तद्योगात्तु पुरुषस्तथोच्यते ॥

उपाधिभ्यां त्यकन्नासन्नारूढयोः ॥ ३४ ॥

उप अधि इत्येताभ्यां यथासंख्यमासन्नारूढयोर्वर्त्तमानाभ्यां स्वार्थे त्यकन्प्रत्ययो भवति । संज्ञाधिकाराच्च नियतविषयमासन्नारूढं गम्यते । पर्वतस्यासन्नमुपत्यका । तस्यैवारूढमधित्यका । प्रत्ययस्थात्कात्पूर्वस्येतीत्वमत्र न भवति संज्ञाधिकारादेव * ॥

कर्मणि घटोऽठच् ॥ ३५ ॥

निर्देशादेव समर्थविभक्तिः । कर्मशब्दात्सप्तमीसमर्थाद् घट इत्येतस्मिन्नर्थेऽठच् प्रत्ययो भवति । घटतइति घटः † । कर्मणि घटते, कर्मठः पुरुषः ॥

तदस्य संजातं तारकादिभ्य इतच् ॥ ३६ ॥

तदिति प्रथमासमर्थेभ्यस्तारकादिभ्यः शब्देभ्योऽस्येति षष्ठ्यर्थे इतच् प्रत्ययो भवति । संजातग्रहणं प्रकृतिविशेषणम् । तारकाः संजाता अस्य नभसस्तारकितं नभः । पुष्पितो वृक्षः । तारका । पुष्प । मुकुल । कण्टक । पिपासा । सुख । दुःख । ऋजीष । कुड्मल । सूचक । रोग । विचार । व्याधि । निष्क्रमण । मूत्र । पुरीष । किसलय । कुसुम । प्रचार । तन्द्रा । वेग । पुत्रा । श्रद्धा । उत्कण्ठ । भर । द्रोह ॥ गर्भादप्राणिनि ‡ ॥ तारकादिराकृतिगणः ॥

* नहि कृते इत्त्वे संज्ञा प्रतीयते । इत्यधिकं क्वचित् ।

† घट इत्यस्यार्थे पचाद्यजित्यधिकं बहुषु पुस्तकेषु । परं स्वयमपपाठः, पदमञ्जर्यां दर्शनात् ।

‡ फल । उच्चार । स्तबक । पल्लव । खण्ड । धेनुष्या । अभ्र । अङ्गारक । अङ्गार । वर्णक । पुलक । कुवलय । शैवल । गर्व । तरङ्ग । कल्लोल । पण्डा । चन्द्र । स्रवक । मुद्रा । राग । कण्टक । हस्त । कर । सीमन्त । कर्दम । कज्जल । कलङ्क । कुतूहल । कन्दल । आन्दोल । अन्धकार । कोरक । अङ्कुर । रोमाञ्च । हर्ष । उत्कर्ष । क्षुधा । ज्वर । गोर । दोह । शास्त्र । मुकुर । तिलक । बुभुक्षा । निद्रा । एते शब्दाः पुस्तकान्तरेऽत्र गणेऽधिकाः ।

प्रमाणे द्वयसज्दघ्नञ्मात्रचः ॥ ३७ ॥

तदस्येत्यनुवर्त्तते । तदिति प्रथमासमर्थादस्येति षष्ठ्यर्थे द्वयसच् दघ्नच् मात्रच् इत्येते प्रत्यया भवन्ति यत्तत्प्रथमासमर्थं प्रमाणं चेत्तद्भवति । ऊरुः प्रमाणमस्य, ऊरुद्वयसम् । ऊरुदघ्नम् । ऊरुमात्रम् । जानुमात्रम् । जानुद्वयसम् । जानुदघ्नम् ।

“प्रथमश्च द्वितीयश्च ऊर्ध्वमाने मतौ मम” ।

ऊरुद्वयसमुदकम् । ऊरुदघ्नमुदकम् । मात्रच्पुनरविशेषेण, प्रस्थमात्रमित्यपि भवति ॥ प्रमाणे लो वक्तव्यः ॥ * ॥ प्रमाणशब्दा इति ये प्रसिद्धास्तेभ्य उत्पन्नस्य प्रत्ययस्य लुग्भवति । शमः प्रमाणमस्य, शमः । दिष्टिः । वितस्तिः ॥ द्विगोर्नित्यम् ॥ * ॥ द्वौ शमौ प्रमाणमस्य, द्विशमः । त्रिशमः । द्विवितस्तिः । नित्यग्रहणं किम् । संशये श्राविणं * वक्ष्यति । तत्रापि द्विगोर्लुगेव यथा स्यात् । द्वे दिष्टी स्यातां वा नवा, द्विदिष्टिः ॥ डट् स्तोमे वक्तव्यः ॥ * ॥ पञ्चदशस्तोमः । पञ्चदशी रात्रिः । टित्वाद् ङीप् ॥ शन्शतोर्डिनिर्वक्तव्यः ॥ * ॥ पञ्चदशिनोऽर्द्धमासाः । त्रिंशिनो मासाः ॥ विंशतेश्चेति वक्तव्यम् ॥ * ॥ विंशिनोऽङ्गिरसः ॥ प्रमाणपरिमाणाभ्यां संख्यायाश्चापि संशये मात्रज्वक्तव्यः ॥ * ॥ शममात्रम् । दिष्टिमात्रम् । प्रस्थमात्रम् । कुडवमात्रम् । पञ्चमात्रम् । दशमात्रा गावः ॥ वत्वन्तात्स्वार्थे द्वयसज्मात्रचौ बहुलम् ॥ * ॥ तावदेव, तावद्द्वयसम् । तावन्मात्रम् । एतावद्द्वयसम् । एतावन्मात्रम् । यावद्द्वयसम् । यावन्मात्रम् ॥

पुरुषहस्तिभ्यामण् च ॥ ३८ ॥

तदस्येत्येव, प्रमाण इति च । पुरुषहस्तिभ्यां प्रथमासमर्थाभ्यां प्रमाणोपाधिकाभ्यामस्येति षष्ठ्यर्थेऽण् प्रत्ययो भवति, चकाराद् द्वयसजादयश्च । पुरुषः प्रमाणमस्य, पौरुषम् । पुरुषद्वयसम् । पुरुषदघ्नम् । पुरुषमात्रम् । हस्तिद्वयसम् । हस्तिदघ्नम् । हस्तिमात्रम् । हास्तिनम् । द्विगोर्नित्यं लुक् । द्विपुरुषमुदकम् । त्रिपुरुषमुदकम् । द्विहस्ति । त्रिहस्ति । द्विपुरुषी । त्रिपुरुषी । द्विहस्तिनी । त्रिहस्तिनी ॥

यत्तदेतेभ्यः परिमाणे वतुप् ॥ ३९ ॥

तदस्येत्येव । यत्तदेतेभ्यः प्रथमासमर्थेभ्यः परिमाणोपाधिकेभ्योऽस्येति षष्ठ्यर्थे वतुप् प्रत्ययो भवति । यत्परिमाणमस्य, यावान् । तावान् । एतावान् । प्रमाणग्रहणेऽनुवर्त्तमाने परिमाणग्रहणं प्रमाणपरिमाणयोर्भेदात् ॥

द्वावतावर्थवैशेष्यान्निर्देशः पृथगुच्यते ।
मात्राद्यप्रतिघाताय भावः सिद्धश्च द्वावतोः ॥

वतुप्प्रकरणे युष्मदस्मद्भ्यां छन्दसि सादृश्य उपसंख्यानम् ॥ * ॥ न त्वावा अन्यो दिव्यो न पार्थिवो न जातो न जनि-

* श्रवणं श्रावः कृत्यल्युट इति घञ्, सोऽस्यास्तीति श्रावी, मात्रजित्यर्थः ।

Digitized by Google

ध्यते । त्वावतः पुरुवसो यज्ञं विप्रस्य मावतः । त्वत्सदृशस्य मत्सदृशस्येत्यर्थः ॥

किमिदंभ्यां वो घः ॥ ४० ॥

किमिदंभ्यामुत्तरस्य वतुपो वकारस्य घकारादेशो भवति । कियान् । इयान् । एतदेव घादेशविधानं ज्ञापकं किमिदंभ्यां वतुप्प्रत्ययो भवतीति । अथ वा योगविभागेन वा वतुपं विधाय पश्चाद्वो घो विधीयते ॥

किमः संख्यापरिमाणे डति च ॥ ४१ ॥

संख्यायाः परिमाणं, संख्यापरिच्छेद इत्यर्थः । संख्यापरिमाणे वर्त्तमानात् किमः प्रथमासमर्थादस्येति षष्ठ्यर्थे डतिः प्रत्ययो भवति । चकाराद्वतुप् । तस्य च वकारस्य घादेशो भवति । पृच्छ्यमानत्वात्परिच्छेदोपाधिकायां संख्यायां वर्त्तमानात्किमः प्रत्ययो विज्ञायते । का संख्या परिमाणमेषां ब्राह्मणानां, कति ब्राह्मणाः । कियन्तो ब्राह्मणाः । अथ वा संख्यैव परिमाणात्मिका परिच्छेदस्वभावा गृह्यते । का संख्या परिमाणं येषामिति । ननु च संख्या परिमाणात्मिकैव परिच्छेदस्वभावा, सा किमर्थं परिमाणेन विशेष्यते । यत्रापरिच्छेदकत्वेन विवक्ष्यते तत्र मा भूदिति । क्षेपे हि परिच्छेदो नास्ति । केयमेषां संख्या दशानामिति ॥

संख्याया अवयवे तयप् ॥ ४२ ॥

तदस्येत्येव । संख्याया अवयवे वर्त्तमानाया अस्येति षष्ठ्यर्थे तयप् प्रत्ययो भवति । अवयवा अवयविनः संबन्धिन इति सामर्थ्यादवयवी प्रत्ययार्थो विज्ञायते । पञ्च अवयवा अस्य, पञ्चतयम् । दशतयम् । चतुष्टयम् । चतुष्टयी ॥

द्वित्रिभ्यां तयस्यायज्वा ॥ ४३ ॥

पूर्वेण विहितस्य तयस्य द्वित्रिभ्यां परस्य वा ऽयजादेशो भवति । द्वाववयवावस्य, द्वयम् । द्वितयम् । त्रयम् । त्रितयम् । तयग्रहणं स्थानिनिर्देशार्थम् । अन्यथा प्रत्ययान्तरमयज्विज्ञायेत । तत्र को दोषः । त्रयी गतिरिति तयनिबन्धन ईकारो न स्यात् । प्रथमचरमतयेत्येष विधिर्न स्यात् । द्वये द्वयाः । चकारः स्वरार्थः ॥

उभादुदात्तो नित्यम् ॥ ४४ ॥

उभशब्दात्परस्य तयपो नित्यमयजादेशो भवति स चोदात्तः । वचनसामर्थ्यादादेरुदात्तत्वं विज्ञायते । उभशब्दो यदि लौकिकी संख्या ततः पूर्वेणैव विहितस्य तयप आदेशविधानार्थं वचनम् । अथ न संख्या, ततो योगविभागेन तयपं विधाय तस्य नित्यमयजादेशो विधीयते । उभयो मणिः । उभये देवमनुष्याः ॥

तदस्मिन्नधिकमिति दशान्ताड्डः ॥ ४५ ॥

तदिति प्रथमासमर्थादस्मिन्निति सप्तम्यर्थे दशान्तात्प्रातिपदिकाद् डः प्रत्ययो भवति यत्तत्प्रथमासमर्थमधिकं चेत्तद्भवति । इतिकरणस्ततश्चेद्विवक्षा । एकादश अधिका यस्मिन् शते, एकादशं शतम् । एकादशं सहस्रम् । द्वादशं शतम् । द्वादशं सहस्रम् । दशान्तादिति किम् । पञ्चाधिका अस्मिन् शते । अन्तग्रहणं किम् । दशाधिका अस्मिन् शते । प्रत्ययार्थेन च समानजातीये प्रकृत्यर्थे सति प्रत्यय इष्यते । एकादश कार्षापणा अधिका अस्मिन् कार्षापणशते, एकादशं कार्षापणशतमिति । इह तु न भवति । एकादश माषा अधिका अस्मिन्कार्षापणशत इति ॥ शतसहस्रयोश्चेष्यते ॥ इह न भवति । एकादशाधिका अस्यां त्रिंशतीति । इतिकरणो विवक्षार्थ इत्युक्तं तत इदं सर्वं लभ्यते । कथमेकादशं शतसहस्रमिति । शतानां सहस्रं सहस्राणां वा शतमिति शतसहस्रमित्युच्यते । तत्र शतसहस्रयोरित्येव सिद्धम् ॥

अधिके समानजाताविष्टं शतसहस्रयोः ।
यस्य संख्या तदाधिक्ये डः कर्त्तव्यो मतो मम ॥

शदन्तविंशतेश्च ॥ ४६ ॥

तदस्मिन्नधिकमित्यनुवर्त्तते, ड इति च । शदन्तात्प्रातिपदिकाद्विंशतेश्च डः प्रत्ययो भवति तदस्मिन्नधिकमित्येतस्मिन्विषये । त्रिंशदधिका अस्मिन् शते, त्रिंशं शतम् । शद्ग्रहणे ऽन्तग्रहणं प्रत्ययग्रहणे यस्मात्स तदादेरधिकार्थम् । एकत्रिंशं शतम् । एकचत्वारिंशं शतम् । संख्याग्रहणं च कर्त्तव्यम् । इह मा भूद् गोत्रिंशदधिका अस्मिन् गोशते इति । विंशतेश्च ॥ तदन्तादपीति वक्तव्यम् ॥ * ॥ एकविंशं शतम् । संख्याग्रहणं च कर्त्तव्यम् । इह मा भूत् । गोविंशतिरधिका ऽस्मिन्गोशतमिति ॥

संख्याया गुणस्य निमाने मयट् ॥ ४७ ॥

तदस्येत्यनुवर्त्तते तदस्य संजातमित्यतः । तदिति प्रथमासमर्थात्संख्यावाचिनः प्रातिपदिकादस्येति षष्ठ्यर्थे मयट् प्रत्ययो भवति यत्तत्प्रथमासमर्थं गुणस्य चेन्निमाने वर्त्तते । गुणो भागः । निमानं मूल्यम् । गुणो येन निमीयते मूल्यभूतेन सोऽपि सामर्थ्याद्भाग एव विज्ञायते । यवानां द्वौ भागौ निमानमस्योदश्विद्भागस्य, द्विमयमुदश्विद्यवानाम् । त्रिमयम् । चतुर्मयम् । भागे ऽपि तु विधीयमानः प्रत्ययः प्राधान्येन भागवन्तमाचष्टे । तेन सामानाधिकरण्यं भवति द्विमयमुदश्विदिति । गुणस्येति चैकत्वं विवक्षितं, तेनेह न भवति । द्वौ भागौ यवानां त्रय उदश्वित इति ॥ भूयस्त्ववाचिकायाः संख्यायाः प्रत्यय इष्यते ॥ इह न भवति । एको

Digitized by Google

भागो निमानमस्येति । भूयस इति च प्रत्ययार्थात्प्रकृत्यर्थस्याधिक्यमात्रं विवक्षितम्, बहुत्वमतन्त्रं तेन द्विशब्दादपि भवति । गुणशब्दः समानावयववचनः । तेनेह न भवति । द्वौ भागौ यवानामध्यर्द्धं उदश्वित इति ॥ निमेये चापि दृश्यते ॥ निमेये वर्त्तमानायाः संख्याया निमाने प्रत्ययो दृश्यते । उदश्वितो द्वौ भागौ निमेयमस्य यवभागस्य, द्विमया यवा उदश्वितः । त्रिमया यवा उदश्वितः । चतुर्मयाः । गुणस्येति किम् । द्वौ व्रीहियवौ निमानमस्योदश्वितः । निमानइति किम् । द्वौ गुणौ क्षीरस्यैकस्तैलस्य द्विगुणं पच्यते तैलं क्षीरेणेत्यत्र मा भूत् ॥

तस्य पूरणे डट् ॥ ४८ ॥

तस्येति षष्ठीसमर्थात्संख्यावाचिनः प्रातिपदिकात्पूरण इत्येतस्मिन्नर्थे डट् प्रत्ययो भवति । पूर्यते ऽनेनेति पूरणम् । येन संख्या संख्यानं पूर्यते संपद्यते स तस्याः पूरणः । एकादशानां पूरणः, एकादशः । त्रयोदशः । यस्मिन्नुपसंजाते ऽन्या संख्या संपद्यते स प्रत्ययार्थः । इह न भवति । पञ्चानां मुष्टिकानां पूरणो घट इति ॥

नान्तादसंख्यादेर्मट् ॥ ४९ ॥

डडिति वर्त्तते । नकारान्तात्संख्यावाचिनः प्रातिपदिकादसंख्यादेः परस्य डटो मडागमो भवति । नान्तादिति पञ्चमी डट आगमसंबन्धे षष्ठीं प्रकल्पयति । पञ्चानां पूरणः पञ्चमः । सप्तमः । नान्तादिति किम् । विंशतेः पूरणो विंशः । असंख्यादेरिति किम् । एकादशानां पूरण एकादशः ॥

थट् च छन्दसि ॥ ५० ॥

नान्तादसंख्यादेः परस्य डटश्छन्दसि विषये थडागमो भवति, चकारात्पक्षे मडपि भवति । पर्णमयानि पञ्चथानि भवन्ति । पञ्चथः । सप्तथः । मट् । पञ्चममिन्द्रियमस्यापाक्रामत् ॥

षट्कतिकतिपयचतुरां थुक् ॥ ५१ ॥

डडित्यनुवर्त्तते तत्सप्तम्या विपरिणम्यते । षट् कति कतिपय चतुर् इत्येतेषां डटि परतस्थुगागमो भवति । कतिपयशब्दो न संख्या । तस्यास्मादेव ज्ञापकाद् डट् प्रत्ययो विज्ञायते । षण्णां पूरणः षष्ठः । कतिथः । कतिपयथः । चतुर्थः ॥ चतुरश्छयतावाद्यक्षरलोपश्च ॥ * ॥ चतुर्णां पूरणः, तुरीयः । तुर्यः ॥

बहुपूगगणसंघस्य तिथुक् ॥ ५२ ॥

डडित्येव । बहु पूग गण संघ इत्येतेषां डटि परतस्तिथुगागमो भवति । पूगसंघशब्दयोरसंख्यावाचित्वादिदमेव ज्ञापकं डटो भावस्य । बहूनां पूरणो, बहुतिथः । पूगतिथः । गणतिथः । संघतिथः ॥

वतोरिथुक् ॥ ५३ ॥

डडित्येव । वतोर्डटि परत इथुगागमो भवति । वत्वन्तस्य संख्यात्वात्पूर्वेण डड्विहितस्तस्मिन्नयमागमो विधीयते । यावतां पूरणो, यावतिथः । तावतिथः । एतावतिथः ॥

द्वेस्तीयः ॥ ५४ ॥

द्विशब्दात्तीयः प्रत्ययो भवति तस्य पूरण इत्यस्मिन्विषये । डटोपवादः । द्वयोः पूरणो, द्वितीयः ॥

त्रेः संप्रसारणं च ॥ ५५ ॥

त्रिशब्दात्तीयः प्रत्ययो भवति तस्य पूरण इत्येतद्विषये । डटोपवादः । तत्संनियोगेन त्रेः संप्रसारणं च भवति । त्रयाणां पूरणस्तृतीयः । हल इति संप्रसारणस्य दीर्घत्वं न भवति । अण इति तत्रानुवर्त्तते ढ्रलोप इत्यतः, पूर्वेण च णकारेणाण्ग्रहणम् ॥

विंशत्यादिभ्यस्तमडन्यतरस्याम् ॥ ५६ ॥

विंशत्यादिभ्यः परस्य डटस्तमडागमो भवत्यन्यतरस्याम् । पूरणाधिकाराद् डट् प्रत्यय आगमी विज्ञायते । विंशतेः पूरणः, विंशतितमः । विंशः । एकविंशतितमः । एकविंशः । त्रिविंशतितमः । त्रिविंशः । त्रिंशत्तमः । त्रिंशः । एकत्रिंशत्तमः । एकत्रिंशः । विंशत्यादयो लौकिकाः संख्याशब्दा गृह्यन्ते न पङ्क्त्यादिसूत्रसंनिविष्टाः, तद्ग्रहणे ह्येकविंशतिप्रभृतिभ्यो न स्यात् । ग्रहणवता प्रातिपदिकेन तदन्तविधिप्रतिषेधात् । एवं च सति षष्ट्यादेश्चासंख्यादेरिति पर्युदासो युज्यतएव ॥

नित्यं शतादिमासार्द्धमाससंवत्सराच्च ॥ ५७ ॥

शतादयः संख्याशब्दा लौकिका गृह्यन्ते । शतादिभ्यो मासार्द्धमाससंवत्सरशब्देभ्यश्च परस्य डटो नित्यं तमडागमो भवति । मासादयः संख्याशब्दा न भवन्ति तेभ्यो ऽस्मादेव ज्ञापकाद् डट् प्रत्ययो विज्ञायते । शतस्य पूरणः, शततमः । सहस्रतमः । लक्षतमः । मासस्य पूरणो, मासतमो दिवसः । अर्द्धमासतमः । संवत्सरतमः । षष्ट्यादेश्चासंख्यादेरिति वक्ष्यमाणेन सिद्धे शतादिग्रहणं संख्याद्यर्थम् । एकशततमः । द्विशततमः ॥

षष्ट्यादेश्चासंख्यादेः ॥ ५८ ॥

षष्ट्यादेः संख्याशब्दादसंख्यादेः परस्य डटो नित्यं तमडागमो भवति । विंशत्यादिभ्य इति विकल्पेन प्राप्ते

Digitized by Google

नित्यार्थम् । षष्टितमः । सप्ततितमः * । असंख्यादेरिति किम् । एकषष्टः । एकषष्टितमः । एकसप्ततः । एकसप्ततितमः ॥

मतौ छः सूक्तसाम्नोः ॥ ५९ ॥

मताविति मत्वर्थ उच्यते । प्रातिपदिकान्मत्वर्थे छः प्रत्ययो भवति सूक्ते सामनि चाभिधेये । मत्वर्थग्रहणेन समर्थविभक्तिः प्रकृतिविशेषणं प्रत्ययार्थ इति सर्वमाक्षिप्यते । अच्छावाकशब्दोऽस्मिन्निति, अच्छावाकीयं सूक्तम् । मित्रावरुणीयम् । यज्ञायज्ञीयं साम । वारवन्तीयम् । अनुकरणशब्दाश्च स्वरूपमात्रप्रधानाः प्रत्ययमुत्पादयन्ति । तेनानेकपदादपि सिद्धम् । अस्यवामीयम् । कयाशुभीयम् ॥

अध्यायानुवाकयोर्लुक् ॥ ६० ॥

मतावित्येव । मत्वर्थउत्पन्नस्य छस्य लुग् भवति, अध्यायानुवाकयोरभिधेययोः । केन पुनरध्यायानुवाकयोः प्रत्ययः । इदमेव लुग्वचनं ज्ञापकं तद्विधानस्य । विकल्पेन लुगयमिष्यते । गर्दभाण्डशब्दोऽस्मिन्नस्ति, गर्दभाण्डोऽध्यायः । अनुवाको वा गर्दभाण्डीयः । दीर्घजीवितः । दीर्घजीवितीयः । पलितस्तम्भः । पलितस्तम्भीयः ॥

विमुक्तादिभ्योऽण् ॥ ६१ ॥

मतावित्येव, अध्यायानुवाकयोरिति च । विमुक्तादिभ्यः प्रातिपदिकेभ्योऽण् प्रत्ययो भवति मत्वर्थे, अध्यायानुवाकयोरभिधेययोः । विमुक्तशब्दोऽस्मिन्नस्ति, वैमुक्तोऽध्यायोऽनुवाको वा । दैवासुरः । विमुक्त । देवासुर । वसुमत् । सत्वत् । उपसत् । दशार्हपयस् । हविर्धान । मित्री । सोमापूषन् । अग्नाविष्णू । वृत्रहति । इडा । रक्षोसुर । सदसत् । परिषादक । वसु । मरुत्वत् । पत्नीवत् । महीयल । सत्वत् । दशार्ह । वयस् । पतत्रि । सोम । महित्री । हेतु † । विमुक्तादिः ॥

गोषदादिभ्यो वुन् ॥ ६२ ॥

मतावित्येव, अध्यायानुवाकयोरिति च । गोषदादिभ्यः प्रातिपदिकेभ्यो वुन्प्रत्ययो भवति मत्वर्थे, ऽध्यायानुवाकयोः । गोषदशब्दोऽस्मिन्नस्ति, गोषदकोऽध्यायोऽनुवाको वा । इषेत्वकः । मातरिश्वकः । गोषद । इषेत्व । मातरिश्वन् । देवस्यत्वा । देवीरापः । कृष्णोस्याखरेष्ठः । दैवींधियम् । रक्षोहण । अञ्जन । प्रभूत । प्रतूर्त्त । कृशान । ‡ गोषदादिः ॥

* अग्नीतितमः । नवतितमः । इत्यधिकं पुस्तकान्तरे ।

† अस्यहत्य । दशार्ण । उर्वशी । सुपर्ण । एते शब्दाः पुस्तकान्तरेऽत्र गणेऽधिकाः ।

‡ युञ्जान । सहस्रशीर्षा । वातस्यते । कशाश्व । स्वाहाप्राण । प्रसफ । एते शब्दा अत्र गणेऽधिकाः पुस्तकान्तरे ।

तत्र कुशलः पथः ॥ ६३ ॥

वुनित्येव । तत्रेति सप्तमीसमर्थात्पथिन् शब्दात्कुशल इत्यस्मिन्नर्थे वुन्प्रत्ययो भवति । पथि कुशलः, पथकः ॥

आकर्षादिभ्यः कन् ॥ ६४ ॥

तत्रेत्येव, कुशल इति च । आकर्षादिभ्यः प्रातिपदिकेभ्यः सप्तमीसमर्थेभ्यः कुशल इत्येतस्मिन्नर्थे कन्प्रत्ययो भवति । आकर्षे कुशल, आकर्षकः । त्सरुकः । आकर्ष । त्सरु । पिपासा । पिचण्ड । अशनि । अश्मन् । विचय । चय । जय । आचय । अय । नय । निपाद । गद्गद । दीप । ह्रद । ह्राद । ह्लाद । शकुनि * ॥

धनहिरण्यात्कामे ॥ ६५ ॥

तत्रेत्येव, कनिति च । धनहिरण्यशब्दाभ्यां तत्रेति सप्तमीसमर्थाभ्यां कामइत्यस्मिन्नर्थे कन्प्रत्ययो भवति । काम इच्छाऽभिलाषः । धने कामः, धनको देवदत्तस्य । हिरण्यको देवदत्तस्य ॥

स्वाङ्गेभ्यः प्रसिते ॥ ६६ ॥

तत्रेत्येव, कनिति च । स्वाङ्गवाचिभ्यः शब्देभ्यस्तत्रेति सप्तमीसमर्थेभ्यः प्रसितइत्येतस्मिन्नर्थे कन्प्रत्ययो भवति । प्रसितः प्रसक्तस्तत्पर इत्यर्थः । केशेषु प्रसितः, केशकः । केशादिरचनायां प्रसक्त एवमुच्यते । बहुवचनं स्वाङ्गसमुदायशब्दादपि यथा स्यात् । दन्तौष्ठकः । केशनखकः ॥

उदराट्ठगाद्यूने ॥ ६७ ॥

तत्रेत्येव, प्रसितइति च । उदरशब्दात्सप्तमीसमर्थात्प्रसितइत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति । आद्यूनइति प्रत्ययार्थविशेषणम् । उदरेऽविजिगीषुर्भण्यते । यो बुभुक्षयाऽत्यन्तं पीड्यते स एवमुच्यते । उदरे प्रसित, औदरिक आद्यूनः । आद्यूनइति किम् । उदरकः ॥

सस्येन परिजातः ॥ ६८ ॥

कन्प्रत्यय इत्येव स्मर्यते, न ठक् । निर्देशादेव तृतीया समर्थविभक्तिः । सस्यशब्दात्तृतीयासमर्थात्परिजात इत्यस्मिन्नर्थे कन्प्रत्ययो भवति । सस्यशब्दोयं गुणवाची । परिः सर्वतो भावे वर्त्तते । यो गुणैः संबद्धो जायते यस्य किंचिदपि वैगुण्यं नास्ति तस्येदमभिधानम् । सस्येन परिजातः, सस्यकः शालिः । सस्यकः साधुः । सस्यको मणिः । आकारशुद्ध इत्यर्थः ॥

अंशं हारी ॥ ६९ ॥

अंशशब्दान्निर्देशादेव द्वितीयासमर्थाद्धारीत्येतस्मिन्नर्थे कन्प्रत्ययो भवति । अंशं हारी, अंशको दायादः । अंशकः पुत्रः ।

* पिशाच । पिण्ड । एतौ शब्दौ पुस्तकान्तरेऽत्र गणेऽधिकौ ।

हारीत्यावश्यके णिनिः । तत्र षष्ठीप्रतिषेधाद् कर्मणि द्वितीयैव भवति ॥

तन्त्रादचिरापहृते ॥ ७० ॥

तन्त्रशब्दान्निर्देशादेव पञ्चमीसमर्थादचिरापहृतइत्यस्मिन्नर्थे कन् प्रत्ययो भवति । अचिरापहृतस्तोककालापहृत इत्यर्थः । तन्त्रादचिरापहृतः, तन्त्रकः पटः । तन्त्रकः प्रावारः । प्रत्ययो नव उच्यते ॥

ब्राह्मणकोष्णिके संज्ञायाम् ॥ ७१ ॥

ब्राह्मणक उष्णिक इत्येतौ शब्दौ निपात्येते कन्प्रत्ययान्तौ संज्ञायां विषये । ब्राह्मणको देशः । उष्णिका यवागूः । यत्रायुधजीविनो ब्राह्मणाः सन्ति तत्र ब्राह्मणक इति संज्ञा । अल्पान्ना यवागूरुष्णिकेत्युच्यते ॥

शीतोष्णाभ्यां कारिणि ॥ ७२ ॥

शीतोष्णशब्दाभ्यां कारिण्यभिधेये कन्प्रत्ययो भवति । क्रियाविशेषणाद् द्वितीयासमर्थादयं प्रत्ययः । शीतं करोति, शीतकः । अलसो जड उच्यते । उष्णं करोति, उष्णकः । शीघ्रकारी दक्ष उच्यते ॥

अधिकम् ॥ ७३ ॥

अधिकमिति निपात्यते । अध्यारूढस्योत्तरपदलोपः कंश्च प्रत्ययः । अधिको द्रोणः खार्या,मधिका खारी द्रोणेन । कर्त्तरि कर्मणि वा ऽध्यारूढशब्दः ॥

अनुकाभिकाभीकः कमिता ॥ ७४ ॥

अनुक अभिक अभीक इत्येते शब्दाः कन्प्रत्ययान्ता निपात्यन्ते कमितेत्येतस्मिन्नर्थे । अभेः पक्षे दीर्घत्वं च निपात्यते । अनुकामयते, अनुकः । अभिकः । अभीकः ॥

पार्श्वेनान्विच्छति ॥ ७५ ॥

पार्श्वशब्दात्तृतीयासमर्थादन्विच्छतीत्यस्मिन्नर्थे कन्प्रत्ययो भवति । अनृजुरुपायः पार्श्वम् । तेनार्थानन्विच्छति, पार्श्वकः । मायावी कौसृतिको जालिक उच्यते ॥

अयःशूलदण्डाजिनाभ्यां ठक्ठञौ ॥ ७६ ॥

अन्विच्छतीत्येव । अयःशूलदण्डाजिनाभ्यां तृतीयासमर्थाभ्यामन्विच्छतीत्यस्मिन्नर्थे ठक्ठञौ प्रत्ययौ भवतः । तीक्ष्ण उपायो ऽयःशूलमुच्यते । तेनान्विच्छति, आयःशूलिकः । साहसिक इत्यर्थः । दम्भो दण्डाजिनं, तेनान्विच्छति, दाण्डाजिनिकः । दाम्भिक इत्यर्थः ॥

तावतिथं ग्रहणमिति लुग्वा ॥ ७७ ॥

तावतां पूरणं तावतिथम् । गृह्यते ऽनेनेति ग्रहणम् । प्रकृतिविशेषणं चैतत् । पूरणप्रत्ययान्तात्प्रातिपदिकाद्ग्रहणोपाधिकात्स्वार्थे कन्प्रत्ययो भवति । पूरणस्य प्रत्ययस्य वा लुक् । द्वितीयेन रूपेण ग्रन्थं गृह्णाति द्विकं ग्रहणम् । द्वितीयकम् । त्रिकम् । तृतीयकम् । चतुष्कम् । चतुर्थकम् ॥ तावतिथेन गृह्णातीति कन्वक्तव्यः, पूरणप्रत्ययस्य च नित्यं लुक् ॥ * ॥ षष्ठेन रूपेण ग्रन्थं गृह्णाति, षट्को देवदत्तः । पञ्चकः । चतुष्कः । इतिकरणो विवक्षार्थः । तेन ग्रन्थविषयमेव ग्रहणं विज्ञायते नान्यविषयम् ॥

स एषां ग्रामणीः ॥ ७८ ॥

स इति प्रथमासमर्थादेषामिति षष्ठ्यर्थे कन्प्रत्ययो भवति, यत्तत्प्रथमासमर्थं ग्रामणीश्चेत्स भवति । ग्रामणीः । प्रधानो मुख्य इत्यर्थः । देवदत्तो ग्रामणीरेषां, देवदत्तकाः । यज्ञदत्तकाः । ग्रामणीरिति किम् । देवदत्तः शत्रुरेषाम् ॥

शृङ्खलमस्य बन्धनं करभे ॥ ७९ ॥

शृङ्खलशब्दात्प्रथमासमर्थादस्येति षष्ठ्यर्थे कन्प्रत्ययो भवति, यत्तत्प्रथमासमर्थं बन्धनं चेत्तद्भवति, यत्तदस्येति निर्दिष्टं करभश्चेत्स भवति । शृङ्खलं बन्धनमस्य करभस्य, शृङ्खलकः । उष्ट्राणां बालकाः करभाः । तेषां काष्ठमयं पाशकं पादे व्यतिषज्यते तदुच्यते शृङ्खलमिति । यद्यपि रज्ज्वादिकमपि तत्रास्ति तथापि शृङ्खलमस्यास्वतन्त्रीकरणे भवति साधनमिति बन्धनमित्युच्यते ॥

उत्क उन्मनाः ॥ ८० ॥

उत्क इति निपात्यते उन्मनाश्चेत्स भवति । उद्गतं मनो यस्य स, उन्मनाः । उच्छब्दात्संसाधनक्रियावचनात्तद्वति कन्प्रत्ययो निपात्यते । उत्को देवदत्तः । उत्कः प्रवासी । उत्सुक इत्यर्थः ॥

कालप्रयोजनाद्रोगे ॥ ८१ ॥

अर्थाभ्यां समर्थविभक्तिः । कालात्प्रयोजनाच्च यथायोगं समर्थविभक्तियुक्ताद्रोगे ऽभिधेये कन्प्रत्ययो भवति । कालो दिवसादिः । प्रयोजनं कारणं रोगस्य फलं वा । द्वितीयेऽह्नि भवो, द्वितीयको ज्वरः । चतुर्थकः । प्रयोजनात् । विषपुष्पैर्जनितो, विषपुष्पको ज्वरः । काशपुष्पकः । उष्णं कार्यमस्य उष्णकः । शीतको ज्वरः । उत्तरसूत्रात्संज्ञाग्रहणमनुकृष्यते । तेनायं प्रकारनियमः सर्वो लभ्यते ॥

तदस्मिन्नन्नं प्राये संज्ञायाम् ॥ ८२ ॥

तदिति प्रथमासमर्थादस्मिन्निति सप्तम्यर्थे कन् प्रत्ययो भवति, यत्तत्प्रथमासमर्थमन्नं चेत्प्रायविषयं तद् भवति । प्रायो बाहुल्यम् । संज्ञाग्रहणं तदन्तोपाधिः । गुडापूपाः प्राये-

Digitized by Google

ण्यामस्यां पौर्णमास्यां गुडापूपिका । तिलापूपिका पौर्णमासी * ॥ वटकेभ्य इनिर्वक्तव्यः ॥ * ॥ वटकिनी पौर्णमासी ॥

कुल्माषादञ् ॥ ८३ ॥

कुल्माषशब्दादञ् प्रत्ययो भवति, तदस्मिन्नन्नं प्राये संज्ञायामित्येतस्मिन्नर्थे । अकारो वृद्धिस्वरार्थः । कुल्माषाः प्रायेणान्नमस्यां, कौल्माषी पौर्णमासी ॥

श्रोत्रियंश्छन्दो ऽधीते ॥ ८४ ॥

श्रोत्रियन्निति निपात्यते छन्दो ऽधीत इत्यस्मिन्नर्थे । नकारः स्वरार्थः । श्रोत्रियो ब्राह्मणः । श्रोत्रियंश्छन्दोधीत इति वाक्यार्थे पदवचनं, छन्दसो वा श्रोत्रभावस्तदधीत इति घंश्च प्रत्ययः । कथं छन्दोधीते छान्दसः । वाग्रहणमनुवर्त्तते तावतिथं ग्रहणमिति लुग्वेत्यतः ॥

श्राद्धमनेन भुक्तमिनिठनौ ॥ ८५ ॥

श्राद्धमिति प्रकृतिः । अनेनेति प्रत्ययार्थः । भुक्तमिति प्रकृतिविशेषणम् । श्राद्धशब्दाद्भुक्तोपाधिकादनेनेत्यस्मिन्नर्थे इनिठनौ प्रत्ययौ भवतः । श्रद्धाशब्दः कर्मनामधेयं तत्साधनद्रव्ये वर्तित्वा प्रत्ययमुत्पादति । श्राद्धं भुक्तमनेन, श्राद्धी । श्राद्धिकः । इनिठनोः समानकालग्रहणम् । अद्य भुक्ते श्राद्धे श्वः श्राद्धिक इति मा भूत् ॥

पूर्वादिनिः ॥ ८६ ॥

अनेनेति प्रत्ययार्थः कर्तानुवर्त्तते । न च क्रियामन्तरेण कर्त्ता संभवतीति यां कां चित्क्रियामध्याहृत्य प्रत्ययो विधेयः । पूर्वादनेनेत्यस्मिन्नर्थे इनिः प्रत्ययो भवति । पूर्वं गतमनेन भुक्तं पीतं वा, पूर्वी । पूर्विणौ । पूर्विणः ॥

सपूर्वाच्च ॥ ८७ ॥

विद्यमानं पूर्वं यस्मादिति सपूर्वं प्रातिपदिकम् । तस्य पूर्वशब्देन तदन्तविधिः । सपूर्वात्प्रातिपदिकात्पूर्वशब्दान्तादनेनेत्यस्मिन्नर्थे इनिः प्रत्ययो भवति । पूर्वं कृतमनेन कृतपूर्वी कटम् । भुक्तपूर्वी ओदनम् । सुप्सुपेति समासं कृत्वा तद्धित उत्पाद्यते । योगद्वयेन चानेन पूर्वादिनिः सपूर्वाच्चेति परिभाषाद्वयं ज्ञाप्यते । व्यपदेशिवद्भावो ऽप्रातिपदिकेन । ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्तीति ॥

इष्टादिभ्यश्च ॥ ८८ ॥

अनेनेत्येव । इष्टादिभ्यः प्रातिपदिकेभ्यो ऽनेनेत्यस्मिन्नर्थे इनिः प्रत्ययो भवति । इष्टमनेन, इष्टी यज्ञे । पूर्त्ती श्राद्धे । क्तस्येन्विषयस्य कर्मणीति सप्तम्युपसंख्यायते । इष्ट । पूर्त्त । उपसादित । निगदित । परिवादित । निकथित । परिकथित । संकलित । निपठित । संकल्पित । अनर्च्चित । विकलित । संरक्षित । निपतित । पठित । परिकलित । संरक्षित । अर्चित । परिरक्षित । पूजित । परिगणित । उपगणित । अवकीर्ण । परित । आयुक्त । आम्नातश्रुत । अधीत । आसेवित । अपवारित । अवकल्पित । निराकृत । उपकृत । उपाकृत । अनुयुक्त । उपनत । अनुगुणित । अनुपठित । व्याकुलित । निगृहीत * । इष्टादिः ॥

* कर्षरिका । त्रिपुटिका । इत्युदाहरणद्वयमधिकं पुस्तकान्तरे ।

* अवधारित । अर्पाचत । एतौ शब्दावत्र गणे पुस्तकान्तरे ऽधिकौ ।

छन्दसि परिपन्थिपरिपरिणौ पर्यवस्थातरि ॥ ८९ ॥

परिपन्थिन् परिपरिन् इत्येतौ शब्दौ छन्दसि विषये निपात्येते पर्यवस्थातरि वाच्ये । पर्यवस्थाता प्रतिपक्षः सपत्न उच्यते । मा त्वा परिपरिणो विदन् । मा त्वा परिपन्थिनो विदन् ॥

अनुपद्यन्वेष्टा ॥ ९० ॥

अनुपदीति निपात्यते ऽन्वेष्टा चेत्स भवति । पदस्य पश्चादनुपदम् । अनुपदी गवाम् । अनुपदी उष्ट्राणाम् ॥

साक्षाद् द्रष्टरि संज्ञायाम् ॥ ९१ ॥

साक्षाच्छब्दो ऽव्ययम् । तस्मादिनिः प्रत्ययो भवति द्रष्टरि वाच्ये । संज्ञाग्रहणमभिधेयनियमार्थम् । साक्षाद् द्रष्टा साक्षी । साक्षिणौ । साक्षिणः । संज्ञाग्रहणादुपद्रष्टैवोच्यते न दाता ग्रहीता वा ॥

क्षेत्रियच् परक्षेत्रे चिकित्स्यः ॥ ९२ ॥

क्षेत्रियजिति निपात्यते । परक्षेत्रे चिकित्स्य इत्येतस्मिन् वाक्यार्थे पदवचनम् । परक्षेत्राद्वा तत्रेति सप्तमीसमर्थात् चिकित्स्य इत्येतस्मिन्नर्थे घच् प्रत्ययः परशब्दलोपश्च निपात्यते । परक्षेत्रे चिकित्स्यः, क्षेत्रियो व्याधिः । क्षेत्रियं कुष्ठम् । परक्षेत्रं जन्मान्तरशरीरम् । तत्र चिकित्स्यः क्षेत्रियः । असाध्यो ऽप्रत्याख्येयो व्याधिरुच्यते । नामृतस्य निवर्त्तत इत्यर्थः । अथ वा क्षेत्रियं विषम् । यत्परक्षेत्रे परशरीरे संक्रमय्य चिकित्स्यते । अथ वा क्षेत्रियाणि तृणानि । यानि सस्यार्थे क्षेत्रे जातानि चिकित्स्यानि नाशयितव्यानि । अथ वा क्षेत्रियः पारदारिकः । परदाराः परक्षेत्रं, तत्र चिकित्स्यः निग्रहीतव्यः । सर्वं चैतत्प्रमाणम् ॥

इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टमिन्द्रसृष्टमिन्द्रजुष्टमिन्द्रदत्तमिति वा ॥ ९३ ॥

इन्द्रियमित्यन्तोदात्तं शब्दरूपं निपात्यते । रूढिरेषा चक्षुरादीनां करणानां, तथा च व्युत्पत्तेरनियमं दर्शयति । इन्द्रशब्दात्षष्ठीसमर्थाल्लिङ्गमित्येतस्मिन्नर्थे घच्प्रत्ययो भवति ।

Digitized by Google

इन्द्रस्य लिङ्गमिन्द्रियम् । इन्द्र आत्मा स चक्षुरादिना करणेनानुमीयते । नाकर्तृकं करणमस्ति । इन्द्रेण दृष्टम् । तृतीयासमर्थात्प्रत्ययः । आत्मना दृष्टमित्यर्थः । इन्द्रेण सृष्टम् । आत्मना सृष्टम् । तत्कृतेन शुभाशुभेन कर्मणोत्पन्नमिति कृत्वा । इन्द्रेण जुष्टम् । आत्मना जुष्टम् । सेवितं तद्द्वारेण विज्ञानोत्पादनात् । इन्द्रदत्त,मात्मना विषयेभ्यो दत्तं यथायथं ग्रहणाय । इतिकरणः प्रकारार्थः । सति संभवे व्युत्पत्तिरन्यथापि कर्त्तव्या, रूढेरनियमादिति । वाशब्दः प्रत्येकमभिसंबध्यमानो विकल्पानां स्वातन्त्र्यं दर्शयति ॥

तदस्यास्त्यस्मिन्निति मतुप् ॥ ९४ ॥

तदिति प्रथमा समर्थविभक्तिः । अस्यास्मिन्निति प्रत्ययार्थः, अस्तीति प्रकृतिविशेषणम् । इतिकरणो विवक्षार्थः । तदिति प्रथमासमर्थादस्येति षष्ठ्यर्थे ऽस्मिन्निति सप्तम्यर्थे वा मतुप् प्रत्ययो भवति, यत्तत्प्रथमासमर्थमस्ति चेत्तद्भवति । अस्त्यर्थोपाधिकं चेत्तद्भवतीत्यर्थः । इतिकरणस्ततश्चेद्विवक्षा । गावो ऽस्य सन्ति, वृक्षा अस्मिन्सन्ति, गोमान्देवदत्तः । वृक्षवान्पर्वतः । यवमान् । प्लक्षवान् । इतिकरणाद्विषयनियमः ।

भूमनिन्दाप्रशंसासु नित्ययोगे ऽतिशायने ।
संसर्गे ऽस्तिविवक्षायां भवन्ति मतुबादयः ॥

भूम्नि तावत् । गोमान् । निन्दायाम् । कुष्ठी । ककुदावर्त्तिनी । प्रशंसायाम् । रूपवती कन्या । नित्ययोगे । क्षीरिणो वृक्षाः । अतिशायने । उदरिणी कन्या । संसर्गे । दण्डी । छत्री । अस्तिविवक्षायाम् । अस्तिमान् ॥ गुणवचनेभ्यो मतुपो लुग्वक्तव्यः ॥ * ॥ शुक्लो गुणोस्यास्ति, शुक्लः पटः । कृष्णः । श्वेतः ॥

रसादिभ्यश्च ॥ ९५ ॥

रसादिभ्यः प्रातिपदिकेभ्यो मतुप् प्रत्ययो भवति, तदस्यास्त्यस्मिन्नित्येतस्मिन्विषये । रसवान् । रूपवान् । किमर्थमिदमुच्यते, न पूर्वसूत्रेणैव मतुप् सिद्धः । रसादिभ्यः पुनर्वचनमन्यनिवृत्त्यर्थम् । अन्ये मत्वर्थीया मा भूवन्निति । कथं रूपिणी कन्या । रूपिको दारकः । प्रायिकमेतद्वचनम् । इतिकरणो विवक्षार्थो ऽनुवर्त्तते । अथ वा गुणादित्यत्र पठ्यते । तेन ये रसनेन्द्रियादिग्राह्या गुणास्तेषामत्र पाठः । इह मा भूत्, रूपिणी, रूपिक इति, शोभायोग्यता गम्यते । रसिको नट इत्यत्र भावयोगः । रस । रूप । गन्ध । स्पर्श । शब्द । स्नेह । गुणात् । एकाचः । गुणग्रहणं रसादीनां विशेषणम् ॥

प्राणिस्थादातो लजन्यतरस्याम् ॥ ९६ ॥

प्राणिस्थवाचिनः शब्दादाकारान्ताल्लच् प्रत्ययो भवत्यन्यतरस्यां मत्वर्थे । चूडालः । चूडावान् । कर्णिकालः । कर्णिकावान् । प्राणिस्थादिति किम् । शिखावान्प्रदीपः । आदिति किम् । हस्तवान् । पादवान् ॥ प्राण्यङ्गादिति वक्तव्यम् ॥ * ॥ इह मा भूत् । चिकीर्षा ऽस्यास्ति, जिहीर्षा ऽस्यास्ति, चिकीर्षावान्, जिहीर्षावान् । प्रत्ययस्वरेणैवान्तोदात्तत्वे सिद्धे चकारश्चूडालोस्तीति स्वरितो वा ऽनुदात्ते पदादाविति स्वरितबाधनार्थः ॥

सिध्मादिभ्यश्च ॥ ९७ ॥

लजन्यतरस्यामिति वर्त्तते । सिध्मादिभ्यः प्रातिपदिकेभ्यो लच् प्रत्ययो भवत्यन्यतरस्यां मत्वर्थे । सिध्मलः । सिध्मवान् । गडुलः । गडुमान् । अन्यतरस्यांग्रहणेन मतुप्समुच्चीयते, न तु प्रत्ययो विकल्प्यते । तस्मादकारान्तेभ्य इनिठनौ प्रत्ययौ न भवतः । सिध्म । गडु । मणि । नाभि । जीव । निष्पाव । पांसु । सक्तु । हनु । मांस । परशु ॥ पार्ष्णिधमन्योर्दीर्घश्च । पार्ष्णीलः । धमनीलः । पर्ण । उदक । प्रज्ञा । मण्ड । पार्श्व । गण्ड । ग्रन्थि ॥ वातदन्तबलललाटगलानामूङ् च * ॥ वातूलः । दन्तूलः । बलूलः । ललाटूलः । गलूलः ॥ जटाघटाकालाः क्षेपे ॥ जटालः । घटालः । सक्थि । कर्ण । स्नेह । शीत । श्याम । पिङ्ग । पित्त । शुष्क । पृथु । मृदु । मञ्जु । पत्र । चटु । कपि । कण्डु । संज्ञा ॥ क्षुद्रजन्तूपतापाच्चेष्यते ॥ क्षुद्रजन्तुः । यूकालः । मक्षिकालः ॥ उपतापाच्च ॥ विचर्चिकालः । विपादिकालः । मूर्छालः । सिध्मादिः ॥

वत्सांसाभ्यां कामबले ॥ ९८ ॥

वत्सांसशब्दाभ्यां लच्प्रत्ययो भवति यथासंख्यं कामवति बलवति चार्थे । वत्सलः । अंसलः । वृत्तिविषये वत्सांसशब्दौ स्वभावात्कामबलयोर्वर्त्तमानौ तद्वति प्रत्ययमुत्पादयतः । नह्यत्र वत्सार्थो ऽसार्थो वा विद्यते, वत्सल इति स्नेहवानुच्यते । वत्सलः स्वामी । वत्सलः पितेति । अंसल इति चोपचितमांसो बलवानुच्यते । न चायमर्थो मतुपि संभवतीति नित्यं लजेव भवति । अन्यत्रांसवती गौः । अंसवान् दुर्बलः ॥

फेनादिलच्च ॥ ९९ ॥

फेनशब्दादिलच् प्रत्ययो भवति मत्वर्थे । चकाराल्लच्च । अन्यतरस्यांग्रहणं मतुप्समुच्चयार्थं सर्वत्रैवानुवर्त्तते । फेनिलः । फेनलः । फेनवान् ॥

लोमादिपामादिपिच्छादिभ्यः शनेलचः ॥ १०० ॥

लोमादिभ्यः पामादिभ्यः पिच्छादिभ्यश्च त्रिभ्यो गणेभ्यो यथासंख्यं श न इलच् इत्येते प्रत्यया भवन्ति मत्वर्थे, मतुप् च । लोमादिभ्यः शो भवति । लोमशः । लोमवान् । पामादिभ्यो

* वातदन्तेति गणसूत्रे गलेति, तदुदाहरणं गलूल इति च पुस्तकान्तरे, पदमञ्जर्यां च नास्ति ।

Digitized by Google

नो भवति । पामनः । पामवान् । पिच्छादिभ्य इलच् भवति । पिच्छिलः । पिच्छवान् । उरसिलः । उरस्वान् । लोमन् । रोमन् । वल्गु । बभ्रु । हरि । कपि । शुनि । तरु । लोमादिः ॥ पामन् । वामन् । हेमन् । श्लेष्मन् । कद्रु । बलि । श्रेष्ठ । पलल । सामन् ॥ अङ्गात्कल्याणे ॥ शाकीपलाली दद्र्वां । ह्रस्वत्वं च ॥ विष्वगित्युत्तरपदलोपश्चाकृतसन्धेः ॥ लक्ष्म्या अच्च ॥ पामादिः ॥ पिच्छ । उरस् । ध्रुवका । क्षुवका ॥ जटाघटाकालात्क्षेपे ॥ वर्ण । उदक । पङ्क । प्रज्ञा । पिच्छादिः ॥

प्रज्ञाश्रद्धार्चावृत्तिभ्यो णः ॥ १०१ ॥

प्रज्ञा श्रद्धा अर्चा वृत्ति इत्येतेभ्यो णः प्रत्ययो भवति मत्वर्थे । मतुप्सर्वत्र समुच्चीयते । प्राज्ञः । प्रज्ञावान् । श्राद्धः । श्रद्धावान् । आर्चः । अर्चावान् । वार्त्तः । वृत्तिमान् ॥

॥ अथानन्दवृन्दावनचम्पूकाव्यस्य ॥

॥ दशमस्तवकारम्भः ॥

अथ पुनरहरहरुपचीयमानमानसविकारकारणरणरणकशून्यहृदया हृदयाधिनाथस्य तस्याङ्गसङ्गसंभावनोपायमन्वनुचिन्तयन्त्यो मनोरथारूढमनोरथा रूढभावस्यापि तस्य दुरवगाहमनोऽवगाहमनोजसा मनोजसाहाय्येन जानत्योऽपि न प्रतीतिमुपयान्त्योऽपि हितं पिहितं कुर्वत्यो निजमभिप्रायं सह सहचरीभिः सकला एव निजनिजोत्कण्ठां वाग्विषयीचक्रुः ॥ १ ॥

दशमे राधिका प्राप कृष्णपाणिकृतस्त्रजम् ।
कृष्णोऽपि राधिकापाणिकृतपाकाचभोजनम् ॥

रणरणकं कामचिन्ता । मन एव रथस्तत्रैवारूढो न तु बहिः प्रकटो मनोरथो यासां ताः । रूढभावस्य जातपूर्वानुरागस्यापि तस्य श्रीकृष्णस्य दुरवगाहस्य मनसोऽवगाहम् । मनोजसा न स्वोजसा न बुद्धिबलेन किंतु मनोजस्य कन्दर्पस्यैव साहाय्येन हितं निजमभिप्रायं कृष्णेन सह हन्त रंस्ये · इत्येवंलक्षणं पिहितमाच्छादितं कुर्वत्योऽपि ॥ १ ॥

तत्र चन्द्रावली बलीयसा मनोरागेण सोद्वेगं मुखविजितपद्मां पद्मां तां सखीमुवाच ।

किं गौरि गाढगुरुणा गुरुगौरवेण
किं निन्दया बत ननान्दुरमन्दया नः ।
किं ज्वालया खलगिरो गरलोपमायाः
श्यामेन मे हृदतिरक्तमकारि पीतम् ॥ २ ॥

ननान्दुः पतिभगिन्या मे पीतं हृद् हृदयमतिरक्तमकारीति विरोधः । तत्रापि श्यामेनेत्यतिविरोधः, नहि शामलिम्नैव रक्तिमा कर्तुं शक्यते, श्रीकृष्णेन मम मनः स्वानुरक्तं कृतमिति तत्त्वार्थः ॥ २ ॥

तामाह पद्मा ।

पद्मावि यावद्वार्षभानवी नवीनानुरागवति प्रागवति प्रायिकीं रतिं तत्र न प्रसज्यति तावत् कृताभियोगेन योगेन तेन सह ते यथा भूयते तथा मया समयासत्या सविधे विधेयं स यथा तव स्वयं समुपैति ॥ ३ ॥

नवीनानुरागवति श्रीकृष्णे प्राक् प्रथमं प्रायिकीं रतिम् · अवति रक्षति यावत् किंतु न प्रसज्यति सङ्गं न प्राप्नोति तावत् तेन श्रीकृष्णेन सह कृतोऽभियोगः फलसिद्धिर्यत्र तेन ते तव योगेन सङ्गेन यथा भूयते तथा समयस्य · आसत्त्या शैघ्र्येणैवेत्यर्थः, सः · अयं श्रीकृष्णस्तव सविधे निकटे यथा स्वयं समुपैति, ततश्च तया सह जनिष्यमाणात् सङ्गात् पूर्वमेव त्वत्सङ्गे जाते तामसौ विस्मरिष्यतीति भावः ॥ ३ ॥

किंतु व्रजराजसुतस्य तस्य स्वभावो हि भावो हित उहितस्तस्यां तस्यां तस्यामेव हृदतटनिकटे ॥ ४ ॥

ननु तस्यामयमनुरक्तो लक्षितः, कथं कृतमत्सङ्ग एव तां विस्मरिष्यतीति तत्राह किंत्विति । भावः प्रेम,स्वभावः स्वस्य भां कान्तिमवतीति सः,हितो हितमय उहितस्तर्कितस्तस्यां राधायां, किंतु तस्यां तस्यामेव कालियदमनरात्रावेव, न तु त्वदीयसर्वदिवस इति भावः ॥ ४ ॥

इति तामाश्वास्य तथैव स्म चेष्टते चेष्टितेयं तस्मिन्नेव कर्मणि तस्याः प्रवीणासीत् ॥ ५ ॥

चेष्टते स्म, अचेष्टत । दृष्टता चेयं तस्याः ॥ ५ ॥

अथैवमुत्कण्ठाभराधिकां राधिकां विजने निजनेनिज्यमानसौहृदसहचरीभिः सह सहमानाममानामनुरागव्यथां किमपि चिन्तयन्तीमकस्मादुपगतापगताखिलावकरा कराकलितबकुलमाला बकुलमालाख्यसख्यन्विता श्यामा निजगाद ॥ ६ ॥

निजाश्च ता नेनिज्यमानसौहृदा अतिशुद्धसख्यश्चेति ताभिः सहचरीभिर्ललितादिभिः, अमानाम् · अपरिमाणाम् ॥ ६ ॥

अयि वार्षभानवि न विना भवतीमिह गोकुले कुले च कुलललनाललामभूतानां भूतानां सौभाग्यसंपदं कापि वहति ॥ ७ ॥

ललामभूतानां तिलकरूपाणां, श्रेष्ठयुवतीनां कुल इत्यर्थः। भूतानां सैाभाग्यसंपदं प्राणिमात्रकर्तृकप्रीतिम् ॥ ७ ॥

यदवधारितं तस्मिन्नहनि हनिष्यमाणप्रमोदोहेन रसदोहेन रसवती हृदयाकर्षणाङ्कुशेन निरीक्षणेन क्षणेन मूर्तिमतेव यदसैा व्रजराजकुमारो मारोद्भुतहृदय इव चकोरको रजनीनाथमिव भवदास्यं धयति स्म ॥ ८ ॥

भूतानामिति क्रियदाधिक्यं, यतः सर्वसैाभाग्यसंपन्निधेः श्रीकृष्णस्यापि चेतः समाकर्षसीत्याह तस्मिन्नहनीति। अहोदिनवासरादिशब्दानामहोरात्रवाचित्वात् कालियदमनदिवसीयरजन्यां, तन्मयावधारितं, केन चिह्नेन,हनिष्यमाणो गंस्यमानः प्रमदस्य· ऊहो यस्मात् तथाभूतेन निरीक्षणेन, यदुत्तरकालमानन्दस्य तर्को व्यक्तो भवतीत्यर्थः, हन्तेर्गमनार्थत्वाद् गमनस्याप्यत्र व्यञ्जनार्थत्वात्, यमकानुरोधादसमर्थतादोषः सोढव्यः।

यद्वा, हनिष्यमाणो नाशं प्राप्स्यन् प्रमदानां गोपीनामूहस्तर्को यत्र तेन, तदानीमनुरागस्य चाक्षुषत्वाच्च पुनस्तर्को भविष्यतीत्यर्थः। पुनः कीदृशेन,रसं दोग्धि पूरयतीति तेन। क्षणेन· उत्सवेन। धयति स्म·अपिबत् ॥ ८ ॥

तदधुना तस्यानुरागपात्रं त्वमित्यवगतं, गतं च मेऽमानस्यं मानस्यं सारस्यं च मे समजनि ॥ ६ ॥

अमानस्यं दुःखं, "पीडा बाधा व्यथा दुःखममानस्य"मित्यमरः। मानस्यं मनसि जातं, सारस्यं सरसता ॥ ९ ॥

साह।

साहसकारिणि किमेवं प्रलपसि।

सा कालि कालियरिपोरनुरागपात्रं
या गोकुले कुलजनैरनुमातुमर्हा।
इन्दुर्विना कुमुदिनीं स्वयमुज्जिहीते
नेन्दुं विना कुमुदिनी विकचत्वमेति ॥ १० ॥

हे· आलि सखि सा का, कुलजनैः कुलवतीभिः ॥ १० ॥

तन्नूनमखिलाङ्गनानां स एवानुरागपात्रं न तस्य कापि।

श्यामाह, माहर मद्वचसि संदेहं देहं च मा खेदय दयस्व निजसैाभाग्यं प्रति प्रतिजानीहि स हि ममेवेति ॥ ११ ॥

मद्वचसि संदेहं मा· आहर मा· आनय ॥ ११ ॥

ललितोवाच।

वाचनिकोऽयमाश्वासः किंवा यथार्थ इति।

तया पुनरूचे, ललिते पृच्छ बकुलमालिकां मत्सहचरीम् ॥ १२ ॥

वाचनिको वचनमात्रभवः ॥ १२ ॥

ललिताह।

बकुलमालिके मालि केवलमस्माकमनुरोधेनैव कथनीयम् ॥ १३ ॥

मा निषेधे, आलि हे सखि, केवलम् ॥ १३ ॥

बकुलमालाह।

बकुलमाला हरिष्यति खल्वियं ते संदेहं तथापि किंचिदाकर्ण्यतां कर्ण्यतां यद्वहति ॥ १४ ॥

बकुलस्य माला माल्यं, कर्ण्यतां कर्णेहितत्वम् ॥ १४ ॥

एकस्मिन् समये समयेक्षितः परमसुखवर्धनस्य गोवर्धनस्य गोचरः, चरति नैचिकीनिचये तदनुपदीनेऽदीने सहचरचये नर्मदानुचरतया स रसमुद्रः समुद्र इव गभीरो भीरोधकः ॥ १५ ॥

समया निकट एव· ईक्षितः, "समयान्तिकमध्ययो"रित्यमरः। नर्मदः परिहासदायी·अनुचरो यस्य तस्य भावस्तत्ता तया, पक्षे नर्मदा नदी, स प्रसिद्धः, रसस्य जलस्य समुद्रः, समुद्रस्य सरित्पतित्वेन सहायकतया तदनुचरत्वारोषः। भीरोधको निर्भयः ॥ १५ ॥

कुसुमितबकुलपालिपालितं विपिनमध्यमध्यवस्थाय ललितेन गलितेन गम्भीरगन्धभृता भृतालिशोचिषा कुसुमेन माल्यमाल्यतिमनोहरं निर्मिमाणः ॥ १६ ॥

कुसुमितानां बकुलवृक्षाणां पालिभिः श्रेणिभिः, पालितमिति तत्प्राधान्यतात्पर्यकम्। माल्यं स्रजम्। आलि हे सखि। अतिमनोहरम् ॥ १६ ॥

आलोक्य च तं सहसा सह साध्वसेन लताविटपेनात्मानमपवार्य वार्यमाणधैर्यया करकलितदेवीशुकेन कुसुमासवेन नवेन नर्मदेन सख्या स व्यापितवार्षभानवीनवीनानुरागदर्शनकालचयकथः कथमपि समाकलितगाम्भीर्यः धीर्यमाण इव मया चिरमेव निभृतं न्यभालि,भालिताहं न केनापि ॥ १७ ॥

अपवार्य तिरोधाय, वार्यमाणं निवर्त्यमानं धैर्यं यस्याः, चापलभावेनेत्यर्थः, तथाभूतया मया, स श्रीकृष्णः, न्यभालि· *सविशेषं दृष्टः। अहं तु केनापि न भालिता न प्रत्यभिज्ञा-

* समवेक्षमिति पा०।

मा । करे कलितौ गृहीतौ देव्या राधायाः शुकौ येन तेन ख्यापिता प्रस्तुता वार्षभानव्या नवीनानुरागस्य दर्शनं यत्र तथाभूतस्य कालत्रयस्य कथा येन सः । वनगमनसमये जन्मदिनोत्सवे कालियदमनदिवसीयरात्रौ च दर्शनात् ॥ १७ ॥

ततः कुसुमासवेन कुसुमासवेन सदृशया गिरा किंचिदप्रस्तुतं प्रस्तुतम्, वयस्य! इयमियं स्वकरगुम्फिता बकुलमाला मा लाघवमासादयितुमर्हति,तदिमां तस्यै· उपहारीकृत्य हारीकृत्यवस्थां प्रापयेति वदति सति ॥ १८ ॥

हारीकृत्यवस्थां हारीकरणदशाम्, अभूततद्भावे च्विः, इयं माला तस्याः कण्ठे हारत्वेन कल्पिता भवत्विति वाक्यार्थः । परमानुरागिण्या तया शुष्कापीयं माला प्रतिदिनमेव स्वकण्ठे हार इव धारयिष्यत इति हारशब्दतात्पर्यम्, भङ्ग्या तु हारीकृतिरूपामवस्थां प्रापयेति, त्वत्कण्ठे·ऽहमपि त्वया हारीकृतः स्यामिति ज्ञापयेत्यर्थः ॥ १८ ॥

स तिलमात्रं स्मित्वा वयस्य! कथमेतत् संपद्यतां, गद्यतां, गगनकुसुममालया गगनमण्डनमिव, यदेव निजगाद ॥ १९ ॥

संपद्यतां घटतां, गद्यतां कथय, गगनपुष्पमालया गगनस्य मण्डनमिवेति, तद्यथा मनःकल्पनामन्तरेण कार्यतो न घटते तथैवैतदिति, तस्या गोष्ठमध्ये स्थितत्वादस्माकं मध्ये केनापि गन्तुमशक्यत्वात्,संप्रति मम तु ततो दूरे वने स्थितत्वात् पुष्पमालायाश्च चिरकालस्थायित्वासंभवाच्चेति भावः ॥ १९ ॥

निजगादवैयर्थ्यनिराकरणाय करणायत्तपाटवोऽपि क्षणं चित्रलिखित इव तस्थौ कुसुमासवः ॥ २० ॥

निजगादस्य निजवचनस्य व्यर्थतानिरसनाय, गदिर्घजन्तः, करणायत्तं बुद्ध्यधीनं पाटवं वाक्चातुर्यं यस्य सोऽपि प्रतिवक्तुं समर्थोऽपीत्यर्थः ॥ २० ॥

तत्समकालमकालवात्येव पद्मा समुपसन्नवती, नवतीव्रतरोत्कण्ठया मया समया समुत्पन्नमनोरथयैव श्रूयते कुसुमासवस्तदा यदवादीत् ॥ २१ ॥

समया निकटे ॥ २१ ॥

अयि कासि, कासितचतुरिमणि मणिरिव दीप्यसे, किं प्रयोजनं विजनं विपिनं चरसि, रसिकशेखरस्य रस्यतमचरितस्य मद्वयस्यस्य पुरतो निःसाध्वसं साध्वसंकलितत्रपात्र पालयसि, किं चरणविहारमिति तद्वचनोपरमेण छद्मना पद्मनाभस्य पुरत एव सा किमपि प्रास्तोषीत् ॥ २२ ॥

कासि का भवसि, कासिते संदीपिते चतुरिमणि चातुर्यविषये मणिरिव, साधु यथा स्यात् तथा न संकलिता न संगृहीता त्रपा यया· एवंभूता सती· अत्र पालयसि रक्षसि, करोषीति यावत् ॥ २२ ॥

अयि चन्द्रावल्या वल्यामोदकरीणां सहचरीणां सहगा पद्मा नामाहं, तया खलु गुणगौर्या गौर्या एव पूजनार्थं कुसुमान्यवचेतुमिह प्रहिता हिंता,*ईदृशानि कुसुमान्यपरत्र न लभ्यन्ते, लभ्यं ते विपिन एव तत्सौलभ्यमिति बकुलकुलमेवादौ विचेयमित्यत्रागता ॥ २३ ॥

गुणैर्गौर्या विशुद्धया, "गौरोऽरुणे सिते पीते विशुद्धे चाभिधेयवद्"इति मेदिनी । अपरत्र वनादौ न लभ्यन्ते, ते तव विपिन एव तेषां कुसुमानां सौलभ्यं सुलभत्वं लभ्यं लब्धुं शक्यम् ॥ २३ ॥

कुसुमासव आह ।

प्रसिद्धैव सा गौरी गौरीपूजनपरेति, किंतु श्रद्धागौरवादेव देवतातुष्टिरिति सा कथं नागता ।

साह ।

साहसिक साधूक्तं, किंतु,

यस्मिन् क्षणे ह्रदतटीमधिवर्तमाना
हा हन्त कृष्णभुजगं सहसा ददर्श ।
आरभ्य तं क्षणमहो·अधुनापि चित्तं
तस्या दुनोति बत तद्विषबाधयेव ॥ २४ ॥

कृष्णभुजगं कालियसर्पं, पक्षे कृष्ण एव भुजगस्तं कामविलसंचारणात्, दुनोति·उपतप्तं भवति ॥ २४ ॥

स आह ।

तद्बाधाशमनोपायो मनोऽपायो यदि भवति तदेव भावी ॥ २५ ॥

मनोऽपायः·मनसोऽपायः·अपगमः, कृष्णभुजगस्मृत्यासक्तं मनश्चेदपि गच्छति तदैवेत्यर्थः ॥ २५ ॥

साह ।

मनोऽपायकारणमेव मृगयामहे ।

स आह, तदतिदुर्लभम् ॥ २६ ॥

तदतिदुर्लभमिति, भुजगपक्षे तस्या भीरुस्वभावत्वाद् भयासक्तमनो नापयास्यत्येव, कृष्णपक्षे परमानुरागिण्या· स्तस्याः कृष्णासक्तं मनस्तु नितराम् ॥ २६ ॥

* हिताद्दृशानि·इति पा० ।

साह ।

उच्चैरौत्कण्ठ्यस्य किं दुर्लभम् ॥ २७ ॥

उच्चैरौत्कण्ठ्यस्येति, "न लोके" त्यादिना कर्तरि षष्ठीनिषेधादत्र कर्तर्येव संबन्धविवक्षया षष्ठी, अस्या जातमौत्कण्ठ्यमेव मनसोऽपायं लप्स्यत इत्यर्थः, विरहतप्तस्य मनसो मूर्च्छया लयदर्शनात् ॥ २७ ॥

स आह ।

बाधितमेतत्, सति मनसि ह्यौत्कण्ठ्यं, कथमौत्कण्ठ्येन मनोऽपायोपलम्भः ॥ २८ ॥

बाधितमिति, औत्कण्ठ्यमेव मनसोऽपायं प्राप्स्यतीति भवत्या उक्तं, तत्र मनसोऽपायसमकालमेव औत्कण्ठ्यस्याप्यपायात् तत्प्राप्तिकर्तृत्वमौत्कण्ठ्यस्य तदानीं खपुष्पायितस्य कथमस्त्वित्यर्थः ॥ २८ ॥

साह ।

मनोऽपायस्तस्या वृत्त एव मनोहरेण केनापि मनसो हरणात्, तथाप्यौत्कण्ठ्यमिति विचित्रम् ।

स आह ।

मनोहरमनुसंधेहि ।

साह ।

संप्रति बकुलमाल्यमेव यदिदं गौरीकण्ठं रञ्जयिष्यति ॥ २९ ॥

बकुलमाल्यमेवेति, साक्षात् कृष्णोल्लेखस्यास्यत्वात्, तेन च चन्द्रावलीमाश्वासयितुमवहित्थैवेयम्, अतः संप्रतीत्युक्त्या कृष्णदत्तमाल्यलक्षणया तस्याश्चित्ते विश्रम्भमानाय्य पश्चात् संगमयितुं तन्मनोहरं श्रीकृष्णमेतमनुसंधास्याम्येवेति द्योतितम् । गौरी दुर्गा, पक्षे चन्द्रावली ॥ २९ ॥

कृष्ण आह ।

वयस्य चतुरेयं, यदनयैव बकुलमालया गौरीपूजां कारयितुं कामयते, ग्रथनपरिश्रमविश्रामावधिं च ॥ ३० ॥

गौरीति, दुर्गापक्षे चन्द्रावलीमिति, चन्द्रावलीपक्षे मामिति प्रयोज्यकर्म ज्ञेयम् । ग्रथनपरिश्रमस्य विश्रमावधिं कामयत इत्यस्यानुषङ्गः ॥ ३० ॥

कुसुमासव आह ।

अयि साहसिनि प्रियवयस्यस्य निजकण्ठाभरणोचितामेनां बकुलमालिकां कथमन्या लब्धुमर्हति, तदिमान्यग्रथितान्येवावचित्य नीयन्ताम् ।

साह ।

साहसं मे कथमेवं, मे वञ्चयसि वा कथमेवं, यदि कुमारस्य रस्यप्रसादो भवेत् तदा स्वयमेव ददातु ॥ ३१ ॥

साहसं मे कथमेवमित्येकं वाक्यं, मे मम वञ्चयसि वञ्चनां करोषि वा कथमेवमनेन प्रकारेणेत्यपरं, कुमारस्य युवराजस्य, "युवराजस्तु कुमार" इत्यमरः ॥ ३१ ॥

कृष्ण आह ।

वयस्य समुचितमुक्तमनया, तद्गृह्यन्तां कुसुमानि स्वयमेव, यथैभिरेषा स्वसखीं तोषयति निर्वहति च गौरीपूजनमिति तदुदितान्तेऽतान्तेन मनसा दत्तानि कुसुमानि गृहीत्वा सा गतवती ॥ ३२ ॥

गौरीपूजनमिति पूर्ववच्छ्लेषः, तेन स्वानुरागोऽपि यथाकथंचिद्व्यञ्जित इति ॥ ३२ ॥

तव तीव्रतरतपःप्रभावेण ततः कुसुमासवेनोक्तं,

वयस्य! इयमिव यदि वार्षभानव्या नव्यालीनां मध्ये काप्यधुना धुनानेव ते हृत्तापमिहोपसीदति तदेषा माला मालाघवमुपैतीत्याकर्ण्य निःसाध्वसमेव तदनाकर्णितमभिनयन्ती पतितकुसुमावचयनच्छलेनाकस्मिकीवाहमुपसन्ना, तदनु तथैव मामवलोक्य कुसुमासव एव कासि त्वमिति मामवादीत्, तदाशुकेन शुकेन समुक्तम् ॥ ३३ ॥

आशु शीघ्रं कं सुखं यस्मात् तेन शुकेन ॥ ३३ ॥

हंहो राधासुहृदः श्यामायाः सखीयं बकुलमाला नाम बकुलमालानिर्माणहेतोरिमानि कुसुमान्याचिनोति ।

स आह,

मालयास्याः किं प्रयोजनं, जनं जनमेव बकुलकुसुमानि समानेतुं तरलयन्ति गोकुलबालाः, संकोचोऽपि चोपितस्ताभिः ॥ ३४ ॥

चोपितो दूरीकृतः, "चुप मन्दायां गतौ" इत्यस्य रूपम् ॥ ३४ ॥

शुकेनोक्तम् ।

एषा बकुलमाला बकुलमालामारचय्य गुणश्यामायै श्यामायै निजसख्यै दास्यति, सा च मद्भव्यै इति तस्या मर्यादा ॥ ३५ ॥

मद्भव्यै राधायै ॥ ३५ ॥

कुसुमासवेनोक्तम् ।

वयस्य मदुक्तिकल्पलतिका फलोन्मुखीव जाता ।

शुकेनोक्तम् ।

Digitized by Google

अमोघा हि ब्राह्मणवाणी,तदिमामाहूय दीयतां बकुलमाला, यथैनामियमेव तां प्रापयति ।

तदनु दनुजदमनो मनोज्ञतरदशनकिरणकन्दलीव्याजहारो व्याजहारोचितं किमपि ॥ ३६ ॥

मनोज्ञतरो दशनानां दन्तानां किरणकन्दल्याः कान्तिश्रेण्या व्याजेन छलेन हारो यस्य सः, इत्यपह्नुत्यलंकारेण मन्दहासो द्योतितः । व्याजहार॰ उवाच ॥ ३६ ॥

कथमियमागमिष्यति हासपटोर्वटोर्वचसा, सहजगर्ववत्यो हि गोकुलबालास्तदपि दयित विहगोत्तम स्वदेवीपक्षपातेन पक्षपातेन स्वयमेवास्याः सविधमुपसर्पतु भवान्, स्वभावकलकोमलेनामलेनानेन भवतो वचसा नेष्यत्यसौ बकुलमाला बकुलमालामित्युक्त एव विहगराजो मदभ्याससमभ्याससाद ॥ ३७ ॥

स्वदेव्याः पक्षपातेन साहाय्येन हेतुना, पक्षयोर्गरुतोः पातेन चालनेन, विहगराजः शुकः ॥ ३७ ॥

आसाद्य च बकुलमाले मां परिचिनोषि चिनोषि किं बकुलकुसुमानि, एहि व्रजराजकुमारसविधम्, अहं ते तत्करगुम्फितां स्रजं दापयिष्यामि किमेतावताधिकेनावचयनपरिश्रमेण ।

मयोक्तम् ।

अयि शुककुलावतंस “संसर्गजाः किल दोषगुणाः” इति सत्य एव व्याहारः, यदियं ते स्वभावलम्पटस्य पीतपटस्य पीतमधुरसस्येव समदस्यासङ्गेन भिन्नेव मतिरनुभूयते, क्व नु दृष्टं भवता, कुलकुमार्यः परपुरुषदत्तां मालामुरीकुर्वन्ति ॥ ३८ ॥

पीतो मधुरसो येन तस्येव ॥ ३८ ॥

शुकेनोक्तम् ।

अयि परमपुरुष एवायं न हि परपुरुषः ।

मयोक्तम् ।

पुरुष एवायं कथं परम्॰ अपुरुष इत्युच्यते ।

तेनोक्तम् ।

नात्र संधिरनुसंधेयः किमपि वाचालतालताविस्तारेण, तत् कर्मधारयपरं पदमेतद्दुर्लभमिति तत्कथाचातुर्येण जिताहं,मातः परं मातः परंपरागतं वाम्यमकरवम् ॥ ३९ ॥

संधिर्मकराकारयोः स्वप्रतिभाकल्पितयोः संश्लेष इत्यर्थः, पक्षे॰ अपिः प्रश्ने, अत्र श्रीकृष्णे संधिः किं न॰ अनुसंधेयः, अपित्वनुसंधातुं योग्य एवेत्यर्थः, अत एव तत् कर्म मदुक्तमालाग्रहणलक्षणं धारय स्वीकुरु, एतत् पदम्॰ एष व्यवसायो दुर्लभ इत्यर्थः, मा निषेधे, अतः परं तदनन्तरं, परंपराप्राप्तं वाम्यं मा॰ अकरवं न कृतवत्यस्मि, अत्राहिता माशब्देन योग इत्यडागमनिषेधाभावः, मातरिति॰ औत्सुक्यवैक्लव्यादिभिः सख्यौ प्रत्यपि स्त्रीणां तत्संबोधनं जात्युक्तिरेव ॥ ३९ ॥

मकरबन्धुरकुण्डलस्य तस्याभ्यासमभ्यासमहम् ॥ ४० ॥

अभ्यासं निकटम्, अभ्यासमित्यभिपूर्वस्यास्तेर्लङि रूपम् ॥ ४० ॥

ततश्च द्विजत्वेन परस्परमतिस्निग्धयोरावयोः प्रियरावयोः प्रियसुहृदोः कुसुमासवशुकयोरुपरोधेन विरोधेन विरहितं चिरतरानुरागिण्यै शुकदेव्यै स्वकरकमलामोदमेदुरा दुरासदा श्रियोऽपि बकुलमाला बकुलमालाद्वारा प्रापणीया, सफलीकर्तव्यं च निजशिल्पकौशलम् ॥४१॥

आवयोरुपरोधेनेति, नायकस्य प्रकटमभ्यर्थनाद्दोषभङ्गार्थमवहित्थ्या, अत एव विरोधेन विरहितं यथा स्यादिति, अन्यथा॰ आवां त्वया विरुध्यमानौ स्याव इति, अतो नास्ति तव दोषलेश इति भावः ॥ ४१ ॥

इति कुसुमासवेन गदितो दामोदरो दरोदितवेपथुना कियदुदीर्णघर्मजलकणमेदुरेण करकमलेनोल्लास्य मूर्तां निजप्रणयमाधुरीमिव बकुलमालामेनां दरहसितसुधालेशपेशलवदनसुधाकरमवहित्थया मन्मुखानभिमुखीकृत्य कृत्यकोविदो मम करे सस्पर्शं समर्पयामास ॥ ४२ ॥

उल्लास्य॰ उत्थाप्य, सस्पर्शमिति, मालासंप्रदानभूताया राधायाः करस्पर्शौत्सुक्यं स्वस्य सूचयति ॥ ४२ ॥

मया च मूर्तं सुरभितमं तदीयं हृदयमिव करे निधाय माल्यमिदं कृतार्थयेव समागत्य मद्देव्यै सर्वमामूलतः कथयित्वा समर्पितं, सा चेयं मद्देवी त्वरितमेवादाय समागतेति कथितवत्यां बकुलमालायां तां बकुलमालां श्यामा राधायाः कण्ठवर्तिनीं करोति स्म, तदनु वार्षभानवी नवीनघनमेदुरस्य रस्यतमं स्पर्शमिव तस्य तस्याः स्रजं स्पर्शमुपलभ्य लभ्यमानामोदेन पुलककुलककरम्बितकपोलफलकमलककुलास्कन्दिमन्दाश्रुमन्दाक्षलक्ष्मीभरभरितमीषदानतवदनकमलममलतरदरहसितसुधाधौतमधुराधरकिशलयमानन्दसंदोहमनुभवन्ती तर्मातिरयं तिरयन्ती च सुहृज्जनस्य चापरिचितां कामपि दशामासाद्य बकुलमालामालिलिङ्ग ।

ललिताह ।

श्यामे बकुलमालयोर्न केवलं नामतः साम्यं न केवलं गुणतश्च·अपितु सौभाग्येनापि । तथाहि ।

कृष्णकरस्पर्शजुषौ राधाकण्ठोपकण्ठसंसक्ते ।
गुणवत्यौ सुकुमारे सुपरिमले द्वे बकुलमाले ॥

श्यामाह ।

ललिते ललितेयं ते भणितिरिति ॥ ४३ ॥

तदीयं हृदयमियेति, तस्मात् तद्धृदयरूपमिदं राधाहृदये शीघ्रं संगमयेति स्वदेवीं प्रति निवेदनभङ्गी, बकुलमालां·बकुलस्रम् ।

विपक्षीयसखीं· याचमानमानाय्य लाघवम् ।
सुहृत्पक्षसखीं याचमानं मानं प्रदाय तम् ॥
कान्तं मालार्थमालापमुद्रामुद्रामणीयकम् ।
विज्ञाय राधिका प्राप प्रेमसाराधिकां दशाम् ॥

पुलककुलकैः करम्बितं युक्तं कपोलफलकं यत्र तद्यथा स्यात् तथा·अलककुलास्कन्दि·अलककुलाप्लावि मन्दमश्रु यत्र तत्, ततश्च प्रेमप्राकट्ये मन्दाक्षं लज्जा तस्य शोभातिशयेन भरितम्·, अनुभवन्ती· आस्वादयन्ती प्रथमं, ततस्तमानन्दसंदोहम्· अतिरयम्·अतिवेगं तिरयन्ती तिरस्कुर्वती च, आयत्यां मूर्च्छोदयात् ॥ ४३ ॥

अथैवमेव समये वृषभानुना भानुना सदृशमहसा महसारस्येन नयविनयविदग्धतापूर्वकमपूर्वकमनीयकृतसपरिवारवारव्रजराजनिमन्त्रणमन्त्रणतया सुरसतापरिपाकपाककौशलशलभ्रातुर्यतुर्यदशामिव स्वदुहितरं हितरञ्जनकरीं तमेव सखीजनसुखाराधां राधां समानेतुं प्रहिता हिता सुचरिता सुचरिता नाम तस्या एव धात्रेयी समाजगाम ॥ ४४ ॥

अथ तादृशं श्रीकृष्णस्यानुरागमात्मनि संभावितवत्या धृताश्वासायाः पुनरतिविवृद्धतद्दर्शनोत्कण्ठायास्तस्याः किमपि स्वाभिमतार्थसंपादि सोत्सवमेव तद्दर्शनं दैवेनैव तदवसरे फलितमित्याह· अथैवमेवेत्यादिना । वृषभानुना तां राधां समानेतुं प्रहिता प्रेषिता तस्या धात्रेयी समाजगामेत्यन्वयः । महसारस्येन· उत्सवसरसतया· अपूर्वा कमनीयता यत्र तद्यथा भवत्येवं कृतं सपरिवारवारस्य परिवारसमूहसहितस्य व्रजराजस्य निमन्त्रणे मन्त्रणं युक्तिर्येन तस्य भावस्तत्ता तया । सुरसतायाः सौरस्यस्य परिपाको यत्र तथाभूते पाके यत् कौशलं नैपुण्यं तत्र शलतः प्रतिक्षणमुद्गच्छतश्चातुर्यस्य तुर्यदशां चतुर्थीं कक्षां,मूर्तिमतीमिवेत्यर्थः । अत्र पाककर्मणि दुर्वाससो मुनीन्द्राल्लब्धवरायाः क्वापि दिवसे पितृसदनान्तर एव बाल्यखेलावेशेनैव कृतपाकायास्ततः स्वसखीभ्यः परिवेषयन्त्याः कौतुकेन तत्रागतायै सलालनप्रपञ्चं तदन्नं याचमानायै स्वमात्रे च सस्मितं विभजन्त्यास्तस्यास्तत् पाककौशलं परंपरातः श्रावितस्य वृषभानोरप्यौत्सुक्येन तदुपरत्र क्वापि दिवसे तत्पक्वान्नमलक्षितं भुञ्जानस्य सचमत्कारं लोकोत्तरतया तदास्वादमनुभवतस्तदानीमेव· अहो एतदन्नं मत्सखश्रीव्रजराजश्चेत् कदाचिदुपयुङ्क्ते मत्प्राणकोटिलाल्यतमः श्रीकृष्णश्च तदैव मे मनसो निर्वृतिरित्युत्पन्नमनोरथस्य तस्यायं समये महोत्सवारम्भ इति ज्ञेयम् ॥ ४४ ॥

आगत्य च सकलमेवानुपूर्व्या संश्राव्य गुरवोऽपि ते कृतानुज्ञा नु ज्ञापनापेक्षालिक्षालितास्ते,तदलं विलम्बेन ॥ ४५ ॥

ते तव गुरवः श्वश्रूश्वशुरादयः । कृता अनुज्ञा पितृगेहं गच्छत्विति संमतिर्यैस्ते ।

ननु तथापि स्वकर्तृकविज्ञापनं तेषु ममोचितं तत्राह । नु भो ज्ञापनहेतोरपेक्षालौ· अपेक्षासमूहे विषये क्षालिताः शोधितास्ते, त्वां प्रति तेषां मनःकालुष्याभावात् त्वज्ज्ञापनापेक्षयालमित्यर्थः ॥ ४५ ॥

लम्बेन भवद्गममनवेत्य श्यामे· त्वमपि तेनादिष्टा सालीकालीकालस्यमपहाय सहैवानया नयासादितसौजन्या जन्याय भविष्यसीति । विशाखे·गुणललितया ललितया सह त्वमपि भविष्यसीति तद्वचनोपरमे परमेण हर्षेण ललिता समभाषत ॥ ४६ ॥

हे श्यामे तेन श्रीवृषभानुना त्वमपि· आदिष्टा, अतस्त्वद्गममनालोक्य· अहं न लम्बेन गच्छामि, सालीका सखीसहिता· एव, अलीकालस्यं मिथ्यालस्यं, जन्याय हिताय, "जन्यो वरवधूज्ञातिप्रियभृत्यहितेषु चे"ति विश्वः ॥ ४६ ॥

सुचरिते· कथमयमाकस्मिको निमन्त्रणमहोत्सवः ।

सुचरिताह,

नायमाकस्मिकः, श्रीकृष्णस्य जन्मतिथिरभूद्यदा तदा व्रजराजेन सर्वे निमन्त्रिता यद्यासंस्तस्मिन्नेवाहनि पितुरस्या रस्या मनोवृत्तिरभूत्, मयापि सदारः सकुमारः सपरिवारश्च घोषाधीशो धीशोभनो यथाकालं निमन्त्रयितव्य इति चिरमनोरथसमारूढो रूढोऽयं महोत्सवः संपत्स्यत इति ।

श्यामाह,

गुणसाराधिके मह्देवं कौतुकं कौतुकं न रञ्जयिष्यति, तदवलोकनीयमेतत्, विशेषतश्च पितृपादानामाज्ञा, तदुत्थीयतामिति सर्वा एव वृषभानुभवनं भानुभवनं यदि समाजग्मुः, समाजग्मुषी तदा तत्र मूर्तिमतीव महोत्सवश्रीः ॥ ४७ ॥

भा शोभा तस्या अनुभवनमनुभवो यत्र तत् ॥ ४७ ॥

आगतासु तासु पिता सुतामभाषत, स्वागतं वत्से!, सुखं वर्धते!, अथ कृतवन्दनां मूर्धानमाघ्राय पुनरुवाच ॥ ४८ ॥

सुखमिति कर्तृपदम् ॥ ४८ ॥

पाकेन कौशलवता कमनीयतायाः
कल्याणि पाणिकमलं सफलीकुरुष्व ।
घोषेश्वरः सदयितः ससुतः सरामः
श्वोऽस्मद्गृहे यदशिता स निमन्त्रितोऽस्ति ॥४६॥

कमनीयताया यत् कौशलं तद्वता पाकेन पचनक्रियया पाणिकमलं सफलीकुरु, अशिता भोक्ता ॥ ४९ ॥

ललिताह ।

तात किमु चितमुचितमेव तदुपकरणम् ॥ ५० ॥

तस्य पाकस्य· उपकरणं किं चितं प्रस्तुतम्, उ प्रश्ने ॥ ५० ॥

स आह ।

चिरचितानि रचितानि च विविधकौशलेन सकलान्योवोपकरणानि करणानियम्यानि, कौतुकेन न केन न केवलमद्यैव ॥ ५१ ॥

चिरचितानि बहुदिनत एव प्रस्तुतीकृतानि न केवलमद्यैव । किंच, केन कौतुकेन न· अपितु सर्वेणैव । रचितानि कल्पितानि । करणैरिन्द्रियैरनियम्यानि, अनन्तत्वात् । वक्तुं द्रष्टुं ग्रहीतुमपि सम्यक्तया· अशक्यानीति तासां पाकोत्साहो वर्धितः ॥ ५१ ॥

तदालोकयन्तु शुभवत्यो भवत्यो भवनं प्रविश्य संपन्नमसंपन्नमपि वा विलोक्य पदार्थं विलोक्यपदार्थं यमन्यमिष्टतमं तमञ्जसा च कथयन्त्विति ॥ ५२ ॥

पदार्थमुत्तमद्रव्यं, संपन्नमसंपन्नमपि वा विलोक्य, यम्· अन्यं दृष्टतमं विलोक्यपदार्थं विशिष्टलोकार्हदिव्यवस्तु, आलोकयन्तु तत्रापयुक्तत्वेन पर्यालोचयन्तु तमपि· अञ्जसा शीघ्रमेव कथयन्तु, ततश्चाधुनैवाहं तमाचिनोमीति भावः ५२॥

सकलाः सकलास्तद्वचनविरामेऽविरामेण हर्षेण भुवनकमनीयतासदनं सदनं प्रविश्य प्रमोदजनयित्रीं जनयित्रीं च प्रणम्य सकलामेव सामग्रीमग्रीयां शंपासंपातनिभा निभालयामासुः ॥ ५३ ॥

सकलाः पाकादिशिल्पवत्यः, कमनीयतायाः सदनं प्राप्तिर्यत्र तत् सदनं गृहम्, अग्रीयां मुख्याम्, शंपासंपातनिभा विद्युत्संघट्टतुल्याः ॥ ५३ ॥

अथ धेनुगणावनतो वनतो निवर्तमानं नवर्तमानं नरकरिपुं करिपुंगवगामिनं तनयमासाद्य व्रजेशाजेशादिनुतकीर्तिः स मधुमधुरमुवाच ॥ ५४ ॥

नवो नित्यनवीनः, ऋतो निष्कपटो मानः पूजा स्वस्वप्रेमानुरूपकटाक्षकुवलयार्पणादिलक्षणा यस्य तम् ॥ ५४ ॥

वत्स वत्सरावधि समुपचितमनोरथेन समुपसन्नवृषभानुना वृषभानुनासि श्वो निमन्त्रितो मन्त्रितोऽनुचरनिकराद् गृहीतमन्त्रेण ॥ ५५ ॥

वृषभानुना श्वो निमन्त्रितोऽसि, कीदृशेन, समुपसन्ना वृषाणां पुंगवानां भानवः किरणा यस्य तेन, अतिगोसमृद्धिमत्त्वादस्मत्तुल्येनेत्यर्थः । मन्त्रितो मन्त्रिरूपादनुचरसमूहाद् गृहीतो मन्त्रो मन्त्रणं येन तेन ॥ ५५ ॥

तत्प्रणयाय श्वः श्रेयसे श्वःश्रेयसेन भवितव्यम् ॥ ५६ ॥

अतस्तत्प्रणयाय तस्य प्रणयं सफलयितुम्, प्रणयाय कीदृशाय, श्रेयसे श्रेष्ठाय । श्वः परे द्यवि । श्वःश्रेयसेन कल्याणवता वत्सेन । "श्वःश्रेयसं शिवं भद्र"मित्यमरः ॥ ५६ ॥

सहचरा एव पालयिष्यन्ति सविधेऽनुगणं धेनुगणं, तदवनाय वनाय न भवता गन्तव्यमिति निगदितो मात्रा मात्राहीनकरुणः कथमहो भो जननि भोजननिमित्तं सहचरानन्तरेणैकाकिना भवितव्यं मया, तदलं मे निमन्त्रणेनेति यदि यदिदमूचे । ५७ ॥

सविधे व्रजस्य निकट एव । अनुगणं प्रतियूथमेव । मात्रया·द्रव्यस्तया हीना करुणा यस्य सः । भो जननि हे मातः । यदिदं यदेतत् । ऊचे·इति"ब्रूञ् व्यक्तायां वाची"त्यस्य रूपम् ॥ ५७ ॥

कृतनयस्तनयस्तदा तज्जननीति परा जननीतिपराचचक्षे ॥ ५८ ॥

तदा तस्य जननी यशोदा । इति वक्ष्यमाणवाक्यम् । कीदृशी, परा श्रेष्ठा । जननीतिपरा लोकनीतिज्ञा । आचचक्षे· उक्तवती ॥ ५८ ॥

तात ! तातप्यमानमानसेन न भाव्यं, सहजसहचरप्रणयं प्रणयसि यद्येवं, तदा सह सहचरैरेवावस्थातव्यमिति निगदितो दितोपद्रवो निखिलभुवनस्य वनस्य विहारे भाषिणि मनो निवर्तयामास ॥ ५८ ॥

निखिलभुवनस्य दितः खण्डित उपद्रवो येन, तस्याप्ययं मनस्तापः कथं तिष्ठत्विति भावः ॥ ५९ ॥

वर्तयामास च वृषभानुना स्वात्मजापाचिते स्वात्मजापाचितेन प्रणयेन सारस्यम् ॥ ६० ॥

वृषभानुना प्रयोजककर्त्रा । स्वात्मजया स्वदुहित्रा पाचिते कारितपाकेऽन्नादिवस्तुनि प्रणयेन प्रेम्णा सारस्यं सरागतां वर्तयामास । प्रणयेन कीदृशेन, स्वस्य आत्मनि मनसि जपे राधारूपगुणनामाद्यावृत्तिमयेराचितेन वर्धितेन ॥ ६० ॥

अथ निशान्ते निशान्ते प्रमोदेन समागता वृषभानोर्भानोरिव घृणयो घृणयोपचितापचितावतिनम्राः पुरन्ध्रयो रन्ध्रयोगहीनां वाचमभाषन्त ॥ ६१ ॥

निशान्ते प्रातः, निशान्ते पक्षरणाद्व्रजेश्वर्या गृहे, "निशान्तवस्त्यसदन"मित्यमरः, वृषभानोः पुरन्ध्रय आगताः । कीदृश्यः, भानोः सूर्यस्य घृणयः किरणा इव । ततश्च घृणया कृपया हेतुना व्रजेश्वरीकर्तृकायाम् उपचितापचितौ प्रवृद्धपूजायां विषये लज्जया अतिनम्राः, सूर्यघृणयोऽपि प्रातर्गृहमागता अतिनम्रा गृहिण्या प्रणत्यादिना पूज्यन्ते । रन्ध्रयोगहीनां छिद्रसंपर्करहितां, निष्कैतवामित्यर्थः ॥ ६१ ॥

अवधीयतां व्रजेश्वरि भवत्या स्वार्थसाराधिका राधिकाजनकस्य वागीशया ॥ ६२ ॥

भवत्या ईशया ईश्वर्या राधिकाजनकस्य वागवधीयताम् । कीदृशी, स्वस्य अर्थसारेण प्रयोजनमुख्येन अधिका ॥ ६२ ॥

वागीशयापि स्तोतुमशक्यानि ते वत्सलतालताप्रसूनानि चरितानि, तेनाद्य तु द्यतु भवती भवतीव्रयातनां हरिभक्तिरिव मद्गेहापदं पदं धारयन्ती, रयं तीव्रमासाद्य सपत्यपत्यपरिजना सापत्यरोहिणीसहिता हिताय तायतामयि मयि करुणा च त्वयेति ॥ ६३ ॥

वागीशया सरस्वत्या । तेन अद्य तु अद्यैव । द्यतु खण्डयतु । रयं तीव्रमतिशयवेगमासाद्य । पत्यपत्यपरिजनैः सहिता, तायतां तन्यताम् ॥ ६३ ॥

किंच,

समस्ताः समस्तान्येवाभ्यङ्गोद्वर्तनस्नानादीनि कर्माणि ममैव वस्त्येऽवस्त्येयानीति त्वरितमेवागन्तुमर्हन्ति ॥ ६४ ॥

समस्ताः सर्वा एव त्वदाज्ञास्त्वरितं स्नानाद्यकृत्वैव आगन्तुमर्हन्ति । यतः समस्तान्येवेत्यादि ममैव वस्त्ये गृहे अवस्त्येयानि समुदायेनैवानुष्ठेयानि । "स्त्यै शब्दसंघातयो"रिति धात्वर्थस्यैकांशेन संबन्धात् ॥ ६४ ॥

आह व्रजेश्वर्यार्श्वर्या यदिदं विनयमाहात्म्यं तेने तेनेह वयं सर्व एव जिताः ॥ ६५ ॥

आह व्रजेश्वरी, आशु शीघ्रं, हे अर्याः, आदरभावया हे स्वामिन्य इत्यर्थः । यद्वा,वार्ता चतुर्विधा, तत्र "वयं गोवृत्तयोऽनिश"मिति भगवद्वाक्यानुसारेण तत्रत्यगोपानां सर्वेषामेव वैश्यत्वाद्वै वैश्या इत्यर्थः, "स्यादर्यः स्वामिवैश्ययो"रित्यमरः । तेने विस्तृतवान् ॥ ६५ ॥

तदयि गम्यतां गम्यतां परिहरता हरता च मनोऽस्माकं तस्य विनयेन नयेन च यथानिदेशं करवामेति ॥ ६६ ॥

उक्तमेवार्थं पुष्णत्याह,नयेन च नीत्या च । कीदृशेन, गम्यतां गम्यत्वं परिहरता त्यजता । विनयेन अगम्येन, अगाधेनेति यावत् ॥ ६६ ॥

अथ वृषभानुना भानुनाथितघोषाधीशानुरूपचारूपचारमभित उपचितीकृत्य कृत्यकोविदतया तदागमनापेक्षणक्षणवशेन ॥ ६७ ॥

वृषभानुना पथि निहितेक्षणेन व्रजराजकिशोरः क्षणेन ददृशे इत्यन्वयः । भानोरिष्टदेवात् सकाशान्नाथितं संपादयेति प्रार्थितं घोषाधीशस्यानुरूपं योग्यं चारुमुपचारम् । यद्वा, भा कान्तिस्तया, अनुनयेन नाथितः, मां स्वीकुर्विति प्रार्थितो यो घोषाधीशस्तस्यानुरूपम् ॥ ६७ ॥

पुरतोऽरणपुरतोरणतो रणत्किङ्किणीजालमालिन्यां मालिन्यांशेनापि रहितायां हितायां श्रेणीभद्रपूर्णकलशलसन्नवकिशलयसवृन्तमङ्गलनारिनारिकेलफलफलदमन्ददीपशिखायां विशिखयाम् ॥ ६८ ॥

पुरतोऽग्रतः, अरणमाश्रयभूतं यत् पुरं तस्य तोरणतो बहिर्द्वारमारभ्य, विशिखायामवृहन्मार्गे अध्वनि, तस्या उपवर्त्मन्येकस्मिन् स्थित्वा, मित्रेहिते मित्रस्य व्रजराजस्य ईहितं गमनव्यापारो यत्र तस्मिन् पथि कदा आगमिष्यतीत्युत्कण्ठया निहितेक्षणेन वृषभानुना प्रथमं कृष्णो ददृशे इति योजना । विशिखायां कीदृश्यां, रणतो ध्वनतः किङ्किणीजालस्य माला वर्तते यस्यास्तस्याम् । श्रेणीभद्रेषु पूर्णकलशेषु लसन्ति शोभमानानि नवकिशलयानि च सवृन्तानि वृन्तसहितानि मङ्गलं नृणन्ति उपयुञ्जन्तीति, "नृ नये" इत्यादिः

मङ्गलनारीणां यानि नारिकेलफलानि तानि च, तैः फलन्ती· उपकरणशोभया निष्पद्यमाना·ऽमन्दा दीपशिखा च यस्यां तस्याम् ॥ ६९ ॥

विशिष्योभयतोऽभयतो रोपितसफलपूगतरुपूगतरु-
शरम्भास्तम्भास्तंगमितभास्करकरनिकरेऽध्वनि ॥ ६६ ॥

अध्वनि तदवान्तरवर्त्मनि । कीदृशे, उभयतः पार्श्वद्वये· अभयतो व्रजपतेस्तत्र तथा संमतिप्रार्थनमन्तरेणापि सौहार्दबलाद्भयाभावत इत्यर्थः, रोपितैः सफलपूगतरुपूगैः फलवद्गुवाकवृक्षसमूहैस्तरुणरम्भाणां स्तम्भैश्च·ऽस्तंगमितोऽस्तं प्रापितो भास्करस्य किरणसमूहो यत्र तस्मिन्, शाखानिविडतया सूर्यातपप्रवेशाभावादित्यर्थः, "पूगस्तु क्रमुके वृन्दे·" इति मेदिनी । अस्तमिति मान्ताव्ययम् ॥ ६९ ॥

ध्वनितमृदुमृदङ्गपणवादिपणवादिवादित्रचित्रे मित्र-
हिते पथि निहितेक्षणेन ॥ ७० ॥

ध्वनितानां मृदुमृदङ्गपणवादीनां पणवादि स्तुतिवादयुक्तं यद्वादित्रं तेन चित्रे । श्रीकृष्णाद्यागमनशोभार्थं वृषभानुनैव प्रथममेव तद्वर्त्मनि प्रस्थापितं वाद्यं तत्सङ्गीति ज्ञेयम् ॥ ७० ॥

क्षणेन सह सहचरगणेन गणेन इव भुवनमङ्गलस्य
भुवनमङ्गलस्यमानोरुचारुचामीकरवाससा तडिन्मयीकुर्व-
न्निव ॥ ७१ ॥

क्षणेन क्षमात्रेण । भुवनानां मङ्गलस्य ये गणास्तेषामिनः श्रेष्ठः । अङ्गे गात्रे लस्यमानेन दीप्तिमता·उरुणा चारुचामीकरवाससा भुवनं विद्युन्मयीकुर्वन्निव ॥ ७१ ॥

निवहीभूतनागरिमगरिमगाभीर्यगाभीर्यभिमतास्पदं
भुवि धारयंश्छ्रीव्रजराजकिशोरस्तदनु सकलपरिवारवारप-
रिवारिता वारिताखिलखलीकारा व्रजराजमहिषी च तदनु
व्रजपुरपुरंदरोऽदरोद्भूतभूतलसौभाग्यसार इव सपरिजनो
जनोल्लासकारी च ददृशे ॥ ७२ ॥

निवहीभूतस्य नागरिम्णो नागरत्वस्य गरिम्णा गुरुतया गाभीर्यं गभीरत्वं तद्गच्छन्ति· आस्वाद्यत्वेन प्राप्नुवन्ति या आभीर्यो गोप्यस्तासामभिमतास्पदं वाञ्छनीयम् । परिवाराणां वारैः समूहैः परिवारिता परिवृतीकृता । खलीकारः पैशुन्यं तन्मूलकत्वाद्दोषा अखिला एव खलीकारास्ते वारिता यया सा ॥ ७२ ॥

दृष्ट्वा च सत्वरमभिव्रजता व्रजतारकेशं सुकेशं सुष्ठु
केशवमालिङ्ग्य तौ दम्पती पती घोषनिवासिनां सबहु-
मानमानमता स्वपुरं प्रवेशयांबभूवाते ॥ ७३ ॥

व्रजस्य तारकेशं चन्द्रम् । आनमता सख्यरीत्या· ईषन्नमता ॥ ७३ ॥

प्रवेश्य च ताम् यथास्थानस्थानपि संपाद्य पाद्यप्रभृ-
तिभिरभ्यर्च्य यथायोगं सकलक्रियोपरिचारकैः परिचारकैः
स्त्रीपुंसजनैरादरेणादरेणाभिसंपादितैरभ्यङ्गोद्वर्तनस्नपनाद्यु-
पकरणैः करणैकनिपुणः पुनः स यथाक्रमं स्नानादिकं निर्वा-
ह्य रूपानुरूपानुसंपादितवराम्बराभरणगन्धानुलेपनप्रसाध-
नसाधनविरामेऽविरामेण प्रमोदेन पाकभवनमध्यमध्यभिप्र-
वेशयामास व्रजपुरपरमेश्वरीम् ॥ ७४ ॥

यथास्थानस्थान् स्त्रीपुरुषोचितस्थानेषु स्थितान् संपाद्य कृत्वा, स्त्रीपुंसजनैर्यथायोगं यथोचितं, स्त्रीणामभ्यङ्गादिभिः स्नानादिकं स्त्रीजनैः पुंसां तु पुरुषजनैर्निर्वाह्येत्यर्थः । अदरेण निःसंकोचेन । आदरेण प्रेममयेनेत्यर्थः । करणैकनिपुणः कार्यैकप्रवीणः, स वृषभानुः । प्रसाधनसाधनम्·अलंकारपरिधानम् ॥ ७४ ॥

यत्र परमेश्वरीव स्वयं स्वयन्त्रितरूपगुणमाधुराधु-
रीणा पचतितरामतितरामवधानेन ॥ ७५ ॥

स्वयं परमेश्वरीव साक्षान्महालक्ष्मीरिव·इति लौकिकरीतिमनुसृत्योक्तम् । सिद्धान्तरीत्या तु तस्या अपि परमांशिन्या राधायास्तया सहोपमा·ऽकिंचित्करैव ॥ ७५ ॥

॥ शेषमग्रे ॥

॥ भूमिका ॥

चिरात् प्रभृत्यभ्यस्यमानानामुत्तरोत्तरमुपचीयमानपरिष्कृतीनां प्राच्यप्रतीच्यविद्वत्प्रवरैः स्वस्वप्रतिभोद्रेकबलेनोहितैः सूक्ष्मतरैर्गम्भीरैरमणीयैरत्यर्थमुपादेयैस्तर्कैरतीव वैतत्यं प्रापितानामपि भारताङ्ग्लशास्त्राणां केवलमेकं वैगुण्यं शल्यमिवास्ते स्म, यत्तत्तद्गतानां तर्काणां परस्परं संवादविसंवादादेर्मुहुर्मुहुः प्रत्याकलनेन तारतम्यपरीक्षणाभावो यस्य च परमं निदानं तत्तद्ग्रन्थानां तत्तद्भाषापारदृश्वनां विबुधानां च परस्परं भाषाभेद एवेत्येतन्निपुणं विचार्य निरुक्तं शल्यमुद्दिधीर्षुरिव लीलाविग्रह इव पाण्डित्यस्य भौतिकं देहं विमलयशोरूपेण विपरिणमय्येव परलोकं प्रस्थितो महाशयो बालण्टैनपण्डितो दयासमुद्रयाम्भोनिधेः सम्राज्ञः श्रीश्विक्टोरियन्या देव्या लब्धप्रसादातिशयः पुरा ऽस्यां वाराणसेयपाठशालायामाङ्गलसंस्कृतशालां प्रतिष्ठापयामास । यस्याश्च मुख्य उद्देशः संस्कृतदर्शनप्रवीणानामाङ्गलदर्शनज्ञानेन कुत्र चित्स्थलविशेषेषु पक्षस्वन्व-

वदुभयोः संमेलनेन समीहितदेशलाभश्च रत्नकाञ्चनयोः संयोजनेन च सकललोकमनोहराङ्गुलीयकमिवानयोरपि भारताङ्गलशास्त्रयोः स्थलविशेषीयविषययोः परस्परं संगमनेन विचित्रातिचमत्कृतमहोपयोगिविषयान्तरलाभः ।

परंत्वेकैकदर्शनस्यापि साङ्गोपाङ्गमध्ययनं पूर्णेनैकेन मनुष्यायुषापि दुष्करं भवति, का पुनर्निखिलसंस्कृतदर्शनप्रवीणतां संपाद्याङ्गलदर्शनप्रवीणतासंपादनपुरःसरमन्योन्यदर्शनीयविषयान् संयोज्यैकेन पुरुषेण संपादयिष्यमाणस्य चमत्कृताभिनवविषयान्तरलाभस्य प्रत्याशा । अतः संस्कृतदर्शनानामाङ्गलविद्वत्सु भारतीयविद्वत्सु चाङ्गलदर्शनानां शीघ्रतरप्रचारसाधनान्वेषणपरायणः काशिकराजकीयसंस्कृतपाठशालाप्रधानाध्यक्षवरः श्रीमान् ग्रिफिथ्साहिबाभिधमहाशयो द्वासप्तत्युत्तराष्टादशशततमे ख्रीष्टीयाब्दे संस्कृताङ्गलशालीयान् पञ्चषान् संस्कृतपण्डितान् उभयविधदर्शनग्रन्थानामन्योन्यभाषयोः साधारणजनोपयोगिनो बाह्यप्रपञ्चविमर्शकाङ्गलग्रन्थानां भारतीयदेशभाषायां चानुवादाय नियोजयति स्म । दृढं संभाव्यते चायमन्योन्यभाषयोर्दर्शनावतारो नवीनोद्भावितशङ्कासमाधानरहितोऽप्यक्षरशः क्रियमाणोऽन्योन्यभाषापरिचयविमुखैरैकैकदर्शनपारङ्गतैर्भारतीयैराङ्गलैश्च महापण्डितैर्निरीक्ष्यमाणस्तत्तदुट्टङ्किताक्षेपसमाधानाभ्यां परिपुष्टः शीघ्रमेवोभयविधदर्शनानां महतीमुन्नतिं संपादयिष्यतीति । अथानुवादकारिपदे प्रतिष्ठितः केशवशास्त्री विविधदर्शनपारदृश्वना राजकीयसंस्कृतपाठशालीयधर्मशास्त्राचार्येण परमगुरुचरणेन कैलासवासिकालंकारोपनामकश्रीयुतपण्डितवरराजारामशास्त्रिणा प्रोत्साहितः प्रथमं बर्कलाभिधमहाशयविरचितज्ञानसिद्धान्तमालाया अनुवादं ज्ञानसिद्धान्तचन्द्रिकानामकं विरच्य प्रभुवरग्रिफिथसाहिबाभिधमहाशयानुमत्या परमश्लाघनीयेऽस्मिन् मासिकपत्रे प्राकाशयत् । तमिममनुवादं वाचं वाचं हृष्यन् परमगुरुचरणस्तस्य महोपकारितां च विज्ञाय ग्रन्थकर्तारं बहुभिर्धन्यवादैरनुवादकारिणं शुभाशिषा च भूयो भूयोऽभिनन्दयामास । अथैतस्य विज्ञानवादस्य शङ्काभासनिरासपुरःसरं न्यूनतां परिहर्तुं महतोत्साहेन प्रवर्तमानयोः श्रीपण्डितवरराजारामशास्त्रिश्रीयुतबालशास्त्रिणोः परमगुरुचरणश्रीराजारामशास्त्रिणो दिव्यपदं प्रति प्रस्थानेनातितरां दूयमानमानसः श्रीमद्गुरुवरो बालशास्त्री किंचिदुपेक्षितारब्धकार्योऽपि संप्रति विविधाङ्गलदर्शनपारङ्गमेन संस्कृतदर्शनेष्वपि विचित्रव्युत्पत्तिशालिना श्रीमता गफसाहिबाभिधमहाशयेन श्रीकेशवशास्त्रिद्वारा प्रोत्साहितोऽचिरेणैव सफलयिष्यति पश्चिमोत्तरदेशीयराजकीयनिखिलपाठशालाध्यक्षप्रतिनिधिपदं प्रतिष्ठितस्य श्रीग्रिफिथसाहिबाभिधमहाशयस्य मनोरथद्रुममिति सुदृढमाशासे । परंत्वस्यां ज्ञानसिद्धान्तचन्द्रिकायां भूयो भूयः कुत्र चित् साधकप्रमाणविधया कुत्र चिच्च खण्डनायांशत उपन्यस्तं श्रीयुतलोकाभिधमहाशयमतं परमप्राचीनसंस्कृतदर्शनानुगुणं सोपपत्तिकमुपलभ्य निखिलतन्मतदर्शनाय जातकौतुकैः श्रीपरमगुरुचरणैर्गुरुचरणैश्च पुरैव प्रोत्साहितोऽहं श्रीमद्ग्रिफिथसाहिबप्रभुवराज्ञया श्रीलोकाभिधमहाशयविरचितस्य खण्डचतुष्टयात्मकस्य मानवीयज्ञानविषयकशास्त्रस्य प्रकृतज्ञानसिद्धान्तचन्द्रिकापरिष्कारोपयोगितया तृतीयं शब्दखण्डमेव प्रथमं संस्कृतेऽवतरणायोपाक्रमे । संप्रति च काशिकराजकीयसंस्कृतपाठशालाध्यक्षप्रतिनिधिपदं प्रतिष्ठितस्य श्रीमद्गफसाहिबाभिधमहाशयस्याज्ञया चिरलुप्तसंस्कृतभारतीपुनःसंजीवनपीयूषेऽस्मिन् पत्रे मुद्रयितुमुपक्रमे । एतद्ग्रन्थस्य दूरान्वयिदीर्घतरगूढार्थकवाक्यकदम्बादिप्राचीनाङ्गलशैलीघटिततयातिदुरूहत्वेऽप्येतत्पाठशालीयाङ्गलसंस्कृतभागीयप्रधानाध्यापकवरस्याङ्गले संस्कृते चोभयत्राप्रतिहतप्रतिभस्य श्रीयुतडाक्तरथिबोसाहिबाभिधमहाशयस्य साहाय्येनैतत्कार्यं सुनिर्वहन् सुयशो मान्यपुरुषेभ्यः शुभाशिषश्च लभेयमिति बाढं विश्वसिमि ।

भूयो भूयोऽभ्यर्थये च सहृदयान् साधुपण्डितवरान् अत्र प्राथमिके मुद्रणे त्वराप्रमादादिकृतान् दोषान् सुविचार्य मां निवेदनेनानुगृहीतुं प्रसीदन्त्विति । शिवम् ।

संवत् १९३३ चैत्रशुक्लसप्तम्यां शनौ } काशिकराजकीयसंस्कृतपाठशालीयाङ्गलसंस्कृतभागेऽनुवादकारिपदे प्रतिष्ठितो धर्माधिकारिढुण्ढिराजशास्त्री ।

विद्वद्वरलोकाभिधमहाशयविरचितमानवीयज्ञानविषयकशास्त्रे ॥

॥ तृतीयाध्यायस्य प्रथमः परिच्छेदः ॥

शब्दखण्डम् अर्थात् सार्वजनिकभाषाविषये ।

१ (सूत्रम्) ॥ मनुष्योहि व्यक्तशब्दकरणक्षमः ॥ ईश्वरो मनुष्यस्य समाजावस्थानयोग्यतामध्यवस्यन् न केवलं तं स्वसजातीयैः सह मैत्र्यकरणैकान्तप्रवणं ससर्ज, अपितु समाजावस्थितेर्महासाधनभूतया साधारणयाऽनन्यथासिद्धया भाषया युतमकरोत् । अतो मनुष्यः पदाभिधव्यक्तशब्दरचनादक्षवागिन्द्रिययुतः स्वभावत एवास्ते । परंतु न सा शब्दोच्चारणक्षमता भाषानिर्माणायालं, यतः शुकसारिकादयो बहवः पक्षिणो व्यक्तशब्दोच्चारणाय शिक्षिताः सन्तः सुस्पष्टानि पदान्युदीरयन्तोऽपि न कथमपि नववाक्यरचनाव्युत्पत्तिमन्तो भवन्ति ॥

Digitized by Google

२ (सूत्रम्) ॥ उच्चार्यमाणपदानां विज्ञानलिङ्गत्वेन प्रयोगः ॥ अत एवैतदपरमप्यावश्यकं यद् मनुष्यः पदरूपान् व्यक्तशब्दान् आभ्यन्तरज्ञानलिङ्गत्वेन प्रयोक्तुमर्हति । अयं भावः । स्वात्मसमवेतविज्ञानबोधनाय तत्तल्लिङ्गत्वेन तान् प्रयुङ्क्ते येन तानि विज्ञानानि परैरपि ज्ञायेरन्, मनुष्यात्मसमवेतज्ञानानि परस्परात्मगोचराणि च भवेयुः ॥

३ ॥ शब्दाः सदृशानि नानावस्तूनि बोधयन्ति ॥ परंत्वेतदुभयेनापि पदानां यथोचित उपयोगो न सिध्यति । यावत्तानि लिङ्गान्यनेकव्यक्तिबोधनतात्पर्येण न प्रयुज्येरंस्तावत् शब्दा विज्ञानलिङ्गत्वेन प्रयुक्ता भवेयुरित्येतावन्मात्रेण भाषानिर्माणोद्देशः परिपूर्णो न भवति । यदि प्रत्येकव्यक्तिबोधाय भिन्नभिन्नपदप्रयोग आवश्यको ऽभविष्यत्तर्हि पदबाहुल्येन तेषां व्यवहारो विसंकुल एवाभविष्यत् । एतत्काठिन्यपरिहारकोपायो भाषाया जातिवाचकपदप्रयोगेण साधीयान्परिष्कारो येनैकं पदमनेकव्यक्त्यात्मवस्तुसमुदायलिङ्गत्वेन प्रयुज्येत । पदानां व्यक्तितात्पर्येण प्रयोगस्य साफल्यं हि केवलं स्वलिङ्गिविज्ञानानां भेदेनैवोपलभ्यते । (एकजातीयविज्ञानसामान्यबोधतात्पर्येण प्रयुक्तानि पदानि जातिवाचकानि, यत्किंचिद्विज्ञानव्यक्तिविशेषमात्रबोधतात्पर्येण प्रयुज्यमानानि तानि व्यक्तिवाचकानीति च परिभाष्यन्ते ॥

४ ॥ विज्ञानबोधकपदेभ्योऽन्यान्यपि पदानि लोके व्यवह्रियन्ते यानि शुद्धानां (१) मिश्रितानां (२) वा विज्ञानानामभावमेव प्रत्याययन्ति न पुनः कमपि विज्ञानविशेषं, यथा नञ्पदमभावपदं वा । तानि सर्वाणि यानि शून्यार्थकानि विज्ञानसंबन्धरहितानि वस्तुतः विज्ञानं न बोधयन्ति, अतः सर्वथा बोध्यार्थरहितानि भवितुमर्हन्ति, परंतु सद्विज्ञानसंबन्धीनि भूत्वा तेषामभावं प्रत्याययन्ति ।

५ ॥ प्रथमतः प्रत्यक्षगोचरविज्ञानेष्वेव संकेतिताः शब्दा (व्युत्पत्तिबलात्) परोक्षेष्वपि नीयन्ते ॥ सर्वेषामस्मदीयज्ञानानां मूलमपि विज्ञास्यते यदि साधारणप्रत्यक्षगोचरविज्ञानान्यस्माभिर्व्यवह्रियमाणानां सर्वेषां शब्दानां कथं महान्त्याश्रयभूतानि सन्तीति, सर्वेषेन्द्रियागोचरज्ञानक्रियादितात्पर्येण प्रयुक्तानां शब्दानां तेभ्यः (प्रत्यक्षगोचरविज्ञानवाचिभ्यो) गूढार्थत्वेन परिणतस्फुटेन्द्रियकप्रत्यक्षगोचरविज्ञानेभ्यश्चोद्भवः संभवतीति, प्रयुज्यन्ते च शब्दा अस्मदिन्द्रियजन्यप्रत्यक्षगोचरविज्ञानबोधतात्पर्येणेति च विज्ञायेत । अयं भावः । कल्पना आकलनं ग्रहणं व्याकुलीभावः भ्रान्तिरित्येवमादीनि सर्वाणि पदानि प्रत्यक्षगोचरवस्तूनां व्यापारेभ्य एवावधार्यन्ते, प्रयुज्यन्ते चात्मव्यापारविशेषबोधनाय । यथा आङ्गलभाषायामात्मवाचक“स्पिरिट्”ति पदस्य प्राथमिकोऽर्थः श्वासः । यथा वा देवाज्ञाप्रकाशकपर्यायस्य ‘एन्जिल्’ इत्यस्याऽऽद्योऽर्थो दूतः । यदि शब्दार्थमूलमन्विष्येत तर्हि निःसंदेहं पदानामिन्द्रियागोचरवस्तुवाचकत्वस्योद्भवः प्रत्यक्षगोचरविज्ञानेभ्य एवेत्युपलभ्येत । तेनैव मूलान्वेषणव्यापारेणैतदपि तर्कयितुं शक्यते यद् भाषाया आद्यरचयितॄणामात्मनि वर्तमानान्याद्यानि विज्ञानानि किंजातीयानि कस्माच्चोद्भूतान्यासन् कथं च प्रकृतिर्वस्तूनां नामदानेऽपि सहसैव मनुष्यान्प्रत्यबोधयत् तदीयाखिलज्ञानानां कारणानि प्रभवांश्च । यानि नामानि स्वानुभूतव्यापारविशेषान् स्वप्रत्यक्षागोचराण्यन्यानि विज्ञानानि वा परान् प्रति ज्ञापयेयुस्तथाविधनामप्रयोगाय ते पुरुषाः स्वप्रत्यक्षगोचरप्रायिकविज्ञानेभ्यः सस्पृहं शब्दानुपाददुः । एभिरुपायैर्बाह्यप्रत्यक्षागोचराकारान् स्वानुभवैकगोचरान् व्यापारान् ग्राहयितुमन्यानपि योग्यान् अकुर्वन् । यदा च तेषां स्वात्मवृत्त्याभ्यन्तरव्यापाराणां बोधाय नामान्युपलभ्य प्रत्यक्षागोचरतत्तद्विज्ञानबोधकत्वं तेषां स्वीचक्रुस्तदा ते सर्वाण्यन्यानि विज्ञानानि पदैर्बोधयितुमलं बभूवुः । सर्वेषां विज्ञानानामृते बाह्यप्रत्यक्षात्मकत्वतद्विषयकाभ्यन्तरात्मव्यापाररूपत्वाभ्यामन्याऽऽत्मकत्वस्यासंभवात् । यतः पूर्वप्रदर्शितप्रकारेणास्माभिः प्रत्यक्षगोचरबाह्यविषयेभ्यः प्रथमं यत्किमप्युपलभ्यते तदतिरिक्तानि, अथवा स्वात्मैकसमधिगम्यात्मनोऽभ्यन्तरव्यापारैर्यदनुभूयते तदतिरिक्तानि न कान्यपि विज्ञानान्यनुभूयन्ते ॥

६ ॥ विभागः ॥—ज्ञानशिक्षयोरङ्गभूताया भाषायाः प्रयोगबलयोः सम्यक्परिज्ञानाय वक्ष्यमाणविचारो ऽनुकूलो भविष्यति । तत्र प्रथमं तावद् भाषाघटकानि पदानि अव्यवधानेन कस्मिन्नर्थे प्रयुज्यन्ते । द्वितियतश्च व्यक्तिवाचकपदातिरिक्तानां सर्वेषां नाम्नां साधारण्येन तेषां वस्तुसामान्यविशेषभावतात्पर्यविषयकत्वात्तत्तदेकैकवस्तुविशेषबोधपरत्वाभावेनावश्यं चेतद्विचारपथमारोहति, यत् कास्ताः सामान्यविशेषजातयो ऽर्थाद्वस्तूनां परापरजातयो यदन्तर्गतानि तानि वस्तूनि सन्ति, कथं च ता ज्ञायन्ते । अनयोर्यथावत्सुष्ठुविचारे क्रियमाणे शब्दानां यथोचितप्रयोगा भाषायाः स्वाभाविका गुणदोषा उचितप्रयोगोपायाः शब्दार्थगतसंदेहगूढत्वकृतकाठिन्यपरिहारोपायाश्च सुष्ठूपलप्स्येरन् । तदभावे हि ज्ञानक्रमेण सुस्पष्टत्वेन वा ज्ञानविषयकपरस्परभावस्यैवासंभवः । तस्य च प्रायः साधारणवाक्यविषयकत्वाद्वाक्यानां च पदैर्विनानुपपद्यमानत्वात् पदान्यधिकृत्यैव वक्ष्यमाणपरिच्छेदे प्रतिपादयिष्यते इति दिक् ॥

इति प्रथमः परिच्छेदः ॥

Digitized by Google

॥ अथ द्वितीयः परिच्छेदः ॥

॥ पदानामर्थविषये ॥

(१) ॥ पदानि सन्ति परस्पराभिप्रायाविष्कारस्यानन्यथासिद्धानि लिङ्गानि ॥ यद्यपि मनुष्यस्य बहुविधानि ज्ञानानि स्वस्य परेषां च फलसाधकान्यानन्ददायीनि च सन्ति, तथापि तानि सर्वाणि स्वहृदयान्तर्गतानि परान्प्रत्यदृश्यान्यत एव प्रच्छन्नानि नापि स्वत आविर्भवितुं शक्यन्ते । स्वस्वाभिप्रायाविष्करणादृते सामाजिकव्यवहारस्यासिद्धेरवश्यं मनुष्यैर्बाह्यानि प्रत्यक्षगोचराणि कानि चिल्लिङ्गान्यभ्युपगन्तव्यानि यैः स्वाभिप्रेताप्रत्यक्षविज्ञानानि परान्प्रति ज्ञापयितुं शक्येरन् । शैघ्र्येण सौकर्येण चैतत्कार्यनिर्वाहाय मनुष्यकण्ठसाध्यान् व्यक्तशब्दान् विहायान्यत्किमपि न प्रभवितुमर्हति । इत्थं च तत्कार्यनिर्वाहाय स्वभावत एव सुष्ठु परिगृहीताः शब्दा मनुष्यैः स्वस्वविज्ञानलिङ्गत्वेन कथं व्यवहर्तुमुपक्रान्ता इति कल्पयितुं शक्यते । यत्किंचित्पदव्यक्तेर्विज्ञानविशेषेण सह स्वाभाविको ऽनादिः संबन्धोस्तीतिकल्प्या न तथा व्यवहारस्तथा सति सर्वेषां मनुष्यप्राणिनामेकरूपैव भाषा स्याद्, अपितु स्वैरिकप्रवृत्त्या, येन तत्तत्पदं तत्तद्विज्ञानस्य यादृच्छिकं लिङ्गं भवति । एवं सति पदानां प्रयोगो विज्ञानानां प्रत्यक्षलिङ्गीभाव,स्तानि विज्ञानानि च यद्बोधाय शब्दाः प्रयुज्यन्ते तेषां यथार्थाव्यवहितार्थरूपाणि सन्तीति सिद्धम् ॥

२ ॥ पदानि प्रयोक्तुर्विज्ञानानां प्रत्यक्षलिङ्गानि सन्ति ॥ मनुष्यकृतैतल्लिङ्गव्यवहारस्य स्वस्वविज्ञानस्मरणोपयिकसंस्कारदार्ढ्यसाधनत्वात्, स्वस्वविज्ञानाविष्कारपुरःसरमन्यात्मगोचरीकरणसाधनत्वाद्वा यद्वस्तुज्ञापकतया विज्ञानानि कल्प्यन्ते तेभ्यः काममपर्याप्त्या ऽनवधानेन वा तेषां विज्ञानानां संग्रहेपि शब्दानां स्वस्वोच्चारणाव्यवहितोपस्थितिविषयाः प्राथमिका अर्थाः प्रयोक्तृविज्ञानान्येव । यदा कश्चन परेण सह भाषते तदा परस्य बोधो भवत्वित्येव तस्याशयो लिङ्गत्वेन कल्पितव्यक्तशब्दद्वारा श्रोतारं प्रति स्वविज्ञानज्ञापनमेव च तद्भाषणस्य फलम् । एवं सति येषां लिङ्गानि शब्दाः सन्ति, तानि वक्तृविज्ञानान्येव । नापि कश्चन पुमान् स्वीयविज्ञानातिरिक्तस्य यस्य कस्यापि वस्तुनः साक्षाल्लिङ्गतया तान् शब्दान् प्रयोक्तुमीष्टे । यतः शब्दानां स्वीयविज्ञानलिङ्गत्वं प्रकल्प्यापि परविज्ञानाविष्काराय प्रयोगे क्रियमाणे तेषां युगपदेव स्वविज्ञानलिङ्गत्वालिङ्गत्वे प्रसज्येयाताम् । तथा च तेषां सर्वथा निरर्थकता पर्यवस्येत । शब्दानां यादृच्छिकतया ऽनवगतवस्तुविज्ञानज्ञापकता न संभवति । इदं च तेषामभावलिङ्गताकरणं स्यात् । ततश्च पदानामुच्चारणं निरर्थकं स्यात् । सर्वथा स्वात्मन्यवर्तमानानां परात्मगोचरविज्ञानानां स्वज्ञानाविषयपदार्थवृत्तिगुणानां वा लिङ्गतां स्वीयेषु शब्देषु संपादयितुं न कोपि पुमानीष्टे । स्वात्मनि तथाविधविज्ञानानामसत्त्वे तेषां परकीयविज्ञानसादृश्यमपि कल्पयितुं न शक्यते, नापि तद्बोधाय किमपि लिङ्गं प्रयोक्तुं शक्यते । तथाविधविज्ञानलिङ्गतया शब्दानां प्रयोगे तु परमार्थतो ऽभावलिङ्गतापर्यवसायिस्वाज्ञातलिङ्गता तेषामापद्येत । परंतु यदि मनुष्यः स्वीययत्किंचिद्विज्ञानद्वारा परकीयविज्ञानानि स्वं बोधयितुं प्रवर्तमानः परैः स्वविज्ञानबोधाय प्रयुक्तान्येव नामानि प्रयुञ्जीत, तर्हि स्वविज्ञानबोधकतैव तत्र नाम्नाम् । अयंभावः । तादृशस्थले स्वज्ञातविज्ञानानामेव ज्ञापकता तेषां नाम्नां न पुनः स्वाज्ञातानाम् ।

३ ॥ भाषया व्यवहारे ऽवश्यं चैतद्विचारणीयं यदेतद्विषये ज्ञानिनो ऽज्ञानिनश्च विद्वांसो ऽविद्वांसश्च यत्किंचिदर्थे ऽपरतयोदीरितान् शब्दांस्तुल्यतयैव प्रयुञ्जते । सर्वो हि वक्ता तद्द्वारा स्वस्वाविश्चिकीर्ष्यमाणविज्ञानबोधनायैव शब्दानुच्चारयति । यथा कश्चन बालः स्वश्रुतस्वर्णपदस्य धातुविशेषरूपमर्थमजानानः केवलं भास्वरपीतवर्णमात्रमर्थमध्यवस्यन् स्वीयतद्वर्णविज्ञानमात्रतात्पर्येण स्वर्णपदं प्रयुङ्क्ते । अतएव मयूरपुच्छस्य तादृशं वर्णं स्वर्णपदेनाभिदधाति । अथापरः किंचिदधिकानुभवशाली बालस्तत्पदशक्यं भास्वरं पीतं गुरुतरं मन्वानः स्वर्णपदं भास्वरपीतगुरुतरद्रव्यरूपमिश्रविज्ञानबुबोधयिषया प्रयुङ्क्ते । अन्यश्च तेषु गुणेषु द्रवयोग्यत्वरूपमपरं योजयति तं स शब्दो भास्वरं गुरुतरं पीतं द्रवयोग्यं पिण्डविशेषमवगमयति । एवमितरस्तस्मिन् गुणसमुदाय आघातवर्धनीयतां संयोजयति । यादृशयादृशविज्ञानबोधाय तं शब्दं ते प्रयुञ्जते तादृशतादृशस्वस्वविज्ञानजिज्ञपयिषायां सममेवैते सर्वे स्वर्णेतिपदं प्रयुञ्जते । परंतु सर्वोपि स्वविज्ञानमात्रबोधायैव तत्तत्पदं प्रयोक्तुमर्हति न पुनः स्वाज्ञाततादृशमिश्रितविज्ञानलिङ्गतया ॥

४ ॥ वक्तारः श्रोत्रात्मगोचरविज्ञानतात्पर्येण शब्दान् प्रयुञ्जते ॥ —यद्यपि मनुष्योदीरितानां शब्दानामुचितः शीघ्रोपस्थितिको ऽर्थो वक्त्रात्मसमवेतविज्ञानातिरिक्तो न भवितुमर्हति, तथापि वक्ता तेषामपरवस्तुद्वयेन सहातीन्द्रियसंबन्धमपि तात्पर्यविषयीकरोति । प्रथमं तावद् येन सह संभाषते तदात्मसमवेतविज्ञानलिङ्गत्वं स्वीयशब्दानां कल्पयति । अन्यथा संभाषणमेव निरर्थकं स्यात् । नापि तत्र परस्पराशयो बुध्येत यदि वक्त्रा एकत्रार्थे प्रयुक्ताः शब्दाः श्रोतुरपरस्मिन्नेवार्थे गृहीतशक्तिका भवेयुः । यच्च परस्पराज्ञातभाषाद्वयभाषणमिव विफलं स्यात् । परंतु परविज्ञानतात्पर्येण

Digitized by Google

शब्दं प्रयुञ्जानाः स्वस्य परस्य च शक्तिग्रह एकरूप एव विज्ञानेऽस्ति न वेति प्रायो न विचारयन्ति, किं तु तद्भाषायाः साधारणव्यवहारेण स्वकल्पनात् शब्दानपरेऽपि प्रयुञ्जत इत्येवमेव विचारयन्ति येन ते स्वोच्चरितपदबोध्यविज्ञानं स्वदेशीयश्रोतृपुरुषप्रयुक्तशब्दबोध्यविज्ञानादभिन्नमिति तर्कयन्ति ॥

५ ॥ एवं पदार्थानां सद्भावतात्पर्येणापि शब्दान्प्रयुञ्जते ॥ यतो मनुष्याः केवलं काल्पनिकवस्तून्यधिकृत्यैव भाषितुं न प्रवर्तन्ते, ऽपितु वस्तुनः सतः पदार्थान्, अतस्ते प्रायशः पदानि वस्तूनां सत्त्वमपि ज्ञापयन्तीति कल्पयन्ति । परंतु प्रथमस्य द्वितीयस्य च पदार्थैस्तद्वाचकैः पदैः सह संबन्धात् शुद्धविज्ञानतदाकारसंबद्धतया ऽयं विषयस्तावद् नियतद्रव्यतदाकारादिबोधकानिखिलपदप्रयोगरीतिद्वयविचारावसरे प्रपञ्चयिष्यते । शब्दानां परकीयविज्ञानतात्पर्येण पदार्थसद्भावतात्पर्येण च प्रयोगे ऽपि स्वात्मकगोचरविज्ञानमात्रतात्पर्येण शब्दप्रयोगस्तेषामनुचितप्रयोगरूपस्तदर्थे ऽपरिहार्यं दुर्ज्ञेयत्वं संकरं च जनयतीत्यनुमन्यतां तावदत्र मदीयं तथा कथनम् ।

६ ॥ शब्दाः प्रयोगमात्रादेव शीघ्रं विज्ञानान्युपस्थापयन्ति ॥ शब्दानधिकृत्यैतदपि विचारणीयम् । प्रथमतस्तेषां मनुष्यविज्ञानानामव्यवहितलिङ्गतया तैरेव च साधनैर्मनुष्याः स्वस्वविज्ञानानि परान्प्रति प्रयच्छन्त आविष्कुर्वन्ति परस्परहृदयगतानाशयान् कल्पनाश्च । निरन्तरव्यवहारेण तेषां स्वबोध्यविज्ञानैः सह तथा कश्चन संबन्धो भवति, येन यथा विकारजननयोग्यपदार्थाः स्वयमेवेन्द्रियेषु वस्तुतो विकारोत्पादकास्तथाश्रुतमात्रा एव ते शब्दाः शीघ्रतरं कानि चिद्विज्ञानान्यात्मन्युपस्थापयन्ति । स्फुटमुपलभ्यते चैतत् सर्वेषु बाह्यप्रत्यक्षगोचरगुणेषु सर्वेषु च द्रव्येषु यानि भूयो भूयः परिचितानि यत्र तत्रोपलभ्यन्ते ॥

७ ॥ अर्थबोधमनभिप्रेत्यापि शब्दाः प्रयुज्यन्ते ॥ —यद्यपि वक्तात्मगोचरविज्ञानान्येव शब्दानामुचिताः प्रथमोपस्थितिका अर्था भवन्ति तथापि केषां चिद्बाल्याच्चिरपरिचितप्रयोगेणास्माभिः सुदृढमभ्यस्तानां जिह्वाग्रवर्तिनां सर्वदा स्मृतिगोचराणामपि शब्दानामर्थस्य सर्वदा सावधानतया परीक्षाया अकरणाद् मनुष्याः सावधानतया सुविचार्य शब्दं प्रयुञ्जाना अर्थानपेक्ष्य शब्दानेवाधिकमवधारयन्ति । प्रत्युत न केवलं बाला अपितु प्रौढा अपि भूयसां शब्दानां तद्वाच्यवस्तुज्ञानात्पूर्वमेव चिरपरिचयाद्बहून् शब्दान् शुकवदेव रटन्ति । एतच्चार्थाननभिसन्धायैव शब्दानामुदीरणं तेषामभ्यासाद्दृढपरिचयाच्च जायते । परंतु यावन्तः सार्थकाः शब्दाः प्रयुज्यन्ते तत्र सर्वत्र शब्दविज्ञानयोरस्ति कश्चन निरन्तरः संबन्धो येनैकस्य ज्ञाने सति परस्याप्युपस्थितिर्भवतीति प्रवादः । तेषां तथाविधप्रयोगमन्तरा केवलं ते निरर्थकध्वनिरूपा एव भवन्ति ।

८ ॥ तेषामर्थस्सर्वथा स्वैरिकः ॥ —उक्तदिशा चिरपरिचितप्रयोगेण शब्दा मनुष्यात्मसु कानि चिद्विज्ञानान्यतिशीघ्रं निरन्तरमुपस्थापयन्ति, येन तयोः (शब्दविज्ञानयोः) संबन्धः स्वाभाविकोऽस्तीति कल्पयितुं शक्येत । परं तु ते स्वैरिकादेशेनैव केवलं प्रयोक्तृविज्ञानविशेषान् बोधयन्तीति स्फुटम् । यल्लिङ्गत्वेन तात्पर्यगोचरा ये शब्दास्तेषां तद्भाषयापि व्यवहर्तुः परपुरुषस्यात्मनि तादृशविज्ञानोपस्थापकत्वस्य बहुशो व्यभिचारात् । किं च स्वतात्पर्यगोचरस्य यस्य कस्यापि विज्ञानस्य बोधाय यथेष्टशब्दप्रयोगे मनुष्याणामपरिहार्यस्वातन्त्र्याद् न कोपि पुमान् स्वप्रयुक्तशब्दानेव प्रयुञ्जानान्परान् प्रति स्वात्मगोचरविज्ञानानि ज्ञापयितुमीष्टे । अत एव च सम्राड् रोमदेशाधिपतिः श्रीमानगस्ताभिधमहाशयः सकललोकनियन्तृशक्तिमानपि प्रोवाच "नवीनमेकमपि ल्याटिन्देशभाषीयशब्दं निर्मातुमहं न शक्नोमी"ति ॥ एतदुक्तं भवति । स्वप्रजानां साधारणभाषणे यस्य कस्यापि विज्ञानस्य वाचको यःकोपि शब्दो भवेदिति यदृच्छया व्यवस्थापयितुं न शक्नोमीति । सर्वासु भाषास्वप्रतिषेधानुमितानुमत्यैव यथार्थसाधारणप्रयोगे तेषां तेषां शब्दानां ते ते नियता अर्था व्रियन्ते येन तस्य शब्दस्य तावानेवार्थ इति नियम्यते ऽतस्तदर्थतात्पर्येण तस्य शब्दस्य प्रयोगमन्तरा प्रयोक्ता नोचितभाषी विज्ञायते । किं च भाषणे स्वप्रयुक्तशब्दबोध्यत्वेन तात्पर्यगोचराणि विज्ञानानि शब्दद्वारा यावत् श्रोत्रात्मगोचराणि न क्रियन्ते तावत् मनुष्येण सुबोध्यतया नैव भाष्यत इति । परंतु यस्य कस्यापि मनुष्यस्य भिन्नभिन्नप्रकारेण साधारणार्थतात्पर्येण बोद्धृव्यक्तिविवक्षितार्थतात्पर्येण वा शब्दप्रयोगस्य यत्किमपि फलं भवतु, तथापि शब्दप्रयोगे तेषां स्वविज्ञानान्येवार्थस्तदतिरिक्तार्थस्य लिङ्गानि च ते भवितुं नार्हन्तीति तु निश्चितमेव ॥

॥ इति द्वितीयः परिच्छेदः ॥

कुण्ठिराजशास्त्री ।

SA'NKHYA TATTVA PRADI'PA
OR
THE PRINCIPLES OF
THE S'ANKHYA PHILOSOPHY.

[*Continued from vol. IX. page* 242.]

1. It may be objected: Whereas non-causability, eternity, etcetera are common properties of Soul and

---

१ नन्वहेतुमत्त्वनित्यत्वादिप्रधानसाधर्म्यं पुरुषस्य प्रतीयते तथाचानेकत्वं व्यक्तसाधर्म्यमेवं सति कथं व्यक्ताव्यक्तविपरीतः पुरुष इति चेत् ॥

the Primary Cause; and multitudinousness also is an attribute which equally belongs to Soul and to the evolved phenomena; why, then, is Soul described as repugnant to evolved and non-evolved. This objection we reject as invalid: For though similarity of Soul to evolved and non-evolved consists in its being non-caused and multifarious &c. still its dissimilarity from them exists in its not possessing the triad of qualities; and thus there is no mistake in saying that Soul is reverse to both. It must not be urged that the trinity of qualities is an unknown object, for the authorities of Sánkhya maintain them as identical with agreeableness, disagreeableness and perplexity. Of these, in order, agreeableness means pleasure, and that is Sattva or the quality of Purity; disagreeableness is pain which is identical with Rajoguṇa, quality of Passion; and Perplexity means delusion, which is identified with Tamo-guṇa the quality of Darkness. The word identity is used by the author of the text book, i. e. Sānkhya Kārikā, with a view of rejecting the doctrines, which hold that pleasure is non-existence of pain, and pain absence of pleasure; inasmuch as the word identity implying a positive existence, pleasure and pain are not mutually dependent, that is they are not non-existence of each other; for in that case existence of either of these should not be established.

2. Nay, the utilities of these qualities, it must also be borne in mind, are respectively manifestation, activity, and restraint. The quality of Purity, which is light in itself, would be led all around by the active quality of Passion, like a piece of cotton by violent wind, if there were no restriction made by the quality of Darkness, which is heavy in its nature. But being restrained by Darkness it is led merely somewhere. The necessity, therefore of Darkness consists in restriction. They mutually predominate. When one of these predominates for accomplishing its object, the others are overpowered. For instance: Purity prevailing over Passion and Darkness, manifests its state of quietude; Passion, likewise, predominating over Purity and Darkness, exhibits its nature of violence; so also when Darkness becomes predominant, it exhibits its peculiarity of bewilderment. They are, again, reciprocally dependent. For example: Purity depending upon activity and restraint benefits Passion and Darkness through its property of manifestation; Passion also being dependent on manifestation and restraint serves the other two through its activity; and Darkness, also, depending upon manifestation and activity benefits the others through its restriction. They stand in the relation of mutual productiveness: that is every one of them causes the production of the others. The word production is here used in the sense of a modification, and modification as regards qualities is but their constantly changing into their same and usual form. Consequently it is said that they are not caused: because they do not have a cause distinct from themselves; nor are they non-eternal, because they are not absorbed into a different substance.

They do not depart from their mutual company; accordingly it is said: "all these are reciprocally connected, all these are universally present; Purity is the associate of Passion, Passion of Purity; and both—i. e. Purity and Passion are the associate of Darkness, and Darkness is the companion of these, i. e. Purity and Passion. Their original junction or disjunction is never observed. By the words "reciprocally connected" is meant non-departure from their mutual association. Their perpetual functions are Manifestation and lightness which belong to Purity alone, and not to the other two. The property which causes upward motion of some phenomena is lightness, it is the non-associate of gravity, from this takes place the ascent of flame; it also is the cause of the lateral motion of some object, as in the case of air. The cause of the acuteness of the senses

---

अहेतुमत्त्वादिसाधर्म्येप्यत्रैगुण्यादस्त्येवास्य वैधर्म्यमिति न दोषः ॥ नच त्रैगुण्यमप्रसिद्धं प्रीत्यप्रीतिविषादात्मका गुणा इति साङ्ख्याचार्य्याः । अत्र क्रमेण प्रीतिः सुखं तदेव सत्त्वम् । अप्रीतिर्दुःखमप्रीत्यात्मको रजोगुणः । एवं विषादो मोहो विषादात्मकस्तमोगुणः । यन्मते प्रीतिर्दुःखाभावस्तथादुःखमपि प्रीत्यभावस्तन्निवृत्त्यर्थं मूलकारेणात्मग्रहणं कृतम् ॥ आत्मशब्दस्य भावत्वेन नेतरेतराश्रयस्तथासत्येकस्यापि सिद्धिर्न स्यात् ॥

२ प्रकाशप्रवृत्तिनियमनमेषां क्रमेण प्रयोजनमप्यवगन्तव्यम् । क्रियात्मकेन रजसा लघुसत्त्वं सर्वत्र नीतं स्यात् वायुना तूलावयववद्यदि गुरुणा तमसा नियमनं न स्यात्तमो नियतं तु क्वचिदेव प्रवर्त्यते ततस्तमो नियमार्थं । अन्योन्याभिभववृत्तय एतेषामन्यतमेनार्थवशादुद्भूतेनान्यतममनुभूयते तद्यथा सत्त्वं रजस्तमसी अभिभूयात्मनः शान्तां वृत्तिमधिगच्छति । तथा रजः सत्त्वतमसी अभिभूय घोरां वृत्तिमेति । एवं तमः सत्त्वरजसी अभिभूयमूढामिति । तथान्योन्याश्रयवृत्तयः । यथा सत्त्वं प्रवृत्तिनियमावाश्रित्य रजस्तमसोः प्रकाशेनोपकरोति रजः प्रकाशनियमावाश्रित्य प्रवृत्त्येतरयोः । तमः प्रवृत्तिप्रकाशावाश्रित्य नियमेनेतरयोरिति । तथाऽन्योन्यजननवृत्तयः । अन्यतमोऽन्यतमं जनयति जननमत्र परिणामः स च गुणानां सदृशरूपः । अत एव न हेतुमत्त्वं तत्त्वान्तरस्य हेतोरभावाच्चाप्यनित्यत्वं तत्त्वान्तरे लयाभावात् ॥

अन्योन्यसहाव्यभिचारिणश्च । उक्तञ्च अन्योन्यमिथुनाः सर्वे सर्वे सर्वत्रगामिनः । रजसो मिथुनं सत्त्वं सत्त्वस्य मिथुनं रजः । तमसश्चापि मिथुने ते सत्त्वरजसी उभे । उभयोः सत्त्वरजसोर्मिथुनं तम उच्यते । नैषामादिः संप्रयोगो विप्रयोगो वोपलभ्यते । मिथुनवृत्तित्वं सहचाराव्यभिचारित्वं । नियतकत्वं तु तेषामिदं लघुत्वं प्रकाशकत्वं च सत्त्वस्यैव नतु तयोः । कस्यचित्कार्य्योर्ध्वगमनहेतुभूतो धर्म्मो लाघवं गौरवासहवर्त्ति यतोऽग्निज्वालाया ऊर्ध्वगतिर्भवति तदेव कस्य चित्तिर्य्यग्गमने हेतुर्यथा वायोरेवं करणानां वृत्तिकुशलता हेतुर्लाघवं गुरुत्वे तु तानि मन्दानि स्युरिति सत्त्वस्य प्रकाशात्मकत्वमुक्तम् ॥

Digitized by Google

in their functions is [their] lightness, for were they possessed of heaviness they would act slowly. Hence Purity is said to be identical with manifesting."

Purity and Darkness being inactive are feeble in producing their effects : they are therefore supported by Passion,—i. e. being relieved from inertia are encouraged and made energetic. As it is said in the Sánkhya Karíká "Purity is light, manifesting and agreeable," and Passion is exciting and active," it is exciting because it is active. Passion consisting of perpetual activity, would move all the three qualities to every place, were there no hinderance made by the heavy and obstructive quality of Darkness ; while Darkness, restraining here and there, obliges it to move to some place alone, therefore Darkness is restraining, as is said: Darkness is heavy and obstructive. Hence it is that light and manifestation are identified with Purity alone, Passion alone is an exciter and moving ; and Darkness alone is heavy and preventive.

3. It must not be objected that, Qualities being mutually inconsistent would cause the destruction of each other, like the demons Sunda and Upsunda : [these two brothers falling in love with a beautiful damsel, expressed their desire to her; she consented to their request, but promised to accept that one of them who should defeat the other : accordingly they fought, and killed each other,] but would not conjointly perform one effect. This is rejected inasmuch as even things at variance with each other are seen jointly accomplishing one effect. For example: wick and oil, are incompatible with fire, nevertheless when joined with it perform the effect of manifesting colour ; so also air, bile and phlegm, though mutually disagreeing, unitedly perform their work of sustaining an animate body. In the same way Purity, Passion and Darkness, though inconsistent with each other, would, when compelled by the destiny of the Soul, associate together and jointly perform their common purpose. As it is said: their operation takes place according to the condition of the Soul, as in the case of a lamp.

4. Although these Qualities are one and the same, inasmuch as they are not distinct from the original cause, still their diversity consists in their becoming mutually over-powering and over-powered. As it is said, the one and the same woman possessed of virtue, beauty, modesty and youthfulness, and descended from a noble race, gives pleasure to her husband. What is the cause of this? because she exists for him as pleasant. The same woman, gives pain to the second wife of her husband. What is the reason of this ? because in relation to her she exists in the form of pain. In like manner she fascinates the man who is fond of, but does not obtain her. What is the reason of this ? because for him she exists fascinating. By the example of the woman all states have been described :—The cause of pleasure is Purity which is identical with pleasure, likewise what causes pain is Passion, which has identity with pain, and what causes fascination is Darkness which is identified with delusion. Thus it is concluded that the effect is existent previously to the operation of its cause ; and that it becomes manifest by the operation of the cause. As the already existing limbs of a tortoise when issue forth are distinguished—this is the body of the tortoise and those are its limbs ; so when they are retracted become undistinguishable in it. In the same way the already existing water-jar, ear-ring, etcetera coming out from the lump of earth or of gold, &c., are separated, this is earth, and this is a water-jar the effect of it, &c. So also earth, &c., which are previously existent, when they come out of subtile elements, then they are distinguished : this is the cause of it, and this is its effect.

सत्त्वतमसी स्वयमक्रियतया स्वकार्य्योत्पादने ऽवसीदन्ती रजसोपष्टभ्येते ऽवसादाद्विमुच्योत्साहप्रयत्नवती क्रियेते। उक्तं च सत्त्वं लघुप्रकाशकमिष्टमुपष्टम्भकं चलं च रजः। कुतः उपष्टम्भकं यतश्चलमिति। रजश्चलतया सर्वतस्त्रिगुणं चालयेदिति गुरुणा ऽऽवरणवता तमसा तत्र प्रतिबंधो न स्यात्। तमसा ततस्ततो व्यावृत्य क्वचिदेव प्रवर्त्स्यंते इति नियामकं तमः। यथाहुः। गुरुवरणकमेवतम। इति तथा च लघुप्रकाशकं सत्त्वमेव। उपष्टम्भकं चलं च रज एव गुरुवरणकं तम एव॥

३ ननु परस्परं विरोधशीलानां गुणानां सुन्दोपसुन्दन्यायेन परस्परं बाधकत्वयुक्तो नत्वेककार्य्यकर्तृत्वमितिचेन्न एवं भूतानामप्येककार्य्यकर्तृत्वदर्शनात्। तद्यथा वर्त्तितैले ऽनलविरोधिनी यथाऽनलेन मिलित्वा रूपप्रकाशलक्षणकार्य्यं कुरुतः। यथा वातपित्तश्लेष्माणः परस्परं विरोधशीला अपि मिलिताः सन्तः शरीरधारणकार्य्यकारिणस्तथा सत्त्वरजस्तमांसि विरुद्धशीलान्यपि सहवर्त्स्यन्ति पुरुषार्थवशान्मिलित्वा चैकंकार्य्यं कुरिष्यन्ति। उक्तं च प्रदीपवच्चार्थतो वृत्तिरिति॥

४ गुणानां प्रधानात्मकत्वादैक्येऽप्यभिभाव्याभिभावकरूपेण नानात्वम्। उक्तं च। एकैव स्त्री गुणकुलरूपशील यौवनसंपन्ना स्वामिनं सुखाकरोति तत्कस्य हेतोस्तामप्रति तस्याः सुखरूपसमुद्भवात्। सैव सपत्नीं दुःखाकरोति तत्कस्य हेतोस्तामप्रति तस्या दुःखरूपसमुद्भवात् एवं पुरुषान्तरं तामविन्दमानं सैव मोहयति तत्कस्य हेतोस्तमप्रति तस्या मोहरूपसमुद्भवात्। अनया स्त्रिया सर्वे भावा व्याख्याताः। तत्र यत्सुखकारणं तत्सुखात्मकं सत्त्वमेवं यद्दुःखकारणं तद्दुःखात्मकं रजः। तथा यन्मोहहेतुस्तन्मोहात्मकं तमः। तस्मात्कारणव्यापारात्पूर्वं सदेव कार्य्यं। सदेव पुनस्तद्व्यापारादाविर्भवति॥

यथा सन्त्येव कूर्म्माङ्गानि निःसरन्ति विभज्यन्ते इदङ्कूर्म्मशरीरमेतानि तदङ्गानि तान्येव सङ्कोचितानि तस्मिन्नेवानभिव्यक्तानि भवन्ति। तथा मृत्सुवर्णादिभ्यः सन्त्येव घटकुण्डलादीन्याविर्भवन्ति विभज्यन्ते इयं मृदिदं तत्कार्य्यङ्घट इत्यादि। तथा सन्त्येव पृथिव्यादीनि कारणात्तन्मात्रादाविर्भवन्ति विभज्यन्ते इदमस्य कारणमिदमस्य कार्य्यमिति। तथा सन्त्येव तन्मात्राण्यहङ्कारादाविर्भवन्ति विभज्यन्ते। एवं सन्नेवाहङ्कारो महतो ऽभिव्यक्तिमेति सन्नेव च महान्मूलप्रकृतेरभिव्यक्तं याति। एवङ्कारणभूतात्परमाव्यक्तात्साक्षात्पारम्पर्य्येण वा समन्वितस्य विभागः सर्गमात्रं।

Digitized by Google

In like manner the already existing subtile elements, coming out from egotism are distinguished. The already existent egotism likewise, proceeds from the great Element—Intellect; and the already existing Intellect becomes manifest from the original cause. Thus takes place separation of the universe, consisting of the phenomena directly or indirectly connected with the original cause, from the highest non-evolved, the primary cause at the creation alone.

5. When the water-pot, or ear-ring, &c., enter, into the lump of clay, or of gold, &c., then they become unmanifested: though manifested in the shape of the cause they are not manifested in the shape of the effect. So also the earth, and the like entering into the subtile elements, make them undistinguised in the shape of themselves, of earth, &c.; though the cause is manifest in its own shape still its form as effect remains hidden in it. The subtile elements, likewise, entering into Egotism, render it unmanifested—indistinct, with reference to themselves i. e. to their own forms. In the same way Egotism entering into the great element makes it unmanifested; and the great element entering into its source,—the Original cause, renders it unmanifested. But the Original cause does not enter into anything, inasmuch as it has no cause for itself. On the contrary it is the non-evolved cause of all the effects. In this way exists the non-separation of the universe from Nature. Thus separation and non-separation of the universe have been shown.

6. Some persons accepting the non-evolved,—Nature Intellect, Egotism, Senses, or the Elements as the Soul, offer their adoration to these. They may be rejected by the following argument: The soul is distinct from the non-evolved and the rest, because the non-evolved, Intellect, Egotism etcetera, are for another's use; inasmuch as they are an aggregate; and whatever is an aggregate, is observed to subserve another's purpose, like oil, folded betel-leaf, butter, curd, milk, grain and cloth, &c. All these are associated inasmuch as all these have identity with pleasure, pain and delusion. Therefore for whose purpose these associated are the same is the Soul. It may he urged that the aggregate such as a bed-stand, or a seat, &c. is seen to serve another's purpose, which must also be an aggregate such as the body, &c., and not the purpose of the Soul. Consequently they should prove a separate aggregate, but not an absolute Soul. To this we reply: What you say is all right, but if an aggregate were to serve merely the purpose of another aggregate, which also being an aggregate should be for the use of another aggregate, and this one also, for the same reason, for the use of another and so on, then there would occur, the unavoidable difficulty of regressus in infinitum. Besides, the invariable co-inherence of an aggregate is merely with another's purpose, but not with the purpose of another aggregate. It must not be replied that you infer this because you observe so in the example given by us. For we rejoin that a person desiring to have all the properties belonging to the example, proved as also existing in the object exemplified, would destroy the whole of his argument, inasmuch as the nature of the kitchen-hearth, &c., existing in the example, i. e. kitchen-hearth and the like, do not exist in the mountain, etcetera, the things exemplified. As it is said; the properties—i. e. the essence of the trinity of qualities, &c., which are invariably connected with the nature of an aggregate, being excluded from this—the absolute, exclude the triad of qualities also from it; as the essence of a Brahman being excluded from a person, excludes from him the notion of a Katha or reader of the Katha-Śakha.

G. D.

५ अथ मृत्पिण्डं हेमपिण्डं वा विशन्तो घटकुण्डलादयो ऽव्यक्ता भवन्ति कारणरूपेणाभिव्यक्ता अपि कार्य्यरूपेणानभिव्यक्ता भवन्ति । तथा पृथिव्यादयस्तन्मात्राणि विशन्तः स्वस्वरूपेण तन्मात्राण्यव्यक्तयन्ति स्वस्वरूपेण कारणमभिव्यक्तमपि कार्य्यस्वरूपं स्वकीयं स्वस्मिन्ननभिव्यक्तयति । तन्मात्राणि तथा ऽहङ्कारं विशन्त्यहङ्कारं स्वापेक्षया ऽव्यक्तयन्ति । एवमहङ्कारो महान्तं विशन् महान्तमनभिव्यक्तयति । महान् प्रधानं स्वकारणं विशन् तदव्यक्तयति । प्रधानस्य तु न क्वचित्प्रवेशो ऽकारणत्वादपितु तत्सर्वकार्य्याणामव्यक्तङ्कारणम् ॥ एवमविभागः प्रकृतौ विश्वस्य । एवं विभागाविभागौ ।

६ केचनाव्यक्तं वा महान्तं वा ऽहङ्कारं वा इन्द्रियाणि वा भूतानि वा आत्मत्वेनादाय तानेवोपासते ते तु वक्ष्यमाणरीत्या ऽपाकरणीयाः । अव्यक्तादेर्व्यतिरिक्तः पुरुषो ऽस्ति । अव्यक्तमहदहङ्कारादयः परार्थाः कुतः सङ्घातत्वाद्यः संघातो भवति स परार्थो दृष्टस्तैलताम्बूलघृतदधिदुग्धान्यवस्त्रवत् सुखदुःखमोहात्मकत्वेन सर्वे संघातास्तथा च यदर्थं संघाताः स एव पुरुषः । ननु शयनासनादिः सङ्घातः संघातशरीरादिपरार्थो दृष्टो नत्वात्मानं प्रति परार्थस्तस्मात्संघातान्तरमेव साधयेयुर्नासंहतमात्मानमिति यदुक्तं तत्साधु । संघातस्य संघातान्तरार्थकत्वे तस्यापि संघातत्वात्संघातान्तरार्थता तस्यापि संघातत्वात्तथात्वं तस्यापि तथात्वमित्यनवस्था दुस्तरा स्यात् । किञ्च संघातस्य पारार्थ्यमात्रेण व्याप्तिर्न तु संघातपारार्थ्येन । न च दृष्टान्तदृष्टत्वात्तथा कल्प्यत इति वाच्यं दृष्टान्तदृष्टयावद्धर्म्मान् दार्ष्टान्तिके साधनायानुमानमिच्छतो दृष्टान्तमहानसादिगतमहानसत्वादेः पर्वतादावभावात्सर्वानुमानोच्छेदः स्यात् ॥

यथाहुः । त्रिगुणत्वादयो हि धर्म्माः सङ्घातत्वेन व्याप्तास्ते ऽस्मिन् परे व्यावर्त्तमानास्त्रिगुणत्वादिव्यावर्त्तयन्ति ब्राह्मण्यमिव निवर्त्तमानङ्कठत्वादिकम् ॥

UNIVERSITY OF BOMBAY,

WILSON PHILOLOGICAL LECTURESHIP.

The first series of Lectures will be delivered in Bombay in the first, or cold-weather, term of 1876-77. Subject:—Sanskrit and the Prakrit Languages derived from it.

The series will consist of not fewer than six Lectures.

Candidates for the Lectureship are invited to send in their applications to the undersigned, on or before the first day of May next.

D. C. BOYD, M. A.,
University Registrar.

Bombay, 4th March, 1876.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO, AT THE MEDICAL HALL PRESS, BENARES.

Digitized by Google

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कूरश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 120. Benares, May 1st, 1876. Vol. X.

॥ काशिकायाः ॥

पञ्चमाध्यायस्य द्वितीयः पादः ॥

तपःसहस्राभ्यां विनीनी ॥ १०२ ॥

तपःसहस्रशब्दाभ्यां विनि इनि इत्येतौ प्रत्ययौ भवतो मत्वर्थे ॥ प्रत्ययार्थयोस्तु यथासंख्यं सर्वत्रैवास्मिन् प्रकरणे नेष्यते ॥ तपो ऽस्यास्मिन् वा विद्यते, तपस्वी । सहस्री । असन्तत्वाददन्तत्वाच्च सिद्धे प्रत्यये पुनर्वचनमणा वक्ष्यमाणेन बाधा मा भूदिति । सहस्रात्तु ठनपि बाध्यते ॥

अण् च ॥ १०३ ॥

तपःसहस्राभ्यामण्च प्रत्ययो भवति । तापसः । साहस्रः । योगविभाग उत्तरार्थो, यथासंख्यार्थश्च ॥ अणप्रकरणे ज्योत्स्नादिभ्य उपसंख्यानम् ॥ * ॥ ज्योत्स्ना विद्यते ऽस्मिन्पक्षे, ज्यौत्स्नः पक्षः । तामिस्रः । कौण्डिनः । कौतपः । वैसर्पः । वैपादिकः ॥

सिकताशर्कराभ्यां च ॥ १०४ ॥

सिकताशर्कराभ्यामण्प्रत्ययो भवति मत्वर्थे । सैकतो घटः । शार्करं मधु । अदेशार्थमिदमुदाहरणम् । देशे तु लुबिलचौ भविष्यतः ॥

देशे लुबिलचौ च ॥ १०५ ॥

सिकताशर्कराभ्यां देशे ऽभिधेये लुबिलचौ भवतः । चकारादण् च, मतुप् च । कस्य पुनरयं लुप् । मतुबादीनामन्यतमस्य, विशेषाभावात् । सिकता अस्मिन्विद्यन्ते सिकता देशः । सिकतिलः । सैकतः । सिकतावान् । शर्करा देशः । शर्करिलः । शार्करः । शर्करावान् । देश इति किम् । सैकतो घटः । शार्करं मधु ॥

दन्त उन्नत उरच् ॥ १०६ ॥

उन्नत इति प्रकृतिविशेषणम् । दन्तशब्दादुन्नतोपाधिकादुरच् प्रत्ययो भवति मत्वर्थे । दन्ता उन्नता अस्य सन्ति, दन्तुरः । उन्नत इति किम् । दन्तवान् ॥

ऊषसुषिमुष्कमधो रः ॥ १०७ ॥

ऊष सुषि मुष्क मधु इत्येतेभ्यो रः प्रत्ययो भवति मत्वर्थे । ऊषरं क्षेत्रम् । सुषिरं काष्ठम् । मुष्करः पशुः । मधुरो गुडः ॥ इतिकरणो विवक्षार्थः सर्वत्राभिधेयनियमं करोति । इह न भवति । ऊषो ऽस्मिन् घटे विद्यते । मध्वस्मिन्घटे विद्यते इति ॥ रप्रकरणे खमुखकुञ्जेभ्य उपसंख्यानम् ॥ * ॥ खमस्यास्ति कण्ठविवरं महत्, खरः । मुखमस्यास्तीति सर्वस्मिन्वक्तव्ये, मुखरः । कुञ्जावस्य स्तः कुञ्जरः । हस्तिहनू कुञ्जशब्देनोच्येते ॥ नगपांसुपाण्डुभ्यश्चेति वक्तव्यम् ॥ * ॥ नगरम् । पांसुरम् । पाण्डुरम् ॥ कच्छ्वा ह्रस्वत्वं च ॥ * ॥ कच्छुरम् ॥

द्युद्रुभ्यां मः ॥ १०८ ॥

द्युद्रुशब्दाभ्यां मः प्रत्ययो भवति मत्वर्थे । द्युमः । द्रुमः । रूढिशब्दावेतौ । रूढिषु च न मतुब्विकल्प्यते ॥

केशाद्वो ऽन्यतरस्याम् ॥ १०९ ॥

केशशब्दाद्वः प्रत्ययो भवति मत्वर्थे ऽन्यतरस्याम् । ननु च प्रकृतमन्यतरस्यांग्रहणमनुवर्त्तत एव मतुप्समुच्चयार्थं तदित्युक्तम् । अनेन त्विनिठनौ प्राप्येते । ततश्चातूरूप्यं भवति । केशवः । केशी । केशिकः । केशवानिति ॥ वप्रकरणे ऽन्येभ्यो ऽपि दृश्यत इति वक्तव्यम् ॥ * ॥ मणिवः । हिरण्यवः । कुराबः । कुमा-

Digitized by Google

रवः। राजीवम्। कुञ्जावः। इष्टकावः॥ * ॥ अर्णसो लोपश्च ॥ * ॥ अर्णवः॥ छन्दसीवनिपौ च वक्तव्यौ॥ * ॥ वश्च मतुप् च। रथीरभून्मुद्गलानी गविष्टौ। सुमङ्गलीरियं वधूः। वनिप्। मघवानमीमहे। वकारमतुपौ च। उद्वा च। उद्वती च॥ मेधारथाभ्यामिरन्निरचौ वक्तव्यौ॥ * ॥ मेधिरः। रथिरः॥

गाण्ड्यजगात्संज्ञायाम् ॥ ११० ॥

गाण्डी अजग इत्येताभ्यां वः प्रत्ययो भवति संज्ञायां विषये मत्वर्थे। गाण्डीवं धनुः। अजगवं धनुः। ह्रस्वादपि भवति। गाण्डिवं धनुरिति। तुल्या हि संहिता दीर्घह्रस्वयोः। उभयथा च सूत्रं प्रणीतम्॥

काण्डाण्डादीरन्नीरचौ ॥ १११ ॥

काण्ड अण्ड इत्येताभ्यां यथासंख्यमीरन्नीरचौ प्रत्ययौ भवतो मत्वर्थे। काण्डीरः। अण्डीरः॥

रजःकृष्यासुतिपरिषदो वलच् ॥ ११२ ॥

रजःप्रभृतिभ्यः प्रातिपदिकेभ्यो वलच् प्रत्ययो भवति मत्वर्थे। रजस्वला स्त्री। कृषीवलः कुटुम्बी। आसुतीवलः शौण्डिकः। परिषद्वलो राजा। वलइति दीर्घत्वम्। इतिकरणो विषयनियमार्थः सर्वत्र संबध्यते। तेनेह न भवति। रजोऽस्मिन् ग्रामे विद्यतइति॥ वलच्प्रकरणे ऽन्येभ्योऽपि दृश्यतइति वक्तव्यम्॥ * ॥ भ्रातृवलः। पुत्रवलः। उत्साहवलः † ॥

दन्तशिखात्संज्ञायाम् ॥ ११३ ॥

दन्तशिखाशब्दाभ्यां वलच् प्रत्ययो भवति मत्वर्थे संज्ञायां विषये। दन्तावलः सैन्यः। दन्तावलो गजः। शिखावलं नगरम्। शिखावला स्थूणा॥

ज्योत्स्नातमिस्राशृङ्गिणोर्जस्विन्नूर्जस्वलगोमिन्मलिनमलीमसाः ॥ ११४ ॥

ज्योत्स्नादयः शब्दा मत्वर्थे निपात्यन्ते मत्वर्थे संज्ञायां विषये। ज्योतिष उपधालोपो नश्च प्रत्ययो निपात्यते। ज्योत्स्ना चन्द्रप्रभा। तमस उपधाया इकारो रश्च। तमिस्रा रात्रिः। स्त्रीत्वमतन्त्रम्। अन्यत्रापि दृश्यते। तमिस्रं नभः। शृङ्गादिनच्प्रत्ययो निपात्यते। शृङ्गिणः। ऊर्जो ऽसुगागमो निपात्यते विनिवलचौ प्रत्ययौ। ऊर्जस्वी। ऊर्जस्वलः। गोर्मिनिप्रत्ययो निपात्यते। गोमी। मलशब्दादिनच्ीमसचौ प्रत्ययौ निपात्येते। मलिनः। मलीमसः॥

अत इनिठनौ ॥ ११५ ॥

अकारान्तात्प्रातिपदिकादिनिठनौ प्रत्ययौ भवतः। दण्डी। दण्डिकः। छत्री। छत्रिकः। अन्यतरस्यामित्यधिकारान्मतुबपि भवति। दण्डवान्। छत्रवान्। तपरकरणं किम्। खट्वावान्।

एकाक्षरात्कृतो जातेः सप्तम्यां च न तौ स्मृतौ॥

एकाक्षरात्तावत्। स्ववान्। खवान्। कृतः। कारकवान्। जातेः। व्याघ्रवान्। सिंहवान्। सप्तम्याम्। दण्डा अस्यां सन्ति, दण्डवती शालेति। इतिकरणो विषयनियमार्थः सर्वत्र संबध्यतइत्युक्तं, तेन क्व चिद्भवत्यपि। कार्यी। हार्यी। तण्डुली। तण्डुलिक इति॥

व्रीह्यादिभ्यश्च ॥ ११६ ॥

व्रीह्यादिभ्यः प्रातिपदिकेभ्य इनिठनौ प्रत्ययौ भवतो मत्वर्थे, मतुब्भवत्येव। व्रीही। व्रीहिकः। व्रीहिमान्। मायी। मायिकः। मायावान्॥ न च व्रीह्यादिभ्यः सर्वेभ्यः प्रत्ययद्वयमिष्यते। किं तर्हि शिखादिभ्य इनिर्वाच्य, इकन्यवखदादिभ्यः। परिशिष्टेभ्य उभयम्॥ शिखा। मेखला। संज्ञा। बलाका। माला। वीणा। वडवा। अष्टका। पताका। कर्मन्। चर्मन्। हंसा। इत्येतेभ्य इनिरेवेष्यते। यवखद। कुमारी। नौ इत्येतेभ्य इकन्नेवेष्यते। परिशिष्टेभ्यो द्वावपि प्रत्ययौ भवतः। व्रीहिग्रहणं किमर्थम्। यावता तुन्दादिषु व्रीहिशब्दः पठ्यते। तत्र इनिठनौ चकारेण विधीयेते। एवं तर्हि तुन्दादिषु व्रीहिग्रहणमर्थग्रहणं विज्ञायते। शालयोऽस्य सन्ति, शालिनः। शाली। शालिकः। शालिमान् इति। व्रीहिशिखादयः पूर्वं पठिताः। यवखद। कुमारी। नौ॥ शीर्षान्नञः॥ अशीर्षी। अशीर्षिकः॥

तुन्दादिभ्य इलच्च ॥ ११७ ॥

तुन्दादिभ्यः प्रातिपदिकेभ्य इलच् प्रत्ययो भवति मत्वर्थे। चकारादिनिठनौ मतुप् च। तुन्दिलः। तुन्दी। तुन्दिकः। तुन्दवान्। उदरिलः। उदरी। उदरिकः। उदरवान्। तुन्द। उदर। पिचण्ड। घट। यव। व्रीहि॥ स्वाङ्गाद्विवृद्धौ च॥

एकगोपूर्वाट्ठञ् नित्यम् ॥ ११८ ॥

एकपूर्वाद्गोपूर्वाच्च प्रातिपदिकान्नित्यं ठञ् प्रत्ययो भवति मत्वर्थे। एकशतमस्यास्तीति, ऐकशतिकः। ऐकसहस्रिकः। गोपूर्वाच्च। गौशतिकः। गौसहस्रिकः। अत इत्येव, एकविंशतिरस्यास्तीति न भवति। कथमैकगविकः, समासान्ते कृते भविष्यति। कथं गौशकटिकः। शकटीशब्देन समानार्थः शकटशब्दोऽस्ति ततो भविष्यति। अवश्यं चात इत्यनुवर्त्यम्। द्वन्द्वोपतापगर्ह्यात् इत्येवमाद्यर्थम्। नित्यग्रहणं मतुपो बाधनार्थम्। कथमेकद्रव्यवत्त्वादिति। नैवायं साधुः। एकेन वा द्रव्यवत्त्वादिति समर्थनीयम्॥

* बिम्बाव इत्युदाहरणमन्यत्राधिकम्।

† उत्सङ्गवल इत्यधिकं पुस्तकान्तरे।

Digitized by Google

शतसहस्रान्ताच्च निष्कात् ॥ ११९ ॥

शतान्तात् सहस्रान्ताच्च प्रातिपदिकाट्ठञ् प्रत्ययो भवति मत्वर्थे । तौ चेच्छतसहस्रशब्दौ निष्कात्परौ भवतः । निष्कशतमस्यास्ति, नैष्कशतिकः । नैष्कसहस्रिकः । सुवर्णनिष्कशतमस्यास्तीत्यनभिधानान्न भवति ॥

रूपादाहतप्रशंसयोर्यप् ॥ १२० ॥

आहतप्रशंसे प्रकृत्युपाधी, आहतप्रशंसाविशिष्टार्थे वर्त्तमानाद्रूपशब्दाद्यप् प्रत्ययो भवति मत्वर्थे । आहतं रूपमस्य रूप्यो दीनारः । रूप्यः केदारः । रूप्यं कार्षापणम् । प्रशस्तं रूपमस्यास्ति रूप्यः पुरुषः । निघातिकाताडनादिना दीनारादिषु रूपं यदुत्पद्यते तदाहतमित्युच्यते । आहतप्रशंसयोरिति किम् । रूपवान् ॥ यप्प्रकरणे ऽन्येभ्योपि दृश्यतइति वक्तव्यम् ॥ * ॥ हिम्याः पर्वताः । गुण्या ब्राह्मणाः ॥

अस्मायामेधास्रजो विनिः ॥ १२१ ॥

असन्तात्प्रातिपदिकान्माया मेधा स्रज् इत्येतेभ्यश्च विनिः प्रत्ययो भवति मत्वर्थे । मतुप् सर्वत्र समुच्चीयतएव । असन्तात्तावत् । पयस्वी । यशस्वी । मायावी । मेधावी । स्रग्वी । मायाशब्दाद्व्रीह्यादिषु पाठादिनिठनावपि भवतः । मायी । मायिकः ॥

बहुलं छन्दसि ॥ १२२ ॥

छन्दसि विषये बहुलं विनिः प्रत्ययो भवति मत्वर्थे । अग्ने तेजस्विन् । न भवति, सूर्यो वर्चस्वान् ॥ छन्दसि विनिप्रकरणे ऽष्ट्रामेखलाद्वयोभयरुजाहृदयानां दीर्घत्वं चेति वक्तव्यम् ॥ * ॥ अष्ट्रावी । मेखलावी । द्वयावी । उभयावी । रुजावी । हृदयावी । द्वयोभयहृदयानि दीर्घत्वं प्रयोजयन्ति ॥ मर्मणश्चेति वक्तव्यम् ॥ * ॥ मर्मावी ॥ सर्वत्रामयस्योपसंख्यानम् ॥ * ॥ छन्दसि भाषायां च । आमयावी ॥ शृङ्गवृन्दाभ्यामारकन्वक्तव्यः ॥ * ॥ शृङ्गारकः ॥ वृन्दारकः ॥ फलबर्हाभ्यामिनज्वक्तव्यः ॥ * ॥ फलिनः । बर्हिणः ॥ हृदयाच्चालुरन्यतरस्याम् ॥ * ॥ हृदयालुः । हृदयी । हृदयिकः । हृदयवान् ॥ शीतोष्णतृप्रेभ्यस्तन्न सहतइत्यालुज्वक्तव्यः ॥ * ॥ शीतं न सहते शीतालुः । उष्णालुः । तृप्रालुः ॥ तन्न सहतइति हिमाच्चेलुः ॥ * ॥ हिमं न सहते हिमेलुः ॥ बलाच्चोलच् ॥ * ॥ बलं न सहते बलूलः ॥ वातात्समूहे च ॥ * ॥ वातं न सहतइति च ॥ वातानां समूहः, वातं न सहतइति वा वातूलः ॥ तप् पर्वमरुद्भ्यां वक्तव्यः ॥ * ॥ पर्वतः । मरुत्तः ॥ अर्थात्तदभावे इनिर्वक्तव्यः ॥ * ॥ अर्थी । तदभावइत्येव । अर्थवान् । तदेतद्बहुलग्रहणेन लभ्यते ॥

ऊर्णाया युस् ॥ १२३ ॥

ऊर्णाशब्दाद्युस् प्रत्ययो भवति मत्वर्थे । सकारः पदसंज्ञार्थः । ऊर्णास्य विद्यते ऊर्णायुः । केचिच्छन्दोग्रहणमनुवर्त्तयन्ति ॥

वाचो ग्मिनिः ॥ १२४ ॥

वाक्शब्दात् ग्मिनिः प्रत्ययो भवति मत्वर्थे । वाग्मी । वाग्मिनौ । वाग्मिनः ॥

आलजाटचौ बहुभाषिणि ॥ १२५ ॥

वाक्शब्दात्प्रथमासमर्थादालच् आटच् इत्येतौ प्रत्ययौ भवतो मत्वर्थे बहुभाषिण्यभिधेये । ग्मिनेरपवादः । वाचालः । वाचाटः ॥ कुत्सितइति वक्तव्यम् ॥ * ॥ यो हि सम्यग् बहु भाषते स वाग्मीत्येव भवति ॥

स्वामिन्नैश्वर्ये ॥ १२६ ॥

स्वामिन्निति निपात्यते ऐश्वर्ये गम्यमाने । स्वशब्दादैश्वर्यवाचिनो मत्वर्थे आमिन्प्रत्ययो निपात्यते । स्वमस्यास्तीति, ऐश्वर्यमस्यास्तीति, स्वामी । स्वामिनः । ऐश्वर्यइति किम् । स्ववान् ॥

अर्शआदिभ्यो ऽच् ॥ १२७ ॥

अर्शस् इत्येवमादिभ्यः प्रातिपदिकेभ्यो ऽच्प्रत्ययो भवति मत्वर्थे । अर्शांसि अस्य विद्यन्ते अर्शसः । उरसः । आकृतिगणश्चायम् । यत्राभिन्नरूपेण शब्देन तद्वतो ऽभिधानं तत्सर्वमिह द्रष्टव्यम् । अर्शस् । उरस् । तुन्द । चतुर । पलित । जटा । घटा । अभ्र । कर्दम । आम । लवण ॥ स्वाङ्गाद्धीनात् ॥ वर्णात् ॥ अर्शआदिः ॥

द्वन्द्वोपतापगर्ह्यात्प्राणिस्थादिनिः ॥ १२८ ॥

द्वन्द्वः समासः । उपतापो रोगः । गर्ह्यं निन्द्यं, तद्विषयेभ्यः शब्देभ्यः प्राणिस्थार्थवाचिभ्य इनिः प्रत्ययो भवति मत्वर्थे । द्वन्द्वात्तावत् । कटकवलयिनी । शङ्खनूपुरिणी । उपतापात् । कुष्ठी । किलासी । गर्ह्यात् । ककुदावर्त्ती । काकतालुकी ॥ प्राणिस्थादिति किम् । पुष्पफलवान् वृक्षः ॥ प्राण्यङ्गाच्चेष्यते ॥ पाणिपादवती । अत इत्यनुवर्त्तते, तेनेह न भवति, चित्रललाटिकावती ॥ सिद्धे प्रत्यये पुनर्वचनं ठनादिबाधनार्थम् ॥

वातातिसाराभ्यां कुक् च ॥ १२९ ॥

वातातिसारशब्दाभ्यामिनिः प्रत्ययो भवति, तत्संनियोगेन च तयोः कुगागमो भवति । वातातिसारयोरुपतापत्वात्पूर्वेणैवेनिप्रत्यये सिद्धे कुगर्थमेवेदं वचनम् । वातकी । अतिसारकी ॥ पिशाचाच्चेति वक्तव्यम् ॥ * ॥ पिशाचकी वैश्रवणः ॥ रोगे चायमिष्यते ॥ इह न भवति, आतवती गुहेति ॥

Digitized by Google

वयसि पूरणात् ॥ १३० ॥

इनिरनुवर्त्तते। पूरणप्रत्ययान्तात्प्रातिपदिकादिनिः प्रत्ययो भवति मत्वर्थे वयसि द्योत्ये। पञ्चमो ऽस्यास्ति मासः संवत्सरो वा, पञ्चमी उष्ट्रः। नवमी। दशमी। सिद्धे सति नियमार्थं वचनमिनिरेव भवति ठञ् भवतीति। वयसीति किम्। पञ्चमवान् ग्रामरागः॥

सुखादिभ्यश्च ॥ १३१ ॥

सुख इत्येवमादिभ्यः प्रातिपदिकेभ्य इनिः प्रत्ययो नियम्यते मत्वर्थे। सुखी। दुःखी। माला क्षेपइति पठ्यते, व्रीह्यादिषु च मालाशब्दो ऽस्ति तदिह क्षेपे मतुब्बाधनार्थं वचनम्। सुख। दुःख। तृप्र। कृच्छ्र। आस्र। अलीक। करुणा। कृपण। सोढ। प्रमीप। शील। हल॥ माला क्षेपे॥ प्रणय॥

धर्मशीलवर्णान्ताच्च ॥ १३२ ॥

अन्तशब्दः प्रत्येकमभिसंबध्यते, धर्माद्यन्तात्प्रातिपदिकादिनिः प्रत्ययो नियम्यते। ब्राह्मणानां धर्मो ब्राह्मणधर्मः, सो ऽस्यास्तीति ब्राह्मणधर्मी। ब्राह्मणशीली। ब्राह्मणवर्णी॥

हस्ताज्जातौ ॥ १३३ ॥

हस्तशब्दादिनिः प्रत्ययो नियम्यते मत्वर्थे समुदायेन चेज्जातिरभिधीयते। हस्तो ऽस्यास्तीति, हस्ती। हस्तिनौ। हस्तिनः। जाताविति किम्। हस्तवान्पुरुषः॥

वर्णाद्ब्रह्मचारिणि ॥ १३४ ॥

वर्णशब्दादिनिः प्रत्ययो भवति मत्वर्थे समुदायेन चेद्ब्रह्मचारी भण्यते।। ब्रह्मचारी त्रैवर्णिको ऽभिप्रेतः स हि विद्याग्रहणार्थमुपनीतो ब्रह्म चरति नियममासेवतइत्यर्थः। वर्णी। वर्णिनौ। वर्णिनः। ब्रह्मचारिणीति किम्। वर्णवान्। ब्राह्मणादयस्त्रयो वर्णा वर्णिन उच्यन्ते॥

पुष्करादिभ्यो देशे ॥ १३५ ॥

पुष्कर इत्येवमादिभ्यः प्रातिपदिकेभ्य इनिः प्रत्ययो भवति समुदायेन चेद्देशो ऽभिधीयते। पुष्करिणी। पद्मिनी। देशइति किम्। पुष्करवान्हस्ती॥ इनिप्रकरणे बलाद्बाहूरुपूर्वादुपसंख्यानम्॥ * ॥ बाहुबली। ऊरुबली॥ सर्वादेश्चेति वक्तव्यम्॥ * ॥ सर्वधनी। सर्वबीजी। सर्वकेशी नटः॥ अर्थाच्चासंनिहिते॥ * ॥ अर्थी। असंनिहितइति किम्। अर्थवान्॥ तदन्ताच्चेति वक्तव्यम्॥ * ॥ धान्यार्थी। हिरण्यार्थी। पुष्कर। पद्म। उत्पल। तमाल। कुमुद। नड। कपित्थ। बिस। मृणाल। कर्दम। शालूक। विगर्ह। करीष। शिरीष। यवास। प्रवास। हिरण्य *॥

बलादिभ्यो मतुबन्यतरस्याम् ॥ १३६ ॥

बलादिभ्यः प्रातिपदिकेभ्यो मतुप्प्रत्ययो भवति। अन्यतरस्यांग्रहणेन प्रकृत इनिः समुच्चीयते। बलवान्। बली। उत्साहवान्। उत्साही। बल। उत्साह। उद्भाव। उद्वास। उद्वास। शिखाबल। कूपमूल। दंश। कुल। आयाम। व्यायाम। उपयाम। आरोह। अवरोह। परिणाह। युद्ध॥

संज्ञायां मन्माभ्याम् ॥ १३७ ॥

मन्नन्तात्प्रातिपदिकान्मशब्दान्ताच्च इनिः प्रत्ययो भवति मत्वर्थे, समुदायेन चेत्संज्ञा गम्यते। प्रथिमिनी। दामिनी। मशब्दान्तात्। होमिनी। सोमिनी। संज्ञायामिति किम्। सोमवान्। तोमवान्॥

कंशंभ्यां बभयुस्तितुतयसः ॥ १३८ ॥

कंशमिति मकारान्तावुदकसुखयोर्वाचकौ, ताभ्यां ब भ युस् ति तु त यस् इत्येते सप्त प्रत्यया भवन्ति मत्वर्थे। कम्बः। शम्बः। कम्भः। शम्भः। कंयुः। शंयुः। कन्तिः। शन्तिः। कन्तुः। शन्तुः। कन्तः। शन्तः। कंयः। शंयः। सकारः पदसंज्ञार्थस्तेनानुस्वारपरसवर्णौ सिद्धौ भवतः। संज्ञायां हि सत्यां कम्यः शम्य इति स्यात्॥

तुन्दिवलिवटेर्भः ॥ १३९ ॥

तुन्दि वलि वटि इत्येतेभ्यो भः प्रत्ययो भवति मत्वर्थे। तुन्दिरिति वृद्धा नाभिरुच्यते, सास्यास्ति तुन्दिभः। वलिभः। वटिभः। वलिशब्दः पामादिषु पठ्यते, तेन वलिन इत्यपि भवति॥

अहंशुभमोर्युस् ॥ १४० ॥

अहमिति शब्दान्तरमहंकारे वर्त्तते, शुभमित्यव्ययं शुभपर्याय,स्ताभ्यां युस्प्रत्ययो भवति मत्वर्थे। सकारः पदसंज्ञार्थः। अहंयुः। अहंकारवानित्यर्थः। शुभंयुः। कल्याणवानित्यर्थः॥

इति श्रीजयादित्यविरचितायां काशिकायां वृत्तौ पञ्चमस्याध्यायस्य द्वितीयः पादः॥

॥ काशिकायाः ॥

पञ्चमाध्यायस्य तृतीयः पादः ॥

प्राग्दिशो विभक्तिः ॥ १ ॥

दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्य इति वक्ष्यति, प्राग्-

---

* कैरव। कल्लोल। तरङ्ग। वयस। एते शब्दा अत्र गणे पुस्तकान्तरे ऽधिकाः।

तस्माद्विभक्तिसंज्ञकनाख्यानित ऊर्ध्वमनुक्रमिष्यामो विभक्तिसंज्ञास्ते वेदितव्याः । वक्ष्यति । पञ्चम्यास्तसिल् । ततः । यतः । कुतः । तसिलादीनां विभक्तित्वे प्रयोजनं त्यदादिविधयः, इदमो विभक्तिस्वरश्च । इह । ङेडिदमिति विभक्त्युदात्तत्वं सिद्धं भवति । इतः परं स्वार्थिकाः प्रत्ययास्तेषु समर्थाधिकारः प्रथमग्रहणं च प्रतियोग्यपेक्षत्वान्नोपयुज्यतइति निवृत्तम् । वावचनमनुवर्त्ततएव, तेन विकल्पेन तसिलादयो भवन्ति । कुतः । कस्मात् । कुत्र । कस्मिन्निति ॥

किंसर्वनामबहुभ्यो ऽद्व्यादिभ्यः ॥ २ ॥

प्राग्दिश इत्येव । किमः सर्वनाम्नो बहुशब्दाच्च प्राग्दिशः प्रत्यया वेदितव्याः । सर्वनामत्वात्प्राप्ते ग्रहणे द्व्यादिपर्युदासः क्रियते । कुतः । कुत्र । यतः । यत्र । ततः । तत्र । बहुतः । बहुत्र । अद्व्यादिभ्य इति किम् । द्वाभ्याम् । द्वयोः । प्रकृतिपरिसंख्यानं किम् । वृक्षात् । वृक्षे । प्राग्दिश इत्येव । वैयाकरणपाशः । सर्वनामत्वादेव सिद्धे किमो ग्रहणं द्व्यादिपर्युदासात् ॥ बहुग्रहणे संख्याग्रहणम् ॥ * ॥ इह न भवति । बहोः सूपात् । बहौ सूपइति ॥

इदम इश् ॥ ३ ॥

प्राग्दिश इत्येव । इदम इश् इत्ययमादेशो भवति प्राग्दिशीयेषु प्रत्ययेषु परतः । शकारः सर्वादेशार्थः । इह ॥

एतेतौ रथोः ॥ ४ ॥

रेफथकारादौ प्राग्दिशीये प्रत्यये परत इदम एतेतावादेशौ भवतः । इशोपवादः । रेफे ऽकार उच्चारणार्थः । इदमो र्हिल् । एतर्हि । इदमस्थमुः । इत्थम् ॥

एतदोऽश् ॥ ५ ॥

प्राग्दिशइत्येव । एतदः प्राग्दिशीये परतो ऽशित्ययमादेशो भवति । शकारः सर्वादेशार्थः । अतः । अत्र । एतद इति योगविभागः कर्त्तव्यः । एतदो रथोः परत एत इत् इत्येतावादेशौ भवतः । एतर्हि । इत्थम् । रेफादिरनद्यतने र्हिलन्यतरस्यामिति विध्यतएव । थमुप्रत्ययः पुनरेतद उपसंख्येयः ॥

सर्वस्य सो ऽन्यतरस्यां दि ॥ ६ ॥

सर्वस्य स इत्ययमादेशो भवति प्राग्दिशीये दकारादौ प्रत्यये परतो ऽन्यतरस्याम् । सर्वदा । सदा । प्राग्दिशीयइत्येव । सर्वं ददातीति सर्वदा ब्राह्मणी ॥

पञ्चम्यास्तसिल् ॥ ७ ॥

पञ्चम्यन्तेभ्यः किंसर्वनामबहुभ्यस्तसिल्प्रत्ययो भवति । कुतः । यतः । ततः । बहुतः ।

तसेश्च ॥ ८ ॥

प्रतियोगे पञ्चम्यास्तसिः, अपादाने चाहीयरुहोरिति वक्ष्यति । तस्य तसेः किंसर्वनामबहुभ्यः परस्य तसिलादेशो भवति । कुत आगतः । यतः । ततः । बहुत आगतः । तसेस्तसिल्वचनं स्वरार्थं विभक्त्यर्थं च ॥

पर्यभिभ्यां च ॥ ९ ॥

परि अभि इत्येताभ्यां तसिल् प्रत्ययो भवति ॥ सर्वोभयार्थे वर्त्तमानाभ्यां प्रत्यय इष्यते ॥ परितः । सर्वत इत्यर्थः । अभितः । उभयत इत्यर्थः ॥

सप्तम्यास्त्रल् ॥ १० ॥

किंसर्वनामबहुभ्यः सप्तम्यन्तेभ्यः त्रल् प्रत्ययो भवति । कुत्र । तत्र । बहुत्र ॥

इदमो हः ॥ ११ ॥

इदमः सप्तम्यन्ताद्धः प्रत्ययो भवति । त्रलो ऽपवादः । इह ॥

किमो ऽत् ॥ १२ ॥

किमः सप्तम्यन्तादत्प्रत्ययो भवति । त्रलो ऽपवादः । क्व भोक्ष्यसे । क्वाध्येष्यसे । त्रलमपि के चिदिच्छन्ति । कुत्र । तत्त्वथ, मुत्तरसूत्राद्वावचनं पुरस्तादपकृष्यते ॥

वा ह च च्छन्दसि ॥ १३ ॥

किमः सप्तम्यन्ताद्वा हः प्रत्ययो भवति छन्दसि विषये । यथाप्राप्तं च । क्व । कुह । कुत्र चिदस्य सा दूरे क्व ब्राह्मणस्य वाचकाः ॥

इतराभ्योपि दृश्यन्ते ॥ १४ ॥

सप्तमीपञ्चम्यपेक्षमितरत्वम् । इतराभ्यो विभक्तिभ्यस्तसिलादयो दृश्यन्ते । दृशिग्रहणं प्रायिकविध्यर्थं, तेन भवदादिभिर्योगएवैतद्विधानम् । के पुनर्भवदादयः । भवान्दीर्घायुरायुष्मान् देवानांप्रिय इति । स भवान् । ततो भवान् । तत्र भवान् । तं भवन्तम् । तत्र भवन्तम् । ततो भवन्तम् । तेन भवता । तत्र भवता । ततो भवता । तस्मै भवते । ततो भवते । तत्र भवते । तस्माद्भवतः । ततो भवतः । तत्र भवतः । तस्य भवतः । ततो भवतः । तत्र भवतः । तस्मिन् भवति । ततो भवति । तत्र भवति । एवं दीर्घायुःप्रभृतिष्वप्युदाहार्यम् ॥

सर्वैकान्यकिंयत्तदः काले दा ॥ १५ ॥

सप्तम्या इति वर्त्तते, न त्वितराभ्य इति । सर्वादिभ्यः प्रातिपदिकेभ्यो दा प्रत्ययो भवति । त्रलोपवादः । सर्वस्मिन्काले, सर्वदा । एकदा । अन्यदा । कदा । तदा । कालइति किम् । सर्वत्र देशे ॥

Digitized by Google

इदमो र्हिल् ॥ १६ ॥

सप्तम्या इत्येव । काल इति च । इदमः सप्तम्यन्तात्काले वर्त्तमानाद् र्हिल् प्रत्ययो भवति । हस्यापवादः । लकारः स्वरार्थः । अस्मिन् काले, एतर्हि । कालइत्येव । इह देशे ॥

अधुना ॥ १७ ॥

अधुनेति निपात्यते । इदमो ऽश्भावो धुना च प्रत्ययः । अस्मिन्काले, अधुना ॥

दानीं च ॥ १८ ॥

इदमः सप्तम्यन्तात्काले वर्त्तमानाद्दानीं प्रत्ययो भवति । अस्मिन्काले, इदानीम् ॥

तदो दा च ॥ १९ ॥

तदः सप्तम्यन्तात्काले वर्त्तमानाद् दा प्रत्ययो भवति, चकाराद्दानीं च । तस्मिन्काले, तदा । तदानीम् । तदो दावचनमनर्थकं, विहितत्वात् ॥

तयोर्दार्हिलौ चच्छन्दसि ॥ २० ॥

तयोरिति प्रातिपदिकनिर्देशः । तयोरिदमः तदश्च यथासंख्यं दार्हिलौ प्रत्ययौ भवतश्छन्दसि विषये । चकाराद्यथाप्राप्तं च । इदावत्सरीयः । इयंतर्हि । इदानीम् । तदानीम् ॥

अनद्यतने र्हिलन्यतरस्याम् ॥ २१ ॥

छन्दसीति न स्वर्यते । सामान्येन विधानम् । किंसर्वनामबहुभ्यः सप्तम्यन्तेभ्यो ऽनद्यतने कालविशेषे वर्त्तमानेभ्यो र्हिल् प्रत्ययो भवत्यन्यतरस्याम् । कर्हि । कदा । यर्हि । यदा । तर्हि । तदा ॥

सद्यःपरुत्परार्यैषमःपरेद्यव्यद्यपूर्वेद्युरन्येद्युरन्यतरेद्युरितरेद्युरपरेद्युरधरेद्युरुभयेद्युरुत्तरेद्युः ॥ २२ ॥

सप्तम्याः कालइति वर्त्तते । सद्यःप्रभृतयः शब्दा निपात्यन्ते । प्रकृतिप्रत्यय आदेशः कालविशेषइति सर्वमेतन्निपातनाल्लभ्यते । समानस्य सभावो निपात्यते द्यश्च प्रत्ययः, अहन्यभिधेये । समाने ऽहनि, सद्यः । पूर्वपूर्वतरयोः परभावो निपात्यते उदारी च प्रत्ययौ संवत्सरे ऽभिधेये । पूर्वस्मिन्संवत्सरे, परुत् । पूर्वतरे संवत्सरे, परारि । इदम इश्भावः समसण् प्रत्ययो निपात्यते संवत्सरे ऽभिधेये । अस्मिन्संवत्सरे, ऐषमः । परस्मादेद्यवि: प्रत्ययो ऽहनि । परस्मिन्नहनि, परेद्यवि । इदमो ऽश्भावो द्यश्च प्रत्ययो ऽहनि । अस्मिन्नहनि, अद्य । पूर्वान्यान्यतरेतरापराधरोभयोत्तरेभ्य एद्युस् प्रत्ययो निपात्यते ऽहन्यभिधेये । पूर्वस्मिन्नहनि, पूर्वेद्युः । अन्यस्मिन्नहनि, अन्येद्युः । अन्यतरस्मिन्नहनि, अन्यतरेद्युः । इतरस्मिन्नहनि, इतरेद्युः । अपरस्मिन्नहनि, अपरेद्युः । अधरस्मिन्नहनि, अधरेद्युः । उभयोरह्नोः, उभयेद्युः । उत्तरस्मिन्नहनि, उत्तरेद्युः ॥ द्युश्चोभयाद्वक्तव्यः ॥ * ॥ उभयद्युः ॥

प्रकारवचने थाल् ॥ २३ ॥

किंसर्वनामबहुभ्यो ऽद्व्यादिभ्य इति वर्त्तते । सप्तम्याः कालइति निवृत्तम् । सामान्यस्य विशेषो भेदकः प्रकारः । प्रकृत्यर्थविशेषणं चैतत् । प्रकारवृत्तिभ्यः किंसर्वनामबहुभ्यः स्वार्थे थाल् प्रत्ययो भवति । तेन प्रकारेण, तथा । यथा । सर्वथा । जातीयरोऽपीदृशमेव लक्षणं, स तु स्वभावात्प्रकारवति वर्त्तते । थाल्पुनः प्रकारमात्रे ॥

इदमस्थमुः ॥ २४ ॥

इदंशब्दात्प्रकारवचने थमुः प्रत्ययो भवति । थालोपवादः । अनेन प्रकारेण, इत्थम् । उकारो मकारपरित्राणार्थः ॥

किमश्च ॥ २५ ॥

किंशब्दात् प्रकारवचने थमुः प्रत्ययो भवति * । केन प्रकारेण, कथम् ॥

था हेतौ चच्छन्दसि ॥ २६ ॥

किंशब्दाद्धेतौ वर्त्तमानात्था प्रत्ययो भवति, चकारात्प्रकारवचने । छन्दसि विषये । हेतौ तावत् । कथा ग्रामं न पृच्छसि । केन हेतुना न पृच्छसीत्यर्थः । प्रकारवचने । कथा देवा आसन्पुरा विदः । विभक्तिसंज्ञायाः पूर्णोऽवधिः ॥

दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः ॥ २७ ॥

दिशां शब्दाः, दिक्शब्दाः । तेभ्यो दिक्शब्देभ्यो दिग्देशकालेषु वर्त्तमानेभ्यः सप्तमीपञ्चमीप्रथमान्तेभ्यो ऽस्तातिः प्रत्ययो भवति स्वार्थे ॥ यथासंख्यमत्र नेष्यते ॥ पुरस्ताद्वसति । पुरस्तादागतः । पुरस्ताद्रमणीयम् । अधस्ताद्वसति । अधस्तादागतः । अधस्ताद्रमणीयम् । दिक्शब्देभ्य इति किम् । ऐन्द्र्यां दिशि वसति । सप्तमीपञ्चमीप्रथमाभ्य इति किम् । पूर्वं ग्रामं गतः । दिग्देशकालेष्विति किम् । पूर्वस्मिन्गुरौ वसति । इकारस्तकारपरित्राणार्थः ॥

दक्षिणोत्तराभ्यामतसुच् ॥ २८ ॥

दक्षिणोत्तराभ्यां दिग्देशकालेषु वर्त्तमानाभ्यां सप्तमीपञ्चमीप्रथमान्ताभ्यां स्वार्थे ऽतसुच् प्रत्ययो भवति । अस्तातेरपवादः । दक्षिणाशब्दः काले न संभवतीति दिग्देशवृत्तिः परिगृह्यते । दक्षिणतो वसति । दक्षिणत आगतः । दक्षिणतो

* थालो ऽपवादः । योगविभाग उत्तरार्थः । इत्यधिकं पुस्तकान्तरे ।

रमणीयम् । उत्तरतो वसति । उत्तरत आगतः । उत्तरतो रमणीयम् । चकारो विशेषणार्थः षष्ठ्यतसर्थप्रत्ययेनेति ॥

विभाषा परावराभ्याम् ॥ २९ ॥

परावरशब्दाभ्यां विभाषा ऽतसुच्प्रत्ययो भवति अस्तातेरर्थे । परतो वसति । परत आगतः । परतो रमणीयम् । परस्ताद्वसति । परस्तादागतः । परस्ताद्रमणीयम् । अवरतो वसति । अवरत आगतः । अवरतो रमणीयम् । अवरस्ताद्वसति । अवरस्तादागतः । अवरस्ताद्रमणीयम् ॥

अञ्चेर्लुक् ॥ ३० ॥

अञ्चत्यन्तेभ्यो दिक्शब्देभ्य उत्तरस्यास्तातिप्रत्ययस्य लुग् भवति । प्राच्यां दिशि वसति । लुक्तद्धितलुकीति स्त्रीप्रत्ययोऽपि निवर्त्तते । प्राग्वसति । प्रागागतः । प्राग्रमणीयम् * ॥

उपर्युपरिष्टात् ॥ ३१ ॥

उपरि उपरिष्टात् इत्येतौ शब्दौ निपात्येते अस्तातेरर्थे । ऊर्ध्वस्योपभावः रिल्रिष्टातिलौ च प्रत्ययौ निपात्येते । ऊर्ध्वायां दिशि वसति, उपरि वसति । उपर्यागतः । उपरि रमणीयम् । उपरिष्टाद्वसति । उपरिष्टादागतः । उपरिष्टाद्रमणीयम् ॥

पश्चात् ॥ ३२ ॥

पश्चादित्ययं शब्दो निपात्यते ऽस्तातेरर्थे । अपरस्य पश्चभाव आतिश्च प्रत्ययः । अपरस्यां दिशि वसति । पश्चाद्दिशि वसति । पश्चादागतः । पश्चाद्रमणीयम् ॥ दिक्पूर्वपदस्यापरस्य पश्चभावो वक्तव्यः, आतिश्च प्रत्ययः ॥ * ॥ दक्षिणपश्चात् । उत्तरपश्चात् ॥ अर्द्धोत्तरपदस्य दिक्पूर्वपदस्य पश्चभावो वक्तव्यः ॥ * ॥ दक्षिणपश्चार्द्धः । उत्तरपश्चार्द्धः ॥ विनापि पूर्वपदेन पश्चभावो वक्तव्यः ॥ * ॥ पश्चार्द्धः ॥

पश्च पश्चा चच्छन्दसि ॥ ३३ ॥

पश्चपश्चाशब्दौ निपात्येते छन्दसि विषये, अस्तातेरर्थे । चकारात्पश्चादित्यपि भवति । अपरस्य पश्चभावो ऽकाराकारौ च प्रत्ययौ निपात्येते । परो व्याघ्रो जायते, पश्च सिंहः । पश्चा सिंहः । पश्चात्सिंहः ॥

उत्तराधरदक्षिणादातिः ॥ ३४ ॥

उत्तराधरदक्षिणशब्देभ्य आतिः प्रत्ययो भवति अस्तातेरर्थे । उत्तरस्यां दिशि वसति, उत्तराद्वसति । उत्तरादागतः । उत्तराद्रमणीयम् । अधराद्वसति । अधरादागतः । अधराद्रमणीयम् । दक्षिणाद्वसति । दक्षिणादागतः । दक्षिणाद्रमणीयम् ॥

* प्रत्यग्वसति । प्रत्यगागतः । प्रत्यग्रमणीयम् । इत्यधिकमन्यत्र ।

एनबन्यतरस्यामदूरे ऽपञ्चम्याः ॥ ३५ ॥

उत्तराधरदक्षिणशब्देभ्य एनप् प्रत्ययो भवत्यन्यतरस्यामस्तातेरर्थे । अदूरे चेदवधिमानवधेर्भवति । विभक्तित्रये प्रकृते ऽपञ्चम्या इति पञ्चमी पर्युदस्यते । तेनायं सप्तमीप्रथमान्ताद्विज्ञायते प्रत्ययः । उत्तरेण वसति । उत्तराद्वसति । उत्तरतो वसति । उत्तरेण रमणीयम् । उत्तराद्रमणीयम् । उत्तरतो रमणीयम् । अधरेण वसति । अधराद्वसति । अधस्ताद्वसति । अधरेण रमणीयम् । अधराद्रमणीयम् । अधस्ताद्रमणीयम् । दक्षिणेन वसति । दक्षिणाद्वसति । दक्षिणतो वसति । दक्षिणेन रमणीयम् । दक्षिणाद्रमणीयम् । दक्षिणतो रमणीयम् । अदूरइति किम् । उत्तराद्वसति । अपञ्चम्या इति किम् । उत्तरादागतः । अपञ्चम्या इति प्रागसेः । असिप्रत्ययस्तु पञ्चम्यन्तादपि भवति । के चिदिहोत्तरादिग्रहणं नानुवर्त्तयन्ति । दिक्शब्दमात्रात्प्रत्ययं मन्यन्ते । पूर्वेण ग्रामम् । अपरेण ग्रामम् ॥

दक्षिणादाच् ॥ ३६ ॥

अदूरइति न स्वर्यते । अपञ्चम्या इति वर्त्तते । दक्षिणशब्दादाच् प्रत्ययो भवति अस्तातेरर्थे । दक्षिणा वसति । दक्षिणा रमणीयम् । अपञ्चम्या इत्येव । दक्षिणत आगतः । चकारो विशेषणार्थः, अञ्चूत्तरपदाजाहियुक्तइति ॥

आहि च दूरे ॥ ३७ ॥

दक्षिणशब्दादाहिः प्रत्ययो भवति अस्तातेरर्थे, चकारादाच् । दूरे चेदवधिमानवधेर्भवति । दक्षिणाहि वसति । दक्षिणा वसति । दक्षिणाहि रमणीयम् । दक्षिणा रमणीयम् । दूरइति किम् । दक्षिणतो वसति । अपञ्चम्या इत्येव । दक्षिणत आगतः ॥

उत्तराच्च ॥ ३८ ॥

उत्तरशब्दादाजाही प्रत्ययौ भवतः, अस्ताते रर्थे, दूरे चेदवधिमानवधेर्भवति । उत्तरा वसति । उत्तराहि वसति । उत्तरा रमणीयम् । उत्तराहि रमणीयम् । दूरइत्येव । उत्तरेण प्रयाति । अपञ्चम्या इत्येव । उत्तरादागतः ॥

पूर्वाधरावराणामसि पुरधवश्चैषाम् ॥ ३९ ॥

अपञ्चम्या इति निवृत्तम् । तिसृणां विभक्तीनामिह ग्रहणम् । पूर्वाधरावराणामसिः प्रत्ययो भवति अस्ताते रर्थे । तत्सन्नियोगेन चैषां यथासंख्यं पुर अध् अव इत्येते आदेशा भवन्ति । असीत्यविभक्तिको निर्देशः । पुरो वसति । पुर आगतः । पुरो रमणीयम् । अधो वसति । अध आगतः । अधो रमणीयम् । अवो वसति । अव आगतः । अवो रमणीयम् ॥

अस्ताति च ॥ ४० ॥

सप्तम्यन्तमेतत् । अस्तातिप्रत्यये परतः पूर्वादीनां यथासंख्यं पुरादय आदेशा भवन्ति । इदमेवादेशविधानं ज्ञापकमस्तातिरेभ्यो भवति, असिप्रत्ययेन न बाध्यतइति । पुरस्ताद्वसति । पुरस्तादागतः । पुरस्ताद्रमणीयम् । अधस्ताद्वसति । अधस्तादागतः । अधस्ताद्रमणीयम् ॥

विभाषा ऽवरस्य ॥ ४१ ॥

पूर्वेण नित्ये प्राप्ते विकल्प उच्यते । अवरस्यास्तातौ परतो विभाषा अव् इत्ययमादेशो भवति । अवस्ताद्वसति । अवस्तादागतः । अवस्ताद्रमणीयम् । अवरस्ताद्वसति । अवरस्तादागतः । अवरस्ताद्रमणीयम् ॥

संख्याया विधार्थे धा ॥ ४२ ॥

संख्यावाचिभ्यः प्रातिपदिकेभ्यो विधार्थे वर्त्तमानेभ्यो धा प्रत्ययो भवति स्वार्थे । विधाप्रकारः सर्वक्रियाविषय एव गृह्यते । क्रियाप्रकारे वर्त्तमानायाः संख्याया धा प्रत्ययः । एकधा भुङ्क्ते । द्विधा गच्छति । त्रिधा । चतुर्द्धा । पञ्चधा ॥

अधिकरणविचाले च ॥ ४३ ॥

संख्याया इत्येव । अधिकरणं द्रव्यं, तस्य विचालः संख्यान्तरापादनम् । एकस्यानेकीकरणमनेकस्य वा एकीकरणम् । अधिकरणविचाले गम्यमाने संख्यायाः स्वार्थे धा प्रत्ययो भवति । एकं राशिं पञ्चधा कुरु । अष्टधा कुरु । अनेकमेकधा कुरु ॥

एकाद्धो ध्यमुञन्यतरस्याम् ॥ ४४ ॥

एकशब्दात्परस्य धाप्रत्ययस्य ध्यमुञादेशो भवत्यन्यतरस्याम् । एकधा राशिं कुरु । ऐकध्यं कुरु । एकधा भुङ्क्ते । ऐकध्यं भुङ्क्ते । धाप्रकरणादेव लब्धे पुनर्द्धाग्रहणं विधार्थे विहितस्यापि यथा स्यात् । अनन्तरस्यैवैतत्प्राप्नोति ॥

द्वित्र्योश्च धमुञ् ॥ ४५ ॥

धा इत्यनुवर्तते । द्वित्र्योः संबन्धिनो धाप्रत्ययस्य विधार्थे ऽधिकरणविचाले च विहितस्य धमुञादेशो भवत्यन्यतरस्याम् । चकारो विकल्पानुकर्षणार्थः । द्विधा । द्वैधम् । त्रिधा । त्रैधम् ॥ धमुञन्तात्स्वार्थे डदर्शनम् ॥ * ॥ पथि द्वैधानि संश्रयन्ते । पथि त्रैधानि संश्रयन्ते ॥

एधाच्च ॥ ४६ ॥

द्वित्र्योः संबन्धिनो धाप्रत्ययस्य एधाजादेशो भवत्यन्यतरस्याम् । चकारो विकल्पानुकर्षणार्थः । द्वेधा । द्वैधम् । द्विधा । त्रेधा । त्रैधम् । त्रिधा* ॥

* योगविभागो यथासंख्यनिरासार्थः । इत्यधिकं पुस्तकान्तरे ।

याप्ये पाशप् ॥ ४७ ॥

याप्यः कुत्सित उच्यते । याप्ये वर्त्तमानात्प्रातिपदिकात्स्वार्थे पाशप् प्रत्ययो भवति । याप्यो वैयाकरणः । कुत्सितो वैयाकरणो, वैयाकरणपाशः । याज्ञिकपाशः । यो व्याकरणशास्त्रे प्रवीणो दुःशीलस्तत्र कस्मान्न भवति । यस्य गुणस्य सद्भावाद् द्रव्ये शब्दनिवेशस्तत्कुत्सायां प्रत्ययः ॥

पूरणाद्भागे तीयादन् ॥ ४८ ॥

पूरणप्रत्ययो यस्तीयस्तदन्तात्प्रातिपदिकाद्भागे वर्त्तमानात्स्वार्थे ऽन् प्रत्ययो भवति । स्वरार्थं वचनम् । द्वितीयो भागः । द्वितीयः । तृतीयः । भागइति किम् । द्वितीयम् । तृतीयम् । पूरणग्रहणमुत्तरार्थम् । नह्यपूरणस्तीयो ऽस्ति । मुखतीयादिरनर्थकः ॥

प्रागेकादशभ्यो ऽच्छन्दसि ॥ ४९ ॥

पूरणाद्भागइत्येव । प्रागेकादशभ्यः संख्यावाचिभ्यः पूरणप्रत्ययान्तेभ्यो भागे वर्त्तमानेभ्यः स्वार्थे ऽन् प्रत्ययो भवति अच्छन्दसि विषये । स्वरार्थं वचनम् । पञ्चमः । सप्तमः । नवमः । दशमः । प्रागेकादशभ्य इति किम् । एकादशः । द्वादशः । अच्छन्दसीति किम् । पञ्चममिन्द्रियस्यापाक्रामत् ॥

षष्ठाष्टमाभ्यां ञ च ॥ ५० ॥

भागइत्येव । अच्छन्दसीति च । षष्ठाष्टमाभ्यां भागे ऽभिधेये ऽच्छन्दसि विषये ञः प्रत्ययो भवति । चकारादंश्च । षष्ठो भागः । षाष्ठः । आष्टमः । अष्टमः ॥

मानपश्वङ्गयोः कन्लुकौ च ॥ ५१ ॥

भागइत्येव । षष्ठाष्टमाभ्यां यथासंख्यं कन्लुकौ च भवतो मानपश्वङ्गयोर्भागयोरभिधेययोः । षष्ठको भागो मानं चेत्तद्भवति । अष्टमो भागः पश्वङ्गं चेत्तद्भवति । कस्य लुक् । ञस्य लुक्, अनो वा । चकाराद्यथाप्राप्तं च । षाष्ठः । षष्ठः । आष्टमः । अष्टमः । मानपश्वङ्गयोरिति किम् । षाष्ठः । षष्ठः । आष्टमः । अष्टमः ॥

एकादाकिनिच्चासहाये ॥ ५२ ॥

एकशब्दादसहायवाचिनः स्वार्थे आकिनिच् प्रत्ययो भवति । चकारात्कन्लुकौ च । आकिनिचः कनो वा लुग्विज्ञायते । स च विधानसामर्थ्यात्पक्षे भवति । एकाकी । एककः । एकः । असहायग्रहणं संख्यानिरासार्थम् । तदुपादाने हि द्विबह्वोर्न स्यात् । एकाकिनौ । एकाकिनः ॥

भूतपूर्वे चरट् ॥ ५३ ॥

पूर्वं भूतइति विग्रहः सुप्सुपेति समासः । भूतपूर्वशब्दोति-

Digitized by Google

क्रान्तकालवचनः । प्रकृतिविशेषणं चैतत् । भूतपूर्वत्वविशिष्टेर्थे वर्त्तमानात्प्रातिपदिकात्स्वार्थे चरट् प्रत्ययो भवति । आढ्यो भूतपूर्वः, आढ्यचरः । सुकुमारचरः । टकारो ङीबर्थः । आढ्यचरी ॥

षष्ठ्या रूप्य च ॥ ५४ ॥

षष्ठ्यन्तात्प्रातिपदिकाद्रूप्यः प्रत्ययो भवति चकाराच्चरट् च । षष्ठ्यन्तात्प्रत्ययविधानात् संप्रति भूतपूर्वग्रहणं प्रत्ययार्थस्य विशेषणं, न तु प्रकृत्यर्थविशेषणम् । देवदत्तस्य भूतपूर्वा गौः, देवदत्तरूप्यः । देवदत्तचरः ॥

अतिशायने तमबिष्ठनौ ॥ ५५ ॥

अतिशयनमतिशायनं, प्रकर्षः । निपातनाद्दीर्घः । प्रकृत्यर्थविशेषणं चैतत् । अतिशायनविशिष्टेर्थे वर्त्तमानात्प्रातिपदिकात्स्वार्थे तमबिष्ठनौ प्रत्ययौ भवतः । प्रकृत्यर्थविशेषणं च स्वार्थिकानां द्योत्यं भवति । सर्वइमे आढ्याः, अयमेषामतिशयेनाढ्य,आढ्यतमः । दर्शनीयतमः । सुकुमारतमः । अयमेषामतिशयेन पटुः, पटिष्ठः । लघिष्ठः । गरिष्ठः । यदा च प्रकर्षवतां पुनः प्रकर्षो विवक्ष्यते तदातिशायिकान्तादपरः प्रत्ययो भवत्येव । देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे । युधिष्ठिरः श्रेष्ठतमः कुरूणामिति ॥

तिङश्च ॥ ५६ ॥

तिङन्ताच्चातिशायने द्योत्ये तमप् प्रत्ययो भवति । ङ्याप्प्रातिपदिकादित्यधिकारात्तिङो न प्राप्नोतीति इदं वचनम् । सर्वइमे पचन्तीति अयमेषामतिशयेन पचति, पचतितमाम् । जल्पतितमाम् । इष्ठन्नोदाह्रियते । गुणवचने नियमितत्वात् ॥

द्विवचनविभज्योपपदे तरबीयसुनौ ॥ ५७ ॥

द्वयोरर्थयोर्वचनं द्विवचनम् । विभक्तव्यो विभज्यः । निपातनाद्यत् । द्व्यर्थे विभज्ये चोपपदे प्रातिपदिकात्तिङन्ताच्चातिशायने तरबीयसुनौ प्रत्ययौ भवतः । तमबिष्ठनोरपवादौ ॥ यथासंख्यमत्र नेष्यते ॥ द्वाविमावाढ्यौ, अयमनयोरतिशयेनाढ्यतरः । सुकुमारतरः । पचतितराम् । जल्पतितराम् । ईयसुन्खल्वपि । द्वाविमौ पटू । अयमनयोरतिशयेन पटुः, पटीयान् । लघीयान् । विभज्ये चोपपदे । माथुराः पाटलिपुत्रकेभ्य आढ्यतराः । दर्शनीयतराः । पटीयांसः । लघीयांसः ॥

अजादी गुणवचनादेव ॥ ५८ ॥

इष्ठन्नीयसुनावजादी सामान्येन विहितौ तयोरयं विषयनियमः क्रियते । गुणवचनादेव भवतस्तौ नान्यस्मादिति । पटीयान् । लघीयान् । पटिष्ठः । लघिष्ठः । इह न भवतः । पाचकतरः । पाचकतम इति । एवकार इष्टतोऽवधारणार्थः । प्रत्ययनियमोऽयं न प्रकृतिनियम इति । पटुतरः पटुतमः ॥

तुश्छन्दसि ॥ ५९ ॥

तुरिति तृन्तृचोः सामान्येन ग्रहणम् । तन्ताच्छन्दसि विषये अजादी प्रत्ययौ भवतः । पूर्वेण गुणवचनादेव नियमे कृते छन्दसि प्रकृत्यन्तराण्यभ्यनुज्ञायन्ते तन्तादप्यजादी भवत इति । आसुतिं करिष्ठः । दोहीयसी धेनुः । भस्याढे तद्धित इति पुंवद्भावे प्रकृते तुरिष्ठेमेयस्स्विति तृचो निवृत्तिः ॥

॥ अथानन्दवृन्दावनचम्पूकाव्यस्य ॥

॥ दशमस्तबकावशेषः ॥

तया वन्दिनाथ सा निजकुलश्रीयशोदा स्नेहश्रद्धाबद्धा बहुतरतरलमना मनाग्विहस्य ॥ ७६ ॥

तया राधया । निजकुलस्य श्रियं यशश्च ददातीति सा । स्नेहः स्वनिष्ठः श्रद्धा तन्निष्ठा ताभ्यां बद्धा, अत एव बहुतरम्·उल्लासाधिक्येन तरलं मनो यस्याः सा प्राह ॥ ७६ ॥

वत्से यद्यपि रमणीमणीचारिमणि चारिमणिकल्पेयं पाककला तथापि कुसुमकोमलामलाङ्ग्यास्तवायमतिभारो भारोपायेव नितरामभूत् ॥ ७७ ॥

रमणीमणीनां चारिमणि चारुत्वे प्राशस्त्ये निमित्ते चारिणी संचरणशीला चासौ मणिकल्पा मण्डनरत्नतुल्या चेति सा, इयं पाककला पचनशिल्पम्, उत्तमाङ्गनानां पाककौशलमेव रत्नालंकार इत्यर्थः, तथापि कुसुमादपि कोमलम्·अमलम्·अङ्गं यस्यास्तस्यास्तवायम्·अतिभारः, एतदीयः श्रमः सोढुमशक्य इत्यर्थः । तथापि भा शोभा तस्या आरोपाय·उत्पादनाय ॥ ७७ ॥

तदवलोकयामि किं किं पाचितमस्तीति तया निगदिता दिताखिलपरिश्रमा त्रपाचितं पाचितं सकलमेव सा दर्शयामास ॥ ७८ ॥

किं पाचितमिति तन्मात्रा प्रयोजककर्त्र्या, त्वया तु प्रयोज्यकर्त्र्या·इत्यर्थः । त्रपया लज्जया·आचितं संगृहीतम् । यद्वा त्रपाणामाचितं समूहो यत्र तद्यथा भवत्येवम्·इति क्रियाविशेषणम्, "आचितः संगृहीतेऽपि वृन्देऽपि स्यात् त्रिलिङ्गकः" । इति मेदिनी ॥ ७८ ॥

दृष्ट्वा च व्रजेश्वरी सौहृद्यसौरभ्यसौलभ्यलभ्यमानपाकपरिपाकषाड्गुण्या गुण्यामोदकारिणी सा तरसा तरलितहृदया दयावती पचन्तीमेव तामालिङ्ग्य वत्से साधु ते धुतेषणाषणा सुपरिपाकपाककलेति नितरामभिननन्द ॥ ७९ ॥

सौहृद्यसौरभ्ययोः सौलभ्येन सुलभत्वेन लभ्यमानमनुभूयमानं पाकस्य परिपाके चातुर्यं चतुरता यया सा । गुणिनं गुणवन्तमामोदमानन्दं कर्तुं शीलमस्याः सा । साधु यथा स्यात् तथा धुनः खण्डित ईत्यायोरक्ष्योरनुत्सवो यया सा । शोभनः परिपाको यस्यां सा पाककला ॥ ७९ ॥

श्यामाललितादिभिर्वन्दितानन्दिताननेन्दुरथ ता अपि परिरभ्य सौरभ्यसौकुमार्यवतीस्ता एवाह ॥ ८० ॥

आनन्दित-आननेन्दुर्यस्याः सा । सौरभ्येति, सौरभ्यसौकुमार्ये आलिङ्गनेनैवानुभवन्ती सतीत्यर्थः ॥ ८० ॥

अयि श्यामे अयि ललिते अयि विशाखे साधु वः परस्परपरमसौहृदानुबन्धो बन्धोर्मानसहारी मानसहारीतिरियमुत्तमानामिति ताः सर्वा अभिनन्द्य समीपस्थां राधादिभिः सकलाभिः सकलाभिरभिवन्दितां रोहिणीमभाषत ॥ ८१ ॥

मानसहा मानं संमानं सहत इति मानसहा । सकलाभिः कलासहिताभिः ॥ ८१ ॥

अयि बलभद्रजननि भद्रजननिवहपूज्येयमासां परस्परप्रीतिः । अपिच, इयं राधा मेदुरा मेऽदुरासदा मनसः ॥ ८२ ॥

मेदुरा स्निग्धा । मे मम मनसो न दुरासदा, मनसि स्वयं स्फुरतीत्यर्थः, शेषे षष्ठी ॥ ८२ ॥

तदियं संभाव्यते ।

नन्दनलतेव भूमौ चन्दनलतिकेव रूपमलयस्य ।
वृषभानोरिव सुकृतं खनिरनिरूप्येव गुणमणीन्द्राणाम् ॥ ८३ ॥

नन्दनलतेति, मनसोऽभिलाषपूर्त्या । रूपमलयसंबन्धिनी चन्दनलतिकेवेति, नयनघ्राणत्वचामपि । वृषभानोः सुकृतमिति, स्वकुलयशःकैरवचन्द्रिकात्वेन । गुणमणीन्द्राणां खनिरिति, त्रिजगद्विरलप्रतियोगिकत्वेन ॥ ८३ ॥

सा प्रत्युवाच । श्रीकृष्णमातः मातः परमस्याः संभावनीयमस्ति ।

किंच,

नन्दनो व्रजपतेर्गुणसिन्धुर्नन्दिनी च सुमुखी वृषभानोः ।
तोषहेतुरपि घोषपुरश्रीकण्ठभूषणमिदं मणियुग्मम् ॥ ८४ ॥

सा-अस्ति नास्ति । व्रजपतेर्नन्दनः कृष्णः । सुमुखी राधा । तोषहेतुर्बन्धूनां, द्रष्टृश्रोतृमात्राणां वा । श्रीः शोभा, संपत्तिर्वा ॥ ८४ ॥

तत्रपे तत्र पेशलाङ्गी राधा ॥ ८५ ॥

तत्रपे निजश्लाघायां लज्जते स्म ॥ ८५ ॥

श्यामादयश्च राधामुखमवलोक्य मनाग्विहस्य मनसा मनसाहुः । अयि देवि तवेदं वचनमस्माकमभीष्टबोधन्यासि, धन्यासि भो धन्यासि, दृष्टिर्हि निःसंदेहं देहमाप्याप्याययति निदाघोष्णम् ॥ ८६ ॥

राधामुखमालोक्येति श्लोकार्थभङ्ग्या लब्धमस्मच्चर्वणया किमप्यभीष्टार्थसूचकं वस्तु किमियं मनसा-आस्वादयति न वेत्येतत्परीक्षार्थम् । ततश्च मनाग्विहस्येति तन्मुखस्य तदा सलज्जत्वेऽप्यन्तःकौतुकत्वं दुर्लक्ष्यमपि सहसैवालक्ष्यधिया तदास्वादमेवानुभवन्ती तामनुमाय तत एव स्वेषामपि जातस्योल्लासस्य ज्ञापनाय । मनसा मनसेति वीप्सा, प्रतिस्वमित्यर्थः । देवि श्रीरोहिणि तव वचनं श्लोकरूपं, कीदृशम्, अस्माकमभीष्टं बोधमनुभवं न्यस्यति समर्पयतीति तत् । आप्या जलमयी । यद्वा प्राप्तुं योग्या । निःसंदेहमित्याप्याययतीति क्रियाविशेषणं, यमकानुरोधात् व्यवहितान्वयः सोढव्यः । देहं कीदृशं, निदाघेनोष्णं तप्तम् ॥ ८६ ॥

यदिदं "घोषपुरश्रीकण्ठभूषणमिदं मणियुग्म"मित्येकाधिकरणकरणप्रतिपादकं वचोऽविप्रकृष्टं प्रकृष्टमर्थं बोधयति, "घोषपुरश्रीकण्ठमौलिमणिमण्डनयुग्म" मित्यनुक्तेरतिसुललितमेतत् ॥ ८७ ॥

एकस्मिन्नेवाधिकरणे करणं व्यापारसामान्यं प्रतिपादयति ज्ञापयतीति तत्, एकस्मिन्नेवाधिकरणे कण्ठे मणियुग्मस्य गुणबद्धतया स्थितिदीप्तिमेलनादिव्यापारदर्शनात् तदुपमेययो राधाकृष्णयोरप्येकत्रैव प्रेमगुणबद्धयोर्मेलनविलासादिमङ्गलरूपमविप्रकृष्टमर्थं बोधयति । भवन्मुखनिःसृते वचसि भवत्या च-अपरामृष्टोऽयमर्थोऽस्मानाश्वासयितुं दैवोदीरित इवाविर्भूत इति भावः । नच श्लोकपूर्तेरन्यथा-अशक्यत्वादुक्तमिदमिति वाच्यमित्याह घोषेति ॥ ८७ ॥

अथ कृष्णजननी जननीराजितचरणा वृषभानुगृहिणीं भानुगृहिणीं संज्ञामिव मूर्तिमतीं स्वकुलश्रीकीर्तिदां श्रीकीर्तिदां समाहूयालिङ्ग्य चाह ॥ ८८ ॥

मूर्तिमतीं संज्ञां चेतनामिव, "संज्ञा स्याच्चेतना नामहस्ताद्यैश्चार्थसूचने"त्यमरः ॥ ८८ ॥

अयि कथमियन्तीमियन्तमतिखेदं प्रापिता । यः खलु प्रौढगृहिणीजनोचितो नोचितो हि वनमालिकायाः कायापकर्षः कृशानुतापेन कृशानुतापेन नासि ॥ ८९ ॥

* संधिर्यमकानुरोधाय ।

इयं राधा, तं प्रसिद्धम्, इयन्तमेतावन्तं खेदं प्रापिता, यः खेदः, कृशानुतापेन वह्निज्वालया, अतस्त्वम्·अनुतापेन कृशा नासि, न भवसीति सम्प्रदायेर्ष्यः प्रश्नः ॥ ८९ ॥

साह, साहसिक्यमेवैतन्मे व्रजेश्वरि, सत्यमेव व्याहरसि, रसिकेयं पाककर्मणि स्वभावत एव, विशेषतोऽशेषतोषप्रदोऽयमद्यतनो महो, महोदारः सदारः ससुनो यत्र भोक्ता घोषाधीशो धीशोभावनीयं, स्वयमेव सादरादरानन्देन प्रवर्तितास्ते पाककर्मणि ॥ ९० ॥

सा वृषभानुगृहिणी·आह । महो महोत्सवः । अदरानन्देन, अनल्पहर्षेण ॥ ९० ॥

किंच ।

यथा तथेयं पचतु स्वभावः
कश्चिद्गुणोऽस्याः करपल्लवेऽस्ति ।
सौहृप्यसौरस्यसुपारिमल्य-
वत्ता यतः पाकमुपैति पाके ॥ ९१ ॥

तदेकहेतुताधिक्यप्रतिपत्त्यर्थं हेतुहेतुमतोरभेदेनोपचारः, स्वभावादेवोत्पन्नो गुण इत्यर्थः । यद्वा । स्वशोभारक्षकः, यतो येन करपल्लवेन पाके पाककर्मणि सौहृप्यादिमत्ता पाकं परिणाममुत्कर्षमुपैति । सुपारिमल्यमि "त्युत्तरपदस्य" चेत्युत्तरपदवृद्धिः ॥ ९१ ॥

तेनास्या जनकेन केनचित् कौतुकेन निर्बन्धः कृतः किंतु प्रणयरसवत्यन्तरे रसवत्यन्तरेण भूयते तत्र भूयानेव पाको जातः को जातः पुरुषोऽथ नारी वा नात्मानमद्य कृतार्थं न मन्यते ॥ ९२ ॥

प्रणयरसवति प्रेमरसयुक्ते व्रजेश्वरि, अन्तरे बहिः प्रकोष्ठे, रसवत्यन्तरेण· अपरया रसवत्या भूयते ।

"अन्तरमवकाशावधिपरिधानान्तर्धिभेदतादर्थ्ये ।
छिद्रात्मीयविनाबहिरवसरमध्येऽन्तरात्मनि च" ॥

इत्यमरः ॥ ९२ ॥

किंतु तत्र भवत्या भवत्या स्वयमभिभाविकया भूयतां, यथा यथोल्लासमञ्जसा समञ्जसानि सकलानि सौष्ठवानि भवन्तीति तद्वचनोपरमे परमेश्वरी व्रजस्य सस्मितं समूचे ॥ ९३ ॥

अभिभाविकया सर्वाधिष्ठात्र्या, परमेश्वरी यशोदा ॥ ९३ ॥

अयि यथावत् सादरं वत्सादरं यत् पपाच तत् सकलं सकलं रोहिणी परिवेषयतु·इत्यर्धोक्ते सा पुनराह ॥ ९४ ॥

यथावद् यथायुक्तं सादरं यथा स्यात् तथा वत्सा राधिका यत् पपाच तत् सकलं समस्तं सकलं सशिल्पं यथा स्याददरं निःशङ्कं च यथा तथा रोहिणी परिवेषयतु, राधायास्तु·अनभ्यस्ततच्छिल्पत्वादत एव तत्र जनिष्यमाणसंकोचत्वाच्च संप्रति तत्रातीवोपयुज्यत इति भावः । अर्धोक्त इति, अन्यत् सर्वं श्यामाद्या इति शेषः स्थितः ॥ ९४ ॥

घोषेश्वरि पुण्डरीककुवलयसुकुमाराभ्यां कुमाराभ्यां रामकृष्णाभ्यां सह घोषराजाय जायया च तस्य सह शुभवत्या भवत्या सकलगुणरोहिण्ये रोहिण्ये च वत्सैवेयं परिवेषयतु ॥ ९५ ॥

तस्य जायया भवत्या सह रोहिण्यै·इत्यन्वयः । रोहिण्या गौरवमत्र वयोवृद्ध्या भोजने योजितम् ॥ ९५ ॥

श्रीकृष्णसहचरनिकरेभ्यः करेऽभ्यस्तलाघवास्तलाघवा श्यामा ललिता वा ललितावाल्यसख्या परिवेषयित्री ॥ ९६ ॥

करे पाणौ परिवेषणं प्रति·अभ्यस्तं लाघवं यया सा ।

ननु कृष्णसहचरा अपि कृष्णवदेवादरणीया भवन्तीति तत्राह, अस्तं लुप्तमेव लाघवं न्यूनत्वं यस्याः सा । श्यामा ललिता वापि राधासमैवेत्यर्थः । अतस्तया कृतेऽपि परिवेषणे न तेषामनादरः स्यादिति भावः । साम्ये हेतुः, ललितम्·आबाल्यं बाल्यमभिव्याप्यैव सख्यं यस्याः सा ॥ ९६ ॥

एतदाकर्ण्य तदा कर्णमप्यवहित्थयाग्र यापयन्ती मन्दमधुरस्मितस्नपिताधरकिशलयवलयसमुद्गीर्णं किमपि वचस्तदात्मजात्मजाड्यमभिनयन्ती नय*न्तीव्रमिव सौहृदास्य हृद्यस्यन्ती नीचैर्मातरं निजगाद ॥ ९७ ॥

कर्णं कर्णाभ्यां हितमप्येतदाकर्ण्य । अवहित्थया·आकारगोपनेन । अथ·अनन्तरन्, यापयन्ती, एतदात्मनि न प्रवेशयन्ती, न मानयन्तीति यावत्, अधरकिशलये सलयं यथा स्यात् तथा समुद्गीर्णम्, अधरपल्लवसंश्लेषसहितमेव निःसृतं न तु बहिरतिप्रव्यक्तमित्यर्थः, "लयो विनाशे संश्लेषे" इति मेदिनी । तदात्मजा तस्याः पुत्री राधा । आत्मनो जाड्यमभिनयन्ती । सौहृदस्य सख्यस्य तीव्रं नयं नीतिं हृदि सख्या हृदये·अस्यन्ती निःक्षिपन्ती ॥ ९७ ॥

अहमिह निखिलसौभगवतीभ्यां भगवतीभ्यां व्रजेश्वरीभ्यामाभ्यामाभ्यामात्मना परिवेषयिष्ये ॥ ९८ ॥

आभ्यामात्मना, आ·ईषत्·अभ्याम·आतुरत्वं संकोचे यस्य तेनात्मना । आभ्याम्·अन्तर्गृहमध्य एव· परिवेषयिष्ये । "आ-

* परस्वर्णः प्राग्वत् ।

तुरोऽर्घ्यमितोऽर्घ्यान्त" इत्यमरः । अन्येभ्यो बहिरुपविष्टेभ्यः परिवेषणे तु महानेव संकोचो मे भविष्यतीति भावः ॥९८॥

श्यामेव नवर बहिरवहिता हितायात्मनः परिवेषयिष्यतीति ॥ ९९ ॥

एवमात्मनो मृदुत्वमेवाभिव्यज्य श्यामायाः प्रावर्यं व्यञ्जयन्ती पुनः स्वं मध्यास्य एव पर्यवमापयति श्यामेवेति । नवर इति केवलार्थकमव्ययम् । बहिः, अलिन्दमध्यासीनेभ्य इत्यर्थः । अवहिता सावधाना । हितायात्मन इति, अन्यथा प्राखर्यख्यातिवैयर्थ्यापत्त्या सखीभिरेषा सा हसिष्यत एवेति नर्म व्यञ्जितम् ॥ ९९ ॥

परस्परसमानमानसभावभावबोधविबुधा श्यामाह ।
मा हरिणनयने नयनेयमेतत् ॥ १०० ॥

परस्परमात्मनोः समानस्तुल्य एव मानसो भावस्तस्य भा शोभा तस्या अवबोधे तत्सिद्ध्यर्थकवक्तृचातुर्यज्ञाने विबुधा पण्डिता । नये नीतौ नेयम् उपादेयम् ॥ १०० ॥

सेव परिवेषणे भवतु यत्ता यत्तातेन निमन्त्रिता अमी अमीवहरा हरादय इव ॥ १०१ ॥

यत्ता यत्नवती. यस्याः तातेन अमी निमन्त्रिताः, अमीवहराः पापनाशिनः, इत्युपमानस्य विशेषणम्, हरादयो महेशादय इवेत्यनेन यत्तातेनेति प्राप्तवृषभानुपदस्य परंपरितरूपकालंकारेण तेजस्विसूर्यार्थकत्वे भानुनेव वृषभानुना महेशादय इव नन्दादयोऽमी निमन्त्रिता इत्यर्थो व्यञ्जितः ॥१०१॥

अथ तमाश्रुत्य अन्योन्यतिरस्कृटं कुतुककलहं कलहंसिकयोरिव तयोर्जातकौतुका तु कामपि प्रीतिमागता वात्सल्यसंपद्व्रजेश्वरी व्रजेश्वरी जगाद ॥ १०२ ॥

तयो राधाश्यामयोः ॥ १०२ ॥

अयि शुभवत्यो भवत्यो मा भैष्टामिष्टामिमां नीतिं वां ब्रवीमि, उभे एव युगपदिष्टयोपदिष्टयोत्तमया दिशा मयादिशा शिक्षिते परिवेषयितुमर्हतम् ॥ १०३ ॥

मया उपदिष्टया इष्टया दिशा शिक्षिते सत्यौ युवाम् । मया कीदृश्या, आदिशतीति आदिक् तया ॥ १०३ ॥

इति बहिर्भूय भूयसि मणिप्रघणे प्रघणे अक्रमेण पातिताः सर्वतोभद्राः सर्वतो भद्राः पीठपङ्क्त्यो विशदसमज्ञयाज्ञया क्रमेण तया पुनः पातयांबभूविरे ॥ १०४ ॥

मणिप्रघणे रत्ननिबिडे, प्रघणे अलिन्दे । सर्वतोभद्राः सर्वतो भद्रमुपवेशनसुखं यासु ताः, सर्वतो भद्रा गम्भीरा दारुमय्यः । तया व्रजेश्वर्या । कीदृश्या, विशदा निर्मला समज्ञा कीर्तिर्यस्यास्तया । आज्ञया निदेशेन ॥ १०४ ॥

एवमास्तीर्णासितसूक्ष्मवसनेष्वासनेष्वाहितक्रममुपविष्टस्य घोषेन्द्रस्य सान्द्रस्य साधुना स्नेहेन दक्षिणे स्फटिकेन्द्राभिरामो रामो वामतो वामतोन्मीलन्नीलमणीन्द्ररुचिरुचिरः कृष्णस्तस्य च सव्ये पीनावटुर्वटुः कुसुमासवः सबहुमानमुपवेशितो द्विजत्वेन ॥ १०५ ॥

साधुना समर्यादेन स्नेहेन सान्द्रस्य निबिडस्य वामतो वामपार्श्वे वामतया शोभनया उन्मीलत उद्भासनात्रीलमणीन्द्रादपि रुच्या कान्त्या रुचिरः सुन्दरः । पीना पुष्टा अवटुर्घाटा यस्य सः ॥ १०५ ॥

तद्वामतो मतोतमक्रमबन्धाः सुबलादयः प्रियसहचरा इति क्रमेण ॥ १०६ ॥

सुबलादयश्च इति, इति क्रमेण उपवेशिता इति विभक्तिविपरिणामेनानुषङ्गः ॥ १०६ ॥

कृतासनपरिग्रहेऽग्रहेताविव घोषसंपदां पदाम्बुजधावनपूर्वकमपूर्वकमनीयादरे व्रजपुरपुरंदरे दरेहितहितस्मिते कुतूहलिनि हलिनि च तदनुजे दनुजेन्द्रदमने च शुकसहचरे द्विजबालके बालकेलिनर्मसखे च प्रणयवसुबलादौ सुबलादौ सखिगणे च ॥ १०७ ॥

ततश्च पदाम्बुजधावनपूर्वकं व्रजपुरपुरंदरे कृतासनपरिग्रहे सति । कीदृशे, घोषसंपदाम् अग्रहेतौ मुख्यकारणभूते । स्वपरिकरशोभामालोक्य दर ईषद् ईहितं चेष्टितं व्यापारो यत्र तच्च तद् हितं सर्वजनोल्लासकं च स्मितं यस्य तस्मिन् । प्रणय एव वसु धनं तदेव बलादि बलमायुर्यशश्च यस्य तस्मिन् ॥ १०७ ॥

व्रजराजभार्यया भार्यया समाहूयमाना माहूयमानपदाग्रकमलेव वार्षभानवी नवीनभक्तिश्रद्धाबद्धा बहुमानपुरःसरं पुरः सरञ्जनीयवात्सल्याय व्रजराजाय जायमानमुदे परिवेषयांचकार श्यामा तु रामाय ॥ १०८ ॥

मा शोभा तया आर्यया श्रेष्ठया । यद्वा । कान्तिस्वामिन्या, "स्यादर्यः स्वामिवैश्ययो"रित्यमरः । मा शोभा तया हूयमानं पूजार्थमिव दीयमानं पदाग्रे कमलं यस्याः सा, जुहोतेर्दानमात्रार्थकत्वस्यापि धातुपाठे दृष्टत्वात् । पुरः प्रथमं, सरञ्जनीयवात्सल्याय स्वविषयकरञ्जनीयवात्सल्यसहिताय, अत एव जायमाना मुत् प्रीतिर्यस्य तस्मै ॥ १०८ ॥

तदनु तदनुजदनुजदमनपरिवेषणसमये वार्षभानवि न विना भवतीं श्यामा परिवेषयितुमर्हति तव नेदीयांसं श्रीकृष्णं त्वमेव परिवेषयेति व्रजेश्वर्यैव गदिता

Digitized by Google

दितायहग्रहपरिभवा चिरानुरागपरभागपराभूतेन मनसा दरकरकम्पकं परमसभेन प्रसभेन प्रसंवृणवती परिवेषयांचकार ॥ १०६ ॥

तदनुजः कृष्णः । नेदीयांसम्-अतिनिकटवर्तिनम् । व्रजेश्वर्यैव निगदितेति लज्जारीत्यनुसृत्या स्वातन्त्र्यरूपो दोषो निरस्तः । आग्रह एव ग्रहो दुष्परिहरत्वात् तेन यः परिभवो लज्जादिध्वंसकचापल्याभिव्यक्तः स दितः खण्डितो यस्याः । परभाग उत्कृष्टो भागः परिणतोऽंश इत्यर्थः, दरेण साध्वसेन करकम्पश्च-ईषत्करकम्पम्-अल्पार्थे कः । प्रसभेन हठेन । कीदृशेन, परमश्चासौ सभः सदोप्तिश्च तेन । बलदेवद्वितीयतः समुपविष्टेभ्यः श्रीदामसुभद्रमण्डलीभद्रादिभ्यस्तु श्यामा क्रमेण परिवेषयांचकारेति ज्ञेयम् ॥ १०९ ॥

पुनर्व्रजेश्वर्यैवोक्ते उभे यत्र कुसुमासवादिसकलसहचरेभ्यो यदि परिवेषयांचक्रतुः, तदा कुसुमासवः सबहुमानमात्मानं श्लाघयामास, अहो वयमपि भूसुरवृषभा वृषभानुतनयाकरनुन्नेनान्नेनानेन परिपूताः स्मः ॥ ११० ॥

भूसुरवृषभा विप्रश्रेष्ठा अपि ॥ ११० ॥

यदियं परमा रमा देवीव साक्षात्, एतत्सादृश्यं क्वापि क्व ॥ १११ ॥

ननु विप्राणामपि भवतां गोपकन्यापक्वेनाचेन कुतः पावित्र्यं तत्राह यदियमिति । एतस्याः सादृश्यं, का नारी क्व देशे काले वा, अपि प्राप ॥ १११ ॥

पक्वमनयाश्नते भोजनान्तरं न रोचिष्यते रोचिष्यते वयस्येति क्रमगत्यासादितवार्षभानवीनवीनपरिवेषणे प्रहसनमाधुरीधुरीणे वटावटाट्यमानतरङ्गे जल्पति सावहित्थं कृतकृतककोपः श्रीकृष्ण उवाच ॥ ११२ ॥

अभिनयेन साक्षादेवानुभावयन्नाह, अनया पक्वमश्नते भुञ्जानाय ते तुभ्यं भोजनान्तरं "कृत्यल्युटो बहुल"मिति कर्मणि ल्युटा भोज्यान्तरमित्यर्थः । भो-इति संबोधने, जनान्तरं गोपीजनान्तरं न रोचिष्यते, किंतु राधैवेति तु कृष्णाकर्षको रहस्योऽर्थः । ततश्च तया पक्वस्य तदन्नस्य कार्मणत्वमपि व्यञ्जितम् । हे रोचिष्य । रोचिषि स्वस्य प्रकाशे वर्तमान तत्र भवार्थे दिगादित्वाद्यत् । त्वयाप्येतन्मयेव प्रकाश्य-उच्यतामिति भावः । अत्र रोचिष्येत्यामन्त्रितपदस्य-"आमन्त्रितं पूर्वमविद्यमानव"दित्यसद्भावेऽपि रोचिष्यत-इति क्रियापदादुत्तरत्वं युष्मदः परिकल्प्य ते-आदेशः, सर्वदा रक्ष देव न इतिवत् ॥ ११२ ॥

वाचाल वाचालमनया प्रहसनमात्रमात्रया मा विस्वन ॥ ११३ ॥

प्रहसनमात्रमेव मात्रा वित्तं यस्यास्तया वाचा । "मात्रा कर्णविभूषायां वित्ते मानेऽवधारणे" इति मेदिनी । मा विस्वन मा जल्पेति । दन्त्यसकारोऽयं "वेश्च स्वनो भोजने"-इति भोजनार्थकस्यैव षत्वविधेः ॥ ११३ ॥

स आह । किं भोक्तव्यं मूकवदनेन वदनेन सहस्रेणैव वदनानां वद नानाञ्जनीयमिदं भोक्तुं व्याख्यातुं च किं शक्यते ॥ ११४ ॥

वदनानां मुखानां सहस्रेणैव यद्वदनं कथनं तेनापि न-आञ्जनीयं, न-ईषत् पूजयितुं शक्यमित्यर्थः ॥ ११४ ॥

शुकोऽप्याशुकोप्याचञ्चुदवटुवटु कृष्णयोर्मध्यवर्ती कृष्णादत्तं कृतामोदनमोदनमश्नन् किंचिद्दुवत्तुरिव यद्गुद्गीव आसीत् तदा व्रजेश्वर्याह द्विजोत्तम कथय किं कथनीयमिति ।

वटुराह ।

अद्य द्विजोत्तमोऽस्मि ।

साह ।

शुकं पृच्छामि ॥ ११५ ॥

शुकोऽपि किंचिद्दुवत्तुरिव-उद्गीव आसीत् । कीदृशः, आशुकोपिनी शीघ्रकोपव्यञ्जिका-आचञ्चन्ती-ईषच्चञ्चला-अवटुघाटा यस्य सः । "अवटुर्घाटा कृकाटिके"त्यमरः ॥ ११५ ॥

शुक आह ।

अयि द्विजकुमार मा रचय वचश्चातुरीं, त्वमसि मत्तोऽपि मत्तोऽपिहितवदनो वद नो अपरं, व्रजराजकुमारस्य मारस्यचेष्टितेन भूयताम् ॥ ११६ ॥

अपिहितवदनोऽनर्गलमुखः, नो वद मा वद, त्वया-मारस्यचेष्टितेन मा भूयताम् ॥ ११६ ॥

किंच ।

रमातोऽपि परमा किमु तयोपमीयते तन्निराबाधोऽपराधोऽपराहतस्तव चाभूदित्याकलय्य व्रजराज ऊचे ॥ ११७ ॥

रमा लक्ष्मीः- अतोऽपि राधातोऽपि परमा श्रेष्ठा, देवतात्वादिति भावः, अत इयं राधा तया सह किमु कस्मादुपमीयते, तत् तस्मात् तव- अपराधोऽभूत्, निराबाधो दुर्वारः, यतोऽपराहतः- न पराभूतः, अयमर्थो व्रजेश्वरीप्रभृतिभिरवगत-

स्तन्महिमसिद्धान्तानावेशात्, किंतु रमातो लक्ष्मीतोऽपि इयं राधा परमेति सिद्धान्तोपयोगिवस्त्वर्थः । तत्र चेति चकारात् पूर्वस्यां व्याख्यायाम् उपमेयत्वेनोपयोजिताया राधाया अपि, उत्तरस्यां तु श्रोतुर्ममापीति ॥ ११७ ॥

क्रत्योऽयं महाविघ्नः पत्नी व्रजेश्वरीपूर्ववृत्तं कथयति ॥ ११८ ॥

क्रत्यः किंदेशभवः ॥ ११८ ॥

स पुनराह ।

तत् कथमनेनात्मदेव्याः समुत्कर्षेण मुत्कर्षेण भूयते ॥ ११९ ॥

सम्यगुत्कर्षेण हेतुना, मुत्कर्षेण आनन्दापगमवता ॥ ११९ ॥

साह ।

देवतया तया सहोपमानेन मानेन समुत्कर्षे इत्यपराधाशङ्कया राधाशङ्कयापि मम तया मतया चिन्तयन्निदमुक्तवान् ॥ १२० ॥

अनेन उपमानेन मा समुत्कर्षः, न आधिक्यं भवति, अयोग्यत्वात् । राधाशङ्कयेति, अरे मामकेनापि त्वया तदानीं किमिति प्रत्युत्तरं न दत्तमित्यायत्यां राधाकर्तृकोपालम्भशङ्कया ॥ १२० ॥

अथ भवनान्तरेणान्तरेणालापं परिवेषयिन्त्योस्तयोर्व्यावहासी ह्यासीद्यदि ॥ १२१ ॥

भवनान्तरेण भवनमध्येन, अन्तरेणालापम् आलापं विनैव, तयो राधाश्यामयोः, व्यावहासी परस्परहास्यं, ह स्पष्टम्, अत्र भवनान्तरेणेत्यस्य अधिकरणत्वेऽपि यमकानुरोधात् करणत्वविवक्षया तृतीया, व्यावहासीक्रियां प्रति गुरुजनव्यवधानदायिनो भवनान्तरस्य साधकतमत्वात् ॥ १२१ ॥

तदा मुख्या हसन्मुख्याह । सन्मुखि श्यामे द्विजडिम्भयोर्वाचालतालतापाशेनेव बद्धास्मि त्वमेव परिवेषयेत्यावृत्तिपरिवेषणाय यदि मुख्याभिमुख्याभिहताशासीत् तदा व्रजेश्वरी भवनान्तरं प्रविश्य स्वयमेव सुमुखीमभिमुखीचकार ॥ १२२ ॥

सन्मुखि हे सुन्दरमुखि, द्विजडिम्भयोः कुसुमासवशुकयोः, मुख्या राधा, आभिमुख्ये अभिहता नष्टा आशा यस्याः सा ॥ १२२ ॥

ततस्तथा पूर्वक्रमाक्रमानुसारेण परिवेषयन्त्यौ ते अवलोक्य व्रजेश्वर्याह मनसा ॥ १२३ ॥

पूर्वक्रमस्य अक्रमानुसारेण, पूर्वपरिपाट्या भिन्नक्रममनुसृत्येत्यर्थः ॥ १२३ ॥

द्विजशिशोरनिस्तवेन जातापत्रपेयं व्युत्क्रमेण परिवेषयति, समुचितेयमामुष्यपुत्रिका, मामुष्य पुत्रिका त्वमसि, पुत्रि सत्यमाह वटुः, रत्नाकरपुत्रिकेवासि, इति सस्नेहमभिनन्दन्ती प्रकाशमाह, वत्से यथाक्रममेव परिवेषयतु शुभवती भवतीति तदाज्ञया सा तथैव विदधे ॥ १२४ ॥

राधाया इयं समुचिता आमुष्यपुत्रिका, अमुष्यपुत्रीत्वं, वृषभानुपुत्रीत्वमिति यावत् । सदभिज्ञाताया एव स्वश्लाघायां लज्जा भवति न तु सर्वस्या एवेति भावः । अमुष्यपुत्र्या भाव आमुष्यपुत्रिका, मनोज्ञादिः, "आमुष्यायणामुष्यपुत्रिके"त्यादिना षष्ठ्या अलुक् । तद्गुणानां लोकोत्तरतामनुभूयाह हे पुत्रि राधे अमुष्य वृषभानोः पुत्रिका त्वं मासि न भवसि, किंतु रत्नाकरस्य पुत्रिका लक्ष्मीः सैवासि ॥ १२४ ॥

एवं सरसहासपरिहासपरितोषेण तत्पाकपरिपाकपरिनिष्ठितसौष्ठवानुमोदेन मोदेन भुञ्जानस्य व्रजराजस्य ते तेमनादिषु षडेव रसा वरसारतामासेदुः, तथा रामादेः सकलसहचरगणस्यापि ॥ १२५ ॥

तस्या राधायाः पाकस्य पचनक्रियायाः परिपाके परिनिष्ठितं यत् सौष्ठवं तस्यानुमोदनेन । ते अनिर्वचनीयाः । तेमनादिषु व्यञ्जनादिषु । वरसारतां प्रशंसनीयसारभागत्वम् ॥ १२५ ॥

श्रीकृष्णस्य तु ।

समश्नतस्तस्य तयैव पाचितं
तयैव देव्या परिवेषितं च तत् ।
परस्परान्तर्गतभावगन्धिना
रसान्तरेणातिरसत्वमाययौ ॥ १२६ ॥

भावः शृङ्गारः, रसान्तरेण गाढानुरागेण ॥ १२६ ॥

एवमेषामशनोपरमे परमेण प्रमोदेन वराम्बराङ्गदकङ्कणादिभूषणमणिमालामालालेपनपननताम्बूलादिभिरर्चितानां स्वयमेववृषभानुनानुनीतानां भवति विश्रामे ॥ १२७ ॥

माला स्रक्, माला श्रेणी, लेपनं चन्दनादिप्रलेपः, पननं स्तुतिः ॥ १२७ ॥

भवनमध्यमध्यवतिष्ठमाने गरिष्ठमाने महिमगाम्भीर्यवत्यौ श्रीकृष्णरामजनन्यौ वार्षभानव्या नव्यामोदया दयावत्यौ परिवेष्यमाणमिष्यमाणमिष्टं मिष्टं भुञ्जाने तरसा रसास्वादमुग्धे अन्योन्यमभाषताम् ॥ १२८ ॥

इष्टमीप्सितं, मिष्टमिष्यमाणं तदानीमप्यभिलष्यमाणं, वाचा प्रार्थ्यमानमिति वा ॥ १२८ ॥

Digitized by Google

साध्वसो साध्वसोदास्येन वाचो युक्तिपटुर्वटुराह, भोजनानन्तरं न रोचिष्यते रोचिष्य ते वयस्येति ॥ १२८ ॥

साध्वसे भये यदौदास्यं तेन, निःशङ्कतयेत्यर्थः ॥ १२९ ॥

ततो व्रजेश्वर्याह, तदयि दयितेहिते वार्षभानवि न विना भवत्पक्वमन्यपक्वमतः परं परं नामोदिष्यते मोदिष्यते च ममात्मजः ॥ १३० ॥

दयितं प्रियमीहितं चेष्टितं यस्या हे तथाभूते। दयिते वल्लभे श्रीकृष्ण एव ईहितम् ईहा अभिलाषो वा यस्या इति तु सरस्वतीप्रयुक्तोऽर्थः। परं रोचकत्वेनोत्कृष्टं न आमोदिष्यते, अरोचकमेव मंस्यते इत्यर्थः। ततश्च न मोदिष्यते न मुदं प्राप्स्यति ॥ १३० ॥

तदितः प्रागुरवो गुरवो हि तेन हितेन वचसा मयानुरोधयितव्या रोधयितव्या च तेषामननुमतिः, यथा लाभवती भवती कृष्णार्थमेव मे वस्त्येऽवस्त्येयसौहृदा हृदा सरसेन पक्त्री भवित्री ॥ १३१ ॥

तत् तस्मात्, इतः अतः परं, प्राक् प्रथममेव, ते तव, उरवो मुख्याः, गुरवः श्वशुरादयः, हि निश्चितं, हितेन वचसा सामोपायेन, अनुरोधयितव्या वशीकर्तव्याः, ततश्च अननुमतिरनाज्ञा, यथा लाभवतीति, प्रतिदिनं तुभ्यं वस्त्रालङ्कारादिप्रदानेन, दानोपायश्च तेषु कार्य्य इति कृष्णार्थमेव न त्वस्मदाद्यर्थमिति परिश्रमाभावश्च तन्मातरं प्रति सूचितः, मे मम वस्त्ये गृहे, अवस्त्येयं पुञ्जीभवितुमर्हं सौहृदं यस्याः सा ॥ १३१ ॥

तदाकर्ण्य तज्जनन्याह, व्रजाधीश्वरि धीश्वरि मद्विधानां, तवेयं भारती भारतो एवास्याश्चरीकरीति, रीतिविदोऽत्र तुष्यन्त्येव, तेनाहरहरतिरंहसा तत् संपादयिष्यति, भवन्निशान्ते निशान्ते सत्येव यास्यति ॥ २३२ ॥

हे मद्विधानामपि धियां बुद्धीनामीश्वरि तव इयं भारती वाणी कर्त्री अस्या राधाया भा शोभा च रतिः प्रीतिश्च ते द्वे एव चरीकरीति अतिशयेन कुरुते, अहरहः प्रत्यहम्, अतिरंहसा अतिवेगेन, तत् पचनकर्म, भवन्निशान्ते भवत्या गृहे, निशाया अन्ते सत्येव प्रातरेव ॥ १३२ ॥

भवत्प्रसादतो व्रजलोको लोकोत्तरतया जरीजृम्भ्यते[1], न कालचक्रतोऽपि त्वङ्गति, त्वङ्गतिरस्माकमिति ॥ १३३ ॥

न त्वङ्गति न कम्पते, "त्वगि कम्पने" इत्यस्य रूपम् ॥ १३३ ॥

तदवधि तदवधिषणागतागताभ्यां निरस्तसाध्वसा साध्वसावासत्तिमती बभूव ॥ १३४ ॥

तदवधि तदानीमारभ्य, तदवधिषणा तस्या मातुस्तेषां श्वश्रादिगुरुजनानां वा अवधिषणा संमतिस्तया गतागताभ्यां व्रजेश्वरीगृहगमनागमनाभ्यां, साधु यथा स्यात् तथा, असौ राधा, आसत्तिमती, कान्तसमीपप्राप्त्या तद्दर्शनादिलाभवतीत्यर्थः ॥ १३४ ॥

एवं प्रकारान्तरेण हृत्कारान्तरेण हृच्चौरवन्निबध्यमानगोकुलचन्द्रा चन्द्रावल्यादिगोकुलकुललनावलिर्वलितदृढासत्तिसत्तिमितहृदया ॥ १३५ ॥

स्वपाणिकृतपाकाद्यास्वादिने प्रेयसेऽन्वहं स्वाधरामृतमाधुर्यदित्साप्यस्या व्यवर्धत। अथोपरिष्टाद्वर्णयिष्यमाणाच्छ्रीराधानवसंगमात् पूर्वमेव तन्माधुर्यस्य सर्वातिशयितानुभावनार्थं श्रीकृष्णस्य चन्द्रावल्यादिसङ्गोऽभूदित्याह एवमित्यादिना। चन्द्रावल्यादिगोकुलकुललनावलिः कुसुमाहरणच्छलतोऽच्छलतोद्यानमासाद्य समन्ततस्तेन समं रज्यन्ती मनोरथं सफलयति स्मेत्यन्वयः। कीदृशी, हृदेव कारा बन्धनागारं तस्या अन्तरेण मध्येन, हृच्चौरवत् चित्तरत्नतस्कर इव नितरां बध्यमानो गोकुलचन्द्रो यया सा। वलितया प्रबलया दृढया निश्चलया आसत्त्या कान्तस्य सांनिध्येन, सत् शोभनं यथा स्यात् तथा तिमितम् आर्द्रीभूतं हृदयं यस्याः सा ॥ १३५ ॥

हृदयाधिनाथस्य तस्याङ्गसङ्गरसभाजनतासभाजनतारतम्येन तरतमायमाना कुसुमाहरणच्छलतोऽच्छलतोद्यानमासाद्य मासाद्यमानमानवपुषोऽवपुषो विशिखशिखराविद्धमानसा कोरकदशामपहाय हायनमध्य एव कुड्मलदशामापन्नमतिसंस्तवमनुरागकुसुममभिसौरभरभसं बिभ्राणा अभ्राणामभिनवानां कान्तिकान्तेन कान्तेन तेन समं समन्ततो रज्यन्त्यपि ॥ १३६ ॥

पुनः कीदृशी, अभि सर्वतः सौरभस्य आमोदस्य रभसो वेगो यत्र तत् अनुरागकुसुमं कोरकदशाम् अपहाय त्यक्त्वा हायनमध्ये वर्षमध्य एव कुड्मलदशामापन्नं बिभ्राणा। कोरककुड्मलयोर्निर्विकाशविकाशोन्मुखत्वाभ्यां भेदः। कोरकदशामपि कीदृशीं, तस्य कृष्णस्य अङ्गसङ्ग एव रसस्तस्य भाजनतायां पात्रत्वे सभाजनमुत्कर्षस्तस्य तारतम्येन तरतमायमानां, कृष्णाङ्गयोग्यत्वे कस्याश्चिदुत्कृष्टतरां कस्याश्चिदुत्कृष्टतमां प्रेमतारतम्यादित्यर्थः। अच्छा निर्मला लता यत्र तच्च-

१—जृभि धातोरिदित्त्वात् नुमः प्रयोगो जरीजृम्भ्यमाणेत्याद्यवपि सर्वत्र बोध्यम्।

* त्वं मतिरिति मुद्रणार्हे त्वङ्गतिरिति परवर्णो लिपितोऽपि यमकसौष्ठवप्रतिपत्त्यर्थः।

Digitized by Google

उद्यानं च तत् । या यौवनसंपत्तिस्तया साद्गमानं प्राप्यमाणं मानवं मनुष्यमात्रं पुष्णातीति तस्य,अवपुषोऽनङ्गस्य । घनाभाणां मेघाभां कान्तितोऽपि कान्तेन कमनीयेन तेन कान्तेन प्रसिद्धप्रेयसा समं सह रज्यन्त्यपि अनुरागं कुर्वत्यपि ॥ १३६ ॥

तस्मिन्नेव निखिलजनसुहृदि हृदि जागरूके निखिलव्रजजनप्रेमास्पदेऽपदेशराहित्येनैव प्रेम दधानैर्गुरुभिरप्यात्मसाधारण्येन निरुपहितहितरागभरागतनिष्कषायभावैरकृतदोषसंभावना वनाभिसरणेनापि नापिधीयमानचापला मनोरथं सफलयति स्म ॥ १३७ ॥

गुरुभिः श्वश्र्वादिभिरपि न कृता दोषस्य संभावना यस्यां सा । अन्यजनैस्तु नैव कृतेत्यत्र किं चित्रमिति भावः । तत्र हेतुः । तस्मिन्नेव श्रीकृष्ण एव आत्मसाधारण्येन हेतुना निरुपहित उपाधिशून्यः, स्वभावेनैवोदित इति यावत्,हितः स्वानुकूलो यो रागभरः प्रेमातिशयस्तेनागतो निष्कषायो दोषानुसंधानशून्यो भावो येषां तैः । नह्यात्मनि दोषदृष्टिः कस्यापि भवतीति भावः । तच्च त्वमपि तादृशानामेव संभवति न सर्वेषामित्याह, अपदेशराहित्येन निश्छलत्वेन, निष्कैतवतयेति यावत् । न च व्रजवासिनां प्रेम्णि किंचिद्दौर्लभ्यमित्याह, निखिल इति । न च तत्र यत्नलेशापेक्षापीत्याह, हृद्येव जागरूक इति । ततश्च वनाभिसारेणापि न अपिधीयमानं गुरुजनवारणातिशयाभावेन न आच्छाद्यमानं चापलं यस्याः सा ॥ १३७ ॥

एवं तासां नित्यसिद्धानां लक्ष्मीतोऽपि श्रेयसीनां प्रेयसीनां प्रेमसांकोच्यसमूढामूढामतिं सैव योगमाया स्वमायास्वच्छन्दतया समयादिश ॥ १३८ ॥

ननु तर्हि लौकिकरीतिमेवानुसृतानां श्वश्र्वादिगुरुजनानां वनगतास्वपि स्वस्ववधूषु दोषानासञ्जने कीदृशभावनया समाधानं तत्राह,एवमित्यादि । सैव योगमाया ऊढामतिं परैर्व्यूढाः परकीया एव वयमिति भावनां रसपुष्ट्यर्थं तासां समयात्, इह गोकुले रचितवती, सैव तासां कृष्णेन सह संगमं गुरूणामविषयं च चकारेत्यन्वयः । ऊढामतिं कीदृशीं, प्रेमसांकोच्यसमूढां, प्रेम्णि संकोचः प्राकट्येन करणे साध्वसं, संकोचस्य कर्माणि सांकोच्यानि दुर्लभत्वादिभावनयोत्कण्ठावृद्ध्यादीनि तैः समूढां पुञ्जिताम् । एतदर्थमेव योगमायया तासां परकीयात्वकल्पनं नित्यप्रेयसीनामपि सर्वदातनमेव, तथा चोक्तम्,

‘‘यत्र निषेधविशेषः सुदुर्लभत्वं च यन्मृगाक्षीणाम् ।
तत्रैव नागराणां निर्भरमासज्जते हृदयम्’’इति ॥ १३८ ॥

सैव मानना गुरूणां मुहूर्णां पतिमन्यानामन्या नारीस्तत्तत्प्रतिच्छायारूपाश्छायारूपाकृतितुल्याश्च बिभ्रतामविषयं च चकार तासां कृष्णेन सह संगमम् ॥ १३६ ॥

माननया वयमासां श्वशुरा इव इत्यभिमानेन, गुरूणां वृद्धानां, गुरूणां श्वश्र्वादिगुरूणामान्यानां पतिमन्यानां, माननामात्रेणैव पतित्ववताम् । कीदृशानाम्, तत्तत्प्रतिच्छायारूपास्तासां तासां प्रतिबिम्बरूपा मायिकीरन्या नारीर्बिभ्रतां, स्वस्वगृह एव धारयतां पुष्णतां वा । छाया कान्तिः । चकारात् कदाचित् कृष्णे किंचिदसूयया रसपुष्ट्यर्थं न च बिभ्रतामपि ॥१३९॥

इति सामञ्जस्ये जाते सति व्रजेशयोरप्यजेशयोरप्यभिनन्दनीयचरितस्य तस्य विततनयस्य तनयस्य कुसुमशरशरण्यतायशोरेऽपि कैशोरेऽपि हितवत्सलतालताबन्धेन तदिव कमनीयतायाः पौग*ण्डमरत्वं पौगण्डमरत्वं चमुञ्चदिव जानतोर्न तोयजाक्षीभिस्ताभिः सह सहसा सङ्गोऽसङ्गोपनीयोऽपि संभावनाविषय एव बभूव ॥ १४० ॥

एवं तत्र तत्र योगमाययैव सर्वसमाधानमित्युक्त्वा श्रीनन्दयशोदयोः श्रीकृष्णपित्रोस्त्वन्यथैव समाधानं सुसिद्धमेवास्तीत्याह । व्रजेशयोर्ब्रह्मशिवयोः । कुसुमशरस्य कन्दर्पस्य शरण्यतारूपं यशो राति गृह्णातीति तथाभूतेऽपि कैशोरे । अपिहितेन अनाच्छन्नेन प्रकटेन वत्सलतालताबन्धेन हेतुना । तदिव प्रागारभ्य अनुभूयमानमिव कमनीयतायाः पौगं पूगसमूहः समूहार्थं अण्,पूगवृन्दमित्यर्थः, “पूगः स्यात् क्रमुके वृन्दे.” इति मेदिनी, तथा तत्कृतं डमरत्वं डाम्बर्यं तथा तयोर्द्वयोः कारणभूतं पौगण्डं वयश्च, एतच्चयम् अरत्वं शीघ्रत्वं मुञ्चत् त्यजदिव जानतोः । अस्मत्पुत्रस्य कृष्णस्य पौगण्डं वयस्तत्कृतकमनीयत्वादिकं च शीघ्रं नापगच्छति किंतु बहुदिनपर्यन्तं स्थास्यत्येवेति मनस्यनुभूय विचारयतोरित्यर्थः । एतदर्थमेव कृष्णस्य पौगण्डे वयस्येव कैशोराविर्भावः । पित्रोः पौगण्डमात्रग्रहणाय, प्रेयसीनां तु कैशोरमात्रग्रहणायेति । ततश्चाभिः सह तनयस्य तस्य सङ्गः सहसा अकस्मात् संगोपयितुमशक्योऽपि न संभावनाया विषय एव बभूवेत्यन्वयः ॥१४०॥

अपितु वस्तुमहिम्ना हि न्यायत एव तासु स्नुषासंबन्ध एव निःसंबन्ध एव निःसहः, किमहो महावैभवं स्वभावशक्तिरिति स्थितिः ॥ १४१ ॥

इत्यानन्दवृन्दावने कैशोरलीलालताविस्तारे निमन्त्रणस्वीकारकौतुको नाम दशमः स्तवकः ॥ १० ॥ :::: ।

---

* संधिः पूर्ववदत्रापि ।

† एवमिहापि ।

हि निश्चितं, व्रजेशयोस्तासु स्नुषासंबन्धो वधूबुद्धिर्वस्तुमहिम्नैव म्नायते, स्वयमेव अभ्यस्यमानो भवतीत्यर्थः । "म्ना अभ्यासे" कर्मकर्तरि रूपम् । निःसंबन्धः संबन्धशून्य एव निःसहो दुर्वारः । स्थितिर्मर्यादा, "स्थितिः स्त्रियामवस्थाने मर्यादायां च सीमनी"ति मेदिनी । ॥ १४१ ॥

श्वश्र्वादीनां वधूनां च तत्पतीनां व्रजेशयोः ।
मानना रसपुष्ट्यर्थं सदैवास्त्युक्तलक्षणा ॥

इत्यानन्दवृन्दावने टीकायां सुखवर्तन्यां दशमस्तवकसंगमनम् ॥ १० ॥ :: :: ॥

॥ विद्वद्वरलोकाभिधमहाशयविरचितमानवीयज्ञानविषयकशास्त्रावतारे ॥

तृतीयाध्यायस्य तृतीयः परिच्छेदः ॥

॥ जातिवाचकपदान्यधिकृत्य ॥

१ ॥ भूयांसः शब्दा जातिवाचकाः ॥ यद्यपि वर्तमानानां सर्वेषां वस्तूनां व्यक्तिरूपतया तद्वस्तुबोधनसमर्थानां पदानामपि व्यक्तितात्पर्येणैव प्रयोगः कर्तुमुचित इत्यपि कल्पना युक्तिमती संभाव्यते तथापि (लोके) सर्वथैतद्विरुद्धमेवोपलभ्यते । लोके न केवलमुपेक्षया दैववशेन वा, अपितु तर्केणान्यथानुपपत्त्या च सर्वभाषाघटकानामतितरां भूयसां पदानां जातितात्पर्येणैव प्रयोगात् ॥

२ ॥ सर्वासां तत्तद्व्यक्तीनां भिन्नभिन्ननामकरणासंभवात् ॥—प्रथमं तावत् प्रत्येकव्यक्तिबोधाय पृथक् पृथग् नाम्नामुपलब्धिरेव न संभाव्यते । पदानां यत्किंचिदर्थं प्रयोगं प्रति स्वलिङ्गतया प्रयुक्तानां शब्दानां विज्ञानैः सह प्रयोक्त्रवधारितसंबन्धस्य कारणतया ऋते वक्तात्मनि भिन्नभिन्नतत्तद्वस्तुविज्ञानानां सत्तया, अशेषविशेषरूपेण तत्तद्विज्ञानबोधनसमर्थानां तावतां पदानामवधारणाच्च, यत्किंचिद्वस्तुतात्पर्येण पदप्रयोगो न संभवति ॥ परं तु परिदृश्यमानसर्वव्यक्तिविज्ञानानां रचनावधारणे मनुष्यैः कर्तुमशक्ये । तथाहि मनुष्यपरिदृश्यमानानां सर्वासां पशुपक्षिवृक्षौषध्यादिव्यक्तीनां महत्यापि बुद्ध्याऽऽकलनं कर्तुं न शक्यते । यदि स्वदलीयान् सर्वान् सैनिकांस्तत्तन्नाम्नाऽऽह्वाने क्षमं सेनानीविशेषमतिलौकिकचमत्कृतस्मृतिशक्तिशालिनमुदाहरणायोपलभेमहि तर्हि प्राकृता मनुष्याः स्वीयाजसमुदायघटकतत्तद्व्यक्तीनां स्वमस्तकोपर्याकाश उड्डीयमानानां काकसमूहघटकतत्तद्व्यक्तीनां वा बोधाय पृथक् पृथग् नामामि कुतो न प्रयुञ्जत इत्यनायासेनैव जानीयाम ॥

३ ॥ अनुपयोगाच्च ॥—तत्तद्व्यक्तिबोधाय तावतां नाम्नां संभवेऽपि तेन न कोऽप्यर्थः सिद्ध्यति । तेषां भाषाया मुख्योद्देशसंपादकत्वेन स्वाभिप्रायाविष्कारसाधकानां तत्तद्व्यक्तिनाम्नां संग्रहस्यानुपयोगात् । मनुष्या हि नामान्यभ्यस्य परेषां बोधायैव परस्परसंभाषणे तानि प्रयुञ्जते । परकीयबोधश्च तदैव संभवति यदा स्वोदीरितः शब्दः स्वात्मगोचरविज्ञानं श्रोत्रात्मन्युपस्थापयति । न चैतत् तत्तद्व्यक्तिबोधकैः पदैः कर्तुं शक्यते । मदुदीरितशब्दस्य मदात्मगतैकविज्ञानव्यक्तिमात्रार्थकतया मदनुभूताः सर्वास्तत्तद्व्यक्तीरजानानस्य पुंसो मदुक्तशब्देनार्थबोधस्यासंभवात् ॥

४ ॥ व्यक्तिवाचकेनार्थबोधस्य संभवमभ्युपेत्यापि वदामो यत्तेषामेकैकव्यक्तिबोधकानां भिन्नभिन्ननाम्नां ज्ञानपरिष्कारसाधनत्वं न स्यात् । तत्तद्व्यक्त्याश्रितमपि तज्ज्ञानं तैः साधारणाभिप्रायैर्बेततं भवति, येषां साधारणपदप्रयोगद्वारा जातिरूपेण परिणतानि वस्तूनि वस्तुतोऽद्भुतानि सन्ति । तेषां तद्वाचकपदानां च यत्किंचित्समुदायरूपत्वेऽपि, प्रयोक्ता स्वात्मनि यावन्ति विज्ञानान्यवधारयितुं शक्यन्त उपयोक्ष्यन्ते वा प्रतिक्षणं तावद्वारमावृत्तेरभावेन मनुष्याः प्रायशस्तत्रैव विरमन्ते । (अयं भावः । तावद्वस्तुव्यक्तिबोधाय तावन्ति पदानि प्रयोक्तुं न यतन्त इति ।) परंतु व्यक्तिवाचकपदानां प्रयोगः सर्वथा न परित्यज्यते, येनापेक्षितस्थलेऽपि तन्मात्रबोधकनामभिस्तत्तद्व्यक्तीनां विवेचनमेवाशक्यं स्यात् । अतश्च यत्र स्वस्वजातीयेषु येषां प्रतिव्यक्ति नामप्रयोगस्यात्यन्तमावश्यकता तत्र कुर्वन्त्येव व्यक्तिवाचकपदप्रयोगांस्तत्र च तत्तद्व्यक्तीनां पृथक् पृथग् नामान्यपि भवन्ति ॥

५ ॥ केष्वर्थेषु व्यक्तिपदानि प्रयुज्यन्ते ॥—तथैव मनुष्यदेशनामातिरिक्तान्यपि नगरनदीपर्वतादिदेशभेदज्ञापकानि नामानि प्रायो व्यक्तिवाचकान्युपलभ्यन्ते । तत्तन्मात्रबोधावश्यकतया परेण सह संभाषणादावपि व्यक्तिवाचकपदैरेव तेषां नगरादीनां प्रत्यायनस्य प्रचुरं व्यवहृतत्वात् । तत्तन्मनुष्यव्यक्तिबोधावश्यकत्वमिव तत्तदश्वव्यक्तिबोधोऽप्यावश्यकोऽभविष्यत् तर्हि मनुष्येष्विवाश्वेष्वपि व्यक्तिवाचकान्येव पदानि लोकैः प्रायोक्ष्यन्त । यथा महेन्द्रस्य वाजी उच्चैःश्रवा इत्यभिधीयते अत एव केषु केषु चित्स्वमन्दुरीयाश्वविशेषेषु स्वानुरागविशेषादि द्योतनाय सादिभिस्ते तेऽश्वास्तत्तद्व्यक्तिनामभिरेवाहूयन्त इति भूयश उपलभ्यते ॥

६ ॥ जातिवाचकशब्दोत्पत्तिप्रकाराः ॥—अथेदं विचार्यते यद् (व्यक्तिविशेषे गृहीतशक्तिकाः) शब्दाः कथं जातिवाचकतां गच्छन्ति । सर्वेषां विद्यमानवस्तूनां केवलं व्यक्तिरूप-

Digitized by Google

तया जातिवाचकपदैः कथं बोध्यन्ते अथवा यदर्थं जातिशब्दाः प्रयुज्यन्ते ते साधारणधर्माः क्वोपलभ्यन्त एवमेवंविधार्थस्य जिज्ञासितत्वात्। साधारणलिङ्गतया प्रयोगाच्छब्दा अपि जातिशब्दापरपर्यायाः साधरणा भवन्ति। विज्ञानानि च देशकालादिपरिच्छेदकेभ्य,स्तत्तद्व्यक्तिपरत्वपर्यवसाननियामकसहकारिविज्ञानान्तरेभ्यश्च पृथक्करणेन साधारणानि भवन्ति। अनेनैव प्रकारेण तान्यनेकव्यक्त्युपस्थापनसमर्थानि क्रियन्ते। तत्र प्रत्येकव्यक्तेस्तादृशधर्मान्तरव्यवच्छिन्नसाधारणधर्मविशिष्टत्वात्।

७ ॥ परंतु शब्दार्थयोरनुसंधानं, केन क्रमेणोपक्रम्यतइति परीक्षणं, बाल्यावस्थातः कथमस्मद्विज्ञानानि वर्द्धन्त इति विचारश्च पूर्वोक्तविमर्शस्य किंचिदधिकस्पष्टतया निरूपणाय सहकारिणो भविष्यन्तीति प्रथमतस्तानि प्रदर्श्यन्ते। तथा हि। भाषमाणानां बालानां पुरुषविज्ञानानि तत्तत्पुरुषा इव तत्तद्व्यक्तिरूपाणि सन्तीति तु स्फुटमेव। धात्रीजनन्योर्विज्ञाने बालात्मसु चित्रपरिलेखाविव सुव्यक्ते ते एव स्वपरिचिते व्यक्ती प्रकाशयतः। तद्व्यक्तिद्वयबोधाय प्रयुक्ते पदे अपि तन्मात्रार्थपर्यवसिते, अत एव बालोच्चरितमातृधात्रीपदे (विशेषणान्तरासमभिव्याहृते अपि) स्वसंबन्धितद्व्यक्तिद्वयमेव निश्चाययतः। अथ कतिपयवर्षान्तरं बहुतरपदार्थानां परिचये सति त एव बाला आकारादिभिर्बहुविधैर्धर्मैः स्वस्वमातृपितृसधर्माणो बहवः पदार्था जगति सन्तीत्यवधारयन्ति, ततश्च यद्धर्मवत्तया यावन्त्यो व्यक्तयस्तैर्ज्ञायन्ते तत्तद्धर्मविशिष्टतावद्व्यक्तिविषयकं विज्ञानान्तरं विरच्योदाहरणविधया तासु स्वपरिचितव्यक्तिसाधारणं मनुष्यपदं प्रयुज्यते। इत्थं च यत्र ते बाला जातिपदानि साधारणविज्ञानानि चाधिगच्छन्ति, तत्र नवीनमर्थान्तरं न किमपि रचयन्ति, अपि तु स्वावधारितचैत्रमैत्रदेवदत्तादिमिश्रितविज्ञानानां तत्तद्व्यक्तिगतानसाधारणधर्मान् परित्यज्य केवलं तावत्सर्वव्यक्तिवर्तिनः साधारणधर्मानेवावधारयन्ति।

८ एवमग्रेपि प्रदर्शितसाधारणविज्ञानजातिपदाधिगमप्रकारेण बाला अनायासेनैवोत्तरोत्तरव्यापकजातिवचनानि पदानि व्यापकविज्ञानानि चाधिगच्छन्ति। यतो बहूनां वस्तूनां मनुष्यविज्ञानानात्मकतया मनुष्यपदाभिधेयत्वायोग्यत्वेऽपि मनुष्यवृत्तियत्किंचिद्गुणवत्त्वं निरीक्ष्य तावद्धर्ममात्रावधारणेन तेषामेकीकरणेन च पुनर्बालानां ततोप्यधिकव्यापकविज्ञानं जायते, तद्बोधाय ततोपि व्यापकजातिपदं कल्पयन्ति, तत्र नवीनं विज्ञानं ते न कस्य चिद्धर्मान्तरस्य योजनया रचयन्त्यपि तु केवलं पूर्वप्रदर्शितदिशा मनुष्यपदाभिधेयाकारविशेषादिकतिपयासाधारणधर्मपरित्यागपुरःसरं प्राणिपदवाच्यशरीरजीवेन्द्रियस्वैरगतिरूपसाधारणधर्मावधारणेन। *

९ ॥ जातिपदानि विज्ञानान्तरव्यवच्छिन्नविज्ञानरूपाण्येव ॥— मनुष्याणां साधारणविज्ञानं तद्वाचकजातिपदज्ञानं चानेनैव प्रकारेण जायत इत्यस्ति तथाऽत्यन्तं स्फुटं येन तत्र, मन्ये, स्वस्य परेषां वा विचार आत्मनि ज्ञानानामुपचयश्चेत्येतदुभयातिरिक्तस्य न कस्यापि प्रमाणान्तरस्यापेक्षा। यश्च मनुते साधारणविज्ञानानि प्रथमतो व्यक्तिविशेषेभ्यः परिगृहीतानि मिश्रविज्ञानघटकाऽवच्छेदकविज्ञानान्यतिरिक्तान्येव सन्तीति मन्ये स तेषामुपलम्भे हतप्रयत्न एव स्यात्। चैत्रमैत्रादिविज्ञानेभ्यो मनुष्यविज्ञानमुच्चैःश्रवआदिविज्ञानेभ्योऽश्वसामान्यविज्ञानं च ऋते तत्तद्व्यक्तिमात्रविश्रान्तयत्किंचिद्धर्मपरित्याग,तत्तद्व्यक्तिगतानेकव्यक्तिविश्रान्तसाधारणधर्मावधारणाभ्यां कस्मिन्नंशे भिद्यत इत्यस्य चिरं विचिन्त्यापि वक्तुमशक्यत्वात्। एवं मनुष्याश्वादिपदाभिधेयमिश्रितविज्ञानेभ्यो मनुष्याश्वादिजातीनां परस्परं भेदकानां धर्माणां परित्यागेन, मनुष्याश्वादिसाधारणधर्मपरिग्रहेण च नवीनं तेभ्यो भिन्नं विज्ञानान्तरं प्रकल्प्य तत्र 'जन्तुपदे प्रयुक्ते सति मनुष्याणामन्येषां च प्राणिनां बोधकं मनुष्यजातिमपेक्ष्याधिकव्यापकजातिर्बोधकं पदमुपलभ्यते। जीवपदाभिधेयविज्ञानानां धर्मेष्वश्वतत्स्वैरगतिरूपौ धर्मौ विहायाकारप्राणपुष्ट्याख्येष्वेव विचार्यमाणेषु प्राणिपदाभिधेयं ततोऽपि व्यापकं जात्यन्तरं सिद्ध्यति। किं चात्रैव नोपरम्यत इत्यपि स्फुटमेव। उक्तप्रकारेणैवोत्तरोत्तरव्यापकजातिपदानि मूर्तपिण्डं द्रव्यं पदार्थ इत्यादीनि जगति विद्यमानस्य निखिलविज्ञानजातस्य बोधकानि ब्रह्माण्डादिपदानि च व्यवह्रियन्ते। तदयं निर्गलितोऽर्थः। याथार्थ्येन विचारितानां विद्वद्भिर्भूय उद्बुध्यमानाना परापरजातीनां तत्त्व धर्मान्तरव्यवच्छिन्नं न्यूना-

* अनेन च ग्रन्थेन श्रीमद्बुर्कलाभिधमहाशयैर्मानवीयज्ञानसिद्धान्तमालायामुपोद्घातप्रकरणे सप्तमादिषु परिच्छेदेषु महता निर्भरेण व्यवस्थापितस्य साधारणविज्ञानसत्ताखण्डनस्य सिद्धान्त एवांशतोऽभिधीयते। कामं तदीयतर्कस्य शास्त्रीयत्वेऽपि तस्य परिहासरूपा भाषणसरणिः सर्वथा शास्त्रीयसंवादानर्हाऽस्ति। स्वमतानुकूलां मूलोक्तपरिभाषामनुसृत्य स वदति, प्राणिनोऽवच्छेदकविज्ञानघटका अवयवाः शरीरं प्राण इन्द्रियं स्वैरगतिश्च सन्तीति। तत्र शरीरपदेन तत्तद्व्यक्तिगताकारविशेषनिरपेक्षः पिण्ड एव विवक्षितः। केशपत्रचर्माद्यन्यतमावरणं विहाय कस्याप्याकारविशेषस्य सर्वेषु प्राणिष्वनुगतत्वाभावेऽप्यनावृतत्वाभावात्। केशपत्रचर्मणां केशादिराहित्यस्य च जन्तुविशेषाणां विवेचकधर्मतयाऽवच्छेदकविज्ञानात्मकत्वात्। अत एव स्वैरगतेर्मन्दगमनोड्डयनापसर्पणाद्यन्यतमरूपत्वाभावेऽपि गतिसामान्यरूपता स्त्येव। परं तु तत्र गतेः किंगतित्वमिति तु नानायासेन कल्पनागोचरं भवति ॥

Digitized by Google

धिकव्यापकं विज्ञानमेव स्वस्वबोधाय कल्पितैः शब्दैरुपस्थाप्यते । सर्वमपि व्यापकजातिपदं तादृशमेव विज्ञानं बोधयति, स्वयं चास्ति स्वाश्रयपदार्थानामन्यतमस्यांशरूपमस्तीति च मतं सर्वत्र स्थिरमेकरूपमेव ॥

१० ॥ जातिपदं लक्षणनिर्वचने कुत उपयुज्यते । पदार्थनिर्वचने परजातिपदप्रयोगो ऽर्थाल्लक्षणीयपदार्थापेक्षया व्यापकार्थबोधकपदप्रयोगो न तस्य तं प्रत्यावश्यकत्वाद् अपि तु परजातिपदप्रतिपाद्यानेकतत्तद्व्यक्तिपरिगणनायासनिवारकत्वात् तादृशानन्तव्यक्तिपरिगणनासामर्थ्यलज्जानिवारकत्वाद्वा । यद्यपि जातिपदद्वारा लक्षणकरणं लघुतमः पन्थास्तथापि तथाकरणं साधीयो न वेति संदिग्धमेव । तस्य पदार्थनिर्वचनं प्रति व्यतिरेकानुविधायित्वाभावेनात्यन्तावश्यकत्वाभावात् । लक्षणीयपदप्रतिपाद्यार्थस्य विशेष्यविशेषणभावापन्नपदकदम्बेन परं प्रति बोधनमेव हि लक्षणमिति तत्पदप्रतिपाद्यनावद्विज्ञानव्यक्तीनां परिगणनेन लक्षणकरणस्यैव साधुत्वात् । नन्वेवं तादृशव्यक्तिपरिगणनस्य स्थाने परजातिपदप्रयोगो लोकैः कस्मात्क्रियत इति चेदुच्यते । लाघवेन शीघ्रं बोधायैव न पुनरधिकसुस्पष्टबोधनायावश्यको (जातिपदप्रयोग) इतिकृत्वापि । यतो मनुष्यपदाभिधेयं विज्ञानं किंरूपमस्तीति जिज्ञासायां प्राणेन्द्रियस्वैरगतिघनताकारतर्कशक्तिमद्द्रव्यं मनुष्य इति यदि कश्चन लक्षणं कुर्यात् तर्हि मन्ये निःसंदेहं तेन लक्षणेन मनुष्यपदाभिधेयोऽर्थस्तथैव सुस्पष्टं बुध्येत यावद्युक्ततया विवेकशाली जीव इति लक्षणेन बुध्यते । इदं च लक्षणं जीवः प्राणी मूर्तमित्यादिपदानां पृथक् पृथगर्थनिर्वचनेन स्वयमेव मनुष्यपदाभिधेयतावत्परिगणितव्यक्तीर्बोधयति । अहं तु संप्रति मनुष्यपदार्थनिर्वचने विद्वज्जनपरिगृहीतं साधारणलक्षणमेवानुसरामि । एतस्य याथार्थ्यस्य विवादयस्तत्त्वे ऽपि मदीयप्रस्तुतकार्यनिर्वाहाय पर्याप्तत्वात् । अत्रोदाहरणे जातिपदावच्छेदकपदयोः प्रयोगो लक्षणे आवश्यक इति नियमस्य फलं ज्ञातुं शक्यते । किं च तत्तत्पदार्थस्य याथार्थ्यपरीक्षणोपयोगित्वं स्वल्पमेवावश्यकत्वं चास्य नियमस्यानेन प्रदर्श्यते । एकस्य पदस्यानेकपदैस्तथाविवरणं येन तत्पदप्रतिपाद्योऽर्थो नियमेन ज्ञायेतेतिकृत्वा ‘सर्वस्य पदमात्रस्यार्थो याथार्थ्येन स्फुटतया चापरपदद्वयेन ज्ञापयितुं शक्यते’ इति तार्किकनियमानुसारेणैव न सर्वो ऽपि वाग्व्यवहारः प्रवर्तते । अत एवैतद्विरुद्धमेव बहुत्रोपलभ्यते । प्रत्युत ये तथाविधं नियमं परिकल्पयन्ति ते ऽपि तद्विरुद्धमेव व्यवहरन्ति । इतो ऽधिकं यल्लक्षणविषये वक्तव्यं तदुद्यमाणपरिच्छेदे निरूपयिष्यते ॥

११ ॥ जातिपदानि सामान्यपदानि वा बौद्धान्येव सन्ति ॥ प्रकृतमनुसरामः । पूर्वोक्तवर्णनेनैतद्युक्तमभिहितं भवति । जातिपदानि न तथाविधजातिरूपसद्वस्तुसंबन्धीनि सन्त्यपि तु स्वस्वव्यवहारसौकर्याय परिकल्पितानि शब्दविज्ञानान्यतरसंबद्धानि बौद्धार्थज्ञापकान्येव । पूर्वोक्तदिशा यदा पदानि जातिसामान्यविज्ञानबोधाय प्रयुज्यन्ते तदा सामान्यतो ऽनेकव्यक्तिबोधनसमर्थानि जातिपदानि भवन्ति । यदा च विज्ञानान्यनेकवस्तुव्यक्तिसंनिधितया व्यवस्थाप्यन्ते तदा तानि सामान्यविज्ञानानीति गीयन्ते । परं तु सामान्यं साक्षात्तादृशवस्तुसंबद्धं न भवति यानि वस्तूनि वस्तुतः सर्वाणि व्यक्तिरूपाण्येव सन्ति, नापि विज्ञानैस्तच्छब्दैश्च संबद्धं भवति ये शब्दा अर्थतः सामान्या भवन्ति । अत एव व्यक्तीनां परित्यागे जातयः केवलं काल्पनिकसृष्टिरूपा एवावशिष्यन्ते । सामान्यस्य सामान्यत्वं तु तत्तदनेकव्यक्तिबोधानुकूलात्मनिष्ठशक्तेर्न किमप्यतिरिच्यते । शब्देष्वर्थबोधकतायाः केवलमात्मकल्पितशब्दार्थसंबन्धरूपत्वात् ॥

१२ ॥ अवच्छेदकविज्ञानानि परापरजात्योरसाधारणस्वरूपाणि ॥ —अथ को ऽयं यो जातिपदैरभिधीयते । तस्य केवलैकव्यक्तिमात्ररूपत्वे जातिपदमेव व्युच्छिद्येत सर्वेषामेकमात्रव्यक्तिबोधकतया सर्वाणि व्यक्तिपदान्येव स्युः । एवं व्यक्तिसमुदायमात्रात्मकत्वे मनुष्यो मनुष्या इत्यनयोरनर्थान्तरतापातः । वैयाकरणैरुपदर्शितैकवचनादिव्यवस्थाप्यपार्थैव स्यादिति चेदुच्यते । जातिपदानि वस्तूनां जातिमेवाभिदधति । सर्वस्यापि पदस्यात्मगतावच्छेदकविज्ञानलिङ्गत्वात् । यथा सर्वाणि विद्यमानवस्तूनि तदेकविज्ञानानुगतान्युपलभ्यन्ते तथैव तानि सर्वाणि तदेकनामवाच्यतां प्रयान्ति । तत्पदाभिधेयजातिमन्ति भवन्तीति यावत् । इत्थं च जातीनामसाधारणस्वरूपाणि, वस्तूनामपरजातयो वा ऽवच्छेदकविज्ञानान्येवेति सिद्धम् । तत्तदपरजातेरसाधारणस्वरूपवत्तायास्तज्जातीयत्वसंपादकत्वात्, तत्तत्पदवाच्यविज्ञानसाजात्यस्य च तत्तत्पदवाच्यतार्हताप्रयोजकतया ऽवश्यमसाधारणस्वरूपवत्त्वं पदवाच्यविज्ञानसाजात्यादभिन्नमेव । यत्किंचिज्जातिमत्त्वस्य तज्जातिबोधकपदबोध्यतार्हतारूपत्वात् ॥ तथाहि मनुष्यत्वं मनुष्यजातीयत्वं मनुष्यपदवाच्यतार्हत्वमित्येतत्त्रितयम्, एवं मनुष्यो मनुष्यजातीयो मनुष्यपदवाच्यत्वार्ह इत्येतत्त्रितयं चानर्थान्तरमेव । इत्थं च मनुष्यपदाभिधेयत्वार्हत्वस्य मनुष्यत्वस्य वा मनुष्यपदाभिधेयविज्ञानानतिरिक्तत्वाद् मनुष्यत्वमनुष्यत्वसजातीयत्वयोस्तज्जातेरसाधारणस्वरूपानतिरिक्तत्वाच्च मनुष्यपदाभिधेयावच्छेदकविज्ञानं तज्जातेरसाधारणस्वरूपादभिन्नमेव । एतदुक्तं भवति । यत्किंचिद्वस्तुजातेरसाधारणस्वरूपं तत्प्रयोज्यं तज्जातिमत्त्वं च बुद्धिपरिकल्पितमेव रूपं यत्साधारणधर्मानवच्छिन्नं रचयति ।

॥ शेषमग्रे ॥

SARVA-DARS'ANA-SANGRAHA.

CHAPTER VI.

THE PÁS'UPATA SYSTEM OF NAKULÍS'A.

(*Continued from page* 242.)

Certain Māheśvaras disapprove of this doctrine of the Vaishnavas known by its technicalities of the servitude of souls and the like, inasmuch as bringing with it the pains of dependence upon another, it cannot be a mean of cessation of pain and other desired ends. They recognise as stringest such arguments as Those depending on another and longing for independence do not become emancipated, because they still depend upon another, being destitute of independence like ourselves and others, and Liberated spirits possess the attributes of the supreme Deity, because at the same time that they are spirits they are free from the germ of every pain as the supreme Deity is. Recognising these arguments these Māheśvaras adopt the Pāśupata system which is conversant about the exposition of five categories, as the means to the highest end of man. In this system the first aphorism is Now then we shall expound the Pāsupata union and rites of Pasupati. The meaning is as follows. The word Now refers to something antecedent, and this something antecedent is the disciple's interrogation of the spiritual teacher. The nature of a spiritual teacher is explicated in the Gaṇa-kārikā.

But there are eight pentads to be known, and a group, one, with three factors ;

He that knows this ninefold aggregate is a self-purifier, a spiritual guide.

The acquisitions, the impurities, the expedients, the localities, the perseverance, the purifications,

The initiations, and the powers are the eight pentads ; and there are three functions.

The employment in the above line of the neuter numeral three *(trini)*, instead of the feminine three *(tisrah)* is a Vedic construction.

(a). Acquisition is the fruit of an expedient while realising, and is divided into five members viz, knowledge, penance, permanence of the body, constancy, and purity. Thus Haradattāchārya says : Knowledge, penance permanence, constancy, and purity as the fifth.

(b). Impurity is an evil condition pertaining to the soul. This is of five kinds, false conception and the rest. Thus Haradatta also says :

False conception, demerit, attachment, interestedness, and falling,

These five, the root of bondage, are in this system especially to be shunned.

(c). An expedient is a means of purifying the aspirant to liberation.

These expedients are of five kinds, use of habitation and the rest. Thus he also says :

Use of habitation, pious muttering, meditation, constant recollection of Rudra,

And apprehension, are determined to be the five expedients of acquirements.

(d). Locality is that by which after studying the categories, the aspirant attains increase of knowledge and austerity ; *viz.* spiritual teachers and the rest. Thus he says :

The spiritual teachers, a cavern, a special place, the burning-ground, and Rudra only.

(e). Perseverance is the endurance in one or other of these pentads until the attainment of the desired end, and is distributed into the differenced and the rest. Thus it is said :

The differenced, the undifferenced, muttering, acceptance, and devotion as the fifth.

॥ सर्वदर्शनसङ्ग्रहः ॥

तदेतद्वैष्णवमतं दासत्वादिपदवेदनीयं परतन्त्रदुःखावहत्वान्न दुःखान्ताद्दीप्सितावहमित्यरोचयमानाः पारमैश्वर्य्यं कामयमानाः पराभिमता मुक्ता न भवन्ति परतन्त्रत्वात् पारमैश्वर्य्यरहितत्वादस्मदादिवत् मुक्तात्मानश्च परमेश्वरगुणसम्बन्धिनः पुरुषत्वे सति समस्तदुःखबीजविधुरत्वात् परमेश्वरवदित्याद्यनुमानं प्रमाणं प्रतिपद्यमानाः केचन माहेश्वराः परमपुरुषार्थसाधनपञ्चार्थप्रपञ्चनपरं पाशुपतशास्त्रमाश्रयन्ते। तत्रेदमादिमं सूत्रम्, अथातः पशुपतेः पाशुपतयोगविधिं व्याख्यास्याम इति। अस्यार्थः अत्राथशब्दः पूर्व्वप्रकृतापेक्षः। पूर्व्वप्रकृतश्च गुरुं प्रति शिष्यस्य प्रश्नः। गुरुस्वरूपं गणकारिकायां निरूपितम्।

पञ्चकास्त्वष्ट विज्ञेया गणश्चैकस्त्रिकात्मकः।
वेत्ता नवगणस्यास्य संस्कर्त्ता गुरुरुच्यत इति॥

लाभा मला उपायाश्च देशोऽवस्था विशुद्धयः।
दीक्षाकारिबलान्यष्टौ पञ्चकास्त्रीणि वृत्तय इति॥

तिस्रो वृत्तय इति प्रयोक्तव्ये त्रीणि वृत्तय इति छान्दसः प्रयोगः। तत्र विधीयमानमुपायफलं लाभः ज्ञानतपोदेवनित्यत्वस्थितिशुद्धिभेदात् पञ्चविधः। तदाह हरदत्ताचार्य्यः, ज्ञानं तपोऽथ नित्यत्वं स्थितिः शुद्धिश्च पञ्चममिति। आत्माश्रितो दुष्टभावो मलः स मिथ्याज्ञानादिभेदात् पञ्चविधः। तदप्याह

मिथ्याज्ञानमधर्म्मश्च सक्तिहेतुश्च्युतिस्तथा।
पशुत्वमूलं पञ्चैते तन्त्रे हेया विविक्तित इति॥

साधकस्य शुद्धिहेतुरुपायः वासचर्य्यादिभेदात्पञ्चविधः। तदप्याह

वासचर्य्या जपो ध्यानं सदा रुद्रस्मृतिस्तथा।
प्रतिपत्तिश्च लाभानामुपायाः पञ्च निश्चिता इति॥

येनार्थानुसन्धानपूर्व्वकं ज्ञानतपोवृद्धी प्राप्नोति स देशो गुरुजनादिः। यदाह

Digitized by Google

(f). Purification is the putting away, once for all, of false conception and the other four impurities; It is distributed into five species according to the five things to be put away. Thus it is said:

The loss of ignorance, of demerit of attachment, of interestedness,

And of falling, is declared to be the five-fold purification of the state of bondage.

(g). The five initiations are thus enumerated:

The material, the proper time, the rite, the image, and the spiritual guide as the fifth.

(h). The five powers are as follow:

Devotion to the spiritual guide, clearness of intellect, conquest of pleasure and pain,

Merit and carefulness, are declared the five heads of power.

The three functions are the modes of earning daily food consistent with propriety, for the diminution of the five impurities, *viz.* mendicancy, living upon alms, and living upon what chance supplies. All the rest is to be found in the standard words of this sect.

In the first aphorism above recited the word Now serves to introduce the exposition of the termination of pain (or emancipation), that being the object of the interrogation about the putting away of pain personal, physical, and hyperphysical. By the word *paśu* we are to understand the effect (or created world), the word designating that which is dependent on something ulterior. By the word *pati* we are to understand the cause (or *principium*), the word designating the lord who is the cause of the universe, the *pati*, or ruler. The meaning of the words sacrifices and rites every one knows.

In this system the cessation of pain is of two kinds, impersonal and personal. Of these the impersonal consists in the absolute extirpation of all pains; the personal in supremacy consisting of the visual and active powers. Of these two powers the visual, while only one power, is according to its diversity of objects, indirectly describable as of five kinds, vision, audition, cogitation, discrimination, and omniscience. Of these five, vision is cognition of every kind of visual, tactual and other sensible objects, though imperceptible, intercepted, or remote. Audition is cognition of principles, conversant about all articulate sounds. Cogitation is cognition of principles, conversant about all kinds of thoughts. Discrimination is cognition of principles conversant about the whole system of institutes, according to the text, and according to its significance. Omniscience is cognition of principles ever arising and pervaded by truth, relative to all matters declared or not declared, summary or in detail, classified, and specialised. Such is this intellectual power.

The active power, though one only, is indirectly describable as of three kinds, the possession of the swiftness of thought, the power of assuming forms at will, and the faculty of expatiation. Of these the possession of the swiftness of thought is ability to act with unsurpassable celerity. The power of assuming forms at will is the faculty of employing at pleasure, and irrespective of the efficacy of works, the organs similar and dissimilar of an infinity of organisms. The faculty of expatiation is the possession of transcendent supremacy even when such organs are not employed. Such is this active power.

All that is effected or educed, depending on something ulterior, it is threefold, sentiency, the insentient, and the sentient. Of these sentiency is the attribute of the sentients. It is of two degrees according to its

---

गुरुर्जनो गुहादेशः श्मशानं रुद्र एव चेति ।

अलाभप्राप्तेरेकतमादौ यदवस्थानं सावस्था व्यक्तादिविशेषेण विशिष्टा । तदुक्तम्

व्यक्ताव्यक्तजपादानं निष्ठा चैव हि पञ्चमीमिति ।

मिथ्याज्ञानादीनामत्यन्तव्यपोहो विशुद्धिः । सा प्रतियोगिभेदात् पञ्चविधा । तदुक्तम्

अज्ञानस्याप्यसङ्गस्य हानिः सङ्गकरस्य च ।
च्युतेर्हानिः पशुत्वस्य शुद्धिः पञ्चविधा स्मृतेति ॥

दीक्षाकारिपञ्चकं चोक्तम्

द्रव्यं कालः क्रिया मूर्त्तिर्गुरुश्चैव हि पञ्चम इति ।

बलपञ्चकञ्च

गुरुभक्तिः प्रसादश्च मतेर्द्वन्द्वजयस्तथा ।
धर्म्मश्चैवाप्रमादश्च बलं पञ्चविधं स्मृतमिति ॥

पञ्चमललघूकरणार्थं मानामानविरोधिनोऽर्जनोपाया वृत्तयः भैक्ष्योत्सृष्टयथालब्धाभिधा इति ॥ शेषमशेषमाकर एवावगन्तव्यम् ॥

अत्राथशब्देन दुःखान्तस्य प्रतिपादनम् आध्यात्मिकादिदुःखव्यपोहप्रश्नार्थत्वात्तस्य पशुशब्देन कार्य्यस्य परतन्त्रवचनत्वात्तस्य, पतिशब्देन कारणस्येश्वरः पतिरीशितेति जगत्कारणीभूतेश्वरवचनत्वात्तस्य । योगविधी तु प्रसिद्धौ ।

तत्र दुःखान्तो द्विविधः अनात्मकः सात्मकश्चेति तत्रानात्मकः सर्व्वदुःखानामत्यन्तोच्छेदरूपः सात्मकस्तु दृक्क्रियाशक्तिलक्षणमैश्वर्य्यम् । यत्र दृक्शक्तिरेकापि विषयभेदात् पञ्चविधोपचर्य्यते दर्शनं श्रवणं मननं विज्ञानं सर्व्वज्ञत्वञ्चेति । तत्र सूक्ष्मावहितविप्रकृष्टाशेषचाक्षुषस्पर्शादिविषयं ज्ञानं दर्शनम् । अशेषशब्दविषयं सिद्धिज्ञानं श्रवणम् । समस्तचिन्ताविषयं सिद्धिज्ञानं मननम् । निरवशेषशास्त्रविषयं ग्रन्थतोऽर्थतश्च सिद्धिज्ञानं विज्ञानम् । उक्तानुक्ताशेषार्थेषु समासविस्तरविभागविशेषतश्च तत्त्वव्याप्तसदोदितसिद्धिज्ञानं सर्व्वज्ञत्वम् इत्येषा धीशक्तिः । क्रियाशक्तिरेकापि त्रिविधोपचर्य्यते

Digitized by Google

nature as cognitive or incognitive. Cognitive sentiency is dichotomised as proceeding discriminately and as proceeding indiscriminately. The discriminate procedure, manifestable by the instruments of knowledge, is called the cogitative. For by the cogitant organ every sentient being is cognisant of objects in general, discriminated or not discriminated, when irradiated by the light which is identical with the external things. The incognitive sentiency, again, is either characterised or not characterised by the objects of the sentient soul.

The insentient, which while unconscious is dependent on the conscious, is of two kinds, as styled the effect and as styled the cause. The insentient styled the effect is of ten kinds, viz. the earth and the other four elements, and their qualities, colour and the rest. The insentient called the causal insentient, is of thirteen kinds, viz. the five organs of cognition, the five organs of action, and the three internal organs, intellect, the egoising principle, and the cogitant principle; which have for their respective functions ascertainment, the illusive identification of self with not-self, and determination.

The sentient spirit, that to which transmigratory conditions pertain, is also of two kins, the appetent and non-appetent. The appetent is the spirit associated with an organism and organs; the non-appetent is the spirit apart from organism and organs. The details of all this are to be found in the Panchārtha-bhāshya-dīpikā and other works. The cause is that which retracts into itself and evolves the whole creation. This though one is said to be divided according to a difference of attributes and actions (into Maheśvara, Vishṇu &c.) The lord is the possessor of infinite visual and active power. He is absolutely first as connected eternally with this lordship or supremacy, as possessing a supremacy not adventitious or contingent. This is expounded by the author of the Adarśa and other institutional authorities.

Union is a conjunction of the soul with God through the intellect, and is of two degrees, that characterised by action and that characterised by cessation of action. Of these, union characterised by action consists of pious muttering, meditation, and so forth; union characterised by cessation of action is called consciousness, &c.

Rite or ritual is activity efficacious of merit as its end. It is of two orders, the principal and the subsidiary. Of these the principal is the direct means of merit, religious exercise. Religious exercise is of two kinds, acts of piety and postures. The acts of piety are bathing with sand, lying upon sand, oblations, mutterings, and devotional perambulation. Thus the revered Nakulīśa says:

He should bathe thrice daily, he should lie upon the dust. Oblation is an observance divided into six members. Thus the author of the aphorisms says:

> He should worship with the six kinds of oblation, viz. laughter, song, dance, muttering *hum*, adoration, and pious ejaculation.

Laughter is a loud laugh, Aha, Aha, by dilatation of the throat and lips. Song is a celebration of the qualities, glories, &c. of Maheśvara according to the conventions of the Gandharva-śāstra or art of music. The dance also is to be employed according to the *ars saltataria*, accompanied with gesticulations with hands and feet, and with motions of the limbs, and

---

मनोजवित्वं कामरूपित्वं विकरणधर्म्मित्वञ्चेति । तत्र निरतिशयशीघ्रकारित्वं मनोजवित्वम् । कर्म्मादिनिरपेक्षस्य स्वेच्छयैवानन्तसलक्षणविलक्षणस्वरूपकरणाधिष्ठातृत्वं कामरूपित्वम् । उपसंहृतकरणस्यापि निरतिशयैश्वर्य्यसम्बन्धित्वं विकरणधर्म्मित्वमित्येषा क्रियाशक्तिः । यदस्वतन्त्रं सर्व्वं कार्य्यं त्रिविधं विद्या कला पशुश्चेति । तत्र पशुगुणो विद्या सापि द्विविधा । बोधाबोधस्वभावभेदात् । बोधस्वभावा विवेकाविवेकप्रवृत्तिभेदाद् द्विविधा, तत्र या विवेकप्रवृत्तिः प्रमाणमात्रव्यङ्ग्यया चित्तेत्युच्यते । चित्तेन हि सर्व्वः प्राणी बाह्यार्थात्मकप्रकाशानुगृहीतं सामान्येन विवेचितमविवेचितञ्चार्थं चेतयते इति । पशवर्थधर्म्माधर्म्मिका पुनरबोधात्मिका विद्या स्वभावं येनोच्यते चेतनपरतन्त्रत्वे सत्यचेतना कला सापि द्विविधा कार्य्याख्या कारणाख्या चेति । तत्र कार्य्याख्या दशविधा पृथिव्यादीनि पञ्चतत्त्वानि रूपादयः पञ्चगुणाश्चेति । कारणाख्या त्रयोदशविधा ज्ञानेन्द्रियपञ्चकं कर्म्मेन्द्रियपञ्चकम् अध्यवसायाभिमानसङ्कल्पाभिधवृत्तिभेदाद् बुद्ध्यहङ्कारमनोलक्षणमन्तःकरणत्रयञ्चेति । पशुत्वसम्बन्धी पशुः सोऽपि द्विविधः साञ्जनो निरञ्जनश्चेति । तत्र साञ्जनः शरीरेन्द्रियसम्बन्धी निरञ्जनस्तु तद्रहितः । तत्प्रपञ्चस्तु पञ्चार्थभाष्यदीपिकादौ द्रष्टव्यः । समस्तसृष्टिसंहारानुग्रहकारि कारणं तस्यैकस्यापि गुणकर्म्मभेदापेक्षया विभाग उक्तः पतिः साद्य इत्यादिना । तत्र पतित्वं निरतिशयदृक्क्रियाशक्तिमत्त्वं तेनैश्वर्य्येण नित्यसम्बन्धित्वम् आद्यत्वमनागन्तुकैश्वर्य्यसम्बन्धित्वम् इत्यादर्शकारादिभिस्तीर्थकरैर्निरूपितम् ॥

चित्तद्वारेणात्मेश्वरसम्बन्धो योगः । स च द्विविधः क्रियालक्षणः क्रियोपरमलक्षणश्चेति । तत्र जपध्यानादिरूपः क्रियालक्षणः क्रियोपरमलक्षणस्तु संविद्गत्यादिसंज्ञितः ॥ धर्म्मार्थसाधकव्यापारो विधिः । स च द्विविधः प्रधानभूतो गुण-

Digitized by Google

with outward indications of internal sentiment. The ejaculation Hum is a sacred utterance, like the bellowing of a bull, accomplished by a contact of the tongue with the palate, an imitation of the sound *hudung*, ascribed to a bull, like the exclamation Vashat. Where the uninitiated are, all this should be gone through in secret. Other details are too familiar to require exposition.

The postures are snoring, trembling, limping, wooing, acting absurdly, talking nonsensically. Snoring is showing all the signs of being asleep while really awake. Trembling is a convulsive movement of the joints as if under an attack of rheumatism. Limping is walking as if the legs were disabled. Wooing is simulating the gestures of an *innamorato* on seeing a young and pretty woman. Acting absurdly is doing acts which every one dislikes, as if bereft of all sense of what should and what should not be done. Talking nonsensically is the utterance of words which contradict each other or which have no meaning, and the like.

The subsidiary religious exercise is purificatory subsequent ablution for putting an end to the sense of unfitness from begging, living on broken food, &c. Thus it is said by the author of the aphorisms: Bearing the marks of purity by after-bathing,

(It has been stated above that omniscience, a form of the cognitive power, is cognition of principles ever arising and pervaded by truth, relative to all matters declared or not declared, summary, or in detail.) The summary is the enouncement of the subjects of attributes generally. This is accomplished in the first aphorism: (Now, then, we shall expound the Pāśupata union and rites of Paśu-pati). Detail is the five-fold enouncement of the five categories according to the instruments of true knowledge. This is to be found in the Rāsīkara-bhāshya. Distribution is the distinct enouncement of these categories, as far as possible according to definitions. It is an enumeration of these according to their prevailing characters different from that of other recognised systems. For example, the cessation of pain (or emancipation) is in other systems (as in the Sān-khya) the mere termination of miseries, but in this system it is the attainment of supremacy or of the divine perfections. In other systems the create is that which has become and that which shall become, but in this system it is eternal, the spirits and so forth, the sentient and the insentient. In other systems the *principium* is determined in its evolution or creative activity by the efficacy of works, whereas in this system the *principium* is the lord not thus determined. In other institutes union results in isolation &c, while in these institutes it results in cessation of pains by attainment of the divine perfections. In other systems paradise and similar spheres involve a return to metempsychosis, but in this system, they result in nearness to the supreme being either followed or not followed by such return to transmigratoryexperiences.

Great indeed, an opponent may say, is this aggregate of illusions, since if God's causality be irrespective of the efficacy of works, then merits will be fruitless. and all created things will be simultaneously evolved (there being no reason why this should be created at one time, and that, at another), and thus there will emerge two difficulties. Think not so, replies the Páśupata for your supposition is baseless. If the lord, irrespective of the efficacy of works be the cause of all, and

---

भूतश्च। तत्र प्रधानभूतः साक्षाद्धर्म्महेतुः चर्य्या। सा द्विविधा व्रतं द्वाराणि चेति। तत्र भस्मस्नानशय्योपहारजपप्रदक्षिणानि व्रतम्। तदुक्तम् भगवता नकुलीशेन भस्मना त्रिषवणं स्नायीत भस्मनिशयमेतेति। अत्रोपहारो नियमः स च षडङ्गः। तदुक्तं सूत्रकारेण, हसितगीतनृत्यहुडुक्कारनमस्कारजप्यषडङ्गोपहारेण उपतिष्ठेतेति। तत्र हसितं नाम कण्ठोष्ठपुटविस्फूर्जपुरःसरमहहहेत्यट्टहासः। गीतं गान्धर्व्वशास्त्रसमयानुसारेण महेश्वरसम्बन्धिगुणधर्म्मादिनिमित्तानां चिन्तनम्। नृत्यमपि नाट्यशास्त्रानुसारेण हस्तपादादीनामपक्षेपणादिकमङ्गप्रत्यङ्गोपाङ्गसहितं भावाभावसमेतञ्च प्रयोक्तव्यम्। हुडुक्कारो नाम जिह्वातालुसंयोगान्निष्पाद्यमानः पुण्यो वृषनादसदृशो नादः। हुडुगिति शब्दानुकारो वषडितिवत्। यत्र लौकिका भवन्ति तत्रैतत् सर्व्वं गूढं प्रयोक्तम्। शिष्टं प्रसिद्धम्। द्वाराणि तु क्राथनस्पन्दनमन्दनशृङ्गारणावितत्करणावितद्भाषणानि। तत्रासुप्तस्यैव सुप्तलिङ्गप्रदर्शनं क्राथनम्। वाय्वभिभूतस्येव शरीरावयवानां स्पन्दनं कम्पनम्। उपहतपादेन्द्रियस्येव गमनं मन्दनम्। रूपयौवनसम्पन्नां कामिनीमवलोक्यात्मानं कामुकमिव यैर्विलासैः प्रदर्शयति तत् शृङ्गारणम्। कार्य्याकार्य्यविवेकविकलस्येव लोकनिन्दितकर्म्मकरणमवितत्करणम्। व्याहतापार्थकादिशब्दोच्चारणमवितद्भाषणमिति। गुणभूतस्तु चर्य्या अनुग्राहकोऽनुस्नानादिः भैक्ष्योच्छिष्टादिनिर्म्मिता योग्यताप्रत्ययनिवृत्त्यर्थः। तदप्युक्तं सूत्रकारेण अनुस्नाननिर्म्माल्यलिङ्गधारीति। तत्र समासो नाम धर्म्मिमात्राभिधानं तच्च प्रथमसूत्र एव कृतम्। पञ्चानां पदार्थानां प्रमाणतः पञ्चाभिधानं विस्तरः। स खलु राशीकरभाष्ये द्रष्टव्यः। एतेषां यथासम्भवं लक्षणतोऽसङ्करेणाभिधानं विभागः स तु विहितशास्त्रान्तरेभ्योऽमीषां गुणातिशयेन कथनं विशेषः। तथा हि अन्यत्र दुःखनिवृत्तिरेव दुःखान्तः इह तु पारमैश्वर्य्यप्राप्तिश्च। अन्यत्राभूत्वा भावि कार्य्यमिह तु नित्यं पश्वादि। अन्यत्र सापेक्षं कारणं इह तु निरपेक्षो भगवानेव। अन्यत्र कैवल्यादिफलके योगः इह तु पारमैश्वर्य्य-

thus the efficacy of works be without results, what follows? If you rejoin that an absence of motives will follow, in whom, we ask, will this absence of motives follow? If the efficacy of works be without result, will causality belong to the doer of the works, as to the lord? It cannot belong to the doer of the works, for it is allowed that the efficacy of works is fruitful only when furthered by the will of the creator, and the efficacy so furthered may sometimes be fruitless, as in the case of the works of Yayāti and others. From this it will by no means follow that no one will engage in works, for they will engage in them as the husbandman engages in husbandry though the crop be uncertain. Again sentient creatures engage in works because they depend on the will of the creator. Nor does the causality pertain to the lord alone, for as all his desires are already satisfied he cannot be actuated by motives to be realised by works. As for your statement, continues the Pāśupata, that all things will be simultaneously evolved, this is unreasonable, inasmuch as we hold that causal efficiency resides in the unobstructed active power which conforms itself to the will of the lord whose power is inconceivable. It has accordingly been said by those versed in sacred tradition:

> Since he acting according to his will is not actuated by the efficacy of works,
>
> For this reason is he in this system the cause of all causes.

Some one may urge: In another system emancipation is attained through a knowledge of God, where does the difference lie? Say not so, replies the Pāśupata, for you will be caught in a dilemma. Is the mere knowledge of God, the cause of emancipation, or the presentation, or the accurate characterisation, of God? Not the mere knowledge, for then it would follow that the study of any system would be superfluous, inasmuch as without any institutional system, one might like the uninstructed, attain emancipation by the bare cognition that Mahādeva is the lord of the gods. Nor is presentation, or intuition of the deity, the cause of emancipation, for no intuition of the deity is competent to sentient creatures burdened with an accumulation of various impurities, and able to see only with the eyes of the flesh. On the third alternative, viz. that the cause of emancipation is an accurate characterisation of the deity, you will be obliged to consent to our doctrine, inasmuch as such accurate characterisation cannot be realised apart from the system of the Pāśupatas. Therefore it is that our great teacher has said:

> If by mere knowledge, it is not according to any system; but intuition is unattainable;
>
> There is no accurate characterisation of principles otherwise than by the five categories.

Therefore those excellent persons who aspire to the highest end of man must adopt the system of the Pāśupatas, which undertakes the exposition of the five categories.

A. E. G.

दुःखान्तफलकः । अन्यत्र पुनरावृत्तिः स्वर्गादिः इह पुनरपुनरावृत्तिरूपः सामीप्यादिफलकः ॥

ननु महदेतदिन्द्रजालं यन्निरपेक्षं परमेश्वरकारणमिति तथात्वे कर्म्मवैफल्यं सर्व्वकार्य्याणां समसमयसमुत्पादश्चेति दोषद्वयं प्रादुःष्यात् । मैवं मन्येथाः व्यधिकरणत्वात् । यदि निरपेक्षस्य भगवतः कारणत्वं स्यात्तर्हि कर्म्मणो वैफल्ये किमायातम् । प्रयोजनाभाव इति चेत् कस्य प्रयोजनाभावः । कर्म्मवैफल्ये कारणं किं कर्म्मिणः किंवा भगवतः । नाद्यः ईश्वरेच्छानुगृहीतस्य कर्म्मणः सफलत्वोपपत्तेः तदनुगृहीतस्य ययातिप्रभृतिकर्म्मवत् कदाचित् निष्फलत्वसम्भवाच्च । न चैतावता कर्म्मस्वप्रवृत्तिः कर्षकादिवदुपपत्तेः । ईश्वरेच्छायत्तत्वाच्च पशूनां प्रवृत्तेः । नापि द्वितीयः परमेश्वरस्य पर्य्याप्तकामत्वेन कर्म्मसाध्यप्रयोजनापेक्षाया अभावात् । यदुक्तं समसमयसमुत्पाद इति तदप्ययुक्तम् अचिन्त्यशक्तिकस्य परमेश्वरस्येच्छानुविधायिन्या अव्याहतक्रियाशक्त्या कार्यकारित्वाभ्युपगमात् । तदुक्तं सम्प्रदायविद्भिः ॥

> कर्म्मादिनिरपेक्षस्तु स्वेच्छाचारी यतो ह्ययम् ।
> ततः कारणतः शास्त्रे सर्व्वकारणकारणमिति ॥

ननु दर्शनान्तरेऽपीश्वरज्ञानान्मोक्षो लभ्यत एवेति कुतोऽस्य विशेष इति चेन्मैवं वादीः । त्रिकल्पानुपपत्तेः, किमीश्वरविषयज्ञानमात्रं निर्व्वाणकारणं किं वा साक्षात्कारः अथवा यथावत्तत्त्वनिश्चयः । नाद्यः शास्त्रमन्तरेणापि प्राकृतजनवद्देवानामधिपो महादेव इति ज्ञानोत्पत्तिमात्रेण मोक्षसिद्धौ शास्त्राभ्यासवैफल्यप्रसङ्गात् । नापि द्वितीयः अनेकमलप्रचयोपचितानां पिशितलोचनानां पशूनां परमेश्वरसाक्षात्कारानुपपत्तेः । तृतीयेऽस्मन्मतापातः पाशुपतशास्त्रमन्तरेण यथावत्तत्त्वनिश्चयानुपपत्तेः तदुक्तमाचार्य्यैः ॥

> ज्ञानमात्रे यथा शास्त्रं साक्षाद्दृष्टिस्तु दुर्लभा ।
> पञ्चार्थादन्यतो नास्ति यथावत्तत्त्वनिश्चय इति ॥

तस्मात् पुरुषार्थकामैः पुरुषधौरेयैः पञ्चार्थप्रतिपादनपरं पाशुपतशास्त्रमाश्रयणीयम् ॥

इति सर्व्वदर्शनसङ्ग्रहे नकुलीशपाशुपतदर्शनम् ॥

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO, AT THE MEDICAL HALL PRESS, BENARES.

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google